2.2

The Kārikāvalī-Muktāvalī-Dinakarī

with the Commentary

Rājīvollāsa

by

Mahāmahopadhyāya - Śāstrakalpadruma

Śrī N.S. Ramanuja Tatacharya

PART - 1

Pratyakṣa-Khaṇḍa and Anumāna-Khaṇḍa

Edited by

N.Veezhinathan

(Disciple of Śrī N.S. Ramanuja Tatacharya)

Sri Sri Sri

Mahalakshmi-Mathrubhutheswarar Trust

Chennai

2012

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

શ્રી મહામહોપાધ્યાયેભ્યઃ,
રાષ્ટ્રપતિપ્રશસ્તિપુરસ્કૃતેભ્યઃ
અનવરત ન્યાયશાસ્ત્રપાઠને નિરતેભ્યઃ
વિદ્વદ્વરેણ્યેભ્યઃ શ્રી આચાર્ય વસિષ્ઠ
ત્રિપાઠિ મહોદયેભ્યઃ ભક્ત્યા સંપ્રદીયતે ॥

By. શ્રી ઉત્તરાદિમઠઃ કાશી
પં કૃષ્ણાચાર્ય કાશી
રઘુપતિઆચાર્ય કાશી

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

The Kārikāvalī-Muktāvalī-Dinakarī with the Commentary Rājīvollāsa

by

Mahāmahopādhyāya - Śāstrakalpadruma

Śrī N.S. Ramanuja Tatacharya

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

The Kārikāvalī-Muktāvalī-Dinakarī

with the Commentary

Rājīvollāsa

by

Mahāmahopādhyāya - Śāstrakalpadruma

Śrī N.S. Ramanuja Tatacharya

Part - 1

Pratyakṣa-Khaṇḍa and Anumāna-Khaṇḍa

Edited by

N. Veezhinathan

(Disciple of Śrī N. S. Ramanuja Tatacharya)

Sri Sri Sri

Mahalakshmi-Mathrubhutheswarar Trust

Chennai

2012

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

First Edition: 2012

©Reserved

Copies: 1000

Price: 950 / -

Published by:
Sri Sri Sri Mahalakshmi Mathrubhutheswarar Trust
[S S S M M Trust (Regd)]
New No. 23, First Street,
South Gopalapuram, Chennai - 600 086.
Email:
sssmmtrust@gmail.com
Websites:
www.manimantapam.org

Printed at:
Elango Achukoodam,
Mylapore, Chennai-600 004.
Phone: 91-44-2499 1821
Cell: 9884184061

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

Reverentially Dedicated

To

Jagadguru

Śrīmacchandraśekharendra Sarasvatī

Bhagavatpūjyapādāḥ

The Mirror of Grace

and


The Majesty Divine

on the sacred occasion of Jagadguru's

Nineteenth Āradhanā Celebrations.

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri



CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

PREFACE

The *Kārikāvalī-Muktāvalī* of Viśvanātha Pañcānana is a popular manual of the Nyāya-Vaiśeṣika system. The latter is a blend of two doctrines, namely, the Nyāya and the Vaiśeṣika. Gautama and Kaṇāda were respectively the first exponents of the two doctrines. The *Nyāya-sūtra* of Gautama constitutes the basic text of aphorisms for the Nyāya system. Vātsyāyana of 300 A.D wrote his *bhāṣya* on the *Nyāya-sūtra*. The views enunciated therein have been unfavourably criticized by the Buddhistic thinker Diṅnāga. Uddyotakāra, who flourished during 600 A.D., wrote a commentary on the *bhāṣya* of Vātsyāyana entitled *Vārttika* wherein he has defended Vātsyāyana. The *Vārttika* has been commented upon by Vācaspatimiśra of 841 A.D. in his *Tātparyaṭīkā*.which, in turn, has been commented upon by Udayana of 984 A.D. in his *Tātparya-ṭīkā-pariśuddhi*. Udayana also wrote the *Nyāyakusumāñjali* and the *Ātmatattvaviveka*. In the former he proves the existence of God, and in the latter, the permanence of the individual soul. Both the works are directed against the Buddhists who advocated a theology without God and a psychology without an enduring soul. Jayantabhaṭṭa of 900 A.D. wrote his commentary *Nyāyamañjarī* on select aphorisms of Gautama. Bhāsarvajña who flourished during 1000 A.D. wrote his independent work *Nyāyasāra* with an auto-commentary *Bhūṣaṇa* wherein he has deviated from the traditional theories on the Nyāya school and has introduced new theories. This century marks the close of the old phase of the Nyāya school.

The new phase begins with the work *Tattvacintāmaṇi* of Gaṅgeśopādhyāya who flourished during 1200 A.D. Several commentaries were written on Gaṅgeśa's work. Of these, the commentaries by Vāsudeva Sārvabhauma of 1500 A.D., and his disciple Raghunātha Śiromaṇi are important. Raghunātha's commentary entitled *Dīdhiti* was commented upon by Gadādhara of the same period in his well-known commentary *Gādādharī*.

On the Vaiśeṣika side, the first systematic exposition was made by Kaṇāda in his *Vaiśeṣika-sūtra*. Praśastapāda wrote

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

his *bhāṣya* on it. Upon the *bhāṣya*, Udayana and Śrīdhara of 1000 A.D. wrote their commentaries *Kiraṇāvalī* and *Kandalī* respectively. Śaṅkaramiśra of 1650 A.D. wrote his commentary *Upaskāra* on the *Vaiśeṣika-sūtra*.

Manuals on Nyāya incorporating the Vaiśeṣika categories came to be written from 1100 A.D. onwards. Varadarāja's *Tārkika-rakṣā* (1100 A.D) and Keśava- miśra's *Tarka-bhāṣā* (1275 A.D) are important manuals on the Nyāya-Vaiśeṣika system during this period. Vallabhācārya of 1200 A.D. wrote his *Nyāyalīlāvatī* on the Vaiśeṣika system embodying the Nyāya categories. Annambhaṭṭa and Viśvanātha in their works the *Tarka-saṅgraha-dīpikā* and the *Kārikāvalī-Muktāvalī* treat of the two systems together.

Viśvanātha Pañcānana: His Identity, Date and Works

Viśvanātha Pañcānana, the author of the *Bhāṣā-pariccheda* or *Kārikāvalī* with the auto-commentary, *Siddhānta-muktāvalī* is also the author of the commentary, *Nyāya-sūtra-vṛtti* on the *Nyāya-sūtra* of Gautama, and of the commentary, *Piṅgalamata-prakāśa* on the *Prākṛtapaiṅgala*. In the beginning of the *Nyāya-sūtra-vṛtti*, we find the following verse wherein he mentions that he is the son of *Vidyānivāsa*:

vidyānivasasūnoḥ kṛtireṣā viśvanāthasya.

In the colophon of this work he provides information regarding the date of the composition of the work as 1556 Śaka Era(*rasa-bāṇa-tithau śakendrakāle*). This date corresponds to 1634 A.D. Hence we may take that Viśvanātha flourished during the 17th Cent. A.D.

The text, *Kārikāvalī* consists of 168 verses elucidating the categories of the Nyāya-Vaiśeṣika school. It is also titled *Bhāṣā-pariccheda*; and, the title is significant. It stands for the ascertainment (*pariccheda*) of the essential nature of the categories, ontological and epistemological (*bhāṣā*) — the categories, that are specific to a particular school of thought — by adopting the categoristic method which consists in enumeration (*uddeśa*), classification (*vibhāga*), definition (*lakṣaṇa*), careful investigation and discussion (*parīkṣa*). This text is divided into five sections, viz. *pratyakṣa-khaṇḍa, Anumāna-khaṇḍa, Upamāna-khaṇḍa, Śabda-khaṇḍa, and Guṇa-khaṇḍa.*

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

Commentaries on the Kārikāvalī

Ever since Viśvanātha composed the *Kārikāvalī* with his commentary *Siddhānta-muktāvalī* there has been a tremendous growth in the development of the Nyāya-Vaiśeṣika writings. The variety of this growth is as impressive as its scale. This is evident from the numerous commentaries that were written on the *Kārikāvalī* and the *Muktāvalī*. Mukunda Śarma (1898 A.D) wrote a commentary entitled *Anvitārthadīpika* on the *Kārikāvalī* and it was published by the Nirnaya Sagar Press, Bombay in the year 1922. Nārāyaṇatīrtha who flourished during 1800 A.D. and who was the teacher of Brahmānanda Sarasvati, the commentator on the *Siddhānta-bindu* and the *Advaita-Siddhi* of Madhusūdana Sarasvatī wrote a commentary called *Nyāya-candrikā* also known as *Bhāṣā-pariccheda-jñāpikā* and it was published by the Chaukhamba Sanskrit Samsthan in the year 1981. Ānandacandra Sārvabhauma wrote the commentary *Ānandamayī* and it was published by the Navasārasvata Press, Kolkata in the year 1896. Devīsahāya's commentary, *Kaṇṭhābharaṇa* and Nārayaṇa Bikṣu's commentary, *Bhāṣā-pariccheda-vṛtti* are available in manuscript form at the Sampūrṇānanḍa Viśvavidyālaya, Benaras. Another *Ṭīkā* known as *Muktāvataṁsa* is available in manuscript form at the Government Oriental Manuscripts Library, Chennai.

Commentaries on the Siddhānta-muktāvalī

The numerous commentaries written on the *Siddhānta-muktāvalī* testify to the important place occupied by the latter in the history of Indian Logic. Mahādeva Bhaṭṭa, son of Balakṛṣṇa Bhaṭṭa who flourished during 1800 A.D. wrote the commentary *Muktāvalī-prakāśa* up to the *Upamāna-khaṇḍa*; and, the remaining sections, viz. the *Śabda-khaṇḍa* and the *Guṇa-khaṇḍa* were commented upon by his son, Dinakara Bhatta. And the commentary as a whole came to be called as *Dinakarī*. Rāyanṛsiṁha Śāstrī (1900 A.D) of Ālūri family wrote the commentary, *Prabhā*. Another commentary entitled *Mañjūṣa* or *Tārkika-siddhānta-ratna-mañjūṣa* is incom-

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

plete and it extends up to the portion dealing with *ākāśa* in the *Pratyakṣa-khaṇḍa*. Paṇḍitarāja Śrī Sūryanārayaṇa Śukla wrote two commentaries, one in Sanskrit and another in Hindi entitled *Mayūkha* and *Prakāśa* respectively, and they were published by ŚrīHarikṛṣṇa-Nibandha-Bhavan, Varanasi in the year 1987.

Kavitārkika Nṛsiṁhadeva Śāstrī wrote two commentaries, *Prabhā* and *Saubhāgyavatī* and they were published in the year 1929 by Meharcandra Lakshman Das at Lahore. Jīvarām Lallurām Śāstrī prepared an edition of the *Kārikāvalī-Muktāvalī* with expository notes; and, this was published by the Gujarati Printing Press, Bombay in the year 1935.

There are two more commentaries on the *Siddhānta-muktāvalī*; and, they are: (i) *Kiraṇāvalī* by Śrī Kṛṣṇavallabhācārya published by the Chaukhaṁbha Sanskrit Samsthan, Varanasi in the year 1983; and, (ii) *Muktāvalī-saṁgraha* by Śrī Pañcānana Bhaṭṭācārya published by Chaukhaṁbha Vidyabhavan, Varanasi in the year 1981.

Apart from these, there are quite a few commentaries on the *Siddhānta-muktāvalī* available in manuscript form in the Sampūrṇānanda Viśvavidyālaya. They are: *Gūḍhārthamaṇi* (on *Pratyakṣa-khaṇḍa* only) by Deva Vallabha, *Maṇiprabhā* by Trilocana, *Ṭīkā* by Rudratarkavāgīśa, *Jyotsnā* by Viśvādhikendra Yati, *Mārīcikā* (on *Anumāna-khaṇḍa* only) by *Umākānta*, and *Vivaraṇa* and *Tippaṇi* of unknown authorship.

Commentaries on the Dinakarī

Rāmarudra Bhaṭṭa, son of Rāmeśvara Bhaṭṭa wrote the commentary *Taraṅgiṇī* on the *Dinakarī*. It is also known as *Rāmarudrīya*, and it extends up to the *Śabda-khaṇḍa* only. Gaṅgāramajaṭin (1800 A.D) wrote a *Tippaṇī* in the form of a *kroḍa-patra*. These two works were printed along with *Kārikāvalī*, *Muktāvalī*, *Prabhā*, and *Manjuṣā* at the Balamanorama Press, Chennai in the year 1923. The commentaries, *Dīpikā* and *Gūḍhārthaprakāśikā* of unknown authorship are available in manuscript form at the Saṁpūrṇānanda Viśvavidyālaya, Varanasi.

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

Darśanakalānidhi Dr.Rāma Varma Parīkṣit, the Mahāraja of the Former Princely State of Cochin wrote the commentary *Subodhinī* on the *Kārikāvalī*, *Muktāvalī*, *Dinakarī*, and *Rāmarudrīya*. After collating numerous manuscripts of each of these texts, he has identified the correct readings by giving reasons for preferring one reading to the other. It may be said that he has restored these texts to their original form, i.e. the form intended by their authors. The readings suggested by him are incorporated in the present edition.

Further he elucidates the leading concepts of the Nyāya-Vaiśeṣika school in an accurate and authoritative manner on the basis of a close study of all the texts of that school. And, he justifies the views of Dinakara Bhaṭṭa against which objections have been raised by some commentators. This commentary, therefore, ranks as the most authoritative and outstanding study in the field of Nyāya-Vaiśeṣika. It is an Interpretative Exposition of the texts, *Kārikāvalī*, *Muktāvalī*, *Dinakarī*, and *Rāmarudrīya*.

My revered *Guru*, Prof.N.S. Ramanuja Tatacharya, Former Vice-Chancellor, Kendriya Rashtriya Vidyapitha, Tirupati, and at present Honorary Professor at the French Institute of Pondicherry has written the Commentary *Rājīvollāsa* on the *Dinakarī*. This Commentary explains the Nyāya technicalities in a lucid manner. Prof. Tatacharya is a prolific writer and his works, besides the present one, may be classified under four heads:

1. Critical Editions;
2. Commentaries;
3. Independent Works; and,
4. Research Papers.

Critical Editions

1. *Tattvacintāmaṇi* of Gaṅgeśa with the commentary *Prakāśa* of Rucidattamiśra and the commentary *Nyāyaśikhāmaṇi* of Rāmakṛṣṇādhvarīndra on *Prakāśa*. [Volume I. *Pratyakṣakhaṇḍa*].

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

2. *Tattvacintāmaṇi* of Gaṅgeśa with the commentary *Prakāśa* of Rucidattamiśra and the commentary *Tarkacūḍāmaṇi* of Dharmarājādhvarīndra on *Prakāśa*. [Volume II. *Anumānakhaṇḍa*].

3. *Jñāpakasaṅgraha* of Nāgeśa. This is a critical edition of the text on *Vyākaraṇa* entitled *Jñāpakasaṅgraha* of Nāgeśa. Prof. Tatacharya has edited this work with his commentary *Vivṛti*.

Commentaries

1. *Bālabodhinī* on the *Pañcalakṣaṇī-Gādādharī*.
2. *Vivaraṇa* on the *Vyadhikaraṇa-Gādādharī*.
3. *Bhāvabodhinī* on the *Pakṣatā-Gādādharī*.
4. *Bhāvadīpikā* on the *Avayava-Gādādharī*.
5. *Balapriyā* on the *Tarka-Saṅgraha-Dīpikā-Prakāśikā*.
6. *Vivṛti* on the text on *Vyākaraṇa* entitled *Jñāpaka-saṅgraha* of Nāgeśa.
7. *Bhagavadguṇaratnapeṭikā* on the *Gopālasahasranāma-stotra*.
8. *Tātparyaprakāśikā* on the *Śatadūṣaṇī* of Vedānta Deśika in two volumes.
9. *Nyāyarasāsvādinī* on the *Nyāyapariśuddhi* of Vedānta Deśika
10. *Vidvanmanoramā* on the *Vyutpattivāda* of Gadādhara Bhaṭṭacārya.
11. *Bhāvaprakāśa* on the *Āgamaprāmāṇya* of Yāmunācārya.
12. *Vyākhyā* on the *Bhaṭṭa-rahasya* of Khaṇḍadeva.

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

Independent Works

1. *Pratyakṣa-tattva-cintāmaṇi-vimarśa*

   This work is an interpretative exposition of the *Pratyakṣakhaṇḍa* of the *Tattvacintāmaṇi* of Gaṅgeśa-Upādhyāya or Gaṅgeśa in the light of its commentary - *Prakāśa* of Rucidattamiśra and the super-commentary *Nyāya- śikhāmaṇi* of Rāmakṛṣṇādhvarīndra. Prof. Tatacharya in fifteen well-defined chapters discusses some leading concepts set forth in the above work correlating them with those in other schools of Indian thought.

2. *Jñāpakasaṅgraha-pariśiṣṭa*, a work on *Vyākaraṇa*, along with his auto-commentary, *Vivṛti*.

3. *Śābdabodhamīmāṁsā*

   As Honorary Professor at the French Institute of Pondicherry, Prof. Tatacharya completed the project entitled "An Inquiry into Indian Theories of verbal cognition" in four volumes. He has rendered an exceptionally great service to the scholarly world by bringing together under one roof the minutest details regarding each and every component of the Sanskrit Language according to the schools of Nyāyā, Vyākaraṇa, Mīmāṁsā, and Vedānta. The four volumes are respectively entitled: [i)] The Sentence and Its Significance; [ii)] Case Terminations: Their Significance; [iii)] Nominal Stems: Their Significance; and, [iv)] Verbs and Verbal Suffixes: Their Significance.

Research Papers

Prof. Tatacharya has contributed more than 50 research papers to learned journals. Each one of these is a studied monograph on the topic it covers. All the papers are compiled into a book form entitled *Śāstrārtha-ratna-mālā* by the Rāshṭriya Saṁskṛta Vidyāpīṭha, Tirupati.

The present Volume comprises the first two sections, viz. the *Pratyakṣa-Khaṇḍa* and the *Anumāna-Khaṇḍa* of

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

the *Kārikāvalī-Muktāvalī-Dinakarī* with the Commentary, *Rājīvollāsa*.

Acknowledgements

To my Guru, Tediyur Śrī Krishnamurthy Sastriyar, who initiated me into the Sanskrit language in my early childhood and to whom I owe my knowledge of Sanskrit, I offer my salutations. I am endlessly thankful to Śrī N. Subrahmanian, Śrī K. Vedamurthy, Śrī S. Narayanaswami, Śrī K. Sethuraman *alias* Ramesh, and other fellow devotees for sponsoring the publication of this work under the auspices of The Sri Sri Sri Mahalakshmi Mathrubhutheswarar Trust functioning from Gopalapuram in Chennai. This Trust is engaged in the sublime task of constructing a *Maṇi-maṇṭapa* at the Oririkkai village near Kāñcīpuram as a humble expression of the deep sense of gratitude of the devotees towards our Jagadguru Śrī Śrī Candraśekharendra Sarasvatī Bhagavat-pūjyapādāḥ.

I record my eternal gratitude to Dr. Śrī S. Yejnasubramanian of New Jersey for his generous offer of financial assistance towards this publication. I am overwhelmed by his splendid munificence. His warmhearted readiness to give and his magnanimity, I shall treasure up in my heart for ever.

I thank my children, Renuka and Kamakoti, for the care and patience shown by them in the planning of the overall format and structure of this Volume for and during the press work.

To Dr. C. Murugan, Assistant Professor, Department of Śaiva-Siddhānta, University of Madras, I am grateful for typesetting the whole work. To Śrī M.S. Maniyavan of the Elango Achukhoodam, Chennai, I am thankful for his kind co-operation and neat execution of this work.

Chennai
November 30, 2012.

N. Veezhinathan

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

विषयानुक्रमणिका

(राजीवोल्लासयुता कारिकावली-मुक्तावली - दिनकरी)

प्रत्यक्षपरिच्छेदः

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अनुमानखण्डः

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

साङ्केतिकविवरणम्

सु. सुबोधिनी

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ श्रीः ॥

श्रीगुरुचरणारविन्दाभ्यां नमः ॥

॥ कारिकावली – मुक्तावली – दिनकरी ॥

श्रीरामानुजताताचार्यविरचितया

राजीवोल्लासव्याख्यया

समलङ्कृता ॥

॥ मङ्गलवादः ॥

मुक्तावली

चूडामणीकृतविधुः वलयीकृतवासुकिः ।
भवो भवतु भव्याय लीलाताण्डवपण्डितः ॥

दिनकरी

लक्ष्मीपादयुगं प्रणम्य पितरं श्रीबालकृष्णाभिधं
भारद्वाजकुलाम्बुधौ विधुमिव श्रीगौरवास्याम्बुजात ।
ज्ञात्वाशेषमतं मितेन वचसा सिद्धान्तमुक्तावली-
गूढार्थांस्तनुते यथामति महादेवः परेषां कृते ॥

तत्र तावत् भाषापरिच्छेदव्याख्यानं चिकीर्षुः विश्वनाथपञ्चाननः निर्विघ्न-परिसमाप्तये कृतस्य ईश्वरनिर्देशरूपमङ्गलस्य 'शिष्याः अपि एवं कुर्युः' इति शिष्य-शिक्षायै निबन्धनं कुर्वन् ईश्वरं प्रार्थयते – चूडामणीकृत इति । लीला इति । इदं च विशेष्यम्; न अतः समाप्तपुनरात्तत्वं दोषः ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

वस्तुतस्तु – विधोः किमिति चूडामणीकरणम्? किमर्थं वा वासुकेः वलयीकरणम्? इत्याकाङ्क्षायां निराकाङ्क्षप्रतिपत्तिः न संभवति इति "लीला" इत्यादिविशेषणानुक्तौ विवक्षितान्वयबोधाभावात् न अयम् अत्र दोषः । **उत्थाप्याकाङ्क्षया** विशेषणान्वये एव तत्प्रसरात् इति । लीलया ताण्डवं – नृत्यं तत्र पण्डितः – अभिज्ञः इत्यर्थः । अनेन च नृत्यविशिष्टतया स्मृतिविषयत्वात् प्रार्थिताः अर्थाः संभवन्ति एव इति सूचितम् ।

ननु भूषणरहितस्य कथं नृत्यम्? तत्र आह – **चूडामणीकृत** इति । अचूडामणिः चूडामणिवत् संपद्यते इति चूडामणीकृतः । चूडामणीकृतः विधुः येन सः तथोक्तः । **वलयीकृत** इति । एवं वलयीकृतवासुकिः इत्यत्रापि बोध्यम् ।।

राजीवोल्लासः

श्रीवेङ्कटाचलाधीशं श्रियालिङ्गितवक्षसम् ।
भक्तावनोन्मुखं वन्दे तुलसीदामभासुरम् ।।

ज्ञानानन्दमयं देवं निर्मलस्फटिकाकृतिम् ।
आधारं सर्वविद्यानां हयग्रीवमुपास्महे ।।

आचार्यशिष्टमार्गेण व्याख्यां दिनकरीमधि ।
स्पष्टबोधकरीं कर्तुमस्माकमयमुद्यमः ।।

हयग्रीवानुग्रहेण गुरूणां कृपया तथा ।
राजीवोल्लासनाम्नीयं व्याख्या सम्पूर्तिमेष्यति ।।

चिकीर्षितस्य मुक्तावलीव्याख्यानस्य निर्विघ्नपरिसमाप्त्यर्थं कृतं मातापितृनमस्काररूपं मङ्गलं शिष्यशिक्षार्थं ग्रन्थतः निबध्नाति – **लक्ष्मीपादयुगम्** इति । "मातृदेवो भव", "पितृदेवो भव" इति उपनिषदि मातापित्रोः देवत्वप्रतिपादनात् तन्नमस्कारस्य मङ्गलत्वम् । अत्र ग्रन्थकर्तुः मातृनाम लक्ष्मीः इति वदन्ति । तथा च

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

लक्ष्मीनाम्न्याः मातुः पादयुगं प्रणम्य, श्रीबालकृष्णनामानं भारद्वाजकुलाम्बुधौ विधुमिव स्थितं पितरं च प्रणम्य, **श्रीगौरवास्याम्बुजात्** – गुरोः इदं गौरवम्, अम्बुजमिव आस्यम् आस्याम्बुजं, श्रीयुतं गौरवास्याम्बुजं श्रीगौरवास्याम्बुजं तस्मात्, अशेषमतं ज्ञात्वा परिमितेन वचसा **सिद्धान्त-मुक्तावलीनिगूढान्** अर्थान् श्रोतॄणां सुबोधार्थं **यथामति तनुते** – विस्तारयति इति श्लोकार्थः । अम्बुजम् इव आस्यम् इति उपमया शिष्यवात्सल्यादिकृतः मुखे विकासः व्यज्यते । '**श्रीगौरव**' इति विशेषणेन स्वज्ञानस्य गुरूपदेशमूलकत्वात् प्रमात्वं द्योतितम् । तेन स्वग्रन्थस्य स्वाज्ञानप्रयुक्तदोषशङ्कापि परिहृता । '**मितेन वचसा**' इत्यनेन ग्रन्थविस्तर-भीतिकृता अप्रवृत्तिः वारिता । '**परेषां कृते**' इत्यनेन स्वग्रन्थस्य श्रोतॄणां बोधोत्पादनमेव प्रयोजनम् इति ज्ञापितम् ।

ननु '**चूडा**' इत्यादिपद्येन भगवन्नमस्काराद्यकरणात् कथम् अस्य मङ्गलत्वम्? इति, अत आह – **ईश्वरनिर्देशरूप** इति । निर्देशः – नामग्रहणम् । भगवन्नामग्रहणस्य मङ्गलत्वम् –

अवशेनापि यन्नाम्नि कीर्तितेऽपि स्मृतेऽपि वा ।
वियुक्तः पातकैस्सर्वैः परमं पदमश्नुते ॥

इत्यादि पुराणवचनसिद्धम् । यद्यपि भगवन्नामग्रहणेनैव विघ्नध्वंसादिसंभवे 'भव्याय भवतु' इति मङ्गलभवनप्रार्थना व्यर्था, तथापि सञ्चितविघ्नानां मङ्गलेन नाशः, ग्रन्थारम्भानन्तरं विघ्नानुत्पादाय प्रार्थना इति वैयर्थ्यं परिहर्तव्यम् ।

समाप्तपुनरात्तत्वम् इति । क्रियायाम् अन्वयेन शान्ताकाङ्क्षस्य विशेष्यवाच-कपदस्य विशेषणान्तरान्वयार्थं पुनरनुसन्धानं समाप्तपुनरात्तत्वं नाम काव्यदोषः । प्रकृते 'भव्याय भवतु' इति क्रियान्वयेन शान्ताकाङ्क्षस्य विशेष्यवाचकस्य ''भव'' पदस्य ''लीलाताण्डव-पण्डितः'' इति विशेषणान्तरान्वयार्थं ''स भवः पुनः कीदृशः'' इति आकाङ्क्षासंपादनाय पुनः भवस्मरणस्य आवश्यकतया समाप्तपुनरात्तत्वं दोषः इति आशङ्कायां, ''**चूडामणीकृत**'' इति श्लोके ''**लीलाताण्डवपण्डितः**'' इति एतदेव विशेष्यम्, ''**भव**'' इत्येतत् तद्विशेषणम् । ''भवाभिन्नः लीलाताण्डवपण्डितः भव्याय

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

भवतु'' इति अन्वयः । अतः विशेष्यवाचकपदस्य पुनरनुसन्धानरूपदोषः नात्र प्रसजति इति भावः ।

ननु जातितद्भिन्नप्रवृत्तिनिमित्तकशब्दानां मध्ये जातिप्रवृत्तिनिमित्तकमेव विशेष्य-वाचकम् इति नियमात् कथं **''लीलाताण्डवपण्डितः''** इत्यस्य विशेष्यवाच-कत्वम्? न च –**भवपदस्यापि** कथं जातिप्रवृत्तिनिमित्तकत्वम्? भवत्वस्य एकव्यक्तिवृत्तित्वेन जातित्वाभावात् । तथा च **भवपदमपि** न विशेष्यवाचकम् इति – वाच्यम् । **भवपदस्य** भवत्वजातिविशिष्टशरीरकः इत्यर्थात् शिवशरीरस्य कल्पभेदेन भिन्नत्वात् कल्पभेदेन नानाशरीरवृत्तेः भवत्वस्य जातित्वसंभवात् । तथा च भवपदस्यैव विशेष्यवाचकतया समाप्तपुनरात्तत्वं दुष्परिहरम् इति, अत आह – **वस्तुतस्तु** इति । **उत्थाप्याकाङ्क्षया** इति । अनियताकाङ्क्षया इत्यर्थः । क्रियाकारकपदानां परस्पराकाङ्क्षा नियता । एवं प्रयोजनाकाङ्क्षापि नियतैव । प्रयोजनाभावे वाक्यार्थस्यैव अप्रसिद्धि-प्रसङ्गात् । तथा च विधोः किमर्थं चूडामणीकरणम्? किमर्थं वा वासुकेः वलयीकरणम्? इति प्रयोजनाकाङ्क्षायाः नियतायाः निवृत्त्यर्थं **''लीलाताण्डव-पण्डितः''** इति विशेषणान्वयस्य आवश्यकत्वात् नात्र समाप्तपुनरात्तत्वं दोषः । अनियताकाङ्क्षया विशेषणान्वयस्थले एव तस्य दोषस्य प्रसक्तिः इति भावः ।

लीला नाम निरतिशयानन्दानुभवः । लीलाप्रयोजनकताण्डवोपकरणत्वात् विधुचूडामणीकरणवासुकिवलयीकरणयोः प्रयोजनसूचकविशेषणान्वयं विना आकाङ्क्षा-शान्तिः न भवति इति अत्र समाप्तपुनरात्तत्वं न दोषः । नियताकाङ्क्षारहितान्वयबो-धानन्तरं विशेष्यवाचकपदस्य पुनरनुसन्धानस्थले एव स दोष इति तत्त्वम् ।।

मुक्तावली

निजनिर्मितकारिकावलीम् अतिसङ्क्षिप्तचिरन्तनोक्तिभिः ।
विशदीकरवाणि कौतुकात् ननु राजीवदयावशंवदः ।।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

दिनकरी

शिष्यावधानाय प्रतिजानीते – **निजनिर्मित** इति । निजेन – स्वेन निर्मिता – रचिता या कारिकावली ताम् । अति-अत्यन्तं सङ्क्षेपः-शब्दसङ्क्षेपः यासु ताः अतिसङ्क्षिप्ताः तादृश्यश्च ताः चिरन्तनानां – कणादप्रभृतीनां याः उक्तयः – वचांसि वचः प्रतिपाद्याः युक्तयः ताभिः अहं विशदीकरवाणि – प्रकटीकरोमि इत्यर्थः । ननु **लीलाव-त्यादिप्राचीन-निबन्धाध्ययनेनैव कारिकावलीप्रति-**पादितोऽर्थः बोद्धव्यः इति किम् अनेन भवत्कृतविशद-निबन्धेन? इति, अत आह – **अतिसङ्क्षिप्त** इति । तथा च लीलावत्यादिप्राचीननिबन्धेषु ग्रन्थबाहुल्येन बहुतरदुःखहेतुप्रतिपत्तिकतया न बालानां प्रवृत्तिः इति भावः । स्वोत्प्रेक्षामूलकता-प्रयुक्तानादरणीयतां निरसितुं **''चिरन्तन''** इत्युक्तम् । **''ननु''** इति अवधारणे । तथा च कौतुकात् एव इत्यर्थः । एतेन स्वस्य ग्रन्थकरणे क्लेशाभावः सूचितः । स्वस्य ग्रन्थकरणे प्रवृत्तौ निमित्तम् आह – **राजीव** इति । राजीवे शिष्ये या दया कृपा, तया वंशवदः – तदधीनः इत्यर्थः ।।

मुक्तावली

सद्रव्या गुणगुम्फिता सुकृतिनां सत्कर्मणां ज्ञापिका
सत्सामान्यविशेषनित्यमिलिताभावप्रकर्षोज्ज्वला ।
विष्णोर्वक्षसि विश्वनाथकृतिना सिद्धान्तमुक्तावली
विन्यस्ता मनसो मुदं वितनुतां सद्युक्तिरेषा चिरम् ।।

दिनकरी

ननु ग्रन्थादौ श्रोतृप्रवृत्तये **प्रयोजनादि** वक्तव्यं भवति, तस्य च इह अनुक्त-त्वात् उपेक्षणीयता एतद्ग्रन्थस्य स्यात् इति आशङ्क्य विषय-प्रयोजन-संबन्धाधिकारिणः सूचयन् अतिसङ्क्षिप्तत्वात् एतद्ग्रन्थस्य सकलपदार्थाप्रतिपाद-कतया कथं बालव्युत्पत्तिः इति आशङ्कां च एतद्ग्रन्थस्य सकलपदार्थप्रतिपाद-कत्वप्रदर्शनेन परिहरन्,

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ।
यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम् ॥

इति भगवदुक्तेः मुक्तावलीसमं स्वकीयग्रन्थं श्रीमति भगवति च अर्पयन् स्वकीर्त्यनुवृत्तये ग्रन्थस्य स्वस्य च नाम निबध्नाति – **सद्रव्या** इति । द्रव्यैः सहिता – युक्ता, प्रतिपादकतया । गुणैरपि गुम्फिता – युक्ता । सताम् – उत्क्षेपणादीनां पञ्चानां कर्मणां ज्ञापिका – बोधिका । सत् जातिरूपं सामान्यम्, विशेषाः, नित्यः – समवायः, तैः मिलिता । यद्वा, सन्ति सामान्यविशेषनित्यमिलितानि यस्यां सा । नित्यमिलितं – नित्यसंबन्धः । अभावस्य प्रकर्षः – प्रागभावादिभेदेन वैलक्षण्यम्, तस्य **उज्ज्वला** – प्रकाशिका । **एषा** – बुद्धिस्था । सिद्धान्ता एव मुक्ताः तासाम् आवली – पङ्क्तिः । **विष्णोः** नारायणस्य । **वक्षसि**– वक्षःस्थले । **विन्यस्ता** – विशेषतः अर्पिता, **सुकृतिनां** – पण्डितानां मनसः **मुदं** – सन्तोषं, **चिरं** – बहुकालं, **वितनुताम्** – विस्तारयतु इत्यर्थः ।

ननु युक्तीनाम् अत्र असत्त्वात् कथं विदुषां सन्तोषः? तत्र आह – **सद्युक्तिः** इति । सत्यः युक्तयः यस्यां सा तथा ।

मुक्तावलीसादृश्यं ग्रन्थे द्रव्यादिपदार्थवत्तया । तथा हि – मुक्तावली **सद्रव्या** – साध्यतया द्रव्यवती, द्रव्यसाध्या इति यावत् । नानाविधद्रव्यघटिता वा । **गुणेन** – सूत्रेण **गुम्फिता** – निर्मिता । **सुकृतिनां** – पुण्यवतां यानि सन्ति – समीचीनानि भगवद्भजनादि रूपाणि कर्माणि तेषां बोधिका । **सत्सामान्यं** – समीचीना जातिः, **विशेषः** – महत्त्व-निर्मलत्वादिः, ताभ्यां **नित्यम्** – अनवरतं **मिलिता** – सम्बद्धा । **अभावे** – तेजोऽभावे अन्धकारे सति **प्रकर्षेण उज्ज्वला** – अर्थप्रकाशिका इति यावत् । यथा मुक्तावली द्रव्यादिसकलपदार्थवती, तथा अयं ग्रन्थोऽपि इति । अत्र च ग्रन्थे मुक्तावलीसाम्योक्त्या निर्दोषत्वं सूचितम् । **अत्र** द्रव्यादिपदार्थप्रतिपादकत्वप्रदर्शनेन द्रव्यादयः विषयाः उक्ताः । पदार्थतत्त्वावधारणं च

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्रयोजनं सूचितम् । संबन्धश्च प्रतिपाद्यप्रतिपादकभावः । पदार्थतत्त्वावधारणकामः अधिकारी इति ।।

राजीवोल्लासः

प्रयोजनादि इति । ''आदि'' पदेन विषयसंबन्धाधिकारिणः गृह्यन्ते । विषय-प्रयोजन-संबन्धाधिकारिरूपानुबन्धचतुष्टयं विज्ञायैव श्रोतारः ग्रन्थाध्ययने प्रवर्तन्ते । तत् अनुबन्धचतुष्टयं **मुक्तावल्याम्** आदौ अनुक्तम् इति अयं ग्रन्थः उपेक्षणीयः स्यात् इति आशङ्क्य अनन्तरश्लोके अनुबन्धचतुष्टयं सूचयति । तथा **मुक्तावलीग्रन्थस्य** सकलपदार्था-प्रतिपादकत्वे बालानाम् एतद्ग्रन्थपठनेऽपि पदार्थतत्त्वज्ञानं परिपूर्णं न स्यात् इति आलोच्य अयं ग्रन्थः सकलपदार्थान् प्रदर्शयति इति प्रतिपादयति । एवं –

''यत्करोषि यदश्नासि.....तत्कुरुष्व मदर्पणम्''

इति **भगवद्गीता**वचनानुसारेण मुक्तावलीसदृशं स्वकीयं ग्रन्थं भगवति समर्पयन् स्वकीर्तेः अनुवृत्त्यर्थं ग्रन्थस्य स्वस्य च नाम निबध्नाति ''**सद्रव्या**'' इति श्लोकेन इत्यर्थः ।

केचित् कर्मसामान्यादिपदार्थान् अतिरिक्ततया नाङ्गीकुर्वन्ति । तन्निरासार्थं **'सत्'** इति विशेषणम् ।

अनुबन्धचतुष्टयम् एतच्छ्लोके कथं प्रदर्शितम् इति स्पष्टयति – **अत्र द्रव्यादिपदार्थ** इति । ''अयं ग्रन्थः, द्रव्यादिपदार्थप्रतिपादकः'' इति कथनेन द्रव्यादयः पदार्थाः अस्य ग्रन्थस्य विषयाः । द्रव्यादिपदार्थतत्त्वनिश्चयः एतद्ग्रन्थाध्ययनस्य प्रयोजनम् । द्रव्यादीनां विषयाणां ग्रन्थस्य च प्रतिपाद्यप्रतिपादकभावः संबन्धः । पदार्थतत्त्वनिश्चयकामः अधिकारी इति सूचितम् इति भावः ।।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

कारिकावली

नूतनजलधररुचये गोपवधूटीदुकूलचौराय ।
तस्मै कृष्णाय नमः संसारमहीरुहस्य बीजाय ॥ १ ॥

मुक्तावली

विघ्नविघाताय कृतं मङ्गलं शिष्यशिक्षायै ग्रन्थतः निबध्नाति – **नूतन** इति ॥

दिनकरी

ग्रन्थारम्भसमये कृतस्य मङ्गलस्य, तन्निबन्धनस्य च वैयर्थ्यम् आशङ्क्य फलं दर्शयति – **विघ्नविघाताय** इति । **प्रारब्धुम् इष्टस्य** ग्रन्थस्य इति शेषः । **यद्यपि** अत्र 'घात' पदस्य उत्पत्तिमदभावपरतया 'वि'पदम् अनर्थकम् इति प्रतिभाति, **तथापि विशिष्टवाचकानां पदानां** सति पृथक् विशेषणवाचकपदसमवधाने **विशेष्यमात्रपरतायाः** "स कीचकैः मारुतपूर्णरन्ध्रैः" इत्यत्र "कीचकाः वेणवः ते स्युः, ये स्वनन्ति अनिलोद्धताः" इति कोशपर्यालोचनया मारुतपूर्णरन्ध्रत्वविशिष्टवेणुबोधककीचकपदे दृष्टत्वात् 'घात' पदम् अभावमात्रपरं द्रष्टव्यम् ॥

राजीवोल्लासः

प्रारब्धुम् इष्टस्य इति । प्रारब्धुम् इष्टस्य ग्रन्थस्य प्रतिबन्धकाः ये विघ्नाः, तद्ध्वंसरूपप्रयोजनाय कृतं मङ्गलम् इत्यर्थः । शिष्याणां शिक्षा नाम "मङ्गलम् अवश्यकर्तव्यम्" इत्याकारकमङ्गलविशेष्यकावश्यकर्तव्यत्वप्रकारकनिश्चयः । तथा च मङ्गलस्य विघ्नध्वंसः प्रयोजनम्; ग्रन्थे मङ्गलनिबन्धनस्य शिष्यशिक्षाप्रयोजनम् इत्युक्तं भवति ।

यद्यपि इत्यादि । उत्पत्तिमान् अभावः ध्वंसः । "हन"धातोः घञा निष्पन्नस्य घातपदस्य उत्पत्तिमदभावार्थकत्वात् 'घात' पदेनैव ध्वंसः लभ्यते । अतः 'विघ्नविघाताय' इत्यत्र 'घात' पदात् पूर्वं 'वि' पदम् अनर्थकम् इति शङ्का । समाधानं

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

तु तथापि इत्यादिना उक्तम् । पृथक् विशेषणवाचकपदसमभिव्याहारस्थले विशिष्टवाचकत्वेन संमतानां पदानां विशेष्यमात्रपरत्वम् इति न्यायः । यथा – ''स कीचकैः मारुतपूर्णरन्ध्रैः'' इति श्लोके ''कीचकाः वेणवः ते स्युः, ये स्वनन्ति अनिलोद्धताः'' इति कोशानुसारेण मारुत-पूर्णरन्ध्रत्वविशिष्टवेणुवाचकस्य ''कीचक'' – पदस्य विशेष्यभूतवेणुमात्रतात्पर्यकत्वं स्वीक्रियते । ''मारुतपूर्णरन्ध्रैः'' इति पृथक् विशेषण-वाचकपदस्य सद्भावात् । अन्यथा श्लोकस्थ ''कीचक'' पदस्य विशिष्टपरत्वे विशेषणवाचकपदस्य वैयर्थ्यापत्तेः । तथा प्रकृतेऽपि उत्पत्तिमत्त्वरूपविशेषणवाचकस्य 'वि'– पदस्य सद्भावात् तत्समभिव्याहृतस्य 'घात'पदस्य अभावमात्रपरता । अतः 'वि'पदस्य न वैयर्थ्यम् इति भावः । **'विशिष्टवाचकानां पदानाम्'** इत्यस्य **'विशेष्यमात्रपरतायाः'** इत्यत्र अन्वयः ।।

मुक्तावली

ननु मङ्गलं न विघ्नध्वंसं प्रति, न वा समाप्तिं प्रति कारणम्; विनापि मङ्गलं नास्तिकादीनां ग्रन्थेषु **निर्विघ्नपरिसमाप्तिदर्शनात्** इति चेत् –

दिनकरी

ननु निष्फलत्वात् मङ्गलाचरणम् [1]**अयुक्तम्** । न च निष्फलत्वमेव तस्य असिद्धम्, फलविशेषशून्यत्वेन हेतुना तस्य साधनात् [2]इत्यभिप्रायेण आशङ्कते – **ननु** इति । मङ्गलस्य कारणत्वाभावे **व्यतिरेकव्यभिचाररूपहेतुम्** आह – **विनापि** इति । **निर्विघ्नपरिसमाप्ति** इति । **विघ्नध्वंसपूर्वकसमाप्तीत्यर्थः** । न च – तत्र जन्मान्तरीयमङ्गल-कल्पनात् न व्यभिचारः इति – वाच्यम् । भोगादिनापि

1. अयुक्तमिति - बलवदनिष्टानुवन्धीत्यर्थः। 'न कुर्यात् निष्फलं कर्म' इति वचनेन निष्फलकर्मणः पापहेतुत्वबोधात् इति भावः। यदि च 'न कुर्यात्' इत्यत्र इष्टसाधनत्वाभाव एव वोध्यते, तथा 'अयुक्तम्' इत्यस्य भ्रमजन्यम् इत्यर्थः (सु).

2. इत्यभिप्रायेण इति। इत्याकारकाक्षेपबुबोधयिषया इत्यर्थः (सु).

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

नास्तिकात्मनि विघ्ननाशसंभवेन जन्मान्तरीयमङ्गलसन्देहेन व्यभिचारसंशयसंभवात् । **अत्र कादम्बर्यादिग्रन्थे** मङ्गल-सत्त्वेऽपि समाप्तेः अदर्शनेन अन्वयव्यभिचारोऽपि दोषः बोध्यः ।

राजीवोल्लासः

ननु निष्फलत्वात् मङ्गलाचरणम् अयुक्तम् इत्यादि । "मङ्गलाचरणं न कर्तव्यम्, निष्फलत्वात्, जलताडनवत्" । न च – निष्फलत्वं हेतुः असिद्धः – इति वाच्यम् । "मङ्गलं निष्फलम्, फलविशेषशून्यत्वात्" इत्यनुमानेन निष्फलत्वस्य साधनात् ।

ननु फलविशेषशून्यत्वं न निष्फलत्वव्याप्यम् । ज्योतिष्टोमादौ पुत्रादिरूपफल-विशेषशून्यत्वसत्त्वेऽपि निष्फलत्वविरहेण व्यभिचारात् इति चेत्, न । यावत्फलविशेष-शून्यत्वस्य निष्फलत्वव्याप्यतया विवक्षितत्वात् । "यः यावत्फलविशेषशून्यः, सः फलसामान्यशून्यः" इति सामान्यमुखव्याप्तौ अदोषात् ।

ननु तथापि फलसामान्यशून्यत्वरूपनिष्फलत्वसाधनार्थं **मुक्तावल्यां** तादृश-सामान्याभावव्याप्यं यावत्फलविशेषशून्यत्वमेव साधनीयम् । परन्तु "**मङ्गलं न विघ्नध्वंसं प्रति न वा समाप्तिं प्रति**" इति फलद्वयशून्यत्वमेव साध्यते । अतः अस्य ग्रन्थस्य प्रकृतोपयोगः नास्ति इति चेत्, न । पुत्रपश्वादिफलविशेषशून्यत्वस्य मङ्गले सर्वसंमतत्वेन तत्साधनस्य अनावश्यकतया प्राचीननवीनाभ्यां समाप्ति-विघ्नध्वंसयोरेव मङ्गलफलत्वाङ्गीकारेण तदुभयफलशून्यत्वसाधने यावत्फल-विशेषशून्यत्वरूपहेतुसिद्धिः । तेन हेतुना निष्फलत्वसिद्धिः इत्याशयः ।

व्यतिरेकव्यभिचाररूपहेतुम् इति । मङ्गलस्य विघ्नध्वंसं प्रति समाप्तिं प्रति च कारणत्वाभावे व्यतिरेकव्यभिचारः हेतुः । व्यतिरेकव्यभिचारो नाम कारणत्वाभिमतस्य अभावेऽपि कार्योत्पत्तिः । कार्योत्पत्त्यव्यवहितप्राक्कालावच्छेदेन कार्याधिकरणे विद्यमा-नाभावप्रतियोगित्वं व्यतिरेकव्यभिचारः । तथा च "मङ्गलं

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

विघ्नध्वंसनिरूपितकारणत्वाभाववत्; एवं समाप्तिनिरूपितकारणत्वाभाववत्; विघ्नध्वंससमाप्त्यव्यवहित-प्राक्कालावच्छेदेनतदधिकरणे वर्तमानाभावप्रतियोगित्वात्; यः यदव्यवहितप्राक्काला-वच्छिन्नयदधिकरणवृत्तिकाभाव-प्रतियोगी, सः तन्निरूपितकारणत्वाभाववान्; यथा घटाव्यवहितप्राक्कालावच्छिन्नघटाधि-करणवृत्तिकाभावप्रतियोगी रासभः घटनिरूपितकारणत्वाभाववान्'' इत्यनुमानप्रयोगः **मूले** विवक्षितः इति भावः ।

ननु व्यतिरेकव्यभिचारोपपादनवेलायां **मूले ''निर्विघ्नपरिसमाप्तिदर्शनात्''** इति मङ्गलं विनापि परिसमाप्तिरूपकार्यमात्रं प्रदर्शितम् । मङ्गलं विनापि विघ्नध्वंसरूप-कार्यं न प्रदर्शितम् इति न्यूनता इति आशङ्क्य व्याख्याने **''विघ्नध्वंसपूर्वकस-माप्तीत्यर्थः''** इत्युक्तम् । विघ्नध्वंसरूपकार्यसहितसमाप्तिरूपकार्यदर्शनात् इति तदर्थः । अतः न न्यूनताइति भावः ।

न च तत्र इति । नास्तिकात्मनि एतज्जन्मकृतमङ्गलस्य अभावेऽपि जन्मान्तरीयं मङ्गलं वर्तते । अतः मङ्गलं विना न निर्विघ्नपरिसमाप्तिः इति न व्यतिरेकव्यभिचारः इति शङ्का । समाधत्ते – **भोगादिनापि** इति । नास्तिकात्मनि विघ्ननाशं विना ग्रन्थसमाप्तिः न संभवति । स च विघ्ननाशः मङ्गलेन वा विघ्नफलानुभवरूपभोगेन वा संभवति । अस्मिन् जन्मनि मङ्गलस्य अकरणात्, नास्तिकस्य विघ्नफलभोगेन विघ्ननाशः जातः; अथ वा जन्मान्तरीयमङ्गलेन विघ्ननाशः जातः इति सन्देहेन व्यभिचारसंशयः संभवति । जन्मान्तरीयमङ्गलेन विघ्ननाशः इति पक्षे व्यभिचाराभावः, भोगेन विघ्ननाश इति पक्षे व्यभिचारः इति मङ्गलतदभावकोटिकसंशयात् व्यभिचारतदभावकोटिकसन्देहः जायते । स च व्यभिचारसंशयः कारणत्वनिश्चयप्रतिबन्धकः इति भावः ।

मूले मङ्गलस्य विघ्नध्वंसं समाप्तिं च प्रति कारणत्वाभावे व्यतिरेकव्यभिचारमात्रं हेतुतया प्रदर्शितम् । वस्तुतस्तु अन्वयव्यभिचारस्यापि सत्त्वात् तदप्रदर्शनेन न्यूनता

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

इति आशङ्क्य व्यतिरेकव्यभिचारप्रदर्शनं अन्वयव्यभिचारस्य उपलक्षणम् इति समाधत्ते – **अत्र कादम्बर्यादिग्रन्थे** इति । अन्वयव्यभिचारो नाम कारणाधिकरणवृत्त्य-भावप्रतियोगिकार्यकत्वम् ।।

मुक्तावली

न । **अविगीतशिष्टाचारविषयत्वेन** मङ्गलस्य सफलत्वे **सिद्धे** तत्र च **फल-जिज्ञासायां, संभवति दृष्टफलकत्वे** अदृष्टफलकल्पनायाः अन्याय्यत्वात् **उपस्थितत्वात्** च समाप्तिरेव तत्फलं **कल्प्यते । इत्थं** च यत्र मङ्गलं न दृश्यते, **तत्रापि** जन्मान्तरीयं तत् **कल्प्यते** । **यत्र** च सत्यपि मङ्गले समाप्तिः न दृश्यते, **तत्र** बलवत्तरः विघ्नः विघ्नप्राचुर्यं वा बोध्यम् । **प्रचुरस्यैव** अस्य **बलवत्तरविघ्ननिवारणे** कारणत्वं बोध्यम् ।।

दिनकरी

व्यभिचारसन्देहस्य ग्राह्यसंशयरूपतया कारणताप्रत्यक्षे एव प्रतिबन्धकत्वम्, न तु अनुमितौ, तत्र तस्य अनुकूलत्वात् इति अभिप्रायवान् "मङ्गलं समाप्तिफलकम्, समाप्त्यन्याफलकत्वे सति सफलत्वात्" इति परिशेषानुमानेन मङ्गलस्य समाप्तिफलकतां व्यवस्थापयिष्यन् प्रथमतः विशेष्यासिद्धिनिरासाय फलवत्तां साधयति – **अविगीत** इति । विषयत्वं च ज्ञानविषयसुखे अतिप्रसक्तम्, अतः **आचार** इति । आचारश्च अत्र यद्यपि क्रिया एव, तथापि विषयत्वश्रुतेः कृतिः एव विवक्षिता । तद्विषयत्वं च अत्र **विधेयतया बोध्यम्** । तेन **फले** न व्यभिचारः, तस्य **उद्देश्यतया कृतिविषयत्वात्** । विधेयतया कृतिविषयत्वं चैत्यवन्दनादौ अपि अस्ति, अतः **शिष्ट** इति । शिष्टत्वं च फलसाधनतांशे भ्रान्तिरहितत्वम्, न तु वेदप्रामाण्याभ्युप-गन्तृत्वम् । तेन व्युत्क्रमेण कृते दर्शादौ निष्फलत्वेऽपि न व्यभिचारः । शिष्टाचारविषयत्वं श्येनयागादौ अपि अस्ति, अतः **अविगीत** इति । अविगीतत्वं च बलवदनिष्टाननुबन्धित्वम् । **तेन श्येनादौ प्रवृत्त्युपयुक्त-बलवदनिष्टाननुबन्धीष्टसाधनत्वरूपसाध्याभावेऽपि न व्यभिचारः** । **सिद्धे** –

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अनुमिते । **तत्र** – मङ्गले । **फलजिज्ञासायां** – विशेषतः फलजिज्ञासायाम् । ननु तर्हि कथं गङ्गास्नानादीनाम् अदृष्टार्थकता इति, अत आह – **संभवति** इति । **तथा च** तत्र दृष्टासंभवेन अदृष्टकल्पना इति भावः ।

ननु तथापि **विश्वजिन्न्यायात्** स्वर्ग एव इष्टं कल्प्यताम्, अत आह– **उपस्थितत्वात्** इति । ''आरब्धं कर्म मे निर्विघ्नं परिसमाप्यताम्'' इति ग्रन्थादौ प्रवृत्तपुरुषकामनाविषयत्वेन परिशेषानुमाने प्रवर्तमानस्य उपस्थितत्वात् इत्यर्थः । **कल्प्यते**–अनुमीयते । **अनेन** च मङ्गलस्य समाप्तिहेतुत्वे अनुमानमेव प्रमाणम्, न तु शिष्टाचारानुमिता श्रुतिः, इदानीम् आनुपूर्वीविशेषनिर्णयाभावेन तस्याः अबोधकत्वात् इति सूचितम् ।

व्यापकत्वघटितकारणताग्रहप्रतिबन्धकज्ञानविषयव्यतिरेकव्यभिचारम् उद्धरति– **इत्थम् च** इति । मङ्गलस्य समाप्तिफलकत्वे सिद्धे च इत्यर्थः । **तत्रापि** इति । नास्तिकादिग्रन्थेऽपि । **तत्** – मङ्गलम् । **कल्प्यते** – अनुमीयते, कार्यरूपसमाप्त्या इति शेषः । **गाह्यसन्देहपर्यवसन्नस्य** पूर्वोक्तव्यभिचारसंशयस्य कारणतानुमितौ अप्रतिबन्धकत्वात्, व्यभिचारनिर्णयस्य च अभावात् इति भावः ।

ननु एवमपि अन्वयव्यभिचारज्ञानं कारणताग्रहविरोधि भविष्यत्येव इति आशङ्क्य अन्वयव्यभिचारं निरस्यति – **यत्र च** इति । **तत्र** – कादम्बर्यादौ । **बलवत्तरत्वम्** वैजात्यम् ।

ननु एवमपि कादम्बर्यादौ कुतो न विघ्नध्वंसः? इति, अत आह – **प्रचुरस्य** इति । प्रचुरस्यैव मङ्गलस्य इत्यर्थः । **बलवत्तरविघ्ननिवारणे** – बलवत्तरादिविघ्ननिवारणे । तेन प्रचुरविघ्नस्यापि सङ्ग्रहः । तथा च मङ्गलस्य विघ्नसमसङ्ख्याकमङ्गलत्वेन नाशकतया न तत्र विघ्ननाश इति भावः । अत्र च विघ्नसमसङ्ख्याकमङ्गलत्वेन हेतुत्वे अधिकसङ्ख्याकमङ्गलात् न्यूनसङ्ख्याकविघ्ननाशः न स्यात्, अतः **प्राचुर्यं वा** इत्यत्र ''वा'' कारः अनास्थायां बोध्यः ॥

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

राजीवोल्लासः

'अविगीताशिष्टाचारविषयत्वेन' इति समाधानग्रन्थम् अवतारयति– **व्यभिचारसन्देहस्य** इत्यादिना । ''मङ्गलं समाप्तिकारणम्, समाप्त्यन्याफलकत्वे सति सफलत्वात्'' इत्यनुमानेन मङ्गलस्य समाप्तिकारणत्वसाधनं मूलाभिप्रेतम् । तादृशकारणत्वानुमितौ पूर्वं प्रदर्शितस्य व्यतिरेकव्यभिचारसंशयस्य प्रतिबन्धकत्वं न संभवति । तथा हि – अनुमितौ पक्षता कारणम् । पक्षता च साध्यतदभावकोटिकसंशयः । अतः ''मङ्गलं समाप्तिकारणम्'' इत्यनुमितौ ''मङ्गलं समाप्तिकारणं न वा'' इति संशयः पक्षताविधया कारणम् । तत्र कारणत्वं नाम समाप्त्यव्यवहितप्राक्कालावच्छिन्नसमाप्त्यधिकरणवृत्त्यन्ताभावाप्रतियोगित्वम् । अतः ''मङ्गलं समाप्त्यव्यवहितप्राक्कालावच्छिन्नाधिकरणवृत्त्यत्यन्ताभावाप्रतियोगि न वा'' इति संशयः कारणत्वरूपसाध्यसंशयः । व्यतिरेकव्यभिचारो नाम समाप्त्यव्यवहित-प्राक्कालावच्छिन्नसमाप्त्यधिकरणवृत्त्यत्यन्ताभावप्रतियोगित्वम् । अतः ''मङ्गलं समाप्त्यव्यवहितप्राक्कालावच्छिन्नसमाप्त्यधिकरणवृत्त्यत्यन्ताभावप्रतियोगि न वा'' इति संशयः व्यतिरेकव्यभिचारसंशयः इत्युक्तं भवति । अनयोः कारणत्वव्यभिचार-संशययोः विषयतः नास्ति वैलक्षण्यम् इति व्यतिरेकव्यभिचारसंशयः समाप्तिकारणत्वरूपसाध्यसंशये पर्यवसन्न इति पक्षताविधया अयमपि संशयः अनुमितौ अनुकूलः इति अभिप्रायवान् समाप्तिकारणत्वं मङ्गलस्य ''मङ्गलं समाप्तिकारणम्, समाप्त्यन्याफलकत्वे सति सफलत्वात्'' इति परिशेषानुमानेन साधयिष्यन् प्रथमतः सफलत्वरूपहेतुविशेष्यासिद्धिं परिहर्तुं सफलत्वं साधयति – **अविगीत** इति ग्रन्थेन इति भावः ।

व्यभिचारसन्देहस्य इति । व्यतिरेकव्यभिचारसन्देहस्य इत्यर्थः । **ग्राह्यसंशय-रूपतया** इति । अनुमित्या ग्राह्यं साध्यं यत् समाप्तिकारणत्वं तद्विषयकसंशयरूपतया इत्यर्थः ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

''मङ्गलं सफलम्, अविगीतशिष्टाचारविषयत्वात्, यागादिवत्'' इति सफलत्वसाधकम् अनुमानम् । अविगीतश्च असौ शिष्टाचारविषयश्च अविगीतशिष्टाचारविषयः, तस्य भावः तत्त्वम् । अत्र हेतौ विषयत्वमात्रोक्तौ सफलत्वरूपसाध्याभाववति सुखे ज्ञानविषयत्वसत्त्वात् व्यभिचारः । तद्वारणाय **आचारविषयत्वात्** इत्युक्तम् । आचारः यद्यपि क्रियायां प्रसिद्धः, तथापि तन्निरूपितविषयत्वाप्रसिद्धेः आचारशब्देन अत्र विषयत्वनिरूपिका कृतिः विवक्षिता । तथा च कृतिनिरूपितविषयत्वं हेतुः । कृतिनिरूपितोद्देश्यताख्यविषयत्वस्य सुखे सत्त्वात् पुनरपि व्यभिचारः । तद्वारणाय कृतिनिरूपितविधेयत्वरूपं विषयत्वं हेतुतया अत्र विवक्षितम् । कृतिनिरूपितविधेयत्वरूपविषयत्वस्य सफलत्वाभाववति चैत्यवन्दनादौ सत्त्वात् व्यभिचारः । तद्वारणाय शिष्टपदम् । शिष्टसमवेतकृतिविधेयत्वं हेतुः । चैत्यवन्दनादिकं तु न शिष्टसमवेतकृतिविषय इति न व्यभिचारः ।

ननु शिष्टत्वं वेदप्रामाण्याभ्युपगन्तृत्वम् । तथा च वेदप्रामाण्याभ्युपगन्तृसमवेता या कृतिः तद्विधेयत्वं हेतुः । अयं च हेतुः शास्त्रविरुद्धक्रमेण कृते निष्फले दर्शादियागेऽपि अस्ति इति व्यभिचारः इति चेत्, न । प्रकृते शिष्टपदेन फलसाधनत्वांशे भ्रान्तिरहितस्य विवक्षितत्वात् । फलसाधनत्वांशे भ्रान्तिमता पुरुषेणैव व्युत्क्रमेण दर्शादिः क्रियते इति न तत्र व्यभिचारः । तथा च फलसाधनत्वप्रकारकभ्रमरहितपुरुषसमवेतकृतिविधेयत्वं हेतुः इति पर्यवस्यति । एतादृशहेतुः श्येनयागादौ अप्यस्ति इति व्यभिचारः । तद्वारणाय **'अविगीत'** इति विशेषणम् । अविगीतत्वं च बलवदनिष्टाननुबन्धित्वम् । इष्टोत्पत्तिनान्तरीयकदुःखभिन्नदुःखाजनकत्वम् इति यावत् । श्येनयागे इष्टोत्पत्त्यर्थं यागानुष्ठानकाले शरीरायासादिप्रयुक्तं यदवर्जनीयं दुःखं तद्भिन्ननरकरूपदुःखजनकत्वमेव अस्ति, न तु तदजनकत्वम् इति न व्यभिचारः ।

ननु श्येनयागे शत्रुवधफलके सफलत्वरूपसाध्यस्य सत्त्वेन व्यभिचाराप्रसक्त्या तद्वारणफलकम् अविगीतत्वविशेषणं व्यर्थम् इति चेत्, न । मङ्गले सफलत्वमात्रं

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

न साध्यम्, किन्तु बलवदनिष्टाननुबन्धित्वविशिष्टम् इष्टसाधनत्वरूपं सफलत्वम् । सफलत्वमात्रे साध्ये यथा श्येनयागादेः शत्रुवधरूपतात्कालिकसफलवत्त्वसत्त्वेऽपि कालान्तरे बलवद्दुःखसाधनत्वम् अस्ति, तथा मङ्गलेऽपि समाप्तिकारणत्वसत्त्वेऽपि बलवदनिष्टसाधनत्वशङ्कया प्रवृत्तिः न स्यात् । अतः मङ्गलाचरणे प्रवृत्त्युपयोगि-बलवदनिष्टाननुबन्धित्वविशिष्टेष्टसाधनत्वमेव साध्यम् । तादृशं साध्यं श्येनयागे नास्ति इति साध्याभाववति तत्र शिष्टाचारविषयत्वसत्त्वात् व्यभिचारः । तद्वारणाय बलवदनिष्टाननुबन्धित्वरूपम् अविगीतत्वं हेतुविशेषणम् आवश्यकम् इति प्रघट्टकार्थः ।

'विधेयतया बोध्यम्' इत्यत्र तृतीयायाः अभेदः अर्थः । विधेयत्वाभिन्नं कृतिविषयत्वं बोध्यम् इत्यर्थः । **फले** – सुखे । **उद्देश्यतया कृतिविषयत्वात्** इति । उद्देश्यतारूपकृतिविषयत्वात् इत्यर्थः । **तेन श्येनादौ** इति । अस्य **साध्या-भावेऽपि** इत्यनेन अन्वयः । **प्रवृत्त्युपयुक्त** इति । मङ्गले प्रवृत्तिनिर्वाहकं यत् बलवदनिष्टाननुबन्धीष्टसाधनत्वरूपं साध्यं तस्य श्येनादौ अभावेऽपि इत्यर्थः ।

बलवदनिष्टाननुबन्धित्वस्य साध्यकोटौ घटने तस्य सन्दिग्धत्वमेव पक्षे सम्भवति, हेतुकोटिघटकस्य च निश्चितत्वम् आवश्यकम् इति बलवदनिष्टाननुबन्धि-त्वस्य कथं हेतुघटकत्वम् इति चेत्, न । पक्षे विशेषणनिश्चयेऽपि विशेष्यसन्देहा-धीनविशिष्टसन्देहसंभवादेव पक्षतानिर्वाहात् । यद्वा, ''न कुर्यात् निष्फलं कर्म'' इति निषेधबोध्यपापाजनकत्वमेव हेतुघटकम्, पापसामान्याजनकत्वञ्च साध्यघटकम् इति भेदात् अनुपपत्त्यभावात् । एतेन निष्फलत्वरूपहेतुना बलवदनिष्टानुबन्धित्वं साधितवतः पूर्वपक्षिणोऽपि हेतुनिश्चये न बाधकम् इति बोध्यम् । **न व्यभिचार** इति । न च – शत्रुवधकामानां श्येने प्रवृत्तिदर्शनात् तदुपयुक्तबलवदनिष्टाननुबन्धि-त्वविशिष्टेष्टसाधनत्वरूपसाध्यस्य सत्त्वात् कथं व्यभिचारप्रसक्तिः इति – वाच्यम् । प्रवृत्तिपदेन अत्र पापाजनकप्रवृत्तेरेव विवक्षितत्वात् । तथा च साध्यघटकबल-वदनिष्टाननुबन्धित्वं पापाजनकत्वरूपं बोध्यम् – इति **सुबोधिनीकाराः** ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

ननु सफलत्वेऽनुमिते सति कथं फलजिज्ञासा? ज्ञाते जिज्ञासायाः असंभवात् इति, अतः व्याचष्टे – **विशेषतः फलजिज्ञासायाम्** इति । फलत्वेन सामान्यरूपेण फले अनुमित्या निश्चितेऽपि, फलत्वव्याप्यधर्मपुरस्कारेण फलजिज्ञासा भवितुम् अर्हति इति भावः ।

मुक्तावल्यां सम्भवति दृष्टफलकत्वे इति । ''मङ्गलम् अदृष्टाफलकम्, संभवद्दृष्टफलकत्वात्, भोजनवत्'' इति अनुमानम् अत्र विवक्षितम् । **दिनकर्यां ननु तर्हि कथम्** इति । न च – गङ्गास्नानादेः पङ्कापनयनादिरूपदृष्टफलकत्वसत्त्वात् अदृष्टफलकत्वं सिद्धवत्कृत्य शङ्का इयम् अयुक्ता इति – वाच्यम् । पङ्कापनयनादिकं प्रति गङ्गास्नानस्य स्नानत्वेनैव हेतुत्वम्, न तु गङ्गास्नानत्वेन । गङ्गास्नानत्वावच्छिन्नस्य तु स्वर्गादिरूपादृष्टफलकत्वमेव इत्याशयेन शङ्कायाः उपपत्तेः । **तथा च तत्र** इति । गङ्गास्नानेन दृष्टफलासंभवेन अदृष्टफलकल्पने इति भावः ।

विश्वजिन्न्यायात् इति । काम्यप्रकरणे 'विश्वजिता यजेत' इति विधिः श्रूयते । तस्य कर्मणः काम्यप्रकरणपठितत्वेन नित्यत्वाभावात् प्रत्यवायपरिहाररूप-फलस्य अभावात् फलं विना प्रवृत्तेः असंभवात्, कस्मिंश्चित् फले कल्पनीये स्वर्ग एव फलत्वेन कल्पनीयः । तस्य सर्वेष्टत्वात् इति जैमिनिमहर्षिणा निर्णीतम् । तन्न्यायात् मङ्गलस्यापि स्वर्ग एव फलं भवतु इत्याशङ्कायाम् उक्तम् **उपस्थितत्वात्** इति । ग्रन्थकरणे प्रवर्तमानस्य पुरुषस्य ''आरब्धं कर्म मे निर्विघ्नं परिसमाप्यताम्'' इति इच्छाविषयत्वेन रूपेण समाप्तेः उपस्थितत्वात् समाप्तिरेव फलं कल्प्यते । **अनेन च** इति । समाप्तिरूपफलस्य अनुमेयत्वकथनेन मङ्गलस्य समाप्तिहेतुत्वे अनुमानमेव प्रमाणम्, न तु शिष्टाचारानुमिता श्रुतिः । अनुमीयमानश्रुतेः आनुपूर्वी-विशेषनिर्णयाभावेन अनिर्णीतानुपूर्वीकस्य शब्दस्य समाप्तिहेतुत्वबोधकत्वासंभवात् इत्यर्थः ।

व्यापकत्वघटित इति । कारणत्वं व्यापकत्वघटितम् । कार्याव्यव-

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

हितप्राक्क्षणवृत्त्य भावाप्रतियोगित्वे सति कार्याव्यवहितप्राक्क्षणवृत्तित्वं कारणत्वम् । अतः कारणत्वं व्यापकत्वघटितम् । तादृशकारणत्वग्रहं प्रति व्यतिरेकव्यभिचारज्ञानम् अन्वयव्यभिचारज्ञानं च प्रतिबन्धकम् । अतः कारणताग्रहप्रतिबन्धकज्ञानविषयं व्यतिरेकव्यभिचारं निराकरोति – **इत्थं च** इति ग्रन्थेन । **कल्प्यते** – अनुमीयते इति । ''नास्तिकात्मा जन्मान्तरीयमङ्गलवान्, ग्रन्थसमाप्तेः'' इति अनुमानाकारः ।

व्यतिरेकव्यभिचारनिरासप्रकारम् आह – **ग्राह्यसन्देहपर्यवसन्नस्य** इति । व्यतिरेकव्यभिचारसंशयः अनुमित्या ग्राह्यं यत् समाप्तिकारणत्वं तत्संशये पर्यवसन्नः इति, तस्य संशयस्य साध्यसंशयरूपपक्षताविधया कारणत्वानुमितौ हेतुत्वेन प्रतिबन्धकत्वं नास्ति । प्रतिबन्धकीभूतः व्यतिरेकव्यभिचारनिर्णयश्च नास्ति । अतः समाप्तिकारणत्वानुमितिः भवितुम् अर्हति इति भावः ।।

मुक्तावली

विघ्नध्वंसस्तु मङ्गलस्य द्वारम् इति आहुः प्राञ्चः ।।

दिनकरी

ननु तथापि कादम्बर्यादौ विघ्नध्वंसः मा जायताम्, समाप्तिः परं जायताम्, मङ्गलरूपहेतोः सत्त्वात् इति आशङ्क्य आह – **विघ्नध्वंसस्तु** इति । तथा च स्वजन्यविघ्नध्वंसवत्त्वसंबन्धेन मङ्गलाभावात् न समाप्तिः इति भावः । **आहुः** इति अस्वरसोद्भावनम् । तद्बीजं तु – विघ्नध्वंसद्वारा मङ्गलस्य हेतुत्वं न संभवति, [1]नास्तिकग्रन्थसमाप्तौ व्यभिचारात् ।

न च – स्वजनकविघ्नध्वंसोत्पत्त्यवच्छेदकतासंबन्धेन समाप्तिं प्रति स्वजन्य-विघ्नध्वंसावच्छेदकतासंबन्धेन मङ्गलस्य हेतुत्वात्, स्वप्रतियोगिचरमवर्णानु-

1. नास्तिकग्रन्थसमाप्तौ व्यभिचारात् इति । समाप्तौ सत्यां नास्तिकात्मनि व्यभिचारात् इत्यर्थः – (सु).

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

कूलकृतिमत्त्वसंबन्धेन समाप्तिं प्रति आश्रयतासंबन्धेन मङ्गलस्य हेतुत्वात् वा जन्मान्तरीयमङ्गलकल्पनया न व्यभिचारः इति – वाच्यम् । सहकार्यन्तरासमवधानेन ऐहिकपुत्राभावेऽपि आमुष्मिकपुत्ररूपफलस्य सिद्धान्तिितत्वात् इति – वाच्यम् ।

तथा सति जन्मान्तरीयसमाप्तिम् उद्दिश्य जन्मान्तरीयमङ्गलकरणापत्तेः । अतः स्वप्रतियोगिचरमवर्णावच्छेदकतासंबन्धेन समाप्तिं प्रति स्वोत्पत्त्यवच्छेदकजातीयतासंबन्धेन मङ्गलहेतुत्वस्य वाच्यतया नास्तिकशरीरे व्यभिचारस्य दुर्वारत्वात् । न च – पुत्रकामाधिकरणविरोधः, इति – वाच्यम् ।

तत्र पुत्रकामनाश्रवणात् । इह तु [1]शिष्टाचारानुमितश्रुत्या ऐहिकसमाप्तेः एव मङ्गलफलत्वात् ।

न च – **स्वावच्छेदकावच्छिन्नप्रतियोगिकत्व** – स्वाव्यवहितोत्तरक्षणोत्पत्तिकत्वोभयसंबन्धेन मङ्गलजन्यविघ्नध्वंसविशिष्टसमाप्तित्वस्य मङ्गलकार्यतावच्छेदकत्वात् न व्यभिचारः इति – वाच्यम् । **कारणस्य कार्यतावच्छेदकत्वानुपगमात्** । **अत एव** 'काशीमरणात् मुक्तिः' इति श्रुत्यन्तर्गतपञ्चम्याः प्रयोजकत्वपरत्वोपवर्णनं ग्रन्थकृतां सङ्गच्छते । **अन्यथा** तत्रापि काशीमरणविशिष्टमुक्तिं प्रति काशीमरणे हेतुत्वस्य निर्दुष्टतया तथा उपवर्णनम् असङ्गतं स्यात् ॥

राजीवोल्लासः

मङ्गलस्य विघ्नध्वंसद्वारा समाप्तिकारणत्वम् इति वदतां प्राचीनानां मते **'आहुः'** इत्यनेन सूचितम् अस्वरसम् उपपादयति – **तद्बीजं तु** इत्यादिना । विघ्नध्वंसद्वारापि मङ्गलस्य समाप्तिकारणत्वं न संभवति । मङ्गलरूपकारणं विनापि नास्तिकग्रन्थसमाप्त्या व्यतिरेकव्यभिचारात् ।

1. शिष्टाचारानुमितश्रुत्या इति। अनुमितश्रुतेरपि बोधकत्वपक्षम् अवलम्ब्य इदम् – (सु).

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

व्यतिरेकव्यभिचारम् उद्धर्तुं शङ्कते – **न च स्वजनक** इति । अत्र त्रयः कार्यकारण भावाः विवक्षिताः –

स्वजनकविघ्नध्वंसोत्पत्यवच्छेदकतासंबन्धेन समाप्तिं प्रति अवच्छेदकतासंबन्धेन मङ्गलं कारणम् इति **एकः** । स्वं – एतज्जन्मनि ग्रन्थसमाप्तिः । स्वजनकः यः विघ्नध्वंसः तदुत्पत्यवच्छेदकत्वं नास्तिकस्य जन्मान्तरीयशरीरे वर्तते । जन्मान्तरे मङ्गलानुष्ठानानन्तरं तदानीं तच्छरीरावच्छिन्ने आत्मनि विघ्नध्वंसस्य उत्पत्तेः । एवं तस्मिन् शरीरे अवच्छेदकता संबन्धेन मङ्गलं च वर्तते इति जन्मान्तरीयस्य मङ्गलस्य एतज्जन्मीयग्रन्थसमाप्तेश्च सामानाधि करण्यात् कार्यकारणभावनिर्वाहः । अयं कार्यकारणभावः **शरीरनिष्ठप्रत्यासत्त्या** ।

अत्र कार्यतावच्छेदकसंबन्धशरीरे उत्पत्तिपदानिवेशे स्वजनकविघ्नध्वंसावच्छेदकतासंबन्धेन समाप्तेः नास्तिकशरीरेऽपि उत्पत्त्या, तत्र च अवच्छेदकतासंबन्धेन जन्मान्तरीयमङ्गलविरहात् व्यतिरेकव्यभिचारः । तद्वारणाय उत्पत्तिपदनिवेशः । तथा सति स्वजनक-विघ्नध्वंसोत्पत्त्यवच्छेदकतासंबन्धेन समाप्तिः नास्तिकशरीरे नास्ति । किन्तु, जन्मान्तरीयशरीरे एव अस्ति । तत्र अवच्छेदकतासंबन्धेन मङ्गलस्य सत्त्वात् न व्यतिरेकव्यभिचारः इति भावः ।

अवच्छेदकतासंबन्धेन समाप्तिं प्रति स्वजन्यविघ्नध्वंसावच्छेदकतासंबन्धेन मङ्गलं कारणम् इति **द्वितीयः कार्यकारणभावः** । अयमपि **शरीरनिष्ठप्रत्यासत्त्या** । पूर्वस्मिन् कार्यकारणभावे जन्मान्तरीयशरीरे कार्यकारणयोः सामानाधिकरण्यम् । अस्मिन् कार्यकारणभावे एतज्जन्मशरीरे कार्यकारणयोः समावेशः इति भेदः । अवच्छेदकतासंबन्धेन ग्रन्थसमाप्तिः नास्तिकस्य एतज्जन्मशरीरे वर्तते । तत्र स्वजन्यविघ्नध्वंसावच्छेदकतासंबन्धेन मङ्गलं वर्तते । स्वं – जन्मान्तरीयमङ्गलं तज्जन्यस्य आत्मनिष्ठस्य विघ्नध्वंसस्य एतज्जन्मन्यपि सद्भावात् तादृशविघ्नध्वंसावच्छेदकत्वम् एतच्छरीरेऽपि अस्तीति उक्तसंबन्धेन मङ्गलस्य एतच्छरीरनिष्ठत्वम् ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

स्वप्रतियोगिचरमवर्णानुकूलकृतिमत्त्वसंबन्धेन समाप्तिं प्रति आश्रयतासंबन्धेन मङ्गलं कारणम् इति **आत्मनिष्ठप्रत्यासत्त्या तृतीयः कार्यकारणभावः** । स्वं – चरमवर्णध्वंसरूपा समाप्तिः । तत्प्रतियोगी – चरमवर्णः । तदनुकूलकृतिमत्त्वं नास्तिकात्मनि वर्तते । तत्रैव आश्रयतासंबन्धेन जन्मान्तरीयकं मङ्गलम् अस्तीति कार्यकारणयोः सामानाधिकरण्यम् ।

तथा सति इत्यादि । उक्तरीत्या जन्मान्तरीयसमाप्तिं प्रति जन्मान्तरीय-मङ्गलस्य कारणत्वाङ्गीकारे जन्मान्तरीयग्रन्थसमाप्तिम् उद्दिश्य जन्मान्तरे मङ्गलाचरणं स्यात् । न च तथा शिष्टाचारः दृश्यते । तस्मात् एतज्जन्मन्येव कार्यकारणयोः सामानाधिकरण्यं यथा स्यात्, तथा कार्यकारणभावो वक्तव्यः । स च इत्थम् – स्वप्रतियोगिचरमवर्णावच्छेदकतसंबन्धेन समाप्तिं प्रति स्वोत्पत्त्यवच्छेदकजातीयता-संबन्धेन मङ्गलं कारणम् इति । स्वं– समाप्तिः । स्वप्रतियोगी – चरमवर्णः । तदवच्छेदकतासंबन्धेन समाप्तिः एतज्जन्मशरीरे । तत्रैव स्वोत्पत्त्यवच्छेदकजातीयत्व-संबन्धेन मङ्गलं वर्तते । स्वोत्पत्त्यवच्छेदकजातीयत्वं नाम स्वोत्पत्त्यवच्छेदक-वृत्तिजातिमत्त्वम् । स्वं – मङ्गलम् । स्वोत्पत्त्यवच्छेदकं शरीरं चैत्रशरीरम् । तद्वृत्तिजातिः चैत्रत्वम् । तद्वत्त्वं चैत्रशरीरे । एतज्जन्मीयचैत्रशरीरस्यापि अवयवोपचयापचयादिना अवस्थाभेदेन नाशस्वीकारात् मङ्गलाचरणकाले स्थितं शरीरं ग्रन्थसमाप्तिसमये नास्ति इति ग्रन्थसमाप्त्यवच्छेदकशरीरे मङ्गलोत्पत्त्यवच्छेदकत्वं नास्ति इति व्यतिरेकव्यभिचारः स्यात् । तत्परिहाराय जातीयत्वपर्यन्तानुधावनम् । तथा सति मङ्गलोत्पत्त्यवच्छेदकशरीरस्य समाप्त्यवच्छेदकशरीरस्य च भिन्नत्वेऽपि शरीरद्वये एका चैत्रत्वजातिः अस्ति इति मङ्गलोत्पत्त्यवच्छेदकशरीरवृत्तिचैत्रत्वजाति-मत्त्वसंबन्धेन मङ्गलं समाप्त्यवच्छेदकशरीरेऽपि अस्ति इति न दोषः ।

अत्र जातौ एकक्षणवृत्तिपदार्थद्वयावृत्तित्वं विशेषणं देयम् । अन्यथा जन्मान्तरीयशरीरवृत्तिपृथिवीत्वजातिमत्त्वस्य एतज्जन्मीयशरीरेऽपि सत्त्वेन उक्तकार्यकारणभावस्वीकारेऽपि जन्मान्तरीयसमाप्तिम् उद्दिश्य जन्मान्तरे

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

मङ्गलकरणापत्तिः । पृथिवीत्वं तु एकक्षणवृत्तिघटपटादिपदार्थद्वयवृत्तितया सा जातिः ग्रहीतुं न शक्यते। चैत्रत्वं प्रतिक्षणं भिन्नेषु शरीरेषु वर्तते । अतः एकक्षणवृत्तिपदार्थद्वयावृत्ति भवति ।

न पुत्रकामाधिकरणविरोध इति । 'पुत्रकामः पुत्रेष्ट्या यजेत' इति श्रुत्या पुत्ररूपफलम् उद्दिश्य पुत्रेष्टिः विधीयते। अस्मिन् जन्मनि पुत्रेष्टौ कृतायामपि सहकार्यन्तरवैकल्यात् पुत्रस्य अनिष्पत्तौ जन्मान्तरे पुत्ररूपं फलं पुत्रेष्ट्या जायते इति **पुत्रकामाधिकरणे** निर्णीतम् । जन्मान्तरीयफलम् उद्दिश्य जन्मान्तरे साधनानुष्ठानम् अनभिमतं चेत् तदधिकरणविरोधः इति शङ्का ।

'पुत्रकामः' इति श्रुतौ पुत्रे ऐहिकत्वविशेषणविरहात् पुत्रसामान्यं फलम् इति कल्प्यते । प्रकृते तु ऐहिकसमाप्तिम् उद्दिश्यैव शिष्टाः मङ्गलम् आचरन्ति इति तादृशाचारेण अनुमीयमाना श्रुतिरपि ''ऐहिकसमाप्तिकामः मङ्गलम् आचरेत'' इत्याकारा इति ।

अत्र **सुबोधिनीकाराः** – अनुमितश्रुतेरपि बोधकत्वपक्षम् अवलम्ब्य इदम् । तृतीयार्थः बोध्यत्वम् । श्रुत्यनुमानाकारश्च इत्थम् – ''मङ्गलं वेदबोधितैहिकसमाप्ति-साधनतावत्, ऐहिकसमाप्त्युद्देश्यकशिष्टाचारविषयत्वात्, यत् यदुद्देश्यकशिष्टाचार-विषयत्ववत्, तत् वेदबोधिततत्साधनतावत्'' इति । सामान्यमुखव्याप्तौ भोजनादौ व्यभिचारवारणाय लोकावगतेष्टसाधनतावदन्यत्वरूपम् अलौकिकत्वमपि हेतुकोटौ देयम् । लोकश्च वेदतदुपजीविप्रमाणातिरिक्तः – इति ।

व्यतिरेकव्यभिचारं परिहर्तुं कार्यकारणभावान्तरं शङ्कते – **न च स्वावच्छेदकावच्छिन्न** इति । मङ्गलजन्यविघ्नध्वंसविशिष्टसमाप्तिं प्रति मङ्गलं कारणम् । समाप्तौ मङ्गलजन्यविघ्नध्वंसवैशिष्ट्यं च स्वावच्छेदकावच्छिन्न-प्रतियोगिकत्व-स्वाव्यवहितोत्तरक्षणोत्पत्तिकत्वोभयसंबन्धेन । कार्यतावच्छेदकसंबन्धः कारणतावच्छेद-कसंबन्धश्च अवच्छेदकत्वम् । एवञ्च उक्तोभयसंबन्धेन मङ्गलजन्यविघ्नध्वंस-

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

विशिष्टसमाप्तिः अवच्छेदकतासंबन्धेन यत्र वर्तते, तत्र अवच्छेदकतासंबन्धेन मङ्गलसत्त्वम् अपेक्षितम् । नास्तिकग्रन्थसमाप्तेः मङ्गलं विनापि जायमानतया व्यतिरेकव्यभिचारः पूर्वम् आशङ्कितः । अयं च व्यभिचारः समाप्तिसामान्यं प्रति मङ्गलस्य कारणत्वे सत्येव भवति । वयं तु कार्यतावच्छेदकसङ्कोचं कृत्वा मङ्गलजन्यविघ्नध्वंसविशिष्टसमाप्तित्वावच्छिन्नं प्रति मङ्गलं कारणम् इति ब्रूमः । नास्तिकग्रन्थसमाप्तिस्तु मङ्गलजन्यविघ्नध्वंसविशिष्टा न भवति; किन्तु भोगादिजन्य-विघ्नध्वंसविशिष्टा । तथा च तस्याः कार्यतावच्छेदकानाक्रान्ततया तां प्रति मङ्गलस्य अहेतुत्वात् न व्यतिरेकव्यभिचारः ।

अस्य कार्यकारणभावस्य समन्वयस्तु – आस्तिकग्रन्थसमाप्तिः मङ्गलजन्यविघ्नध्वंसविशिष्टा भवति । स्वं – आस्तिककृतमङ्गलजन्यः विघ्नध्वंसः । तस्य अवच्छेदकं यत् आस्तिकशरीरम्, तदवच्छेदेनैव चरमवर्णः जायते इति चरमवर्णरूपः समाप्तिप्रतियोगी विघ्नध्वंसावच्छेदकशरीरावच्छिन्नः । तदवच्छिन्नचरमवर्णप्रतियोगिकत्वं चरमवर्णध्वंसरूपसमाप्तौ अस्ति । एवं मङ्गलजन्यविघ्नध्वंसाव्यवहितोत्तरक्षणोत्पत्तिकत्वं च समाप्तौ वर्तते इति समाप्तिः उक्तोभयसंबन्धेन मङ्गलजन्यविघ्नध्वंसविशिष्टा भवति । विशिष्टा समाप्तिश्च अवच्छेदकतासंबन्धेन आस्तिकशरीरे वर्तते । तत्र अवच्छेदकतासंबन्धेन मङ्गलमपि वर्तते इति समन्वयः ।

आस्तिकनास्तिकाभ्यां युगपत् यत्र ग्रन्थसमाप्तिः कृता, तत्र नास्तिकीयसमाप्तेरपि आस्तिकीयमङ्गलजन्यविघ्नध्वंसाव्यवहितोत्तरक्षणोत्पत्तिकत्वेन तत्पूर्वम् अवच्छेदकतासंबन्धेन समाप्त्यधिकरणशरीरे अवच्छेदकतासंबन्धेन मङ्गलविरहात् व्यतिरेकव्यभिचारः । तद्वारणाय स्वावच्छेदकावच्छिन्नप्रतियोगिकत्वनिवेशः । नास्तिकसमाप्तौ व्यभिचारवारणाय द्वितीयसंबन्धनिवेशः ।

उक्तं कार्यकारणभावं खण्डयति – **कारणस्य कार्यतावच्छेदकत्वानुपगमात्** इति । कारणस्य कार्यतावच्छेदकशरीरे प्रवेशेन कार्यकारणभावः नाङ्गीक्रियते ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

मङ्गलजन्यविघ्नध्वंसविशिष्टसमाप्तित्वावच्छिन्नं प्रति मङ्गलं कारणम् इति स्वीकारे कारणस्य मङ्गलस्य कार्यतावच्छेदकशरीरे प्रवेशः आपतति । अतः एवं कार्यकारणभावः न युक्तः इति ।

कुतः कारणस्य कार्यतावच्छेदकशरीरे प्रवेशः न भवति इति आशङ्क्य आह – **अत एव** इति । कारणस्य कार्यतावच्छेदकत्वानुपगमादेव इत्यर्थः । ''काशीमरणात् मुक्तिः'' इति श्रुतिः । अत्र पञ्चम्याः कारणार्थकत्वम् उपेक्ष्य प्रयोजकत्वार्थकत्वं प्राचीनैः अङ्गीकृतम् । कारणार्थकत्वे कारणस्य कार्यतावच्छेदके प्रवेशः स्यात् इति भीत्या एव प्राचीनैः तथा अङ्गीकृतम् । तथा हि – यदि कारणत्वं पञ्चम्यर्थः स्यात्, तर्हि काशीमरणं मुक्तिकारणम्, ''तमेव विदित्वा अति मृत्युम् एति'' इति श्रुत्यन्तरबलात् तत्त्वज्ञानमपि मुक्तिकारणम् इति वक्तव्यम् । तथा सति तत्त्वज्ञानात् यत्र मुक्तिः, तत्र काशीमरणं विनापि मुक्तेः जायमानतया व्यतिरेकव्यभिचारः स्यात् इति तद्वारणाय अव्यवहितोत्तरत्वसंबन्धेन काशीमरणविशिष्टमुक्तिं प्रति काशीमरणं कारणम्; अव्यवहितोत्तरत्वसंबन्धेन तत्त्वज्ञानविशिष्टमुक्तिं प्रति तत्त्वज्ञानं कारणम् इति कार्यकारणभावः वक्तव्यः । स च कारणस्य कार्यतावच्छेदके प्रवेशानुपगमात् न युक्तः इत्याशयेन पञ्चम्याः कारणत्वार्थकं परित्यज्य प्रयोजकत्वार्थकत्वं युक्तम् इति भावः । **अन्यथा** इति । कारणस्यापि कार्यतावच्छेदके प्रवेशे इत्यर्थः ।।

दिनकरी

अथ ''तमेव विदित्वा अति मृत्युम् एति, नान्यः पन्था विद्यते अयनाय'' इति श्रुत्या तत्त्वज्ञानस्य मुक्तिसामान्यं प्रति हेतुत्वं प्रतिपादितम्; तच्च काशीमरणस्य मुक्तिहेतुत्वे न संभवति । काशीमरणजन्यमुक्तौ तत्त्वज्ञानस्य व्यभिचारप्रसङ्गात् । अतः काशीमरणस्य न मुक्तिजनकत्वम्, अपि तु तत्त्वज्ञानद्वारा मुक्तिप्रयोजकत्वमेव इति ग्रन्थकृतां तत्रत्यपञ्चम्याः प्रयोजकत्वपरत्वोपवर्णनम्; न तु कारणस्य कार्यतानवच्छेदकत्वात् तथा उपवर्णनम् इति चेत् –

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अस्तु कारणस्य कार्यतावच्छेदकत्वम्, अस्तु च पूर्वोक्तरीत्या मङ्गलजन्यविघ्नध्वंसविशिष्टसमाप्तित्वस्य कार्यतावच्छेदकत्वेन नास्तिकशरीरे व्यभिचारवारणम् । एवमपि भोगादिनाश्यविघ्नध्वंसपूर्वकसमाप्तौ क्लृप्तनियतपूर्ववृत्तिताकेन ध्वंसेनैव मङ्गलस्थलीयसमाप्त्युपपत्तेः मङ्गलस्य अन्यथासिद्धत्वं दुर्वारमेव ।

न च – व्यापारेण व्यापारिणः न अन्यथासिद्धिः इति – वाच्यम् । यत्र **व्यापारिणः** प्रमाणबोधितकारणतानिर्वाहाय व्यापारः कल्प्यते – यथा यागस्य स्वर्गहेतुता[1]निर्वाहार्थम् अपूर्वं – तत्रैव व्यापारेण व्यापारिणः न अन्यथासिद्धिः । अत एव काशीमरणस्य तत्त्वज्ञानेन मुक्तौ अन्यथासिद्धत्वात् प्रयोजकत्वपरतया श्रुतिसमर्थनं सङ्गच्छते ।।

राजीवोल्लासः

अथ इत्यादि । यदि कारणत्वं पञ्चम्यर्थः स्यात्, तर्हि मुक्तिं प्रति काशीमरणं कारणम् इति कार्यकारणभावः स्यात् । स च अयुक्तः । ''तमेव विदित्वा अति मृत्युम् एति'' इति श्रुतौ तत्त्वज्ञानस्य मुक्तिसामान्यं प्रति कारणत्वं प्रतिपादितम् । काशीमरणस्यापि मुक्तिकारणत्वाङ्गीकारे काशीमरणजन्यमुक्तौ तत्त्वज्ञानं विनापि जायमानायां व्यतिरेकव्यभिचारात् तत्त्वज्ञानस्य मुक्तिसामान्यं प्रति कारणत्वं न संभवति इति तत्प्रतिपादकश्रुतिविरोधः । तत्परिहाराय ''काशीमरणात् मुक्तिः'' इत्यत्र पञ्चम्याः प्रयोजकत्वम् अर्थः, न तु कारणत्वम्; प्रयोजकत्वं च कारणकारणत्वम्; तेन काशीमरणं तत्त्वज्ञानद्वारा मुक्तिहेतुः इत्यभिप्रायेणैव प्राचीनैः ''काशीमरणात् मुक्तिः'' इत्यत्र पञ्चम्याः प्रयोजकत्वार्थकत्वम् उक्तम्, न तु कारणस्य कार्यतावच्छेदकप्रवेशः स्यात् इति भयात् इति चेत् –

भवतु नाम कारणस्यापि कार्यतावच्छेदके प्रवेशः; भवतु च पूर्वोक्तरीत्या मङ्गलजन्यविघ्नध्वंसविशिष्टसमाप्तित्वावच्छिन्नं प्रति मङ्गलं कारणम् इति

1. निर्वाहार्थम् अपूर्वम् इति। अपूर्वनिष्ठकारणत्वम् इत्यर्थः। (सु.)

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

कार्यकारणभावः; तदनुसारेण नास्तिकशरीरे व्यभिचारवारणम् । एवम् अपि भोगजन्यविघ्नध्वंसपूर्वकनास्तिकसमाप्तौ अवश्यक्लृप्तनियतपूर्ववर्तिना विघ्नध्वंसेनैव मङ्गलस्थलीयसमाप्तेरपि उत्पत्तेः उपपत्तौ अन्यथासिद्धत्वात् मङ्गलं न समाप्तिं प्रति कारणम् ।

ननु मङ्गलस्य विघ्नध्वंसद्वारा समाप्तिसाधनत्वात् विघ्नध्वंसः व्यापारः भवति । व्यापारेण व्यापारवतः अन्यथासिद्धत्वं न शास्त्रकारसंमतम् । तथा सति अपूर्वद्वारा यागादेः स्वर्गसाधनत्वं न स्यात् । अवश्यक्लृप्तपूर्ववर्तिना अपूर्वेणैव स्वर्गस्य संभवे तद्भिन्नस्य यागस्य अन्यथासिद्धत्वात् । तथा च मङ्गलस्य कथम् अन्यथासिद्धत्वम् इति आशङ्कते – **न च व्यापारेण** इति ।

समाधत्ते – **यत्र व्यापारिण** इति । यत्र व्यापारवतः कारणत्वं प्रमाणेन बोधितं निर्वोढुं व्यापारस्य कारणत्वं कल्प्यते, तत्रैव व्यापारेण व्यापारिणः न अन्यथासिद्धिः । यथा – ''यजेत स्वर्गकामः'' इति श्रुत्या यागस्य स्वर्गसाधनत्वं बोधितम् । तच्च क्षणध्वंसिनः यागस्य नोपपद्यत इति श्रुतिबोधितस्य यागनिष्ठकारणत्वस्य निर्वाहाय ''अपूर्वद्वारा यागः स्वर्गकारणम्'' इत्येवं व्यापारतया अपूर्वं कल्प्यते । तत्र व्यापारेण – अपूर्वेण यागस्य न अन्यथासिद्धत्वम् । तथा सति यागस्य अकारणत्वेन तन्निष्ठकारणत्वनिर्वाहकस्य अपूर्वस्यैव असिद्धेः । अत एव काशीमरणस्य तत्त्वज्ञानद्वारा मुक्तिहेतुत्वेऽपि तत्त्वज्ञानस्य काशीमरणनिष्ठमुक्तिकारणत्वनिर्वाहार्थं मुक्तिहेतुत्वं न कल्प्यते । ''तमेव विदित्वा'' इति श्रुत्यन्तरेण तत्त्वज्ञानस्य मुक्तिहेतुत्वावगमात् । तथा च तत्र व्यापारेण तत्त्वज्ञानेन अन्यथासिद्धत्वात् काशीमरणं मुक्तिकारणं न भवति इति कारणत्वस्य बाधात् ''काशीमरणात् मुक्तिः'' इत्यत्र पञ्चम्याः प्रयोजकत्वार्थकत्वं प्राचीनैः उपवर्णितम् । प्रकृते च मङ्गलनिष्ठसमाप्ति-कारणत्वनिर्वाहार्थं विघ्नध्वंसस्य समाप्तिहेतुत्वं न कल्प्यते । किन्तु कार्यसामान्ये प्रतिबन्धकाभावस्य हेतुतया मङ्गलस्य कारणत्वं विनापि विघ्नध्वंसस्य

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

प्रतिबन्धकाभावविधया कारणत्वं क्लृप्तम् इति अवश्यक्लृप्तनियतपूर्ववर्तिना विघ्नध्वंसेनैव समाप्तिसंभवे तद्भिन्नस्य मङ्गलस्य अन्यथासिद्धत्वात् मङ्गलस्य समाप्तिकारणत्वं न संभवति इति भावः । **अत एव इति** । व्यापारिणः प्रमाणसिद्धकारणत्वनिर्वाहाय व्यापारस्य कारणत्वकल्पनास्थले एव व्यापारेण व्यापारिणः न अन्यथासिद्धिः, अन्यत्र तु अन्यथासिद्धिः इति स्वीकारादेव इत्यर्थः ।।

मुक्तावली

नव्यास्तु – मङ्गलस्य विघ्नध्वंस एव फलम्, **समाप्तिस्तु** बुद्धिप्रतिभादि-कारणकलापात् । न च – **एवं स्वतःसिद्धविघ्नविरहवता** कृतस्य मङ्गलस्य निष्फलत्वापत्तिः इति – वाच्यम् । इष्टापत्तेः । **विघ्नशङ्कया तदाचरणात्, तथैव शिष्टाचारात्** ।

न च – तस्य निष्फलत्वे **तद्बोधक**वेदाप्रामाण्यापत्तिः इति – वाच्यम् । **सति विघ्ने तन्नाशस्यैव वेदबोधितत्वात्** । अत एव पापभ्रमेण कृतस्य प्रायश्चित्तस्य निष्फलत्वेऽपि **न तद्बोधकवेदाप्रामाण्यम्** ।

मङ्गलं च विघ्नध्वंसविशेषे कारणम् । विघ्नध्वंसविशेषे च विनायकस्तवपाठादि । [1]**क्वचिच्च विघ्नात्यन्ताभाव** एव **समाप्तिसाधनम्, प्रतिबन्धकसंसर्गाभावस्यैव** कार्यजनकत्वात् । **इत्थं च** नास्तिकादीनां ग्रन्थेषु जन्मान्तरीयमङ्गलजन्यदुरितध्वंसः, **स्वतःसिद्धविघ्नात्यन्ताभावः** वा अस्ति इति न व्यभिचारः इति – आहुः ।

दिनकरी

प्रकृते च प्रतिबन्धकाभावस्य कार्यमात्रे हेतुतायाः मङ्गलकारणतां विनापि क्लृप्ततया, मङ्गलस्य अन्यथासिद्धत्वं दुष्परिहरमेव इति **विघ्नध्वंसस्य द्वारत्वम् इच्छतां** प्राचां मतेऽपि विघ्नध्वंसस्य कार्यत्वावश्यकतया ''विघ्नो मे निवर्तताम्'' इति कामनया मङ्गलाचरणेन च, विघ्नध्वंस एव फलम् इति वदतां **चिन्तामणिकृतां**

1. क्वचिच्च इति । ''च'' कारः स्वतःसिद्धविघ्नविरहवत्त्वरूपविशेषद्योतकः । (सु).

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

मतम् आह – **नव्यास्तु** इति । ''विघ्नध्वंस एव'' इति ''एव''कारेण समाप्तिव्यवच्छेदः । **फलं– प्रवृत्त्युद्देश्यम्** । **ननु समाप्तिः तर्हि** आकस्मिकी स्यात्, अत आह – **समाप्तिस्तु** इति । **बुद्धिः** -ज्ञानम्, प्रतिभा तद्विशेषः स्फूर्त्याख्यः । ''प्रतिभादि'' इति ''आदि''ना विघ्नसंसर्गाभावपरिग्रहः । **अनयैव रीत्या** कारीरीष्टिस्थलेऽपि **अवग्रहनिवृत्तिरेव फलम्**, वृष्टिस्तु स्वकारणादेव इति बोध्यम् । **एवं** - मङ्गलस्य [1]विघ्नध्वंसं प्रति जनकत्वे । **स्वतःसिद्धविघ्नविरहवता** इति । विघ्नात्यन्ताभाववता इत्यर्थः ।

ननु निष्फले प्रवृत्तिरेव कथम्? अत आह – **विघ्नशङ्कया** इति । संशय-निश्चय-साधारण – विघ्नज्ञानमेव प्रवर्तकम् इति भावः । **तदाचरणात्** – मङ्गलाचरणात् । ननु विघ्नसंशये मङ्गलाचरणमेव असिद्धम् इति, तत्राह – [2]**तथैव** इति । [3]**शिष्टाचारात्** इति । विषयतासंबन्धेन मङ्गले इति शेषः ।

ननु निर्विघ्नपुरुषानुष्ठितमङ्गलस्थले अन्वयव्यभिचारेण विघ्नध्वंसं प्रति मङ्गलस्य कारणता बाधिता; तथा च बाधितार्थबोधकत्वात् वेदस्य अप्रामाण्यम् इति श्रुतेः कारणताबोधकत्वम् [4]अङ्गीकर्तुः मते शङ्कां निरस्यति – **न च** इति । **तस्य** – निर्विघ्नपुरुषानुष्ठितमङ्गलस्य । **तद्बोधक** इति । मङ्गलविघ्नध्वंसयोः कार्यकारणभावबोधकेत्यर्थः । **सति विघ्ने** इति । **तथा च** उपदर्शितस्थले प्रतियोगिरूपकारणाभावेन विघ्नध्वंसरूप-कार्यानुदयोपपत्तौ कारणतायाः अबाधितत्वेन न कारणताबोधकवेदाप्रामाण्यम् इति भावः । **अत एव** – नाशं प्रति प्रतियोगिनः कारणत्वात् एव । **तद्बोधकवेदाप्रामाण्यम्** इति । **प्रायश्चित्तस्य** पापनाशकत्वबोध-कवेदाप्रामाण्यम् इत्यर्थः ।

---

1. विघ्नध्वंसं प्रति जनकत्वे इति। सावधारणम् इदम्। समाप्तिं प्रति अजनकत्वे इत्यर्थः। (सु).
2. तथैव इति – विघ्नप्रकारकज्ञानमात्रेणैव इत्यर्थः (प्रभा).
3. शिष्टाचारात् इति – शिष्टानाम्–आस्तिकानाम् आचारात्–प्रवृत्तेः इत्यर्थः (प्रभा).
4. अङ्गीकर्तुः मते इति। अनुमितश्रुतेः अबोधकत्वस्यैव स्वयं सिद्धान्तितत्वात् एवम् उक्तिः (सु).

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

ननु मङ्गलं न विघ्नध्वंसे कारणम्, विनायकस्तवपाठादिजन्यविघ्नध्वंसे व्यभिचारात्, विनायकस्तवस्य एवं मङ्गलत्वेऽपि तदनुकूलकण्ठाभिघातरूपस्य तत्पाठस्य मङ्गलत्वाभावात् । न च – पाठकतासंबन्धेन विनायकस्तव एव विघ्ननाशकः, स च मङ्गलमेव इति न व्यभिचारः इति – वाच्यम् । "सर्वे विघ्नाः शमं यान्ति" इत्यादिना तत्पाठस्यापि विघ्ननाशकत्वबोधनात्, प्रायश्चित्तजन्यविघ्नध्वंसे व्यभिचारात् च इति, अत आह – **मङ्गलं च** इति । "स्तवपाठादिः" इति "आदि"ना प्रायश्चित्तपरिग्रहः । **तथा च** मङ्गलस्य स्वसामानाधिकरण्य-स्वाव्यवहितोत्तरक्षणोत्पत्तिकत्व – उभय – संबन्धेन मङ्गलविशिष्टविघ्नध्वंसत्वं विजातीयविघ्नध्वंसत्वं वा कार्यतावच्छेदकम् । एवं विनायकस्तवपाठादेः उपदर्शितसंबन्धेन विनायकस्तवपाठादिविशिष्टविघ्नध्वंसत्वं विजातीयविघ्नध्वंसत्वं वा कार्यतावच्छेदकम् इति न व्यभिचारः इति भावः ।

ननु विघ्नध्वंस एव यदि मङ्गलस्य फलम्, तदा समाप्तिकामस्य मङ्गले प्रवृत्तिः न स्यात् । अतः समाप्तिसाधनविघ्नध्वंससाधनत्वात् मङ्गले प्रवृत्तिः वाच्या । तच्च न संभवति । स्वतःसिद्धविघ्नविरहस्थले व्यभिचारेण विघ्नध्वंसस्य समाप्ति-साधनत्वाभावात् इति शङ्कां निरस्यति **क्वचित्** इति । ननु एवम् अननुगमः । अतः अनुगतेन रूपेण कारणत्वे बीजम् आह –

प्रतिबन्धक इति । **संसर्गाभावस्य** – संसर्गाभावत्वेन संसर्गाभावस्य । तथा च विघ्नसंसर्गाभावत्वेन हेतुत्वात् न पूर्वोक्तव्यभिचारः इति भावः । **अत्र च** तत्तद्विघ्नाभावत्वेन हेतुता, न तु विघ्नाभावकूटत्वेन । अन्यथा विघ्नप्रागभावादीनाम् एकत्र असंभवेन समाप्तिः न स्यात् इति बोध्यम् ।

यत्र च मङ्गलं विनापि समाप्तिः, तत्र विघ्नध्वंसाभाववति समाप्तेः दर्शनात् व्यतिरेकव्यभिचारम् आशङ्क्य निषेधति – **इत्थं च** इति । दुरितध्वंसकल्पने तज्जनकीभूतमङ्गलकल्पने च गौरवात् आह – **स्वतः सिद्ध** इति । **यत्र च मङ्गले**

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

सत्यपि न समाप्तिः, तत्र मङ्गलात् विघ्नध्वंसः भवत्येव, समाप्त्यभावस्तु विघ्नभूयस्त्वात् तन्मङ्गलानन्तरोत्पन्नात् विघ्नात् वा इति अवधेयम् ।

अथ समाप्तिविघ्नध्वंसयोः आकाशात्मनिष्ठयोः कथं कार्यकारणभावः इति चेत्, उच्यते – स्वप्रतियोगिप्रयोजकत्वसंबन्धेन चरमवर्णध्वंसरूपसमाप्तिं प्रति विशेषणतासंबन्धेन विघ्नसंसर्गाभावत्वेन हेतुत्वम् इति ।

वस्तुतस्तु – ''आहुः'' इत्यनेन **सूचिताम् अन्यथासिद्धिं** प्रकटयति – **क्वचिच्च** इति । ''विघ्नात्यन्ताभाव एव'' इति ''एव''कारेण विघ्नध्वंसस्य तद्द्वारक-मङ्गलस्य च व्यवच्छेदः । **समाप्तिसाधनम्** – **समाप्त्यव्यवहितपूर्ववर्तितया** निश्चितः । **तथा च** तेनैव मङ्गलस्थलीयसमाप्तिनिर्वाहे मङ्गलस्य तज्जन्यविघ्नध्वंसस्य च अन्यथासिद्धिः । **ध्वंसप्रागभावयोः** अत्यन्ताभावेन विरोधे मानाभावात्, ध्वंसस्थलेऽपि अत्यन्ताभावसत्त्वात् इति भावः ।

ननु अन्योन्याभावभिन्नाभावत्वेनैव लाघवात् हेतुता अस्तु, अत आह– **प्रतिबन्धकसंसर्ग** इति । प्रतिबन्धकसत्त्वेऽपि संबन्धान्तरावच्छिन्नाभावस्य सत्त्वात् कार्योत्पादवारणाय [1]तत्तत्संसर्गावच्छिन्नप्रतियोगिताकाभावत्वेनैव हेतुत्वस्य वाच्यत्वेन न ध्वंसस्य हेतुता, तस्य संसर्गावच्छिन्नत्वे **मानाभावात्** इति भावः । **दुरितध्वंसः**-[2]दुरितध्वंससामग्रीप्रयुक्तः । **स्वतः सिद्धः**- दुरितकारणाभावप्रयुक्तः । **एतेन** विघ्नध्वंसस्य तदत्यन्ताभावस्य वा समाप्तिहेतुताविचारस्य **अप्रकृततया** तद्व्यवस्थापने प्रकृतानुपयोगः । **एवं प्रतिबन्धकाभावकूटस्य** हेतुत्वे अतीताना-गतप्रागभावध्वंसयोः युगपदेव एकदा अवस्थानासंभवेन कूटाप्रसिद्धिः, **पूर्वोक्तरीत्या** तत्तत्संसर्गावच्छिन्नप्रतियोगिताकत्वस्य प्रतिबन्धकाभावविशेषणत्वेन ध्वंसप्रागभावयोः

1. तत्तत्संसर्गावच्छिन्न इति। ''प्रतिबन्धकसंसर्गाभावस्य'' इति पदस्य प्रतिबन्धकस्य संसर्गेण अभावः इति विग्रहः इति भावः। प्राचीनमते तु अगत्या तादात्म्यानवच्छिन्न-प्रतोगिताकाभावे संसर्गाभावपदं पारिभाषिकम् – (सु).
2. दुरितध्वंससामग्रीप्रयुक्त इति। विघ्नात्यन्ताभावः इति शेषः (सु).

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

असंग्रहश्च इति दूषणानि निरस्तानि । **उक्तरीत्या प्रतिबन्धकात्यन्ताभावस्यैव कार्यमात्रे हेतुत्वात् इति** ।।

राजीवोल्लासः

विघ्नध्वंसस्य द्वारत्वम् इच्छताम् इति । मङ्गलस्य समाप्तिः फलम्, विघ्नध्वंसः द्वारम् इति इच्छतां प्राचां मतेऽपि विघ्नध्वंसस्य मङ्गलकार्यत्वम् आवश्यकम् । तथा च समाप्तौ विघ्नध्वंसे च उभयत्र मङ्गलकार्यत्वकल्पनापेक्षया लाघवात् विघ्नध्वंसे एव मङ्गलकार्यत्वं कल्पनीयम् । अतः मङ्गलस्य विघ्नध्वंस एव फलम्, न समाप्तिः ।

ननु मङ्गलस्य विघ्नध्वंसकामनया अननुष्ठानात् कथं मङ्गलफलत्वं विघ्नध्वंसस्य । यस्य यत्फलत्वं तस्य तत्कामनया अनुष्ठानम् आवश्यकम् इति व्याप्तेः इति चेत्, न – ''विघ्नो मे निवर्तताम्'' इति कामनया शिष्टैः मङ्गलाचरणात् । तथा च मङ्गलस्य विघ्नध्वंस एव फलम् इति **नवीनाः** । तन्मतम् उपन्यस्यति – **नव्यास्तु** इत्यादिना ।

ननु विघ्नध्वंस एव मङ्गलस्य फलम् इति मूलोक्तिः अयुक्ता । फलपदस्य जन्यार्थकतया मङ्गलध्वंसस्यापि मङ्गलजन्यत्वात् 'एव' कारासङ्गतेः इत्याशङ्कां निराकुर्वन् फलपदं व्याचष्टे – **फलं – प्रवृत्त्युद्देश्यम्** इति । तथा च मङ्गलध्वंसस्य मङ्गलजन्यत्वेऽपि मङ्गलानुकूलप्रवृत्त्युद्देश्यत्वं नास्ति इति विघ्नध्वंसस्य प्रवृत्त्युद्देश्यत्वम् अस्ति । अतः मङ्गलस्य विघ्नध्वंस एव प्रवृत्त्युद्देश्यम् इत्युक्तौ न काचित् अनुपपत्तिः इति भावः ।

ननु समाप्तिः तर्हि इति । मङ्गलस्य यदि विघ्नध्वंसः फलम्, समाप्तिः न फलम्, तदा समाप्तिः आकस्मिकी स्यात् – निर्हेतुका स्यात् इति आशङ्क्य समाप्तिः बुद्धिप्रतिभादिकारणकलापजन्यतया न निर्हेतुका; मङ्गलहेतुका न भवति इत्यत्रैव नव्यानाम् आग्रहः इति समाधानम् आह इत्यर्थः ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

ननु एवं कारीरियागस्यापि वृष्टिः फलं न स्यात् । यागेन प्रतिबन्धकस्य अवग्रहस्य निवृत्तौ स्वकारणादेव वृष्टिसंभवात् इत्याशङ्काम् इष्टापत्त्या परिहरति – **अनयैव रीत्या** इति । **अवग्रहः** – वृष्टिप्रतिबन्धकः दुरितविशेषः ।

ननु निर्विघ्नपुरुषानुष्ठित इत्यादि । मङ्गलस्य विघ्नध्वंसः फलम् इति नवीनमते यस्य पुरुषस्य विघ्नात्यन्ताभावः स्वतःसिद्धः, तेन अनुष्ठितस्य मङ्गलस्य निष्फलत्वं स्यात्, विघ्ने सत्येव तद्ध्वंसरूपस्य फलस्य संभवात् इत्याशङ्क्य इष्टापत्तेः इति समाधाय स्वतः- सिद्धविघ्नविरहवता कृतस्य मङ्गलस्य निष्फलत्वे सति कथं निष्फले मङ्गले प्रवृत्तिः इति पुनः आशङ्क्य **''विघ्नशङ्कया तदाचरणात्, तथैव शिष्टाचारात्''** इति समाहितं **मूले** । एतावता स्वतःसिद्धात्यन्ता-भाववत्पुरुषानुष्ठितमङ्गलस्थले मङ्गलसत्त्वेऽपि विघ्नध्वंसरूपस्य कार्यस्य अनुत्पत्त्या अन्वयव्यभिचारः दुष्परिहरः । एवं च अन्वयव्यभिचारेण मङ्गलस्य विघ्नध्वंस-कारणत्वं बाधितम् । अतः ''विघ्नध्वंसकामः मङ्गलम् आचरेत'' इति श्रुतेः विघ्नध्वंस-कारणत्वरूपबाधितार्थबोधकतया अप्रामाण्यम् इति आशङ्कां निरस्यति **मूले** इत्यर्थः ।

तथा च उपदर्शितस्थले इति । **''सति विघ्ने तन्नाशस्यैव वेदबोधितत्वात्''** इति मूलोक्तं न युक्तम् । ''स्वर्गकामः यजेत'' इत्यादौ यागस्य स्वर्गसाधनत्वमेव यथा विध्यर्थः, तथा ''विघ्नध्वंसकामः मङ्गलमाचरेत'' इत्यादावपि विघ्नध्वंसकारणत्वमेव विध्यर्थः, न तु सति विघ्ने विघ्नध्वंसकारणत्वम् इति; ''सति विघ्ने'' इत्यंशवाचकस्य पदस्य श्रुतौ अभावात् इति आशङ्कापरिहारार्थं **''तथा च''** इति ग्रन्थः । स्व-स्वेतरयावत्कारणसत्त्वे स्वसत्त्वे यदि कार्यानुत्पत्तिः तदैव अन्वयव्यभिचारः । अन्यथा केवलदण्डसत्त्वे घटस्य अनुत्पत्त्या अन्वयव्यभिचारेण दण्डस्यापि घटकारणत्वं न स्यात् । विघ्नध्वंसस्य मङ्गलं यथा कारणम्, तथा प्रतियोगिरूपः विघ्नोऽपि कारणम् । प्रतियोगितासंबन्धेन ध्वंसं प्रति तादात्म्यसंबन्धेन प्रतियोगिनः कारणत्वात् । तथा च स्वतःसिद्धविघ्नात्यन्ताभावस्थले स्वस्य मङ्गलस्य सत्त्वेऽपि स्वेतरस्य

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

विघ्नरूपकारणस्य अभावात् विघ्नध्वंसः न जायते । एवं च स्व-स्वेतरयावत्कारण-सत्त्वप्रयुक्तकार्यानुत्पत्तिरूपस्य अन्वयव्यभिचारस्य अभावात् मङ्गले विघ्नध्वं-सकारणत्वम् अबाधितमेव इति तद्बोधकवेदस्य अप्रामाण्यं न भवति इति भावः ।

प्रायश्चित्तस्य इति । येन पुरुषेण पापं कृतम्, तेन पुरुषेण पापनाशफलकं प्रायश्चित्तं कर्तव्यम् इति शास्त्रं बोधयति । कश्चित् स्वत एव पापरहितः पापशङ्कया प्रायश्चित्तं करोति । तत्र प्रायश्चित्तसत्त्वेऽपि पापनाशरूपफलानुत्पत्त्या अन्वयव्य-भिचारात् प्रायश्चित्तस्य पापनाशकारणत्वं बाधितम् इति तद्बोधकवेदाप्रामाण्यशङ्कापि उक्तरीत्यैव परिहर्तव्या । नाशं प्रति प्रतियोगिनः कारणतया सति पापे पापनाश एव प्रायश्चित्तस्य फलम् ।

ननु मङ्गलं न विघ्नध्वंसे कारणम् इत्यादि । मङ्गलं विनापि विनायकस्तोत्र-पाठादिना जायमाने विघ्नध्वंसे व्यतिरेकव्यभिचारात् मङ्गलं न विघ्नध्वंसे कारणम् । यदि च विनायकोत्कर्षप्रकारकज्ञानस्य तज्जनकशब्दरूपस्य वा विनायकस्तोत्रस्य मङ्गलत्वेन विघ्ननाशकत्वेऽपि तदनुकूलकण्ठताल्वाद्यभिघातरूपपाठस्य विघ्ननाशकत्वे प्रमाणाभावः । न च – ''सर्वे विघ्नाः शमं यान्ति गणेशस्तवपाठतः'' इति वचनेन पाठस्य विघ्ननाशकत्वम् अव्याहतम् इति – वाच्यम् । ''गणेशस्तवपाठतः'' इति वचनेन ''कृदभिहितः भावः द्रव्यवत् प्रकाशते'' इति अनुशासनबलात् पठितस्तोत्रस्यैव ''तसिल्'' प्रत्ययेन हेतुत्वप्रतिपादनात् कण्ठताल्वाद्यभिघातस्य विघ्ननाशकत्वे प्रमाणाभावः इति आलोच्यते, तदा प्रायश्चित्तजन्यविघ्ननाशे व्यतिरेकव्यभिचारः दुर्वारः इति, अत आह – **मङ्गलं च इति** इति भावः । **तथा च मङ्गलस्य** इति । मङ्गलवत् विनायकस्तवपाठस्य विघ्नध्वंसहेतुत्वे प्रसक्तः व्यतिरेकव्यभिचारः ''मङ्गलविशिष्टविघ्नध्वंसं प्रति मङ्गलं कारणम्, न विघ्नध्वंससामान्यं प्रति'' इति स्वीकारेण वारणीयः । विघ्नध्वंसे मङ्गलवैशिष्ट्यं च स्वसामानाधिकरण्य-स्वाव्यवहितोत्तरक्षणोत्पत्तिकत्वोभयसंबन्धेन । विनायकस्तवपाठजन्यः विघ्नध्वंसः

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

उक्तोभयसंबन्धेन मङ्गलविशिष्टः न भवति इति तस्य मङ्गलविशिष्टविघ्नध्वंसत्वरूपकार्यतावच्छेदकानाक्रान्ततया न व्यतिरेकव्यभिचारः ।

एवम् इति । स्वसामानाधिकरण्यस्वाव्यवहितोत्तरक्षणोत्पत्तिकत्वोभयसंबन्धेन विनायकस्तवपाठविशिष्टविघ्नध्वंसत्वावच्छिन्नं प्रति विनायकस्तवपाठः कारणम् । अतः विनायकस्तवपाठं विनापि मङ्गलात् विघ्नध्वंसोत्पत्त्या व्यतिरेकव्यभिचारेण विनायकस्तवपाठस्य कथं विघ्नध्वंसहेतुत्वम् इति शङ्कायाः नावकाशः इति भावः ।

ननु विघ्नध्वंस एव इति । मङ्गलस्य यदि विघ्नध्वंस एव फलं स्यात्, तदा ग्रन्थसमाप्तिकामस्य मङ्गले प्रवृत्तिः न स्यात् । यत् यस्य फलं भवति, तदिच्छोरेव तत्र प्रवृत्तिः इति नियमात् । अतः समाप्तिकामस्य मङ्गले प्रवृत्त्युत्पादनार्थं समाप्तिसाधनविघ्नध्वंससाधनत्वं मङ्गले वक्तव्यम् । तथा सति विघ्नध्वंसवत् तद्द्वारकसमाप्तेरपि मङ्गलफलत्वात् समाप्तिकामस्य मङ्गले प्रवृत्तिः निर्वहति । यथा तृप्तिकामस्य तृप्तिसाधनीभूतोदनसाधने पाके प्रवृत्तिः तद्वत् । विघ्नध्वंसस्य समाप्तिसाधनत्वं तु न संभवति । स्वतःसिद्धविघ्नात्यन्ताभावस्थले विघ्नध्वंसं विनापि समाप्तेः उत्पत्त्या व्यतिरेकव्यभिचारात् इति आशङ्कां निराकरोति इति भावः ।

निरासप्रकारस्तु – समाप्तिं प्रति सर्वत्र विघ्नध्वंसः न कारणम् । उक्तरीत्या व्यतिरेकव्यभिचारात् । किन्तु क्वचित् विघ्नध्वंसः, क्वचिच्च विघ्नात्यन्ताभावः समाप्तिं प्रति कारणम् । स्वतःसिद्धविघ्नविरहस्थले विघ्नात्यन्ताभावः समाप्तिं प्रति साधनम् । अन्यत्र विघ्नध्वंसः कारणम् । एवं सति विघ्नात्यन्ताभावत्वेन विघ्नध्वंसत्वेन च समाप्तिकारणत्वे एकरूपेण कारणत्वं न संभवति । भिन्नरूपेण कारणत्वे च यत्र विघ्नध्वंसात् समाप्तिः तत्र विघ्नात्यन्ताभावस्य व्यतिरेकव्यभिचारः । यत्र विघ्नात्यन्ताभावात् समाप्तिः तत्र विघ्नध्वंसस्य व्यतिरेकव्यभिचारः । एवं च उभयोरपि कारणत्वं न संभवति इति पुनः शङ्कते – **ननु एवम् अननुगम** इति । **अतः** इति । अननुगमवारणाय इत्यर्थः । **संसर्गाभावस्य** इति । विघ्नप्रतियोगिक-

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

संसर्गाभावत्वेन अनुगतरूपेण विघ्नसंसर्गाभावस्य हेतुत्वात् न व्यतिरेक-व्यभिचारः ।

ननु विघ्नसंसर्गाभावत्वेन रूपेण तत्तद्विघ्नाभावानां हेतुत्वे यत्किञ्चिद्विघ्नसत्त्वे विघ्नान्तरप्रतियोगिकसंसर्गाभावस्य सत्त्वेन समाप्त्यापत्तिः । विघ्नत्वावच्छिन्नप्रतियो-गिताकसंसर्गाभावत्वेन हेतुत्वे विघ्नध्वंसविघ्नप्रागभावयोः समाप्तिहेतुत्वं न स्यात् । ध्वंसप्रागभावयोः सामान्यधर्मावच्छिन्नप्रतियोताकत्वानङ्गीकारात् । यदि तु विघ्नप्रतियोगिकसंसर्गाभावसमुदायत्वेन रूपेण हेतुता, तदा विघ्नप्रतियोगिकसं-सर्गाभावानां विघ्नध्वंसविघ्नप्रागभावादीनाम् एककाले एकत्र असत्त्वेन विघ्नसंसर्गाभाव-कूटस्य एकत्र असंभवात् कूटत्वेन रूपेण कारणत्वस्य अयोगात् इति आशङ्कां परिहरति – **अत्र च** इति । तत्तद्विघ्नप्रतियोगिकसंसर्गाभावत्वेन रूपेण हेतुत्वाङ्गीकारात् न कोऽपि दोषः इति भावः ।

यत्र च इति । यत्र मङ्गलं विनापि समाप्तिः, तत्र विघ्ननाशकमङ्गलासत्त्वेन विघ्नस्यैव सत्त्वात् तत्तद्विघ्नप्रतियोगिकस्य कस्यापि संसर्गाभावस्य असत्त्वेन विघ्नसंसर्गाभावं विनैव समाप्तेः उत्पत्त्या व्यतिरेकव्यभिचारः इति आशङ्क्य समाधत्ते – **इत्थं च** इति ग्रन्थेन इति भावः । **विघ्नध्वंसाभाववति** इत्यस्य विघ्नसंसर्गाभावसा-मान्याभाववति इत्यर्थः । यथाश्रुते विघ्नध्वंसाभाववत्यपि विघ्नात्यन्ताभावसंभवेन विघ्नसंसर्गाभावत्वेन हेतुत्वे व्यतिरेकव्यभिचारशङ्कायाः अनुत्थितेः ।

व्यभिचारशङ्कापरिहारः तु – मङ्गलं विना समाप्तिस्थले जन्मान्तरीयमङ्गलजन्यः विघ्नध्वंसरूपः विघ्नसंसर्गाभावः अस्ति । अथ वा स्वतःसिद्धविघ्नात्यन्ताभावरूपः विघ्नसंसर्गाभावः अस्ति । तथा च विघ्नसंसर्गाभावं विना समाप्तेः अनुत्पत्त्या न व्यतिरेकव्यभिचारः इति भावः ।

ननु यत्र सत्यपि मङ्गले समाप्तिः न दृश्यते, तत्र मङ्गलात् विघ्नध्वंस एव न जातः इति अवश्यम् अङ्गीकरणीयम् । अन्यथा तत्तद्विघ्नसंसर्गाभावानां सत्त्वेन

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

समाप्तिविरहस्य उपपादयितुम् अशक्यत्वात् । तथा च मङ्गलसत्त्वेऽपि विघ्नध्वंसस्य अनुत्पत्या अन्वयव्यभिचारेण मङ्गलस्य विघ्नध्वंसकारणत्वं न शक्यते वक्तुम् इत्याशङ्कां निराकरोति – **यत्र च मङ्गले** इति । तथा च यत्र मङ्गले सत्यपि न समाप्तिः, तत्र मङ्गलात् विघ्नध्वंसः भवत्येव । अतः अन्वयव्यभिचाराभावात् मङ्गलस्य विघ्नध्वंसकारणत्वं शक्यते वक्तुम् । विघ्नध्वंसे सत्यपि समाप्त्यभावस्तु विघ्नबाहुल्यात् मङ्गलानन्तरम् उत्पन्नात् विघ्नाद्वा इति न अनुपपत्तिः ।

तन्मङ्गलानन्तरोत्पन्नात् विघ्नात् इति । इदं च नतिनुत्यादिसाधारणं मङ्गलत्वम् अनुगतं कारणतावच्छेदकम् इति अभिप्रेत्य । नतित्वादिना विजातीयविघ्नध्वंसत्वादिना च नानाकार्यकारणभावपक्षे एकमङ्गलसत्त्वेऽपि तदनाश्यस्य एकस्य विघ्नस्य पूर्वं सत्त्वे व्यभिचारवारणात् "अनन्तरोत्पन्न" इति पक्षान्तरानुसरणं व्यर्थमापद्येत इति ध्येयम् । वस्तुतस्तु – अत्रत्य "वा"कारः व्यवस्थितविकल्पबोधकः । नानाविधमङ्गलनाश्यनानाजातीयविघ्नस्थलानुरोधेन विघ्नभूयस्त्वोक्तिः । यत्र सकलविधानि मङ्गलानि कृतानि, समाप्तिश्च न जाता तत्र आह – **मङ्गलानन्तर** इति । स्पष्टश्च इदं **"समाप्त्यभावश्च क्वचित् प्राचीनविघ्नभूयस्त्वात्, क्वचित् मङ्गलानन्तरोत्पन्नविघ्नात्, क्वचित् लोकावगतकारणाभावात्"** इति **मणिपङ्क्तौ** ।

अथ समाप्तिविघ्नध्वंसयोः इति । चरमवर्णध्वंसरूपा समाप्तिः आकाशनिष्ठा । ध्वंसप्रागभावयोः स्वप्रतियोगिसमवायिकारणवृत्तित्वात् । विघ्नध्वंसस्तु आत्मनिष्ठः । दुरितरूपं विघ्नं प्रति आत्मनः समवायिकारणत्वात्, तद्ध्वंसस्य आत्मनिष्ठत्वात् । तथा च समाप्तिविघ्नध्वंसयोः एकाधिकरणवृत्तित्वविरहात् कथं कार्यकारणभावः इति चेत्, उच्यते – स्वप्रतियोगिचरमवर्णानुकूलकृतिमत्त्वसंबन्धेन चरमवर्णध्वंसरूप-समाप्तिं प्रति दैशिकविशेषणतासंबन्धेन विघ्नसंसर्गाभावः कारणम् इति कार्यकारणभावः । स्वं – चरमवर्णध्वंसः । स्वप्रतियोगी-चरमवर्णः । तदनुकूलकृतिमत्त्वम् आत्मनि अस्ति । एवं स्वरूपसंबन्धेन विघ्नसंसर्गाभावः आत्मनि अस्ति इति कार्यकारणयोः आत्मनिष्ठत्वम् इति भावः ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

''**क्वचिच्च विघ्नात्यन्ताभाव एव**'' इत्यादिग्रन्थं प्रकारान्तरेण व्याचष्टे – **वस्तुतस्तु** इत्यादिना । **सूचिताम् अन्यथासिद्धिम्** इति । भोगादिनाश्य-विघ्नध्वंसपूर्वकसमाप्तौ क्लृप्तनियतपूर्ववृत्तिताकेन ध्वंसेनैव मङ्गलस्थलीयसमाप्त्युपपत्तेः मङ्गलस्य अन्यथासिद्धत्वं दुर्वारम् इति पूर्वोक्ताम् अन्यथासिद्धिम् इत्यर्थः ।

''**समाप्तिसाधनम्**'' इत्यस्य ''समाप्तिकारणम्'' इत्यर्थकत्वे ''**क्वचित्**'' इत्यस्य असङ्गतिः । तद्विघ्नसंसर्गाभावत्वेन हेतुतायाः पूर्वं व्यवस्थापिततया सर्वत्रैव अभावत्रयस्यापि कारणत्वात् इत्यतः ''**समाप्तिसाधनम्**'' इति पदं व्याचष्टे – **समाप्त्यव्यवहित** इति । अन्यथासिद्धत्वोपपादकम् इदं पदं इति आशयेन आह– **तथा च** इति ।

ननु मङ्गलजन्यविघ्नध्वंसस्थले कथम् अन्यथासिद्धिः? ध्वंसप्रागभावाधिकरणे अत्यन्ताभावानङ्गीकारात्, मङ्गलजन्यविघ्नध्वंसवति आत्मनि विघ्नात्यन्ताभावस्य असत्त्वात्, समाप्त्यव्यवहितपूर्ववर्तितया निश्चितेन विघ्नात्यन्ताभावेनैव समाप्तिसंभवे विघ्नध्वंसः अन्यथासिद्धः इति वक्तुम् अशक्यत्वात् इति आशङ्क्य ध्वंसप्रागभावयोः अत्यन्ताभावेन सह विरोधे मानाभावात् विघ्नध्वंसाधिकरणेऽपि विघ्नात्यन्ताभावस्य सत्त्वात् तेनैव समाप्तिसंभवे विघ्नध्वंसः अन्यथासिद्धः इति समाधत्ते – **ध्वंसप्राग-भावयोः** इति ।

ननु अन्योन्याभाव इति । ''**विघ्नात्यन्ताभाव एव समाप्तिसाधनम्**'' इति मूलग्रन्थेन समाप्तिं प्रति विघ्नाभावस्य विघ्नात्यन्ताभावत्वेन हेतुत्वम् इति लभ्यते । तत् न युक्तम् । विघ्नात्यन्ताभावत्वस्य विघ्नसंसर्गाभावत्वापेक्षया गुरुत्वात् । विघ्नसंसर्गाभावत्वं हि विघ्नप्रतियोगिकान्योन्याभावभिन्नाभावत्वम् । विघ्नात्यन्ताभावत्वं तु विघ्नप्रतियोगिकनित्यत्वविशिष्टसंसर्गाभावत्वम् । तथा च विघ्नसंसर्गत्वापेक्षया अधिकनित्यत्वघटितं विघ्नात्यन्ताभावत्वं गुरु इति तस्य कारणतावच्छेदकत्वं न संभवति । लघुधर्मस्य कारणतावच्छेदकत्वे संभवति, तत्समनियतस्य गुरुधर्मस्य

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

कारणतावच्छेदकत्वानङ्गीकारात् । तथा च विघ्नसंसर्गाभावत्वेन कारणत्वे सति तस्य अभावत्रयसाधारणतया विघ्नध्वंसस्यापि कारणत्वम् आयातम् इति विघ्नात्यन्ताभाव एव समाप्तिसाधनम् इति न सङ्गच्छते इति आशङ्क्य आह मूले "**प्रतिबन्धकसंसर्गाभावस्यैव इति**" इति भावः ।

मूलस्थस्य प्रतिबन्धकसंसर्गाभावपदस्य "संबन्धविशेषावच्छिन्नप्रतियोगिताकप्रतिबन्धकात्यन्ताभावस्य" इत्यर्थः । आत्मनि समवायसंबन्धेन प्रतिबन्धकसत्त्वेऽपि संयोगादिसंबन्धावच्छिन्नप्रतिबन्धकाभावसत्त्वात् समाप्तिरूपकार्योत्पत्तिवारणाय प्रतिबन्धकतावच्छेदकसंबन्धावच्छिन्नप्रतियोगिताकाभावत्वेनैव कारणत्वं वक्तव्यम् इति ध्वंसस्य संसर्गावच्छिन्नप्रतियोगिताकत्वे मानाभावात् न विघ्नध्वंसस्य समाप्तिहेतुत्वम् इति भावः । एवं च "प्रतिबन्धकसंसर्गाभावस्य" इति पदस्य प्रतिबन्धकस्य संसर्गेण अभावः इति विग्रहः । प्रतिबन्धकतावच्छेदकसंबन्धावच्छिन्नप्रतियोगिताकाभावः इति तदर्थः । स च अर्थात् प्रतिबन्धकात्यन्ताभाव एव इति भावः ।

मानाभावात् इति । समवायेन घटाधिकरणे "संयोगेन घटो नास्ति," संयोगेन घटाधिकरणे "समवायेन घटो नास्ति" इति प्रतीत्या संयोगसमवायसंबन्धावच्छिन्नघटाभावयोः भेदावगमात् तदुपपत्यर्थम् अत्यन्ताभावीयप्रतियोगितायां संबन्धावच्छिन्नत्वम् अङ्गीक्रियते । ध्वंसे च तादृशयुक्तेः अभावेन ध्वंसस्य संसर्गावच्छिन्नप्रतियोगिताकत्वम् अप्रामाणिकम् इति भावः ।

ननु उक्तरीत्या विघ्नध्वंसस्य समाप्तिकारणत्वाभावे "**नास्तिकादीनां ग्रन्थेषु दुरितध्वंसः स्वतःसिद्धविघ्नात्यन्ताभावः वा अस्ति**" इति अग्रिमग्रन्थासङ्गतिः इत्यतः दुरितध्वंसपदं व्याचष्टे – **दुरितध्वंससामग्रीप्रयुक्त** इति । एवं च नास्तिकादीनां ग्रन्थे विघ्नात्यन्ताभाव एव समाप्तिं प्रति कारणम् । स च विघ्नात्यन्ताभावः दुरितध्वंससामग्रीप्रयुक्तः, अथ वा स्वतःसिद्धः इति मूलार्थः इति भावः ।

"**स्वतःसिद्धः**" इत्यस्य दुरितकारणाभावप्रयुक्तः इत्यर्थः । प्रथमं व्याख्यानं

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

परित्यज्य द्वितीयव्याख्यानुसरणे स्वयमेव बीजं प्रकटयति – **एतेन** इत्यादिना । प्रथमव्याख्याने विघ्नसंसर्गाभावत्वेन अभावत्रयसाधारणरूपेण समाप्तिकारणत्वम्, तच्च रूपम् अन्योन्याभावभिन्नाभावत्वम् । द्वितीयव्याख्याने विघ्नात्यन्ताभावत्वेन कारणत्वम् इति भेदः । तत्र नित्यत्वं न घटकम् । संसर्गावच्छिन्नप्रतियोगिताकत्वनिवेशेनैव ध्वंसप्रागभावयोः व्यावृत्तेः इति अवधेयम् ।

अप्रकृततया इति । मङ्गलस्य विघ्नध्वंस एव फलम्, न तु समाप्तिः इत्येवं मङ्गलस्य विघ्नध्वंसफलकत्वस्यैव प्रकृतत्वात् इति भावः ।

ननु मङ्गलस्य विघ्नध्वंसफलकत्वे समाप्तिकामनया तत्र प्रवृत्तिः समाप्तिजनकविघ्नध्वंसजनकत्वेनैव उपपादनीया । विघ्नध्वंसस्य समाप्तिजनकत्वं च व्यभिचारेण असंभवदुक्तिकम् इति आशङ्कायां "**क्वचिच्च**" इत्यादिग्रन्थस्य अवतारितत्वेन न प्रकृतानुपयोगः इत्यतः दूषणान्तरम् आह – **एवं प्रतिबन्धकाभावकूटस्य** इति । प्रतिबन्धकसंसर्गाभावकूटत्वेन हेतुत्वे अतीतानाम् अनागतानां च प्रतिबन्धकानां ये प्रागभावाः ध्वंसाश्च तेषाम् एकदा सत्त्वासंभवात् । अतीतप्रतिबन्धकप्रागभावसत्त्वे अतीतप्रतिबन्धकध्वंसस्य असंभवात् । तत्सत्त्वे तत्प्रागभावस्य असंभवात् । तथा च एककाले प्रतिबन्धकसंसर्गाभावकूटस्य अप्रसिद्धिः इति भावः ।

ननु प्रतिबन्धकसंसर्गाभावकूटत्वेन न हेतुतां स्वीकुर्मः, येन अप्रसिद्धिः स्यात् । अपि तु तत्तद्विघ्नसंसर्गाभावत्वेन हेतुत्वं स्वीकुर्मः । अतः न अप्रसिद्धिः इति आशङ्क्य दूषणान्तरम् आह – **पूर्वोक्तरीत्या** इति । प्रतिबन्धकसत्त्वेऽपि संबन्धान्तरावच्छिन्नाभावस्य सत्त्वात् इत्यादिना पूर्वोक्तरीत्या इत्यर्थः । **असङ्ग्रहश्च** इति। तयोः संबन्धावच्छिन्नप्रतियोगिताकत्वे मानाभावात् इत्यर्थः । द्वितीयव्याख्याने उक्तदूषणानां निरस्तत्वे हेतुम् आह – **उक्तरीत्या** इति ।।

इति मङ्गलवादः ।।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

।। ईश्वरवादः ।।

मुक्तावली

संसारमहीरुहस्य बीजाय इति । **संसार एव** महीरुहः – वृक्षः, तस्य बीजाय– **निमित्तकारणाय** इत्यर्थः । एतेन ईश्वरे **प्रमाणं** दर्शितं भवति ।।

दिनकरी

नमस्कार्यस्य भगवतः **सन्तुष्टतां सूचयितुम्** आह – **मूले गोप** इति । **तस्मै** इति । **तच्छब्दः** [1]सामान्यतः सकलजनप्रसिद्धत्वसूचनाय । "**कृष्णाय नमः**" इत्यनेन भगवति **नमस्कारप्रकारीभूतापकर्षावधित्वम्** उक्तम्, तत् अयुक्तम्; भगवति मानाभावात् इति आशङ्क्य नैयायिकमतेन ईश्वरसाधकानुमानसूचनाय आह– **संसार** इति ।

संसारस्य महीरुह इति **षष्ठीतत्पुरुषभ्रमं** व्यावर्तयितुं कर्मधारयम् आह **मुक्तावल्याम् संसार एव** इति । बीजत्वं समवायिकारणत्वम्, **तच्च ईश्वरे बाधितम्**, अत आह – **निमित्त** इति ।

ननु ईश्वरे नमस्काररूपं मङ्गलाचरणम् अयुक्तम्, ईश्वरे मानाभावात् । न हि तत्र प्रत्यक्षं प्रमाणम्, अरूपिद्रव्यत्वेन बाह्यप्रत्यक्षाविषयत्वात् । नापि मानसम्, परात्मनः परेण मनसा प्रत्यक्षवारणाय आत्मप्रत्यक्षं प्रति परात्मव्यावृत्तविजातीया-त्ममनःसंयोगत्वेन हेतुत्वस्य आवश्यकतया ईश्वरे तस्य अभावात् । नापि अनुमानम्, लिङ्गाभावात् । न च "द्यावाभूमी जनयन्" इत्यादि श्रुतिः एव प्रमाणम्, श्रुतीनाम् ईश्वरोच्चरितत्वेन प्रामाण्यात् ईश्ववरसन्देहे श्रुतिप्रामाण्यस्यापि सन्दिग्धत्वात्, अत आह– **एतेन** इति । **प्रमाणम्**-अनुमानरूपं प्रमाणम् ।।

1. सामान्यत इति । प्रायशः इत्यर्थः (सु).

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

राजीवोल्लासः

सन्तुष्टतां सूचयितुम् इति । ''सन्तुष्टं प्रभुम् आश्रयेत्'' इति न्यायात् इत्यर्थः । यत्तदोः नित्यसंबन्धात् ''नूतन'' इति श्लोके ''यत्''पदाभावात् कथं 'तत्' पदसङ्गतिः इति आशङ्क्य प्रकृते तच्छब्दस्य प्रसिद्धपरतया न 'यत्'पदापेक्षा इति समाधत्ते – **तच्छब्द** इति । **नमस्कारप्रकारीभूत** इति । नमस्कारे प्रकारः यः अपकर्षः तन्निरूपितावधित्वम् इत्यर्थः । स्वापकर्षप्रकारकबोधानुकूलः व्यापारः नमस्कारः । **षष्ठीतत्पुरुषभ्रमम्** इति । संसारस्य महीरुहः इति षष्ठीतत्पुरुषे संसारसंबन्धी प्रपञ्चवृत्तिः यः वृक्षः तस्य कारणाय इत्यर्थः स्यात् । तथा सति सकलप्रपञ्चहेतोः ईश्वरस्य महीरुहमात्रकारणत्वकथनम् अनुचितम् । अतः अत्र ''संसारश्च असौ महीरुहश्च'' इति कर्मधारयः इति **मुक्तावलीकारस्य** हृदयम् । **तच्च ईश्वरे बाधितम्** इति । ईश्वरस्य प्रपञ्चं प्रति निमित्तकारणत्वमेव, न तु समवायिकारणत्वम् इति सिद्धान्तात् इति भावः ।

''**एतेन**'' इति ग्रन्थम् अवतारयति – **ननु ईश्वरे** इत्यादिना । ईश्वरनमस्कार-रूपमङ्गलाचरणम् अयुक्तम्, ईश्वरे प्रमाणाभावात् । न हि ईश्वरे प्रत्यक्षं प्रमाणम् । प्रत्यक्षं हि द्विविधम्-बहिरिन्द्रियजन्यप्रत्यक्षं मनोजन्यप्रत्यक्षं च इति । तत्र बहिरिन्द्रियप्रत्यक्षम् ईश्वरे न प्रमाणम् । रूपवतः द्रव्यस्यैव बहिरिन्द्रियजन्यप्रत्यक्षविषयतया रूपशून्यस्य ईश्वरस्य बहिरिन्द्रियजन्यप्रत्यक्षविषयत्वाभावात् । नापि मानसं प्रत्यक्षम् ईश्वरे प्रमाणम् । स्वात्मनः स्वसमवेतज्ञानादिगुणानां च स्वकीयमनोजन्य-प्रत्यक्षविषयत्वेऽपि स्वात्मभिन्नस्य स्वात्मसमवेतगुणभिन्नस्य च ईश्वरस्य स्वकीयमनोजन्यप्रत्यक्षविषयत्वासंभवात् । अन्यदीयेन मनसा अन्यस्य आत्मनः प्रत्यक्षे सति परात्मनः परकीयमनसा प्रत्यक्षं स्यात् इति तद्वारणाय आत्मप्रत्यक्षं प्रति परात्मव्यावृत्तस्य विजातीयात्ममनःसंयोगस्यैव कारणत्वेन तादृशस्य मनःसंयोगस्य ईश्वरे अभावात् । तथा च ईश्वरः न बाह्यप्रत्यक्षविषयः, अरूपिद्रव्यत्वात्; न मानसप्रत्यक्षविषयः,

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

स्वात्मभिन्नद्रव्यत्वात् स्वात्मसमवेतज्ञानादिभिन्नत्वाच्च । नापि अनुमानम् ईश्वरे प्रमाणम् । ईश्वरसाधकस्य लिङ्गस्य अभावात् । नापि उपमानं प्रमाणम् । ईश्वरतुल्यस्य कस्यचित् अभावेन सादृश्यज्ञानाभावात् । उपमानस्य शक्तिमात्रसाधकत्वेन ईश्वरासाधकत्वाच्च । नापि "द्यावाभूमी जनयन् देव एकः" इत्यादिश्रुतिरूपः शब्दः ईश्वरे प्रमाणम् । श्रुतीनाम् ईश्वरोच्चरितत्वेन प्रामाण्यात् ईश्वरः अस्ति वा नास्ति वा इति सन्देहे तदुक्ततया श्रुतीनां प्रामाण्येऽपि सन्देहात् इति आशङ्क्य "एतेन" इत्यादिना अनुमानरूपं प्रमाणं दर्शयति मुक्तावल्याम् इति भावः ॥

मुक्तावली

तथाहि – यथा घटादि कार्यं **कर्तृजन्यम्**, तथा **क्षित्यङ्कुरादिकमपि** । न च तत्कर्तृत्वम् अस्मदादीनां संभवति इति अतः तत्कर्तृत्वेन ईश्वरसिद्धिः ॥

दिनकरी

तथा क्षित्यङ्कुरादिकमपि इति । **ननु – अत्र किं पक्षतावच्छेदकम्? न तावत् क्षितित्वम्,** अङ्कुरादेरपि क्षितित्वेन पृथक् तदुपादानवैयर्थ्यात् । **किञ्च,** क्षितित्वसामानाधिकरण्येन साध्यसिद्धेः उद्देश्यत्वे दृष्टान्ते घटादौ [1]अंशतः सिद्धसाधनम् । **अवच्छेदकावच्छेदेन तथात्वे परमाणौ बाधः** । जन्यक्षितित्वस्य पक्षतावच्छेदकत्वे परमते जन्यपदव्यावृत्त्यसिद्धिः, तन्मते अजन्यक्षितेः अभावात् । जन्यत्वस्यैव तथात्वसंभवेन पक्षतावच्छेदककोटौ क्षितित्वस्य व्यर्थत्वाच्च । **न च तदपि संभवति,** पक्षतावच्छेदकहेत्वोः ऐक्यप्रसङ्गात् इति चेत्, न; **स्वरूपसंबन्धविशेषरूप-** कार्यत्वस्यैव पक्षतावच्छेदकत्वात् । प्रागभावप्रतियोगित्वरूप-कार्यत्वस्यैव हेतुत्वेन तयोः ऐक्याभावात् ॥

राजीवोल्लासः

ननु अत्र किं पक्षतावच्छेदकम् इति । **"यथा घटादि कार्यं कर्तृजन्यम्,**

1. अंशे – पक्षतावच्छेदकविशिष्टे कस्मिंश्चित् । घटादौ सिद्धत्वोपपादकं दृष्टान्त इति विशेषणम्-सु.

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

तथा क्षित्यङ्कुरादिकमपि'' इति मूलात् क्षित्यङ्कुरादिकं पक्षः, कर्तृजन्यत्वं साध्यम्, कार्यत्वं हेतुः इति सूचितम् । तत्र क्षित्यङ्कुरादौ अनुगतं पक्षतावच्छेदकं किम् इति प्रश्नः । **न तावत् क्षितित्वम्** इति । क्षितित्वं पक्षतावच्छेदकं न भवति, अङ्कुरादीनामपि क्षितित्वेन क्षितिपदेनैव अङ्कुरादेरपि ग्रहणसंभवात् पृथक् अङ्कुराद्युपादानस्य व्यर्थत्वात् ।

ननु अत्र क्षितिपदं न पृथिवीत्वजात्यवच्छिन्नपरम्, येन अङ्कुरादेः उपादानं व्यर्थं स्यात् । अपि तु भूमण्डलपरम् । तथा च भूमण्डलाङ्कुरादीनां सर्वेषां पक्षत्वलाभे सर्वानुगतं पक्षतावच्छेदकं किम् इति आशङ्कायां क्षितित्वमेव पक्षतावच्छेदकम् इत्युक्तौ न अङ्कुरादेः पृथक् उपादानवैयर्थ्यम् इति, अत आह – **किं च** इति । क्षितित्वस्य पक्षतावच्छेदकत्वे ''क्षितिः कर्तृजन्या, कार्यत्वात्, घटवत्'' इति अनुमानप्रयोगः फलितः । तत्र क्षितित्वरूपपक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धेः उद्देश्यत्वे क्षितित्वाधिकरणे घटादौ कुलालादिकर्तृजन्यत्वस्य अनुमानात् प्रागपि सिद्धतया अंशतः सिद्धसाधनं दोषः । पक्षतावच्छेदकसामानाधिकरण्येन अनुमानात् पूर्वं साध्यनिश्चयः अंशतः सिद्धसाधनम् इति उच्यते । पक्षतावच्छेदकाधिकरणे कुत्रचित् साध्यसिद्धिः पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धिः इति उच्यते । **अवच्छेदकावच्छेदेन तथात्वे** इति । क्षितित्वरूपपक्षतावच्छेदकावच्छेदेन साध्यसिद्धेः उद्देश्यत्वे क्षितित्वाश्रयेषु सर्वेषु कर्तृजन्यत्वरूपसाध्यानुमितेः उद्देश्यत्वे इति यावत् । तथा च अवच्छेदकावच्छेदेन अनुमितौ सामानाधिकरण्येन साध्यसिद्धेः अप्रतिबन्धकतया अंशतः सिद्धसाधनं न दोषः इति भावः । **परमाणौ बाध** इति । पृथिवीपरमाणोरपि पृथिवीत्वाश्रययावदन्तर्गततया तत्र कर्तृजन्यत्वरूपसाध्याभावात् बाधः इत्यर्थः ।

ननु जन्यपृथिवीत्वं पक्षतावच्छेदकम् । जन्यत्वविशिष्टं पृथिवीत्वं पक्षतावच्छेदकम् इति यावत् । वैशिष्ट्यं च सामानाधिकरण्यसंबन्धेन । पृथिवीपरमाणौ पृथिवीत्वसत्त्वेऽपि जन्यत्वविरहात् जन्यत्वविशिष्टं पृथिवीत्वं नास्तीति परमाणोः पक्षतावच्छेदकानाक्रान्ततया तत्र साध्याभावेऽपि न बाधः । पक्षतावच्छेदकाश्रये

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

साध्याभावस्यैव बाधत्वात् इत्याशङ्क्य जन्यपृथिवीत्वस्य पक्षतावच्छेदकत्वे दोषद्वयम् आह – ईश्वरानङ्गीकर्तृचार्वाकमते अप्रत्यक्षनित्यपृथिव्यनङ्गीकारात् तद्व्यावर्तकं जन्यपदं व्यर्थम् इति एकं दूषणम् । जन्यत्वस्यैव पक्षतावच्छेदकत्वसंभवेन पक्षतावच्छेदककोटौ क्षितित्वं व्यर्थम् इति द्वितीयं दूषणम् । पक्षतावच्छेदककोटिप्रविष्ट-विशेषणानां सर्वमते प्रयोजनम् अपेक्षितम् इति नियमाभावात् नित्यपृथिव्यङ्गीकर्तृमते बाधवारकतया जन्यपदं सार्थकम् इचि आलोच्य प्रथमदूषणं परित्यज्य द्वितीयदूषणानुधावनम् ।

ननु जन्यत्वमेव पक्षतावच्छेदकम् अस्तु, को दोषः? इति आशङ्क्य आह – **न च तदपि संभवति** इति । जन्यत्वं यदि पक्षतावच्छेदकं स्यात्, तदा ''जन्यं कर्तृजन्यं, कार्यत्वात्'' इति अनुमानप्रयोगः पर्यवसितः । तत्र जन्यत्वमेव पक्षतावच्छेदकं हेतुश्च इति पक्षतावच्छेदकहेत्वोः ऐक्यप्रसङ्गः इति भावः ।

ननु पक्षतावच्छेदकहेत्वोः ऐक्ये को दोषः । न च – व्याप्तिग्रहदशायामेव पक्षतावच्छेदकीभूतहेतौ साध्यसामानाधिकरण्यस्य सिद्धत्वेन सिद्धसाधनमेव दोषः इति – वाच्यम् । ''हेतुः साध्यसमानाधिकरणः'' इति व्याप्तिग्रहस्य ''हेतुमान् साध्यवान्'' इति अनुमितितः भिन्नाकारत्वात्; समानाकारकसिद्धेरेव अनुमिति-प्रतिबन्धकत्वात्, अवच्छेदकावच्छेदेन साध्यसिद्धेः उद्देश्यत्वे सामानाधिकरण्य-मात्रावगाहिसिद्धेः अप्रतिबन्धकत्वाच्च ।

यद्यपि अवच्छेदकावच्छेदेन अनुमितौ सामानाधिकरण्यात् अधिकं पक्षतावच्छेदकव्यापकत्वमेव साध्ये भासते, व्याप्तिज्ञानेऽपि साध्ये हेतुव्यापकत्वं भासते एव इति तुल्यम्, तथापि व्याप्तिग्रहे व्यापकत्वं प्रकारतयैव, अनुमितौ तु साध्यीयसंसर्गघटकतया भासते इति भेदाच्च इति चेत्, न – उद्देश्यतावच्छेदकविधेययोः ऐक्येन उपनयवाक्यात् शाब्दबोधानुपपत्तेः एव दोषत्वात् ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

न च – नवीनमते विधेयांशे अधिकावगाहिनः शाब्दबोधस्य उपगमेन पक्षतावच्छेदकहेत्वोः ऐक्येऽपि ''साध्यव्याप्यहेतुमान् पक्षः'' इत्याकारकस्य उपनयवाक्यजन्यशाब्दबोधस्य न अनुपपत्तिः इति – वाच्यम् । प्राचीनैः उदाहरणवाक्यादेव व्याप्तिलाभात् उपनयेनापि तत्प्रतिपादने पौनरुक्त्यम् इति पक्षे हेतुमत्तामात्रमेव उपनयेन बोधनीम् । ''तथा च अयम्'' इति उपनयवाक्यस्य ''हेतुमान् पक्षः'' इत्येव बोधस्य अङ्गीकारात् तन्मतानुसारेणैव ''पक्षतावच्छेदकहेत्वोः ऐक्यात्'' इति दूषणाभिधानात् इति ध्येयम् ।

स्वरूपसंबन्धविशेष इति । तथा च ''कार्यं कर्तृजन्यम्, कार्यत्वात्, घटवत्'' इति अनुमानप्रयोगः । तत्र च स्वरूपसंबन्धरूपं कार्यत्वं पक्षतावच्छेदकम् । प्रागभाव-प्रतियोगित्वरूपं कार्यत्वं हेतुः । अतः पक्षतावच्छेदकहेत्वोः ऐक्याभावात् न सिद्धसाधनादिः दोषः इति भावः ।

न च – स्वरूपसंबन्धरूपकार्यताव्यक्तीनां कार्यस्वरूपभेदेन भिन्नानां तत्तद्व्यक्तिमात्रपर्यवसन्नतया न अनुगतपक्षतावच्छेदकलाभः इति – वाच्यम् । अन्यतमत्वेन रूपेण अनुगतीकृतानां कार्यव्यक्तीनां पक्षतावच्छेदकत्वात् ।

वस्तुतस्तु – निखिलकार्यव्यक्त्यन्यतमत्वं पक्षतावच्छेदकम् । एतत्स्फोरणायैव मूले ''निखिलजन्यम्'' इति अनुक्त्वा ''क्षित्यङ्कुरादिकम्'' इत्युक्तम् ।

न च – प्रागभावप्रतियोगित्वरूपकार्यत्वस्य हेतुत्वेऽपि प्रतियो-गित्वस्य स्वरूपसंबन्धरूपतया पक्षतावच्छेदकाश्रयव्यक्तीनां प्रतियोगित्वा-श्रयव्यक्तीनां च अभिन्नतया पक्षतावच्छेदकहेत्वोः ऐक्यशङ्कायाः न परिहारः इति – वाच्यम् ।

प्रतियोगितायाः अतिरिक्तपदार्थत्वेन अदोषात् । यद्वा, प्रागभाव-प्रतियोगित्वस्थाने प्रतियोगितासंबन्धेन प्रागभावस्य हेतुत्वाङ्गीकारे न दोषः इति ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

दिनकरी

साध्यं चं न स्वोपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिजन्यत्वम्, कार्यमात्रं प्रति कृतेरेव अन्वयव्यतिरेकाभ्यां हेतुत्वेन तज्जनकज्ञानचिकीर्षयोः तत्र अन्यथा-सिद्धत्वेन तत्त्रितयजन्यत्वरूपसाध्यस्य तत्र बाधात्, दृष्टान्तपक्षसाधारणस्य स्वत्वस्य एकस्य अभावेन तद्घटित ''स्वोपादानगोचर'' इत्यादिसाध्यस्य असंभवात्, कृतित्वापेक्षया उपादानगोचरकृतित्वस्य गौरवेण जनकतानवच्छेदकत्वात् च । **किन्तु विशेष्यतासंबन्धावच्छिन्नकृतित्वावच्छिन्नकारणतानिरूपित-समवायसंबन्धावच्छिन्नकार्यत्वम्, तेन अदृष्टद्वारा** अस्मदीयकृतिजन्यत्वस्य पक्षे सत्त्वेऽपि न सिद्धसाधनम् । **यदि च** कार्यमात्रे कृतित्वेन इव अन्वयव्यतिरेकाभ्यां ज्ञानत्वेन इच्छात्वेन च हेतुत्वं स्वीक्रियते, तदा तादृशज्ञानजन्यत्वम्, इच्छाजन्यत्वम्, कृतिजन्यत्वं वा साध्यम् अस्तु ॥

राजीवोल्लासः

साध्यं च इति । स्वोपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिजन्यत्वं साध्यम् । स्वं-कार्यम् । स्वस्य-कार्यस्य यत् उपादानं समवायिकारणम्, तद्विषयकं यत् अपरोक्षज्ञानम् । एवं स्वोपादानविषयिणी या चिकीर्षा ''कपालेन घटं कुर्याम्'' इत्याकारिका कृतिविषयेच्छा । एवम् उपादानगोचरा कृतिः – प्रयत्नः । एतत्त्रितय-जन्यत्वं साध्यम् । इदं च साध्यं दृष्टान्ते घटादौ वर्तते । कुलालः आदौ घटस्य उपादानकारणं कपालं पश्यति । अनन्तरम् ''अनेन घटं कुर्याम्'' इति इच्छति । अनन्तरं प्रयतते । ततः घटः जायते । तथा च यथा घटादौ कुलालनिष्ठं यत् समवायिकारणकपालादिविषयकम् अपरोक्षज्ञानं, चिकीर्षा, कृतिश्च एतत्त्रितयजन्यत्वं वर्तते, तथा पक्षे क्षित्यङ्कुरादावपि तदुपादानविषयकापरोक्षज्ञानचिकीर्षाकृतिजन्यत्वं सिद्ध्यति । तादृशापरोक्षज्ञानादिकं जीवे असंभावितम् इति तदाश्रयतया जीवातिरिक्तः ईश्वरः सिद्ध्यति इति न वक्तुं शक्यते । ''कृतिसत्त्वे घटादिरूपं कार्यं, तदभावे तदभावः'' इति अन्वयव्यतिरेकाभ्यां कार्यसामान्यं प्रति कृतेः एव हेतुत्वम् । कृतिं

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्रति चिकीर्षा, चिकीर्षां प्रति ज्ञानं कारणम् । तथा च अवश्यक्लृप्तनियतपूर्ववृत्तिकृत्यैव घटादिरूपकार्यसंभवे तद्भिन्नयोः अपरोक्षज्ञानचिकीर्षयोः अन्यथासिद्धत्वेन कार्यसामान्यं प्रति अहेतुत्वात् तत्त्रितयजन्यत्वरूपसाध्यस्य पक्षे बाधात् ।

किञ्च, स्वत्वस्य बुद्धिस्थव्यक्तिमात्रवृत्तित्वेन अनेकवृत्तित्वाभावात् पक्षदृष्टान्तसाधारणस्य स्वत्वस्य अभावात् स्वत्वघटितसाध्यस्य असंभवः ।

न च – तर्हि ''स्व'' इति पदं परित्यज्य अन्यथासिद्धत्वात् ज्ञानचिकीर्षे अपि परित्यज्य उपादानविषयककृतिजन्यत्वमेव साध्यम् अस्तु इति – वाच्यम् । तथापि कार्यत्वावच्छिन्नं प्रति लघुभूतेन कृतित्वेनैव कृतेः जनकतया कृतित्वमेव जनकतावच्छेदकम् इति कृतित्वावच्छिन्नजनकतानिरूपितजन्यत्वस्य पक्षे सत्त्वेऽपि उपादानविषयककृतित्वावच्छिन्नजनकतानिरूपितजन्यत्वस्य पक्षे असत्त्वात् बाधप्रसङ्गः इति भावः । अतः स्वमतेन साध्यं निर्वक्ति – **किन्तु विशेष्यतासंबन्धावच्छिन्न** इत्यादिना । विशेष्यतासंबन्धावच्छिन्न- कृतित्वावच्छिन्न-कारणतानिरूपित-समवायसंबन्धावच्छिन्नकार्यत्वं साध्यम् । विशेष्यतासंबन्धः अत्र उपादानताख्य-विषयता । कृतेः उपादानम् उद्देश्यं विधेयम् इति विषयत्रयम् । घटनिर्माणानुकूला या कुलालनिष्ठा कृतिः तस्यां कपालं घटः जलाहरणं च विषयः । तत्र जलाहरणम् उद्देश्यम् । घटः विधेयः । कपालम् उपादानम् इत्युच्यते । तथा च कृतिनिरूपितो-पादानताख्यविषयता कपालनिष्ठा । कृतिनिरूपितविधेयताख्यविषयता घटनिष्ठा । कृतिनिरूपितोद्देश्यताख्यविषयता जलाहरणनिष्ठा इति विवेकः ।

समवायसंबन्धेन घटरूपं कार्यं कपाले जायते । तत्र उपादानतासंबन्धेन कुलालस्य कृतिः वर्तते । अतः घटनिष्ठा कार्यता समवायसंबन्धावच्छिन्ना, कृतिनिष्ठा कारणता उपादानतासंबन्धावच्छिन्ना इति उपादानतासंबन्धावच्छिन्नकृतित्वा-वच्छिन्नकारणतानिरूपितकार्यत्वं घटे अस्ति इति दृष्टान्ते साध्यसत्त्वम् । समवायसंबन्धेन क्षित्यादिरूपं कार्यं तत्समवायिकारणेषु अवयवेषु वर्तते । तत्र

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

ईश्वरस्य कृतिः उपादानतासंबन्धेन वर्तते । तथा च उपादानतासंबन्धावच्छिन्न-ईश्वरकृतिनिष्ठकृतित्वावच्छिन्न-कारणतानिरूपित-समवायसंबन्धावच्छिन्न-कार्यत्वं पक्षे क्षित्यादौ अस्ति ।

कारणतायां उपादानतासंबन्धावच्छिन्नत्वानिवेशे क्षित्यङ्कुरादिकं प्रति अस्मदादिजीवसमवेतकृतेः स्वजन्यादृष्टवदात्मसंयोगसंबन्धेन कारणत्वात् अस्मदादि-कृतिनिष्ठस्वजन्यादृष्टवदात्मसंयोगसंबन्धावच्छिन्नकारणतानिरूपितकार्यत्वस्य क्षित्यादौ अनुमितेः प्रागेव सिद्धत्वात् सिद्धसाधनं दोषः । उपादानतासंबन्धावच्छिन्नत्वनिवेशे तु अस्मदादिकृतेः उपदानतासंबन्धेन क्षित्यङ्कुरादिकं प्रति अकारणत्वात् न दोषः । एवं कारणतायां कृतित्वावच्छिन्नत्वस्य अनिवेशे कृतेः सविषयकत्वेन कारणत्वं वाच्यम् । तथा सति ज्ञानेच्छयोः अन्यथासिद्धिः न संभवति । तयोरपि सविषयकत्वेन कारणत्वात् । अतः कृतित्वावच्छिन्नत्वोपादानम् । कार्यतायां समवाय-संबन्धावच्छिन्नत्वनिवेशस्तु "उपादानतासंबन्धेन यत्र कृतिः तत्रैव समवायसंबन्धेन कार्यम्" इति नियमस्य तन्त्वादौ घटोत्पत्तिवारकस्य निर्वाहाय । विशेष्यता-संबन्धावच्छिन्नत्वनिवेशस्य स्वयं प्रयोजनम् आह – **तेन अदृष्टद्वारा** इति ।

ननु कृतिजन्यत्वमात्रस्य साध्यत्वे उक्तानुमानेन ईश्वरनिष्ठायाः नित्यकृतेः सिद्धावपि नित्यज्ञाननित्येच्छयोः न सिद्धिः इत्याशयेन ज्ञानेच्छयोः अपि सिद्ध्यर्थं प्रकारान्तरम् अनुसरति – **यदि च** इत्यादिना । यथा वा कृतिसत्त्वे कार्यम्, तदभावे तदभावः इति अन्वयव्यतिरेकाभ्यां कार्यसामान्ये कृतित्वेन कृतेः हेतुत्वं स्वीक्रियते, तथा ज्ञानस्य इच्छायाश्च सत्त्वे कार्योत्पत्तिः, तदभावे तदभावः इति अन्वयव्यतिरेकाभ्यां कार्यसामान्यं प्रति कारणत्वं स्वीकरणीयम् । तथा च स्वोपादानगोचरापरोक्षज्ञानजन्यत्वं तादृशेच्छाजन्यत्वं तादृशकृतिजन्यत्वं च विनिगमनाविरहात् साध्यम् । तथा च क्षित्यादिजनकतया सिद्धानां ज्ञानेच्छाकृतीनां जीवे असंभवात् तदाश्रयतया जीवातिरिक्तः ईश्वरः सिद्ध्यति इति भावः ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

दिनकरी

यत्तु कर्तृजन्यत्वमेव साध्यम् इति, तत् न। कार्यमात्रे कर्तृत्वेन जनकत्वे मानाभावात्, लाघवात् कृतित्वेनैव तत्र हेतुत्वात् ॥

राजीवोल्लासः

मूले "कर्तृजन्यम्" इति पददर्शनात् कर्तृजन्यत्वमेव साध्यम् इति लभ्यते। अतः कृतिजन्यत्वं कथं साध्यम् इति केचित् आहुः। तन्मतं दूषयति – यत्तु इति। कार्यसामान्यं प्रति कर्ता कारणम् इति कार्यकारणभावः वक्तुं न शक्यते। तत्र प्रमाणाभावात्। न च – "स्वनिष्ठकृतिनिरूपितविशेष्यतासंबन्धेन यत्र कर्ता, तत्र समवायसंबन्धेन कार्यम्" इति अन्वयव्यतिरेकौ एव तादृशकार्यकारण-भावे प्रमाणम् इति – वाच्यम्। कर्तुः कारणत्वस्वीकारे कर्तृत्वं कारणतावच्छेदकं स्यात्। कर्तृत्वं च कृतिमत्त्वम्। कृतीनां च अनेकत्वात् कारणतावच्छेदकगौरवम्। कृतेः कार्यसामान्यं प्रति हेतुत्वे तु कृतित्वरूपा जातिः कारणतावच्छेदिका इति लाघवम्। अतः कार्यमात्रे कृतित्वेनैव हेतुत्वम्, न तु कर्तृत्वेन। "कर्तृजन्यम्" इति मूलस्यापि कृतिजन्यत्वे एव तात्पर्यम् इति भावः ॥

दिनकरी

ननु "कार्यं विशेष्यतासंबन्धावच्छिन्न-कृतिनिष्ठजनकतानिरूपित-समवायसंबन्धावच्छिन्नजन्यताशालि, प्रागभावप्रतियोगित्वात्" इति अनुमानं फलितम्। तत्र च ध्वंसे पक्षतावच्छेदकजन्यत्वाक्रान्ते विशेष्यतासंबन्धावच्छिन्नकृति-निष्ठजनकतानिरूपित–समवायसंबन्धावच्छिन्नजन्यत्वरूपसाध्यस्य अभावात् बाध इति चेत्, न – सत्त्वविशिष्टजन्यत्वस्यैव ध्वंसव्यावृत्तस्य पक्षतावच्छेद-कत्वोपगमात्।

न च – हेत्वधिकरणे ध्वंसे उक्तसाध्याभावेन व्यभिचारः इति – वाच्यम्। सत्त्ववैशिष्ट्यस्य हेतौ विशेषणात् ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

राजीवोल्लासः

ननु ''कार्यम् उपादानतासंबन्धावच्छिन्न–कृतित्वावच्छिन्न-कृतिनिष्ठ-कारणतानिरूपित-समवायसंबन्धावच्छिन्नकार्यतावत्, प्रागभावप्रतियोगित्वात्'' इति अनुमानं पर्यवसितम् । तत्र कार्यत्वावच्छेदेन साध्यानुमितिः उद्देश्या । कार्यत्व-सामानाधिकरण्येन साध्यसिद्धेः उद्देश्यत्वे घटादौ अंशतः सिद्धसाधनम् इति पूर्वम् उक्तत्वात् । एवं सति कार्यत्वाक्रान्ते ध्वंसे समवायसंबन्धावच्छिन्नकृतिजन्यत्वविरहेण बाधः । तादृशसाध्याभाववति ध्वंसे कार्यत्वसत्त्वेन व्यभिचारश्च दुर्वारः इति आशयेन शङ्कते – **ननु कार्यम्** इत्यादिना।

समाधत्ते – **सत्त्वविशिष्टजन्यत्वस्यैव** इति । ध्वंसे जन्यत्वसत्त्वेऽपि भावत्त्वरूपसत्त्वविरहात् सत्त्वविशिष्टजन्यत्वरूपपक्षतावच्छेदकाभावात् तत्र साध्यासत्त्वेऽपि न बाधः इति भावः ।

ननु बाधस्य वारणेऽपि उक्तसाध्याभाववति ध्वंसे प्रागभावप्रतियोगि-त्वरूपहेतुसत्त्वात् व्यभिचारः इति आशङ्क्य हेतावपि सत्त्ववैशिष्ट्यं विशेषणं देयम् । ध्वंसे सत्त्वविरहात् तद्विशिष्टहेतुरपि नास्ति इति न व्यभिचारः इति समाधत्ते – **न च हेत्वधिकरणे** इत्यादिना । तथा च ''भावत्वविशिष्टं कार्यम् उपादानतासंबन्धावच्छिन्नकृतित्वावच्छिन्नकृतिनिष्ठजनकतानिरूपित-समवायसंबन्धावच्छिन्नजन्यताशालि, भावत्वे सति प्रागभावप्रतियोगित्वात्, घटादिवत्'' इति अनुमानं फलितम् ।।

दिनकरी

अथ एवंरीत्या व्यभिचारवारणेऽपि ध्वंसस्य कृतिजन्यत्वे मानाभावेन कार्यमात्रस्य कृतिजन्यत्वप्रवादः व्याहन्येत इति चेत्, न । तादृशप्रवादस्य निर्युक्तिकत्वेन अश्रद्धेयत्वात् ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

यद्वा जन्यत्वमात्रं ध्वंससाधारणमेव पक्षतावच्छेदकम्, **कृतिजन्यत्वमात्रं** साध्यम्; **एवं च** हेतावपि सत्त्ववैशिष्ट्यं नोपादेयम्, प्रयोजनाभावात् । **एवं च** ध्वंसेऽपि **ईश्वरीयकृतिजन्यत्वस्य** निराबाधतया कार्यमात्रे कृतिजन्यत्वप्रवादोऽपि उपपद्यते इति ।

न च - कृतिजन्यत्वमात्रस्य साध्यत्वे अदृष्टद्वारा हविरादिगोचरास्मदीय-कृतिजन्यत्वम् आदाय सिद्धसाधनम् इति – वाच्यम् । अदृष्टाद्वारकत्वेन कृतिजन्यतायाः विशेषणीयत्वात् इति दिक् ॥

राजीवोल्लासः

तदुपरि शङ्कते – **अथ एवंरीत्या** इति । ''समवायसंबन्धेन कार्यं प्रति उपादानतासंबन्धेन कृतिः कारणम्'' इति कार्यकारणाभावम् अवलम्ब्यैव उक्तानुमानं प्रयोक्तव्यम् । तथा सति ध्वंसस्य समवायसंबन्धेन कुत्रापि अनुत्पत्त्या ध्वंसस्य कृतिजन्यत्वं न सिद्ध्येत् । तथा च ''कार्यसामान्यं कृतिजन्यम्'' इति प्रवादस्य का गतिः इति शङ्का । तादृशप्रवादः निर्युक्तिकतया अश्रद्धेयः इति समाधानम् ।

सर्वत्र प्रसिद्धिस्य प्रवादस्य अश्रद्धेयत्वं न उचितम् इति मन्यमानः कल्पान्तरम् आह – **यद्वा जन्यत्वमात्रम्** इति । ''मात्र'' शब्देन सत्त्वविशिष्टजन्यत्वव्यवच्छेदः । ''**कृतिजन्यत्वमात्रम्**'' इत्यत्र ''मात्र'' शब्देन विशेष्यतासंबन्धावच्छिन्नत्वसमवाय-संबन्धावच्छिन्नत्वयोः व्यवच्छेदः । तथा च ''जन्यं कृतिनिष्ठजनकतानिरूपितजन्यता-शालि, प्रागभावप्रतियोगित्वात्'' इत्येव अनुमानाकारः । ''कालिकसंबन्धेन कार्यसामान्यं प्रति कालिकसंबन्धेन कृतिः कारणम्'' इति कार्यकारणभावम् अवलम्ब्य इदम् अनुमानं प्रवृत्तम् । जन्यत्वरूपपक्षतावच्छेदकाश्रये ध्वंसेऽपि ईश्वरीयकृतिजन्यत्वस्यैव सद्भावेन न बाधस्य न वा व्यभिचारस्य प्रसक्तिः इति भावः ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

एवं च इति । कृतिजन्यत्वमात्रस्य साध्यत्वेऽपि तस्य च ध्वंसेऽपि सत्त्वेन साध्याभाववद्वृत्तित्वरूपव्यभिचारस्य अप्रसक्तेः तद्वारणफलकं सत्त्ववैशिष्ट्यं हेतौ न उपादेयम् इति भावः ।

ईश्वरीयकृतिजन्यत्वस्य इति । न च – घटादिध्वंसे अस्मदादिकृतिजन्यत्वस्यापि सद्भावेन ईश्वरीयकृतिजन्यत्वोक्तिः किमर्था इति – वाच्यम् । ''अदृष्टाद्वारककृतिजन्यत्वं साध्यम्'' इति अनुपदं वक्ष्यमाणतया घटादिध्वंसस्य अदृष्टद्वारकास्मदादिकृतिजन्यत्वेऽपि अदृष्टाद्वारककृतिजन्यत्वं नास्ति इति आलोच्य ईश्वरीयकृतिजन्यत्वोक्तेः ।

न च कृतिजन्यत्वमात्रस्य इति । क्षित्यङ्कुरादिकं जगत् जीवात्मभिः कृतानां पुण्यापुण्यकर्मणां फलभूतस्य सुखदुःखानुभवस्य साधनतयैव ईश्वरः सृजति । तथा च जीवसमवेता या यागादिगोचरा कृतिः, सा स्वसाध्ययागजन्यादृष्टद्वारा जगदुत्पत्तेः कारणम् इति अवश्यं वक्तव्यम् । एवं च अदृष्टद्वारा अस्मदीयकृतिजन्यत्वस्य क्षित्यादिजगति सिद्धत्वेन सिद्धसाधनम् इति दोषः ।

तत्परिहारस्तु – अदृष्टाद्वारककृतिजन्यत्वं साध्यम् । अदृष्टद्वारकास्मदीयकृतिजन्यत्वस्य पक्षे सिद्धत्वेऽपि अदृष्टाद्वारकास्मदीयकृतिजन्यत्वं न सिद्धम् इति न दोषः । अर्थात् ईश्वरीयकृतिजन्यत्वमादायैव साध्यपर्यवसानम् इति ईश्वरसिद्धिः इति भावः ।

ननु घटादिरूपदृष्टान्ते अदृष्टाद्वारककृतिजन्यत्वं कथम् उपपादनीयम्? सर्वस्यापि कार्यस्य जीवात्मकृतपुण्यापुण्यकर्मफलभोगार्थतया अदृष्टद्वारकपुण्यापुण्यकर्मानुकूलकृतिजन्यत्वात् ।

न च - घटस्य पुण्यापुण्यकर्मानुकूलकृतिजन्यत्ववत् घटोत्पत्त्यनुकूलकपालोपादानककृतिजन्यत्वमपि अस्ति । अत्र तु अदृष्टं न द्वारम् इति अदृष्टाद्वारककृतिजन्यत्वं घटादौ उपपादनीयम् इति – वाच्यम् । एवं तर्हि

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

घटादिध्वंसस्यापि मुद्गरपातानुकूलादृष्टद्वारका-स्मदीयकृतिजन्यत्वात् ईश्वरीयकृतिजन्य-त्वानुधावनं व्यर्थम् इति चेत्, सत्यम् । अत्र ध्वंसशब्देन महाप्रलयः विवक्षितः । तत्र तु अदृष्टद्वारैव जीवकृतिः कारणम् इति ईश्वरकृतिम् आदायैव अदृष्टाद्वारक-कृतिजन्यत्वम् उपपादनीयम् इति ।।

दिनकरी

एतादृशानुमितौ लाघवज्ञानसहकारेण ज्ञानेच्छाकृतिषु नित्यत्वम् एकत्वं च भासते इति नित्यैकत्वसिद्धिः ।।

राजीवोल्लासः

ननु ज्ञानजन्यत्व-इच्छाजन्यत्व-कृतिजन्यत्वानां क्षित्यङ्कुरादौ साधनेऽपि कथम् ईश्वरसिद्धिः ? इति आशङ्क्य ''वह्निव्याप्यधूमवान् अयं पर्वतः'' इति परामर्शात् वह्नेः महानसीयत्वे लाघवम् इति लाघवज्ञानसहकृतात् यथा ''पर्वतः महानसीयवह्निमान्'' इति अनुमितिः, तथा ''ज्ञानेच्छाकृतिजन्यत्वव्याप्यकार्यत्ववान्'' इति परामर्शात् ज्ञानादेः एकत्वे नित्यत्वे च लाघवम् इति लाघवज्ञानसहकृतात् नित्यैकज्ञानादिजन्यम् इति अनुमितिः भवति । नित्यैकज्ञानादिमान् च ईश्वर एव इति ईश्वरसिद्धिः इत्याशयेन समाधत्ते एतादृशानुमितौ इति ।।

दिनकरी

अथ ईश्वरज्ञानादौ कीदृशम् एकत्वम् अनुमित्या विषयीक्रियते ? न तावत् संख्यारूपम्, गुणे गुणानङ्गीकारात् । **न च** – **नित्यज्ञानवन्निष्ठभेदप्रतियोगितानवच्छे-दकत्वरूपम् एकत्वं तद्विषयः इति** – **वाच्यम्** । **ईदृशैकत्वस्य** नित्यज्ञानानुमितेः प्राक् अनुपस्थितत्वेन तादृशानुमितौ भानासंभवात् इति चेत् –

अत्र केचित् – सामानाधिकरण्यसंबन्धेनैव ज्ञानादौ आश्रयगतम् एकत्वम् अनुमितौ भासते ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

यद्वा द्वित्वासमानाधिकरणत्वरूपम् एकत्वं तद्विषयः । न च – जीवेश्वरगतद्वित्व-सामानाधिकरण्यस्य ईश्वरज्ञानादौ सत्त्वात् बाधः इति – वाच्यम् । दुःखवदवृत्तित्वेन द्वित्वस्य विशेषणीयत्वात् । न च – एवमपि घटेश्वरगतद्वित्वसामानाधिकरण्यस्य तत्र सत्त्वात् बाधः इति – वाच्यम् । आत्मानात्मवृत्तिभिन्नत्वेनापि द्वित्वस्य विशेषणीयत्वात् इति – आहुः ।

तन्न – ईश्वरे ज्ञानद्वयाङ्गीकारेऽपि एतादृशैकत्वभाननिर्वाहेण उद्देश्यासिद्धेः ।

वस्तुतस्तु – स्वाधिकरणावृत्तिस्वभिन्नज्ञानकत्वमेव एकत्वम् । एवम् ईश्वरेच्छाकृत्योरपि द्रष्टव्यम् ।

एवं च तादृशज्ञानादिसिद्धौ तत्र गुणत्वेन हेतुना द्रव्याश्रितत्वे साधनीये द्रव्यान्तरस्य बाधात् ईश्वरसिद्धिः इति द्रष्टव्यम् ॥

राजीवोल्लासः

अथ ईश्वरज्ञानादौ इति । पूर्वोक्तलाघवज्ञानसहकृतपरामर्शात् ईश्वरीयज्ञानेच्छा-कृतिषु कीदृशम् एकत्वम् अनुमित्या विषयीक्रियते । न तावत् संख्यारूपम् । ज्ञानेच्छाकृतीनां गुणत्वेन तत्र संख्यारूपस्य गुणस्य असंभवात् । गुणे गुणानङ्गीकारात् ।

ननु नित्यज्ञानवन्निष्ठभेदप्रतियोगितानवच्छेदकत्वरूपम्, नित्यज्ञानत्व-वन्निष्ठभेदप्रतियोगितानवच्छेदकैकत्ववत्त्वरूपं वा एकत्वम् अनुमितौ विषयः । यदि नित्यं ज्ञानद्वयं स्यात्, तर्हि नित्यज्ञानाश्रयस्यापि द्वित्वम् आवश्यकम् । तथा सति नित्यज्ञानवदेतद्व्यक्तिनिष्ठः यः भेदः नित्यज्ञानान्तरवद्व्यक्तिभेदः । तत्प्रतियोगितावच्छेदकं नित्यज्ञानान्तरम् । तद्वन्निष्ठभेदप्रतियोगितावच्छेदकम् एतन्नित्यज्ञानम् इत्येवम् द्वयोरपि नित्यज्ञानयोः नित्यज्ञानवन्निष्ठभेदप्रतियो-गितावच्छेदकत्वात् तदनवच्छेदकत्वरूपम् एकत्वं न सिद्ध्येत् । अतः नित्यज्ञान-वन्निष्ठभेदप्रतियोगितानवच्छेदकत्वं नित्यज्ञानस्य एकत्वे सत्येव निर्वहति । तदा हि – नित्यज्ञानवन्निष्ठः यः भेदः घटादिभेदः, तत्प्रतियोगितानवच्छेदकत्वं नित्यज्ञाने

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

सिद्ध्यति । एवं नित्यज्ञानस्य अनेकत्वे नित्यज्ञानत्ववन्निष्ठभेदप्रतियोगितानवच्छेदकैकत्ववत्त्वम् नित्यज्ञाने न संभवति । तथा हि – नित्यज्ञानत्ववत् एतदीयं नित्यज्ञानम् । तन्निष्ठः यः भेदः एकत्ववन्नित्यज्ञानन्तरभेदः । तत्प्रतियोगितावच्छेदकं नित्यज्ञानान्तरनिष्ठम् एकत्वम् । एवं नित्यज्ञानत्ववत् नित्यज्ञानान्तरम् । तन्निष्ठः भेदः एकत्ववदेतन्नित्यज्ञानभेदः । तत्प्रतियोगितावच्छेदकम् एतन्नित्यज्ञाननिष्ठम् एकत्वम् । तथा च द्वयोरपि एकत्वयोः नित्यज्ञानत्ववन्निष्ठभेदप्रतियोगितानवच्छेदकत्वासंभवात् अनवच्छेदकैकत्ववत्त्वरूपं साध्यं नित्यज्ञानस्य एकत्वे सत्येव पर्यवस्यति । तदा हि नित्यज्ञानत्ववन्निष्ठः भेदः एकत्ववन्नित्यज्ञानभेदः न संभवति । किन्तु एकत्ववद्घटादिभेदः । तत्प्रतियोगितानवच्छेदकत्वं नित्यज्ञाननिष्ठे एकत्वे । तद्वत्वं नित्यज्ञाने अस्ति इति साध्यसिद्धिः इत्याशयेन शङ्कते – **न च नित्यज्ञानवन्निष्ठ** इति । तत्र नित्यज्ञानवन्निष्ठ-भेदप्रतियोगितानवच्छेदकत्वरूपम् एकत्वम् इति क्वचित् पाठः । नित्यज्ञानत्ववन्निष्ठ-भेदप्रतियोगितानवच्छेदकैकत्ववत्त्वरूपम् एकत्वम् इति क्वचित् पाठः । एतत्पाठद्वयानुसारेण इदानीं व्याख्यातम् ।

समाधत्ते – **ईदृशैकत्वस्य** इति । ईदृशस्य एकत्वस्य नित्यज्ञानानुमितेः प्राक् अनुपस्थितत्वेन नित्यज्ञानानुमितौ भानासंभवात् । अनुमितौ साध्यप्रसिद्धेः कारणत्वात् ।

अत्र केचित् इत्यादि । ईश्वरीयज्ञानादौ आश्रये ईश्वरे विद्यमानम् एकत्वं सामानाधिकरण्यसंबन्धेन अनुमितौ भासते । सामानाधिकरण्यं च प्रकृते स्वसमवायि-समवायः । स्वम्-एकत्वम् । स्वसमवायी-ईश्वरः । तत्समवायः ज्ञाने इति ।

ननु आश्रयगतस्य एकत्वस्य सामानाधिकरण्यसंबन्धेन ज्ञानेच्छाकृतिषु भानोपगमेऽपि न ईश्वरैकत्वसिद्धिः । ईश्वरनानात्वेऽपि तत्तदीश्वरगतज्ञानादिषु सामानाधिकरण्यसंबन्धेन तत्तदीश्वरगतैकत्वस्य भाने बाधकाभावात् इति अस्वरसात्

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

कल्पान्तरम् आह – यद्वा इति । द्वित्वासमानाधिकरणत्वरूपम् एकत्वम् अनुमितौ विषयः । ईश्वरस्य एकत्वात् ईश्वरनिष्ठज्ञानादौ एकत्वसमानाधिकरणत्वसत्त्वेऽपि द्वित्वसमानाधिकरणत्वं नास्ति । अतः द्वित्वासमानाधिकरणत्वरूपम् एकत्वम् ईश्वरीयज्ञानादौ वर्तते । न च – द्वित्वपदेन जीवेश्वरगतं द्वित्वं गृहीत्वा तदधिकरणेश्वरवृत्तित्वात् ईश्वरज्ञानादौ जीवेश्वरगतद्वित्वसामानाधिकरण्यमेव अस्ति, द्वित्वासमानाधिकरणत्वरूपैकत्वस्य असत्वात् बाधः इति – वाच्यम् । द्वित्वे "दुःखवदवृत्ति" इति विशेषणस्य दातव्यत्वात् । तथा च दुःखवदवृत्ति-द्वित्वासमानाधिकरणत्वं साध्यम् । जीवेश्वरगतद्वित्वस्य दुःखवज्जीववृत्तितया दुःखवदवृत्तिद्वित्वं घटपटादिद्वित्वम् । तदसमानाधिकरणत्वम् ईश्वरज्ञानादौ अस्ति इति न बाधः इति ।

न च – एवमपि "दुःखवदवृत्तिद्वित्वम्" इत्यनेन घटेश्वरगतं द्वित्वं ग्रहीतुं शक्यते । घटस्य ईश्वरस्य च दुःखशून्यतया दुःखवान् जीवः तदवृत्ति द्वित्वं घटेश्वरद्वित्वम् तत्समानाधिकरणत्वमेव ईश्वरज्ञाने अस्ति इति तदसमानाधिकरण-त्वविरहात् बाधः इति – वाच्यम् । द्वित्वे आत्मानात्मवृत्तिभिन्नत्वस्यापि विशेषणस्य उपादेयत्वात् । तथा च आत्मानात्मवृत्तिभिन्नं दुःखवदवृत्ति यत् द्वित्वम्, तदसमानाधिकरणत्वम् ईश्वरज्ञानादौ साध्यम् । घटेश्वरद्वित्वं यद्यपि दुःखवदवृत्ति तथापि आत्मानात्मवृत्तिभिन्नं न भवति, आत्मनि ईश्वरे अनात्मनि घटे च वर्तमानतया आत्मानात्मवृत्तित्वात् । अतः आत्मानात्मवृत्तिभिन्नं दुःखवदवृत्ति च द्वित्वं घटपटद्वित्वम् । तदसमानाधिकरणत्वम् ईश्वरज्ञाने अस्ति इति न बाधः इति समुदायार्थः ।

बाध इति इति । ईश्वरीयज्ञानादौ एकत्वबाधः इत्यर्थः । **आत्मानात्म** इति । अनात्मवृत्तिभिन्नत्वमात्रोपादाने दुःखवदवृत्ति–अनात्मवृत्तिभिन्न-द्वित्वसामानाधिकरण्यमूएकत्वम् इति स्यात् । तथा सति तादृशद्वित्वाप्रसिद्धिः ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

ईश्वरगतद्वित्वस्यैव तथात्वसंभवेन तस्य अनङ्गीकारात् । तथा च आत्मवृत्तित्वे सति अनात्मवृत्ति यत् तद्भिन्नत्वं द्वित्वस्य विशेषणम् । अत्र भेदप्रतियोगिभूतम् आत्मवृत्तित्वे सति अनात्मवृत्तिद्वित्वं जीवघटद्वित्वम् । तद्भिन्नं द्वित्वं घटपटद्वित्वं प्रसिद्धम् । अतः न अप्रसिद्धिः इति भावः । एवं "दुःखवदवृत्ति" इत्यस्य दुःखवद्वृत्तिभिन्नम् इत्यर्थः ।

केचिन्मतं दूषयति – तन्न इत्यादिना । द्वित्वासमानाधिकरणत्वरूपम् एकत्वं यदि ईश्वरज्ञानादौ साध्यते, तदा एकस्मिन् ईश्वरे ज्ञानद्वयाङ्गीकारेऽपि एतादृशं द्वित्वासमानाधिकरणत्वरूपम् एकत्वम् ईश्वरगते ज्ञानद्वयेऽपि संभवति इति ईश्वरे सर्वविषयकम् एकमेव ज्ञानम् इति उद्देश्यस्य असिद्धेः ।

वस्तुतस्तु इत्यादि । स्वाधिकरणावृत्ति-स्वभिन्नज्ञानकत्वं ज्ञानगतम् एकत्वम् । यदि ईश्वरे ज्ञानद्वयं स्यात्, तर्हि "स्व" पदेन एकं ज्ञानं गृहीत्वा तद्भिन्नज्ञानपदेन ज्ञानान्तरं ग्राह्यम् । तस्मिन् ज्ञाने च स्वाधिकरणेश्वरवृत्तित्वमेव अस्ति इति स्वाधिकरणावृत्तित्वं न संभवति । अतः ईश्वरे एकमेव यदि ज्ञानं स्यात्, तदैव ईदृशम् एकत्वं ज्ञाने संभवति । तथा हि – स्वं – ईश्वरगतं ज्ञानम् । स्वभिन्नं ज्ञानं जीवगतं ज्ञानम् । तत्र च स्वाधिकरणेश्वरावृत्तित्वम् अस्ति इति स्वाधिकरणावृत्ति-स्वभिन्नज्ञानकत्वरूपस्य एकत्वस्य सिद्धिः भवति । एवं स्वभिन्नज्ञानत्वावच्छेदेन स्वाधिकरणावृत्तित्वं विवक्षणीयम् । अन्यथा ईश्वरीयज्ञानस्य अनेकत्वेऽपि स्वभिन्ने जीवज्ञाने स्वाधिकरणेश्वरावृत्तित्वसत्त्वेन ईश्वरज्ञानादेः एकत्वासिद्धिप्रसङ्गात् । तथा च स्वभिन्नज्ञानत्वव्यापकस्वाधिकरणवृत्तित्वाभावकत्वं ज्ञानगतम् एकत्वम् । स्वम् – ईश्वरज्ञानम् । स्वभिन्नज्ञानत्वं जीवज्ञानेषु । तत्र ईश्वरज्ञानाधिकरणेश्वरवृत्ति-त्वाभावः अस्ति इति स्वभिन्नज्ञानत्वव्यापकः स्वाधिकरणवृत्तित्वाभावः भवति । तत्कत्वरूपम् एकत्वम् ईश्वरीयज्ञाने । एवं स्वभिन्नेच्छात्वव्यापक-स्वाधिकरणवृत्तित्वाभावकत्वम् इच्छानिष्ठम् एकत्वम् । स्वभिन्नकृतित्वव्यापक-

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

स्वाधिकरणवृत्तित्वाभावकत्वं कृतिनिष्ठम् एकत्वम् । यत्र एकत्वं भासते, तदेव स्वपदार्थः ।

यद्वा, ''**स्वाधिकरणावृत्ति**'' इत्यादिग्रन्थस्य स्वसमानाधिकरण (स्वाधिकरणवृत्ति) - स्वभिन्नज्ञानकं यद्यत् तत्तदन्यत्वरूपम् एकत्वम् इत्यर्थः । स्वपदेन जीवगतं ज्ञानं ग्राह्यम् । तदधिकरणे जीवे स्वभिन्नस्य ज्ञानान्तरस्य सत्त्वात् । अतः स्वसमानाधिकरणस्वभिन्नज्ञानकं यद्यत् जीवज्ञानम्, तत्तदन्यत्वम् ईश्वरज्ञाने अस्ति । एतादृशम् एकत्वं जीववत् ईश्वरे ज्ञानद्वयसत्त्वे न निर्वहति इति ईश्वरज्ञानस्य एकत्वसिद्धिः ।

ननु पूर्वोक्तानुमानैः नित्य-एक-ज्ञानेच्छाकृतिव्यक्तीनां सिद्धावपि न ईश्वरसिद्धिः इति आशङ्कायाम् आह – **एवं च** इति । ''नित्यज्ञानेच्छादिकं द्रव्याश्रितम्, गुणत्वात्, रूपादिवत्'' इति अनुमानेन नित्यज्ञानादेः द्रव्याश्रितत्वे सिद्धे – नित्यज्ञानादिकं न पृथिव्यादिवृत्ति, चेतनवृत्तिगुणत्वात्; नापि जीवात्मवृत्ति, नित्यज्ञानादित्वात्; पृथिव्यादौ चेतनगुणाभावात्, जीवात्मनि नित्यज्ञानाद्यभावात्; अतः परिशेषात् – नित्यज्ञानाद्याश्रयस्य ईश्वरस्य सिद्धिः । ''नित्यज्ञानादिकं पृथिव्याद्यष्टद्रव्य-जीवात्म-एतदतिरिक्तद्रव्याश्रितम्, अष्टद्रव्य-जीवानाश्रितत्वे सति द्रव्याश्रितत्वात्'' इत्येवंरूपं परिशेषानुमानम् । तेन ईश्वरसिद्धिः इति भावः ।।

मुक्तावली

न च- शरीराजन्यत्वेन कर्त्रजन्यत्वसाधकेन सत्प्रतिपक्षः इति – वाच्यम् । **अप्रयोजकत्वात्** । मम तु **कर्तृत्वेन कार्यत्वेन कार्यकारणभावः** एव **अनुकूलः** तर्कः । ''द्यावाभूमी जनयन् देव एकः,'' ''विश्वस्य कर्ता, भुवनस्य गोप्ता'' इत्यादयः आगमाः अपि अनुसंधेयाः ।।

दिनकरी

अप्रयोजकत्वात् इति । **अनुकूलतर्काभावात्** इति भावः । **इदम्**

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

उपलक्षणम् । शरीराजन्यत्वहेतौ शरीररूपविशेषणस्य असिद्धिवारकस्यापि व्यभिचारावारकत्वेन व्यर्थतया, तद्विशेषणावच्छेदेन व्याप्तिग्रहासंभवेन व्याप्यत्वासिद्धेश्च इत्यपि द्रष्टव्यम् ।

न च – व्यर्थविशेषणत्वस्य अधिकोक्त्या निग्रहस्थानत्वेऽपि तज्ज्ञानस्य व्याप्तिज्ञानप्रतिबन्धकत्वे मानाभावः इति – वाच्यम् । **तथापि गुरुधर्मस्य** अनवच्छेद-कतया साध्यसंबन्धितावच्छेदकधर्मवत्त्वरूपव्याप्तेः तत्र अभावेन व्याप्यत्वासिद्धेः दुर्वारत्वात् इति । **तदुक्तम् आचार्यैः** – ''एकाम् असिद्धिं परिहरतः द्वितीयापत्तिः'' इति ।

कर्तृत्वेन कार्यत्वेन कार्यकारणभाव एव इति । न च - अन्वयव्यतिरे-काभ्यां घटत्वाद्यवच्छिन्नं प्रति कुलालादिकृतित्वेनैव हेतुत्वात् एतादृशकार्यकारणभावे मानाभावः इति वाच्यम् । **घटत्वपटत्वादिभेदेन** अनन्तकार्यकारणभावकल्पनापेक्षया कार्यत्वावच्छिन्नं प्रति कृतित्वेन एकहेतुताकल्पनस्यैव उचितत्वात् । ''**यद्विशेषयोः**'' इति न्यायेन कार्यत्वकृतित्वाभ्यां सामान्यकार्यकारणभावस्य आवश्यकत्वात् च ।

न च – एतादृशः न्यायः निष्प्रमाणकः इति – वाच्यम् । **कार्यत्वावच्छिन्नाभावे** तत्तत्कृत्यभावकूटस्य प्रयोजकत्वकल्पने गौरवात्, कृतित्वावच्छिन्नाभावस्य एकस्य प्रयोजकत्वे लाघवात् इति ॥

राजीवोल्लासः

अनुकूलतर्काभावात् इति । ''क्षित्यङ्कुरादिकं सकर्तृकम्, कार्यत्वात्'' इत्यनुमाने ''क्षित्यङ्कुरादिकं कर्त्रजन्यम्, शरीराजन्यत्वात्'' इति प्रत्यनुमानेन सत्प्रतिपक्षशङ्कायां प्रत्यनुमाने ''शरीराजन्यत्वरूपहेतुः अस्तु, कर्त्रजन्यत्वरूपं साध्यं मास्तु'' इति व्यभिचारशङ्कायां तादृशशङ्कानिवर्तकस्य अनुकूलतर्कस्य अभावात् इत्यर्थः । साध्यहेत्वोः व्याप्तिग्राहकः कार्यकारणभाव एव अनुकूलतर्कः । प्रत्यनुमाने

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

शरीरजन्यत्वाभावः हेतुः । कर्तृजन्यत्वाभावः साध्यः । तयोः अत्यन्ताभावरूपत्वेन नित्यत्वात् कार्यकारणभावः नास्ति इति तात्पर्यम् । एवं च ''अप्रयोजकत्वात्'' इत्यस्य व्यभिचारशङ्कानिवर्तकव्याप्तिग्रहजनककार्यकारणभावरूपानुकूलतर्काभावात् इत्यर्थः ।

इदम् उपलक्षणम् इति । प्रत्यनुमाने अनुकूलतर्काभावरूपदोषकथनं व्याप्यत्वासिद्धिरूपदोषान्तरस्यापि अजहल्लक्षणया बोधकम् इत्यर्थः । ''क्षित्यङ्कुरादिकं कर्त्रजन्यम्, शरीराजन्यत्वात्'' इत्यनुमाने हेतौ शरीररूपविशेषणानुपादाने पक्षे अजन्यत्वरूपहेतोः अवृत्या स्वरूपासिद्धिः । शरीररूपे विशेषणे दत्ते शरीरजन्यत्वाभावसत्त्वात् न स्वरूपासिद्धिः इति वक्तव्यम् । परन्तु हेतुघटकदलानां व्यभिचारवारकतयैव सार्थक्यम् इति नियमात् असिद्धिवारकस्यापि शरीररूपविशेषणस्य व्यभिचारावारकत्वेन व्यर्थतया व्यर्थविशेषणावच्छिन्ने हेतौ साध्यव्याप्तिज्ञानासंभवेन व्याप्यत्वासिद्धिर्नाम दोषः ।

शङ्कते – **न च व्यर्थविशेषणत्वस्य** इति । हेतौ निष्प्रयोजनस्य विशेषणस्य उपादाने अधिकाख्यस्य निग्रहस्थानस्य संभवेऽपि ''इदं विशेषणं व्यर्थम्'' इत्याकारकज्ञानं कथं व्याप्तिज्ञानं प्रतिबध्नीयात् । व्याप्तिज्ञानं प्रति व्यभिचारज्ञानस्यैव प्रतिबन्धकत्वात् । तस्यैव ग्राह्याभावावगाहित्वात् इति शङ्कायाः तात्पर्यम् ।

समाधत्ते – **तथापि** इति । व्यर्थविशेषणघटितस्य हेतोः व्याप्यत्वासिद्धिः एवम् उपपादनीया । साध्यसंबन्धितावच्छेदकरूपवत्त्वं व्याप्तिः इति **मणिकारैः** व्याप्तेः लक्षणान्तरम् उक्तम् । साध्यसामानाधिकरण्यावच्छेदकं यत् हेतुतावच्छेदकं तद्वत्त्वं व्याप्तिः इति तदर्थः । साध्यसामानाधिकरण्यं च साध्याधिकरणवृत्तित्वम् । साध्याधिकरणवृत्तितावच्छेदकहेतुतावच्छेदकवत्त्वं व्याप्तिः इत्युक्तं भवति । वह्न्यधिकरणवृत्तितावच्छेदकं यत् हेतुतावच्छेदकं धूमत्वम् – धूमत्वविशिष्टस्य वह्न्यधिकरणवृत्तित्वात् – तादृशधूमत्ववत्त्वं धूमेऽस्ति इति लक्षणसमन्वयः ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

व्यर्थविशेषणघटितस्य धर्मस्य हेतुतावच्छेदकत्वस्थले ''पर्वतो वह्निमान् नीलधूमात्'' इत्यादौ नीलत्वविशिष्टधूमत्वं हेतुतावच्छेदकं साध्याधिकरणवृत्तितावच्छेदकं न भवति । गुरुधर्मसमनियतस्य लघुधर्मस्य अवच्छेदकत्वे संभवति, गुरुधर्मस्य न अवच्छेदकत्वम् इति नियमात्, धूमत्वापेक्षया गुरुभूतस्य धूमत्वसमनियतस्य नीलत्वविशिष्टधूमत्वस्य साध्याधिकरणवृत्तितावच्छेदकत्वविरहेण साध्याधिकरण-वृत्तितावच्छेदकहेतुतावच्छेदकवत्त्वरूपव्याप्त्यभावात् व्याप्यत्वासिद्धिः । एवं जन्यत्वाभावत्वापेक्षया शरीरजन्यत्वाभावत्वस्य गुरुत्वेन साध्याधिकरणवृत्तिता-वच्छेदकत्वं नास्ति इति शरीराजन्यत्वरूपहेतौ व्याप्यत्वासिद्धिः इति भावः ।।

तदुक्तम् आचार्यैः इति । **उदयनाचार्यैः आत्मतत्त्वविवेके** इति शेषः । **एकाम् असिद्धिम्** – जन्यत्वाभावमात्रस्य हेतुत्वे प्रसक्तां स्वरूपासिद्धिं परिहरतः, **द्वितीयापत्तिः**– द्वितीयायाः व्याप्यत्वासिद्धेः प्रसक्तिः इत्यर्थः । स्वरूपासिद्धिपरिहाराय हेतौ शरीररूप-विशेषणप्रवेशे तस्य व्यभिचारावारकत्वेन शरीरजन्यत्वाभावत्वस्य गुरुतया साध्यसामानाधि-करण्यानवच्छेदकत्वेन व्याप्यत्वासिद्धप्रसङ्गात् इति भावः ।

न च अन्वयव्यतिरेकाभ्याम् इति । कार्यत्वावच्छिन्नं प्रति कृतित्वावच्छिन्नं कारणम् इति सामान्यकार्यकारणभावे प्रमाणाभावः । कुलालकृतित्वावच्छिन्नसत्त्वे घटत्वावच्छिन्नसत्त्वम्, तदभावे तदभावः इति अन्वयव्यतिरेकाभ्यां घटत्वावच्छिन्नं प्रति कुलालकृतित्वावच्छिन्नं कारणम् इति विशेषरूपेणैव हेंतुत्वनिश्चयात् । न च – उक्तान्वयव्यतिरेकाभ्यां विशेषरूपेण कार्यकारणभाववत्, कृतित्वावच्छिन्नसत्त्वे कार्यसत्त्वम्, तदभावे तदभावः, इति अन्वयव्यतिरेकाभ्यां कार्यत्वकृतित्वाभ्यां सामान्यरूपाभ्यामपि कार्यकारणभावः सिद्ध्यतु इति – वाच्यम् । सृष्टिकाले कृतिसत्त्वे कार्यसत्त्वम् इति अन्वयसहचारस्य ग्रहीतुं शक्यत्वेऽपि, कृत्यभावे कार्याभावः इति व्यतिरेकसहचारः ग्रहीतुं न शक्यते । सृष्टिकाले कृतिसामान्याभावस्य कार्यसामान्याभावस्य च विरहात् । प्रलये च शरीरविशिष्टानाम् अस्मदादीनाम् अभावेन व्यतिरेकग्रहस्य असंभवात् ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

यद्धर्मावच्छिन्नयोः अन्वयव्यतिरेकसहचारग्रहः, तद्धर्मावच्छिन्नयोः एव कार्यकारणभावः इति नियमात् इति शङ्कितुः आशयः । तादृशनियमः काचित्कः, न सार्वत्रिकः । अन्वयसहचारमात्रेणापि नित्यविभुपदार्थानां कारणत्वदर्शनात् । यथा नित्यविभोः ईश्वरस्य जगत्कारणत्वं स्वीक्रियते, न हि तत्र ईश्वराभावे जगदभावः इति व्यतिरेकसहचारः संभवति इत्यभिप्रेत्य समाधत्ते – **घटत्वपटत्वादिभेदेन** इति । विशेषरूपेण कार्यकारणभावकल्पने कार्यतावच्छेदकघटत्वपटत्वादिभेदेन कारणताव-च्छेदककुलालकृतित्व-तन्तुवायकृतित्वादिभेदेन च अनन्तकार्यकारणभावः कल्पनीयः इति गौरवम् । तदपेक्षया लाघवात् कार्यत्वावच्छिन्नं प्रति कृतित्वावच्छिन्नं कारणम् इति एककार्यकारणभावकल्पनमेव उचितम् इति भावः ।

ननु सामान्यकार्यकारणभावमात्रेण न निर्वाहः संभवति । तन्तुवायकृतिसत्त्वे घटोत्पत्त्यापत्तेः । तन्तुवायकृतेरपि कृतित्वात् घटस्यापि कार्यत्वाच्च । अतः घटत्वावच्छिन्नं प्रति कुलालकृतित्वावच्छिन्नं कारणम् इति रीत्या विशेषकार्यकारण-भावोऽपि अवश्यं स्वीकरणीयः । कुलालकृतिसत्त्वे घटसत्त्वम्, कुलालकृत्यभावे घटाभावः इति विशेषरूपेण अन्वयव्यतिरेकयोः अत्र प्रमाणत्वात् । एवं च सामान्यरूपेण कार्यकारणभावकल्पनम् अनावश्यकम् । तदकल्पने कस्यापि दोषस्य अभावात् । सामान्यकार्यकारणभावकल्पनेऽपि तन्तुवायकृतिसत्त्वे घटोत्पत्तिवारणाय विशेषकार्यकारणभावस्य अवश्यं कल्पनीयत्वात् इत्यतः सामान्यकार्यकारणभावसाधकं हेत्वन्तरम् आह – **यद्विशेषयोः इति न्यायेन** इति । "यद्विशेषयोः कार्यकारणभावः, सः तत्समान्ययोः अपि" इति न्यायेन कार्यविशेषकृतिविशेषयोः कार्यकारणभावे सति कार्यसामान्य-कृतिसामान्ययोः अपि कार्यकारणभावः आवश्यकः इति भावः । **कार्यत्वावच्छिन्नाभावे** इति । यदि सामान्यकार्यकारणभावः न स्यात्, तर्हि कार्यसामान्याभावे कृतिविशेषाभावकूटस्य प्रयोजकत्वं कल्पनीयम् इति गौरवम् । कार्यत्वावच्छिन्नं प्रति कृतित्वावच्छिन्नं कारणम् इति सामान्यकार्यकारणभावे

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

सति तु, कार्यत्वावच्छिन्नाभावे कृतित्वावच्छिन्नाभाव एव प्रयोजकः इति लाघवम् । तथा च ''यद्विशेषयोः'' इति न्यायः लाघवमूलकत्वात् न निष्प्रमाणकः इति भावः ॥

दिनकरी

केचित्तु – मास्तु कार्यत्वं कृतेः कार्यतावच्छेदकम्, तथापि घटत्वाद्यवच्छिन्नं प्रति कृतेः कारणतया, सर्गाद्यकालीनघटादिकं पक्षीकृत्य घटत्वादिहेतुना सकर्तृकत्वसाधने जीवानां बाधात् ईश्वरसिद्धिः इति – **आहुः** ।

दीधितिकृतस्तु – कार्यत्वावच्छिन्नं प्रति कृतेः हेतुत्वाभावेऽपि घटत्वावच्छिन्नं प्रति कृतेः हेतुतया, खण्डघटोत्पत्तेः पूर्वं कृतेः आवश्यकतया तदाश्रयत्वेन ईश्वरसिद्धिम् आहुः ॥

राजीवोल्लासः

केचित्तु इति । ''यद्विशेषयोः'' इति नियमे मानाभावेन ''कार्यत्वावच्छिन्नं प्रति कृतित्वावच्छिन्नं कारणम्'' इति कार्यकारणभावविरहेऽपि घटत्वावच्छिन्नं प्रति कृतेः कारणत्वात्, सर्गाद्यकालीनं घटं पक्षीकृत्य घटत्वेन हेतुना कृतिजन्यत्वसाधने जीवकृतेः सर्गाद्यकालीनघटहेतुत्वासंभवात् ईश्वरकृतेः एव तद्धेतुत्वं वक्तव्यम् इति ईश्वरसिद्धिः । ''सर्गाद्यकालीनः घटः कृतिजन्यः घटत्वात्, इदानींतनघटवत्'' इति अनुमानप्रयोगः विवक्षितः इति केचित् आहुः ।

''आहुः'' इति अस्वरसोद्भावनम् । तद्बीजं तु – ईश्वरानङ्गीकर्तृमीमांसकान् प्रति ईश्वरस्य साधनीयतया तन्मते सर्गप्रलययोः अनङ्गीकारेण सर्गाद्यकालीनघटस्य अप्रसिद्ध्या आश्रयासिद्धिः ।

दीधितिकृतस्तु इति । महाघटनाशात् खण्डघटोत्पत्तिस्थले कुलालकृतेः खण्डघटं प्रति हेतुत्वाभावेन ''खण्डघटः कृतिजन्यः घटत्वात्, महाघटवत्'' इति अनुमाने जीवरूपकुलालकृतिजन्यत्वस्य बाधात् ईश्वरकृतिजन्यत्वम् आदायैव

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

साध्यपर्यवासनं कर्तव्यम् इति ईश्वरसिद्धिः इति दीधितिकृताम् आशयः । तदाश्रयत्वेन इति । खण्डघटानुकूलकृत्याश्रयत्वेन इत्यर्थः ॥

दिनकरी

ननु एवंरीत्या घटादिकुलालादिचेष्टयोः अन्वयव्यतिरेकाभ्यां कार्यत्वावच्छिन्नं प्रति चेष्टात्वादिना हेतुत्वात् अङ्कुराद्युत्पत्तेः पूर्वं चेष्टानुरोधेन ईश्वरस्य नित्यशरीरम् अपि सिद्ध्येत् इति चेत्, न । तादृशान्वयव्यतिरेकाभ्यां कार्यत्वावच्छिन्नं प्रति क्रियात्वेनैव हेतुत्वात्, **तत्र चेष्टात्वेन हेतुत्वे मानाभावात्** ।

आचार्यमतानुयायिनस्तु – अस्तु चेष्टात्वेन तत्र हेतुत्वम्, अस्तु च तदनुरोधेन ईश्वरस्य नित्यं शरीरम्, तथापि न ईश्वरस्य अतिरिक्तशरीरसिद्धिः, परमाणूनामेव तच्छरीरत्वोपगमात् ।

एवं च ईश्वरकृतिजन्यचेष्टावद्भिः परमाणुरूपशरीरैरेव तत्तत्कार्याणाम् उत्पत्तिः, परमाणुक्रियायां चेष्टात्वरूपवैजात्याङ्गीकारात् शरीरलक्षणे अन्त्यावयवित्वस्य अनिवेशात् च न परमाणूनां शरीरत्वानुपपत्तिः ।

न च – नानापरमाणूनां शरीरत्वकल्पने गौरवात् लाघवेन तस्य अतिरिक्तत्वसिद्धिः इति – वाच्यम् । तच्छरीरस्य महत्त्वे अभुग्नस्य तस्य पाषाणादौ प्रवेशासंभवेन पाषाणान्तर्वर्तिभेकशरीरोत्पादकतानुपपत्तेः । अणुत्वे च दूरस्थकार्योत्पादकत्वानुपपत्तेः इति आहुः इति अलं पल्लवैः इति ॥

राजीवोल्लासः

ननु एवंरीत्या इति । ''घटत्वावच्छिन्नं प्रति कृतिः कारणम्'' इति कार्यकारण-भावम् अवलम्ब्य ईश्वरसाधने घटादिकं प्रति कुलालचेष्टायाः कन्वयव्यतिरेकाभ्यां हेतुत्वदर्शनात्, ''यद्विशेषयोः'' इति न्यायेन कार्यसामान्यं प्रति चेष्टायाः अपि हेतुत्वे सिद्धे सशरीरस्यैव चेष्टादर्शनेन क्षित्यङ्कुरादौ कार्यत्वेन हेतुना चेष्टाजन्यत्वे साध्यमाने सशरीरेश्वरचेष्टाजन्यत्वस्य वक्तव्यतया ईश्वरस्य नित्यज्ञानवत् नित्यं शरीरम् अपि सिद्ध्येत् इति आशङ्का ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

समाधानं तु – चेष्टायाः न चेष्टात्वेन हेतुत्वम्, किन्तु क्रियात्वेनैव । क्रियात्वं तु प्रयत्नसाधारणम् । अतः अशरीरेश्वरप्रयत्नजन्यत्वम् आदाय साध्यपर्यवासनसंभवात् न ईश्वरस्य शरीरम् आवश्यकम् । **चेष्टात्वेन हेतुत्वे मानाभावात्** इति । हिताहितप्राप्तिपरिहारानुकूलक्रियात्वरूपचेष्टात्वस्य क्रियात्वापेक्षया गुरुत्वेन कारणतानवच्छेदकत्वात् इति भावः ।

आचार्यमतानुयायिनस्तु इत्यादि । कार्यसामान्यं प्रति चेष्टात्वेन हेतुत्वेऽपि तदनुरोधेन ईश्वरस्य नित्यशरीराभ्युपगमेऽपि न करचरणाद्यवयवविशिष्टं शरीरं तस्य सिद्ध्यति । परमाणूनाम् एव नित्यानाम् ईश्वरशरीरत्वाङ्गीकारात् । एवं च ईश्वरकृतिजन्यचेष्टावद्भिः परमाणुरूपशरीरैरेव सर्गाद्यकाले तत्तत्कार्याणाम् उत्पत्तिः ।

ननु कथं परमाणूनां शरीरत्वम्? अन्त्यावयवित्वरूपशरीरत्वस्य तत्र असंभवात् । परमाणुक्रियायां चेष्टात्वं कथम्? हस्तपादाद्यवयवकशरीरक्रियायाम् एव चेष्टात्वप्रसिद्धेः इति चेत्, न । शरीरलक्षणे अन्त्यावयवित्वस्य अनिवेशात् । चेष्टात्वस्य विलक्षणजातिरूपत्वाच्च इति भावः ।

न च नानापरमाणूनाम् इति । अनन्तानां परमाणूनाम् ईश्वरशरीरत्वकल्पने गौरवात्, परमाण्वतिरिक्तं शरीरम् अङ्गीकर्तव्यम् इति न च वाच्यम् । ईश्वरस्य कल्प्यमानं शरीरं यदि महत्, तर्हि तस्य पाषाणादौ प्रवेशासंभवेन पाषाणान्तर्वर्तिभेकशरीरोत्पादकत्वम् ईश्वरशरीरस्य न उपपद्यते । यदि ईश्वरशरीरम् अणुः स्यात्, तदा युगपत् तच्चेष्टया नानादूरदेशस्थकार्योत्पादनं न स्यात् । अतः गौरवम् अपि सोढ्वा नानापरमाणूनां ईश्वरशरीरत्वम् अङ्गीकरणीयम् इति ।

अस्तु चेष्टात्वेन इति । चेष्टात्वस्य जातिविशेषत्वात् न गौरवम् इति भावः । **दूरस्थकार्योत्पादकतानुपपत्तेः** इति । परममहत्वे च क्रियायाः असंभवात् शरीरत्वव्याहतेः इति शेषः ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

आहुः इति अनेन अस्वरसः सूचितः । चेष्टात्वस्य शरीरक्रियाभिन्नक्रियायाम् अपि सत्त्वात् चेष्टात्वेन कारणत्वेऽपि शरीरसिद्ध्यभावात् ।

अलं पल्लवैः इति । ननु चेष्टात्वेन क्रियात्वेन वा कारणता न संभवति । सर्गादौ आद्यक्रियायाः अपि कार्यत्वात् तत्पूर्वं क्रियायाः अभावात् इति चेत्, न । कार्यद्रव्यसामान्यध्वंसस्यैव अवान्तरप्रलयतया सर्गात् पूर्वमपि परमाणुक्रियायाः अबाधात् । अन्यथा अदृष्टस्यापि उक्तयुक्त्या कार्यसामान्यहेतुत्वभङ्गप्रसङ्गात् इति अयमर्थः ''**अलम्**'' इत्यादिना सूचितः ॥

दिनकरी

यत्तु – पूर्वोक्तस्थापनानुमाने शरीरजन्यत्वम् उपाधिः, तस्य घटादौ साध्य-व्यापकत्वात्, अङ्कुरादौ साधनाव्यापकत्वात् च ।

न च – अङ्कुरादौ सकर्तृकत्वरूपसाध्यसन्देहेन उपाधेः साध्यव्यापकत्वसंशयात् न उपाधित्वनिश्चयः इति – वाच्यम् । तथापि सन्दिग्धोपाधित्वस्य दुर्वारत्वात् ।

न च – उपाधिसन्देहाहितः व्यभिचारसन्देहः पक्षीयव्यभिचारसन्देहः एव, स च न प्रतिबन्धकः इति – वाच्यम् । पक्षतत्समयोः व्यभिचारसंशयस्यापि प्रतिबन्धकत्वात् । अत एव अनुकूलतर्कविरहदशायां पक्षेतरत्वं सन्दिग्धोपाधिः इत्यभिधानं ग्रन्थकृतां सङ्गच्छते इति, तन्न । कार्यत्वेन कृतित्वेन कार्यकारणभावरूपस्य अनुकूलतर्कस्य सत्त्वेन कार्यत्वरूपहेतोः साध्यव्याप्यत्वनिश्चयेन साध्यव्याप्याव्याप-कत्वेन उपाधौ साध्याव्यापकत्वनिश्चयात् इति ॥

राजीवोल्लासः

यत्तु इत्यादि । ''जन्यं कृतिजन्यम्, अथवा कर्तृजन्यम्, कार्यत्वात्'' इति पूर्वोक्तेश्वरसाधकानुमाने शरीरजन्यत्वम् उपाधिः । कृतिजन्यत्वरूपसाध्यवति घटादौ शरीरजन्यत्वसत्त्वात्, तस्य साध्यव्यापकत्वात्, कार्यत्वरूपसाधनवति अङ्कुरादौ शरीरजन्यत्वविरहेण साधनाव्यापकत्वात् च ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

ननु पक्षे सकर्तृकत्वरूपसाध्यं सन्दिग्धम् । सृष्टिप्रलयानङ्गीकर्तृमीमांसकमते पक्षे सकर्तृकत्वरूपसाध्यविरहात् तदङ्गीकर्तृनैयायिकमते साध्यसत्त्वात् च । तथा च पक्षे अङ्कुरादौ सकर्तृकत्वरूपसाध्यसन्देहेन शरीरजन्यत्वरूपोपाधेः साध्यव्यापकत्वसंशयः भवति । पक्षे सकर्तृकत्वरूपकोटिम् आदाय साध्याव्यापकत्वग्रहः । पक्षे उपाध्यभावात् साध्यवत्पक्षनिष्ठाभावप्रतियोगित्वरूपस्य साध्याव्यापकत्वस्य ग्रहः । पक्षे साध्याभावग्रहे च साध्यवान् पक्षव्यतिरिक्तः, तन्निष्ठाभावाप्रतियोगित्वरूपं साध्यव्यापकत्वम् उपाधौ गृह्यते । तथा च पक्षे साध्यसन्देहात् उपाधौ साध्यव्यापकत्वसंशयः जायते । तेन शरीरजन्यत्वस्य उपाधित्वनिश्चयः न भवति । साध्यव्यापकत्वसाधनाव्यापकत्वयोः निश्चयस्यैव उपाधित्वनिश्चयरूपत्वात्, प्रकृते साध्यव्यापकत्वसंशयात् इति चेत् – न ।

शरीरजन्यत्वे निश्चितोपाधित्वस्य असंभवेऽपि सन्दिग्धोपाधित्वं भवितुम् अर्हति । साध्यव्यापकत्वसाधनाव्यापकत्वयोः अन्यतरस्य संशये सन्दिग्धोपाधिः नाम दोषः । प्रकृते च उक्तरीत्या साध्यव्यापकत्वस्य संशयात् सन्दिग्धोपाधित्वं दुर्वारम् इति भावः ।

ननु सन्दिग्धोपाधित्वं कथं दूषकं भवति? उपाधित्वसन्देहात् उपाधिसन्देहः । उपाधिसन्देहाच्च व्यभिचारसन्देहः । यत्र यत्र उपाधिः, तत्र व्यभिचारः इति व्याप्तेः, व्याप्यस्य उपाधेः सन्देहेन व्यापकस्य व्यभिचारस्य संशयः आवश्यकः । तथा च व्यभिचारसंशयरूपं व्यभिचारज्ञानं हेतौ साध्यव्याप्तिज्ञानं प्रतिबध्नाति इति रीत्या सन्दिग्धोपाधेः दूषकत्वं वक्तव्यम् । तच्च न संभवति । उपाधिसन्देहः पक्षे साध्यसंदेहाधीनः यः तत्प्रयुक्तः हि व्यभिचारसन्देहः पक्षान्तर्भावेणैव वक्तव्यः । सपक्षे घटादौ साध्यनिश्चयेन साध्यसन्देहासंभवात् । पक्षान्तर्भावेण व्यभिचारसन्देहश्च न व्याप्तिज्ञानप्रतिबन्धकः । अनुमितेः पूर्वं सर्वत्रैव पक्षे साध्यसन्देहसंभवेन तत्र हेतोः निश्चयात् अनुमानमात्रोच्छेदापत्तेः । तस्मात् साध्याभावांशे निश्चयात्मकम्,

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

साध्याभाववद्वृत्तित्वांशे संशयनिश्चयसाधारणं व्यभिचारज्ञानमेव प्रतिबन्धकम् इति अङ्गीकरणीयम् । प्रकृते च पक्षे साध्यसन्देहेन साध्याभावांशे निश्चयरूपव्यभिचारज्ञानस्य अभावात् कथं सन्दिग्धोपाधिः दूषणम् इति शङ्कते – **न च उपाधिसन्देहाहित** इति । पक्षतत्समयोः साध्यसन्देहाधीनव्यभिचारसंशयस्यापि व्याप्तिज्ञानप्रतिबन्धकत्वात् । अन्यथा अनुकूलतर्कविरहदशायां पक्षेतरत्वं सन्दिग्धोपाधिः इत्यभिधानं **ग्रन्थकृतां** न सङ्गच्छते । पक्षांशे साध्यसन्देहसत्त्वेन साध्याभावांशे निश्चयात्मकस्य, वृत्तित्वांशे संशयनिश्चयसाधारणस्य व्यभिचारज्ञानस्य तत्र असत्त्वात् व्यभिचारज्ञानोत्पादनद्वारा सन्दिग्धोपाधेः दूषकत्वासंभवात् । न च – एवम् अनुमानमात्रोच्छादापत्तिः इति – वाच्यम् । सद्धेतौ अनुकूलतर्कसत्त्वेन व्यभिचारसन्देहस्य असंभवात्।

तन्न इत्यादि । ''जन्यं कृतिजन्यम्, कार्यत्वात्'' इत्यनुमाने व्यभिचारसंशयनिवर्तकस्य कार्यत्वेन कृतित्वेन कार्यकारणभावरूपस्य अनुकूलतर्कस्य सत्त्वेन कार्यत्वरूपहेतौ कृतिजन्यत्वरूपसाध्यव्याप्यत्वनिश्चयात् साध्यव्याप्य – कार्यत्वरूप हेत्वव्यापकत्वं शरीरजन्यत्वरूपोपाधौ निश्चीयते । तेन च साध्याव्यापकत्वं उपाधौ निश्चीयते । शरीरजन्यत्वं कृतिजन्यत्वाव्यापकं, कृतिजन्यत्वव्याप्यकार्यत्वाव्यापकत्वात्, यत् यद्व्याप्याव्यापकं तत् तदव्यापकम् । यथा सत्ताव्याप्यद्रव्यत्वाव्यापकं पृथिवीत्वं सत्ता-अव्यापकं, तद्वत् इति । तथा च साध्याव्यापकत्वनिश्चयात् साध्यव्यापकत्वसंशयरूपः सन्दिग्धोपाधिः वक्तुं न शक्यते इति भावः ॥

दिनकरी

एवं च उक्तानुमानेन ईश्वरसिद्धौ तदुच्चरितत्वेन वेदस्य प्रामाण्यनिश्चयात् वेदोऽपि ईश्वरे प्रामाणम् इत्याह – **द्यावाभूमी जनयन्** इति । **इत्यादय** इति । आदिना ''ईश्वरम् उपासीत'', ''यः सर्वज्ञः सर्ववित् यस्य ज्ञानमयं तपः'', ''सोऽकामयत'' इत्यादीनां परिग्रहः । **कार्यानुमानं च उपलक्षणम्** ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

सर्गाद्यकालीनद्व्यणुकप्रयोजकं कर्म प्रयत्नजन्यं, कर्मत्वात्; गुरुत्ववतां पतनाभावः पतनप्रतिबन्धकप्रयत्नप्रयुक्तः धृतित्वात् पक्षिपतनाभाववत्; **ब्रह्माण्डनाशः** प्रयत्नजन्यः नाशत्वात्, घटनाशवत्; **घटादिव्यवहारः स्वतन्त्रपुरुषप्रयोज्यः व्यवहारत्वात्, आधुनिककल्पितलिप्यादिवत्; वेदजन्यप्रमा** वक्तृयथार्थवाक्यार्थज्ञानजन्या, शाब्दप्रमात्वात्, चैत्रवाक्यजन्यप्रमावत्; **वेदः** असंसारिपुरुषप्रणीतः वेदत्वात्; **वेदः पौरुषेयः** वाक्यत्वात्, यन्नैवं तन्नैवं, यथा काव्यम् इति व्यतिरेकदृष्टान्तः भारतवत्; **द्व्यणुकपरिमाणजनिका** संख्या अपेक्षाबुद्धिजन्या, एकत्वान्यसंख्यात्वात् इति अनुमानान्तराण्यपि साक्षात् परंपरया वा ईश्वरसाधकानि बोध्यानि इति ।

तदुक्तम् –

कार्यायोजनधृत्यादेः पदात् प्रत्ययतः श्रुतेः ।
वाक्यात् संख्याविशेषाच्च साध्यो विश्वजिदव्ययः ॥

आयोजनं कर्म । पद्यते गम्यते अनेन इति पदं व्यवहारः इति संक्षेपः ॥

राजीवोल्लासः

"कार्यायोजनधृत्यादेः पदात् प्रत्ययतः श्रुतेः ।
वाक्यात् संख्याविशेषाच्च साध्यो विश्वजिदव्ययः ॥

इति **कुसुमाञ्जलिमनुसृत्य** आह – **कार्यानुमानं च उपलक्षणम्** इति । कार्यपक्षकम् अनुमानं कार्यानुमानम् । तच्च मुक्तावल्यां प्रदर्शितमेव । अन्यानि **कुसुमाञ्जलिसंमतानि** ईश्वरसाधकानि अनुमानानि क्रमशः प्रदर्शयति – **सर्गाद्यकालीन** इत्या-दिना । "आयोजनम्" इत्यस्य "कर्म" इत्यर्थः । तदपि सर्गाद्यकालीनद्व्यणुकप्रेरकं कर्मविवक्षितम् ।"परमाणूनां परस्परसंयोगहेतुभूतं कर्म जीवादृष्टजन्यम् इति, अग्नेः ऊर्ध्वज्वलनम्, वायोः तिर्यग्गमनम्, अणुमनसोश्च आद्यं कर्म इति अदृष्टकारितानि" इति **कणादेन** उक्तम् । "द्व्यणुकानां परस्परसंयोगहेतुभूतं द्व्यणुकनिष्ठं कर्म

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्रयत्नजन्यम्, कर्मत्वात्, रथादिकर्मवत्'' इत्यनुमानेन प्रयत्नजन्यत्वे साध्ये अस्मदादिप्रयत्नजन्यत्वस्य बाधात् ईश्वरप्रयत्नजन्यत्वमेव वक्तव्यम् इति ईश्वरसिद्धिः इति भावः ।

धृतिः नाम गुरुत्ववतां वस्तूनां पतनाभावः, तत्पक्षकानुमानं यथा –''गुरुत्ववतां पतनाभावः पतनप्रतिबन्धकप्रयत्नप्रयुक्तः, पतनाभावत्वात्, पक्षिपतनाभाववत्'' । यथा आकाशे सञ्चरतां पक्षिणां पतनाभावः तदीयप्रयत्नप्रयुक्तः, तथा गुरुत्ववतां भूरादिलोकानां पतनाभावः पतनप्रतिबन्धकप्रयत्नप्रयुक्तः इति साध्यते । अस्मदादिप्रयत्नप्रयुक्तत्वबाधात् ईश्वरप्रयत्नप्रयुक्तत्वमेव वक्तव्यम् इति ईश्वरसिद्धिः ।

''धृत्यादेः'' इत्यत्र ''आदि'' पदेन ब्रह्माण्डनाशः गृह्यते इति आशयेन आह – **ब्रह्माण्डनाश** इति । ''ब्रह्माण्डनाशः प्रयत्नजन्यः, नाशत्वात्, घटनाशवत्'' । यथा घटनाशः नाशकपुरुषप्रयत्नजन्यः, तथा ब्रह्माण्डनाशोऽपि प्रयत्नजन्यः इति साधिते अस्मदादिप्रयत्नबाधात् ईश्वरप्रयत्नमादाय साध्यपर्यवसानम् इति भावः।

पद्यते गम्यते अनेन इति पदं व्यवहारः इत्याशयेन व्यवहारपक्षकम् अनुमानम् आह **''घटादिव्यवहारः स्वतन्त्रपुरुषप्रयोज्यः, व्यवहारत्वात्, आधुनिककल्पित-लिप्यादिवत्''** इति । यथा आधुनिककल्पितडित्थडवित्थादिव्यवहारः तदनुगुण-लिप्यादिश्च स्वतन्त्रेण पुरुषेण कल्पितः, तथा घटादिव्यवहारोऽपि स्वतन्त्रपुरुषेण ईश्वरेण कल्पितः इति ।

प्रत्ययशब्देन वेदजन्यप्रमा विविक्षिता इत्याशयेन तत्पक्षकम् अनुमानम् आह – **वेदजन्यप्रमा** इति । ''वेदजन्यप्रमा वक्तृयथार्थवाक्यार्थज्ञानजन्या, शाब्दप्रमात्वात्'' । यत्र यत्र शब्दजन्यप्रमात्वम्, तत्र वक्तृगतवाक्यार्थविषय-कयथार्थज्ञानजन्यत्वं वर्तते, यथा चैत्रप्रयुक्तात् ''नद्यास्तीरे पञ्च फलानि सन्ति'' इत्यादिवाक्यात् जायमानायां प्रमायाम् । तद्वत् वेदवाक्यजन्यायां प्रमायामपि वक्ता यः ईश्वरः तद्गतयथार्थज्ञानजन्यत्वम् अस्ति इति ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

श्रुतिपक्षकम् अनुमानम् आह – **वेद इति** । ''वेदः असंसारिपुरुषप्रणीतः, वेदत्वात्'' । ''वेदः पौरुषेयः वाक्यत्वात्, यन्नैवं तन्नैवम्, यथा कालिदासादिवाक्यम्'' इति । वाक्यपक्षकम् अनुमानम् आह – **वेदः पौरुषेयः** इति । अत्र वाक्यत्वेन वेदः पक्षः । यद्यद्वाक्यं तत्सर्वं पौरुषेयम्, यथा भारतम् ।

संख्यापक्षकम् अनुमानं आह – **द्व्यणुक** इति । ''द्व्यणुकपरिमाणजनिका संख्या अपेक्षाबुद्धिजन्या, एकत्वान्यसंख्यात्वात्'' । एकत्वभिन्नाः द्वित्वादिरूपाः संख्याः अपेक्षाबुद्धिजन्याः इति वैशेषिकमतम् । एवं द्व्यणुकपरिमाणं प्रति न परमाणुपरिमाणं कारणम् । परिमाणस्य स्वसमानजातीयोत्कृष्टपरिमाणजनकत्वनियमात्, अणुजन्यस्य अणुतरत्वप्रसङ्गात् । किन्तु परमाणुगतद्वित्वसंख्या द्व्यणुकपरिमाणस्य कारणम् इति वक्तव्यम् । सा च द्वित्वसंख्या अस्मदीयापेक्षाबुद्धिजन्या न भवति इति ईश्वरी-यापेक्षाबुद्धिजन्यत्वं वक्तव्यम् इति ईश्वरसिद्धिः । **एकत्वान्यसंख्यात्वात्** इति । एकत्वान्यत्वे सति संख्यात्वात् इत्यर्थः । एकत्वे व्यभिचारवारणाय विशेषणदलम् । घटे व्यभिचारवारणाय विशेष्यदलम् ।।

इति ईश्वरवादः ।।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

।। पदार्थविभागः ।।

कारिकावली

द्रव्यं गुणस्तथा कर्म सामान्यं सविशेषकम् ।
समवायस्तथाभावः पदार्थाः सप्त कीर्तिताः ।। २ ।।

मुक्तावली

पदार्थान् विभजते – **द्रव्यं गुण** इति । अत्र **सप्तमस्य अभावत्वकथनादेव षण्णां भावत्वं प्राप्तम्; तेन पृथगुपन्यासः न कृतः । एते च पदार्थाः** वैशेषिकप्रसिद्धाः, नैयायिकानामपि अविरुद्धाः । **प्रतिपादितं च एवमेव भाष्ये । अत एव चिन्तामणौ** सप्तपदार्थभिन्नतया शक्तिसादृश्ययोः अतिरिक्तपदार्थत्वम् आशङ्कितम् ।।

दिनकरी

मूले शिष्यावधानाय **प्रतिजानीते – द्रव्यं गुण** इति । निरूप्यन्ते इति शेषः । **संयोगापेक्षया** कर्मणः अतिरिक्तत्वं नास्ति इति **भूषणकारमतं** निराकर्तुं ''तथा'' इति उक्तम् । यथा गुणः पृथक् पदार्थः, तथा कर्मापि इत्यर्थः । अभावः अधिकरणात्मकः एव इति **प्राभाकरमतं** दूषयितुं पुनः ''तथा'' इति उक्तम् । युक्तिश्च अग्रे वक्ष्यते ।

यद्यपि विभागवाक्यस्य न्यूनाधिकसंख्याव्यवच्छेदकतयैव सप्तत्वसंख्या लब्धा, तथापि सप्तग्रहणं [1]स्पष्टार्थम् ।

ननु अन्ये पदार्थाः कुतो न उक्ताः इति, अत आह – **कीर्तिता** इति । तथा च एतेभ्यः अन्ये पदार्थाः न सन्त्येव, **कणादप्रभृतिभिः** अनुक्तत्वात् इति भावः ।

1. स्पष्टार्थम् इति। ''सप्तघटान् आनय'' इत्यादौ न्यूनाधिकसंख्याव्यवच्छेदबोधस्य अनुभवसिद्धत्वात् इति भावः (सु).

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

ननु इतरेषु ग्रन्थेषु षड् भावपदार्थाः, सप्तमस्तु अभावः इति निरूपितम्, तथैव अत्र कुतः न निरूपितम् इति आशङ्क्य आह **मुक्तावल्यां सप्तमस्य** इति । **अत्र समवाय**-एकार्थसमवायान्यतरसंबन्धेन सत्तावत्त्वं भावत्वम्, तदभावः अभावत्वम् इति । **प्राप्तम्-अर्थात् प्राप्तम्** । **तेन**-प्राप्तत्वेन । **पृथगुपन्यास** इति । भावत्वेन उपन्यास इत्यर्थः । ''तेषाम्'' इति शेषः ।।

ननु अन्ये पदार्थाः कथं न सन्ति? न्यायशास्त्रे षोढशपदार्थनिरूपणात् इति आशङ्क्य नैयायिकानामपि मते सप्तपदार्थाः इति अविरुद्धम्, षोढशपदार्थानां सप्तपदार्थेषु अन्तर्भूतत्वात् इत्याह – **एते च** इति । उक्तार्थे भाष्यसंमतिम् आह – **प्रतिपादितं च** इति । **एवमेव** इति । द्रव्य-गुण-कर्म-सामान्य-विशेष-समवायाभावाः सप्तैव पदार्थाः, षोडशानाम् अत्रैव अन्तर्भावात् [1]इति **प्रतिपादितम्** इत्यर्थः । कथम् अन्तर्भावः इति चेत्, इत्थम् –

प्रमाणस्य (इन्द्रियादेः) इन्द्रियस्य द्रव्ये, व्याप्तिज्ञानादेः गुणे, प्रमेयस्य-आत्मशरीरेन्द्रियस्वरूपस्य द्रव्ये, अर्थस्य – गन्धरसरूपस्पर्शशब्दस्वरूपस्य गुणे, बुद्धेः गुणे, मनसः द्रव्ये, प्रवृत्तेः गुणे, दोषाणाम् – इच्छा-द्वेष-मिथ्याज्ञान-स्वरूपाणां रागद्वेष-मोहपदप्रतिपाद्यानां गुणे, प्रेत्य-मृत्वा भावः जननम् इति व्युत्पत्त्या मरणोत्तरजन्मत्वं प्रेत्यभावपदप्रवृत्तिनिमित्तम्; चरमप्राणशरीरसंयोगध्वंसः मरणम्, आद्यशरीरप्राणसंयोगः जन्म; तथा च मरणानन्तरं तादृशसंयोगरूपस्य तस्य गुणे; सुखदुःखसंवेदनस्वरूपस्य मुख्यफलस्य गुणे, गौणमुख्यसाधारण-जन्यमात्रस्वरूपफलस्यापि द्रव्यादिषु,पीडालक्षणस्य दुःखस्य गुणे अन्तर्भावः ।।

राजीवोल्लासः

मूले इति । कारिकायाम् इत्यर्थः । **प्रतिजानीते** इति ।

1. इति प्रतिपादितम् इति। मुद्रितप्रशस्तपादभाष्ये इदम् एतदर्थकं वा वाक्यं नोपलभ्यत इति भाष्यपदेन तदन्यत् किमपि वेदितव्यम् (सु).

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

भविष्यत्कालकर्तव्यत्वप्रकारकज्ञानजनकः शब्दः प्रतिज्ञा । **संयोगापेक्षया** इति । उत्तरोत्तरदेशसंयोग एव कर्म, न तु तदतिरिक्तम् इति **भूषणकारमतम्**; तन्निरासाय "**तथा कर्म**" इति उक्तम् । यथा गुणः पृथक् पदार्थः, तथा कर्म अपि पृथक् पदार्थः इति "**तथा**" शब्देन सूच्यते। कारिकायां **सविशेषकम्** इति । "सोपकरणं गृहं क्रीतम्" इत्यादौ यथा विशेषणे उपकरणेऽपि क्रीतत्वं लभ्यते, तद्वत् बाधाभावात् विशेषणभूते विशेषेऽपि पदार्थत्वलाभः ।।

ननु मुक्तावल्यां "सप्तमस्य अभावत्वकथनादेव षण्णां भावत्वं प्राप्तम्" इति उक्तं कथं सङ्गच्छते । भावत्त्वं हि सत्तावत्त्वम् । द्रव्यगुणकर्मणां त्रयाणां सत्तावत्त्वेऽपि सामान्यादीनां त्रयाणां सत्तावत्त्वविरहात् इति आशङ्क्य आह व्याख्यायाम् – **अत्र समवाय** इति । तथा च समवाय-एकार्थसमवाय-अन्यतरसंबन्धेन सत्तावत्त्वं भावत्वम् । द्रव्यादिषु त्रिषु समवायसंबन्धेन सत्ता अस्ति । सामान्यादिषु त्रिषु एकार्थसमवायसंबन्धेन सत्ता अस्ति । सत्तायाः सामान्यादित्रयस्य च द्रव्ये समवायात् । एवं च षण्णामपि भावत्त्वोक्तिः सङ्गता इति भावः । एकार्थसमवायः नाम एकस्मिन् अर्थे द्वयोः समवायः । स्वसमवायिसमवाय इति यावत् । स्वं-सत्ता । स्वसवायि-द्रव्यम् । तत्समवायः सामान्यादिषु इति स्वसमवायिसमवायसंबन्धेन सामान्यादीनां सत्तावत्त्वम् ।।

यद्यपि समवायस्य सत्तासमवायिद्रव्यसमवायविरहात् कथं सत्तावत्त्वम्, समवायस्य स्वरूपसंबन्धेन द्रव्यवृत्तेः इति शङ्का जायते; तथापि समवायविषये स्वसमवायिसमवायस्य न समवायत्वेन संसर्गत्वम्, अपि तु स्वरूपत्वेन इति न अनुपपत्तिः ।।

अर्थात् प्राप्तम् इति । अनुमानात् प्राप्तम् इत्यर्थः । अनुमानं च "द्रव्यादयः भावाः, अभावत्वव्यधिकरणधर्मवत्त्वात्" इति । **उक्तार्थे** इति । सप्तपदार्थे षोडशपदार्थान्तर्भावे इत्यर्थः ।।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

''प्रमाणस्य इन्द्रियस्य'' इति पाठः साधुः । ''इन्द्रियादेः'' इति पाठः प्रामादिकः, आदिपदग्राह्याभावात् । व्याप्तिज्ञानादेः इत्यत्र व्याप्तिज्ञानपदेन अनुमानम्, ''आदि''पदेन सादृश्यज्ञानरूपम् उपमानं पदज्ञानरूपं शब्दप्रमाणं च विवक्षितम् ।।

चरम इति । चरमः अन्तिमः यः प्राणशरीरसंयोगः तस्य ध्वंसः मरणम् । प्राणशरीरसंयोगे चरमत्वं च स्वाश्रयसजातीयशरीरवृत्तिप्राणसंयोगप्रागभावानधिकरणशरीरवृत्तित्वम् । एवम् आद्यशरीरप्राणसंयोगः जन्म । प्राणशरीरसंयोगे आद्यत्वं च स्वाश्रसजातीयशरीरवृत्तिप्राणसंयोगध्वंसानधिकरणवृत्तित्वम् । सुखदुःखसंवेदनम्-सुखदुःखानुभवः ।।

दिनकरी

अपवर्गस्तु आत्यन्तिकी दुःखनिवृत्तिः । दुःखानि – शरीरम्, षडिन्द्रियाणि, षट् विषयाः, षड्बुद्धयः सुखं दुःखं च इति एकविंशतिः । तत्र दुःखत्वजातिशून्ये शरीरादौ दुःखसंबन्धितया **गौणं दुःखत्वम्**, स्वर्गादिसुखस्यापि तन्नाशज्ञानेन दुःखसंबन्धित्वम् अव्याहतमेव । न च – एकविंशतिदुःखान्तर्गतयोः मनः श्रवणयोः नित्यत्वात् कथं तन्नाशः इति – वाच्यम् । यद्रूपविशिष्टस्य श्रवणस्य ज्ञानद्वारा दुःखहेतुतया दुःखत्वम्, तद्रूपस्य कर्णशुष्कुल्या नाशे तद्विशिष्टश्रवणेन्द्रियरूपदुःखनाशात् । एवम् आत्मसंयोगरूपव्यापारविशिष्टस्यैव मनसः ज्ञानद्वारा दुःखहेतुतया दुःखत्वम्, व्यापारनाशेन तद्विशिष्टमनोरूपदुःखनाशसंभवात् इति ।।

दुःखनिवृत्तौ आत्यन्तिकत्वं च स्वसमानाधिकरणदुःखासमानकालीनत्वम्।

ननु एतादृशदुःखध्वंसस्य मुक्तित्वे कथं तत्त्वज्ञानसाध्यता तस्य इति चेत्, इत्थम् – तत्त्वज्ञानेन **मिथ्याज्ञानजन्यवासनानाशः**, वासनानाशे च दोषस्य वासनाविशिष्टरागादेः अभावः – विशेषणाभावे विशिष्टाभावात्; तादृशरागादिरूपहेत्वभावे च **प्रवृत्तेः** धर्माधर्मरूपायाः अभावः – अनुत्पत्तिः; तदनुत्पादे **प्रारब्धकर्माधीनदेहान्यदेहसंबन्धरूपजन्माभावः; भोगतत्त्वज्ञानाभ्यां प्रारब्धतद्भिन्नकर्मनिवृत्तिः**

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

इति । जन्माभावे दुःखानुत्पादः । तथा च स्वसमानाधिकरणदुःखासमानकालीनत्व-रूपविशेषणांशे तत्त्वज्ञानस्य प्रयोजकत्वात् मुक्तेः तत्त्वज्ञानसाध्यत्वम् । तथा च सूत्रम् – ''दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानाम् उत्तरोत्तरापाये तदनन्तरापायात् अपवर्गः'' इति ।।

अस्य अर्थः – पठितेषु जन्मादिषु मध्ये उत्तरोत्तराणाम् अपाये तदनन्तराभावात् – अव्यवहितपूर्वाभावात् । तथा च तत्त्वज्ञानेन मिथ्याज्ञानस्य नाशः; तेन प्रवृत्तेः अनुत्पादः; तेन दोषाणां नाशः; तेन जन्मानुत्पादः; तेन दुःखानुत्पादः; तेन दोषाणां नाशः; तेन जन्मानुत्पादः; तेन दुःखानुत्पादः इति, इति पूर्वोक्त एव अर्थः पर्यवसितः । **एकविंशतिदुःखनाशस्तु स्वकारणसाध्यः**, न तत्र तत्त्वज्ञानस्य प्रयोजकता – इति वदन्ति।

नव्यास्तु – योग्यविभुविशेषगुणनाशं प्रति स्वोत्तरवर्तिगुणानां कारणत्वात् स्वोत्तरोत्पन्नगुणेनैव दुःखध्वंसरूपमुक्तिसंभवेन न तत्र तत्त्वज्ञानापेक्षा इति दुःखपदं दुःखसाधनदुरितपरतया व्याख्येयम्, दुरितस्य च योग्यगुणत्वाभावात् न स्वोत्तरवृत्तिगुण-नाश्यता इति तन्नाशरूपमुक्तेः तत्त्वज्ञानसाध्यत्वमेव इति – आहुः ।

तथा च **एतादृशापवर्गस्य अभावे**, संशयस्य गुणे, **साध्यतया** इच्छाविषयरूपप्रयोजनस्य यथायथं द्रव्यादिषु । **साध्यसाधनो**भयवत्तानिश्चयविषयस्य दृष्टान्तस्य यथायथं द्रव्यादिषु । तत्तच्छास्त्रसिद्धार्थरूपस्य सिद्धान्तस्य द्रव्यादिषु । शब्दस्वरूपप्रतिज्ञाद्यन्यतमरूपाणाम् अवयवानां गुणे । व्याप्यारोपेण व्यापकारोपस्य तर्कस्य गुणे । निर्णयस्य गुणे । तत्त्वबुभुत्सोः कथारूपवादस्य गुणे । विजिगीषु-कथारूपजल्पस्य गुणे । स्वपक्षस्थापनाहीनकथारूपवितण्डायाः गुणे । अनुमिति-तत्कारण-ज्ञानान्यतर-प्रतिबन्धकज्ञानविषयरूपाणां हेत्वभासानां यथायथं द्रव्यादिषु । अभिप्रायान्तरेण प्रयुक्तशब्दस्य अर्थान्तरं परिकल्प्य दूषणाभिधानरूपस्य छलस्य गुणे । असदुत्तररूपजातेः गुणे । पराजयहेतुस्वरूपनिग्रहस्थानानां यथायथं द्रव्यादिषु

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अन्तर्भावः । निग्रहस्थानानि – प्रतिज्ञाहानिः, प्रतिज्ञान्तरम्, प्रतिरोधः, प्रतिज्ञासंन्यासः, हेत्वन्तरम्, अर्थान्तरम्, निरर्थकम्, अविज्ञातार्थकम्, अपार्थकम्, अप्राप्तकालम्, न्यूनम्, अधिकम्, पुनरुक्तम्, अननुभाषणम्, अज्ञानम्, अप्रतिभा, विक्षेपः, मतानुज्ञा, पर्यनुयोज्योपेक्षणम्, निरनुयोज्यानुयोगः, अपसिद्धान्तः, हेत्वाभासाश्च । अत्र ''च''कारः अनुक्तसमुच्चयार्थः । तेन दृष्टान्ते साधनवैकल्यादीनां परिग्रहः । तत्र विशिष्य प्रतिज्ञातस्य पक्षादेः परित्यागरूपप्रतिज्ञाहानेः अभावे, परोक्तदोषोद्दिधीर्षया पूर्वानुक्तविशेषणविशिष्टतया प्रतिज्ञातार्थकथनरूपस्य प्रतिज्ञान्तरस्य गुणे । स्वोक्तसाध्यादिविरुद्धहेत्वादिकथनरूपप्रतिज्ञाविरोधस्य गुणे । स्वोक्तसाध्यादेः परेण दूषणे कृते तत्साध्यापलापरूपस्य प्रतिज्ञासंन्यासस्य अभावे । परोक्तदूषणोद्दीधीर्षया पूर्वोक्तहेतुतावच्छेदकातिरिक्तहेतुतावच्छेदकविशिष्टहेतुकथनरूपस्य हेत्वन्तरस्य गुणे । प्रकृतानाकाङ्क्षिताभिधानरूपार्थान्तरस्य गुणे । अवाचकपदप्रयोगरूपनिरर्थकस्य गुणे । अवाचकवाक्यप्रयोगरूपाविज्ञातार्थस्य गुणे । परिषत्प्रतिवादिबोधानुकूलोपस्थित्यजनकवाचकवाक्ययोगरूपाविज्ञातार्थस्य गुणे । अभिमतवाक्यार्थबोधानुकूलाकाङ्क्षाशून्यपदप्रयोगरूपस्य अपार्थकस्य गुणे । समयनिबन्धनविषयीभूतकथाक्रमविपरीतक्रमेण अभिधानरूपस्य अप्राप्तकालस्य गुणे । यत्किंचिदवयवशून्यावयवाभिधानरूपस्य न्यूनस्य गुणे । अधिकहेत्वाद्यभिधानरूपस्य अधिकस्य गुणे । पुनरभिधानरूपस्य पुनरुक्तस्य गुणे । परिषदा त्रिभिः अभिहितस्यापि अप्रत्युच्चारणरूपस्य अननुभाषणस्य अभावे । परिषदा विज्ञातार्थस्य वादिना त्रिः अभिहितस्यापि अविज्ञानरूपस्य अज्ञानस्य अभावे । उत्तरार्हं परोक्तं बुद्ध्वापि उत्तरस्य अप्रतिपत्तिरूपायाः अप्रतिभायाः अभावे । असंभवत्कालान्तरकार्यव्यासङ्गम् उद्भाव्य कथाविच्छेदरूपस्य विक्षेपस्य अभावे । स्वपक्षे दोषमनुद्धृत्य परपक्षे दोषाभिधानरूपमतानुज्ञाया गुणे । निग्रहस्थानं प्राप्तवतः निग्रहस्थानानुद्भावनरूपस्य पर्यनुयोज्योपेक्षणस्य अभावे । निग्रस्थानानवसरे तन्निग्रहस्थानाभिधानरूपस्य निरनुयोज्यानुयोगस्य गुणे । कथायां स्वीकृतसिद्धान्तप्रच्यवन-

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

रूपस्य अपसिद्धान्तस्य अभावे । हेत्वाभासानां पूर्वोक्तलक्षणानां यथायथं द्रव्यादिषु अन्तर्भाव इति । **भाष्यस्य आर्षत्वम् आशङ्क्य मणिकृतां संमतिम्** आह – **अत एव इति** ।।

राजीवोल्लासः

गौणं दुःखत्वम् इति । दुःखपदप्रतिपाद्यत्वं लाक्षणिकम् इत्यर्थः । दुःखसंबन्धित्वं च दुःखजनकत्वम् । स्वर्गादिसुखस्य दुःखसंबन्धित्वं दुःखसामानाधिकरण्यरूपम् । **दुःखनिवृत्तौ आत्यन्तिकत्वं च** इति । स्वसमानाधिकरणदुःखासमानकालीना दुःखनिवृत्तिः अपवर्गः । संसारदशायां या दुःखनिवृत्तिः सा स्वसमानाधिकरणदुःखान्तरसमानकालीना भवति । स्वं – दुःखनिवृत्तिः । तदधिकरणं – संसारी जीवः । तद्वृत्ति यत् दुःखं तत्समानकालीना पूर्वतनदुःखनिवृत्तिः । अपवर्गरूपा या दुःखनिवृत्तिः सा तु स्वसमानाधिकरणदुःखसमानकालीना न भवति । तदात्मनि दुःखाभावात् ।।

ननु मुक्तात्मनिष्ठायाः कथं स्वसमानाधिकरणदुःखासमानकालीनत्वम् । स्वाधिकरणवृत्तिदुःखस्य अप्रसिद्धेः इति चेत्, न । स्वाधिकरणवृत्तिदुःखसमानकालीना या दुःखनिवृत्तिः तद्भिन्ना दुःखनिवृत्तिः अपवर्गः इत्याशयात् । स्वपदेन संसारिजीववृत्तिदुःखनिवृत्तिः गृह्यते । सा स्वाधिकरणजीववृत्तिदुःखसमानकालीना भवति । तद्भिन्नत्वं मुक्तात्मनिष्ठायां दुःखनिवृत्तौ इति न कोऽपि दोषः ।।

ननु एतादृशदुःखध्वंसस्य इति । आत्यन्तिकदुःखध्वंसस्य मोक्षत्वे तस्य केन प्रकारेण पदार्थतत्त्वज्ञानजन्यत्वम् इति शङ्कायां सः प्रकारः उच्यते । पदार्थतत्त्वज्ञानेन अनात्मनि आत्मभ्रमादिरूपमिथ्याज्ञानजन्यसंस्कारस्य नाशः । संस्कारनाशे च संस्कारमूलकस्य रागादिदोषस्य अभावः । रागादिरूपहेत्वभावे च धर्माधर्मरूपप्रवृत्तेः अभावः – अनुत्पत्तिः । प्रवृत्तेः अनुत्पत्तौ च देहान्तरसंबन्धरूपजन्माभावः । जन्माभावे च दुःखानुत्पत्तिः । दुःखानुत्पत्तौ च दुःखनिवृत्तौ

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

स्वसमानाधिकरणदुःखासमानकालीनत्वरूपविशेषणसंबन्धः भवति । तथा च स्वसमानाधिकरणदुःखासमानकालीनत्वविशिष्टदुःखनिवृत्तिरूपः अपवर्गः संपद्यते । तथा च दुःखासमानकालीनत्वरूपविशेषणांशे तत्त्वज्ञानस्य उक्तपरंपरया हेतुत्वात् विशिष्टमोक्षस्य तत्त्वज्ञानजन्यत्वम् ।

अत्रायं क्रमः – अनात्मनि देहे आत्मबुद्ध्यादिरूपमिथ्याज्ञानात् यः संस्कारः तद्वशात् रागद्वेषादयः दोषाः भवन्ति । दोषवशाच्च धर्माधर्मरूपा प्रवृत्तिः । तद्वशाच्च शरीरान्तर-संबन्धरूपं जन्म । ततः दुःखम् । पदार्थतत्त्वज्ञानेन मिथ्याज्ञाने नष्टे तज्जन्यवासनायाश्च नाशे वासनाविशिष्टरागादिरूपस्य प्रवृत्तिहेतोः अभावः । रागाद्यभावाच्च प्रवृत्त्यभावः । तदभावात् जन्माभावः । तदभावाच्च दुःखानुत्पत्तिः इति । दुःखानुत्पत्त्या च स्वसमानाधिकरण-दुःखासमानकालीनः दुःखध्वंसो भवति ।

मिथ्याज्ञानजन्यवासनानाश इति । मिथ्याज्ञानजन्यस्य संस्कारस्य नाश इत्यर्थः । प्रमायाः भ्रमजन्यसंस्कारनाशकत्वस्य अनुभवसिद्धत्वात् इति भावः ।

प्रारब्धकर्म इति । प्रारब्धकर्मजन्यादृष्टजन्यः यः देहः तदन्यदेहसंबन्धरूपं यत् जन्म तदभाव इत्यर्थः ।

ननु तत्त्वज्ञानेन प्रारब्धकर्मजन्यादृष्टस्यापि नाशात् तत्त्वज्ञानाव्यवहितोत्तरं मोक्षप्रसङ्ग इति आशङ्क्य आह – **भोगतत्त्वज्ञानाभ्याम्** इति । भोगेन प्रारब्धकर्म-जन्यादृष्टस्य निवृत्तिः । तत्त्वज्ञानेन तद्भिन्नकर्मजन्यादृष्टस्य निवृत्तिः । तथा च प्रारब्धस्य भोगेनैव क्षपयितव्यत्वात् न तत्त्वज्ञानाव्यवहितोत्तरं मुक्त्यापत्तिः इत्यर्थः ।

ननु पूर्वोक्तरीत्या दुःखानुत्पादस्यैव तत्त्वज्ञानसाध्यत्वात् एकविंशतिदुःखध्वंसस्य कथं तत्त्वज्ञानसाध्यत्वम् इति आशङ्क्य आह – **एकविंशतिदुःखनाशस्तु** इति । **स्वकारणसाध्य** इति । एकविंशतिदुःखानां पूर्वं परिगणितानां यत् कारणं तन्नाशात् एकविंशतिदुःखनाशः इत्यर्थः । **''वदन्ति''** इति अस्वरसोद्भावनम् । तद्बीजं तु – विशेष्याप्रयोजकस्यापि विशेषणांशे प्रयोजकताम् आदाय विशिष्टप्रयोजकत्वोपगमे

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

''धूमः वन्हिप्रयोजकः'' इतिवत् ''वन्हिमत्पर्वतप्रयोजकः'' इति व्यवहारापत्तिः एव ।

नव्यास्तु इति । ''योग्यविभुविशेषगुणानां स्वोत्तरवृत्तिगुणनाश्यत्वम्'' इति नियमात् दुःखरूपस्य प्रत्यक्षयोग्यस्य आत्मविशेषगुणस्य स्वोत्तरोत्पन्नगुणेनैव नाशः संभवति इति तत्र तत्त्वज्ञानापेक्षा नास्ति इति दुःखध्वंसः न तत्त्वज्ञानप्रयोज्यः । अतः दुःखपदं दुःखसाधनभूतदुरितपरम् । तथा च दुःखसाधनदुरितध्वंसः मोक्षः । सः तत्त्वज्ञानसाध्यः । दुरितस्य अधर्मरूपस्य प्रत्यक्षयोग्यत्वाभावेन योग्यगुणनाशस्यैव स्वोत्तरवर्तिगुणजन्यत्वनियमात् इति भावः । **एतादृशापवर्गस्य** इति । एकविंशतिदुःखध्वंसरूपस्य अपवर्गस्य इत्यर्थः । **अभावे** इति । अन्तर्भावः इत्यत्र अन्वयः । **साध्यतया** इति । प्रकारत्वं तृतीयार्थः । साध्यत्वप्रकारकेच्छाविषयस्य इत्यर्थः । **साध्यसाधन** इति । साध्यसाधनोभयप्रकारकनिश्चयविषयस्य इत्यर्थः । **प्रतिज्ञातार्थ** इति । प्रतिज्ञातार्थः साध्यम् । **भाष्यस्य आर्षत्वम् आशङ्क्य** इति । भाष्यस्य महर्षिप्रणीतत्वेन महर्षेः अनुपपन्नार्थकथनेऽपि ''तेषां तेजोविशेषेण प्रत्यवायो न विद्यते'' इति वचनात् न दोषः । अतः **भाष्यकारवचनं** न प्रमाणम् इत्याशयेन **मणिकृतां संमतिम्** आह इत्यर्थः ।

।। शक्तिसादृश्यपरीक्षा ।।

मुक्तावली

ननु कथम् एते एव पदार्थाः? [1]शक्तिसादृश्ययोः अपि अतिरिक्तपदार्थत्वात् । तथा हि – मण्यादिसमवहितेन वन्हिना दाहः न जन्यते, तच्छून्येन तु जन्यते ।

1. ''शक्तिसादृश्ययोः अपि'' इत्यत्र ''अपि'' शब्दः दृष्टान्तार्थः। यथा द्रव्यादिकं गुणादितोऽतिरिक्तं तथा इत्यर्थः (सु).

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

तत्र मण्यादिना वन्हौ दाहानुकूला शक्तिः नाश्यते, उत्तेजकेन **मण्याद्यपसारणेन** च जन्यते इति **कल्प्यते** ।

एवं सादृश्यम् अपि अतिरिक्तः पदार्थः । तद्धि न षट्सु भावेषु अन्तर्भवति, सामान्येऽपि सत्त्वात्; यथा गोत्वं नित्यं तथा अश्वत्वम् अपि नित्यम् इति सादृश्यप्रतीतेः । नापि अभावे, सत्त्वेन **प्रतीयमानत्वात्** इति चेत् –

दिनकरी

मण्यादिसमवधाने सति वन्हिना दाहोत्पत्तिवारणाय मण्यादेः कारणविघटकत्वरूपा प्रतिबन्धकता वाच्या । सा च वन्हिनिष्ठदाहानुकूलशक्तिरूपकारणविघटकतयैव निर्वहति । मण्यादिप्रतिबन्धकत्वान्यथानुपपत्त्या सिद्धायाः शक्तेः षड्भावेषु अनन्तर्भूतत्वात् **अतिरिक्तत्वम्** इति **"पदार्थाः सप्त कीर्तिताः"** इति मूलम् अयुक्तम् इत्यभिप्रायेण प्राभाकरः शङ्कते – **ननु** इति । **अतिरिक्त** इति । सप्तपदार्थातिरिक्तेत्यर्थः ।

अतिरिक्तपदार्थतामेव व्यवस्थापयति – **तथा हि** इत्यादिना । **"मण्यादि"** इति "आदि"ना मन्त्रौषध्यादिपरिग्रहः । **समवहितेन** – समीपवर्तिना ।

ननु वन्हिरूपकारणाभावादेव न दाहः इति न मण्यादेः प्रतिबन्धकत्वम्, अतः **समवहितेन वन्हिना** इति । दाहः – रूपान्तरोत्पत्तिः **पूर्वरूपपरावृत्तिः** वा । **मण्याद्यतिरिक्तस्य** प्रतिबन्धकत्वं खण्डयति – **तच्छून्येन** इति । मणिसमवधानशून्येन इत्यर्थः ।

ननु वन्हौ यदि दाहानुकूला शक्तिः तदा मण्यादिसत्त्वे कुतो न दाहः इति चेत्, तत्राह – **तत्र** इति । **पूर्वोक्तयुक्त्या** शक्तिसिद्धौ इत्यर्थः । **दाहानुकूला** इति । **अत्र च अनुकूलत्वं** कारणकारणतावच्छेदकसाधारणम्, तेन शक्तेः **कारणतावच्छेदकत्वेऽपि** न क्षतिः । **"नाश्यते"** इत्यस्य **"कल्प्यते"** इत्यनेन

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अन्वयः । **तथा च** वन्हिनिष्ठशक्तित्वावच्छिन्नं प्रति मणित्वेन नाशकत्वस्वीकारेण मण्यादिसत्त्वदशायां शक्तेः अभावादेव न दाहः इति भावः ।

ननु मण्यादेः यदि शक्तिनाशकत्वं, तदा सति उत्तेजकविशिष्टे मण्यादौ अपसारिते वा दाहानापत्तिः इति, अत आह – **उत्तेजकेन** इति । **"मण्याद्यपसारणेन च"** इत्यत्र **"च"कारः "वा"कारार्थे । न च - दाहं प्रति** मण्यभावत्वेन हेतुत्वकल्पनात् न मणिसमवधानकाले दाहापत्तिः इति – वाच्यम् । **मण्यभावत्वेन रूपेण स्वतन्त्रहेतुताकल्पने** गौरवात् । विलक्षणशक्तिमत्त्वेन वन्हेः कारणत्वकल्पनस्यैव उचितत्वात् इति अभिमानात् ।

ननु एवं शक्तिसिद्धावपि तस्याः अतिरिक्तत्वासिद्धिः इति चेत्, न । उक्तपदार्थेषु अनन्तर्भूतत्वात् । तथाहि – न तावत् द्रव्यात्मिका शक्तिः, गुणादिवृत्तित्वात् । अत एव न गुणात्मिका कर्मात्मिका वा । न च सामान्यद्यन्यतमरूपा, **उत्पत्तिमत्त्वे सति विनाशित्वात्** इति ।

एवम् अतिरिक्तां शक्तिं प्रसाध्य सादृश्यस्यापि अतिरिक्तपदार्थतां व्यवस्थापयति – **एवम्** इत्यादिना । **अतिरिक्त** इति । क्लृप्तपदार्थातिरिक्तः इत्यर्थः । षड्भावानन्तर्भूतत्वे सति अभावानन्तर्भूतत्वात् इति हेतुः पूरणीयः । **तत्र सत्यन्तासिद्धिं** निरस्यति – **तद्धि** इति । तत् –सादृश्यम्, हि - हेतौ । **सामान्येऽपि** इति । **सामान्येतरवृत्तित्वे सति सामान्यवृत्तित्वात्** इत्यर्थः । तेन सामान्यत्वे न व्यभिचारः । **व्यतिरेकित्वे सति** इति विशेषणात् न प्रमेयत्वादौ व्यभिचारः । **भावत्वे च** द्रव्यादिषट्कान्यतमत्वरूपे हेतुमति साध्यस्य सत्त्वात् न व्यभिचार इति । **यथा** इति । यदि सादृश्यम् द्रव्यादौ अन्तर्भूतं, तदा द्रव्यादेः सामान्यावृत्तित्वेन "यथा गोत्वं नित्यं तथा अश्वत्वम्" इति अबाधितप्रतीतिः न स्यात् इत्यर्थः । अभावे अन्तर्भावम् आशङ्क्य निराचष्टे – **नापि** इति । यद्यपि अतिरिक्ताभावम् अनङ्गीकुर्वतः प्राभाकरस्य मते अभावे अन्तर्भावचिन्ता न संभवति, तथापि

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

परमतम् अभ्युपेत्य इदं निराकृतम् इति भावः । **सत्त्वेन** – भावत्वेन । **प्रतीयमानत्वात्** – **प्रमीयमाणत्वात्** इति ।।

राजीवोल्लासः

मण्यादिसमवधाने सति इत्यादिना । वन्हिः दाहस्य कारणम् । परन्तु वन्हिः यदा चन्द्रकान्तमणिसहितः भवति, तदा दाहो न जायते । कुतः न जायते इति शङ्कायां चन्द्रकान्तमणिः दाहस्य प्रतिबन्धकः, अतः न जायते इति वक्तव्यम् । मणेः प्रतिबन्धकत्वं च वन्हिनिष्ठा या दाहानुकुला शक्तिः तन्नाशकत्वमेव । वन्हौ दाहानुकूलशक्तेः अभावे तन्नाशकत्वरूपं प्रतिबन्धकत्वं मणेः नोपपद्यते इति वन्हौ दाहानुकूला शक्तिः अङ्गीकरणीया । सा च शक्तिः षट्सु भावेषु न अन्तर्भवति इति अतिरिक्तपदार्थतया स्वीकरणीया । अतः ''पदार्थाः सप्त कीर्तिताः'' इति मूलम् अयुक्तम् इत्यभिप्रायेण प्राभाकरमतानुयायी शङ्कते – **अतिरिक्तत्वम्** इति । सप्तपदार्थातिरिक्तत्वम् इत्यर्थः । न च तस्याः अभावे अन्तर्भावसंभवात् कथं सप्तपदार्थातिरिक्तत्वम्? नञुल्लिखितप्रत्ययाविषयत्वेन सप्रतियोगिकत्वविरहेण च तस्याः अभावे अनन्तर्भावात् । **पूर्वरूपपरावृत्तिः** इति । पूर्वरूपनाशः इत्यर्थः।

ननु मूले **''तच्छून्येन तु जन्यते''** इति उक्तिः व्यर्था । तस्याः प्रतिबन्धकत्वासाधकत्वात् । अतः तस्याः मण्यतिरिक्तप्रतिबन्धकताखण्डकत्वेन सार्थकतां व्यवस्थापयति – **मण्याद्यतिरिक्तस्य** इति । वस्तुतस्तु **मुक्तावलीग्रन्थः** मणेः प्रतिबन्धकत्वसाधक एव । यत्सत्त्वे कार्यानुत्पादः, यदसत्त्वे च कार्योत्पादः तदेव प्रतिबन्धकम् इति अन्वयव्यतिरेकप्रमाणकं प्रतिबन्धकत्वम् । तत्र **''मण्यादिसमवहितेन वन्हिना''** इति ग्रन्थेन मणिसत्त्वे कार्यानुत्पादरूपः अन्वयः उक्तः । **''तच्छून्येन तु जन्यते''** इति ग्रन्थेन मण्यसत्त्वे कार्योत्पत्तिरूपः व्यतिरेकः उक्तः । एतावता मणेः प्रतिबन्धकत्वे सिद्धे तस्य कार्यानुकूलशक्तिविघटकत्वं प्रदर्श्यते **''वन्हौ दाहानुकूला शक्तिः नाश्यते''** इति ग्रन्थेन इति प्रतिभाति ।

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

पूर्वोक्तयुक्त्या इति । "**मण्यादिसमवधाने सति**" इत्यादिना **दिनकर्यां पूर्वमुक्तया** युक्त्या इत्यर्थः।

ननु "दाहानुकूला शक्तिः" इत्यत्र दाहकारणत्वात् शक्तेः दाहानुकूलत्वं वक्तव्यम् । तत्तु गौरवावहम् । वह्नेः तन्निष्ठशक्तेश्च उभयोरपि दाहं प्रति कारणत्व-कल्पनापेक्षया शक्तिविशिष्टवह्नेरेव कारणत्वौचित्यात् । तथा च शक्तेः कारणत्वाभावात् कथं दाहानुकूलत्वम् इति, अत आह – **अत्र च अनुकूलत्वम्** इति । अनुकूलत्वं कारणकारणतावच्छेदकसाधारणं प्रयोजकत्वम् । वह्नेः कारणत्वरूपम् अनुकूलत्वम्, शक्तेः कारणतावच्छेदकरूपम् अनुकूलत्वम् इति भावः ।

कारणतावच्छेदकत्वेऽपि इति । वह्नित्वेन वह्नेः, शक्तित्वेन वह्निनिष्ठशक्तित्वेन वा शक्तेश्च दाहं प्रति कारणत्वे गौरवात् शक्तिविशिष्टवह्नित्वेन एकविधकारणत्वस्य औचित्यात् शक्तेः कारणत्वाभावेन कारणत्वरूपम् अनुकूलत्वं शक्तेः नास्ति इति शङ्कायाः न अवकाशः । अनुकूलत्वस्य कारणकारणतावच्छेदकोभयसाधारणत्वात्, शक्तौ कारणतावच्छेदकत्वरूपानुकूलत्वसत्त्वात् इति भावः । **तथा च** इति । वह्निनिष्ठशक्तिनाशं प्रति मणेः कारणतया मणिसत्त्वदशायां वह्निनिष्ठशक्तेः नाशात् शक्तिविशिष्टवह्निरूपकारणाभावात् न दाह इति भावः ।

ननु मण्यादेः इति । मण्यादेः. वह्निनिष्ठशक्तिनाशं प्रति हेतुत्वे उत्तेजकविशिष्टमणिसत्त्वदशायां दाहो न स्यात् । शक्तिविशिष्टवह्नेः अभावात् । एवं मणौ अपसारिते दाहः न स्यात्; मणिना वह्निनिष्ठशक्तेः नाशात्, अपसारितेऽपि मणौ शक्तिविशिष्टवह्नेः अभावात् इति आशङ्कायाम् "**उत्तेजकेन मण्याद्यपसारणेन च जन्यते**" इति मूले उक्तम् । तथा च मणिना शक्तिनाशेऽपि उत्तेजकेन मण्यपसारणेन च पुनः वह्नौ दाहानुकूलशक्त्यन्तरस्य उत्पत्त्या शक्तिविशिष्टवह्निरूप-कारणसत्त्वेन दाहस्य उपपत्तिः इति भावः।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

ननु उत्तेजकमण्यपसारणयोः एकसत्त्वेऽपि दाहोत्पत्त्या एकेनैव तदनुगुणशक्तिः वह्नौ जायते इति वक्तुं शक्यतया समुच्चितयोः तयोः कारणत्वासंभवात् ''च''कारः अनुपपन्नः इति आशङ्क्य आह – **''च''कारः ''वा''कारार्थे** इति ।

न च दाहं प्रति इति । मणिसमवधानकाले दाहापत्तिवारणाय दाहं प्रति मण्यभावः पृथक् कारणम् इति कल्प्यते । मणिसमवधानकाले मण्यभावरूप-कारणाभावादेव न दाहापत्तिः । तथा च मणिसमवधानकाले वह्निनिष्ठशक्तेः नाशः, तदपसारणे पुनः शक्त्युत्पत्तिः इति अनन्तशक्तितन्नाशादिकल्पने गौरवम् इत्याशङ्क्य । समाधत्ते – **मण्यभावत्वेन** इति । दाहं प्रति वह्नित्वेन वह्नेः, मण्यभावत्वेन मण्यभावस्य च पृथक्कारणत्वकल्पने अनेककार्यकारणभावकल्पनाप्रयुक्तं गौरवं भवति । विलक्षणशक्तिमत्त्वेन वह्नेः कारणत्वे एक एव कार्यकारणभावः इति पूर्वपक्षिणः अभिमानः । अनन्तशक्तितत्प्रागभावध्वंसानां कल्पनाम् अपेक्ष्य मण्यभावस्य स्वातन्त्र्येण कारणत्वकल्पनमेव उचितम् । कल्प्यस्य मण्यभावकारणत्वस्य एकत्वात् इत्याशयेन **''अभिमानात्''** इत्युक्तम् ।

ननु एवम् इति । पूर्वोक्तरीत्या मण्यादेः प्रतिबन्धकत्वान्यथानुपपत्त्या शक्तिरूपपदार्थसिद्धौ अपि शक्तेः अतिरिक्तपदार्थत्वं न सिद्ध्यति इति चेत्, न । शक्तिः अतिरिक्तपदार्थः, क्लृप्तपदार्थानन्तर्भूतत्वात् । तथा हि – शक्तिः न द्रव्यम्, गुणवृत्तित्वात् । यद् द्रव्यं तत् गुणवृत्ति न भवति । शक्तिस्तु गुणेऽपि वर्तते । अवयवरूपस्य अवयविरूपं प्रति कारणतया तत्र शक्तेः आवश्यकत्वात् । गुणवृत्तित्वादेव शक्तिः न गुणः न वा कर्म । एवं शक्तिः न सामान्यविशेष-समवायाभावान्यतमरूपा । उत्पत्तिमत्त्वे सति विनाशित्वात् । विनाशित्वमात्रोक्तौ प्रागभावे व्यभिचारः । अतः उत्पत्तिमत्त्वे सति इति । तावन्मात्रोक्तौ ध्वंसे व्यभिचारः । अतः विनाशित्वात् इति ।

तत्र सत्यन्तासिद्धिम् इति । ''सादृश्यं क्लृप्तसप्तपदार्थातिरिक्तम्,

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

षड्भावानन्तर्भूतत्वे सति अभावानन्तर्भूतत्वात्'' इत्यनुमाने यः हेतुः तद्घटकस्य सत्यन्तस्य पक्षे सादृश्ये असिद्धिं वारयति इत्यर्थः । तथा च ''सादृश्यं षड्भावानन्तर्भूतम्, सामान्येतरवृत्तित्वे सति सामान्यवृत्तित्वात्'' इत्यनुमानेन षड्भावानन्तर्भूतत्वस्य सिद्ध्या पूर्वोक्तानुमाने न सत्यन्तासिद्धिः । सामान्यवृत्तित्वमात्रोक्तौ सामान्यत्वे व्यभिचारः । तद्वारणाय **सामान्येतरवृत्तित्वे सति** इति । सामान्येतरवृत्तित्वमात्रोक्तौ द्रव्यत्वादौ व्यभिचारः । तद्वारणाय **सामान्यवृत्तित्वेति** । एवमपि प्रमेयत्वे सामान्येतरवृत्तित्वे सति सामान्यवृत्तित्वरूप-हेतुसत्त्वात् षड्भावानन्तर्भूतत्वरूपसाध्याभावाच्च व्यभिचारः । अतः आह – **व्यतिरेकित्वे सति** इति । तथा च ''व्यतिरेकित्वे सति'' इत्यपि हेतौ विशेषणं योजनीयम् । व्यतिरेकित्वं च अत्यन्ताभावप्रतियोगित्वम् । तच्च प्रमेयत्वे नास्ति । तस्य केवलान्वयित्वेन अत्यन्ताभावाप्रतियोगित्वात् इति भावः ।

ननु एवमपि भावत्वे व्यभिचारः । तस्य सामान्येतरद्रव्यादिवृत्तित्वात् सामान्यवृत्तित्वात् अभावनिष्ठात्यन्ताभावप्रतियोगितया व्यतिरेकित्वाच्च । समवायस्वसमवायिसमवेतत्वान्यतरसंबन्धेन सत्तावत्त्वरूपे भावत्वे सामान्यान्तर्गतत्वेन षड्भावानन्तर्भूतत्वरूपसाध्याभावाच्च भावत्वे व्यभिचारः इति आशङ्क्य आह – **भावत्वे च** इति । तथा च भावत्वं न उक्तान्यतरसंबन्धेन सत्तावत्त्वरूपम्, किन्तु द्रव्यादिषट्कान्यतमत्वरूपम् । अन्यतमत्वं च तद्भिन्नभिन्नत्वरूपः अन्योन्याभावः । स च षड्भावानन्तर्भूतः इति अन्योन्याभावरूपे भावत्वे साध्यस्यापि सत्त्वात् न व्यभिचारः इति भावः ।

ननु ''सादृश्यं न अभावान्तर्भूतम्, सत्त्वेन प्रतीयमानत्वात्'' इति मूले ''सत्त्वेन'' इत्यस्य भावत्वेन इत्यर्थाङ्गीकारेऽपि भावत्वप्रकारकप्रतीतिविषयत्वं हेतुरिति लभ्यते । अयं च हेतुः अभावेऽपि अक्षतः । भ्रान्तपुरुषस्य अभावविशेष्यकः यः भावत्वप्रकारकः भ्रमः तदात्मकप्रतीतिविषयत्वस्य अभावे सत्त्वात् । तत्र च

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अभावानन्तर्भूतत्वरूपसाध्याभावात् व्यभिचारः इति आशङ्क्य आह – **प्रमीयमाणत्वात्** इति । तथा च "**प्रतीयमानत्वात्**" इति मूलस्य **प्रमीयमाणत्वात्** – प्रमाविषयत्वात् इत्यर्थः । "सत्त्वेन" इति तृतीयायाः प्रकारत्वम् अर्थः । तस्याः निरूपितत्वसंबन्धेन विशेष्यतायां वा निरूपकतासंबन्धेन प्रमायां वा अन्वयः । भावत्वप्रकारकप्रमाविशेष्यत्वं हेतुः इति पर्यवसितम् । अभावे भ्रान्तपुरुषनिष्ठभावत्वप्रकारकभ्रमविशेष्यत्वसत्त्वेऽपि तत्प्रकारकप्रमाविशेष्यत्वविरहात् न व्यभिचारः इत्याशयः ।।

मुक्तावली

न । **मण्याद्यभावविशिष्टवह्न्यादेः** दाहादिकं प्रति स्वातन्त्र्येण **मण्यभावादेरेव** वा हेतुत्वं कल्प्यते । **अनेनैव सामञ्जस्ये** अनन्तशक्ति-तत्प्रागभाव-ध्वंसकल्पनानौचित्यात् । न च – उत्तेजकत्वे सति प्रतिबन्धकसद्भावेऽपि कथं दाहः इति – वाच्यम् । **उत्तेजकाभावविशिष्ट**-मण्याद्यभावस्य हेतुत्वात् ।।

दिनकरी

मणिसमवधानकालीनवह्निना दाहापत्तिवारणाय **प्राभाकरेण** साधितां शक्तिं दूषयति – **मण्याद्यभाव** इति । **अतिरिक्तशक्तिकल्पनां** पूर्वोक्तनाश्यनाशकभावकल्पनां च अपेक्ष्य लाघवात् दाहत्वावच्छिन्नं प्रति मण्यभावविशिष्टवह्नित्वादिनैव हेतुताकल्पनम् उचितम् इति भावः । **दाहादिकम्** इति । "आदि"पदेन वह्नेः संग्रहः । मणिसत्त्वे वह्नेरपि अनुत्पत्तेः । तथा च मणिरूपप्रतिबन्धकसद्भावात् न दाहवह्नी इति भावः ।

ननु यदा कदाचित् मण्यभावविशिष्टात् वह्नेः दाहापत्तिः कारणतावच्छेदकावलीढ-कारणसत्त्वस्यैव कार्योत्पत्तिनियामकत्वात्, मण्यभावविशिष्टवह्नित्वं वह्निविशिष्टमण्यभाववत्त्वं वा कारणतावच्छेदकम् इत्यत्र विशेषणविशेष्यभावे विनिगमनाविरहेण गुरुभूतकार्यकारणभावद्वयापत्तिश्च इति, अत आह – **मण्यभावादेः**

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

इति । **तथा च** प्रतिबन्धकत्वं न कार्यानुकूलधर्मविघटकत्वम्, बाधज्ञानस्य अनुमितिप्रतिबन्धकत्वाभावापत्तेः । किन्तु कारणीभूताभावप्रतियोगित्वम्, तच्च मण्यभावस्य हेतुत्वे एव उपपद्यते, **न तु अतिरिक्तशक्तिसत्त्वे** इति भावः ।

ननु प्रतिबन्धकस्य ईदृशत्वे कारणीभूतवह्निरूपाभावप्रतियोगिनि वह्न्यभावे अतिव्याप्तिः, स्वप्रागभावप्रतियोगिनि घटादौ च इति चेत्, न । तादात्म्यातिरिक्तसंबन्धावच्छिन्ना या कारणता तदाश्रयीभूतः यः भावभिन्नः अत्यन्ताभावः तत्प्रतियोगित्वस्य विवक्षितत्वात् । कारणताविशेषोपादानाच्च स्वात्यन्ताभावप्रत्यक्षे स्वस्य प्रतिबन्धकत्वापत्तिः परास्ता । विषयस्य तादात्म्यसंबन्धेनैव प्रत्यक्षे हेतुत्वात् ।

ननु वह्निमण्यभावयोः द्वयोः हेतुत्वापेक्षया अतिरिक्तशक्तेः एकस्या एव हेतुता युक्ता, लाघवात् इति, अत आह – **अनेनैव** इति । दाहादिकं प्रति मण्यभावादेः हेतुत्वकल्पनेनैव इत्यर्थः । **सामञ्जस्ये** – मणिसमवधानदशायां दाहवारणे । प्रागभावे मानाभावात् आह – **ध्वंस** इति । **इदम् उपलक्षणम्** – प्रतियोगिध्वंसयोः शक्तिनाशमण्योः शक्तिमण्यपसारणयोश्च कार्यकारणभावकल्पनापि स्यात् इत्यपि बोध्यम् । **उत्तेजकाभाव** इति । **तथा च केवलं** मणिः न प्रतिबन्धकः, किन्तु उत्तेजकाभावविशिष्टः, तदभावश्च उत्तेजकसमवधानकालेऽपि तिष्ठति इति **न व्यभिचार** इति भावः ।

अथ मण्यादिस्थलीयदाहं प्रति उत्तेजकस्यैव हेतुता अस्तु इति चेत्, न । तस्य अननुगतत्वात्, तदभावकूटविशिष्टमण्यभावस्य च अनुगतत्वात् ।

अत्र इदं बोध्यम् – अभावीयविशेषणतासंबन्धेन दाहत्वावच्छिन्नं प्रति उद्देश्यतादैशिकविशेषणतान्यतरसंबन्धावच्छिन्नप्रतियोगिताकानां तत्तदुत्तेजकाभावानां सामानाधिकरण्यरूपं यद्वैशिष्ट्यं तदवच्छिन्नस्य मण्यादेः दैशिकविशेषणता – उद्देश्यतान्यतरसंबन्धावच्छिन्नप्रतियोगिताकाभावस्य अभावीयविशेषणतासंबन्धेन

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

हेतुत्वम् इति । एतेन – संयोगसंबन्धावच्छिन्नप्रतियोगिताकमण्यभावस्य तत्संयुक्तेऽपि सत्त्वात् दाहापत्तिः इति – परास्तम् ।

ननु अनुमानमेव शक्तौ प्रमाणम् । तथा हि – ''वह्निः दाहानुकूलाद्विष्ठातीन्द्रियधर्मसमवायी, दाहजनकत्वात्, अदृष्टवदात्मवत्'' इति । वह्निद्व्यणुकत्वम् आदाय भर्जनकपालस्थवह्निनिष्ठानुद्भूतरूपम् आदाय वा सिद्धसाधनवारणाय साध्ये ''दाहानुकूल'' इति । वह्निद्व्यणुकेन्धनसंयोगम् आदाय अदृष्टवदात्मसंयोगम् आदाय वा तद्वारणाय ''अद्विष्ठ'' इति । वह्निनिष्ठोष्णस्पर्शम् आदाय तद्वारणाय ''अतीन्द्रिय'' इति, चेत्, न – **विपक्षे** बाधकतर्कविरहेण अस्य अनुमानस्य अप्रयोजकत्वात् ।

केचित्तु – वह्निं प्रति तृणफूत्कारसंयोगादीनां तृणफूत्कारसंयोगत्वादिरूपेण कारणताया व्यभिचारेण असंभवात् अतिरिक्तशक्तिसिद्धिः । **न च** – **तृणफूत्कारसंयोग**-अरणिनिर्मथनसंयोग-मणितरणिकिरणसंयोगानां संबन्धस्य जन्यतावच्छेदकं वह्निवृत्तिवैजात्यत्रयं कल्प्यम् इति न व्यभिचार इति – वाच्यम् । तज्जन्यतावच्छेदकवैजात्यत्रयकल्पनाम् अपेक्ष्य तत्तत्संबन्धानाम् एकशक्तिमत्त्वेन कारणत्वकल्पनाया एव लघुत्वेन न्याय्यत्वात् इति आहुः । तन्न –

तत्तत्संबन्धसाधारण्येन एकजातेरेव अभ्युपगमात् । न च – योग्यवृत्तिजातेः योग्यत्वापत्तिः इति – वाच्यम् । दोषविशेषेण शक्तेः इव अयोग्यत्वकल्पनात् । न च नोदनत्वादिना संकरः । तस्य अदोषत्वात्, अन्यतमत्वेन कारणतासंभवाच्च ।

न च – अन्यतमत्वघटकभेदानां मिथः विशेषणविशेष्यभावे विनिगमनाविरहेण कारणतावच्छेदकभेदात् कारणताबाहुल्यम् इति – वाच्यम् । कारणतावच्छेदकानां भेदानां समनियतानाम् ऐक्येन कारणतैक्यसंभवात् ।

न च – भेदानां स्वरूपतोऽवच्छेदकत्वासंभवेन तृणफूत्कारसंयोगभेदविशिष्ट-अरणिनिर्मन्थनसंबन्धभेदविशिष्ट-मणिकिरणसंबन्ध**भेदावच्छिन्नप्रतियोगिता-कभेदत्वादिना** अवच्छेदकत्वं वक्तव्यम् । तथा च अवच्छेदकतावच्छेदकभेदात्

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अवच्छेदकताभेदः, तद्भेदेन च कारणताभेदः इति – वाच्यम् । स्वरूपसंबन्धरूपायाः **अतिरिक्ताया वा** कारणतायाः अवच्छेदकभेदेऽपि अभेदात् इति अन्यत्र विस्तरः।

परे तु – तृणादिसंबन्धकालीनवायुसंयोगादीनाम् एकशक्तिमत्त्वेन हेतुताम् आदाय विनिगमनाविरहात् न शक्तिसिद्धिः इति **आहुः** ।।

राजीवोल्लासः

अतिरिक्तशक्तिकल्पनाम् इति । शक्तिरूपातिरिक्तपदार्थकल्पनं तादृश-शक्तिनाशं प्रति मण्यादेः हेतुत्वकल्पनं च अपेक्ष्य मण्यभावविशिष्टवह्नित्वेन रूपेण दाहत्वावच्छिन्नं प्रति एकहेतुत्वकल्पनमेव लाघवात् उचितम् । मणिसमवधानकाले मण्यभावविशिष्टवह्निरूपं कारणं नास्ति इति न दाहोत्पत्तिः इति भावः ।

ननु यदा कदाचित् इति । मण्यभावविशिष्टवह्नेः दाहं प्रति कारणत्वे मणिसत्त्वदशायाम् अपि पूर्वकालावच्छेदेन यः मण्यभावः तत्समानाधिकरणत्वरूप-मण्यभाव वैशिष्ट्यस्य वह्नौ सत्त्वेन मण्यभावविशिष्टवह्निरूपकारणसत्त्वात् दाहापत्तिः । न च – पूर्वकालावच्छेदेन यः मण्यभावः तत्सामानाधिकरण्योपलक्षितवह्निरेव मणिसत्त्वकाले भवितुम् अर्हति, न तु मण्यभावसामानाधिकरण्यविशिष्टवह्निः । अतः विशिष्टवह्निरूपकारणाभावात् कथं दाहापत्तिः इति – वाच्यम् । मण्यभाव-सामानाधिकरण्योपलक्षितवह्निसत्त्वस्यैव दाहोत्पत्तिप्रयोजकत्वात् । यतः कारणतावच्छेदकोपलक्षित कारणसत्त्वमेव कार्योत्पत्तिप्रयोजकम् इति नियमः, न तु कारणतावच्छेदकविशिष्टकारणसत्त्वं कार्योत्पत्तिप्रयोजकम् । अन्यथा विषयितासं-बन्धेन विशेषणविशिष्टज्ञानरूपस्य विशेषणज्ञानस्य विशिष्टबुद्धिं प्रति हेतुत्वे अतीतानागतविशेषणविषयकज्ञानजन्ये विशिष्टज्ञाने विशेषणविशिष्टज्ञानरूप-कारणविरहात् व्यतिरेकव्यभिचारापत्तेः। कारणतावच्छेदकोपलक्षितकारणसत्त्वस्य कार्योत्पत्तिप्रयोजकत्वे तु अतीतानागतविशेषणोपलक्षितज्ञानस्य विशिष्टबुद्धेः पूर्वं सत्त्वेन न व्यतिरेकव्यभिचार इति ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

न च – विषयितासंबन्धेन न विशेषणस्य कारणतावच्छेदकत्वम् । किन्तु विशेषणनिरूपितविषयितैव कारणतावच्छेदिका । विशेषणस्य इदानीम् अभावेऽपि ज्ञानकाले तन्निरूपिता विषयिता वर्तते इति विशेषणविषयकत्वविशिष्टस्य ज्ञानस्य विशिष्टबुद्ध्युत्पत्तिहेतुतया कारणतावच्छेदकविशिष्टस्य कार्योत्पत्तिप्रयोजकत्वेऽपि क्षत्यभावात् न यदा कदाचित् मण्यभावविशिष्टाद्वह्नेः दाहापत्तिः इतिः – वाच्यम् । एवमपि मण्यभावविशिष्टवह्नित्वेन कारणत्वं वा वह्निविशिष्टमण्यभावत्वेन कारणत्वं वा इत्यत्र विशेषणविशेष्यभावे विनिगमनाविरहेण उभयथापि कारणत्वं वक्तव्यम् इति गुरुभूतकार्यकारणभावद्वयापत्तिः । तदपेक्षया शक्तिकल्पनमेव उचितम् इति आशङ्क्य मूले "**मण्यभावादेरेव वा हेतुत्वम्**" इति उक्तम् । एवं च वह्नित्वेन मण्यभावत्वेन च दाहं प्रति कारणताद्वयमेव कल्प्यते । शक्तिकल्पनं तु पूर्वोक्तरीत्या गुरुभूतम् इति भावः ।

ननु एवं मणेः प्रतिबन्धकत्वानुपपत्तिः । कार्यानुकूलधर्मविघटकत्वस्यैव प्रतिबन्धकत्वरूपत्वात् । शक्तिं विना तस्य दुर्घटत्वात् इति, अत आह – **तथा च** इति । प्रतिबन्धकत्वं न कार्यानुकूलधर्मविघटकत्वम् । बाधज्ञानस्य अनुमितिप्रतिबन्धकत्वानुपपत्तेः । तथा हि – यत्र परामर्शानन्तरं लौकिकप्रत्यक्षरूपः बाधनिश्चयः, तत्र बाधनिश्चयोत्पत्तिद्वितीयक्षणे परामर्शनिष्ठायाः अनुमित्यनुकूलशक्तेः नाशः वक्तव्यः । तथा च बाधोत्पत्तितृतीयक्षणे बाधेन अनुमितिप्रतिबन्धो वाच्यः । स च न संभवति । तत्पूर्वक्षणे परामर्शरूपकारणाभावादेव अनुमित्यनुत्पादरूप-प्रतिबन्धसंभवात् । किञ्च बाधनिश्चयद्वितीयक्षणे अनुमित्यापत्तिः । बाधोत्पत्तिक्षणे शक्तिविशिष्टपरामर्शसत्त्वात् । अतः न कार्यानुकूलधर्मविघटकत्वं प्रतिबन्धकत्वम् । किन्तु कारणीभूताभावप्रतियोगित्वमेव । ईदृशं च प्रतिबन्धकत्वं मण्यभावस्य कारणत्वे सत्येव मणौ संभवति । अतः मण्यभावस्य हेतुत्वम् आवश्यकम् ।

न तु अतिरिक्तशक्तिसत्त्वे इति । अतिरिक्तशक्तिस्वीकारे मण्यभावस्य

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

कारणत्वे युक्तिविरहात् कारणीभूताभावप्रतियोगित्वरूपस्य प्रतिबन्धकत्वस्य मणौ असंभवात् इति भावः ।

ननु प्रतिबन्धकत्वस्य कारणीभूताभावप्रतियोगित्वरूपत्वे दाहस्य कारणीभूतः यः वह्निरूपः अभावः वह्न्यभावाभावः तत्प्रतियोगित्वस्य वह्न्यभावे सत्त्वेन वह्न्यभावस्य दाहप्रतिबन्धकत्वापत्तिः । न च इष्टापत्तिः । कारणाभावे प्रतिबन्धकत्वव्यवहाराभावात् । कारणसत्त्वे कार्यानुत्पत्तिप्रयोजकस्यैव प्रतिबन्धकत्वेन व्यवह्रियमाणत्वात् । किञ्च घटं प्रति घटप्रागभावस्य कारणतया कारणीभूतस्वप्रागभावप्रतियोगिनि घटे घटस्य प्रतिबन्धकत्वापत्तिः । स्वस्य स्वोत्पत्तौ प्रतिबन्धकतायाः अनङ्गीकारेण इष्टापत्त्यसंभवात् इति चेत् –

न । तादात्म्यातिरिक्तसंबन्धावच्छिन्ना या कारणता तदाश्रयीभूतः यः भावभिन्नः अत्यन्ताभावः तत्प्रतियोगित्वं प्रतिबन्धकत्वम् इति विवक्षितत्वात् दाहकारणीभूतः यः वह्न्यभावाभावः तस्य वह्निस्वरूपतया भावभिन्नत्वविरहात् तत्प्रतियोगित्वम् आदाय वह्न्यभावे न प्रतिबन्धकत्वापत्तिः । कारणतायां तादात्म्यातिरिक्तसंबन्धावच्छिन्नत्वानिवेशे स्वात्यन्ताभावप्रत्यक्षे स्वस्य प्रतिबन्धकत्वापत्तिः । तथा हि – प्रत्यक्षे विषयस्य हेतुतया स्वनिष्ठविषयतासंबन्धेन प्रत्यक्षं प्रति तादात्म्येन स्वं कारणम् इति कारणकार्यभावः । स्वं-घटः, तन्निष्ठविषयतासंबन्धेन घटप्रत्यक्षं घटे जायते । तत्र तादात्म्यसंबन्धेन घटः वर्तते इति घटतत्प्रत्यक्षयोः कार्यकारणभावः । एवमेव घटात्यन्ताभावनिष्ठविषयतासंबन्धेन घटात्यन्ताभावप्रत्यक्षं प्रति घटात्यन्ताभावस्य तादात्म्यसंबन्धेन हेतुतया कारणताश्रयः यः भावभिन्नः अत्यन्ताभावः घटात्यन्ताभावः, तत्प्रतियोगित्वस्य घटे सत्त्वात् घटात्यन्ताभावप्रत्यक्षं प्रति घटस्य प्रतिबन्धकत्वापत्तिः । सा च कारणतायां तादात्म्यातिरिक्तसंबन्धावच्छिन्नत्वनिवेशात् वारणीया । घटात्यन्ताभावनिष्ठा तत्प्रत्यक्षकारणता तादात्म्यसंबन्धावच्छिन्ना इति तादात्म्यातिरिक्तसंबन्धाव-

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

च्छिन्नकारणताश्रयः घटात्यन्ताभावः न भवति इति न तम् आदाय घटस्य प्रतिबन्धकत्वापत्तिः । घटप्रागभावप्रतियोगित्वम् आदाय घटे स्वप्रतिबन्धकत्वापत्तिस्तु अत्यन्ताभावनिवेशात् वारिता भवति ।

इदम् उपलक्षणम् इत्यादि । अतिरिक्तशक्तिस्वीकारे असंख्याः शक्तयः कल्पनीयाः । वह्नौ दाहानुकूलाः शक्तयः, मणिमन्त्रौषधादिषु शक्तिनाशकतावच्छेदिकाः शक्तयः तासां प्रागभावाः ध्वंसाश्च कल्पनीयाः इति महद्गौरवं यत् मूले उपन्यस्तं तत् उपलक्षणम् । शक्तिनाशं प्रति शक्तेः हेतुत्वं कल्पनीयम् । ध्वंसं प्रति प्रतियोगिनः कारणत्वात् । एवं मणिसत्त्वे वह्निनिष्ठायाः शक्तेः नाशात् शक्तिनाशं प्रति मणिः कारणम् इति कल्पनीयम् । एवं मणेः अपसारणे सति वह्नौ पुनः शक्तेः उत्पत्त्या शक्तिं प्रति मण्यपसारणं कारणम् इति कल्पनीयम् इति अनन्तकार्यकारणभावकल्पनाप्रयुक्तगौरवमपि स्यात् ।

तथा च केवलम् इति । दाहं प्रति केवलं मणिः न प्रतिबन्धकः । 'केवलम्' इत्यस्य निर्विशेषणक इत्यर्थः । किन्तु उत्तेजकाभावविशिष्टः मणिः प्रतिबन्धकः । तदभावः विशिष्टमण्यभावः दाहं प्रति हेतुः । प्रतिबन्धकमणिसत्त्वे उत्तेजकसत्त्वे च उत्तेजकाभावरूप-विशेषणाभावात् उत्तेजकाभावविशिष्टमणिः नास्ति । अतः दाहः उत्पद्यते इति भावः ।

न व्यभिचार इति । न व्यतिरेकव्यभिचारः इत्यर्थः । केवलमणेः प्रतिबन्धकत्वे तदभावस्य हेतुत्वे च उत्तेजकसमवहितमणिसत्त्वदशायां मण्यभावरूपहेतुं विनापि दाहोत्पत्त्या व्यतिरेकव्यभिचारात् न मण्यभावस्य दाहं प्रति हेतुत्वम् इति शङ्का प्रसक्ता । सा च उत्तेजकाभावविशिष्टमण्यभावस्य दाहं प्रति हेतुत्वस्वीकारात् निरस्ता भवति इति भावः ।

अथ इति । प्रतिबन्धकीभूतमणिसत्ताकालीनदाहं प्रति उत्तेजकस्यैव हेतुत्वम् अस्तु; न तु उत्तेजकाभावविशिष्टमण्यभावस्य, गौरवात् इति चेत् –.

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

न । तस्य उत्तेजकस्य मणिमन्त्रौषधादिभेदेन नानात्वात् तेषां प्रत्येकं हेतुत्वं कल्पनीयम् । अनुगतधर्मस्य दुर्वचतया अनुगतरूपेण कारणत्वासंभवात् । तथा च उत्तेजकानां तत्तद्व्यक्तित्वेन मण्यादिस्थलीयदाहं प्रति हेतुत्वकल्पने अनन्तकार्यकारणभावाः कल्पनीयाः भवन्ति इति तदपेक्षया लाघवात् तत्तदुत्तेजकाभाव-विशिष्टमण्यभावत्वेन रूपेण विशिष्टमण्यभावस्य मण्यादिस्थलीयदाहं प्रति एकहेतुत्वकल्पनमेव लघु इति भावः ।

ननु उत्तेजकाभावकूटविशिष्टमण्यभावस्य दाहं प्रति हेतुत्वेऽपि मन्त्ररूपोत्तेजक-दशायां शब्दात्मकमन्त्रस्य आकाशनिष्ठत्वेन वह्न्यधिकरणे प्रदेशे मन्त्राभावसत्त्वात् सामानाधिकरण्यसंबन्धेन मन्त्ररूपोत्तेजकाभावविशिष्टमणिसत्त्वात् दाहानुत्पत्तिप्रसङ्गः । किञ्च संयोगेन द्रव्यस्य अव्याप्यवृत्तितामते प्रतिबन्धकमणिसत्त्वेऽपि किञ्चिदवच्छेदेन संयोगेन मण्यभावसत्त्वात् दाहापत्तिश्च इति शङ्कां निराकुरुते – **अत्र इदं बोध्यम्** इत्यादिना । अभावीयविशेषणतासंबन्धेन – स्वरूपसंबन्धेन दाहत्वावच्छिन्नं प्रति उद्देश्यतादैशिकविशेषणता– अन्यतरसंबन्धावच्छिन्नतत्तदुत्तेजकनिष्ठप्रतियोगिताकाभावैः-सामानाधिकरण्यरूपं– एकाधिकरणवृत्तित्वरूपं यद्वैशिष्ट्यं तदवच्छिन्नस्य मण्यादेः प्रतिबन्धकस्य दैशिकविशेषणता–उद्देश्यता–अन्यतरसंबन्धावच्छिन्नप्रतियो -गिताकाभावः अभावीयविशेषणतासंबन्धेन हेतुः इति । अत्र अभावीयविशेषणता कार्यतावच्छेदकसंबन्धः । विशिष्टमण्यभावनिष्ठकारणतावच्छेदकसंबन्धोऽपि स एव ।

वस्त्रादेः पूर्वरूपध्वंसात्मकदाहः वह्निना जायते । परन्तु तत्रैव चन्द्रकान्तमणेः मन्त्रविशेषस्य वा सत्त्वे दाहः न जायते । अतः चन्द्रकान्तमणिः मन्त्रविशेषश्च प्रतिबन्धकः । तादृशप्रतिबन्धकसत्त्वेऽपि सूर्यकान्तमणेः मन्त्रविशेषस्य वा उत्तेजकस्य सत्त्वे पुनः दाहः जायते । तत्र मन्त्रविशेषस्य उद्देश्यतासंबन्धेन प्रतिबन्धकत्वम् उत्तेजकत्वं च । वह्न्यधिकरणदेशे दाहप्रतिबन्धं दाहोत्पत्तिं च उद्दिश्य मन्त्रस्य

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्रयुज्यमानत्वात् । चन्द्रकान्तमणिः सूर्यकान्तमणिश्च दैशिकविशेषणतासंबन्धेन वह्न्यधिकरणदेशे वर्तमानः सन् दाहं प्रतिबध्नाति उत्पादयति च । संयोगसंबन्धेन द्रव्यस्य अव्याप्यवृत्तित्वेऽपि दैशिकविशेषणतासंबन्धेन द्रव्यस्य अव्याप्यवृत्तित्वं न अङ्गीक्रियते । दैशिकविशेषणता तु भावाभावसाधारणी । एतत् सर्वं मनसि निधाय अस्य परिष्कारस्य अर्थः अवगन्तव्यः, समन्वयश्च करणीयः । वह्न्यधिकरणदेशे प्रतिबन्धकस्य उत्तेजकस्य च सत्त्वे उद्देश्यता-दैशिकविशेषणता-अन्यतरसंबन्धेन उत्तेजकस्य सत्त्वात् तत्संबन्धावच्छिन्नप्रतियोगिताक-उत्तेजकाभाव-विशिष्टमणिः नास्ति इति दाहोत्पत्तिनिर्वाहः । अत्र तत्तदुत्तेजकनिष्ठप्रतियोगितायां संबन्धविशेषावच्छिन्नत्वानिवेशे उत्तेजकवत्यपि प्रदेशे संबन्धान्तरावच्छिन्न-उत्तेजकाभावस्य सत्त्वात् दाहानुपपत्तिः । संयोगसंबन्धावच्छिन्नत्वनिवेशे संयोगसंबन्धेन सूर्यकान्तमणिरूपोत्तेजकवति प्रदेशे किञ्चिदवच्छेदेन संयोगसंबन्धेन तदभावस्यापि सत्त्वात् दाहानुपपत्तिः । दैशिकविशेषणतासंबन्धावच्छिन्नत्वनिवेशे पूर्वोक्तदोषवारणेऽपि उद्देश्यतासंबन्धेन मन्त्ररूपोत्तेजकवति प्रदेशे दैशिकविशेषणतासंबन्धावच्छिन्न-प्रतियोगिताकोत्तेजकाभावसत्त्वात् दाहानुपपत्तिः । अतः उद्देश्यता-दैशिकविशेषणता-अन्यतरसंबन्धावच्छिन्नत्वस्य तत्तदुत्तेजकनिष्ठप्रतियोगितायां निवेशः । उत्तेजकसमवधानकालीनप्रतिबन्धकसत्त्वे प्रतिबन्धके मणौ स्वरूपसंबन्धेन उत्तेजकाभाववैशिष्ट्यसत्त्वात् दाहानुपपत्तिः । अतः सामानाधिकरण्यरूपं यत् वैशिष्ट्यम् इत्युक्तम् । उत्तेजकाभावविशिष्टमण्यादिनिष्ठप्रतियोगितायां संबन्धविशेषा-वच्छिन्नत्वानिवेशे प्रतिबन्धकमणिसत्त्वेऽपि संयोगातिरिक्तसंबन्धावच्छिन्न-प्रतियोगिताकतदभावसत्त्वात् दाहापत्तिः । प्रतियोगितायां संयोगसंबन्धावच्छिन्न-त्वनिवेशेऽपि संयोगेन द्रव्यस्य अव्याप्यवृत्तितया संयोगसंबन्धेन मणिविशिष्टे प्रदेशे किञ्चिदवच्छेदेन संयोगसंबन्धावच्छिन्नप्रतियोगिताकमण्यभावस्य सत्त्वात् दाहापत्तिः । अतः दैशिकविशेषणतासंबन्धावच्छिन्नत्वनिवेशः । तन्मात्रनिवेशे प्रतिबन्धकस्य मन्त्रविशेषस्य उद्देश्यतासंबन्धेन वह्निमति प्रदेशे सत्त्वेऽपि दैशिकविशेषणतासंबन्धेन

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

असत्त्वात् दाहापत्तिः । अतः दैशिकविशेषणता-उद्देश्यता-अन्यतरसंबन्धावच्छिन्नत्वस्य विशिष्टमण्यादिनिष्ठप्रतियोगितायां निवेशः ।

कारणतावच्छेदकसंबन्धत्वेन अभावीयविशेषणतायाः अनिवेशे प्रतिबन्धकवत्यपि प्रदेशे स्थलान्तरे स्थितस्य प्रतिबन्धकाभावस्य कालिकसंबन्धेन सत्त्वात् दाहापत्तिः इति बोध्यम् । कार्यतावच्छेदककोटौ अभावीयविशेषणतायाः संबन्धतया निवेशस्तु वस्तुस्थितिकथनाय । दाहस्य ध्वंसरूपतया अभावीयविशेषणतासंबन्धेनैव तदुत्पत्तेः ।

ननु अनुमानमेव इत्यादि । पूर्वं प्रतिबन्धकत्वान्यथानुपपत्तिरूपार्थापत्तिप्रमाणेन शक्तिसिद्धिम् आशङ्क्य प्रतिबन्धकत्वस्य अन्यथाप्युपपादनेन अर्थापत्तिः न संभवति इति प्रतिपादितम् । इदानीम् अनुमानेन शक्तिसिद्धिम् आशङ्कते – **''वह्निः दाहानुकूलाद्विष्ठातीन्द्रियधर्मसमवायी, दाहजनकत्वात्, अदृष्टवदात्मवत्''** इति । दाहानुकूलः अद्विष्ठः – द्वयोः अविद्यमानः अतीन्द्रियः यः धर्मः तत्समवायित्वं साध्यम् । अदृष्टवदात्मा दृष्टान्तः । कार्यसामान्यं प्रति अदृष्टवदात्मसंयोगस्य हेतुत्वात् दाहानुकूलादृष्टवान् आत्मा हेतुघटकतया दाहजनकः भवति इति आत्मनि हेतुसत्त्वम् । अदृष्टं दाहानुकूलम्, अव्यासज्यवृत्तितया अद्विष्ठम् अतीन्द्रियं च । तत्समवायित्वम् आत्मनि अस्ति इति साध्यसत्त्वम् । वह्नावपि दाहजनकत्वसत्त्वात् तत्र दाहानुकूलः अद्विष्ठः अतीन्द्रियः धर्मः समवायेन अस्ति इति वक्तव्यम् । स एव धर्मः शक्तिरूपः इति वन्ह्नौ शक्तिसिद्धिः । अत्र साध्ये ''दाहानुकूलत्वम्'' इति विशेषणानुपादाने वह्निद्व्यणुकत्वं नाम वन्हिद्व्यणुकवृत्तिपरिमाणविशेषम् आदाय सिद्धसाधनम् । वह्निद्व्यणुकवृत्तिपरिमाणस्य अद्विष्ठतया अतीन्द्रियतया च तादृशधर्मसमवायस्य पक्षतावच्छेदकवन्हित्वाश्रये वन्हिद्व्यणुके अनुमानात् पूर्वमेव सिद्धतया सिद्धसाधनं भवति । अतः दाहानुकूलत्वविशेषणम् । एवं भर्जनकपालस्थवह्निनिष्ठानुद्भूतरूपम् आदाय सिद्धसाधनं भवति । तादृशवह्निनिष्ठस्य

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अनुद्भूतरूपस्य अद्विष्टत्वात् अतीन्द्रियत्वाच्च । तद्वत्त्वस्य पक्षान्तर्गते भर्जनकपालस्थवह्नौ पूर्वमेव सिद्धत्वात् । अतः दाहानुकूलत्वविशेषणम् । एतेन महत्त्वविशिष्टवह्नेः एव पक्षत्वात् वन्हिद्व्यणुकत्वम् आदाय न सिद्धसाधनम्, वन्हिद्व्यणुकस्य महत्त्वरूपपक्षतावच्छेदकानाश्रयत्वात् इति शङ्कायाः नावकाशः । भर्जनकपालस्थवह्नौ महत्त्वासत्त्वेन तत्र अनुद्भूतरूपम् आदाय सिद्धसाधनाप्रसक्तेः ।

एवं साध्ये "अद्विष्ठ" इति विशेषणानुपादाने वह्निद्व्यणुकस्य इन्धनस्य च यः संयोगः तम् आदाय सिद्धसाधनं स्यात् । तस्य दाहानुकूलत्वाभावे तु वह्नेः अदृष्टवदात्मनश्च यः संयोगः तम् आदाय सिद्धसाधनम् । तद्वारणाय "अद्विष्ठ" इति विशेषणम् । संयोगस्य उभयवृत्तितया न तम् आदाय सिद्धसाधनम् । वन्हिनिष्ठः यः उष्णस्पर्शः सः दाहानुकूलः अद्विष्ठश्च भवति इति तद्वत्त्वम् आदाय सिद्धसाधनम् । तद्वारणाय "अतीन्द्रिय" इति धर्मविशेषणम् ।

अत्र आत्मनः दृष्टान्तत्वकथनं कार्यसामान्ये स्वाश्रयसंयोगसंबन्धेन अदृष्टस्य हेतुत्ववत्, अदृष्टवदात्मनः संयोगसंबन्धेन हेतुत्वम् इत्यभिप्रायेण ।

समाधत्ते – **विपक्षे** इति । उक्तानुमाने पक्षे हेतुः अस्तु, साध्यं मास्तु इति शङ्कायां तन्निवर्तकस्य तर्कस्य अभावात् न साध्यसाधकत्वम् इति भावः ।

प्रकारान्तरेण शक्तिं साधयतां मतम् आह – **केचित्तु** इति । वन्हिं प्रति तृणफूत्कारसंयोगः, अरणिनिर्मथनसंयोगः, मणितरणिकिरणसंयोगश्च कारणम् इति लोकसिद्धम् । फूत्कारो नाम मुखात् निःसृतः वायुविशेषः । निर्मथनशब्देन मथनसाधनीभूतः दण्डविशेषः ग्राह्यः । एतेषां त्रयाणां वन्हिं प्रति तृणफूत्कारसंयोगत्वादिना पृथक् पृथक् कारणत्वे एकैककारणात् वन्ह्युत्पत्तिस्थले कारणान्तरं विनापि वन्हेः उत्पत्या व्यतिरेकव्यभिचारः भवति । अतः अतिरिक्तशक्तिम् अङ्गीकृत्य एतेषां त्रयाणां एकशक्तिमत्त्वेन कारणत्वं वक्तव्यम् इति अतिरिक्तशक्तिसिद्धिः । तृणफूत्कारसंयोगस्थले अरणिनिर्मथनसंयोगाभावेऽपि शक्तिमतः तृणफूत्कारसंयोगस्य

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

सत्त्वेन न व्यतिरेकव्यभिचारः । शक्तेः कारणतावच्छेदकतया कारणतावच्छेदकावच्छिन्नं विना कार्योत्पत्तावेव व्यतिरेकव्यभिचारात् ।

न च **तृणफूत्कारसंयोग** इति । तृणफूत्कारसंयोगादीनां पृथक् पृथगेव वन्हिं प्रति कारणत्वम् । तावता व्यतिरेकव्यभिचारः कथं परिहृतः भवति इति न आशङ्कनीयम् । वन्हित्वावच्छिन्नं प्रति तृणफूत्कारसंयोगत्वादिना हेतुत्वे एव व्यभिचारप्रसक्तिः । तद्वारणाय कारणतावच्छेदकभेदवत् कार्यतावच्छेदकभेदं स्वीकृत्य तृणफूत्कारसंयोगस्य कार्यतावच्छेदकं वन्हिनिष्ठं वैजात्यम् अन्यत्; अरणिनिर्मथनसंयोगस्य कार्यतावच्छेदकं वह्निनिष्ठं वैजात्यम् अन्यत् । मणितरणिकिरणसंयोगस्य कार्यतावच्छेदकं वह्निनिष्ठं वैजात्यम् अन्यत् । एवं च वन्हौ वैजात्यत्रयं कल्पयित्वा तत्तद्वैजात्यावच्छिन्नं प्रति तृणफूत्कारसंयोगत्वाद्यवच्छिन्नं कारणम् इति कार्यकारणभावत्रयं कल्प्यते । अतः न व्यतिरेकव्यभिचारः इति – न च वाच्यम् । जन्यतावच्छेदकवैजात्यत्रयं कल्पयित्वा तत्प्रयुक्तकार्यकारणभावत्रयकल्पनाम् अपेक्ष्य वन्हित्वावच्छिन्नं प्रति तृणफूत्कारसंयोगादीनां एकशक्तिमत्त्वेन रूपेण एककार्यकारणभावकल्पनायां लाघवात् । तथा च एतादृशलाघवमूलककार्यकारणभावबलात् शक्तिः सिद्ध्यति इति केषांचित् मतम् । तत् खण्डयति – तन्न इति । तेषां त्रयाणाम् अक्लृप्त-एकशक्तिमत्त्वेन कारणत्वापेक्षया क्लृप्त-एकजातिमत्त्वेन हेतुत्वकल्पनाया एव युक्तत्त्वात् । तथा च न अतिरिक्तशक्तिसिद्धिः । अत्र च एकजातिपदेन एतत्संयोगत्रयमात्रवृत्तिः संयोगत्वातिरिक्ता संयोगत्वव्याप्या च काचन जातिः विवक्षिता । अस्या कल्पनीयत्वेऽपि जातित्वेन रूपेण क्लृप्तत्वम्; शक्तेस्तु न तथा इति विशेषः ।

न च - उक्तसंयोगत्रयमात्रवृत्तिजातेः प्रत्यक्षयोग्यसंयोगवृत्तितया प्रत्यक्षत्वापत्तिः इति – वाच्यम् । अदृष्टादिरूपदोषवशात् योग्यवृत्तित्वेऽपि तस्याः जातेः अयोग्यत्वकल्पनात् । अन्यथा एकशक्तिमत्त्वेन कारणत्वेऽपि योग्यवृत्तेः तस्याः योग्यत्वापत्तिः कथं वार्येते ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

न च –संयोगत्रयवृत्तिजातिविशेषस्वीकारे नोदनत्वादिना संकरः । नोदनत्वं नाम कर्मजन्यसंयोगवृत्तिः अभिघातत्वातिरिक्तः संयोगत्वव्याप्यजातिविशेषः । तथा च नोदनत्वं विहाय त्रितयवृत्तिजातिः मणिकिरणसंयोगे । त्रितयवृत्तिजातिं विहाय नोदनत्वं हस्तपुस्तक-संयोगे । उभयोः समावेशः तृणफूत्कारसंयोगे अरणिमथनसंयोगे च इति साङ्कर्यम् इति – वाच्यम् । साङ्कर्यस्य जातित्वबाधकत्वे मानाभावात् ।

अथ वा, एकजातिमत्त्वेन कारणत्वं परित्यज्य तृणफूत्कारसंयोगानां त्रयाणाम् अन्यतमत्वेन कारणत्वं कल्प्यते, अतः न व्यतिरेकव्यभिचारः ।

तत्र शङ्कते – **न च अन्यतमत्वघटकभेदानाम्** इति । तृणफूत्कारसंयोगादीनां त्रयाणां अन्यतमत्वेन कारणत्वस्वीकारेऽपि अन्यतमत्वस्य तद्भिन्नभिन्नत्वरूपतया तृणफूत्कारसंयोगभेद – अरणिनिर्मथनसंयोगभेद – मणितरणिकिरणसंयोगभेद – एतत्त्रयावच्छिन्नप्रतियोगिताकभेदः अन्यतमत्वम् इति फलति । तादृशभेदत्रयविशिष्टं घटादिकम् । तद्भेदः तृणफूत्कारतत्संयोगादिषु त्रिषु वर्तते इति तेषाम् अन्यतमत्वं भवति । तत्र भेदत्रयस्य अन्यतमत्वघटकस्य एकविशिष्टापरत्वरूपेणैव निवेशः कार्यः । त्रयम् इत्यस्य हि त्र्यवयवकसमुदाय इत्यर्थः । समुदायत्वं च एकविशिष्टापरत्वम् इति ग्रन्थान्तरे स्पष्टम् । तथा च तृणफूत्कारसंयोगभेदविशिष्ट-अरणिमथनसंयोगभेदविशिष्ट – मणितरणिकिरण-संयोगभेदावच्छिन्नप्रतियोगिताकभेदः अन्यतमत्वम् इत्युक्तं भवति । तत्रापि एकविशिष्टापरत्वेन निवेशे तेषां भेदानां परस्परं विशेष्यविशेषणभावे विनिगमनाविरहेण त्रयः विशिष्टभेदाः निवेशनीयाः । तथा च अन्यतमत्वं कारणतावच्छेदकम् । त्रयः विशिष्टभेदाः स्वावच्छिन्न-प्रतियोगिताकत्वसंबन्धेन कारणतावच्छेदकस्य भेदस्य अवच्छेदकाः इति कारणतावच्छेदकतावच्छेदकभेदात् कारणतावच्छेदकभेदः । तद्भेदात् कारणताबाहुल्यम् इति शङ्का ।

तत्समाधानं तु – कारणतावच्छेदकभेदानां त्रयाणामपि कारणतावच्छेदकतावच्छेदकभेदप्रयुक्तभेदवतां तृणफूत्कारसंयोगादिषु त्रिषु वर्तमानानां समनियतानाम् ऐक्येन कारणतायाः ऐक्यं संभवति इति ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

तदुपरि शङ्का – पूर्वोक्तविशिष्टभेदत्रयावच्छिन्नभेदानां जात्यतिरिक्तत्वेन स्वरूपतः कारणतावच्छेदकत्वासंभवात् तृणफूत्कारसंयोगभेदविशिष्ट-अरणि-निर्मथनसंयोगभेदविशिष्ट – मणितरणिकिरणसंयोगभेदावच्छिन्नप्रतियोगिताकभेदत्वादिना अवच्छेदकत्वं वाच्यम् । तथा च कारणतावच्छेदकतावच्छेदकानां उक्तविशिष्टभेदाव-च्छिन्नप्रतियोगिताकभेदत्वादीनां नानात्वात् कारणतावच्छेदकतायाः भेदः । तन्नाना-त्वाच्च कारणतायाः भेद इति ।

तत्र समाधानम् – स्वरूपसंबन्धरूपायाः तत्तत्कारणव्यक्तिरूपायाः सप्तपदार्था-तिरिक्तायाः वा कारणतायाः अवच्छेदकभेदेऽपि अभिन्नत्वात् । अन्यथा तादृशकारण-तायाः अवच्छेदकताभेदात् भेदे सति नानाकारणताव्यक्तिकल्पनागौरवापत्त्या भिन्नभिन्नावच्छेदकतानिरूपित-एककारणतायाः एव कल्पयितुम् उचितत्वात् । कार्यव्यापकतारूपायाः कारणताया एव अवच्छेदकताभेदेन भिन्नत्वम् इत्याशयः ।

भेदावच्छिन्नप्रतियोगिताकभेदत्वादिना इति । अवच्छिन्नप्रतियो-गिताकत्वसंबन्धेन तृतीयभेदः । स्वरूपसंबन्धेन भेदत्वं च कारणतावच्छेद-कतावच्छेदके । तृतीयभेदनिष्ठायां कारणतावच्छेदकतावच्छेदकतायां द्वितीयभेदः अवच्छेदकः । तन्निष्ठायाम् अवच्छेदकतायां प्रथमभेदः अवच्छेदकः इति रीत्या विशेषणविशेष्यभावव्यत्यये कारणतावच्छेदकतावच्छेदकानां भेदः बोध्यः ।

अतिरिक्ताया वा इति । कारणत्वम् अखण्डोपाधिः इत्याशयेन इदम् ।

परे तु इति । तृणफूत्कारसंयोगादीनां त्रयाणां एकशक्तिमत्त्वेन कारणत्वं वा तृणफूत्कारसंयोगादिसमानकालीनवायुसंयोगादीनाम् एकशक्तिमत्त्वेन कारणत्वं वा इत्यत्र विनिगमनाविरहात् एकशक्तिमत्त्वेन कारणत्वं न संभवति इति न शक्तिसिद्धिः इति केचित् आहुः ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

न च – तृणफूत्कारसंयोगादीनाम् अन्यतमत्वेन कारणत्वम् इति सिद्धान्तेऽपि तृणफूत्कारसंयोगसमानकालीनवायुसंयोग अरणिनिर्मथनसंयोगसमानकालीनवायुसंयोग-मणितरणिकिरणसंयोगसमानकालीनवायुसंयोगानाम् अन्यतमत्वेन कारणत्वं वा तृणफूत्कारसंयोग-अरणिमथनसंयोग-मणितरणिकिरणसंयोगानाम् अन्यतमत्वेन वा इत्यत्र विनिगमनाविरहात् अन्यतमत्वेनापि कारणत्वं न संभवति इति – वाच्यम् । क्लृप्तनियतपूर्ववर्तिना तृणसंयोगादिनैव वह्न्युत्पत्तौ संभवन्त्यां तद्भिन्नवायुसंयोगादीनाम् अन्यथा-सिद्धतया कारणत्वस्यैव अभावात् विनिगमनाविरहस्य अप्रसिद्धेः ।

आहुः इति । वायुसंयोगादौ शक्त्यङ्गीकारे वन्हिकामस्य वायुसंयोगसंपादने प्रवृत्तिः, तृणसंयोगादिसंपादने औदासीन्यं च स्यात् इति तर्क एव विनिगमकः इति अस्वरसः अनेन सूचितः । इत्थं च उत्पत्तिविनाशप्रयुक्तशक्त्यानन्त्यरूपमहागौरवमेव दूषणम् इति सारम् ।।

मुक्तावली

सादृश्यम् अपि न पदार्थान्तरम्; किन्तु तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वम्, यथा चन्द्रभिन्नत्वे सति चन्द्रगताह्लादकत्वादिमत्त्वं मुखे चन्द्रसादृश्यम् इति ।।

दिनकरी

यत् आशङ्कितं सादृश्यमपि अतिरिक्तपदार्थ इति तदपि निराकरोति – **सादृश्यम् अपि** इति । **तद्भिन्नत्वे सति** इति । इदं च सादृश्यनिरूपके अतिव्याप्तिवारणाय । अनुयोगितासंबन्धविवक्षणे तु न देयमेव । **तद्गतभूयोधर्मवत्त्वम्** इति । तत्र असाधारण्येन विद्यमानाः ये भूयांसः धर्माः तद्वत्त्वम् इत्यर्थः।

ननु इदम् —

"गगनं गगनाकारं सागरः सागरोपमः ।
रामरावणयोर्युद्धं रामरावणयोरिव ॥"

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

इत्यादौ अव्याप्तम् इति चेत् –

न । **तद्वृत्तिधर्ममात्रस्य** तत्र विवक्षितत्वात् **युगभेदविवक्षया** भेदसत्त्वात् वा । अत एव युगभेदविवक्षायाम् इह उपमालङ्कारः; अन्यथा अनन्वयालङ्कारः इति उक्तम् **आलङ्कारिकैः** । सादृश्यघटकधर्मश्च क्वचित् जातिरूपः, यथा घटसदृशः पटः इत्यादौ । क्वचित् उपाधिरूपः, [1]यथा गोत्वं नित्यं तथा अश्वत्वम् अपि इत्यादौ; यथा वा चन्द्रसदृशं मुखम् इत्यादौ आह्लादकत्वादिः [2]अतिरिक्तकल्पने गौरवात् इति ।

नव्याः तु – सादृश्यम् अतिरिक्तमेव । **न च – अतिरिक्तत्वे** पदार्थविभागव्याघातः इति – वाच्यम् । तस्य साक्षात् परंपरया वा तत्त्वज्ञानोपयोगि-''पदार्थमात्र'' निरूपणपरत्वात् । **एवम् अधिकरणत्वम् अपि** । **तस्य संयोगादिरूपत्वे** बदरकुण्डसंयोगस्य द्विष्ठत्वेन ''कुण्डे बदरम्'' इतिवत् ''बदरे कुण्डम्'' इत्यपि प्रयोगः स्यात् । **एवं प्रतियोगित्वमपि** – इति आहुः।

सादृश्यलक्षणं लक्ष्ये योजयति – **यथा** इति । ''इति'' शब्दः श्लोकव्याख्या-समाप्तिद्योतकः ।।

राजीवोल्लासः

इदं च सादृश्यनिरूपके इति । ''तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वम्'' इति सादृश्यलक्षणे ''तद्भिन्नत्वे सति'' इति विशेषणं सादृश्यप्रतियोगिनि चन्द्रे चन्द्रसादृश्यलक्षणातिव्याप्तिवारणाय इत्यर्थः । **अनुयोगितासंबन्धविवक्षणे तु** इति । ''अनुयोगितासंबन्धेन तद्गतभूयोधर्मवत्त्वं सादृश्यम्'' इत्युक्ते सादृश्यप्रतियोगिनि

1. ''यथा'' इति उदाहरणे, ''तथा'' इति उपमानम्। नित्यत्वादिः इति शेषः। एवं पूर्वत्रापि द्रव्यत्वादिः इति शेषः (सु).
2. ननु न एते सादृश्यघटकाः धर्माः, किन्तु अतिरिक्तसादृश्यप्रयोजकाः एव इति आक्षेपं परिहरति – अतिरिक्त इति (सु).

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अनुयोगितासंबन्धेन तद्वत्त्वविरहात् अतिव्याप्तिवारणसंभवात् ‘‘तद्भिन्नत्वे सति’’ इति विशेषणं न देयम् ।

ननु सर्वेषाम् अपि पदार्थानां सर्वैः पदार्थैः सह सादृश्यं स्यात् । तत्तत्पदार्थगत-प्रमेयत्ववाच्यत्वादिभूयोधर्मवत्त्वस्य पदार्थान्तरेऽपि सत्त्वात् इति, अत आह – **तत्र असाधारण्येन** इति । तत्र – सादृश्यप्रतियोगिनि, **असाधारण्येन** – सकल-पदार्थावृत्तित्वेन वर्तमानाः ये भूयांसः धर्माः तद्वत्त्वं तत्सादृश्यम् । सादृश्यप्रतियोगिनि चन्द्रे असाधारण्येन विद्यमानानां आह्लादकत्वादीनां मुखे सत्त्वात् सादृश्यलक्षण-समन्वयः । **तद्वृत्तिधर्ममात्रस्य** इत्यत्र मात्रपदेन तद्भिन्नत्वस्य व्यवच्छेदः । **युगभेदविवक्षया** इति । युगभेदेन गगने भेदारोपात् गगनसादृश्यम् इति भावः ।

न च अतिरिक्तत्वे इति । सादृश्यस्य अतिरिक्तपदार्थत्वे पदार्थस्य सप्तधा विभागानुपपत्तिः इति न आशङ्कनीयम् । विभागग्रन्थस्य साक्षात् परंपरया वा तत्त्वज्ञानोपयोगिनः ये पदार्थाः तद्विभागतात्पर्यकत्वात् । सादृश्यस्य तु न तत्त्वज्ञानोपयोगित्वम् । तथा हि – ‘‘आत्मा आत्मेतरद्रव्यभिन्नः’’ इत्याकारक – आत्मविशेष्यक – आत्मेतरद्रव्यभेदप्रकारक-ज्ञानम् तत्त्वज्ञानम् । तज्जनकज्ञान-विषयत्वं तदुपयोगित्वम् । तादृशतत्त्वज्ञानं प्रति पक्षज्ञानविधया आत्मज्ञानस्य, प्रतियोगिज्ञानविधया आत्मेतरद्रव्यादिपदार्थज्ञानस्य च जनकत्वात् जनकज्ञानविषयतया आत्मादीनां तत्त्वज्ञानोपयोगित्वम् । तथा च सादृश्यादीनां आत्मभिन्नपदार्थानां सत्त्वेऽपि आत्मनि तद्भेदः अनुमित्यात्मकतत्त्वज्ञानविषयः न भवति इति प्रतियोगिज्ञानविधया अपि सादृश्यज्ञानं न तत्त्वज्ञानोपयोगि । अतः न विभागव्याघातः इति तात्पर्यम् ।

प्रसङ्गात् अधिकरणत्वादीनां पदार्थान्तरत्वं साधयति – **एवम् अधिकरणत्वमपि** इति । अतिरिक्तः पदार्थः इति शेषः । अतिरिक्तत्वम् उपपादयति – **तस्य संयोगादिरूपत्वे** इति । अधिकरणत्वं यदि संयोगरूपं स्यात् तर्हि

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

बदरकुण्डसंयोगस्य बदरे कुण्डे च द्वयोः विद्यमानतया कुण्डस्य बदराधिकरणत्ववत् बदरस्य कुण्डाधिकरणत्वमपि स्यात् । अतः अधिकरणत्वम् अतिरिक्तपदार्थः । तथा सति ''कुण्डे बदरम्'' इति प्रतीतिबलात् कुण्डस्यैव अधिकरणत्वम्, ''बदरे कुण्डम्'' इति प्रतीतिविरहात् न बदरस्य अधिकरणत्वम् । **एवं प्रतियोगित्वम् अपि इति** । ''एवम्'' इत्यस्य अतिरिक्तपदार्थः इत्यर्थः । प्रतियोगित्वं यदि प्रतियोगिस्वरूपं स्यात्, तर्हि ''भूतलं घटाभावप्रतियोगि'' इति व्यवहारः स्यात् । ''घटाभावप्रतियोगि'' इत्यस्य ''घटाभावप्रतियोगितावत्'' इत्यर्थः । घटाभावनिरूपितप्रतियोगिता च घटस्वरूपा, भूतलं च घटाधिकरणम् इति घटात्मकप्रतियोगितायाः अपि अधिकरणम् । अतः ''भूतलं घटाभावनिरूपित-प्रतियोगितावत्'' इति व्यवहारापत्तिः । एवं ''घटः घटाभावनिरूपितप्रतियोगितावान्'' इति व्यवहारानुपपत्तिश्च । घटस्य घटाभावनिरूपितप्रतियोगितारूपत्वात् ''प्रतियोगितावान्'' इति प्रयोगः न स्यात् । स्वस्य स्वाधारत्वविरहात् ।।

इति पदार्थविभागः ।।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

।। द्रव्यविभागः ।।

कारिकावली

क्षित्यप्तेजोमरुद्व्योम कालदिग्देहिनो मनः ।
द्रव्याणि, ...

मुक्तावली

द्रव्याणि विभजते – क्षितिः - पृथिवी । आपः-जलानि । तेजः-वन्हिः । मरुत् - वायुः । व्योम - आकाशः । देही - आत्मा । मनः । एतानि नव द्रव्याणि इत्यर्थः ।

दिनकरी

''स्त्रियां क्तिन्'' इति सूत्रविहित ''क्तिन्'' प्रत्ययान्तक्षितिशब्दस्य क्षयवाचकत्वात् क्षितिपदस्य प्रकृतोपयोगिनम् अर्थम् आह – **क्षितिः पृथिवी** इति । ''अप्'' शब्दस्य ''अप् तृन् तृच्'' इत्यादिपाणिनीयसूत्रे शब्दपरत्वात् आह – **आपः जलानि** इति । प्रतापस्यापि तेजः शब्दवाच्यत्वात् प्रकृते तेजःपदार्थं दर्शयति **तेजः वन्हिः** इति । वन्ह्यादिः इत्यर्थः । देवविशेषस्यापि ''मरुत्'' शब्दवाच्यत्वात् प्रकृतोपयोगिनम् अर्थम् आह – **मरुत् वायुः** इति । ''व्योम''शब्दस्य वेदे ब्रह्मणि प्रयोगात् आह – **व्योम आकाशः** इति । देहविशिष्टार्थवाचकात् ''देहि''शब्दात् देहावयवानाम् उपस्थितेः आह –[1]**देही आत्मा** इति ।

अथ ईश्वरस्य देहिनां मध्ये अनन्तर्भावात् कथं द्रव्यत्वम् इति चेत्, न – वृद्धाः भूतावेशन्यायेन ईश्वरस्य शरीरम् इच्छन्ति । संसार्यदृष्टवशात् शरीरम् इति अन्ये । अत एव अस्वरसात् आह **आत्मा** इति ।

---

1. देहिशब्दस्य देहविशिष्टार्थकत्वे ईश्वरस्य शरीरानङ्गीकारे ईश्वरस्य द्रव्यमध्ये अविभजनात् द्रव्यत्वं न स्यात् इति अस्वरसात् देहिशब्दार्थः न देहविशिष्टः, अपितु आत्मत्वजात्यवच्छिन्नः इति ईश्वरस्य द्रव्यत्वसिद्धिः इति विवरणतात्पर्यम् (त).

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

पृथिव्यप्तेजोवाय्वात्मानः इति पञ्चैव द्रव्याणि, व्योमादेः ईश्वरात्मनि एव अन्तर्भूतत्वात्; मनसश्च **असमवेतभूतेषु** अन्तर्भावात् इति आहुः **नवीनाः** । तन्मतं निराकर्तुम् संख्याबोधकपदपूरणेन अर्थम् आह – **एतानि नवद्रव्याणि** इति । **व्योम्नः तावत्** शब्दाश्रयतया सिद्धिः । न च भगवतः एव शब्दाश्रयत्वम् । प्रत्येकं जीवम् आदाय विनिगमनाविरहात् । न च जीवानाम् आश्रयत्वे ''शब्दवान् अहम्'' इति प्रत्यक्षापत्तिः; अदृष्टवदयोग्यत्वस्यैव कल्पनात् । कालदिशोः तु ''एतस्मिन् काले घटः'', ''पूर्वस्यां दिशि पटः'' इत्याद्यनुगताकारप्रत्ययात् । मनसश्च असमवेतभूतत्वे पार्थिवादित्रसरेणून् आदाय विनिगमनाविरहः इत्याशयः । अधिकम् अग्रे व्यक्तीभविष्यति ।

मूले द्रव्याणि इति । द्रव्यपदं द्रव्यत्वरूपजातिविशिष्टार्थकम्, न तु गुणाश्रयत्वविशिष्टार्थकम्, गौरवात् ।।

राजीवोल्लासः

असमवेतभूतेषु इति । परमाणुषु इत्यर्थः । **व्योम्नः तावत्** इति । आकाशस्य शब्दाश्रयत्वेन सिद्धिः, ''शब्दः, क्वचित् आश्रितः, गुणत्वात्'' इत्यनुमानात् । न च – भगवतः एव शब्दाश्रयत्वम् अस्तु इति – वाच्यम् । प्रत्येकं जीवम् आदाय किं जीवस्य शब्दाश्रयत्वम्, उत भगवतः इति विनिगमनाविरहात् तदुभयातिरिक्तस्य आश्रयस्य सिद्धेः । न च – जीवानां शब्दाश्रयत्वे ''शब्दवान् अहम्'' इति प्रत्यक्षापत्त्या न जीवानां शब्दाश्रयत्वम् इति कथं विनिगमनाविरहः इति – वाच्यम् । अदृष्टवत् जीवाश्रितशब्दस्य मानसप्रत्यक्षायोग्यत्वकल्पनात् उक्तप्रत्यक्षापत्त्यभावात् ।

कालदिशोः तु ''एतस्मिन् काले घटः'', ''पूर्वस्यां दिशि पटः'' इति प्रत्ययात् सिद्धिः । मनसश्च असमवेतभूतत्वाङ्गीकारे पार्थिवादित्र्यणुकानाम् एव मनस्त्वम् वा, तदतिरिक्तस्य वा इति विनिगमनाविरहः । तस्मात् आकाशकाल-

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

दिङ्नसामपि अतिरिक्तद्रव्यत्वस्यैव आवश्यकत्वात् पृथिव्यप्तेजोवाय्वात्मनः इति पञ्चैव द्रव्याणि इति **नवीनमतं** न युक्तम् इति भावः ।।

।। द्रव्यत्वसिद्धिः ।।

मुक्तावली

ननु द्रव्यत्वजातौ **किं प्रमाणम्? न हि तत्र प्रत्यक्षं प्रमाणम्। घृतजतुप्रभृतिषु** द्रव्यत्वाग्रहात् इति चेत्, न – **कार्यसमवायिकारणतावच्छेदकतया, संयोगस्य विभागस्य** वा समवायिकारणतावच्छेदकतया **द्रव्यत्वसिद्धेः** इति ।।

दिनकरी

मुक्तावल्यां किं प्रमाणम् इति । ''किं'' शब्दः प्रश्ने । ननु ''द्रव्यम्'', ''द्रव्यम्'' इति अनुगतप्रतीतिः एव जातिसाधिका भविष्यति इति, अत आह – **न हि** इति । **तत्र** – द्रव्यत्वजातौ । **घृत** इति । तथा च घृतादिषु पामराणां द्रव्यत्वज्ञानाभावेन सकलद्रव्यसाधारणद्रव्यत्वजातिसिद्धिः न भविष्यति इति भावः । **कार्य** इति । **कार्यत्वं प्रागभावप्रतियोगित्वम्**; न च ध्वंससाधारण्यम्, सत्त्वेन विशेषणीयत्वात् । अत्र च कार्यस्य समवायः प्रत्यासत्तिः, कारणस्य तादात्म्यम् । यत्र समवायेन कार्यम्, तत्र तादात्म्येन द्रव्यम् इति **नियमात्** ।

ननु जन्यसत्त्वरूपकार्यत्वावच्छिन्नं प्रति तादात्म्येन द्रव्यत्वेन कारणत्वे मानाभावः । न च – नीले नीलोत्पत्तिवारणाय तथा हेतुत्वम् आवश्यकम् इति – वाच्यम् । समवायेन नीलं प्रति स्वाश्रयसमवेतद्रव्यत्वसंबन्धेन नीलस्य हेतुतया एव तद्वारणात्, **कार्यत्वस्य** कार्यतावच्छेदकत्वे **गौरवात्, कालिकसंबन्धेन** पटत्वादिकम् आदाय विनिगमनाविरहाच्च इति, अत आह – **संयोगस्य** इति । **अत्र च रूपादिगुणानां** सकलद्रव्यसाधारण्याभावेन **द्रव्यकार्यतया परित्यागः** । **सकलद्रव्यवृत्तिसंख्यादित्रयस्य** च गगनादिवृत्तेः नित्यत्वात् ।

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

न च – संयोगत्वावच्छिन्नं प्रति द्रव्यत्वेन समवायिकारणत्वे मानाभावः । तत्तद्व्यक्तिसमवेतसत्सामान्यं प्रति तत्तद्व्यक्तित्वेन समवायिकारणत्वस्य आवश्यकतया गुणादौ तदुत्पादासंभवात् इति – वाच्यम् । **कार्यमात्रवृत्तिजातेः** कार्यतावच्छेदकत्वनियमेन तादृशकारणत्वस्य आवश्यकत्वात् ।

नित्यसंयोगाङ्गीकर्तुः मतसाधारण्येन आह – **विभागस्य** इति । **द्रव्यत्वसिद्धेः** – द्रव्यत्वजातिसिद्धेः । क्वचित् तथैव पाठः । **अत्र यद्यपि गुणत्वेन अन्यथासिद्धिः** संभवति, तथापि साक्षात्संबद्धधर्मबाधे सत्येव अनुमितेः परंपरासंबद्धधर्मविषयत्वम् इति भावः ।

इदम् उपलक्षणम् । द्रव्यवति द्रव्यान्तरानुत्पत्या समवायेन द्रव्यस्य प्रतिबन्धकत्वं कल्पनीयम् इति प्रतिबन्धकतावच्छेदकतया द्रव्यत्वजातिसिद्धिः । **प्रतिबध्यतावच्छेदकं** तु पृथिव्यादिचतुष्टयमात्रवृत्तिभूतत्वमेव । नित्यव्यावृत्तत्वात् । **भूतत्वस्य** प्रतिबन्धकतावच्छेदकत्वे तु मूर्तत्वस्य तथात्वम् आदाय विनिगमनाविरहापत्तिः । **द्रव्यत्वस्य** प्रतिबन्धकतावच्छेदकत्वं तु धर्मिग्राहकमानसिद्धम् ।

न च – तस्य गगनादिवृत्तित्वे मानाभावः इति – वाच्यम् । भूतत्वेन तुल्यव्यक्तिवृत्तित्वापत्त्या विनिगमनाविरहेण गगनादिपञ्चवृत्तित्वाभ्युगमात् ।

न च – भूतत्वेन तुल्यव्यक्तिवृत्तित्ववारणाय मनोवृत्तित्वमेव द्रव्यत्वे कल्प्यताम्, गगनादिवृत्तित्वकल्पने गौरवात् । गगनादिवृत्तित्वकल्पनेऽपि मूर्तत्वेन साङ्कर्यवारणाय मनोवृत्तित्वस्य आवश्यकत्वात् इति – वाच्यम् । तथा सति मूर्तत्वजात्या द्रव्यत्वस्य तुल्यव्यक्तिवृत्तित्वापत्तेः इति ॥

राजीवोल्लासः

कार्यत्वं प्रागभावप्रतियोगित्वम् इत्यादि । **कार्यसमवायिकारणतावच्छेदकतया द्रव्यत्वजातिसिद्धिः** इति **मूले** उक्तम् । कार्यसमवायिकारणत्वं च कार्यत्वावच्छिन्न-समवायसंबन्धावच्छिन्न-कार्यतानिरूपित-तादात्म्यसंबन्धाव-

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

च्छिन्नकारणत्वम् । समवायसंबन्धेन कार्यसामान्यं प्रति तादात्म्यसंबन्धेन द्रव्यं कारणम् इति कार्यकारणभावः । यथा समवायसंबन्धेन पटरूपं कार्यं तन्तुषु जायते । तत्र तादात्म्यसंबन्धेन तन्तूनां सत्त्वात् तेषां पटसमवायिकारणत्वम् । तथा च "समवायसंबन्धावच्छिन्न-कार्यत्वावच्छिन्न-कार्यनिष्ठ-कार्यतानिरूपित-तादात्म्यसंबन्धावच्छिन्न-कारणता किञ्चिद्धर्मावच्छिन्ना, कारणतात्वात्, दण्डनिष्ठ घटकारणतावत्" इत्यनुमानेन द्रव्यत्वजातिः सिद्ध्यति इति मूलस्य आशयः ।

तत्र समवायिकारणस्य द्रव्यस्य कार्यतावच्छेदकं कार्यत्वं किं रूपम्? न तावत् जातिरूपम् । ध्वंसे जात्यभावेन तत्र कार्यत्वानुपपत्तेः । नापि उपाधिरूपम् । कार्येषु सर्वेषु अनुगतस्य अकार्येषु अवर्तमानस्य च उपाधेः दुर्वचत्वात् इत्याशङ्कायां **कार्यत्वं प्रागभावप्रतियोगित्वम्** इत्युक्तम् ।

न च – द्रव्यकार्यत्वाभाववति ध्वंसेऽपि प्रागभावप्रतियोगित्वरूपस्य कार्यत्वस्य विद्यमानतया अतिप्रसक्तत्वेन कथं कार्यत्वं द्रव्यकार्यतावच्छेदकम् इति – वाच्यम् । सत्त्वविशिष्टस्य कार्यत्वस्य द्रव्यकार्यतावच्छेदकत्वात् । ध्वंसे च सत्त्वविशिष्टं कार्यत्वं नास्ति इति कार्यतावच्छेदकं न ध्वंससाधारणम् । तथा च "समवायसंबन्धावच्छिन्नसत्त्वविशिष्ट-कार्यत्वावच्छिन्न-कार्यतानिरूपित-तादात्म्यसंबन्धावच्छिन्नद्रव्यनिष्ठकारणता किञ्चिद्धर्मावच्छिन्ना" इत्यनुमानेन द्रव्यत्वजातिसिद्धिः इति भावः । अत्र कार्यतावच्छेदकधर्मः सत्त्वविशिष्टकार्यत्वम् । कार्यतावच्छेदकसंबन्धः समवायः । कारणं द्रव्यम् । तादात्म्यं कारणतावच्छेदकसंबन्धः । तथा च "समवायसंबन्धावच्छिन्न-सत्त्वविशिष्टकार्यत्वावच्छिन्न-कार्यनिष्ठकार्यतानिरूपित-तादात्म्यसंबन्धावच्छिन्न-द्रव्यनिष्ठकारणता किञ्चिद्धर्मावच्छिन्ना" इति अनुमानं विवक्षितम् ।

नियमात् इति । कार्यकारणभावात् इत्यर्थः । समवायसंबन्धेन कार्यत्वावच्छिन्नं प्रति तादात्म्यसंबन्धेन द्रव्यत्वावच्छिन्नं कारणम् इति कार्यकारणभावात् इत्यर्थः ।

ननु जन्यसत्त्वे इत्यादि । प्रागभावप्रतियोगित्वविशिष्टसत्त्वरूपं यत् कार्यत्वं

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

तदवच्छिन्नं प्रति तादात्म्यसंबन्धेन द्रव्यत्वावच्छिन्नं कारणम् इति कार्यकारणभावे प्रमाणं नास्ति । न च – नीलरूपे नीलरूपोत्पत्तिवारणाय तथाविधकार्यकारणभावः आवश्यकः । तथाविधकार्यकारणभावे सति द्रव्ये एव समवायसंबन्धेन किञ्चित् कार्यं जायते इति लाभात् गुणे नीले द्रव्यतादात्म्याभावात् न नीलोत्पत्त्यापत्तिः इति – वाच्यम् । समवायसंबन्धेन नीलं प्रति स्वाश्रयसमवेतद्रव्यत्वसंबन्धेन नीलं कारणम् इति कार्यकारणभावस्वीकारादेव नीले नीलोत्पत्तिवारणसंभवात् । तथा हि – पटनीलं प्रति तन्तुनीलं कारणम् । पटनीलं समवायसंबन्धेन पटे वर्तते । तत्र तन्तुनीलं स्वाश्रयसमवेतद्रव्यत्वसंबन्धेन वर्तते । स्वं-तन्तुनीलम् । तदाश्रयः – तन्तुः । तत्समवेतं द्रव्यं – पटः इति स्वाश्रयसमवेतद्रव्यत्वं पटस्य अस्ति इति । एवं च समवायसंबन्धेन पटनीले नीलोत्पत्तिः आपाद्यते चेत्, आपाद्यमानं नीलरूपं समवायसंबन्धेन पटनीले स्यात् । तत्र कारणभूतं पटनीलं स्वाश्रयसमवेतद्रव्यत्वसंबन्धेन नास्ति । स्वं – पटनीलम् । तदाश्रयः – पटः । तत्समवेतम् पटनीलम् । तत्तु न द्रव्यम् इति । तथा च जन्यसत्त्वरूपकार्यत्वावच्छिन्नं प्रति तादात्म्यसंबन्धेन द्रव्यत्वेन कारणत्वे मानाभावः । स्वाश्रयसमवेतत्वसंबन्धेन पटनीलस्य स्वस्मिन् सत्त्वेन तत्र समवायेन नीलोत्पत्तिप्रसङ्गः । तद्वारणाय कारणतावच्छेदकसंबन्धकोटौ द्रव्यत्वनिवेशः । नीले द्रव्यत्वविरहात् द्रव्यत्वघटित-संबन्धेन नीलरूपकारणविरहादेव न नीले नीलोत्पत्यापत्तिः ।

ननु एवं ''कार्यत्वावच्छिन्नं प्रति तादात्म्येन द्रव्यं कारणम्'' इति कार्यकारणभावविरहेऽपि समवायेन नीलं प्रति स्वाश्रयसमवेतद्रव्यत्वसंबन्धेन नीलं कारणम् इति कार्यकारणभाववशात् कारणतावच्छेदकसंबन्धघटकतया द्रव्यत्वजातिः सिद्ध्यति इति चेत्, न । तावतापि समवेतेषु द्रव्येषु द्रव्यत्वजातिसिद्धौ अपि समवेत-असमवेतसकलद्रव्यसाधारण्येन द्रव्यत्वजातेः असिद्धेः ।

ननु एवं नीलरक्तादिनिरूपितनानाकारणतावच्छेदकसंसर्गेषु द्रव्यत्वप्रवेशापेक्षया समवायसंबन्धेन कार्यत्वावच्छिन्नं प्रति तादात्म्यसंबन्धेन द्रव्यं कारणम् इति अतिरिक्तः

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

एकः कार्यकारणभावः लाघवात् सिद्ध्यति इति, अत आह – **कार्यत्वस्य** इति । **गौरवात्** इति । कार्यत्वस्य नियतोत्तरवर्तित्वरूपतया नियतत्वस्य व्यापकरूपतया गौरवम् इति भावः ।

किमपेक्षया गौरवात् इति शङ्कायां कालिकसंबन्धेन घटत्वापेक्षया गौरवम् इति वक्तव्यम् । ननु तर्हि लाघवात् कालिकसंबन्धेन घटत्ववत्त्वं कार्यतावच्छेदकम् इति स्वीकृत्य कालिकसंबन्धेन घटत्वावच्छिन्नं प्रति तादात्म्यसंबन्धेन द्रव्यत्वावच्छिन्नस्य कारणतासंभवात् तत्कारणतावच्छेदकस्य द्रव्यत्वजातिसिद्धिः इति, अत आह – **कालिकसंबन्धेन** इति ।

ननु संयोगस्य समवायिकारणतावच्छेदकतया द्रव्यत्वजातिसिद्धिः इति मूले उक्तम् । तत्र प्रथमातिक्रमे कारणाभावात् रूपादिसमवायिकारणतावच्छेदकतया द्रव्यत्वसिद्धिः कुतः न उक्ता इति, अत आह – **अत्र च रूपादिगुणानाम्** इति । **द्रव्यकार्यतया परित्याग** इति । द्रव्यकार्यत्वेन अनुक्तिः इत्यर्थः । एवं च रूपादिकारणतावच्छेदकतया सिद्ध्यत् द्रव्यत्वं रूपवत्सु द्रव्येषु एव विश्राम्येत् । रूपशून्येषु गगनादिषु द्रव्यत्वं न सिद्ध्येत् । संयोगस्य विभागस्य च नित्यानित्यरूपनीरूपसकलद्रव्यवृत्तितया तत्कारणतावच्छेदकतया सिद्ध्यन्ती द्रव्यत्वजातिः सकलद्रव्यसाधारणी स्यात् इत्याशयः ।

ननु संख्यापरिमाणपृथक्त्वानां त्रयाणां सकलद्रव्यवृत्तितया तत्कारणतावच्छेदकतया अपि द्रव्यत्वस्य साधयितुं शक्यतया संयोगविभागापेक्षया पूर्वोपस्थितसंख्यादित्रयपरित्यागे मानाभावः इति, अत आह – **सकलद्रव्यवृत्तिसंख्यादित्रयस्य** इति । कार्यमात्रवृत्तिधर्मस्यैव कार्यतावच्छेदकत्वम् । संख्यात्वादिकं तु न कार्यमात्रवृत्ति । गगनादिवृत्तिसंख्यायाः नित्यतया संख्यात्वस्य नित्यसंख्यायामपि सत्त्वात् । तथा संख्यात्वादित्रितयावच्छिन्नकार्यता- निरूपितकारणतावच्छेदकतया द्रव्यत्वजातिः साधयितुं न शक्यते इति अभिप्रायेण संयोगविभागयोः मूले उपादानम्

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

इति भावः । तथा च ''समवायसंबन्धावच्छिन्न-संयोगत्वावच्छिन्न-कार्यतानिरूपित-तादात्म्यसंबन्धावच्छिन्नद्रव्यनिष्ठकारणता किञ्चिद्धर्मावच्छिन्ना, कारणतात्वात्'' इत्यनुमानं द्रव्यत्वजातौ प्रमाणम् ।।

तत्र शङ्कते – **न च संयोगत्वावच्छिन्नं प्रति** इति । संयोगः द्रव्ययोरेवं समवाय-संबन्धेन जायते इति संयोगत्वावच्छिन्नं प्रति द्रव्यं समवायिकारणम् इति वक्तव्यम् । परन्तु संयोगत्वावच्छिन्नं प्रति द्रव्यत्वेन समवायिकारणत्वे प्रमाणाभावः । न च – तादृशकार्यकारणभावाभावे गुणादावपि समवायसंबन्धेन संयोगः उत्पद्येत इति – वाच्यम् । तद्व्यक्तिसमवेतसत्सामान्यं प्रति तद्व्यक्तित्वावच्छिन्नं समवायिकारणम् इति अवश्यम् अङ्गीकरणीयम् । अन्यथा एकव्यक्तिसमवेतस्य कार्यस्य अन्यव्यक्तौ समवायसंबन्धेन उत्पत्तिप्रसङ्गात् । एवं च यद्व्यक्तौ समवेतं सत् किञ्चित् उत्पद्यते तद्व्यक्तिसमवेततत्कार्यं प्रत्येव तद्व्यक्तेः कारणतया गुणादौ समवायेन कस्यापि कार्यस्य अनुत्पत्या गुणादिव्यक्तेः समवायिकारणत्वविरहात् तत्र संयोगोत्पत्तिः आपादयितुं न शक्यते इति शङ्कितुः आशयः ।

तत्र समाधत्ते – **कार्यमात्रवृत्तिजातेः** इति । ''या या कार्यमात्रवृत्तिः जातिः सा यत्किंचित्कार्यतावच्छेदिका'' इति नियमेन संयोगत्वस्य कार्यमात्रवृत्तितया संयोगत्वमपि यत्किञ्चिन्निष्ठकारणतानिरूपितकार्यतावच्छेदकम् इति स्वीकरणीयम् । तच्च स्वीकरणं संयोगत्वावच्छिन्नं प्रति द्रव्यं समवायिकारणम् इति कार्यकारणभावे सत्येव स्यात् इत्याशयः । ''संयोगत्वं कार्यतावच्छेदकम्, कार्यमात्रवृत्तिजातित्वात्, घटत्ववत्'' इति अनुमानानन्तरं संयोगत्वावच्छिन्नकार्यतानिरूपितकारणतां पक्षीकृत्य द्रव्यत्वजातिः साधनीया ।

ननु संयोगत्वं कार्यमात्रवृत्तिजातिः न भवति । विभुद्वयसंयोगे नित्येऽपि संयोगत्वसत्त्वात् । तथा च संयोगत्वावच्छिन्नकार्यतायाः अप्रसिद्ध्या न तन्निरूपित-कारणतायाः पक्षत्वसंभवः इति आशयेन **विभागस्य वा** इत्युक्तं **मूले** ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

नित्यसंयोगाङ्गीकर्तुः इति । नित्यस्य विभुद्वयसंयोगस्य अङ्गीकर्तुः इत्यर्थः ।

ननु समवायसंबन्धावच्छिन्न-संयोगत्वावच्छिन्न-कार्यतानिरूपित-कारणताव-च्छेदकं गुणत्वमेव अस्तु । न च – गुणत्वस्य गुणवृत्तितया द्रव्यनिष्ठकारणतायां कथं तत् अवच्छेदकम् । कारणताश्रयवृत्तिधर्मस्यैव कारणतावच्छेदकत्वात् इति – वाच्यम् । स्वाश्रयाश्रयत्वरूपपरंपरासंबन्धेन गुणत्वस्यापि द्रव्यवृत्तितया कारणतावच्छेदकत्वसंभवात् । स्वं – गुणत्वम् । स्वाश्रयः-गुणः । तदाश्रयः – द्रव्यम् । अतः गुणत्वं स्वाश्रयाश्रयत्वसंबन्धेन द्रव्ये वर्तते इति आशङ्क्य साक्षात् कारणसंबद्धस्य धर्मस्य बाधे सत्येव अनुमितेः परंपरासंबद्धधर्मविषयकत्वात् । प्रकृते साक्षात् संबद्धस्य द्रव्यत्वस्य कारणतावच्छेकत्वसंभवे परंपरासंबद्धस्य गुणत्वस्य द्रव्यनिष्ठकारणतावच्छेदकत्वम् अनुमितिः विषयीकर्तुं न शक्नोति इति समाधत्ते – अत्र यद्यपि इत्यादिना ।

इदम् उपलक्षणम् इत्यादि । प्रकारान्तरेणापि द्रव्यत्वजातिः साधयितुं शक्यते । समवायसंबन्धेन द्रव्यवति द्रव्यान्तरं नोत्पद्यते । यथा समवायसंबन्धेन घटविशिष्टे कपाले घटान्तरं नोत्पद्यते । कुतः न उत्पद्यते इति शङ्कायां समवायेन द्रव्यं प्रति समवायेन द्रव्यं प्रतिबन्धकम् इति प्रतिबध्यप्रतिबन्धकभावात् न उत्पद्यते इति वक्तव्यम् । तथा च "समवायसंबन्धावच्छिन्न-द्रव्यनिष्ठप्रतिबध्यतानिरूपित-समवायसंबन्धावच्छिन्नद्रव्यनिष्ठ-प्रतिबन्धकता किञ्चिद्धर्मावच्छिन्ना, प्रतिबन्धकतात्वात्, मण्यादिनिष्ठदाहप्रतिबन्धकतावत्" इति अनुमानेन प्रतिबन्धकतावच्छेदकतया द्रव्यत्वजातिसिद्धिः ।

न च – प्रतिबध्यतावच्छेदकतयापि द्रव्यत्वं कुतः न सिद्ध्यति? द्रव्यस्यैव प्रतिबध्यत्वात् प्रतिबन्धकत्वाच्च इति – वाच्यम् । यथा कार्यमात्रवृत्तिधर्मस्यैव कार्यतावच्छेदकत्वम्, तथा कार्यमात्रवृत्तिधर्मस्यैव प्रतिबध्यतावच्छेदकत्वम् अपि । द्रव्यत्वं तु कार्याकार्योभयवृत्तितया न प्रतिबध्यतावच्छेदकम् । अतः

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्रतिबध्यतावच्छेदकतया, द्रव्यत्वजातिः न सिद्ध्यति । प्रतिबन्धतावच्छेदकं तु नित्यानित्योभयवृत्यपि भवितुम् अर्हति, कारणतावच्छेदकवत् इति भावः । किं तर्हि प्रकृते प्रतिबध्यतावच्छेदकम्? इति अत आह – **प्रतिबध्यतावच्छेदकं तु** इति । पृथिव्यादिचतुष्टयमात्रवृत्तिभूतत्वविशेषः प्रतिबध्यतावच्छेदकः । प्रसिद्धं भूतत्वं तु पृथिव्यादिपञ्चकवृत्तितया आकाशवृत्तित्वात् नित्यव्यावृत्तं न भवति इति तस्य प्रतिबध्यतावच्छेदकत्वासंभवात् पृथिव्यादिचतुष्टयमात्रवृत्तिभूतत्वविशेषः इत्युक्तम् । तथा च समवायसंबन्धेन पृथिव्यादिचतुष्टयमात्रवृत्तिभूतत्वावच्छिन्नं प्रति समवायसंबन्धेन द्रव्यत्वावच्छिन्नं प्रतिबन्धकम् इत्युक्तं भवति । यत्र द्रव्ये समवायसंबन्धेन पृथिव्यादिभूतचतुष्टयान्तर्गतवस्तु वर्तते, तत्र पुनः तद्वस्तु न उत्पद्यते । तथा च "पृथिव्यादिचतुष्टयमात्रवृत्ति-समवायसंबन्धावच्छिन्नभूतत्वावच्छिन्न-प्रतिबध्यतानिरूपित-द्रव्यनिष्ठ-समवायसंबन्धावच्छिन्न-प्रतिबन्धकताकिञ्चिद्धर्मावच्छिन्ना, प्रतिबन्धकतात्वात्" इत्यनुमानेन द्रव्यत्वजातिसिद्धिः इति भावः ।

ननु प्रतिबन्धकतावच्छेदकं पृथिव्यादिपञ्चवृत्ति भूतत्वमेव अस्तु । यत्र समवाय-संबन्धेन भूतं वर्तते तत्र समवायसंबन्धेन पृथिव्यादिचतुष्टयं न उत्पद्यते इत्यपि वक्तुं शक्यत्वात् इति, अत आह – **भूतत्वस्य** इति । पृथिव्यादिपञ्चवृत्ति-भूतत्वस्य प्रतिबन्धकतावच्छेदकत्वे पृथिव्यादिचतुष्टयमनोरूपपञ्चवृत्तिमूर्तत्वस्य प्रतिबन्धकतावच्छेदकत्वम् आदाय विनिगमनाविरहः । यथा नववृत्तिद्रव्यत्वस्य प्रतिबन्धकतावच्छेदकत्वम् तथा पञ्चवृत्तिभूतत्वमूर्तत्वयोः अपि प्रतिबन्धकतावच्छेदकत्वं भवितुम् अर्हति इत्याशयेन इत्थम् अभिधानम् ।

ननु द्रव्यत्वस्य प्रतिबन्धकतावच्छेदकत्वेऽपि भूतत्वमूर्तत्वे आदाय विनिगमनाविरहः । द्रव्यत्वं प्रतिबन्धकतावच्छेदकं वा भूतत्वमूर्तत्वे प्रतिबन्धकतावच्छेदके वा इत्यत्र नियामकाभावात् इति अत आह – **द्रव्यत्वस्य** इति । द्रव्यत्वस्य प्रतिबन्धकतावच्छेदकत्वं धर्मिणः – प्रतिबन्धकतावच्छेद-

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

कत्वरूपधर्मवतः द्रव्यत्वस्य साधकं – ग्राहकं यत् अनुमानं तेन सिद्धम् । द्रव्यत्वं यदा अनुमानेन सिद्ध्यति तदा प्रतिबन्धकतावच्छेदकत्वरूपेणैव सिद्ध्यति । द्रव्यत्वस्य प्रतिबन्धकतानवच्छेदकत्वे तु द्रव्यत्वमेव न सिद्ध्येत् इति असिद्धेन तेन साकं सिद्धयोः भूतत्वमूर्तत्वयोः कथं विनिगमनाविरहः इत्याशयः ।

न च तस्य गगनादिवृत्तित्वे इति । पृथिव्यादिभूतचतुष्टयप्रतिबन्धकतावच्छेदकतया सिद्ध्यतः द्रव्यत्वस्य पृथिव्यादिभूतचतुष्टयवृत्तित्वेऽपि गगनादिवृत्तित्वे प्रमाणाभावः । तत्र समवायेन कस्यापि द्रव्यस्य अभावात् इति शङ्का ।

समाधानं तु – तादृशद्रव्यत्वजातेः पृथिव्यादिचतुष्टयमात्रवृत्तित्वे प्रतिबध्यतावच्छेदकेन पृथिव्यादिचतुष्टयमात्रवृत्तिभूतत्वेन सह तुल्यव्यक्तिवृत्तित्वप्रसङ्गात्, गगनादिपञ्चवृत्तित्वाङ्गीकारात् ।

न च – तुल्यव्यक्तिवृत्तित्वं मास्तु । तावता का क्षतिः इति – वाच्यम् । तुल्यव्यक्तिवृत्त्योः जात्योः भेदाभावात् प्रतिबध्यतावच्छेदक - प्रतिबन्धकतावच्छेदकयोः ऐक्यप्रसङ्गात् । न च – तयोः ऐक्यम् अस्तु इति – वाच्यम् । तथा सति किं प्रतिबध्यतावच्छेदकम्, किं प्रतिबन्धकतावच्छेदकम् इति विनिगमनाविरहप्रसङ्गात् । अपि च, यथा कारणतावच्छेदक-कार्यतावच्छेदकयोः भेदः आवश्यकः, तथा प्रतिबध्यतावच्छेदक-प्रतिबन्धकतावच्छेदकयोः भेदः आवश्यकः इत्याशयः ।

न च – प्रतिबध्यतावच्छेदकेन पृथिव्यादिचतुष्टयवृत्तिभूतत्वेन सह द्रव्यत्वस्य तुल्यव्यक्तिवृत्तित्ववारणाय मनोवृत्तित्वमात्रं द्रव्यत्वे कल्प्यताम् । गगनादिवृत्तित्वकल्पने गौरवात् । किञ्च, गगनादिवृत्तित्वकल्पनेपि मूर्तत्वेन सह साङ्कर्यवारणाय मनोवृत्तित्वस्य आवश्यकत्वात् । मूर्तत्वं विहाय द्रव्यत्वं पृथिव्याद्यष्टसु । द्रव्यत्वं विहाय मूर्तत्वं मनसि । उभयोः पृथिव्याद्यष्टसु साङ्कर्यम् इति – वाच्यम् । तथा सति मूर्तत्वजात्या सह द्रव्यत्वस्य तुल्यव्यक्तिवृत्तित्वापत्तेः ।।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

।। तमोनिरूपणम् ।।

मुक्तावली

ननु दशमं द्रव्यं तमः कुतः न उक्तम्? तद्धि प्रत्यक्षेण गृह्यते । तस्य च रूपवत्त्वात् कर्मवत्त्वात् च द्रव्यत्वम् । तच्च गन्धशून्यत्वात् न पृथिवी । नीलरूपत्त्वाच्च न जलादिकम् । तत्प्रत्यक्षे च आलोकनिरपक्षं चक्षुः कारणम् इति चेत् –

न । आवश्यकतेजोऽभावेनैव उपपत्तौ द्रव्यान्तरकल्पनायाः अन्याय्यत्वात् । रूपवत्ताप्रतीतिः तु भ्रमरूपा । कर्मवत्ताप्रतीतिरपि आलोकापसारणौपाधिकी भ्रान्तिः । तमसः अतिरिक्तद्रव्यत्वे अनन्तावयवादिकल्पनागौरवं च स्यात् ।

सुवर्णस्य यथा तेजसि अन्तर्भावः, तथा अग्रे वक्ष्यते ।।

दिनकरी

ननु दशमद्रव्यस्य तमसः सत्त्वात् ''नव द्रव्याणि'' इति अयुक्तम् इति अभिप्रायेण मीमांसकः शङ्कते – ननु इति । ननु तमसि मानाभावादेव तमः न उक्तम् इति आशङ्क्य तमःसाधकप्रत्यक्षप्रमाणम् आह – तद्धि इति । तमो हि इत्यर्थः । प्रत्यक्षेण – चक्षुरिन्द्रियेण । ननु तमसः सिद्धावपि तस्य द्रव्यत्वे किं मानम् इति आशङ्क्य अनुमानप्रमाणम् आह – तस्य इति । तमसः इत्यर्थः । ''च''कारः ''द्रव्यत्वम्'' इत्यनेन अन्वेति । तथा च ''तमः द्रव्यम्, रूपवत्त्वात्'' इति अनुमानं तमसः द्रव्यत्वे प्रमाणं सूचितम् । इदम् उपलक्षणम् – [1]परत्वापरत्वाश्रयत्वात् इत्यपि बोध्यम् । ''इदं तमः परम्'', ''इदम् अपरम्'' इति प्रतीतेः ।

ननु तमसि रूपे मानाभावः । न च – ''नीलं तमः'' इति प्रतीत्या तत्सिद्धिः इति – वाच्यम् । प्रतीतेः भ्रान्तित्वात्; अतः हेत्वन्तरम् आह –

1. परत्वाद्याश्रयत्वात् इति तु पाठान्तरम् । अत्र आदृतः पाठः सु.संमतः ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

कर्मवत्त्वात् इति । कर्मवत्त्वं च समवायसंबन्धेन विवक्षितम् । तेन जन्यमात्रस्य कालिकसंबन्धेन कर्मवत्त्वेऽपि न व्यभिचारः । न च स्वरूपासिद्धिः । ''चलति छाया'' इति प्रतीत्या कर्मवत्त्वसिद्धेः ।

तमसः क्लृप्तद्रव्येषु अन्तर्भावं निराकुरुते – **तच्च** इत्यादिना । **गन्ध** इति । **गन्धाभावस्य** हेतुत्वोक्तौ पटगतगन्धप्रतियोगिकाभावम् आदाय घटे व्यभिचारः । अतः शून्यत्वम् उक्तम् । हेतुश्च प्रतियोगिव्यधिकरणः समवायसंबन्धावच्छिन्न-प्रतियोगिताकः अपि बोध्यः । तेन न उत्पत्तिकालीने संयोगसंबन्धावच्छिन्नगन्धाभाववति च घटे व्यभिचारः । **नीलरूप** इति । अनुगतेन एकेनैव नीलरूपेण हेतुना जलाद्यष्टकभेदसिद्धेः [1]स्नेहभास्वररूपाभावादीनाम् अननुगतानां हेतुतया उपन्यासः न कृतः । **जलादिकम्** इति ''आदि''ना तेजःप्रभृतिद्रव्यसङ्ग्रहः । तथा च नवसु द्रव्येषु अन्तर्भावासंभवेन **परिशेषेण** तमसः अधिकद्रव्यत्वसिद्धिः इति भावः ।।

तदुक्तम् –

> ''तमः खलु चलं नीलं परापरविभागवत् ।
> प्रसिद्धद्रव्यवैधर्म्यात् नवभ्यो भेत्तुमर्हति'' ।। इति ।

ननु तमसः द्रव्यत्वे आलोकनिरपेक्षेण चक्षुरिन्द्रियेण ग्रहः न स्यात्; द्रव्यग्रहे हि आलोकसापेक्षचक्षुरिन्द्रियस्य हेतुत्वात् इति, अत आह – **तत्प्रत्यक्षे च** इति । तमः प्रत्यक्षे च इत्यर्थः । तमोभिन्नद्रव्यचाक्षुषत्वावच्छिन्नं प्रत्येव संयोगसंबन्धेन आलोकत्वेन कारणत्वावधारणात् इति भावः ।

आवश्यकतेजोऽभावेन इति । प्रकृष्टमहत्त्वोद्भूतानभिभूतरूपवत्तेजस्त्वा-वच्छिन्नाभावेन इत्यर्थः । **अन्धकाराभाव** एव तेजः किं न स्यात् इति तु न

---

1. ''स्नेहभास्वररूपाभावादीनाम्'' इति अयं पाठः सु. संमतः। मुद्रितपुस्तकेषु ''स्नेहभावादीनां'' इति पाठः।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

सम्यक् । उष्णस्पर्शभास्वररूपबुद्धेः अनुपपत्तेः इति सूचनाय **आवश्यकपदम्** । **उपपत्तौ** – तमोव्यवहारोपपत्तौ ।

ननु तमसः तेजोऽभावरूपत्वे रूपवत्ताप्रतीतिः कथम्? अभावे रूपाभावात् इति, अत आह – **रूपवत्ता** इति । ननु रूपवत्ताप्रतीतेः भ्रान्तित्वेऽपि ''चलति'' इति प्रत्यक्षसिद्धकर्मवत्त्वहेतुना तमसि द्रव्यत्वं सेत्स्यति इति, अत आह – **कर्मवत्ताप्रतीतिरपि** इति । **न हि द्रव्ये अन्यौपाधिकी कर्मवत्ताप्रतीतिः** इति भावः ।

ननु प्रतीतेः भ्रान्तित्वं तत्रैव स्वीक्रियते, **यत्र उत्तरकाले** बाधज्ञानम् । प्रकृते च ''तमः न चलति'' इति उत्तरकाले बाधज्ञानाभावात् कथं प्रतीतेः भ्रान्तित्वम् इति, अतः दूषणान्तरम् आह – **तमस** इति । **''अवयवादि''** इत्यादिना उत्पत्तिध्वंसपरिग्रहः ।

यत्तु – आरोपितं नीलरूपं तमः इति **कन्दलीकारमतम्** – तत् न । **''इह अन्धकारः''** इति प्रतीतेः भ्रमत्वापत्तेः । तमः नीलं, न तु नीलिमा इति प्रत्ययात् च ।

ननु तमसः अनतिरिक्तत्वेऽपि सुवर्णस्य अतिरिक्तस्य द्रव्यस्य सत्त्वात् नवत्वव्याघातः तदवस्थ एव इति, अत आह – **सुवर्णस्य** इति । **वक्ष्यत** इति । तेजोनिरूपणावसरे इति शेषः ।।

राजीवोल्लासः

ननु **''तच्च गन्धशून्यत्वात् न पृथिवी''** इति मूले ''गन्धशून्यत्वात्'' इत्यस्य स्थाने ''गन्धाभावात्'' इति कुतः न उक्तम् इति आशङ्क्य ''गन्धाभावात्'' इत्युक्ते गन्धप्रतियोगिकाभावः पृथिवीत्वाभावसाधकः हेतुः इति लभ्यते । तथा च तत्तद्गन्धाभावस्यापि हेतुत्वेन साध्याभाववत्यां तत्तद्घटादिरूपपृथिव्यां तत्तदवृत्तिगन्ध-विशेषाभावसत्त्वात् व्यभिचारः स्यात् । तद्वारणाय गन्धसामान्याभावस्य हेतुत्वलाभाय

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

गन्धशून्यत्वात् इत्युक्तम् इति आह – **गन्धाभावस्य हेतुत्वोक्तौ** इति । शून्यादिपद-समभिव्याहारस्थले अन्वयितावच्छेदकावच्छिन्न प्रतियोगिताकाभावबोधकत्वव्युत्पत्तेः गन्धत्वावच्छिन्नप्रतियोगिताकाभावः हेतुः इति लभ्यते । अतः न व्यभिचारः ।

ननु गन्धसामान्याभावस्य हेतुत्वेऽपि उत्पत्तिकालीनघटे ''उत्पन्नं द्रव्यं क्षणम् अगुणम् अक्रियं च तिष्ठति'' इति न्यायेन गन्धसामान्याभावसत्त्वात् व्यभिचारः । तथा समवायसंबन्धेन गन्धवति घटे संयोगसंवन्धावच्छिन्न गन्धत्वावच्छिन्नाभावसत्त्वात् व्यभिचारः इति, अत आह – **हेतुश्च** इति । तथा च प्रतियोगिव्यधिकरणः समवायसंबन्धावच्छिन्न-गन्धत्वावच्छिन्नप्रतियोगिताकाभावः हेतुः । घटे उत्पत्तिकालावच्छेदेन विद्यमानः गन्धाभावः न प्रतियोगिव्यधिकरणः । तत्रैव कालान्तरावच्छेदेन गन्धरूपप्रतियोगिनोऽपि सत्त्वात् । संयोगसंबन्धावच्छिन्न-गन्धाभावस्तु न समवायसंबन्धावच्छिन्नप्रतियोगिताकः इति न व्यभिचारः इति भावः ।

प्राचीनैः ''तमः न पृथिवी, गन्धशून्यत्वात्'', ''तमः न जलम्, स्नेहशून्य-त्वात्'', ''तमः न तेजः, भास्वररूपशून्यत्वात्'' इत्येवं नानाहेतुभिः पृथिव्यादिभेदः साधितः । तथा प्रयासः अनावश्यकः । ''नीलरूपवत्त्वात्'' इत्येकेनैव हेतुना जलाद्यष्टकभेदस्य साधयितुं शक्यत्वात् । अनेकेषां स्नेहाभावादीनां हेतुतया उपन्यासस्य व्यर्थत्वात् इत्याशयेन मूले नीलरूपवत्त्वाच्च न जलादिकम् इत्युक्तम् । तदाह – **अनुगतेन** इति । **परिशेषेण** इति । ''तमः दशमं द्रव्यम्, पृथिव्यादिनवद्रव्यभिन्नत्वे सति द्रव्यत्वात्'' इति परिशेषानुमानेन इत्यर्थः । अत्र अनुमाने पृथिव्यादौ व्यभिचारवारणाय सत्यन्तम् । गुणे व्यभिचारवारणाय द्रव्यत्वम् ।

भेत्तुम् अर्हति इति । भिन्नं भवति इत्यर्थः ।

ननु तमसः द्रव्यत्वे इति । ''तमः न द्रव्यम्, आलोकनिरपेक्षचक्षुर्ग्राह्यत्वात्, आलोकाभाववत्'' इति सत्प्रतिपक्षानुमाने अनुकूलतर्कः अनेन दर्शितः । ''आलोक-

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

निरपेक्षचक्षुर्ग्राह्यत्वम् अस्तु, द्रव्यत्वाभावः मास्तु'' इति शङ्कायां ''यदि तमः द्रव्यं स्यात्, तर्हि आलोकनिरपेक्षचक्षुर्ग्राह्यं न स्यात्, किन्तु आलोकसापेक्षचक्षुर्ग्राह्यमेव स्यात्; द्रव्यं प्रति आलोकसापेक्षचक्षुरिन्द्रियस्य हेतुत्वात्'' इत्याशङ्क्य मूले ''**तत्प्रत्यक्षे च** इत्युक्तम् । भवदुक्तः अनुकूलतर्कः नावतरति । द्रव्यप्रत्क्षं प्रति आलोकसापेक्षचक्षुरिन्द्रियस्य हेतुत्वाभावात् । अन्यथा आलोकरूपद्रव्यस्य प्रत्यक्षत्वं न स्यात् । यदि च आलोकस्य प्रत्यक्षत्वोपपादनाय आलोकभिन्नद्रव्यप्रत्यक्षं प्रति आलोकसापेक्षचक्षुरिन्द्रियं कारणम् इति कार्यकारणभावः स्वीक्रियते, तर्हि तमसः प्रत्यक्षत्वनिर्वाहाय तमोभिन्नद्रव्यचाक्षुषं प्रत्येव आलोकसापेक्षचक्षुरिन्द्रियं कारणम् इति स्वीक्रियताम् । तमस्तु आलोकनिपेक्षेणैव चक्षुषा गृह्यताम् । तथा च तमसः द्रव्यत्वे न किञ्चित् बाधकम् इति मूलस्य आशयः ।

''**तत्प्रत्यक्षे च**'' इत्यत्र ''च''कारः ''यथा तेजःप्रत्यक्षे'' इति दृष्टान्तबोधकः । तथा च कार्यतावच्छेदककोटौ तेजोभिन्नत्वमिव तमोभिन्नत्वमपि निवेश्य तमोभिन्नं तेजोभिन्नं च यत् द्रव्यं तत्प्रत्यक्षं प्रति आलोकसापेक्षं चक्षुः कारणम्, अथ वा संयोगसंबन्धेन आलोकः कारणम् इति कार्यकारणभावः कल्पनीयः इति तमसः द्रव्यत्ववादिनां **मीमांसकानाम्** आशयः ।

ननु तेजोऽभावः तमः इति मते किं तेजस्सामान्याभावः तमःशब्दार्थः? उत तेजोविशेषाभावः? नाद्यः । गाढान्धकारेऽपि तमःप्रतीत्यनुपपत्तेः । तदानीं तेजःपरमाणूनां सद्भावेन तेजस्सामान्याभावस्य असत्त्वात् । न द्वितीयः । सौरादियत्किंचित्तेजस्सत्वेऽपि अन्यस्य तेजसः अभावेन तमः प्रतीत्यापत्तिः इति आशङ्क्य यादृशतेजोऽभावस्य तमःशब्दार्थत्वं तादृशं तेजोऽभावं दर्शयति – **प्रकृष्ट** इति । प्रकृष्टमहत्त्वविशिष्टं उद्भूतम् अनभिभूतं च यद्रूपं तद्विशिष्टं च यत्तेजः तादृशतेजस्सामान्याभावः तमःशब्दार्थः । तेजस्त्र्यणुकसत्त्वेऽपि गाढान्धकारे तमः-प्रतीतेः अनुभवसिद्धत्वात् तदानीं महत्त्वविशिष्टतेजस्सामान्याभावाभावात् तमःप्रतीतेः

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अनुपपत्तिः । अतः महत्त्वे "प्रकृष्ट" इति विशेषणम् । त्र्यणुके महत्त्वसत्त्वेऽपि प्रकृष्टं महत्त्वं नास्ति इति न दोषः । अन्धकारे चक्षुरादितेजस्सत्त्वेऽपि तमःप्रतीतेः उपपादनाय रूपे उद्भूतत्वविशेषणम् । सुवर्णादिरूपतेजस्सत्त्वेऽपि तमःप्रतीतेः उपपत्तये रूपे अनभिभूतत्वविशेषणम् । सुवर्णरूपं तु पार्थिवरूपाभिभूतम् इति न दोषः । तथा च प्रकर्षाश्रय-महत्त्वविशिष्ट-उद्भूतानभिभूतरूपविशिष्टतेजस्सामान्याभावस्य तमःशब्दार्थत्वात् न कोऽपि दोषः ।

मूले तेजसि आवश्यकत्वविशेषणोपादानस्य प्रयोजनम् आह – अन्धकाराभाव एव इति । तेजःस्थाने तमः इति द्रव्यं संयोज्य तमसः अभाव एव तेजः इति स्वीक्रियताम् इति न आशङ्कनीयम् । तेजसः अन्धकाराभावरूपत्वे प्रतीयमानयोः उष्णस्पर्शभास्वररूपयोः अभावरूपे तेजसि असंभवात् तदाश्रयतया अभावव्यतिरिक्तं तेजः अवश्यं स्वीकरणीयः । तथा च अवश्यस्वीकरणीयं यत् तेजः तदभावः तमः इति अनेनैव तमोव्यवहारोपपत्तौ तमोनामकद्रव्यान्तरकल्पनम् अनावश्यकम् इति भावः ।

ननु तमसः तेजोऽभावरूपत्वे "नीलं तमः" इति रूपवत्ताप्रतीतिः कथम्? अभावे रूपाभावात् । अतः अभावातिरिक्तं तमः स्वीकरणीयम् इति आशङ्क्य तमसि रूपवत्ताप्रतीतिः भ्रमरूपा इति **मूले** उक्तम् । तथा च तमसः रूपाभावात् द्रव्यत्वमेव नास्ति इति कथम् अतिरिक्तद्रव्यत्वम् इति **मूलकारस्य** आशयः ।

तदुपरि रूपवत्ताप्रतीतेः भ्रान्तित्वेऽपि "तमः चलति" इति प्रतीतिसिद्ध-क्रियावत्त्वहेतुना तमसः द्रव्यत्वं सिद्ध्यति इति आशङ्क्य क्रियावत्ताप्रतीतिरपि भ्रान्तिरेव इति उक्तं मूले । "**आलोकापसारणौपाधिकी**" इत्यस्य अयं भावः – वस्तुतः तमसि क्रिया नास्ति । तथापि आलोके अपसरति सति तद्गता अपसरणक्रिया तमसि आरोप्यते । यथा स्फटिके जपाकुसुमसंबन्धात् तद्गतं लौहित्यम् आरोप्यते,

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

तथा प्रतियोगिरूपस्य आलोकस्य संबन्धात् तमसि आलोकगतचलनक्रियायाः आरोपः इत्याशयः ।

ननु तमसः द्रव्यत्वेऽपि औपाधिकक्रियाप्रतीतेः संभव इत्याशङ्क्य **''न हि द्रव्ये अन्यौपाधिकी कर्मवत्ताप्रतीतिः''** इति उक्तम् **दिनकर्याम्** । अत्र ''हि'' शब्दः अवधारणार्थकः । द्रव्ये कर्मवत्ताप्रतीतिः अन्यौपाधिक्येव इति न इत्यर्थः । तथा च द्रव्ये कर्मवत्ताप्रतीतेः क्वचित् वेगवतः शकटादेः गमनकाले स्थिरे वृक्षादौ भ्रमरूपा औपाधिकी क्रियावत्ताप्रतीतिः अस्ति, तथापि उपाधिविरहेऽपि स्वाभाविककर्मप्रतीतिरपि द्रव्ये अस्ति । तमसि तु आलोकापसरणक्रियान्वयव्यतिरे-कानुविधायिनी एव कर्मप्रतीतिः इति तस्याः दोषजन्यत्वात् न सा द्रव्यत्वसाधिका इति भावः ।

न च – एवमपि अभावरूपे तमसि भावधर्मरूपायाः क्रियायाः कथम् आरोपः? कुत्रापि अदृष्टत्वात् इति चेत्, न । दुःखाभावे सुखत्वारोपस्य दृष्टत्वात् । भारापगमे ''सुखीसंवृत्तः अहम्'' इति प्रत्ययात् इत्याशयः ।

यत्र उत्तरकाले इति । ''इदं रजतम्'' इति भ्रमानन्तरं ''न इदं रजतम्'' इति बाधनिश्चयात् एव पूर्वतनप्रतीतेः भ्रमत्वं कल्प्यते । प्रकृते च ''तमः न चलति'' इति उत्तरकाले बाधज्ञानाभावात् ''तमः चलति'' इति प्रतीतेः कथं भ्रान्तित्वम् इति भावः ।

इह अन्धकार इति । इह – जलादौ अन्धकारः इति प्रतीतिः अस्ति । अन्धकारः नीलरूपं चेत् जले नीलरूपविरहात् ''इह जले अन्धकारः'' इति प्रतीतेः भ्रमत्वं स्यात् । अन्धकाराभाववति अन्धकारप्रकारकत्वात् ।।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

।। गुणविभागः ।।

कारिकावली

..... अथ गुणाः रूपं रसो गन्धः ततः परम् ।। ३ ।।

स्पर्शः संख्या परिमितिः पृथक्त्वं च ततः परम् ।।
संयोगश्च विभागश्च परत्वं च अपरत्वकम् ।। ४ ।।

बुद्धिः सुखं दुःखमिच्छा द्वेषो यत्नो गुरुत्वकम् ।
द्रवत्वं स्नेहसंस्कारौ अदृष्टं शब्द एव च ।। ५ ।।

मुक्तावली

गुणान् विभजते – अथ गुणाः इति । एते गुणाः चतुर्विंशतिसंख्याकाः कणादेन कण्ठतः "च"शब्देन च दर्शिताः । तत्र गुणत्वजातिसिद्धिः अग्रे वक्ष्यते ।।

दिनकरी

कण्ठतः इति । "रूप - रस-गन्ध-स्पर्शाः संख्यापरिमाणानि पृथक्त्वं संयोगविभागौ परत्वापरत्वे बुद्धयः सुखदुःखे इच्छाद्वेषौ प्रयत्नाश्च गुणाः" इति विभागसूत्रे सप्तदश कण्ठेन उक्ताः । **"च"शब्देन** – सूत्रस्थ "च"शब्देन गुरुत्वद्रवत्व-स्नेह-संस्कार-[1]धर्माधर्म-शब्दाः सप्त समुच्चिताः । ते च सर्वे एकतया चतुर्विंशतिगुणाः इह व्यवहृताः ।

ननु चतुर्विंशतौ किंनाम गुणत्वम्? न च जातिविशेषः, तत्र प्रमाणाभावात्

1. "धर्माधर्मौ अदृष्टं स्यात्" इति गुणग्रन्थे वक्ष्यते। कारिकावल्यां अदृष्टपदात् अदृष्टपदवाच्यत्वेन धर्माधर्मयोः उपस्थितिः, न तु प्रत्येकरूपेण। तदनुसारेण मुक्तावल्यां चतुर्विंशतित्वोक्तिः (सु).

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

इति, अत आह – तत्र इति । गुणेषु इत्यर्थः । **अग्रे** – गुणनिरूपणावसरे । **वक्ष्यत** इति । "द्रव्यकर्मभिन्ने सामान्यवति या कारणता सा किञ्चिद्धर्मावच्छेद्या कारणतात्वात्" इति अनुमानं गुणत्वजातौ प्रमाणम् इति भावः । एतत्तत्त्वं तत्रैव स्फुटीभविष्यति ।।

राजीवोल्लासः

एकतया इति । चतुर्विंशतिरूप-एकसंख्यावत्तया इत्यर्थः । संख्या च अत्र विषयतया अपेक्षाबुद्धिरूपैव, गुणे गुणानङ्गीकारात् इति ।।

।। कर्मविभागः ।।

कारिकावली

उत्क्षेपणं ततोऽपक्षेपणमाकुञ्चनं तथा ।
प्रसारणं च गमनं कर्माणि एतानि पञ्च च ।। ६ ।।

भ्रमणं रेचनं स्यन्दनोर्ध्वज्वलनमेव च ।
तिर्यग्गमनमप्यत्र गमनादेव लभ्यते ।। ७ ।।

मुक्तावली

कर्माणि विभजते – **उत्क्षेपणम्** इति । कर्मत्वजातिस्तु **प्रत्यक्षंसिद्धा**; एवम् उत्क्षेपणत्वादिकमपि । ननु भ्रमणादिकमपि पृथक्कर्म **अधिकतया** कुतः नोक्तम्? अत आह – **भ्रमणम्** इति ।।

दिनकरी

प्रत्यक्षसिद्धा इति । चलनाकारानुगतप्रत्ययवेद्या इत्यर्थः । **अधिकतया** इति । कर्मविभाजकोपाधिभिः भ्रमणत्वादिभिः । मूले **गमनादेव** इति । अथ एवम्

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

उत्क्षेपणादीनाम् अपि गमने अन्तर्भावात् गमनादेव लाभे उत्क्षेपणत्वादिभिः अपि विभागः अनुचितः । न हि उत्क्षेपणादौ गमनत्वं न आनुभाविकम् । ऊर्ध्वम् अधश्च प्रक्षिप्तलोष्टादौ ''ऊर्ध्वं गच्छति, अधो गच्छति'' इति प्रत्ययात् इति चेत्, न । स्वतन्त्रेच्छस्य मुनेः नियोगपर्यनुयोगानर्हत्वात् इति ।।

।। सामान्यनिरूपणम् ।।

कारिकावली

सामान्यं द्विविधं प्रोक्तं परं चापरमेव च ।

मुक्तावली

सामान्यं निरूपयति – सामान्यम् इति । तल्लक्षणं तु नित्यत्वे सति अनेकसमवेतत्वम् । अनेकसमवेतत्वं संयोगादीनामपि अस्ति इत्यतः उक्तं ''नित्यत्वे सति'' इति । नित्यत्वे सति अनेकवृत्तित्वम् अत्यन्ताभावस्यापि अस्ति; अतः वृत्तित्वसामान्यं विहाय समवेतत्वम् उक्तम् । ।

दिनकरी

तल्लक्षणं तु इति । लक्षणप्रयोजनं तु इतरभेदस्य व्यवहारस्य वा सिद्धिः । ''सामान्यम् इतरेभ्यः – द्रव्यादिभ्यः भिद्यते, सामान्यम् इति व्यवहारविषयः वा; नित्यत्वे सति अनेकसमवेतत्वात्, यन्नैवं तन्नैवं, यथा द्रव्यम्'' इति । एवं लक्षणान्तरेऽपि ऊह्यम् । **अनेकत्वम्**-एकभिन्नत्वम् । जलपरमाणुरूपादौ अतिव्याप्तिवारणाय उक्तः विशेष्यभागः । समवेतत्वघटकसमवायफलम् आह – **नित्यत्वे सति अनेकवृत्तित्वम्** इति ।

न च - एवं नित्यसंयोगेऽतिव्याप्तिः इति – **वाच्यम्** । तस्य निरस्तत्वात् । कुतः निरास इति चेत्, न । द्रव्यनिष्ठकारणतानिरूपित-संयोगनिष्ठकार्यताव-

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

च्छेदककोटौ जन्यत्वनिवेशे गौरवात् । नित्यसंयोगाङ्गीकर्तृनये संयोगत्वस्य नित्यवृत्तित्वेन कार्यतानवच्छेदकत्वात् । तुल्ययुक्त्या नित्यविभागसिद्ध्यापत्तेश्च ।।

राजीवोल्लासः

लक्षणप्रयोजनं तु इत्यादि । इतरभेदनिश्चयः व्यवहारविषयत्वनिश्चयश्च लक्षणस्य प्रयोजनम् । यथा सामान्यस्य नित्यत्वे सति अनेकसमवेतत्वं लक्षणम् । तेन च लक्ष्ये सामान्ये तदितरभेदः, ''सामान्यम्'' इति व्यवहारविषयत्वं च अनुमीयते । ''सामान्यम् इतरेभ्यः द्रव्यादिभ्यः भिन्नम्, 'सामान्यम्' इति व्यवहारविषयः वा; नित्यत्वे सति अनेकसमवेतत्वात्, यन्नैवं तन्नैवं; यथा द्रव्यम्'' इति । अत्र अन्वयदृष्टान्ताभावात् व्यतिरेकदृष्टान्तः प्रदर्शितः ।

अनेकत्वम् एकभिन्नत्वम् इति । तथा च एकभिन्नसमवेतत्वम् अनेकसमवेतत्वम् । जातिलक्षणे तदनुपादाने ''नित्यत्वं जातिलक्षणम्'' इत्युक्तौ जलपरमाणुरूपादौ अतिव्याप्तिः । तद्वारणाय एकभिन्नसमवेतत्वम् उपात्तम् । जलपरमाणुरूपं तु एकस्मिन् जलपरमाणौ समवेतम् इति एकभिन्नसमवेतत्वविरहात् न तत्र अतिव्याप्तिः ।

न च – नित्यत्वमात्रोक्तौ नित्यत्वेन प्रसिद्धे आकाशादौ अतिव्याप्तेः वक्तुं शक्यतया जलपरमाणुरूपे अतिव्याप्तिप्रदर्शनं किमर्थम् इति – वाच्यम् । लक्षणघटकस्य एकस्य दलस्य प्रयोजनकथनवेलायां तद्दलघटकपदेन दोषवारणं यत्र न स्यात् तत्रैव प्रयोजनं वक्तव्यम् । आकाशादौ अनेकसमवेतत्वघटकस्य समवेतत्वस्य अभावादेव अतिव्याप्तिवारणसंभवात् अनेकसमवेतत्वनिवेशस्य आकाशे अतिव्याप्तिवारणप्रयोजनकत्वं न उचितम् । जलपरमाणुरूपे तु समवेतत्वस्य सत्त्वेन समवेतत्वनिवेशनमात्रेण तत्र अतिव्याप्तिवारणं न संभवति । किन्तु अनेकसमवेतत्वस्य परिपूर्णस्य दलस्य निवेशे तत्र अतिव्याप्तिवारणं संभवति इति सूचनाय जलपरमाणुरूपपर्यन्तानुधावनम् ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

समवेतत्वं नाम समवायसंबन्धावच्छिन्नवृत्तित्वम् । तत्र वृत्तित्वे समवायसंबन्धावच्छिन्नत्वानिवेशे नित्यत्वे सति अनेकवृत्तित्वं सामान्यलक्षणं स्यात् । तथा सति अत्यन्ताभावेऽतिव्याप्तिः । तस्य नित्यत्वात् अनेकवृत्तित्वात् च । समवायसंबन्धावच्छिन्नत्वनिवेशे तु अत्यन्ताभावस्य एकभिन्ननिरूपितस्वरूप-संबन्धावच्छिन्नवृत्तित्वमेव अस्ति, न तु समवायसंबन्धावच्छिन्नवृत्तित्वम् इति न अतिव्याप्तिः । संयोगादीनामपि एकभिन्ननिरूपितसमवायसंबन्धावच्छिन्नवृत्तित्वात् तत्र अतिव्याप्तिवारणाय ''नित्यत्वे सति'' इत्युक्तम् । गगनपरिमाणादौ अतिव्याप्तिवारणाय अनेकपदम् ।

ननु ''नित्यत्वे सति अनेकसमवेतत्वम् सामान्यलक्षणम्'' इत्युक्तावपि नित्यसंयोगे – विभुद्वयसंयोगे अतिव्याप्तिः इत्याशङ्क्य नित्यसंयोगः नास्ति इति आह – **न च एवम्** इत्यादिना । **द्रव्यनिष्ठकारणता** इति । संयोगं प्रति द्रव्यं समवायिकारणम् इति सर्वसंप्रतिपन्नम् । तेन संयोगत्वावच्छिन्नसमवायसंबन्धावच्छिन्न-कार्यतानिरूपित-तादात्म्यसंबन्धावच्छिन्नकारणत्वं द्रव्यस्य अङ्गीकरणीयम् । संयोगत्वस्य द्रव्यनिष्ठकारणतानिरूपितकार्यतावच्छेदकत्वं तदैव स्यात् यदि नित्यसंयोगः न स्यात् । नित्यसंयोगसत्त्वे तु संयोगत्वस्य नित्यवृत्तित्वेन कार्यतानवच्छेदकतया तदवच्छिन्नकार्यतानिरूपितकारणत्वं द्रव्यस्य अनुपपन्नं स्यात् ।।

मुक्तावली

एकव्यक्तिमात्रवृत्ति न जातिः । **तथा च उक्तम्** –

व्यक्तेरभेदः तुल्यत्वं सङ्करोऽथानवस्थितिः ।
रूपहानिरसंबन्धो जाति-बाधक-सङ्ग्रहः ॥

दिनकरी

ननु आकाशत्वरूपजातौ अव्याप्तिः; तस्याः अनेकसमवेतत्वाभावात् इति आशङ्क्य अलक्ष्यत्वेन उत्तरम् आह – **एकव्यक्तिमात्र** इति । **व्यक्तेः** अभेदरूपस्य

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

बाधकस्य सत्त्वात् इति शेषः । अनुगतधियः जातिकल्पिकायाः अभावात् इति भावः ।

ननु **व्यक्त्यभेदस्य** जातिबाधकत्वमेव असिद्धम्; निःसामान्यत्वे सति विशेषान्यत्वे च सति समवेतत्वस्य जातिलक्षणत्वात् इति, अतः संमतिम् आह – **तथा च** उक्तम् इति । **द्रव्यकिरणावल्याम्** उदयनाचार्यैः इति शेषः ।

बहुवृत्त्येकधर्मस्य सामान्यतया सर्वसिद्धत्वात् एकव्यक्तौ जातिः अनभ्युपेया इति भावः ।

व्यक्तेः अभेदः – **एकव्यक्तिकत्वम्** आकाशत्वादेः जातित्वे बाधकम् ।

तुल्यत्वं तुल्यव्यक्तिवृत्तित्वं घटत्व-कलशत्वादीनां जातीनां भेदे । वस्तुतस्तु – तुल्यत्वं स्वभिन्नजातिसमनियतत्वम् इति यावत् । तच्च जातित्वे बाधकमेव इति ध्येयम् इति भावः ।

सङ्करश्च परस्परात्यन्ताभावसमानाधिकरणधर्मयोः एकत्र समावेशः भूतत्वादेः जातित्वे बाधकः । भूतत्वं विहाय मनसि वर्तमानस्य मूर्तत्वस्य, मूर्तत्वं विहाय गगने वर्तमानस्य भूतत्वस्य च पृथिव्यादिचतुष्टये सत्त्वात् ।

ननु साङ्कर्यस्य जातिबाधकत्वे किं मानम्? इति चेत् – ''स्वसामानाधिकरण्य-स्वाभावसामानाधिकरण्य-उभयसंबन्धेन जातिविशिष्टजातित्वावच्छेदेन स्वसमानाधि-करणाभावप्रतियोगित्वाभावः'' इति नियमस्य भङ्गप्रसङ्ग एव इति । तादृशनियमे मानाभावात् न साङ्कर्यं जातिबाधकम् इति नव्याः ।

अनवस्था तु जातेः जातिमत्त्वे । यद्यपि निखिलजातिषु एकवैजात्या-ङ्गीकारेऽपि तद्वैजात्ये न वैजात्यन्तरम्, एकव्यक्तिवृत्तित्वात्, तथापि निखिलजातिषु एकवैजात्यम् तद्वैजात्यतदाश्रयजातिषु पुनः वैजात्यम् । एवम् अग्रेऽपि इति अनवस्था बोध्या ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

रूपहानिः निःसामान्यत्वगर्भलक्षणव्याघातरूपा विशेषस्य जातिमत्त्वे ।

रूपस्य स्वतः व्यावर्तकत्वस्य हानिः । तत्र जातिस्वीकारे तयैव व्यावर्तकत्वं वाच्यम् । सामान्याश्रयस्य सामान्यरूपेणैव व्यावर्तकत्वम् इति नियमात् । न च सामान्यरूपेण विशेषणां भेदसाधकत्वं संभवति, व्यभिचारात् । तादृशनियमानङ्गीकारे परमाणुगतैकत्वानां तत्तद्व्यक्तित्वेनैव परमाण्वन्तरभेदसाधकत्वसंभवेन विशेषस्य वैयर्थ्यप्रसङ्गात् इति तु ज्यायः ।

असंबन्धः – प्रतियोगितानुयोगितान्यतरसंबन्धेन समवायाभावः समवायाभावयोः जातिमत्त्वे इति ।।

राजीवोल्लासः

अनुगतधिय इति । नानाव्यक्तिषु एकधर्मप्रकारकबुद्धिः अनुगतधीः । यथा नानाघटव्यक्तिषु ''अयं घटः'' इति एकधर्मप्रकारकबुद्धिः जायते । तादृशबुद्धिश्च घटत्वस्य अनेकव्यक्तिवृत्तित्वे एव स्यात् । एवं च अनुगतधिया अनेकव्यक्तिवृत्तिः एका जातिः सिद्ध्यति ।

ननु व्यक्त्यभेदस्य इत्यादि । स्वाश्रयव्यक्त्यैक्यं स्वस्य जातित्वे न बाधकम् । ''घटत्वं जातिः'' इति प्रतीतिवत् ''गगनत्वं जातिः'' इति प्रतीतिरेव गगनत्वस्य जातित्वसाधिका भविष्यति । न च – गगनत्वादेः जातित्वे तत्र अनेकसमवेतत्वरूपजाति-लक्षणस्य अभावात् अव्याप्त्यापत्त्या नित्यत्वे सति अनेकसमवेतत्वं जातिलक्षणं न स्यात् इति – वाच्यम् । गगनत्वस्य जातित्वे तत्रापि यथा अव्याप्तिः न स्यात् तथा जातिलक्षणस्य वक्तव्यत्वात् । तच्च लक्षणम् – ''निःसामान्यत्वे सति विशेषान्यत्वे च सति समवेतत्वम्'' इति । गगनत्वे सामान्यविरहात् निःसामान्यत्वं वर्तते, विशेषान्यत्वं च वर्तते, गगनसमवेतत्वं च अस्ति इति लक्षणसमन्वयः । रूपादौ अतिव्याप्तिवारणाय निःसमान्यत्वे सति इति । विशेषे अतिव्याप्तिवारणाय विशेषान्यत्वे सति इति । रूपध्वंसादौ अतिव्याप्तिवारणाय समवेतत्वम् इति ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

तथा च गगनत्वमपि जातिः इति आशङ्क्य **व्यक्तेरभेदः** इत्यादिना गगनत्वस्य जातित्वं निराकृतं **द्रव्यकिरणावल्याम् उदयनाचार्यैः** इति भावः ।

उदयनाचार्यकारिकायां "जातिबाधकसङ्ग्रहः" इत्यतः पूर्वं "इति" शब्दः अध्याहर्तव्यः । "इति" शब्दः "व्यक्तेरभेदः" इत्यादिशब्दपरः । "व्यक्तेरभेदः" इत्यारभ्य "असंबन्धः" इत्यन्ताः शब्दाः जातिबाधकसङ्ग्रहाभिन्नाः इति शाब्दबोधः । "जातिबाधकसङ्ग्रहः" इत्यस्य जाति-जातित्व-अन्यतरप्रकारकज्ञानप्रतिबन्धकज्ञानविषय-विषयकज्ञानजनकसंक्षिप्तशब्दः इत्यर्थः । व्यक्त्यभेदतुल्यत्वादयः जातिबाधकाः – जाति-जातित्व-अन्यतरप्रकारकज्ञान-प्रतिबन्धक-ज्ञानविषयाः । तेन व्यक्त्यभेदादिविषयकज्ञानं जाति-जातित्व-अन्यतरप्रकारक-ज्ञानप्रतिबन्धकम् इत्युक्तं भवति । तत्र व्यक्तेरभेदः, तुल्यत्वं सङ्करश्च जातित्वबाधकाः । अनवस्थितिः रूपहानिः असंबन्धश्च जातिमत्त्वबाधकाः इति विवेकः ।

बहुवृत्त्येकधर्मस्य इति । अनेकेषु विद्यमानः एको धर्मः सामान्यम् इति सर्वैः अङ्गीकृतत्वात् एकव्यक्तिमात्रवृत्ति गगनत्वादिकं न सामान्यम् इति भावः ।

व्यक्तेरभेदः इत्यस्य विवरणम् **एकव्यक्तिकत्वम्** इति । एकाश्रयकत्वम् इति तदर्थः । एवं च आकाशत्वस्य जातित्वे एकाश्रयकत्वं बाधकम् इत्युक्तं भवति । एकाश्रयकत्वं च स्वप्रतियोगिवृत्तित्व-स्वानुयोगिवृत्तित्व-उक्तोभयसंबन्धेन भेदविशिष्टान्यत्वम् । अनेकाश्रयः धर्मः उक्तोभयसंबन्धेन भेदविशिष्टः भवति । यथा घटत्वम् अनेकवृत्तिधर्मः । तत्र उक्तोभयसंबन्धेन नीलभेदविशिष्टत्वम् अस्ति । स्वं-नीलभेदः तत्प्रतियोगी नीलघटः तद्वृत्तित्वं घटत्वे । स्वं नीलभेदः स्वानुयोगी रक्तघटः तद्वृत्तित्वं च घटत्वे इति । गगनत्वं तु उक्तोभयसंबन्धेन भेदविशिष्टं न भवति । स्वपदेन गगनभेदस्य ग्रहणे स्वप्रतियोगिगगनवृत्तित्वं गगनत्वे वर्तते । परन्तु स्वानुयोगिवृत्तित्वं नास्ति । गगनभेदानुयोगि घटादिकम् । तद्वृत्तित्वस्य गगनत्वे अभावात् । अतः उक्तोभयसंबन्धेन भेदविशिष्टान्यत्वात् गगनत्वादेः

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

एकव्यक्तिकत्वम् । तदेव च गगनत्वादेः जातित्वे बाधकम् । तथा च ''आकाशत्वम् एकव्यक्तिवृत्ति'' इत्याकारकज्ञानम् ''आकाशत्वं जातिः'' इत्याकारकज्ञानं प्रति प्रतिबन्धकम् । जातित्वं नाम नित्यत्वे सति अनेकसमवेतत्वम् । अनेकसमवेतत्व-प्रकारकबुद्धौ एकव्यक्तिवृत्तित्वप्रकारकज्ञानं तद्वत्ताबुद्धिं प्रति तदभाववत्ताज्ञानविधया प्रतिबन्धकम् ।

तुल्यत्वं तुल्यव्यक्तिवृत्तित्वम् इति । अन्यूनानतिरिक्ताश्रयकत्वम् इत्यर्थः । इदं च घटत्वकलशत्वयोः भेदे बाधकम् । तयोः तुल्याश्रयकत्वात् । एवं च यज्जातौ यज्जातितुल्याश्रयकत्वं तत् तज्जातिभेदबाधकम् इति फलितम् ।

ननु एकस्यैव जातिबाधकपदस्य क्वचित् गगनत्वादौ जातित्वबाधकार्थकत्वम्; घटत्वकलशत्वादौ जातिभेदबाधकार्थकत्वं च न संभवति । ''सकृदुच्चरितः शब्दः सकृदेव अर्थं गमयति'' इति न्यायात् इति अस्वरसात् आह – वस्तुतस्तु इति । तुल्यत्वं नाम स्वभिन्नजातिसमनियतत्वम् । इदं च तुल्यत्वं घटत्वकलशत्वयोः भिन्नजातित्वे बाधकम् इति केचित् । स्वं - घटत्वम् । स्वभिन्नं-कलशत्वम् । तत्समनियतत्वं घटत्वे वर्तत इति । परन्तु घटत्वकलशत्वयोः भेदाभावात् घटत्वभिन्नत्वं कलशत्वे दुर्घटम् । अतः कम्बुग्रीवादिमत्त्वस्य जातित्वे बाधकम् इदं तुल्यत्वम् । स्वं-कम्बुग्रीवादिमत्त्वम् । तद्भिन्ना जातिः घटत्वम् । तत्समनियतत्वस्य कम्बुग्रीवादिमत्त्वे सत्त्वात् । समनियतत्वं च व्याप्यत्वे सति व्यापकत्वम् । तथा च स्वव्याप्यत्व-स्वव्यापकत्व-स्वभिन्नत्व-एतत्त्रितयसंबन्धेन जातिविशिष्टत्वं तुल्यत्वम् इति पर्यवसितम् । स्वं - घटत्वम् । तद्व्याप्यत्वं तद्व्यापकत्वं तद्भिन्नत्वं च कम्बुग्रीवादिमत्त्वे वर्तते । अतः एतत्त्रितयसंबन्धेन घटत्वजातिविशिष्टं कम्बुग्रीवादिमत्त्वं भवति इति तस्य घटत्वतुल्यत्वात् न जातित्वम् इत्युक्तं भवति । तथा हि – ''कम्बुग्रीवादिमत्त्वं न जातिः; स्वभिन्नजातिसमनियतत्वात्; यद्यत् स्वभिन्नजातिसमनियतम्, तत् न जातिः; यथा द्रव्यत्वसमनियतपृथिव्यादिमनोऽ-

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

न्तान्यतमत्त्वम्'' इत्यनुमानात् कम्बुग्रीवादिमत्त्वस्य जातित्वाभावसिद्धौ तत्र लिङ्गज्ञानविधया तुल्यव्यक्तिज्ञानस्य हेतुतया एतस्यापि जातित्वज्ञानप्रतिन्ध-कज्ञानजनकत्वेन गौणप्रतिबन्धकत्वात् । अथवा जातित्वाभावव्याप्यतुल्य-व्यक्तित्वनिश्चयत्वेन तदभावव्याप्यवत्तानिश्चयविधया मुख्यप्रतिबन्धकत्वाच्च तद्विषयस्य तुल्यव्यक्तिकत्वस्य जातिबाधकत्वम् उपपद्यत इति भावः ।

स्वभिन्नधर्मसमनियतत्वं तुल्यत्वम् इत्युक्तौ घटत्वस्य जातित्वं न स्यात् । तस्य स्वभिन्नकम्बुग्रीवादिमत्त्वसमनियतत्वात् । अतः धर्मपदम् उपेक्ष्य स्वभिन्नजातिसमनियतत्वम् इत्युक्तम् ।

सङ्करश्च इति । परस्परात्यन्ताभावसमानाधिकरणयोः धर्मयोः एकत्र समावेशः सङ्करः । अयं च भूतत्वमूर्तत्वयोः जातित्वे बाधकः । भूतत्वाभावाधिकरणे मनसि वर्तमानस्य मूर्तत्वस्य, मूर्तत्वाभावाधिकरणे आकाशे वर्तमानस्य भूतत्वस्य च पृथिव्यादिचतुष्टये सत्त्वात् । एवं च स्वसमानाधिकरणः स्वसमानाधिकरणाभावप्रतियोगी च यः धर्मः तद्वन्निष्ठात्यन्ताभावप्रतियोगित्वं स्वस्य जातित्वे बाधकम् । स्वं-भूतत्वम् । स्वाधिकरणपृथिव्यादिचतुष्टयवृत्ति मूर्तत्वम् । तथा स्वाधिकरणा-काशनिष्ठात्यन्ताभावप्रतियोगि च मूर्तत्वं भवति । तद्वत् मनः । तन्निष्ठाभावप्रतियोगित्वं भूतत्वस्य अस्ति इति भूतत्वं न जातिः । एवं च ''भूतत्वं न जातिः, स्वसमानाधिकरण-स्वसमानाधिकरणाभावप्रतियोगि-मूर्तत्ववन्निष्ठाभावप्रतियोगित्वात्'' इत्युक्तं भवति ।

ननु साङ्कर्यस्य जातित्वबाधकत्वे किं प्रमाणम् इति चेत् – यत्र यत्र स्वसामानाधिकरण्य-स्वाभावसामानाधिकरण्य-उभयसंबन्धेन जातिविशिष्टजातित्वम्, तत्र स्वसमानाधिकरणाभावप्रतियोगित्वाभावः इति नियमः अस्ति । अयं च नियमः पृथिवीत्वविशिष्टद्रव्यत्वादौ दृष्टः । स्वं – पृथिवीत्वम् । स्वाधिकरणम् – पृथिवी । तद्वृत्तित्वं द्रव्यत्वे । एवं च स्वं-पृथिवीत्वम् । तदभावाधिकरणं जलादिकम् ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

तद्वृत्तित्वं च द्रव्यत्वे । एवं उक्तोभयसंबन्धेन जातिविशिष्टजातिः पृथिवीत्वविशिष्टं द्रव्यत्वम् । तत्र पृथिवीत्वाधिकरणवृत्यन्ताभाव-प्रतियोगित्वाभावः वर्तते । पृथिवीत्वाधिकरणे द्रव्यत्वाभावविरहात् ।

साङ्कर्यस्थले जातित्वस्वीकारे उक्तनियमस्य भङ्गप्रसङ्गः । तथा हि – स्वं-भूतत्वम् । तत्सामानाधिकरण्यं मूर्तत्वे वर्तते । भूतत्वाभावसामानाधिकरण्यं च मनोऽन्तर्भावेण मूर्तत्वे वर्तते । परन्तु भूतत्वाधिकरणवृत्त्यत्यन्ताभावप्रतियोगित्वाभावः मूर्तत्वे नास्ति । भूतत्वाधिकरणाकाशवृत्त्यत्यन्ताभावप्रतियोगित्वस्यैव मूर्तत्वे सत्त्वात् । तथा च भूतत्वमूर्तत्वयोः जातित्वे उक्तनियमभङ्गप्रसङ्गरूपः तर्कः बाधकः इति **दिनकर्याशयः** ।

सङ्करस्य जातिबाधकत्वसाधकनियमे धर्मविशिष्टधर्मत्वनिवेशे पटसंयोगम् आदाय घटत्वे, घटत्वम् आदाय पटसंयोगे च व्याप्तिभङ्गः स्यात् । तथा हि – पटसंयोगाधिकरणघटेऽपि घटत्वं वर्तते । पटसंयोगाभावाधिकरणे घटेऽपि घटत्वं वर्तते । अतः तत्र उभयसंबन्धेन पटसंयोगविशिष्टत्वं घटत्वेऽस्ति । पटसंयोगाधिकरणकुड्यवृत्त्यन्ताभावप्रतियोगित्वमेव घटत्वेऽस्ति इति नियमभङ्गः ।

एवं प्रथमं जातिपदं निवेश्य द्वितीयजातिपदानिवेशे उक्तोभयसंबन्धेन घटत्वविशिष्टे पटसंयोगे घटत्वसमानाधिकरणात्यन्ताभावाप्रतियोगित्वविरहात् उक्तनियभङ्गः स्यात् । तद्वारणाय धर्मविशिष्टधर्मत्वम् उपेक्ष्य जातिविशिष्टजातित्वम् उक्तम् ।

तादृशनियमे मानाभावात् इति । उक्तोभयसंबन्धेन यज्जातिविशिष्टजातित्वं यत्र, तत्र तज्जातिव्यापकत्वम् इति नियमात्मकव्याप्तिग्राहकस्य अनुकूलतर्कस्य अभावात् साङ्कर्यं जातिबाधकं न भवति इति **नवीनाः** ।।

अनवस्था तु इत्यादि । जातेः जातिमत्त्वे अनवस्था बाधिका । अनवस्था नाम उत्तरोत्तरकल्पनायाः क्वचित् विश्रान्त्यभावः । यदि घटत्वजातौ जातिः स्यात्,

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

तर्हि तस्यामपि जातिः तस्यामपि इति उत्तरोत्तरजातिकल्पनायाः विश्रान्त्यभावः स्यात् । अतः घटत्वादिजातौ जातिः नास्ति ।

ननु घटत्वस्य अनेकवृत्तितया जातित्वेऽपि घटत्वे या जातिः आपाद्यते, तस्याः एकवृत्तितया कथं जातित्वम्? अनेकसमवेतस्यैव जातित्वात् । तथा च जातौ जातिमत्त्वशङ्कैव नोदेति । न च – घटत्वपटत्वादिषु सर्वासु जातिषु एका जातिः अस्तु इति आपादनस्य तात्पर्यम् । आपाद्यमानायाः जातेः घटत्वपटत्वाद्यनेकसमवेतत्वात् जातिलक्षणसंभवात् इति – वाच्यम् । एवमपि घटत्वपटत्वादिषु या जातिः तस्याम् एकव्यक्तिवृत्तितया जातिकल्पनायाः अप्रसक्तेः अनवस्थायाः विरहात् इति चेत्, न । कल्प्यमानायां तस्यां जातौ तदाश्रयघटत्वादिजातिषु च पुनः एका जातिः कल्पनीया । एवम् अग्रेऽपि इति अनवस्थायाः प्रसङ्गात् । **वैजात्यम्** इत्यस्य भिन्ना जातिः इत्यर्थः ।

रूपहानिः इत्यादि । रूपस्य हानिः रूपहानिः । लक्षणहानिः इत्यर्थः । विशेषस्य जातिमत्त्वे विशेषलक्षणस्य भङ्गप्रसङ्गः बाधकः । निःसामान्यत्वे सति–(सामान्यशून्यत्वे सति) सामान्यभिन्नत्वे सति समवेतत्वं विशेषस्य लक्षणम् । सामान्येऽतिव्याप्तिवारणाय सामान्यभिन्नत्वनिवेशः । रूपादौ अतिव्याप्तिवारणाय निःसामान्यत्वनिवेशः । अभावे अतिव्याप्तिवारणाय समवेतत्वनिवेशः । विशेषे विशेषत्वाख्यजात्यङ्गीकारे अस्य लक्षणस्य व्याघातः–भङ्गः, विशेषावृत्तित्वं स्यात् । विशेषत्वाख्यसामान्यवत्त्वात् निःसामान्यत्वघटितलक्षणस्य विशेषे विरहात् ।

ननु उक्तं विशेषलक्षणं **मुक्तावलीकारेण** न उक्तम् इति तद्भङ्गस्य विशेषे जातिमत्त्वबाधकत्वं न **मुक्तावलीकाराभिप्रेतम्** इत्यत प्रकारान्तरेण व्याचष्टे – **रूपस्य** इति । रूपस्य – लक्षणस्य स्वतोव्यावर्तकत्वस्य हानिः – भङ्गः । स्वतो व्यावर्तकत्वं **मुक्तावलीकाराभिप्रेतं** विशेषस्य लक्षणम् । स्वतः – स्वेन रूपेण इत्यर्थः । व्यावर्तकत्वं-भेदानुमापकत्वम् । परमाणौ परमाण्वन्तरभेदसाधने परमाणुगतः

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

विशेषः हेतुः । ''अयं परमाणुः परमाण्वन्तरभिन्नः, एतद्विशेषात्'' इति परमाणुगतविशेषे परमाण्वन्तरगतविशेषात् भेदस्य एतत्परमाणुगतः विशेषः स्वयमेव साधकः । इदमेव विशेषस्य स्वतो व्यावर्तकत्वम् । यदि विशेषस्य जातिमत्त्वं स्यात्, तर्हि सामान्याश्रयस्य सामान्यरूपेणैव व्यावर्तकत्वम् इति नियमात् विशेषोऽपि जात्यैव विशेषान्तरव्यावर्तकः स्यात्, न तु स्वतोव्यावर्तकः । तथा च स्वतो व्यावर्तकत्वलक्षणभङ्गः स्यात् । अतः न विशेषस्य जातिमत्त्वम् ।

न च – जातिरूपेणैव व्यावर्तकत्वम् अस्तु । का क्षतिः? इति – वाच्यम् । विशेषत्वरूपा जातिर्हि सर्वेषु विशेषेषु अनुगता वाच्या । अन्यथा एकव्यक्तिवृत्तित्वेन विशेषत्वस्य जातित्वानुपपत्तेः । तथा च ''अयं विशेषः, तद्विशेषात् भिन्नः, विशेषत्वात्'' इत्युक्ते व्यभिचारः । साध्याभाववति विशेषान्तरेऽपि विशेषत्वसत्त्वात् ।

ननु सामान्यश्रयस्य सामान्यरूपेणैव व्यावर्तकत्वम् इति नियमे मानाभावः । तथा च विशेषस्य जातिमत्त्वेऽपि स्वतोव्यावर्तकत्वं भवितुम् अर्हति इति न लक्षणहानिः इत्याशङ्कां निराकरोति – तादृशनियमानङ्गीकारे इति । विशेषं स्वीकृत्य तस्य स्वतः व्यावर्तकत्वकल्पनापेक्षया विशेषास्वीकरणमेव वरम् । परमाणूनां भेदस्तु परमाणुगतैः एकत्वैरेव सिद्ध्यति । ''अयं परमाणुः तत्परमाणुभिन्नः, एतदेकत्वात्'' इति । तथा च विशेषस्य वैयर्थ्यप्रसङ्गात् सामान्याश्रयस्य सामान्यरूपेण व्यावर्तकत्वं स्वीकरणीयम् । तथा सति व्यभिचारप्रसक्त्या विशेषाणां स्वतोव्यावर्तकत्वम् अवश्यं वाच्यम् इति भावः ।

असंबन्ध इति । प्रतियोगित्वानुयोगित्वान्यतरसंबन्धेन समवायशून्यत्वम् असंबन्धः । अयं च समवायाभावयोः जातिमत्त्वे बाधकः । यत्र यत्र जातिमत्त्वम्, तत्र उक्तान्यतरसंबन्धेन समवायवत्त्वं वर्तते । यथा जातिमतां द्रव्यगुणकर्मणां प्रतियोगित्वसंबन्धेन अनुयोगित्वसंबन्धेन च समवायः अस्ति । घटादिरूपं द्रव्यं समवायसंबन्धेन स्वावयवे वर्तते । अतः समवायप्रतियोगित्वं घटादिद्रव्यस्य ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

घटादिद्रव्ये घटत्वपृथिवीत्वादिजातिः समवायसंबन्धेन वर्तते । अतः समवायानुयोगित्वं घटादिद्रव्याणाम् । एवं गुणकर्मणोरपि बोध्यम् । नित्यद्रव्येषु निरवयवत्त्वात् यद्यपि प्रतियोगितासंबन्धेन समवायो नास्ति, तथापि अनुयोगितासंबन्धेन द्रव्यत्वसमवायः तत्र वर्तते । अत एव प्रतियोगित्वानुयोगित्वोभयसंबन्धेन इत्यनुक्त्वा अन्यतरसंबन्धेन इत्युक्तम् ।

समवायः अभावश्च कुत्रापि समवायसंबन्धेन नास्ति । समवायाभावयोः न किमपि समवायसंबन्धेन वर्तते । अतः प्रतियोगित्वानुयोगित्वान्यतरसंबन्धेन समवायशून्यत्वं समवायाभावयोः । यदि समवायाभावौ जातिमन्तौ स्याताम्, तदा प्रतियोगित्वानुयोगित्वान्यतरसंबन्धेन समवायवन्तौ भवेताम् । यतः उक्तान्यतरसंबन्धेन न समवायवन्तौ, अत एव न जातिमन्तौ । एतावता असंबन्धस्य जातिबाधकत्वं कथम् उपपादितम् इति चेत् –

अत्राहुः मञ्जूषाकाराः – असंबन्धस्य जातिबाधकत्वं च तदाभावव्याप्य-वत्ताज्ञान-मुद्रया । तथा हि – यत्र समवायानुयोगित्वं नास्ति, न तत्र जातिः भवितुम् अर्हति । तत्समवेतत्वासंभवात् । तथा च समवायानुयोगित्वाभावस्य जात्यभावव्याप्यत्वे सिद्धे सुतरां तद्व्याप्यस्य समवायप्रतियोगित्वानुयोगित्वान्यतरा-भावस्य जात्यभावव्याप्यत्वम् इति ।

प्रभाकारास्तु – असंबन्धः जातित्वे जातिमत्त्वे च बाधकः । तथा हि – यथा समवायानुयोगित्वाभावः जात्याभावव्याप्यः, तथा समवायप्रतियोगित्वाभावः जातित्वाभावव्याप्यः । ततश्च समवायप्रतियोगित्वानुयोगित्वान्यतराभावस्य जातित्व-जातिमत्त्वान्यतराभावव्याप्यत्वम् अक्षतम् इति तादृशान्यतरत्वावच्छिन्नवत्ताज्ञान-प्रतिबन्धकज्ञानविषयत्वम् असंबन्धस्य । तथा च व्यक्त्यभेदादित्रयं जातित्वबाधकम् । अनवस्थितिरूपहानी जातिमत्त्वबाधिके । असंबन्धस्तु जातित्वजातिमत्त्वोभयबाधकः । तेन समवायाभावयोः जातित्वं जातिमत्त्वं च बाध्यते – इत्याहुः ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

कारिकावली

द्रव्यादित्रिकवृत्तिस्तु सत्ता परतयोच्यते ॥ ८ ॥
परभिन्ना तु या जातिः सैवापरतया उच्यते ।
द्रव्यत्वादिकजातिस्तु परापरतयोच्यते ॥ ९ ॥
व्यापकत्वात् परापि स्यात्, व्याप्यत्वादपरापि च ।

मुक्तावली

परत्वम् अधिकदेशवृत्तित्वम् । अपरत्वम् अल्पदेशवृत्तित्वम् । सकलजात्यपेक्षया सत्ताया अधिकदेशवृत्तित्वात् परत्वम् । तदपेक्षया च अन्यासां जातीनाम् अपरत्वम् । व्यापकत्वात् इति । पृथिवीत्वाद्यपेक्षया व्यापकत्वात् – अधिकदेशवृत्तित्वात् द्रव्यत्वादेः परत्वम् । सत्तापेक्षया व्याप्यत्वात् – अल्पदेशवृत्तित्वात् द्रव्यत्वादेः अपरत्वम् । तथा च धर्मद्वयसमावेशात् उभयम् अविरुद्धम् ॥

दिनकरी

तदपेक्षया च इति । सत्तापेक्षया च इत्यर्थः । सत्ताजातिश्च "द्रव्यं सत्", "गुणः सन्" इत्याद्यनुगतप्रतीत्यैव सिद्ध्यति ।

अत्र नव्याः – "सन्" इति प्रतीतिविषयः भावत्वमेव । अत एव सामान्यादिषु अपि "सत्" इति व्यवहारः; न तु अतिरिक्ता द्रव्यादित्रिकवृत्तिः सत्ताख्या जातिः इति । तेन "परमपरं चेति द्विविधं सामान्यम्, परं सत्ता" इति **वैशेषिकविभागः** निर्युक्तिकत्वात् अनादेयः इत्याहुः । **तन्न सत्** । ध्वंसकारणतावच्छेदकतया सत्ताजातिसिद्धेः । यत्र प्रतियोगितासंबन्धेन ध्वंसोत्पत्तिः, तत्रैव तादात्म्यसंबन्धेन "सत्" इति सामानाधिकरण्यप्रत्यासत्त्या कार्यकारणभावात् ।

न च – प्रागभावे व्यभिचारः, प्रागभावे सत्ताविरहात् इति – वाच्यम् । प्रागभाववृत्तिप्रतियोगिताभिन्नप्रतोयोगितायाः कार्यतावच्छेदकसंब-न्धत्वात् इति ।

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

वस्तुतस्तु – समवायेन सत्तावच्छिन्नं प्रति तादात्म्येन द्रव्यत्वेन कारणतया जन्यतावच्छेदकतया सत्ताजातिसिद्धिः । तादृशकार्यकारणभावे मानाभाव इति तु न । स्वाश्रयसमवेतत्वसंबन्धेन नीलादेः नीलादौ अपि सत्त्वात् तत्र नीलाद्युत्पत्तिवारणाय तादृशकार्यकारणभावस्य आवश्यकत्वात् ।

न च – स्वाश्रयसमवेतत्वविशिष्टद्रव्यत्वसंबन्धेन नीलादेः हेतुतयैव न तदापत्तिः इति – वाच्यम् । तादृशसमवेतत्वद्रव्यत्वयोः विशेषणविशेष्यभावे विनिगमना-विरहेण कारणताबाहुल्यापत्तेः । **कालिकसमवायोभयसंबन्धस्य** कार्यतावच्छेद-कतावच्छेदकत्वात् सत्तायाः नित्यसाधरण्येऽपि न क्षतिः इति अन्यत्र विस्तरः ।।

राजीवोल्लासः

अत्र नव्याः इत्यादि । ''द्रव्यं सत्'', ''गुणः सन्'' इत्याद्यनुगतप्रतीत्या सत्ताजातिः सिद्ध्यति इति पूर्वम् उक्तम् । अत्र **नव्याः** वदन्ति – ''सन्'' इति प्रतीतिविषयः द्रव्यादित्रिकमात्रवृत्तिः सत्ताख्या जातिः इति नोपपद्यते । किन्तु तादृशप्रतीतिविषयः षट्पदार्थवृत्तिभावत्वमेव । अत एव सामान्यादिषु अपि ''सामान्यं सत्'', ''विशेषः सन्'' इति व्यवहारः प्रतीतिश्च उपपद्यते । तस्मात् ''सामान्यं द्विविधम् – परम् अपरं च'' इति, ''परं सत्ता'' इति वैशेषिकविभागः निर्युक्तिकत्वात् अनादरणीय इति ।

तन्न सत् इति । ध्वंसकारणतावच्छेदकतया द्रव्यादित्रिकमात्रवृत्तिसत्ताजातेः सिद्धेः । यत्र प्रतियोगितासंबन्धेन ध्वंसः उत्पद्यते, तत्र तादात्म्यसंबन्धेन ''सत्'' इति कार्यकारणभावः । प्रतियोगितासंबन्धेन ध्वंसः द्रव्यादित्रिष्वेव जायते । अतः ''प्रतियोगितासंबन्धावच्छिन्न-ध्वंसत्वावच्छिन्न-कार्यतानिरूपित-तादात्म्यसंबन्धा-वच्छिन्नकारणता किञ्चिद्धर्मावच्छिन्ना'' इति अनुमानेन सत्ताजातिः सिद्ध्यति ।

न च – प्रतियोगितासंबन्धेन ध्वंसः प्रागभावे उत्पद्यते । तत्र तादात्म्यसंबन्धेन सत्त्वावच्छिन्नविरहात् व्यतिरेकव्यभिचारात् उक्तकार्यकारणभावः न संभवति इति –

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

वाच्यम् । प्रागभाववृत्तिप्रतियोगिताभिन्नप्रतियोगितायाः कार्यतावच्छेदकसंबन्धत्वं स्वीकृत्य प्रागभावान्यवृत्तिप्रतियोगितासंबन्धेन ध्वंसत्वावच्छिन्नं प्रति तादात्म्यसंबन्धेन सत्त्वावच्छिन्नं कारणम् इति कार्यकारणभावस्वीकारात् न व्यतिरेकव्यभिचारः । प्रागभाववृत्तिप्रतियोगितासंबन्धेन ध्वंसं प्रति तु प्रागभावः कारणम् इति पृथक् कार्यकारणभावश्च कल्पनीयः इति भावः ।

वस्तुतस्तु इत्यादि । समवायसंबन्धेन सत्तावच्छिन्नं द्रव्यं गुणः कर्म वा यत्र उत्पद्यते, तत्र तादात्म्यसंबन्धेन द्रव्यत्वावच्छिन्नं वर्तते । अतः समवायसंबन्धेन सत्तावच्छिन्नं प्रति तादात्म्यसंबन्धेन द्रव्यत्वावच्छिन्नं कारणम् इति कार्यकारणभावः कल्पनीयः । तथा च तादात्म्यसंबन्धावच्छिन्न-द्रव्यत्वावच्छिन्न-कारणतानिरूपित-समवायसंबन्धावच्छिन्न-कार्यतावच्छेदकतया सत्तारूपजातिः सिद्ध्यति ।

न च – तादृशकार्यकारणभावे मानाभावः इति – वाच्यम् । नीले नीलोत्पत्तिवारणाय तादृशकार्यकारणभावस्य आवश्यकत्वात् । समवायसंबन्धेन घटनीलं प्रति स्वाश्रयसमवेतत्वसंबन्धेन कपालनीलस्य कारणतया समवायसंबन्धेन नीलं प्रति स्वाश्रयसमवेतत्वसंबन्धेन नीलं कारणम् इति कार्यकारणभावः आवश्यकः । घटगतनीले स्वाश्रयसमवेतत्वसंबन्धेन घटगतनीलं वर्तते । स्वं – घटगतनीलम् । स्वाश्रयः – घटः । तत्समवेतत्वं घटगतनीलस्य । तथा च तत्र कारणसत्त्वात् समवायसंबन्धेन नीलरूपात्मककार्योत्पत्तिः प्रसज्यते । तद्वारणाय समवायसंबन्धेन सत्तावच्छिन्नं प्रति तादात्म्यसंबन्धेन द्रव्यं कारणम् इति कार्यकारणभावः स्वीकरणीयः । नीले आपाद्यमानं नीलरूपं सत्तावच्छिन्नं सत् समवायसंबन्धेन आपाद्यते । तत्र कारणभूतस्य नीलस्य द्रव्यत्वविरहात् न नीले नीलोत्पत्त्यापत्तिः ।

न च – समवायसंबन्धेन नीलं प्रति स्वाश्रयसमवेतत्वविशिष्टद्रव्यत्वसंबन्धेन हेतुत्वं स्वीकृत्य नीले नीलोत्पत्तिः वारयितुं शक्यते । नीले द्रव्यत्वविरहात् । तथा

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

च समवायसंबन्धेन सत्तावच्छिन्नं प्रति तादात्म्यसंबन्धेन द्रव्यत्वेन पृथक्कारणत्वं मास्तु इति – वाच्यम् । स्वाश्रयसमवेतत्वद्रव्यत्वयोः विशेष्यविशेषणभावे विनिगमनाविरहेण स्वाश्रयसमवेतत्व-विशिष्टद्रव्यत्वसंबन्धेन द्रव्यत्वविशिष्टस्वाश्रयसमवेतत्वसंबन्धेन वा द्रव्यं कारणम् इति कल्पनीयतया अनेककार्यकारणभावकल्पनापत्तेः ।

ननु सत्तायाः नित्यानित्यवृत्तितया कार्यतावच्छेदकत्वासंभवात् कथं कार्यतावच्छेदकतया सत्ताजातिसिद्धिः इत्यत्र आह – **कालिकसमवाय** इति । कालिकसमवायोभयसंबन्धस्य कार्यतावच्छेदकतावच्छेदकत्वस्वीकारात् । तथा च कालिकसमवायोभयसंबन्धेन सत्ताविशिष्टं कार्यं समवायसंबन्धेन यत्र उत्पद्यते, तत्र तादात्म्यसंबन्धेन सम्बद्धं द्रव्यं कारणम् इत्युक्तं भवति । सत्तायाः समवायसंबन्धेन नित्यवृत्तित्वेऽपि कालिकसंबन्धेन नित्यवृत्तित्वं नास्ति । नित्येषु कालिकायोगात् । अतः समवायकालिकोभयसंबन्धेन सत्ता अनित्यमात्रवृत्ति इति तस्याः कार्यतावच्छेदकत्वम् । ततश्च तादात्म्यसंबन्धावच्छिन्न-द्रव्यत्वावच्छिन्न-कारणतानिरूपित-समवायसंबन्धावच्छिन्न-कार्यतानिरूपित समवाय-कालिकोभयसंबन्धावच्छिन्नावच्छेदकताश्रयतया सत्ताजातिः सिद्ध्यति ।।

अनुमानप्रयोगस्तु – ''तादात्म्यसंबन्धावच्छिन्नद्रव्यत्वावच्छिन्नकारणतानिरूपित- समवायसंबन्धावच्छिन्नकार्यता किञ्चिद्धर्मनिष्ठसमवायकालिकोभयसंबन्धावच्छिन्ना-वच्छेदकताका, कार्यतात्वात्'' इति ।।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

।। विशेषनिरूपणम् ।।

कारिकावली

अन्त्यो नित्यद्रव्यवृत्तिः विशेषः परिकीर्तितः ।। १० ।।

मुक्तावली

विशेषं निरूपयति – **अन्त्य इति** । अन्ते – अवसाने वर्तते इति अन्त्यः । यदपेक्षया विशेषः नास्ति इत्यर्थः । घटादीनां द्व्यणुकपर्यन्तानां तत्तदवयवभेदात् परस्परं भेदः । परमाणूनां परस्परं भेदसाधकः विशेषः एव । **स तु स्वत एव** व्यावृत्तः । तेन तत्र विशेषान्तरापेक्षा नास्ति इति भावः ।।

दिनकरी

स्वत एव इति । स्वतो व्यावृत्तत्वं च स्वभिन्नलिङ्गकस्वविशेष्यक-स्वसजातीयेतरभेदानुमित्यविषयत्वम् । साजात्यं च पदार्थविभाजकोपाधिरूपेण । तेन घटादेः तादात्म्येन व्यावृत्तत्वेऽपि, विशेषस्य गुणादिशून्यत्वेन इतरभेदानुमितिविषयत्वेऽपि, द्रव्यादेरपि प्रमेयत्वादिना विशेषसजातीयत्वेऽपि न क्षतिः । ''नित्यद्रव्यवृत्तिः'' इति विशेषणां स्थानकथनम्, न तत् लक्षणे प्रविष्टम्, प्रयोजनाभावात् ।

तत्र – विशेषव्यावृत्तौ ।

ननु एतत्परमाणुत्वादयः व्यावर्तकाः भविष्यन्ति, किं विशेषेण? इति चेत्, न । अव्यावृत्तधर्मस्य व्यावर्तकत्वासंभवात् । तत्र व्यावर्तकान्तरापेक्षायाम् अनवस्थानात् ।

ननु विशेषेषु एष प्रसङ्गः इति चेत्, न । तस्य धर्मिग्राहकमानेन स्वतः व्यावृत्ततयैव सिद्धेः । एवं च नित्यद्रव्येषु विशेषाः सिद्धाः, तद्गुणास्तु न विशेषवन्तः आश्रयरूपेण विशेषेणैव तेषां व्यावृत्तत्वात् । आश्रयस्य च विशेषवत्तया

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

व्यावृत्तत्वेन विशेषत्वसंभवात् इति भावः । **ईश्वराकाशयोः** नित्यज्ञानशब्दाभ्यां व्यावृत्तेः संभवात् न तत्र विशेषः इत्यपि **आहुः** ।

नवीनास्तु – विशेषे अतिरिक्ते मानाभावः । यथैव विशेषाणां स्ववृत्तिधर्मं विना व्यावृत्तत्वम्, तथा नित्यद्रव्याणाम् अपि इति – **आहुः** ।।

राजीवोल्लासः

मूले घटादीनाम् इति । घटादीनां द्व्यणुकपर्यन्तानाम् अवयविनां परस्परं भेदः तत्तदवयवभेदात् भवति । ''अयं घटः घटान्तरात् भिन्नः, एतत्कपालसमवेतत्वात्'' इति रीत्या द्व्यणुकपर्यन्तं भेदः साधनीयः ''इदं द्व्यणुकं द्व्यणुकान्तरात् भिन्नम्, एतत्परमाणुसमवेतत्वात्'' इति । एतत्परमाणोः परमाण्वन्तरादपि भेदस्तु एतत्परमाणुगत-विशेषादेव साधनीयः । न तु अवयवभेदात् । परमाणोः निरवयवत्त्वात् । ततश्च ''अयं परमाणुः परमाण्वन्तरात् भिन्नः, एतद्विशेषात्'' इति अनुमानं पर्यवस्यति । एतत्परमाणुगतस्य विशेषस्य परमाण्वन्तरगतविशेषात् भेदस्तु स्वत एव भवति । अतः विशेषः स्वतः व्यावृत्तः । विशेषस्य विशेषान्तरस्वीकारे अनवस्थाप्रसङ्गः इति भावः ।

तत्र स्वोव्यावृत्तत्वं विशेषलक्षणं परिष्करोति व्याख्यायाम् – **स्वतो व्यावृत्तत्वं च** इति । स्वभिन्नलिङ्गिका–स्वविशेष्यिका–स्वसजातीयेतरभेदविषयिणी या अनुमितिः तद्विषयः–तदुद्देश्यः यः तद्भिन्नत्वम् इत्यर्थः । स्वभिन्नलिङ्गकत्वं च – स्वभिन्नलिङ्गजन्यत्वम् । ''अयं परमाणुः परमाण्वन्तरभिन्नः, एतद्विशेषात्'' इत्यनुमितिः स्वभिन्नलिङ्गक-स्वविशेष्यक – स्वसजातीयेतरभेदानुमितिः । स्वम् – अयं परमाणुः । स्वभिन्नं लिङ्गम् – एतत्परमाणुगतविशेषः । तज्जन्यत्वम् अनुमितेः वर्तते । एवं स्वविशेष्यकत्वं च अनुमितेः वर्तते । एतत्परमाणुविशेष्यकत्वात् । एवं स्वसजातीयम् – एतत्परमाणुसजातीयं यत् इतरत् – परमाण्वन्तरं तद्भेदविषयकत्वं च अनुमितेः वर्तते । तद्विषयः – तदुद्देश्यः एतत्परमाणुः । तद्भिन्नत्वं विशेषे

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

वर्तते । स्वपदेन विशेषस्य ग्रहणे तद्विशेष्यकस्वसजातीयेतरभेदानुमितिः "अयं विशेषः विशेषान्तराद्भिन्नः इति अनुमितिः । तस्यां च स्वभिन्नलिङ्गकत्वं नास्ति । अतः स्वपदेन विशेषः न ग्राह्यः । किन्तु विशेषाश्रयाः पदार्थाः ग्राह्याः । तद्भिन्नत्वं विशेषेषु वर्तते इति स्वतोव्यावृत्तत्वस्य समन्वयः करणीयः । तथा च प्रतियोगिनि स्वत्वं निवेश्यते, न तु अनुयोगिनि इत्युक्तं भवति ।

विशेषस्यापि स्वलिङ्गक-स्वसजातीय-विशेषान्तरभेदविधेयकानुमित्युद्देश्यत्वात् तादृशानुमित्युद्देश्यभिन्नत्वविरहात् असंभवस्य वारणाय अनुमितौ स्वभिन्नलिङ्गकत्वनिवेशः । "घटः विशेषात् भिद्यते, कपालसमवेतत्वात्" इति अनुमितेरपि विशेषभिन्नलिङ्गकत्वात् विशेषप्रतियोगिकभेदविधेयकत्वात् च तादृशानुमितिविषयत्वम् आदाय असंभववारणाय "स्वविशेष्यक" इति अनुमितिविशेषणम् इति तरङ्गिणी । वस्तुतस्तु – अनुमितिविषयत्वम् अनुमित्युद्देश्यत्वरूपं चेत् इदं प्रयोजनं न सङ्गच्छते । उक्तानुमाने विशेषस्य साध्यकोटिप्रविष्टतया अनुमित्युद्देश्येत्वविरहात् । अतः "स्वविशेष्यक" इति स्पष्टार्थम् । अथ वा प्रक्षिप्तम् इति प्राहुः[1] ॥

ननु नञ्द्वयप्रवेशे गौरवात् स्वलिङ्गक-स्वविशेष्यक-स्वसजातीयेतरभेदानुमितिविषयत्वमेव स्वतो व्यावृत्तत्वं वक्तुम् उचितम् इति आशङ्क्य आह – तेन इति । "अयं घटः घटान्तरात् व्यावृत्तः, तादात्म्येन एतद्घटात्" इत्येवं घटादावपि तादात्म्येन घटहेतुकस्वसजातीयघटान्तरप्रतियोगिकभेदानुमितिविषयत्वेन घटादौ विशेषलक्षणातिव्याप्तिः स्यात् । तद्वारणार्थं नञ्द्वयनिवेशः । घटादौ स्वभिन्नस्वावयवसमवेतत्वलिङ्गक-स्वसजातीयभेदानुमिति-विषयत्वस्यापि सत्त्वेन स्वभिन्नलिङ्गकानुमितिविषयत्वावच्छिन्न-प्रतियोगिताकभेदवत्त्वं नास्ति इति न अतिव्याप्तिः ।

1. "स्वविशेष्यक" इति तु केनचित् प्रक्षिप्तम्, न महादेवभट्टलिखितम्। तत्प्रयोजनस्य स्वयम् अनभिधानात् (सु).

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

भेदे स्वसजातीयप्रतियोगिकत्वविशेषणस्य प्रयोजनम् आह – **विशेषस्य गुणादिशून्यत्वेन** इति । तथा च स्वभिन्नलिङ्गक-स्वविशेष्यक-भेदानुमित्यविषयत्वं स्वतो व्यावृत्तत्वम् इत्युक्तौ विशेषेषु लक्षणस्य असंभवः । ''विशेषः स्वेतरद्रव्यभिन्नः, गुणशून्यत्वात्'' इति गुणशून्यत्वलिङ्गकानुमितेः विशेषभिन्नलिङ्गकत्वात् तद्विषयत्वमेव विशेषेषु अस्ति इति अतः स्वसजातीयप्रतियोगिकभेदनिवेशः । विशेषे यः द्रव्यभेदः सः स्वसजातीयप्रतियोगिकः न भवति । द्रव्यस्य विशेषसजातीयत्वविरहात् । अत्र स्वसजातीयत्वं च पदार्थविभाजकोपाधिरूपेण । स्वनिष्ठः यः पदार्थविभाजकोपाधिः तद्वत्त्वं स्वजातीयत्वम् । एवं विवक्षायाः प्रयोजनम् आह – **द्रव्यादेरपि** इति । द्रव्यस्यापि प्रमेयत्वेन रूपेण विशेषसजातीयत्वात् तत्प्रतियोगिकभेदानुमितिम् आदाय पूर्वोक्तरीत्या असंभवः स्यात् । तद्वारणाय पदार्थविभाजकोपाधिरूपेण साजात्यनिवेशः । प्रमेयत्वं तु न पदार्थविभाजकोपाधिः ।

तत्र – **विशेषव्यावृत्तौ** इति । विशेषे विशेषान्तरव्यावृत्तौ साधनीयायां विशेषान्तरापेक्षा नास्ति इत्यर्थः ।

ननु एतत्परमाणुत्वादय इति । एतत्परमाणौ परमाण्वन्तरात् भेदसिद्ध्यर्थं हि विशेषः स्वीकृतः । स च भेदः विशेषं विनापि एतत्परमाणुत्वेन हेतुना सेत्स्यति । ''अयं परमाणुः परमाण्वन्तरभिन्नः, एतत्परमाणुत्वात्'' इति । तथा च विशेषस्वीकारे प्रयोजनं नास्ति इति आशङ्का ।

समाधानं तु – हेतोः यत् प्रतियोगिकभेदसाधकत्वम् अभिमतं तदवृत्तित्वेन ज्ञात एव धर्मः भेदसाधकः हेतुः भवितुम् अर्हति । एवञ्च एतत्परमाणुत्वरूपः धर्मः परमाण्वन्तरावृत्तित्वेन ज्ञातः सन् एव परमाण्वन्तरभेदसाधकः भवेत् । परमाण्वन्तरा-वृत्तित्वं च केनापि हेतुना ज्ञातव्यम् । तथा च एतत्परमाणुत्वे परमाण्वन्तरावृत्ति-त्वसाधकहेत्वन्तरापेक्षायाम् अनवस्थाप्रसङ्गात् एतत्परमाणुत्वं न व्यावर्तकम्, किन्तु विशेष एव ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

ननु विशेषे स्वीकृतेऽपि तस्य परमाण्वन्तरावृत्तित्वेन अज्ञातस्य परमाण्वन्तरभेदसाधकत्वासंभवात् एतद्विशेषे परमाण्वन्तरावृत्तित्वसाधकहेत्वन्तरापेक्षायाम् अनवस्था स्यात् इति चेत्, न । तस्य विशेषस्य धर्मिग्राहकप्रमाणेन स्वतो व्यावृत्ततयैव सिद्धेः । धर्मिग्राहकप्रमाणं च "परमाणुभेदः किञ्चिल्लिङ्गज्ञाप्यः भेदत्वात्, कपालभेदज्ञाप्यघटभेदवत्" इत्यनुमानं विशेषरूपं धर्मिणं ग्राहयत् परमाण्वन्तरावृत्तित्वविशिष्टतयैव विशेषं ज्ञापयति । "विशेषस्य परमाण्वन्तरवृत्तित्वे परमाण्वन्तरभेदसाधकत्वासंभवात् भेदकत्वेन रूपेण विशेष एव न सिद्ध्येत्" इत्याकारकानुपपत्तिप्रतिसन्धानसहकृतात् परामर्शात् परमाण्वन्तरावृत्तित्वेन विशेषः सिद्ध्यति इति भावः ।।

ननु नित्यद्रव्येषु परस्परव्यावृत्त्यर्थं विशेषाख्यपदार्थस्वीकारेऽपि नित्यद्रव्येषु ये गुणाः रूपादयः तेषां परस्परं कथं भेदः सिद्ध्यति इति आशङ्क्य विशेषपदार्थेन परमाणूनां भेदे सिद्धे सति ते एव परस्परं भिन्नाः परमाणवः स्वगतगुणानां गुणान्तरापेक्षया भेदका भवन्ति "इदं रूपं परमाण्वन्तरगतरूपात् भिन्नम्, एतत्परमाणुवृत्तित्वात्" इति । अतः नित्यवृत्तिगुणेषु न विशेषपदार्थः स्वीक्रियते इत्याह – **एवं च नित्यद्रव्येषु** इति । **आश्रयरूपेण** इति । रूपाद्याश्रयपरमाणुस्वरूपेण **विशेषेण** – भेदकेन, तेषां नित्यद्रव्यगुणानां **व्यावृत्तत्वात्** – भिन्नतया ज्ञातत्वात् **आश्रयस्य** – नित्यद्रव्यस्य, **विशेषवत्तया** – विशेषाख्यपदार्थवत्तया, **व्यावृत्तत्वेन** – आश्रयान्तरात् भिन्नतया अवगतत्वेन **विशेषत्वसंभवात्** – भेदकत्वसंभवात् ।

ईश्वराकाशयोः इति । नित्यज्ञानशब्दाभ्यामेव तयोः इतरनित्यद्रव्यभेदसिद्ध्या विशेषे प्रयोजनाभावात् इति भावः । **ईश्वरेत्यादिः आहुः** इत्यन्तम् एकदेशिनां मतम् । तत्र च दिक्कालाकाशादीनां परस्परभेदसिद्धेः प्राक् नित्यज्ञानशब्दयोः कालादिव्यावृत्तत्वासिद्ध्या न तेन कालादिभेदसाधनं संभवति । विशेषस्य तु

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

धर्मिग्राहकमानेन तत्सिद्ध्या विशेषेणैव तत्साधनं संभवति इत्यस्वरससूचनाय "आहुः" इति उक्तम् इति तरङ्गिणी ।

नवीनास्तु इति । विशेषाः यथा स्ववृत्तिधर्मं विना स्वत एव व्यावृत्ताः, तथा नित्यद्रव्याण्यपि स्ववृत्तिवेशेषं विना स्वत एव व्यावृत्तानि भविष्यन्ति, किं विशेषस्वीकारेण इति नवीनानाम् आशयः ।। "आहुः" इति अस्वरसोद्भावनम् । तद्बीजं तु – "त्र्यणुकावयवः सावयवः महदारम्भकत्वात्" इत्यनुमानेन परमाणोः अव्यावृत्तस्यापि सिद्धिसंभवेन नित्यद्रव्याणां व्यावृत्तत्वस्य धर्मिग्राहकमानासिद्धत्वमेव इति ध्येयम् – इति तरङ्गिणी ।।

।। समवायनिरूपणम् ।।

कारिकावली

घटादीनां कपालादौ द्रव्येषु गुणकर्मणोः ।
तेषु जातेश्च संबन्धः समवायः प्रकीर्तितः ।। ११ ।।

मुक्तावली

समवायं दर्शयति – **घटादीनाम्** इति । अवयवावयविनोः गुणगुणिनोः क्रियाक्रियवतोः जातिव्यक्त्योः विशेषनित्यद्रव्ययोश्च यः संबन्धः सः समवायः । समवायत्वं नित्यसंबन्धत्वम् । तत्र प्रमाणं तु – "गुणक्रियादिविशिष्टबुद्धिः विशेषणविशेष्यसंबन्धविषया, विशिष्टबुद्धित्वात्, दण्डीपुरुषः इति विशिष्टबुद्धिवत्" इति अनुमानम् । एतेन संयोगादिबाधात् समवायसिद्धिः ।

न च स्वरूपसंबन्धेन सिद्धसाधनम् अर्थान्तरं वा । अनन्तस्वरूपाणां संबन्धत्वकल्पने गौरवात्, लाघवात् एकसमवायसिद्धिः ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

न च समवायस्य एकत्वे वायौ रूपवत्ताबुद्धिप्रसङ्गः । तत्र रूपसमवायसत्त्वेऽपि रूपाभावात् ।।

दिनकरी

"घटादीनां कपालादौ द्रव्येषु गुणकर्मणोः ।

तेषु जातेश्च संबन्धः" इति मूलम् ।

तत्र घटकपालपदे अवयव्यवयवपरे इत्याह – **अवयवावयविनोः** इति । "जातेः च" इति "च"कारेण नित्यद्रव्येषु विशेषसंबन्धः समुच्चीयते इत्याह – **विशेषनित्यद्रव्ययोः** इति । समवायस्य लक्षणम् आह – **नित्यसंबन्धत्वम्** इति । संबन्धश्च संबन्धिभिन्नः ग्राह्यः । तेन नित्याभावादिस्वरूपसंबन्धे न अतिव्याप्तिः ।

ननु समवायस्य संबन्धत्वे किं प्रमाणम् इति आशङ्क्य आह – **तत्र प्रमाणं तु** इति । "गुणक्रियादि" इति "आदि"ना जातिपरिग्रहः । **संयोगादि** इति । द्रव्ययोः एव संयोगः इति नियमात् इति भावः । अत्र समवायसंबन्धेन पटत्वावच्छिन्नं प्रति तादात्म्यसंबन्धेन तन्तुत्वेन हेतुत्वात् कार्यतावच्छेदकसंबन्धविधया समवायसिद्धिः ।

न च – समवायस्थाने स्वरूपसंबन्धं निवेश्य कार्यकारणभावः कल्पनीयः इति – वाच्यम् । तथा सति "यत्समवेतं कार्यम् उत्पद्यते तत् समवायिकारणम्" इति समवायिकारणव्यवस्था न स्यात् ।

न च – यत्संबद्धं कार्यम् उत्पद्यते तत् समवायिकारणम् इत्येव अस्तु इति – वाच्यम् । कपालसंबद्धघटध्वंसं प्रति कपालस्य समवायिकारणत्वप्रसङ्गात् इत्यपि द्रष्टव्यम् ।

सिद्धसाधनम् इति । अयुतसिद्धयोः स्वरूपसंबन्धः इति वदतः परस्य इति शेषः । **अर्थान्तरं वा** इति । समवायसाधने प्रवृत्तानां नैयायिकानाम् इति शेषः ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

ननु तथापि समवायस्य एकत्वे किं मानम्? अत आह – **लाघवात्** इति । तथा च यथा क्षित्यङ्कुरादिजनकतया ईश्वरः लाघवात् एक एव सिद्ध्यति, तथा समवायोऽपि इत्यर्थः । **रूपवत्ताबुद्धि** इति । रूपवत्ताबुद्धेः प्रमात्वप्रसङ्गः इत्यर्थः । स्पर्शसमवाय-रूपसमवाययोः ऐक्यात् इति भावः । **तत्र** - **वायौ** । **रूपाभावात्** इति । **न च – रूपसमवायसत्त्वे** तेन संबन्धेन तत्र कथं रूपाभावः, संबन्धसत्त्वस्य तेन संबन्धेन संबन्धिसत्त्वव्याप्यत्वात् इति – वाच्यम् । रूपनिरूपितत्वविशिष्टसमवायस्यैव रूपसंबन्धतया वायौ तदभावात् । **न च – विशिष्टस्य** अनतिरिक्तत्वेन विशिष्टसमवायोऽपि वायौ अस्ति इति – वाच्यम् । रूपनिरूपितत्वविशिष्टसमवायनिरूपिताधिकरणताया एव रूपसंबन्धत्वात्, तस्य वायौ अभावात् ।

पृथिव्यां गन्धस्य समवायः, न जले इत्यादिप्रतीतेः समवायस्य नानात्वम् इति तु **नव्याः** ।।

राजीवोल्लासः

ननु नित्यसंबन्धत्वं यदि समवायस्य लक्षणम्, तदा अभावादिप्रतियोगिके तदनुयोगिके च स्वरूपसंबन्धे अतिव्याप्तिः । तस्यापि नित्यत्वात् इति, अत आह – **संबन्धश्च** इति । **संबन्धिभिन्न** इति । संबन्धिभ्यां संबन्धप्रतियोग्यनुयोगिभ्यां भिन्न इत्यर्थः । तथा च संबन्धप्रतियोग्यनुयोगिभिन्नत्वे सति नित्यत्वे सति संबन्धत्वं समवायस्य लक्षणम् । अभावप्रतियोगिकस्वरूपसंबन्धे अभावानुयोगिकस्वरूपसंबन्धे वा संबन्धप्रतियोग्यनुयोगिभिन्नत्वविरहात् न अतिव्याप्तिः । **नित्याभावादि** इति । नित्यः यः अभावः अत्यन्ताभावः अन्योन्याभावश्च तदीयस्वरूपसंबन्धेन इत्यर्थः । ''आदि'' शब्देन समवायः ग्राह्यः । ''भूतलं घटाभाववत्'' इति प्रतीतिनियामकः स्वरूपसंबन्धः अभावप्रतियोगिकः; ''घटाभावे पटाभावः'' इति प्रतीतिनियामकः स्वरूपसंबन्धः अभावानुयोगिकः ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

ननु समवायनानात्ववादिनां नव्यानां मते उक्तानुमानेन न समवायसिद्धिः संभवति । अतिरिक्तानन्तसमवायानां संबन्धत्वकल्पनामपेक्ष्य क्लृप्तानन्तस्वरूपाणामेव संबन्धत्वौचित्यात् इति तन्मतेऽपि समवायसिद्ध्यर्थं स्वयं प्रमाणान्तरम् आह – अत्र इति । समवायसंबन्धेन पटत्वावच्छिन्नं प्रति तादात्म्यसंबन्धेन तन्तुत्वावच्छिन्नस्य कारणत्वं वक्तव्यम् । अन्यथा कपालादौ अपि समवायसंबन्धेन पटोत्पत्तिप्रसङ्गात् । एवं च उक्तकार्यकारणभावमवलम्ब्य ''तादात्म्यसंबन्धावच्छिन्न-तन्तुत्वावच्छिन्न-तन्तुनिष्ठकारणतानिरूपित-पटत्वावच्छिन्न-पटनिष्ठकार्यता किञ्चित्संबन्धावच्छिन्ना, कार्यतात्वात्'' इत्यनुमानेन कार्यतावच्छेदकसंबन्धरूपतया समवायसंबन्धः साधनीयः ।

न च – समवायस्थाने स्वरूपसंबन्धं निवेश्य स्वरूपसंबन्धेन पटत्वावच्छिन्नं प्रति तादात्म्यसंबन्धेन तन्तुत्वावच्छिन्नं कारणम् इत्येव कार्यकारणभावः कल्पनीयः । तथा च कार्यतावच्छेदकसंबन्धः स्वरूपम् एव इति कथं समवायसिद्धिः इति – वाच्यम् । समवायानङ्गीकारे ''यत्समवेतं कार्यम् उत्पद्यते तत् समवायिकारणम्'' इति समवायिकारणलक्षणस्य अनुपपत्तिः । अस्य लक्षणस्य समवायघटितत्वात् । ''यत्समवेतं कार्यम् उत्पद्यते'' इत्यस्य हि यत्र समवायसंबन्धेन कार्यम् उत्पद्यते इत्यर्थः । न च समवायिकारणलक्षणमपि समवायाघटितमेव वक्तुं शक्यम्, ''यत्संबद्धं कार्यम् उत्पद्यते, तत् समवायिकारणम्'' इति । ''यत्संबद्धम्'' इत्यस्य यदनुयोगिकसंबन्धप्रतियोगि इत्यर्थः । स च संबन्धः स्वरूपमपि भवितुम् अर्हति । तथा च समवायिकारणलक्षणे संबन्धत्वेनैव संबन्धप्रवेशात् समवायाभावेऽपि न समवायिकारणलक्षणानुपपत्तिः इति – वाच्यम् । तथा सति घटध्वंसं प्रति कपालस्य समवायिकारणत्वप्रसङ्गात् । तथा हि – ध्वंसप्रागभावौ स्वप्रतियोगिसमवायिकारणे वर्तेते इति नियमात् घटध्वंसः स्वरूपसंबन्धेन कपालसंबद्धः । अतः कपालसंबद्धं घटध्वंसात्मकं कार्यम् उत्पद्यते इति कपालस्य घटध्वंसं प्रति समवायिकारणत्वापत्तिः । अतः समवायिकारणलक्षणे समवायत्वेन समवायः प्रवेशनीयः । एवं च समवायिकारणलक्षणानुपपत्त्या समवायसिद्धिः इति भावः ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

न च स्वरूपसंबन्धेन सिद्धसाधनम् अर्थान्तरं वा इति मूलम् । गुणक्रियादिविशिष्टबुद्धौ विशेषणविशेष्यसंबन्धविषयकत्वे साध्यमाने सः संबन्धः स्वरूपमेव इति वदतः मते स्वरूपसंबन्धम् आदाय सिद्धसाधनम् । समवायः संबन्धः इति वदतां नैयायिकानां मते अनेन अनुमानेन स्वरूपसंबन्धस्यैव सिद्ध्या अनभिमतार्थसिद्धिरूपम् अर्थान्तरं दोष इति मूलस्य भावः । तदाह – **अयुतसिद्धयोः** इति । ययोः एकम् अपराश्रितमेव अवतिष्ठते तौ अयुतसिद्धौ । ''अपराश्रितमेव अवतिष्ठते'' इत्यस्य स्वसत्ताव्यापकापराश्रितत्वकम् इत्यर्थः । यथा घटकपालयोः मध्ये एकः घटः कपालाश्रित एव अवतिष्ठते । यदा यदा घटः अस्ति तदा कपालाश्रितः एव इति यावत् । अतः घटकपालौ अयुतसिद्धौ । परन्तु विनश्यदवस्थे घटे अर्थात् कपालनाशक्षणे – घटस्य कपालाश्रितत्वविरहात् घटकपालयोः अयुतसिद्धत्वानुपपत्तिः । अतः अविनश्यदवस्थम् इत्यपि अयुतसिद्धलक्षणे संयोजनीयम् । अतः एव ययोः एकम् अविनश्यदवस्थम् अपराश्रितमेव अवतिष्ठते तौ अयुतसिद्धौ इति **तर्कसङ्ग्रहे** उक्तम् । स्वाव्यवहितोत्तरक्षणोत्पत्तिकध्वंसप्रतियोगित्वं विनश्यदवस्थत्वम् । तदभावः अविनश्यदवस्थत्वम् । तथा च स्वाव्यवहितोत्तरक्षणोत्पत्तिकध्वंसप्रतियोगित्वाभावकालावच्छिन्न-यत्सत्ता-व्यापकापराश्रितत्वकं यत् तौ अयुतसिद्धौ इति फलितम् । स्वशब्देन कपालनाशावच्छिन्नघटः ग्राह्यः । तदव्यवहितोत्तरक्षणे घटध्वंसः उत्पद्यते । तत्प्रतियोगित्वं कपालनाशावच्छिन्नघटेऽस्ति । अतः कपालनाशावच्छिन्नघटसत्ता स्वाव्यवहितोत्तरक्षणोत्पत्तिकध्वंसप्रतियोगित्वकालावच्छिन्ना भवति । तत्प्रतियोगित्वाभावकालावच्छिन्नघटसत्ता कपालनाशपूर्वकालीनघटसत्ता एव । तद्व्यापकत्वं कपालाश्रितत्वे वर्तते । अत्र व्यापकत्वमपि कालघटितम् । यदा यदा स्वाव्यवहितोत्तरक्षणोत्पत्तिकध्वंसप्रतियोगित्वाभावकालावच्छिन्ना घटसत्ता तदा कपालाश्रितत्वं घटस्य इति व्याप्तेः ।

लाघवात् इति । लाघवज्ञानसहकारात् इत्यर्थः । यथा ''क्षित्यङ्कुरादिकं कृतिजन्यम्, कार्यत्वात्'' इत्यत्र ''कृतिजन्यत्वव्याप्यकार्यत्ववत् क्षित्यादिकम्''

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

इति परामर्शात् कृतेः एकत्वे लाघवम् इति लाघवज्ञानसहकृतात् ''क्षित्यङ्कुरादिकम् एककृतिजन्यम्'' इति एकत्वविषयिणी अनुमितिः, तद्वत् सिद्ध्यतः संबन्धस्य एकत्वे लाघवम् इति लाघवज्ञानसहकृतात् विशेषणविशेष्यसंबन्धविषयकत्वव्याप्यविशिष्टबुद्धित्ववती विशिष्टबुद्धिः इति परामर्शात् एकसंबन्धविषयिणी इति एकत्वविषयकानुमितिः जायते इति भावः । स्वरूपे तु एवं वक्तुं न शक्यम् । स्वरूपस्य अनेकतायां अविवादात् ।

ननु समवायस्य एकत्वे वायौ रूपवत्ताबुद्धिः मूलकारेण आपादिता । सा न सङ्गच्छते । वायावपि भ्रमात्मकरूपवत्ताबुद्धेः इष्टतया तस्याः अनिष्टत्वाभावात् । अनिष्टस्यैव आपादनसंभवात् इति आशङ्क्य आह – **रूपवत्ताबुद्धेः** इति । वायौ रूपवत्ताबुद्धेः प्रमात्वं तु न इष्टम् । अतः रूपवत्ताबुद्धेः प्रमात्वम् आपादयितुं शक्यम् । तथा च ''रूपवत्ताबुद्धिप्रसङ्गः'' इत्यस्य रूपवत्ताबुद्धिप्रमात्वप्रसङ्गः इत्यर्थः इति भावः । प्रमात्वप्रसङ्गे हेतुम् आह – **स्पर्शसमवाय** इति । स्पर्शसमवाय–रूपसमवाययोः एकत्वात् वायौ स्पर्शसमवायस्य सत्त्वात् तदभिन्नस्य रूपसमवायस्यापि सत्त्वात् ''वायुः रूपवान्'' इति बुद्धेः प्रमात्वप्रसङ्गः इति आशयः ।

न च रूपसमवायसत्त्वे इति । वायौ रूपसमवायः अस्ति चेत् समवायसंबन्धेन रूपमपि अस्ति इति वक्तव्यम् । यत्र यत्र यत्प्रतियोगिकयत्संबन्धः, तत्र तेन संबन्धेन तद्वत्त्वम् इति व्याप्तेः । यथा घटप्रतियोगिकसंयोगवति भूतले संयोगसंबन्धेन घटवत्त्वम् । एवं च वायौ रूपप्रतियोगिकसमवायसत्त्वे समवायसंबन्धेन रूपवत्त्वमपि अवश्यं स्यात् इति शङ्कितुः अभिप्रायः ।

समाधत्ते – **रूपनिरूपितत्व** इति । रूपप्रतियोगिकत्वविशिष्टसमवाय एव रूपस्य संबन्धः । वायौ तु रूपप्रतियोगिकत्वविशिष्टसमवायः नास्ति इति रूपमपि नास्ति इति भावः ।

न च विशिष्टस्य इति । विशिष्टशुद्धयोः अनतिरेकात् वायौ शुद्धस्य

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

समवायस्य सत्त्वात् रूपप्रतियोगिकत्वविशिष्टसमवायोऽपि अस्ति इति संबन्धसत्त्वात् संबन्धिनः रूपस्यापि सत्त्वम् आवश्यकम् इति शङ्का ।

समाधानं तु – रूपप्रतियोगिकत्वविशिष्टसमवायनिरूपिताधिकरणत्वम् एव रूपस्य संबन्धः । वायौ तु तादृशाधिकरणता नास्ति, ''वायुः रूपवान्'' इति प्रतीत्यभावात् । अतः वायौ रूपसंबन्धविरहात् रूपमपि नास्ति इति ।

समवायस्य नानात्ववादिनां **नव्यानां** मतम् आह – **पृथिव्याम्** इति । ''पृथिव्यां गन्धस्य समवायः, न जले'' इति प्रतीतिः सर्वेषां भवति । यदि समवायः एकः स्यात्, तर्हि जले रूपसमवायसत्त्वेन तदभिन्नस्य गन्धसमवायस्यापि सद्भावात् जले न गन्धसमवायः इति गन्धसमवायाभावविषयकप्रतीतेः अनुपपत्तिः । तस्मात् गन्धसमवायः अन्यः, रूपसमवायः अन्यः इति समवायनानात्वम् अङ्गीकरणीयम् इति **नव्यानाम्** अभिप्रायः । तथा च **नव्यमते** स्पर्शसमवायवति वायौ रूपसमवायानङ्गीकारात् न रूपवत्ताप्रतीतेः प्रमात्वम् इति भावः ।।

।। वैशिष्ट्यविचारः ।।

मुक्तावली

न च – एवम् अभावस्यापि वैशिष्ट्यं संबन्धान्तरं सिद्ध्येत् इति – वाच्यम् । तस्य नित्यत्वे भूतले घटानयनानन्तरमपि घटाभावबुद्धिप्रसङ्गात् । घटाभावस्य तत्र सत्त्वात् । तस्य च नित्यत्वात् । अन्यथा देशान्तरेऽपि घटाभावप्रतीतिः न स्यात्, वैशिष्ट्यस्य च तत्र सत्त्वात् । मम तु घटे पाकरक्ततादशायां श्यामरूपस्य नष्टत्वात् न तद्वत्ताबुद्धिः । वैशिष्ट्यस्य अनित्यत्वे तु अनन्तवैशिष्ट्यकल्पने तवैव गौरवम् । एवं च तत्तत्कालीनं तत्तद्भूतलादिकं तत्तदभावानां संबन्धः ।।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

दिनकरी

संबन्धान्तरम् इति । अतिरिक्तपदार्थतया इति शेषः । **सिद्ध्येत्** इत्यस्य भूतलादौ इत्यादिः । यदि वैशिष्ट्यम् अतिरिक्तम् उररीक्रियते, तदा तत् नित्यम् अनित्यं वा इति विकल्प्य आद्ये दूषणम् आह – **तस्य** इति ।

ननु वैशिष्ट्यस्य तत्र सत्त्वेऽपि घटानयनदशायां तत्र घटाभावाभावादेव न घटाभावबुद्धिः, अत आह – **घटाभावस्य** इति । **तत्र** – घटवति भूतले । **तस्य** इति । घटाभावस्य इत्यर्थः । **अन्यथा** – घटाभावस्य अनित्यत्वे । **देशान्तरेऽपि** – घटशून्यदेशेऽपि इत्यर्थः । घटत्वावच्छिन्नाभावस्य एकविधत्वात् इति भावः । **वैशिष्ट्यस्य** इति । वैशिष्ट्यस्य नित्यत्वाभ्युपगमपक्षे इत्यादिः । तत्र घटानयनेन घटवति ।

न च – घटवति न घटाभावबुद्धिः, घटवत्ताज्ञानस्य प्रतिबन्धकस्य सत्त्वात् इति – वाच्यम् । घटवत्ताज्ञानविरहदशायां जायमानायाः घटाभावबुद्धेः प्रमात्वप्रसङ्गात् इत्यत्र तात्पर्यात् ।

ननु सिद्धान्तिनोऽपि मते पाकेन रक्ते घटे श्यामरूपसमवायस्य सत्त्वात् श्यामरूपवत्ताधीप्रसङ्गः इति, अत आह – **मम तु** इति ।

द्वितीये दूषणम् आह – **वैशिष्ट्यस्य** इति ।

ननु वैशिष्ट्यानङ्गीकारे घटाभावभूतलयोः कः संबन्धः? स्वरूपम् इति चेत्; तथा सति घटशून्यतादशायाम् इव घटवत्तादशायामपि भूतले घटाभावबुद्धिः तव मतेऽपि स्यात् । घटाभावभूतलयोः तत्स्वरूपसंबन्धस्य च तत्र सत्त्वात्, अत आह – **एवं च** इति । **तत्तत्कालीनम्** इति । "घटाभाववद्भूतलम्" इति ज्ञानकालीनम् इत्यर्थः । **तत्तद्भूतलादिकम्** इति । यत्र यत्र भूतले घटाभावबुद्धिः तत्तद्भूतलादिकम् इत्यर्थः । **तत्तदभावानाम्** इति । यस्य यस्य अभावस्य बुद्धिः

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

तस्य तस्य इत्यर्थः । तथा च न स्वरूपमात्रं संबन्धः, किन्तु ईदृशः स्वरूपविशेषः इति न **पूर्वोक्तातिप्रसङ्गः** इति भावः ।

नव्यास्तु – वैशिष्ट्यं पदार्थान्तरमेव, "भूतलं घटाभाववत्" इति प्रत्ययात् । स्वरूपसंबन्धाभ्युपगमे च **अभावाधिकरणवृत्त्यखण्डभेदतन्मात्रविषयकज्ञानादिकम्** आदाय विनिगमनाविरहः इति – **आहुः** ।।

राजीवोल्लासः

"न च एवम् अभावस्यापि वैशिष्ट्यं संबन्धान्तरं सिद्ध्येत्" इति **मूले** "संबन्धान्तरम्" इत्यस्य संयोगसमवायातिरिक्तपरत्वे इष्टापत्तिः । अभावस्य संयोगसमवायातिरिक्तस्वरूपसंबन्धाङ्गीकारात् इति अतः शेषं पूरयति – **अतिरिक्तपदार्थतया इति शेष इति** । **तस्य नित्यत्वे** इत्यादिमूलस्य अयं भावः – भूतलादौ घटाद्यभावस्य वैशिष्ट्यरूपः अतिरिक्तः संबन्धः यदि अङ्गीक्रियते, तदा तत् वैशिष्ट्यं नित्यम् अनित्यं वा? यदि नित्यं तदा भूतले घटानयनानन्तरमपि घटाभावबुद्धिः स्यात् । अत्यन्ताभावस्य नित्यतया घटकालेऽपि सत्त्वात् वैशिष्ट्याख्यसंबन्धस्य च नित्यतया सत्त्वात् । यदि घटाभावः अनित्यः, तदा घटशून्यदेशेऽपि घटाभावप्रतीतिः न स्यात् । न च – एकघटाभावस्य नाशेऽपि अन्यं घटाभावम् आदाय घटशून्यदेशे घटाभावबुद्धिः उपपद्यते इति – वाच्यम् । घटत्वावच्छिन्नात्यन्ताभावस्य एकत्वात् । यदि तु वैशिष्ट्यम् अनित्यं, तदा अनन्तवैशिष्ट्यकल्पने गौरवम् । अतः वैशिष्ट्यम् अतिरिक्तपदार्थतया न कल्प्यते इति । एवञ्च मूले **"तस्य च नित्यत्वात्"** इत्यनन्तरं **"वैशिष्ट्यस्य च तत्र सत्त्वात्"** इति पठनीयम् । **तस्य नित्यत्वे** इत्यस्य वैशिष्ट्यस्य नित्यत्वे इत्यर्थः । **तत्र सत्त्वात्** इत्यस्य घटवति भूतले सत्त्वात् इत्यर्थः । **तस्य च नित्यत्वात्** इत्यस्य घटाभावस्य नित्यत्वात् इत्यर्थः । **अन्यथा** इत्यस्य घटाभावस्य अनित्यत्वे इत्यर्थः । शिष्टं स्पष्टम् ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

दिनकर्यां न च घटवति इति । वैशिष्ट्यस्य नित्यत्वपक्षे घटवति भूतले घटाभावबुद्धिः आपादयितुं न शक्यते । घटाभावबुद्धिं प्रति घटवत्ताज्ञानस्य प्रतिबन्धकत्वात् इति न च वाच्यम् । घटवति भूतले घटवत्ताज्ञानविरहदशायां घटाभावुद्धेः आपादयितुं शक्यत्वात् ।

न च – घटवति भ्रमात्मिका घटाभावबुद्धिः इष्टैव इति – वाच्यम् । प्रमात्मकबुद्धेः आपाद्यमानत्वात् ।

ननु सिद्धान्तिनोऽपि इति । नित्यसमवायाख्यातिरिक्तपदार्थवादि-सिद्धान्तिनोऽपि पाकेन रक्ते घटे श्यामरूपसमवायस्य सत्त्वात् श्यामरूपवत्ताप्रतीति-प्रसङ्गः इति शङ्का । समाधानं तु – संबन्धस्य सत्त्वेऽपि रक्ततादशायां संबन्धिनः श्यामरूपस्य नष्टत्वात् न श्यामरूपवत्ताप्रतीतिप्रसङ्गः । अतिरिक्तवैशिष्ट्यवादिमते तु घटवति भूतले वैशिष्ट्याख्यसंबन्धस्यसंबन्धिनः घटात्यन्ताभावस्य च नित्यत्वेन वर्तमानतया घटाभावबुद्धिप्रसङ्गः इति तात्पर्यम् ।।

ननु वैशिष्ट्यानङ्गीकारे इत्यादि । वैशिष्ट्याख्यसंबन्धानङ्गीकारे घटात्यन्ताभावभूतलयोः कः संबन्धः? न तावत् स्वरूपम् । तथा सति घटशून्यतादशायामिव घटवत्तादशायामपि भूतलस्वरूपस्य सत्त्वात् घटाभावस्वरूपस्य च सत्त्वात् भूतले घटाभावबुद्धिप्रसङ्गः इति आशङ्क्य एवं चेत् तत्तत्कालीनम् इत्यादिना समाहितम् । तस्य अयं भावः – यस्मिन् काले भूतले घटाभावविषय-कप्रमात्मकबुद्धिः भवति, तत्कालविशिष्ट-तत्तद्भूतलादिकं तत्तद्घटाद्यभावस्य संबन्धः । अतः घटकाले भूतले घटाभावप्रमा न जायते इति तदानीं घटाभावप्रमाकालिक-भूतलस्वरूपस्य विरहात् न घटाभावप्रमायाः आपत्तिः ।

दिनकर्यां ज्ञानकालीनम् इत्यस्य प्रमात्मकज्ञानकालीनम् इत्यर्थः । **पूर्वोक्तातिप्रसङ्गः इति** । घटकाले घटाभावप्रमायाः प्रसङ्गः इत्यर्थः ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

नव्यास्तु इत्यादि । समवायवत् अभावविशिष्टबुद्धिनियामकतया वैशिष्ट्याख्यं पदार्थान्तरम् अङ्गीकरणीयम् । न च – "भूतलं घटाभाववत्" इति विशिष्टबुद्धेः स्वरूपसंबन्धेनैव उपपत्त्या वैशिष्ट्यस्य पदार्थान्तरत्वे मानाभावः इति – वाच्यम् । स्वरूपसंबन्धः अङ्गीकरणीयो वा, तत्तदभावाधिकरणतत्तद्भूतलादिवृत्तिः यः तत्तद्भूतलादिभिन्नत्वप्रकारकप्रमाविशेष्यत्वावच्छिन्नभेदः, अथवा तत्तद्भूतलादिमात्र-विषयकज्ञानं वा संबन्धः इत्यत्र विनिगमनाविरहात् स्वरूपाद्यतिरिक्तस्य वैशिष्ट्यस्य अङ्गीकरणीयत्वात् इति **नव्यानाम्** आशयः ।

अभावाधिकरण इत्यादि । घटाद्यभावाधिकरणं तत्तद्भूतलादि । तद्वृत्तिः अखण्डभेदः तत्तद्भूतलादिभिन्नत्वप्रकारकप्रमाविशेष्यत्वावच्छिन्नप्रतियोगिताकभेदः "तत्तद्भूतलभिन्नं न" इति प्रतीतिसिद्धः । **तन्मात्रविषयक** इति । तत्तद्भूतलादिमात्रविशेष्यकेत्यर्थः ।

"**आहुः**" इति अस्वरसोद्भावनम् । तद्बीजं तु तदधिकरणविषयकनानाज्ञान-व्यक्तीनां संबन्धत्वकल्पनाम् अपेक्ष्य एकस्याः तद्व्यक्तेः तथात्वे लाघवात् न विनिगमनाविरहः । यत्किञ्चिदेकज्ञानव्यक्तेः एव तथात्वे तज्ज्ञानव्यक्त्यभावदशायां संबन्धाभावेन अभावविशिष्टबुद्ध्यनुदयापत्तेः । नित्यज्ञानव्यक्तेः तथात्वेन च तस्याः सर्वविषयकत्वेन प्रतियोगिमत्यपि अभावबुद्धिप्रसंङ्गः इति बोध्यम्" इति तरङ्गिणी ॥

॥ अभावनिरूपणम् ॥

कारिकावली

अभावस्तु द्विधा संसर्गान्योन्याभावभेदतः ।
प्रागभावस्तथा ध्वंसोऽप्यत्यन्ताभाव एव च ॥ १२ ॥
एवं त्रैविध्यमापन्नः संसर्गाभाव इष्यते ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

मुक्तावली

अभावं विभजते – **अभावस्तु** इति । **अभावत्वं द्रव्यादिषट्कान्योन्याभाववत्त्वम्** । संसर्गाभावान्योन्याभावभेदात् इत्यर्थः । अन्योन्याभावस्य एकविधत्वात् तद्विभागाभावात् संसर्गाभावं विभजते – **प्रागभाव** इति । संसर्गाभावत्वम् अन्योन्याभावभिन्नाभावत्वम् । अन्योन्याभावत्वं तादात्म्यसंबन्धावच्छिन्नप्रतियोगिताकाभावत्वम् ।।

दिनकरी

द्रव्यादिषट्कान्योन्याभाव इति । **इह च द्रव्यत्वादि** न प्रतियोगितावच्छेदकम्, अननुगमात् । किन्तु तद्गतषट्त्वसंख्यैव, द्विप्रतियोगिकभेदस्य द्वित्वमिव इति ध्येयम् । **वस्तुतः** भावभिन्नत्वमेव तथा बोध्यम् ।

अत्र केचित् – भावभिन्नत्वस्य अभावत्वे भावत्वरूपविशेषणज्ञानशून्यकाले "घटो नास्ति" इति प्रतीत्यनापत्तिः । एवम् अन्योन्याभावत्वस्य अभावत्वगर्भस्य अग्रे वक्तव्यतया अभावत्वस्य अन्योन्याभावत्वगर्भत्वे अन्योन्याश्रयापत्तिः । एवम् अभावत्वस्य भावभिन्नत्वरूपत्वे "अभावः न भावः" इति वाक्यात् शाब्दबोधानुपपत्तिश्च । उद्देश्यतावच्छेदकविधेययोः ऐक्यात् इति । तस्मात् अखण्डोपाधिः, **अनुयोगिताविशेषः वा अभावत्वम्** इति – वदन्ति ।

अत्र नव्याः – अभावत्वस्य अखण्डोपाधित्वे प्रमाणाभावः । किन्तु भावभिन्नत्वं समवायसामानाधिकरण्यान्यतरसंबन्धावच्छिन्नप्रतियोगिताकसत्ताभावरूपम् । **तच्च पूर्वम् अनुपस्थितमपि** प्रकारः । एवं च घटाभावपटाभावप्रतीतीनाम् अभावांशे अनुगतत्वम् उपपद्यते । **न च विषयतानवस्था** । सत्तात्यन्ताभावव्यक्तेः स्वरूपत एव प्रकारत्वोपगमात् । अत एव सत्तारूपप्रतियोगिज्ञानं विनापि "घटः नास्ति" इति बुद्धौ सः प्रकारः । अभावत्व प्रकारकप्रत्यक्षे एव प्रतियोगिधियः हेतुत्वात् । अन्यथा "इदं तमः" इति प्रतीत्यनापत्तेः । **न च – सत्ताभावरूपस्य**

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अभावत्वस्य अनुपस्थितस्य प्रकारत्वे विशेषणधियः हेतुत्वे व्यभिचारः इति – वाच्यम् । विशेषणभेदेन हेतुतायाः भिन्नत्वेन तत्र तद्धेतुत्वानुपगमात्, फलानुरोधित्वात् कल्पनायाः इति – प्राहुः ।

संसर्गान्योन्याभावभेदतः इति मूलात् एकः संसर्गाख्यः अपरः अन्योन्याख्यः इति प्रतीयते । तच्च अयुक्तम् । संसर्गस्य अभावत्वानङ्गीकारात् इति, अत आह – **संसर्गाभाव** इति । **तथा च** द्वन्द्वान्ते श्रूयमाणस्य अभावपदस्य प्रत्येकं संबन्धात् संसर्गाभावः अन्योन्याभावश्च इति मूलार्थः इति भावः ।

क्रमेण द्वयोः अभावयोः लक्षणम् आह – **संसर्गाभावत्वम्** इति । **अन्योन्याभावे अतिव्याप्तिवारणाय** अन्योन्याभावभिन्न इति । घटादौ अतिव्याप्तिवारणाय अभावपदम् । एवम् अग्रेऽपि । **तादात्म्य** इति । **तादात्म्यत्वेन तादात्म्यावच्छिन्नत्वं** प्रतियोगितायां विवक्षितम् । तेन संयोगावच्छिन्नप्रतियोगिताके संयोग्यत्यन्ताभावे न अतिव्याप्तिः ।।

राजीवोल्लासः

अभावत्वं द्रव्यादिषट्कान्योन्याभाववत्त्वम् इति मूलम् । तस्य द्रव्यादिषट्कभिन्नत्वम् इत्यर्थः । तत्र भेदप्रतियोगितावच्छेदकं किम् इति शङ्कायां द्रव्यत्वगुणत्वादिकं प्रतियोगितावच्छेदकं न भवितुम् अर्हति । तेषाम् अनेकत्वात् । किन्तु द्रव्यादिषट्पदार्थनिष्ठषट्त्वसंख्यैव भेदप्रतियोगितावच्छेदकम् । तथा च द्रव्यादिवृत्तिषट्त्वसंख्यावच्छिन्नप्रतियोगिताकभेदवत्त्वम् अभावत्त्वम् इत्युक्तं भवति । यथा द्विप्रतियोगिकभेदस्य द्वित्वं प्रतियोगितावच्छेदकम्, तथा द्रव्यादिषट्प्रतियोगिक-भेदस्य षट्त्वं प्रतियोगितावच्छेदकम् ।

न च – प्रत्येकं घटपटयोः घटपटगतद्वित्वावच्छिन्नप्रतियोगिताकभेदः अस्ति । तथैव प्रत्येकं द्रव्यादौ षट्त्वावच्छिन्नप्रतियोगिताकभेदस्य सत्त्वात् द्रव्यादीनाम् अपि अभावत्वापत्तिः इति – वाच्यम् । पर्याप्तिसंबन्धावच्छिन्नषट्त्वनिष्ठावच्छेदकता-

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

कभेदस्य द्रव्यादौ सत्त्वेऽपि स्वरूपसंबन्धावच्छिन्नषट्त्वनिष्ठावच्छेदकताकभेदस्य असत्त्वात् । प्रकृते च पर्याप्तिसंबन्धस्य च अनिवेशात् । अपेक्षाबुद्धिविषयत्वरूपस्य षट्त्वस्यैव भेदप्रतियोगितावच्छेदकत्वात् । तदाह – **इह च द्रव्यत्वादि** इत्यादिना ।

ननु व्यासज्यवृत्तिधर्माणां पर्याप्तिसंबन्धेनैव प्रकारत्वम् इति नियमः । अन्यथा द्वित्वस्य समवायेन प्रत्येकमपि सत्त्वेन ''एकः द्वौ'' इति प्रतीत्यापत्तेः । न च – ''एकः द्वौ'' इति प्रतीतिविरहेऽपि ''एकः द्वित्ववान्'' इति प्रतीतेः इष्टतया समवायेनापि व्यासज्यवृत्तिधर्माणां प्रकारत्वम् आवश्यकम् इति – वाच्यम् । ''द्वित्ववान्'' इति प्रतीतौ मतुबर्थसमवायस्यैव प्रकारत्वात् । तथा च ''षड्भिन्नम्'' इति प्रतीतौ पर्याप्तिसंबन्धेनैव षट्त्वस्य प्रकारत्वानुभवात् षट्त्वावच्छिन्नभेदः निष्प्रामाणिकः एव इत्यभिप्रायेण आह – **वस्तुतः** इति ।

अभावत्वस्य अखण्डोपाधित्वं वदतां मतम् उपन्यस्यति – **अत्र केचित्** इति । अभावत्वं नाम अखण्डोपाधिः । न तु भावभिन्नत्वादिरूपम् । तथा हि – यदि भावभिन्नत्वम् अभावत्वम्, तदा भावत्वरूपविशेषणज्ञानशून्यकाले ''भूतले घटो नास्ति'' इति प्रतीतेः अनुपपत्तिः । किञ्च, भावभिन्नत्वं नाम भावत्वावच्छिन्नप्रतियोगिताकान्योन्याभाववत्त्वम् । तद्घटकम् अन्योन्याभावत्वं च तादात्म्यसंबन्धावच्छिन्नप्रतियोगिताकाभावत्वम् । तथा च अन्योन्याभावशरीरे अभावत्वस्य प्रवेशात् अभावत्वे ज्ञाते तद्घटितान्योन्याभावत्वज्ञानम् । अन्योन्याभावत्वज्ञाने सति तद्घटिताभावत्वज्ञानम् इति अन्योन्याश्रयप्रसङ्गः । एवम् अभावत्वं भावभिन्नत्वं चेत् ''अभावः न भावः'' इति वाक्यात् शाब्दबोधानुपपत्तिः । अभावः भावभिन्नः इति हि तदर्थः । तत्र भावभिन्नम् उद्दिश्य भावभिन्नत्वस्य विधानात् उद्देश्यतावच्छेदकमपि भावभिन्नत्वम्, विधेयमपि भावभिन्नत्वम् इति उद्देश्यतावच्छेदकविधेययोः ऐक्ये आकाङ्क्षाविरहेण शाब्दबोधस्य अनुदयात् । तस्मात् अभावत्वम् अखण्डोपाधिः । अखण्डोपाधिर्नाम जात्यतिरिक्तः इतरपदार्थाघटितः धर्मः ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

ननु अभावत्वस्य अखण्डोपाधित्वं न विचारसहम् । तत्साधकप्रमाणाभावात् इति, अत आह – **अनुयोगिताविशेषो वा** इति । अभावत्वं नाम भावभिन्नेषु वर्तमानः भावभेदनिरूपितानुयोगिताविशेषः । संसर्गाभावनिरूपितानुयोगिताव्यावर्तनाय विशेषपदम् ।

अभावत्वस्य अखण्डोपाधित्वं दूषयतां **नवीनानां** मतम् आह – **अत्र नव्या** इति । अभावत्वं न अखण्डोपाधिः । तत्र प्रमाणाभावात् । न च – घटाद्यभावेषु "अभावः" इत्याकारकानुगतप्रतीतिरेव अभावत्वे प्रमाणम् इति – वाच्यम् । अनुगतोपाधिं विनापि भावभिन्नत्वम् आदाय अनुगतप्रतीतेः उपपत्तेः । अतः अभावत्वं नाम भावभिन्नत्वमेव ।

न च – अत्र पक्षे अभावत्वस्य अन्योन्याभावगर्भतया अन्योन्याभावत्वस्य अभावगर्भतया च अन्योन्याश्रयापत्तिः इति – वाच्यम् । भावभिन्नत्वस्य अन्योन्याभावरूपत्वानङ्गीकारात् । किन्तु समवाय-स्वसमवायिसमवायान्यतरसंबन्धावच्छिन्न-सत्तानिष्ठ-प्रतियोगिताकात्यन्ताभावः भावभिन्नत्वम् । द्रव्यादिषु त्रिषु समवायसंबन्धेन सत्ता वर्तते । स्वं – सत्ता । स्वसमवायि – द्रव्यम् । तत्समवायः सामान्यादिषु त्रिषु । यद्यपि समवायः सत्तासमवायिनि स्वरूपसंबन्धेनैव वर्तते, तथापि तस्य स्वरूपस्य समवायात्मकत्वात् सत्तासमवायिसमवायः समवायेऽपि वक्तुं शक्यते । अभावे तु समवायसंबन्धेन वा स्वसमवायिसमवायसंबन्धेन वा सत्ता नास्ति इति तादृशान्यतरसंबन्धावच्छिन्नप्रतियोगिताकसत्ताभाववत्त्वम् अक्षतम् ।

ननु यदि अभावत्वं सत्ताभावरूपं तदा सत्तायाः अनुपस्थितिकाले "घटो नास्ति" इत्यादि अभावप्रतीत्यनुपपत्तिः इति आशङ्क्य आह – **तच्च** इति । सत्ताभावरूपं भावभिन्नत्वं **पूर्वम् अनुपस्थितमपि** "घटो नास्ति" इति बुद्धौ प्रकारतया भासते । अतः न दोषः ।

ननु अनुयोगिताविशेषः अभावत्वम् इति पक्षे लाघवसत्त्वात् अनुयोगिता-

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

विशेषस्य अभावत्वरूपत्वं कुतः न अङ्गीक्रियते इति, अत्र आह – **एवं च** इति । घटाभावपटाभावादिविषयकप्रतीतिषु अभावांशे एकधर्मप्रकारकत्वम् अनुभूयते । स च एकः धर्मः अभावत्वाख्यः । तत् यदि अनुयोगिताविशेषरूपं स्यात्, तदा अनुयोगितायाः निरूपकप्रतियोगिभेदेन भिन्नतया अभावप्रतीतेः अनुगतधर्मप्रकारकत्वं न उपपद्यते । अभावत्वस्य सत्ताभावरूपत्वे तस्य एकतया तत्प्रकारकत्वेन घटाभावादिप्रतीतीनाम् एकधर्मप्रकारकत्वम् उपपद्यते ।

ननु जात्यखण्डोपाधिव्यतिरिक्तस्य सत्ताभावस्य स्वरूपतः भानासंभवेन अभावत्वेनैव घटाभावाद्यंशे प्रकारता वाच्या । तच्च अभावत्वं सत्ताभावरूपम् । तदपि पुनः सत्ताभावरूपेण अभावत्वेन प्रकारः इति अङ्गीकरणीयम् । तथा च अभावप्रतीतौ अनन्तविषयताः कल्पनीयाः इति आशङ्कां निराकरोति – **न च विषयतानवस्था** इति । सत्तात्यन्ताभावव्यक्तेः जात्यतिरिक्तस्यापि स्वरूपतयैव प्रकारत्वाभ्युगमात् न विषयतानन्त्यम् इति भावः ।

ननु सत्ताभावस्य स्वरूपतः प्रकारत्वाङ्गीकारेऽपि सत्ताज्ञानशून्यकाले ''घटः नास्ति'' इत्यादिप्रतीतिः अनुपपन्नैव । अभावज्ञाने प्रतियोगिज्ञानस्य कारणत्वात्, सत्ताज्ञानं विना सत्ताभावबुद्ध्यसंभवात् इति, अत आह – **अत एव** इति । अभावत्वप्रकारकप्रत्यक्षे एव प्रतियोगिज्ञानं कारणम् । स्वरूपतः अभावबुद्धौ तु प्रतियोगिज्ञानं न कारणम् । यदि अभावत्वाप्रकारकबुद्धावपि प्रतियोगिज्ञानं कारणं स्यात्, तर्हि प्रतियोगिनः तेजसः ज्ञानं विना ''इदं तमः'' इति प्रतीतेः अनुपपत्तिः । ''इदं तमः'' इति बुद्धौ तेजोऽभावरूपं तमः न तेजोऽभावत्वेन भासते, अपि तु तेजोऽभावनिष्ठतद्व्यक्तित्वेन भासते । अत एव तेजोज्ञानं विनापि ''इदं तमः'' इति प्रतीतेः उपपत्तिः ।

ननु अभावत्वं भावभिन्नत्वम् । तच्च सत्ताभावरूपम् । ''घटो नास्ति'' इत्यादिबुद्धौ सत्तारूपप्रतियोग्यनुपस्थित्या पूर्वानुपस्थितमपि प्रकारतया भासते

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

इत्यङ्गीकारे विशिष्टबुद्धित्वावच्छिन्नं प्रति विशेषणज्ञानं कारणम् इति कार्यकारणभावे व्यतिरेकव्यभिचारः । ''घटो नास्ति'' इति अभावत्वविशिष्टाभावबुद्धेः विशेषणं सत्ताभावरूपं यत् अभावत्वम्, तज्ज्ञानं विनापि जायमानत्वात् इति आशङ्क्य समाधत्ते – **न च सत्ताभावरूपस्य** इत्यादिना । विशेषणभेदेन विशिष्टबुद्धिं प्रति विशेषणज्ञानकारणतायाः भेदात्, प्रकृतस्थले अभावत्वरूपविशेषणज्ञानं विनापि विशिष्टबुद्धेः जायमानतया अभावत्वविशिष्टबुद्धिं प्रति अभावत्वरूपविशेषणज्ञानस्य कारणत्वं नाङ्गीक्रियते । यत्र विशेषणज्ञानं विना विशिष्टबुद्ध्यनुत्पादरूपं फलं तत्रैव तत्फलानुरोधेन विशेषणज्ञानस्य विशिष्टबुद्धिं प्रति कारणत्वं कल्प्यते । यथा घटादिज्ञानम् अन्तरा घटादिविशिष्टविषयकबुद्ध्यनुदयात् घटादिज्ञानं घटादिविशिष्टबुद्धौ कारणम् इति कल्प्यते । ''घटो नास्ति'' इत्यादौ अभावत्वज्ञानं विनापि अभावत्वविशिष्टविषयकबुद्धेः उदयात् अत्र विशेषणज्ञानस्य कारणत्वं न कल्प्यते इति भावः ।

संसर्गान्योन्याभावभेदतः इति मूलात् इति । संसर्गश्च अन्योन्याभावश्च संसर्गान्योन्याभावौ, तयोः भेदात् इति विग्रहवाक्यस्वीकारे अभावः द्विविधः – संसर्गः अन्योन्याभावश्च इत्यर्थः प्रतीयेत । स च अनुपपन्नः । संसर्गस्य अभावत्वविरहात् अभावप्रभेदत्वासंभवात् इति आशङ्क्य **मुक्तावल्यां ''संसर्गाभावान्योन्याभाव-भेदात्''** इति व्याख्यातम् । अयमर्थः मूलात् कथं लभ्यते इति, अत्र आह – **तथा च** इति । संसर्गश्च अन्योन्यं च संसर्गान्योन्ये, तयोः अभावौ संसर्गान्योन्याभावौ, तयोः भेदात् इति विग्रहवाक्यम् । द्वन्द्वात् संसर्गान्योन्यपदात् पश्चात् श्रूयमाणस्य अभावपदस्य प्रत्येकं संबन्धात् संसर्गाभावः अन्योन्याभावश्च मूलात् लभ्यते इति भावः ।

अन्योन्याभावे अतिव्याप्तिवारणाय इति । अन्योन्याभावभिन्नत्वे सति अभावत्वं संसर्गाभावस्य लक्षणम् । अभावत्वमात्रोक्तौ अन्योन्याभावे अतिव्याप्तिः ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

तद्वारणाय सत्यन्तम् । अन्योन्याभावभिन्नत्वमात्रोक्तौ अन्योन्याभावभिन्ने घटादौ अतिव्याप्तिः । तद्वारणाय अभावत्वरूपं विशेष्यम् इति भावः ।

ननु तादात्म्यसंबन्धावच्छिन्नप्रतियोगिताकाभावत्वम् अन्योन्याभावस्य लक्षणम् इत्युक्तौ संयोगावच्छिन्नप्रतियोगिताके संयोग्यत्यन्ताभावे अतिव्याप्तिः । तथा हि– ''संयोगी नास्ति'' इति प्रतीतिसिद्धः अभावः संयोग्यत्यन्ताभावः । संयोगवान् नास्ति इति तदर्थः । तस्य प्रतियोगी संयोगवान् । प्रतियोगितावच्छेदकः संयोगः । अतः अयं संयोगावच्छिन्नप्रतियोगिताकः । अयं च अत्यन्ताभावः तादात्म्यसंबन्धावच्छिन्नप्रतियोगिताकः भवति । संयोगितादात्म्यस्य संयोगरूपतया संयोगावच्छिन्नप्रतियोगिताकः अभावः संयोगितादात्म्यावच्छिन्नप्रतियोगिताकः भवति । संयोगितादात्म्यं हि संयोगिवृत्तिः असाधारणः धर्मः । संयोगिवृत्तिः असाधारणधर्मस्तु संयोग एव । अतः संयोगितादात्म्यं संयोगरूपम् इति आशङ्क्य आह – **तादात्म्यत्वेन तादात्म्यावच्छिन्नत्वम्** इति । तथा च तादात्म्यत्वावच्छिन्ना तादात्म्यनिष्ठा या संसर्गविधया अवच्छेदकता तन्निरूपकप्रतियोगिताकाभावः अन्योन्याभावः इत्युक्तं भवति । संयोग्यत्यन्ताभावे संयोगः संयोगत्वेनैव अवच्छेदकः । तथा च संयोगत्वावच्छिन्नसंयोगनिष्ठावच्छेदकताकप्रतियोगिताकत्वसत्त्वेऽपि तादात्म्यत्वावच्छिन्नावच्छेदकताकप्रतियोगिताकत्वं नास्ति इति संयोग्यत्यन्ताभावे न अतिव्याप्तिः इति भावः ।।

मुक्तावली

विनाश्यभावत्वं प्रागभावत्वम् । जन्याभावत्वं ध्वंसत्वम् । नित्यसंसर्गाभावत्वम् अत्यन्ताभावत्वम् ।।

दिनकरी

प्रागभावस्य लक्षणम् आह – **विनाश्यभावत्वम्** इति । अत्र ध्वंसे अतिव्याप्तिवारणाय विनाशि इति ।।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

ननु प्रागभावसत्त्वे किं मानम् इति चेत् – अत्र उत्पन्नस्य पुनः उत्पादभिया तत्सिद्धिः इति प्राञ्चः ।

केचित्तु "जातः घटः" इत्यादिवत् "उत्पन्नः घटध्वंसः" इति प्रत्यक्षबलेन नाशः अतिरिच्यते । न तु प्रागभावः । "इह इदानीं घटप्रागभावः" इति लोकानां प्रत्ययाभावात् ।

न च – तद्घटोपधायकतत्कपालतत्संयोगादीनां तद्घटोत्पत्तिकालेऽपि सत्त्वात् पुनरपि तद्घटोत्पत्त्यापत्तिः । प्रागभावाङ्गीकारे च तदभावादेव न पुनः तदुत्पत्तिः इति – वाच्यम् । जन्यद्रव्यत्वावच्छिन्नं प्रति जनकतया क्लृप्तस्य समवायसंबन्धावच्छिन्नप्रतियोगिताकद्रव्याभावस्य विरहेण एतदापत्त्यसंभवात् ।

न च – जन्यद्रव्याभावस्य जन्यद्रव्योत्पत्तिकालीनोत्पत्तिकध्वंसाभावस्य वा हेतुत्वम् इत्यत्र विनिगमनाविरहेण तादृशद्रव्याभावस्य तादृशध्वंसाभावानां च कारणताम् अपेक्ष्य लाघवात् एक एव प्रागभावः हेतुः कल्प्यते इति – वाच्यम् । प्रागभावकल्पनेऽपि तत्कालोत्पत्तिकानन्तपदार्थप्रतियोगिकानाम् अनन्तानां प्रागभावानां विनिगमनाविरहेण हेतुतायाः दुर्वारत्वात् । तथा च प्रागभावरूपधर्मिकल्पनागौरवं परम् अतिरिच्यते इति – आहुः ॥

अत्र वदन्ति – स्वानधिकरणेषु तन्तुषु पटोत्पत्तिवारणाय सहस्रतन्तुकपटस्थले बहूनां तन्तूनां तत्संयोगानां च तत्तद्व्यक्तित्वेन हेतुत्वकल्पनापेक्षया एका प्रागभावस्य हेतुता लघीयसी । अथ एवमपि द्वित्रिचतुर्षु तन्तुषु सहस्रतन्तुकपटोत्पत्त्यापत्तिः । न च –चरमसंयोगव्यक्तेः तद्व्यक्तित्वेन हेतुत्वात् न आपत्तिः इति – वाच्यम् । तथा सति स्वानधिकरणतन्तुष्वपि चरमसंयोगाभावादेव पटोत्पत्तिवारणसंभवे प्रागभावकल्पनानौचित्यात् इति चेत्, न । चरमसंयोगस्य समवायघटितसामानाधिकरण्यप्रत्यासत्त्या हेतुत्वे तन्त्वन्तरेऽपि समवायेन पटोत्पत्त्या तत्र समवायेन चरमसंयोगाभावेन व्यभिचारापत्त्या समवायसंबन्धेन तत्पटत्वावच्छिन्नं प्रति

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

चरमसंयोगव्यक्तेः कालिकसंबन्धेन हेतुता वाच्या । तथा च स्वानधिकरणतन्तुष्वपि कालिकविशेषणतया चरमसंयोगस्य सत्त्वात् पटोत्पत्तिवारणाय प्रागभावहेतुत्वस्य आवश्यकत्वात् इति ।

एवमपि अस्तु कश्चित् अतिरिक्तः पदार्थः । तथापि तस्य **सप्रतियोगिकत्वे** प्रमाणाभावः इति तु तत्त्वम् ।

ध्वंसस्य लक्षणम् आह – **जन्याभावत्वम्** इति । **प्रागभावे** अतिव्याप्तिवारणाय **जन्य** इति ।

अत्यन्ताभावस्य लक्षणम् आह – **नित्त्य** इति । **ध्वंसादिवारणाय नित्यपदम्** ।।

राजीवोल्लासः

प्रागभावसत्त्वे प्रमाणं वक्तुम् आरभते – **ननु प्रागभावसत्त्वे** इत्यादिना । उत्पन्नस्य घटस्य पुनः उत्पत्तिवारणार्थं प्रागभावः स्वीकरणीयः । तत्स्वीकारे तद्घटं प्रति तद्घटप्रागभावस्यापि हेतुत्वात् तद्घटोत्पत्त्यनन्तरं तद्घटप्रागभावविरहात् उत्पत्तिः आपादयितुं न शक्यते । तथा च ''अयं घटः स्वोत्पत्तिक्षणावृत्तिकारणजन्यः स्वोत्पत्तिद्वितीयक्षणानुत्पन्नत्वात्'' इति अनुमानबलात् इतरेषां बाधसहकृतात् प्रागभावः सिद्ध्यति । तद्घटप्रागभावस्य तद्घटसामग्रीनाश्यत्वेन तद्घटोत्पत्तिक्षणावृत्तित्वात् इति **प्राचीनैः** प्रागभावसिद्धिप्रकारः प्रदर्शितः ।

दीधितिकृतां मतम् उपन्यस्यति – **केचित्** इति । ''जातः घटः'' इति प्रत्यक्षबलात् यथा घटः सिद्ध्यति, तथा ''उत्पन्नः घटध्वंसः'' इति प्रत्यक्षबलात् ध्वंसः सिद्ध्यति । परन्तु ''इह इदानीं घटप्रागभावः'' इति पण्डितपामरसाधारण्येन प्रत्यक्षाभावात् प्रागभावः प्रत्यक्षप्रमाणेन न सिद्ध्यति । न च – ''अत्र घटो भविष्यति'' इत्यादिप्रत्यक्षमेव प्रागभावे प्रमाणम् । वर्तमानप्रागभावप्रतियोगित्वस्यैव भविष्यत्वरूपत्वात् इति – वाच्यम् । प्रागभावाघटितस्य वर्तमानकालध्वंसाधिकरण-

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

कालोत्पत्तिकत्वस्यैव भविष्यत्वरूपत्वाङ्गीकारात् । तथा च "अत्र घटः भविष्यति" इत्यस्य वर्तमानकालध्वंसाधिकरणकालोत्पत्तिकः घटः इत्यर्थः । तथा च भविष्यत्वप्रकारकप्रत्यक्षमपि ध्वंसे प्रमाणं स्यात्, न तु प्रागभावे ।

न च – प्रागभावानङ्गीकारे तद्घटोत्पादकतत्कपालतत्संयोगादीनां तद्घटोत्पत्तिकालेऽपि सत्त्वात् पुनरपि उत्पन्नस्य तद्घटस्य उत्पत्त्यापत्तिः । प्रागभावाङ्गीकारे च तद्घटप्रागभावस्यापि तद्घटोत्पत्तिं प्रति कारणतया तद्घटोत्पत्तिकाले तद्घटप्रागभावरूपकारणविरहादेव न पुनः तद्घटोत्पत्त्यापत्तिः इति – वाच्यम् । प्रागभावानङ्गीकारेऽपि उत्पन्नस्य घटस्य पुनरुत्पत्तेः कारणान्तरविरहादेव वारयितुं शक्यत्वात् । तथा हि – समवायसंबन्धेन जन्यद्रव्योत्पत्तिं प्रति समवायसंबन्धावच्छिन्नद्रव्यनिष्ठप्रतियोगिताकाभावः प्रतिबन्धकाभावविधया कारणम् इति कल्प्यते । तद्घटोत्पत्त्यनन्तरं कपाले समवायसंबन्धेन तद्घटरूपद्रव्यस्य विद्यमानतया समवायसंबन्धावच्छिन्नप्रतियोगिताकद्रव्याभावरूपकारणं नास्ति इति समवायसंबन्धेन घटरूपकार्यं न आपादयितुं शक्यते । प्रागभावकारणत्ववादिनापि अयं कार्यकारणभावः कल्पनीयः । अन्यथा यत्र एतद्घटनाशानन्तरं तदारम्भककपालाभ्यां घटान्तरम् उत्पद्यते, तत्र पूर्वघटोत्पत्तिद्वितीयक्षणे पुनः घटोत्पत्त्यापत्तिः । घटकारणीभूततत्प्रागभावकपालसंयोगादीनां सत्त्वात् ।

न च – समवायसंबन्धेन जन्यद्रव्योत्पत्तिं प्रति समवायसंबन्धेन जन्यद्रव्याभावः कारणं वा, जन्यद्रव्योत्पत्तिकालीनोत्पत्तिकध्वंसाभावः वा कारणम् इत्यत्र विनिगमनाविरहेण समवायसंबन्धावच्छिन्नप्रतियोगिताकद्रव्याभावस्य जन्यद्रव्योत्पत्तिकालोत्पत्तिकध्वंसाभावानां च कारणत्वं कल्पनीयम् इति गौरवम् । तदपेक्षया लाघवात् समवायसंबन्धेन जन्यद्रव्योत्पत्तिं प्रति जन्यद्रव्यप्रागभावः कारणम् इति एक एव कार्यकारणभावः कल्प्यत इति – वाच्यम् ।

प्रागभावस्य कारणत्वकल्पनेऽपि जन्यद्रव्यं प्रति जन्यद्रव्यप्रागभावस्य वा

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

जन्यद्रव्योत्पत्तिकालोत्पत्तिकानन्तपदार्थप्रतियोगिकानन्तप्रागभावानां वा कारणत्वम् इत्यत्र विनिगमनाविरहेण अनन्तकार्यकारणभावकल्पनस्य आवश्यकत्वात् ।

न च – उभयत्र साम्यम् इति – वाच्यम् । प्रागभावरूपधर्मिणम् अधिकं कल्पयित्वा अनन्तप्रागभावानां कारणत्वमपि कल्पनीयम् । तदपेक्षया क्लृप्तस्य अत्यन्ताभावस्य अनेककारणत्वकल्पने लाघवात् । ''धर्मिकल्पनातः वरं धर्मकल्पना'' इति न्यायात् । अतः ध्वंसस्य प्रामाणिकत्वेऽपि प्रागभावः न प्रामाणिकः इति **दीधितिकृताम्** आशयः ।

जन्यद्रव्यत्वावच्छिन्नं प्रति इति । कार्यतावच्छेदककोटौ द्रव्यपदं निवेश्य सामान्यतः जन्योत्पत्तिं प्रति समवायसंबन्धावच्छिन्नप्रतियोगिताकद्रव्याभावः कारणम् इत्युक्तौ यत्र कपाले रूपध्वंसस्य उत्पत्तिः, तत्र समवायसंबन्धेन जन्यद्रव्याभावस्य असत्त्वात् व्यतिरेकव्यभिचारः ।

न च – समवायसंबन्धस्य कार्यतावच्छेदकत्वस्वीकारादेव उक्तव्यभिचारः वारयितुं शक्यते । रूपध्वंसस्य समवायसंबन्धेन अनुत्पत्तेः इति – वाच्यम् । एवमपि कपाले पाकवशात् समवायेन रूपोत्पत्तौ व्यतिरेकव्यभिचारस्य दुर्वारत्वात् । कपाले समवायसंबन्धेन घटरूपद्रव्यस्यैव सत्त्वात् ।

जन्यद्रव्योत्पत्तिकालीन इति । जन्यद्रव्योत्पत्तिकाले उत्पद्यमानाः ये ध्वंसाः तेषाम् अत्यन्ताभावस्य इत्यर्थः ।

तादृशद्रव्याभावस्य इति । समवायसंबन्धावच्छिन्नप्रतियोगिताकद्रव्याभावस्य इत्यर्थः । **तादृशध्वंसाभावानाम्** इति । जन्यद्रव्योत्पत्तिकालोत्पत्तिकध्वंसाभावानाम् इत्यर्थः ।

प्रागभावस्य अतिरिक्तत्ववादिनां प्राचीनानां मतं सयुक्तिकम् अनुवदति – **अत्र वदन्ति** इत्यादिना । प्रागभावस्य हेतुत्वानङ्गीकारे पटानधिकरणेषु तन्तुषु पटोत्पत्त्यापत्तिः । प्रागभावाङ्गीकारे तु पटानधिकरणेषु तन्तुषु पटप्रागभावविरहादेव

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

न पटोत्पत्त्यापत्तिः । ध्वंसप्रागभावयोः स्वप्रतियोग्यधिकरणवृत्तित्वनियमात् ।

न च – समवायसंबन्धेन तत्पटव्यक्तिं प्रति तत्पटाधिकरणतन्तूनां तत्संयोगानां च तद्व्यक्तित्वेन हेतुत्वात् तत्पटानधिकरणेषु तन्तुषु तादृशतद्व्यक्तित्वविरहात् न पटोत्पत्त्यापत्तिः । एवं च प्रागभावस्य हेतुत्वम् अनावश्यकम् इति – वाच्यम् । सहस्रतन्तुकपटस्थले तत्पटं प्रति तदधिकरणतन्तूनां तत्संयोगानां च तत्तद्व्यक्तित्वेन नानाहेतुत्वकल्पनापेक्षया तत्पटप्रागभावस्य एकस्य एकहेतुताकल्पनायां लाघवम् ।

अथ प्रागभावस्य हेतुत्वेऽपि सहस्रतन्त्वन्तर्गतेषु द्वित्रिचतुर्षु तन्तुषु सहस्रतन्तुकपटोत्पत्यापत्तिः । द्वित्रिचतुर्णां तन्तूनाम् अपि तादृशपटसमवायिकारणतया तत्र तत्पटप्रागभावस्य सत्त्वात् ।

न च – अन्तिमतन्तुसंयोगव्यक्तेः तत्पटं प्रति तद्व्यक्तित्वेन हेतुत्वात् द्वित्रिचतुर्षु तन्तुषु अन्तिमसंयोगव्यक्तेरभावात् न सहस्रतन्तुकपटोत्पत्यापत्तिः इति – वाच्यम् । तथा सति सहस्रतन्तुकपटानधिकरणेषु तन्तुष्वपि अन्तिमसंयोगाभावादेव पटोत्पत्तिवारणसंभवात् प्रागभावकल्पनायाः अनुचितत्वात् इति चेत्, न । समवायेन तत्पटव्यक्तिं प्रति समवायेन अन्तिमतन्तुसंयोगव्यक्तेः तद्व्यक्तित्वेन कारणत्वे अन्तिमसंयोगानधिकरणेष्वपि तन्तुषु सहस्रतन्तुकपटोत्पत्त्या व्यतिरेकव्यभिचारः भवति । तद्वारणाय समवायसंबन्धेन तत्पटत्वावच्छिन्नं प्रति कालिकसंबन्धेन अन्तिमसंयोगव्यक्तिः कारणम् इति वाच्यम् । तथा सति तत्पटानधिकरणेषु तन्तुषु समवायसंबन्धेन अन्तिमसंयोगव्यक्तेः अभावेऽपि कालिकसंबन्धेन तादृशसंयोगव्यक्तिः वर्तते, उभयोः समकालिकत्वात् इति न व्यतिरेकव्यभिचारः । एवं च सति तत्पटकारणभिन्नेषु तत्पटानधिकरणेषु तन्तुष्वपि कालिकसंबन्धेन अन्तिमतन्तुसंयोगव्यक्तेः सद्भावात् तत्र तत्पटोत्पत्त्यापत्तिः । तद्वारणाय प्रागभावस्य हेतुत्वम् आवश्यकम् । तथा सति तत्पटानधिकरणतन्तुषु तत्पटप्रागभावविरहात् न तत्पटोत्पत्त्यापत्तिः इति **प्राचीनानाम्** आशयः ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

बहूनां तन्तूनाम् इति । बहूना तन्तूनां तत्तद्व्यक्तित्वेन सहस्रतन्तुकपटं प्रति समवायिकारणत्वम्, बहूनां तन्तुसंयोगानां तत्तद्व्यक्तित्वेन असमवायिकारणत्वं च कल्पनीयम् । तदपेक्षया प्रागभावस्य एका हेतुता लघीयसी इत्यर्थः ।

समवायघटितसामानाधिकरण्यप्रत्यासत्त्या इति । कार्यकारणयोः समवायसंबन्धेन एकाधिकरणवृत्तित्वं समवायघटितसामानाधिकरण्यम् । तदेव प्रत्यासत्तिः कार्यकारणयोः संबन्धः । अनेन चरमसंयोगः समवायसंबन्धेन यत्र अधिकरणे वर्तते, तत्र अधिकरणे समवायसंबन्धेन पटरूपं कार्यम् उत्पद्यते इति फलितम् । तेन समवायसंबन्धेन तत्पटव्यक्तिं प्रति समवायसंबन्धेन चरमसंयोगः कारणम् इतिं कार्यकारणभावः फलितः । **व्यभिचारापत्त्या** इति । कारणं विना कार्योत्पत्तिरूपव्यतिरेकव्यभिचारप्रसङ्गेन इत्यर्थः ।

दीधितिकृताम् अभिप्रायम् आह – **एवमपि अस्तु** इति । सहस्रतन्तुकपटस्थले स्वानधिकरणतन्तुषु पटोत्पत्तिवारणाय तत्र अविद्यमानः कश्चित् पदार्थः कारणत्वेन कल्पनीयः इत्यस्तु । तथापि सः अभावरूपः इत्यत्र न प्रमाणम् । तथा च न प्रागभावसिद्धिः इति **दीधितिकृताम्** आशयः इति । **सप्रतियोगिकत्वे** इति । अभावत्वे इत्यर्थः ।

प्रागभावे इति । जन्यत्वे सति अभावत्वं ध्वंसस्य लक्षणम् । तत्र अभावत्वमात्रोक्तौ प्रागभावे अतिव्याप्तिः । तद्वारणाय जन्यत्वोपादानम् । जन्यत्वमात्रोक्तौ घटादिषु अतिव्याप्तिः । तद्वारणाय अभावत्वोपादानम् । **ध्वंसादिवारणाय नित्यपदम्** इति । नित्यत्वे सति संसर्गाभावत्वम् अत्यन्ताभावस्य लक्षणम् । तत्र नित्यत्वानुपादाने ध्वंसेऽपि संसर्गाभात्ववस्य सत्त्वात् अत्यन्ताभावलक्षणस्य अतिव्याप्तिः । तद्वारणाय नित्यत्वोपादानम् इत्यर्थः ।।

मुक्तावली

यत्र तु भूतलादौ घटादिकम् अपसारितम् पुनः आनीतं च तत्र घटकालस्य

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

संबन्धाघटकत्वात् अत्यन्ताभावस्य नित्यत्वेऽपि घटकाले न घटात्यन्ताभावबुद्धिः । **तत्र उत्पादविनाशशाली चतुर्थोऽयम् अभावः इति केचित्** ।

अत्र ध्वंसप्रागभावाधिकरणे न अत्यन्ताभावः इति प्राचां मतम् । "**श्यामघटे रक्तो नास्ति**", "**रक्तघटे श्यामो नास्ति**" **इति धीश्च प्रागभावं ध्वंसं च अवगाहते, न तु तदत्यन्ताभावम्, तयोः विरोधात्** ।

नव्यास्तु – **तत्र विरोधे मानाभावात् ध्वंसादिकालावच्छेदेनापि अत्यन्ताभावः वर्तते-इति आहुः** ।।

दिनकरी

ननु अत्यन्ताभावस्य नित्यत्वे घटानयनानन्तरमपि "भूतले घटो नास्ति" इति प्रतीत्यापत्तिः इति, अत आह – **यत्र तु** इति । तथा च संबन्धाभावादेव घटानयनानन्तरं घटात्यन्ताभावबुद्धिः न इति भावः । **कालविशेषविशिष्टस्वरूपस्य** संसर्गत्वोपगमादेव घटवति "घटः नास्ति" इति प्रतीत्यभावोपपत्तौ चतुर्थसंसर्गाभावे मानाभावः इति अस्वरसः **केचित्** इत्यनेन सूचितः ।

ननु मास्तु घटकाले घटात्यन्ताभावबुद्धिः, घटोत्पत्तेः प्राक्काले तु स्यात् इति आशङ्क्य आह – **अत्र** इत्यादिना ।

ननु तर्हि रक्तरूपप्रागभावाधिकरणे श्यामघटे श्यामरूपध्वंसाधिकरणे च रक्तघटे कथं "रक्तो नास्ति", "श्यामो नास्ति" इति च प्रतीतिः? ध्वंसप्रागभावयोः अधिकरणे अत्यन्ताभावस्य असत्त्वात् इति, अत आह – **श्यामघटे** इति ।

तत्र इति । ध्वंसप्रागभावयोः इत्यर्थः । अत्यन्ताभावेन सह इति शेषः । तथा च **नव्यमते** पूर्वपक्षिकथितशङ्कायाम् इष्टापत्तिरेव इति भावः ।

युक्तं च एतत् । कथम् अन्यथा पूर्वम् अग्रेऽपि रक्ते मध्ये श्यामे च घटे "रक्तं रूपं नास्ति" इत्याकारकप्रत्ययः, तस्य सामान्याभावावगाहित्वात् । न च

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

ईदृशप्रत्ययः रक्तिमध्वंसाद्यवगाही । पूर्वापररक्तिमध्वंसप्रागभाववति रक्तेऽपि तादृशाकारप्रत्ययप्रसङ्गात् इति ।

न च – रक्तत्वावच्छिन्नप्रतियोगिताकत्वं ध्वंसप्रागभावयोः अव्याप्यवृत्ति । तेन अन्तराश्यामे "रक्तं रूपं नास्ति" इति प्रत्ययः । तदा ध्वंसप्रागभावयोः सामान्यावच्छिन्नप्रतियोगिताकत्वस्वीकारात्, न तु पूर्वापररक्तिमध्वंसप्रागभाववति रक्ते तत्र तदा तदनभ्युपगमात् इति – वाच्यम् ।

विनिगमनाविरहेण पदार्थान्तरध्वंसप्रागभावयोः अपि तत्स्वीकारप्रसङ्गेन गौरवात्, तदपेक्षया अत्यन्ताभावस्य अन्तरा श्यामादौ संबन्धत्वकल्पनेनैव लाघवात् इति अन्यत्र विस्तरः ॥

राजीवोल्लासः

ननु अत्यन्ताभावस्य नित्यत्वे इति । अत्यन्ताभावस्य नित्यत्वे भूतले घटानयनानन्तरमपि घटात्यन्ताभावस्य सत्त्वात् "घटः नास्ति" इति अत्यन्ताभावविषयकप्रतीत्यापत्तिः इति शङ्का । यस्मिन् काले घटात्यन्ताभावबुद्धिः भवति, तादृशकालविशेषविशिष्टभूतलस्वरूपस्यैव संबन्धत्वात् घटकाले तादृशकालविशेषघटितसंबन्धाभावादेव घटानयनानन्तरं न घटात्यन्ताभावबुद्धिः इति समाधानम् ।

कालविशेषविशिष्टस्वरूपस्य इति । घटात्यन्ताभावस्य नित्यत्वे घटवति "घटः नास्ति" इति प्रतीत्यापत्तिः । तद्वारणाय कैश्चित् सामयिकाभावः नाम कश्चित् चतुर्थः संसर्गाभावः स्वीक्रियते । समयविशेषे प्रतीयमानः अभावः सामयिकाभावः इत्याशयेन मूले **"तत्र उत्पादविनाशशाली चतुर्थोऽयम् अभावः इति केचित्"** इत्युक्तम् । तत्र इदम् अस्वारस्यम् – कालविशेषविशिष्टस्वरूपस्य अभावप्रतीतिनियामकसंबन्धत्वाङ्गीकारादेव घटवति भूतले "घटः नास्ति" इति प्रतीत्यभावस्य उपपत्तौ चतुर्थे संसर्गाभावे प्रमाणाभाव इति ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

ननु मास्तु इति । घटात्यन्ताभावस्य नित्यत्वे घटकालेऽपि भूतले घटात्यन्ताभावबुद्धिः प्रसक्ता । सा च संबन्धविरहात् न प्रसजति इति उक्तम् । तदुपरि शङ्का जायते – घटकाले घटात्यन्ताभावबुद्धेः अप्रसक्तावपि घटोत्पत्तिप्राक्काले घटात्यन्ताभावबुद्धिः स्यात् इति । तत्समाधानं तु – **''अत्र ध्वंसप्रागभावाधिकरणे''** इत्यादिना **प्राचीनमतानुसारेण** उक्तम् । **प्राचीनमते** ध्वंसाधिकरणे प्रागभावाधिकरणे च अत्यन्ताभावः नाङ्गीक्रियते । घटोत्पत्तेः प्राक्काले घटप्रागभावस्य सत्त्वात् तत्र घटात्यन्ताभावः नास्ति । अतः घटात्यन्ताभावबुद्धिः नापाद्यते ।

तदुपरि शङ्कते – **ननु तर्हि** इति । ध्वंसप्रागभावाधिकरणे अत्यन्ताभावः यदि नाङ्गीक्रियते, तर्हि पाकवशात् श्यामघटे श्यामरूपनाशानन्तरं रक्तरूपोत्पत्तौ श्यामतादशायां ''रक्तः नास्ति'' इति, रक्ततादशायां ''श्यामः नास्ति'' इति अत्यन्ताभावावगाहिनी प्रतीतिः कथम् उपपद्यते । श्यामतादशायां रक्तरूपप्रागभावाधिकरणे रक्तरूपात्यन्ताभावविरहात् रक्ततादशायां श्यामरूपध्वंसाधिकरणे श्यामरूपत्यन्ताभावस्य असत्त्वाच्च इति शङ्का ।

समाधानं तु – श्यामघटे ''रक्तः नास्ति'' इति प्रत्ययः रक्तप्रागभावं, रक्तघटे ''श्यामः नास्ति'' इति प्रत्ययः श्यामरूपध्वंसं च अवगाहते, न तु तदत्यन्ताभावम् । अतः न अनुपपत्तिः इति । एवं च ''नास्ति'' इति बुद्धेः अत्यन्ताभावमात्रविषयकत्वं इति न निर्बन्धः इति **प्राचाम्** आशयः ।

नव्यमते तु ध्वंसप्रागभावयोः अत्यन्ताभावेन सह एकाधिकरणावृत्तित्वरूप-विरोधे प्रमाणाभावात् ध्वंसप्रागभावाधिकरणेऽपि अत्यन्ताभावः अस्त्येव । एवञ्च श्यामघटे रक्तप्रागभावाधिकरणे रक्तात्यन्ताभावस्य सत्त्वात् ''रक्तः नास्ति'' इति प्रत्ययः, रक्तघटे श्यामध्वंसाधिकरणे श्यामात्यन्ताभावस्य सत्त्वात् ''श्यामः नास्ति'' इति प्रत्ययश्च इष्ट एव इति **नव्यमतं** समर्थयते – **युक्तं च एतत्** इति । प्राचीनमतानुसारेण ध्वंसप्रागभावाधिकरणे अत्यन्ताभावानङ्गीकारे यत्र पाकवशात्

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

पूर्वं रक्तः, ततः श्यामः, ततः रक्तश्च घटः भवति, तस्मिन् घटे मध्यश्यामतादशायां "घटे रक्तं रूपं नास्ति" इत्याकारकस्य प्रत्ययस्य कथम् उपपत्तिः । श्यामतादशायां पूर्वरक्तध्वंसस्य अपररक्तप्रागभावस्य च सत्त्वात् रक्तरूपात्यन्ताभावविरहात् ।

न च – "रक्तं रूपं नास्ति" इति प्रत्ययः रक्तरूपप्रतियोगिकाभावम् अवगाहते, न तु रक्तत्वावच्छिन्नप्रतियोगिताकम् अभावम् । तथा च मध्ये श्यामतादशायां पूर्वरक्तध्वंसस्य अपररक्तप्रागभावस्य च सत्त्वात् तदवगाहि "रक्तं रूपं नास्ति" इति प्रत्ययः उपपद्यते इति – वाच्यम् । तथापि पञ्चरक्तस्थले – पूर्वं रक्तः – ततः श्यामः – ततः रक्तः – ततः श्यामः – ततः रक्तः यः घटः तस्मिन् मध्यरक्ततादशायां "रक्तं रूपं नास्ति" इति प्रत्ययापत्तिः । तद्दशायां पूर्वापररक्तध्वंसप्रागभावयोः सत्त्वात् ।

न च रक्तत्वावच्छिन्नप्रतियोगिताकत्वम् इति । ध्वंसप्रागभावयोः सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वं कालिकाव्याप्यवृत्ति । तेन श्यामतादशायां विद्यमानयोः रक्तरूपध्वंसप्रागभावयोः रक्तत्वावच्छिन्नप्रतियोगिताकत्वमस्ति । अतः तदानीं "रक्तं रूपं नास्ति" इति प्रत्ययः उपपद्यते । रक्ततादशायां तु तयोः रक्तत्वावच्छिन्नप्रतियोगिताकत्वं नास्ति इति तदवगाहि प्रमात्मकप्रत्ययः आपादयितुं शक्यते इति शङ्का ।

समाधत्ते – **विनिगमनाविरहेण** इति । किं रक्तरूपध्वंसप्रागभावयोः रक्तत्वावच्छिन्नप्रतियोगिताकत्वं स्वीकार्यम्? उत रक्तरूपध्वंसोत्पत्तिकालोत्पत्तिकतत्समानाधिकरणवायुसंयोगादिध्वंसप्रागभावयोः तत् स्वीकार्यम्? इत्यत्र विनिगमनाविरहेण रक्तरूपध्वंस प्रागभावयोः तत्समानकालिकवायुसंयोगध्वंसप्रागभावयोश्च रक्तत्वावच्छिन्नप्रतियोगिताकत्व-कल्पनापत्त्या गौरवात् तदपेक्षया अत्यन्ताभावस्य श्यामतादशायां श्यामघटादौ स्वरूपसंबन्धत्वकल्पने एव लाघवम् । रक्ततादशायां रक्तत्वावच्छिन्नप्रतियोगिताकात्यन्ताभावस्य सत्त्वेऽपि तन्निरूपित

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

[अत्यन्ताभावनिरूपित] स्वरूपसंबन्धत्वं रक्तघटे नास्ति इति संबन्धविरहात् न तदानीं "रक्तं रूपं नास्ति" इत्याकारिका प्रमात्मकप्रतीतिः प्रसजति इति भावः ।।

मुक्तावली

ननु अस्तु अभावानाम् अधिकरणात्मकत्वम्, लाघवात् इति चेत्, न । **अनन्ताधिकरणात्मकत्वकल्पनापेक्षया अतिरिक्तकल्पनाया** एव लघीयस्त्वात् । **एवं च** आधाराधेयभावोऽपि उपपद्यते । **एवं च** तत्तच्छब्दगन्धरसाद्यभावानां प्रत्यक्षत्वम् उपपद्यते । **अन्यथा** तत्तदधिकरणानां तत्तदिन्द्रियाग्राह्यत्वात् प्रत्यक्षत्वं न स्यात् । **एतेन** ज्ञानविशेषकालविशेषात्मकत्वम् अभावस्य इति प्रत्युक्तम्, **अप्रत्यक्षत्वापत्तेः** ।।

दिनकरी

ननु "अभावस्तु द्विधा" इत्यादिविभागः अनुपपन्नः; अभावे एव मानाभावात् इति अभिप्रायेण प्राभाकरः शङ्कते – **ननु** इति । अभावस्य अधिकरणात्मकत्वे गौरवं प्रदर्शयितुम् **"अनन्त"** इत्युक्तम् । **अतिरिक्त** इति । भावातिरिक्तेत्यर्थः । अभावस्य अधिकरणात्मकत्वे अभेदे आधाराधेयभावानुपपत्तिरूपदोषः, सोऽपि अस्मिन्मते न इत्याह – **एवं च** इति । अधिकरणापेक्षया अतिरिक्तत्वे च इत्यर्थः ।

ननु अभावाधिकरणकाभावस्य अधिकरणात्मकत्वे यथा आधाराधेयभावोपपत्तिः, तथा सर्वत्रापि अस्तु इति, अतः दूषणान्तरम् आह – **एवं च** इति । **अन्यथा** अभावस्य अधिकरणात्मकत्वे । **एतेन** – वक्ष्यमाणदूषणेन ।।

राजीवोल्लासः

अभावस्य अधिकरणरूपता मूले शङ्किता । तत्र पूर्वग्रन्थसङ्गतिम् आह – **ननु अभाव** इति । **"अतिरिक्तकल्पनायाः"** इत्यस्य क्लृप्तपदार्थातिरिक्तकल्पनायाः इत्यर्थकत्वं न संभवति; नैयायिकमते अभावस्यापि क्लृप्तत्वात् क्लृप्तपदार्थातिरिक्त-

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

कल्पनायाः विरहात् इत्यत्राह – **भावातिरिक्त** इति । भावपदार्थातिरिक्ताभावरूपधर्मिकल्पनायाः इत्यर्थः । एतदुक्तं भवति – क्लृप्तेष्वपि अनन्तेषु अधिकरणेषु अभावत्वरूपधर्मकल्पनापेक्षया अभावत्वविशिष्टधर्मिणः अतिरिक्तस्य कल्पने एव लाघवम् । एवं च ''धर्मिकल्पनातः वरं धर्मकल्पना'' इतिन्यायः यत्र क्लृप्तः धर्मी ; अनन्तः न भवति तादृशस्थले प्रवर्तते । यत्र तु धर्मी क्लृप्तोऽपि अनन्तः भवति, तत्र सः न्यायः न प्रवर्तते इति ।

अभावस्य अधिकरणात्मकत्वे इति । अभावः अधिकरणात्मकः इति प्राभाकराणां मते भूतलघटाभावयोः आधाराधेयभावस्य अनुपपत्तिः । भिन्नयोरेव पदार्थयोः आधाराधेयभावस्य अनुभवात्, इति दोषः प्रसज्यते । अभावः अधिकरणातिरिक्तः इति नैयायिकमते तु स दोषः नास्ति । आधाराधेययोः भिन्नत्वात् इति आह मूले – **एवं च** इति । अभावस्य अधिकरणापेक्षया अतिरिक्तत्वे च आधाराधेयभावः उपपद्यते इत्यर्थः । **''आधाराधेयभावोऽपि''** इति ''अपि''ना अतिरिक्ताभावकल्पने न केवलं लाघवम्, अपि तु आधाराधेयभावोपपत्तिरपि इति सूच्यते ।

ननु अभावाधिकरणकाभावस्य इति । ''घटाभावे पटाभावः'' इत्यादिप्रतीतिसिद्धः घटाभावाधिकरणकः पटाभावादिः अधिकरणस्वरूप इति नैयायिकैरपि अङ्गीक्रियते । तत्र आधाराधेययोः अभेदेऽपि यथा आधाराधेयभावः उपपद्यते, तथा भावाधिकरणकाभावस्य अधिकरणस्वरूपत्वेऽपि आधाराधेयभावः उपपद्यते । आधारतावच्छेदक-आधेयतावच्छेदकयोः भेदात् इति प्राभाकरस्य शङ्कां मूले **''एवं च तत्तच्छब्द''** इत्यादिना अभावस्य अधिकरणात्मकत्वे दूषणान्तरम् उक्तम् । तस्य **मूलग्रन्थस्य** अयं भावः – अभावः यदि अधिकरणात्मकः स्यात्, तदा पृथिव्यादौ शब्दाभावस्य, जलादौ गन्धाभावस्य, तेजआदौ रसाद्यभावस्य च प्रत्यक्षता न स्यात् । पृथिव्यां विद्यमानस्य शब्दाभावस्य च, पृथिवीस्वरूपत्वे

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

पृथिव्याः श्रोत्रग्राह्यत्वविरहात् पृथिव्यात्मकस्य पृथिवीनिष्ठस्य शब्दाभावस्यापि श्रोत्रग्राह्यता न स्यात् । ''यो गुणः यदिन्द्रियग्राह्यः तन्निष्ठा जातिः तदभावश्च तेन इन्द्रियेण गृह्यते'' इति नियमात् शब्दाभावस्यापि श्रोत्रेन्द्रियेणैव प्रत्यक्षं वक्तव्यम् । शब्दाभावः पृथिवीरूपः चेत् पृथिव्याः श्रोत्रग्राह्यत्वविरहात् तन्निष्ठशब्दाभावस्यापि श्रोत्रजन्यप्रत्यक्षविषयत्वं न स्यात् । एवं जलनिष्ठगन्धाभावस्यापि घ्राणेन्द्रियजन्यप्रत्यक्ष-विषयत्वं न स्यात्, जलस्य घ्राणेन्द्रियायोग्यत्वात् इति द्रष्टव्यम् ।

मूले एतेन इत्यादि । अभावः ज्ञानविशेषात्मकः, कालविशेषात्मकः, अधिकरणात्मकः इति प्राभाकराणां मतम् । तत्र अधिकरणात्मकत्वपक्षे दोषः पूर्वमेव उक्तः । ज्ञानविशेषकालविशेषात्मकत्वे दोषः अनेन ग्रन्थेन उच्यते । यस्मिन् काले भूतले घटाभाववत्त्वं नैयायिकेन स्वीक्रियते, तत्कालोत्पन्नानि तद्भूतलविषयकाणि ''भूतले घटः नास्ति'' इत्याकारकाणि, ''इदं भूतलम्'' इत्याद्याकारकाणि वा ज्ञानान्येन ''भूतले घटः नास्ति'' इति प्रतीतौ घटाभावत्वेन रूपेण भासन्ते । एवं यस्मिन् काले भूतले घटः नास्ति, तत्कालः एव ''भूतले घटः नास्ति'' इति प्रतीतौ घटाभावत्वेन रूपेण भासते इति प्राभाकराः । तन्मतम् अयुक्तम् । घटाभावस्य ज्ञानविशेषरूपत्वे कालविशेषरूपत्वे च चक्षुरिन्द्रियजन्य-प्रत्यक्षविषयत्वानुपपत्तेः । ज्ञानकालयोः चाक्षुषप्रत्यक्षयोग्यताविरहात् इति मूलस्य भावः । **वक्ष्यमाणदूषणेन** इति । ''**अप्रत्यक्षत्वापत्तेः**'' इति वक्ष्यमाणेन दूषणेन इत्यर्थः ।।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

।। साधर्म्यनिरूपणम् ।।

कारिकावली

सप्तानामपि साधर्म्यं ज्ञेयत्वादिकमुच्यते ॥१३॥

मुक्तावली

इदानीं पदार्थानां साधर्म्यं वैधर्म्यं च वक्तुम् उपक्रमते – **सप्तानाम्** इति । समानः धर्मः येषां ते सधर्माणः, तेषां भावः साधर्म्यम् । समानः धर्मः इति फलितोऽर्थः । एवं विरुद्धः धर्मः येषां ते विधर्माणः, तेषां भावः वैधर्म्यम् । विरुद्धो धर्मः इति फलितोऽर्थः । ज्ञेयत्वं ज्ञानविषयता, सा च सर्वत्रैव अस्ति । ईश्वरज्ञान-विषयतायाः केवलान्वयित्वात् । एवम् अभिधेयत्वप्रमेयत्वादिकं बोध्यम् ।

दिनकरी

परस्परधर्मतापन्नानां सप्तपदार्थानामेव परस्परभेदकत्वं ज्ञापयितुम् आह – **इदानीम्** इति । पदार्थनिरूपणानन्तरम् इत्यर्थः । तदनिरूपणे तत्तत्पदार्थघटितस्य तत्तत्पदार्थस्य **साधर्म्यतया** निरूपणासंभवात् इति भावः । समानः धर्मः सधर्मः तस्य भावः साधर्म्यम् । एवं वैधर्म्यम् इत्यत्रापि इति **भ्रमवारणाय** बहुव्रीहिम् आह – **समानो धर्मः येषाम्** इति । **केवलान्वयित्वात्** इति । विषयभेदेन विषयतायाः भेदेऽपि ज्ञानविषयतात्वेन केवलान्वयित्वम् अस्त्येव इति भावः । **एवम् अग्रे**ऽपि ।

"**ज्ञेयत्वादि**" इत्यत्र "आदि" पदार्थं दर्शयति – **एवम् अभिधेयत्व** इति । **अभिधेयत्वम्** अभिधाविषयत्वम् । अभिधा च **सङ्केतग्राह्यः** अधिकः पदार्थः इति **मीमांसकाः** । सङ्केतभिन्नायाम् अभिधायां मानाभावात् सङ्केत एव अभिधा इति नैयायिकाः । "**प्रमेयत्वादिकम्**" इति "आदि"ना [1]अस्तित्वपरिग्रहः । **तच्च कालसंबन्धित्वम्** ।।

1. "वस्तुत्व" इति ताळीग्रन्थपाठः – सु.

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

राजीवोल्लासः

''सप्तानामपि साधर्म्यम्'' इत्यादिना **कारिकावल्यां** साधर्म्यं वैधर्म्यं च कथ्यते । तत्कथनस्य किं प्रयोजनम् इति जिज्ञासायां **मुक्तावल्याम् ''इदानीं पदार्थानाम्''** इत्युक्तम् । पदार्थनिरूपणानन्तरं साधर्म्यवैधर्म्यनिरूपणादेव तन्निरूपणप्रयोजनमपि ज्ञातुं शक्यते । यतः वक्ष्यमाणं साधर्म्यं वैधर्म्यं च सप्तपदार्थान्तर्गततत्तत्पदार्थघटितमेव भवति । तथा च घटकस्य तत्तत्पदार्थस्य ज्ञानाभावे तद्घटितं साधर्म्यं वैधर्म्यं च ज्ञातुं न शक्यते । एवं तत्तत्पदार्थघटितं साधर्म्यं वैधर्म्यं च लक्ष्यभूतपदार्थवृत्तित्वे ज्ञाने सत्येव इतरपदार्थव्यावर्तकं भवितुमर्हति । इतरपदार्थभेदानुमितौ पक्षधर्मताज्ञानविधया तत्तत्पदार्थवृत्तित्वज्ञानस्य अपेक्षितत्वात् । एवं च सप्तपदार्थज्ञाने सत्येव साधर्म्यवैधर्म्ययोः ज्ञानं तयोः पक्षवृत्तित्वज्ञानं च भवितुमर्हति इति ज्ञापनमेव सप्तपदार्थनिरूपणानन्तरं साधर्म्यवैधर्म्यनिरूपणस्य प्रयोजनमिति भावः । यथा **''सत्तावन्तः त्रयस्तु आद्याः''** इत्यनेन द्रव्यगुणकर्मणां सत्तावत्त्वं साधर्म्यं इत्युक्तम् । सत्तावत्त्वं च सत्तारूपपदार्थघटितम् । अतः सत्तायाः अज्ञाने सत्ताश्रयत्वं ज्ञातुं न शक्यते । एवं सत्ताश्रयत्वे द्रव्यगुणकर्मवृत्तित्वाज्ञाने इतरभेदानुमापकत्वं सत्ताश्रयत्वे न संभवति । द्रव्यगुणकर्मणां अज्ञाने च तद्वृत्तित्वं सत्ताश्रयत्वे ज्ञातुं न शक्यते । तथा च द्रव्यगुणकर्मधर्मतापन्नस्य सत्तारूपपदार्थस्य सामान्यादिपदार्थभेदकत्वम् सप्तपदार्थस्वरूपज्ञानंविना न संभवति इति । **तदनिरूपणे इति** । पदार्थानिरूपणे इति ।

तत्तत्पदार्थघटितस्य इत्यनेन साधर्म्यघटकतया पदार्थज्ञानस्य आवश्यकता सूचिता । **साधर्म्यतया** इत्यनेन तत्तत्पदार्थवृत्तित्वेन इत्यर्थकेन पक्षधर्मतज्ञानोपयोगितया पदार्थज्ञानस्य अपेक्षा सूचिता ।

भ्रमवारणाय इति । तत्पुरुषसमासभ्रमवारणाय इत्यर्थः । ननु ज्ञानविषयतायाः कथं केवलान्वयित्वम्? विषयभेदेन विषयतायाः भिन्नत्वात् सर्ववस्तुवृत्तेः एकस्याः

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

ज्ञानविषयतायाः अभावात् इत्याशङ्क्य आह – **विषयभेदेन** इति । ज्ञानविषयतायाः तत्तद्व्यक्तित्वेन तत्तद्विषयमात्रवृत्तित्वेऽपि ज्ञानविषयतात्वेन सामान्यरूपेण सर्वविषय-वृत्तित्वात् केवलान्वयित्वम् । एवं च वृत्तिमदभावाप्रतियोगित्वं न केवलान्वयित्वम् । केवलान्वयिनोऽपि द्वित्वेन रूपेण अभावस्य सत्त्वात् अभावाप्रतियोगित्वस्य दुर्घटत्वात् । किन्तु वृत्तिमदभावप्रतियोगितानवच्छेदकधर्मवत्त्वमेव केवलान्वयित्वम् । वृत्तिमान् अभावः – ज्ञानविषयता नास्तीति प्रतीतिसिद्धः ज्ञानविषयतात्वरूप-सामान्यधर्मावच्छिन्न-प्रतियोगिताकाभावः न भवति । किन्तु ज्ञानविषयता-निष्ठतद्व्यक्तित्वावच्छिन्नप्रतियोगिताकाभाव एव भवति । तत्प्रतियोगितावच्छेदकम् तद्व्यक्तित्वम् । अनवच्छेदकम् – ज्ञानविषयतात्वम् । तद्वत्त्वस्य ज्ञानविषयतायां सत्त्वात् केवलान्वयित्वम् अस्त्येव इति भावः । **एवम् अग्रेऽपि** इति । अभिधेयत्व-प्रमेयत्वादेः वक्ष्यमाणस्य केवलान्वयित्वं उक्तरीत्या उपपादनीयम् इति भावः ।

अभिधेयत्वम् इति । अभिधेयत्वं नाम अभिधाविषयत्वम् । अभिधा च शक्त्याख्यः अतिरिक्तः पदार्थः इति **मीमांसकाः** । ''अस्मात् पदात् अयम् अर्थः बोद्धव्यः'' इति ईश्वरेच्छारूपः सङ्केत एव अभिधा इति **नैयायिकाः** ।

तच्च कालसंबन्धित्वम् इति । अस्तित्वं च कालवृत्तित्वरूपम् । अवृत्तिगगनादिषु कालवृत्तित्वविरहात् कथम् अस्तित्वं केवलान्वयि इति न आशङ्क्यम् । गगनादीनामपि कालवृत्तित्वस्य अङ्गीकरणीयत्वात् । अन्यथा गगनस्य शब्दसमवायिकारणत्वं कथं स्यात् । कारणत्वस्य कार्यपूर्वकालवृत्तित्वघटितत्वात् । तथा च कालातिरिक्तपदार्थवृत्तित्वमात्रेण गगनादीनाम् अवृत्तित्वप्रवादः इति भावः ।।

कारिकावली

द्रव्यादयः पञ्च भावा अनेके समवायिनः ।।

मुक्तावली

द्रव्यादयः इति । द्रव्यगुणकर्मसामान्यविशेषाणां अनेकत्वं समवायित्वं च

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

साधर्म्यम् । यद्यपि अनेकत्वम् अभावेऽपि अस्ति, तथापि **अनेकत्वे सति भावत्वं पञ्चानां साधर्म्यम्** । **तथा च अनेकभाववृत्तिपदार्थविभाजकोपाधिमत्त्वं इति फलितोऽर्थः । तेन प्रत्येकं घटादौ न अतिव्याप्तिः । समवायित्वं च समवायसंबन्धेन संबन्धित्वम्; न तु समवायवत्त्वम् सामान्यादौ अभावात् ।।**

दिनकरी

द्रव्यादीनां षण्णां साधर्म्यं भावत्वं स्पष्टम् । अतः तदुपेक्ष्य द्रव्यादीनां पञ्चानां साधर्म्यं **मूले** प्रपञ्चितम् – **द्रव्यादयः** इत्यादिना । **अनेकत्वे सति भावत्वम्** इति । **एवं च मूले** ''द्रव्यादयः पञ्च'' इति उद्देश्यपरम् । 'भावाः अनेके'' इति च विधेयपरम् इति बोध्यम् । **अत एव भाष्ये** पञ्चानाम् इत्युक्तं, न तु पञ्चभावानाम् इति । **अनेकभाववृत्ति** इत्यादि । **अत्र च** अनेकभाववृत्तित्वं **स्वप्रतियोगिवृत्तित्व-स्वसामानाधिकरण्य-उभयसंबन्धेन** भेदविशिष्टत्वे सति भाववृत्तित्वम् । तेन गुणादौ संख्यारूपस्य अनेकत्वस्य अभावेऽपि न अव्याप्तिः । **भावत्वरूपतादृशधर्मम्** आदाय समवाये अतिव्याप्तिवारणाय **पदार्थविभाजकोपाधि** इति । **उपाधिमत्ता च** समवायस्वरूपान्यतरसंबन्धेन । तेन कालिकसंबन्धेन ध्वंसस्य तादृशोपाधिमत्त्वेपि न क्षतिः । समवायेन उपाधिमत्त्वविवक्षणे तु सामान्यादौ अव्याप्तिः स्यात्, अतः तत् न उक्तम् । **अन्यतरत्वघटकस्वरूपं** तु कालिकसंबन्धभिन्नं ग्राह्यम्, तेन ध्वंसे न अतिव्याप्तिः । **अत्र च** समवेत-समवेतवृत्तिपदार्थविभाजकोपाधिमत्त्वं द्रव्यादिचतुर्णां साधर्म्यं बोध्यम् ।।

राजीवोल्लासः

सप्तानां पदार्थानां साधर्म्यम् उक्त्वा **''द्रव्यादयः पञ्चभावाः''** इति कारिकायां पञ्चानां साधर्म्यम् उक्तम् । तत्र षड्भावपदार्थानां साधर्म्यस्य अनुक्त्या न्यूनतां परिजिहीर्षुः आह – **द्रव्यादीनां षण्णाम्** इति ।

''ननु द्रव्यादयः पञ्चभावाः अनेके'' इति मूले द्रव्यादीन् पञ्चभावान्

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

उद्दिश्य अनेकत्वविधानात् अनेकत्वमात्रम् साधर्म्यम् उक्तम् इति प्रतीयते । तत्कथं **''अनेकत्वे सति भावत्वं पञ्चानां साधर्म्यम्''** इति **मुक्तावल्याम्** उक्तम्, मूलात् तदलाभात् इति शङ्कां परिहरति – **एवं च** इति । द्रव्यादयः पञ्च इति उद्देश्यपरम् । भावा अनेके इति विधेयपरम् । द्रव्यादीन् पञ्च उद्दिश्य भावत्वम् अनेकत्वं च विधीयते । तेन द्रव्यादीनां पञ्चानाम् अनेकत्वे सति भावत्वं समानो धर्मः इति भावः । भावपदस्य उद्देश्यपरत्वाभावे **प्रशस्तपादभाष्यं** प्रमाणयति – **अत एव भाष्ये** इति । भावपदं परित्यज्य ''द्रव्यादयः पञ्च'' इति भागमात्रस्य उद्देश्यपरत्वादेव पञ्चानाम् इति **भाष्ये** उक्तम्, न तु पञ्चभावानाम् इति भावः । **मुक्तावल्याम् – तथा च अनेकभाववृत्ति** इत्यादि । ''अनेकत्वे सति भावत्वं द्रव्यादीनां पञ्चानाम् साधर्म्यम्'' इति उक्ते प्रत्येकं घटादौ आकाशादौ च अनेकत्वाभावात् अव्याप्तिः इति शङ्का भवति । तदर्थं अनेकभाववृत्तिपदार्थविभाजकोपाधिमत्त्वम् इति फलितार्थः उक्तः । अनेकेषु भावेषु वर्तमानः यः पदार्थविभाजको धर्मः – पदार्थत्वव्याप्यधर्मः तद्वत्त्वं लक्षणम् । अनेके भावाः पृथिवीजलादयः तद्वृत्तिः पदार्थविभाजको धर्मः द्रव्यत्वम्, तद्वत्त्वं प्रत्येकघटादौ आकाशादौ च अस्ति इति न अव्याप्तिः ।

ननु ''अनेकभाववृत्ति'' इत्यत्र अनेकत्वं यदि बहुत्वसंख्या, तदा गुणादौ संख्याविरहात् तेषु अव्याप्तिः । यदि च यत्किञ्चिदेकभिन्नत्वम्, तदा समवाये अतिव्याप्तिः । यदि तु एकत्वावच्छिन्नसामान्यभेदः तत्र च एकत्वं यदि संख्यारूपम्, तदा उक्तातिव्याप्तितादवस्थ्यम् । यदि तन्मात्रविषयकबुद्धिविषयत्वम्, तदा अप्रसिद्धिः । स्वमात्रविषयकबुद्धिविषयत्वरूपैकत्वस्य केवलान्वयितया तदवच्छिन्न-सामान्याप्रसिद्धेः इति आशङ्कानिरासाय अनेकभाववृत्तित्वं निर्वक्ति – **अत्र च** इति । **स्वप्रतियोगिवृत्तित्व** इत्यादि । द्रव्यत्वरूपः पदार्थविभाजकधर्मः उक्तोभयसंबन्धेन भेदविशिष्टः भवति । स्वं – पृथिवीभेदः । स्वप्रतियोगी – पृथिवी । तद्वृत्तित्वं द्रव्यत्वे वर्तते । एवं स्वं पृथिवीभेदः । स्वाधिकारणम् जलादि । तद्वृत्तित्वम् –

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

द्रव्यत्वे वर्तते इति । भाववृत्तित्वानिवेशे अनेकवृत्तित्व-मात्रनिवेशे अभावत्वम् आदाय अभावे अतिव्याप्तिः । तथा हि – स्वं प्रागभावभेदः । स्वप्रतियोगी प्रागभावः । तद्वृत्तित्वम् अभावत्वे अस्ति । एवं स्वाधिकरण [प्रागभावभेदाधिकरण] ध्वंसादिवृत्तित्वं च अभावत्वे अस्ति इति उक्तोभयसंबन्धेन भेदविशिष्टत्वरूपस्य अनेकवृत्तित्वस्य अभावत्वे सत्त्वात् तस्य पदार्थविभाजकत्वाच्च । अतः भाववृत्तित्वनिवेशः । अभावत्वं तु न भाववृत्ति इति पदार्थविभाजकोपाधिपदेन अभावत्वं ग्रहीतुं न शक्यते । उपाधौ पदार्थविभाजकत्वविशेषणस्य प्रयोजनमाह – **भावत्वरूप** इति । अनेकभाववृत्तिः उपाधिः भावत्वम् । तद्वत्त्वं समवाये अस्ति इति तत्र अतिव्याप्तिः । तद्वारणाय पदार्थविभाजकत्वनिवेशः । भावत्वं तु न पदार्थविभाजको धर्मः, किन्तु द्रव्यत्वादिकमेव । भावत्वेन रूपेण पदार्थस्य विभागाकरणात् द्रव्यत्वादिरूपेणैव पदार्थस्य विभजनात् । येन रूपेण पदार्थस्य विभागः क्रियते, तस्यैव पदार्थविभाजकत्वात् । न च भावत्वस्य पदार्थविभाजकत्वा-भावेऽपि समवायत्वरूपं पदार्थविभाजकधर्मम् आदाय समवाये अतिव्याप्तिः इति – वाच्यम् । समवायत्वस्य पदार्थविभाजकत्वेऽपि अनेकभाववृत्तित्वविरहात् तस्य ग्रहीतुम् अशक्यत्वात् । **उपाधिमत्ता च** इति । समवाय-स्वरूपान्यतरसंबन्धेन उपाधिमत्त्वं विवक्षणीयम् । येन केनापि संबन्धेन उपाधिमत्त्वोक्तौ ध्वंसमात्रं कालोपाधिः इति मते कालिकसंबन्धेन द्रव्यत्वादिरूपपदार्थविभाजकोपाधिमत्त्वस्य ध्वंसे सत्त्वात् तत्र अतिव्याप्तिः स्यात् । समवायसंबन्धेन उपाधिमत्त्वविवक्षायां ध्वंसे अतिव्याप्तिवारणेऽपि सामान्यादौ पञ्चान्तर्गते समवायसंबन्धेन पदार्थविभाजकोपाध्यभावात् अव्याप्तिः स्यात् । अतः ''समवायस्वरूपान्यतरसंबन्धेन'' इत्युक्तम् । सामान्ये स्वरूपसंबन्धेन सामान्यत्वरूपोपाधिसत्त्वात् न अव्याप्तिः । ''स्वरूपसंबन्धेन उपाधिमत्त्वम्'' इत्युक्तौ द्रव्यत्वाद्युपाधीनां स्वरूपसंबन्धेन द्रव्यादिषु अभावात् अव्याप्तिः स्यात् । अतः समवायसंबन्धस्यापि प्रवेशः । ननु कालिकसंबन्धस्यापि कालिकविशेषणतारूपस्वरूपसंबन्धात्मकतया कालिक-

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

विशेषणतारूपस्वरूपसंबन्धेन अभावत्वमादाय ध्वंसे अतिव्याप्तिः इति आशङ्क्य आह – **अन्यतरत्वघटकस्वरूपं तु** इति । स्वरूपपदेन कालिकविशेषणताभिन्न-स्वरूपं ग्राह्यम् । अतः ध्वंसे न अतिव्याप्तिः । तथा च समवाय – कालिकविशेषण-ताभिन्नस्वरूप – अन्यतरसंबन्धेन उपाधिमत्त्वम् विवक्षितम् इति भावः ।

''**द्रव्यादयः पञ्च भावाः**'' इति द्रव्यादीनां पञ्चानां साधर्म्यम् उक्त्वा ''**सत्तावन्तः त्रयस्त्वाद्याः**'' इति त्रयाणां साधर्म्यम् उक्तं मूले । तत्र द्रव्यादीनां चतुर्णां साधर्म्यानुक्त्या न्यूनतां परिहर्तुं चतुर्णां साधर्म्यम् आह – **अत्र च** इति । समवेते यत् समवेतं तद्वृत्तिः यः पदार्थविभाजकः धर्मः तद्वत्त्वं द्रव्यादीनां चतुर्णां साधर्म्यम् । समवेते – स्वावयवसमवेते कपाले समवेतः यः घटः तद्वृत्तिः पदार्थविभाजकः धर्मः द्रव्यत्वम् । तद्वत्त्वम् आदाय द्रव्ये लक्षणसमन्वयः । समवेते अवयविद्रव्ये समवेतः गुणः कर्म वा तद्वृत्तिः पदार्थविभाजकः धर्मः गुणत्वं कर्मत्वं च । तद्वत्त्वम् आदाय गुणकर्मणोः । तादृशं सामान्यत्वम् आदाय सामान्ये च लक्षणसमन्वयः । कालिकसंबन्धेन कालवृत्तिः यः परमाणुः तत्समवेतः यः विशेषः तद्वृत्ति-विशेषत्वम् आदाय विशेषे अतिव्याप्तिवारणाय ''वृत्तिमत्समवेत'' इत्यनुक्त्वा ''समवेतसमवेत'' इत्युक्तम् । ''समवेत'' इत्यस्य समवायसंबन्धेन वृत्तिमदित्यर्थः । एवं समवेतघटादौ कालिकसंबन्धेन वृत्तिमान् यः विशेषः तद्वृत्तिविशेषत्वमादाय तद्दोषवारणाय ''समवेतवृत्ति'' इत्यनुक्त्वा ''समवेतसमवेत'' इत्युक्तम् । समवेतसमवेतवृत्तिगगना-भावादिकम् आदाय तद्वति विशेषादौ अतिव्याप्तिवारणाय ''पदार्थविभाजक'' इति उपाधिविशेषणम् । गगनाभावस्तु न पदार्थविभाजकः । वृत्तित्वम् उपाधिमत्त्वं च समवाय-स्वरूप-अन्यतरसंबन्धेन । तथा च समवायसंबन्धावच्छिन्नवृत्तिताव-न्निरूपितसमवायसंबन्धावच्छिन्न-वृत्तितावन्निरूपित-समवायस्वरूपान्यतर-संबन्धावच्छिन्नवृत्तितावत्पदार्थविभाजकोपाधिनिष्ठसमवाय-स्वरूपान्यतरसं-बन्धावच्छिन्नाधेयतानिरूपिताधिकरणत्वं साधर्म्यम् इति फलितोर्थः ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

समवेतसमवेतघटादौ कालिकसंबन्धेन वर्तमानं विशेषत्वम् आदाय विशेषे अतिव्याप्ति-वारणाय समवेतसमवेतनिरूपितवृत्तौ समवायसंबन्धनिवेशः । सामान्यत्वस्य समवेतसमवेते समवायसंबन्धेन वृत्तिविरहात् तस्य संग्रहः न स्यात् इति सामान्ये अव्याप्तिः स्यात् । तद्वारणाय समवेतसमवेतवृत्तौ स्वरूपसंबन्धस्यापि प्रवेशः । तत्र स्वरूपसंबन्धमात्रनिवेशे पदार्थविभाजकानां द्रव्यत्वादीनां स्वरूपसंबन्धेन वृत्तित्वविरहात् द्रव्यादिषु अव्याप्तिः इति समवाय-स्वरूपान्यतरसंबन्धेन वृत्तित्वनिवेशः । एवं उपाधिमत्तायां समवायसंबन्धमात्रनिवेशे सामान्ये अव्याप्तिः । स्वरूपसंबन्धमात्रनिवेशे द्रव्यादिषु अव्याप्तिः । अतः समवाय-स्वरूपान्यतरसंबन्धेन उपाधिमत्त्वविवक्षा ।।

कारिकावली

सत्तावन्तः त्रयस्त्वाद्याः गुणादिः निर्गुणक्रियः ॥१४॥

मुक्तावली

सत्तावन्त इति । द्रव्यगुणकर्मणां सत्तावत्त्वम् इत्यर्थः । **गुणादिः** इति । यद्यपि गुणक्रियाशून्यत्वम् आद्यक्षणे घटादौ अतिव्याप्तम् क्रियाशून्यत्वं च गगनादौ अतिव्याप्तम् तथापि गुणवदवृत्तिधर्मवत्त्वं कर्मवदवृत्तिपदार्थविभाजकोपाधिमत्त्वं च तदर्थः । न हि घटत्वादिकं द्रव्यत्वादिकं वा गुणवदवृत्ति कर्मवदवृत्ति वा । किन्तु गुणत्वादिकं तथा । आकाशत्वादिकं तु न पदार्थविभाजकोपाधिः ।।

दिनकरी

उद्देश्यवाचकपदस्य चरमम् उपादानम् अयुक्तम्, अतः योजनया तदर्थं प्रदर्शयति – **द्रव्यगुणकर्मणाम्** इति । **निर्गुणक्रिय** इति मूलम् । **तदर्थश्च** गुणक्रियात्यन्ताभाववत्त्वम् । तेन गुणक्रिययोः अन्योन्याभावम् आदाय द्रव्ये न अतिव्याप्तिः । **यद्यपि गुण** इति । न च – **गुणगुणिनोः** वामदक्षिणगोविषाणवत् समानकालिकत्वात् कथं गुणशून्यत्वम् इति – वाच्यम् । **निर्गुणे** गुणोत्पत्तिस्वीकारेण

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

तत्संभवात् । **न च – एवं घटादेः** आद्यक्षणावच्छिन्नस्य चाक्षुषता न स्यात् इति – वाच्यम् । इष्टापत्तेः । **तथापि** इति । **गुणवत्ता** च समवायेन, तेन कालिकसंबन्धेन गुणवद्गुणादिवृत्तेः गुणत्वादेः असङ्ग्रहेऽपि **न क्षतिः** । **गुणवदवृत्तित्वं तादृशधर्मवत्त्वं** च समवायस्वरूपान्यतरसंबन्धेन । तेन समवायेन गुणवदवृत्तित्वाभिधाने तादृशस्य द्रव्यत्वप्रकारकप्रमाविशेष्यत्वस्य द्रव्ये सत्त्वात् अतिव्याप्तिः । अतः तेनैव **तद्वत्त्वं** वाच्यम्, तदा सामान्यादौ अव्याप्तिः इति परास्तम् । पदार्थविभाजकपदस्य कृत्यम् आह – **आकाशत्वादिकं** तु इति । कर्मवदवृत्त्याकाशत्वरूपोपाधिमति आकाशे अतिव्याप्तिवारणाय तत्पदम् इति भावः ।।

राजीवोल्लासः

सत्तावन्तः त्रयस्त्वाद्याः इति मूले आद्यत्रयम् उद्दिश्य सत्तावत्त्वं साधर्म्यं विधीयते । तच्च अयुक्तम् । "उद्देश्यवचनं पूर्वं विधेयस्य ततः परम्" इति न्यायेन उद्देश्यवाचकपदस्य पूर्वं वक्तव्यत्वात् । अत एव "पर्वतो वन्हिमान्" इत्येव प्रतिज्ञावाक्यम्, न तु "वन्हिमान् पर्वतः" इति इत्याशङ्क्य योजनया लभ्यम् अर्थं **मुक्तावल्यां** प्रदर्शयति इति आह – **उद्देश्यवाचक** इति । द्रव्यगुणयोः द्वयोः यद्यपि साधर्म्यं मूले न उक्तम्, तथापि नित्यसमवेतपदार्थविभाजकोपाधिमत्त्वं तयोः साधर्म्यम् ऊह्यम् । नित्यनिरूपित-समवायसंबन्धावच्छिन्नवृत्तिताव-त्पदार्थविभाज-कोपाधिमत्त्वम् इति तदर्थः । वृत्तितायां नित्यनिरूपितत्वानुक्तौ अनित्यं यत् कर्म तन्निरूपितसमवायसंबन्धावच्छिन्नवृत्तितावत्कर्मत्वम् आदाय कर्मणि अतिव्याप्तिः । तद्वारणाय नित्यनिरूपितत्वनिवेशः । वृत्तितायां समवायसंबन्धावच्छिन्नत्वानिवेशे नित्यं यत् सामान्यं तन्निरूपितस्वरूपसंबन्धावच्छिन्नवृत्तितावत्सामान्यत्वम् आदाय सामान्ये अतिव्याप्तिः । तद्वारणाय समवायसंबन्धावच्छिन्नत्वनिवेशः । सत्तामादाय कर्मणि अतिव्याप्तिवारणाय उपाधौ पदार्थविभाजकत्वनिवेशः । द्रव्यमात्रस्य तु साधर्म्यं **"समवायिकारणत्वं द्रव्यस्यैव इति विज्ञेयम्"** इति उपरिष्टात् वक्ष्यति ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

"गुणादिः निर्गुणः क्रियः" इति मूले गुणम् आरभ्य अभावपर्यन्तानां षण्णां साधर्म्यम् उक्तम् । तत्र निर्गुणत्वं निष्क्रियत्वं च यदि गुणक्रियाभाववत्त्वम्, तदा द्रव्ये अतिव्याप्तिः । द्रव्ये गुणक्रिययोः भेदस्य सत्त्वात् इति अत आह – **तदर्थः च इति** । यद्यपि नञ्समभिव्याहार-स्थले एव अन्योन्याभावबोधः, निरादिसमभिव्याहारस्थले अत्यन्ताभावस्यैव बोधः इत्यङ्गीकारात् अन्योन्याभावम् आदाय अतिव्याप्तिशङ्कायाः न प्रसक्तिः, तथापि अत्यन्ताभावस्य अत्यन्ताभावत्वेन निवेशम् अकृत्वा अभावत्वेन निवेशे अस्याः प्रसक्तिः इति तात्पर्यम् ।

गुणक्रियात्यन्ताभाववत्त्वं गुणादीनां षण्णां साधर्म्यम् इत्युक्तावपि आद्यक्षणावच्छिन्नघटादौ गुणक्रियात्यन्ताभावसत्त्वात् अतिव्याप्तिः आशङ्किता **मुक्तावल्याम्** । इयमाशङ्का न संगच्छते । गुणगुणिनोः समानकालिकत्वात् गुणं विहाय गुणिनः असत्त्वात् घटादौ गुणिनि गुणात्यन्ताभावस्य असंभवात् इति आशङ्कते **दिनकर्याम्** – **न च गुणगुणिनोः इति** । समाधत्ते – **निर्गुणे इति** । नैयायिकैः प्रथमक्षणे निर्गुणे द्रव्ये एव द्वितीयक्षणे गुणोत्पत्तिस्वीकारेण उत्पत्तिक्षणावच्छेदेन गुणात्यन्ताभावः संभवति । प्रथमक्षणे निर्गुणत्वस्वीकारे बीजं तु घटादेः रूपादिगुणं प्रति समवायिकारणत्वमेव ।

ननु आद्यक्षणे घटे रूपादिगुणाभावे आद्यक्षणावच्छिन्नस्य घटस्य चाक्षुषप्रत्यक्षविषयत्वं न स्यात् । चाक्षुषप्रत्यक्षं प्रति रूपस्य कारणत्वात् इति आशङ्क्य इष्टापत्तिम् आह – **न च एवं घटादेः इति** । तथा च तृतीयक्षणे एव घटादेः चाक्षुषप्रत्यक्षविषयत्वम् इति भावः ।

गुणवदवृत्तिधर्मवत्त्वं गुणादीनां साधर्म्यम् । गुणवति अवृत्तिः यः धर्मः तद्वत्त्वम् । गुणवत् – द्रव्यम् तदवृत्तिः धर्मः गुणत्वादिः, तद्वत्त्वं गुणादिषु अस्ति इति समन्वयः । गुणवत्तायां समवायसंबन्धावच्छिन्नत्वं निवेशनीयम् । अन्यथा कालिकसंबन्धेन गुणवान् जन्यगुणः तद्वृत्तित्वमेव गुणत्वस्य अस्ति इति तस्य

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

संग्रहः न स्यात् । तदाह – गुणवत्ता च इति । ''गुणादि'' इत्यत्र ''आदि''शब्देन क्रियायाः संग्रहः । क्रियामात्रं कालोपाधिः इति मते कालिकसंबन्धेन क्रियाया अपि गुणवत्त्वात् कर्मत्वस्य गुणवदवृत्तित्वं नास्ति इति तदसंग्रहः स्यात् । न क्षतिः इति । गुणादौ न अव्याप्तिः इत्यर्थः । गुणवदवृत्तित्वं तादृशधर्मवत्त्वं च इति । गुणवदवृत्तित्वं च गुणवन्निरूपितवृत्तित्वाभाववत्त्वम् । तत्र वृत्तित्वे संबन्धविशेषानिवेशे गुणत्वादेः गुणवति द्रव्ये कालिकसंबन्धेन वृत्तितया सङ्ग्रहः न स्यात् । समवायसंबन्धावच्छिन्नत्वनिवेशे गुणत्वादेः गुणवति द्रव्ये समवायसंबन्धेन अवृत्तितया सङ्ग्रहः भवति । तथापि गुणवदवृत्ति यत् गुणत्वादिकं कालिकसंबन्धेन तद्वत्त्वस्य द्रव्ये सत्त्वात् तत्र अतिव्याप्तिः । तद्वारणाय गुणवदवृत्तिधर्मवत्त्वमपि समवायसंबन्धेन इति वक्तव्यम् । तथा सति समवायसंबन्धेन गुणत्वादिमत्त्वं द्रव्ये नास्ति इति न अतिव्याप्तिः । परन्तु एवं निवेशेऽपि सामान्यादिषु गुणवदवृत्तिसामान्यत्वादिधर्मः समवायसंबन्धेन नास्ति इति अव्याप्तिः भवति । तद्वारणाय धर्मवत्त्वं समवायस्वरूपान्यतरसंबन्धेन इति वक्तव्यम् । तथा सति स्वरूपसंबन्धेन सामान्यत्वादिमत्त्वं सामान्यादिषु अस्ति इति न अव्याप्तिः । एवं विवक्षणेऽपि समवायसंबन्धेन गुणवदवृत्ति यत् द्रव्यगुणान्यतरत्वं अथवा द्रव्यत्वप्रकारकप्रमाविशेष्यत्वं तद्वत्त्वं स्वरूपसंबन्धेन द्रव्येऽस्ति इति अतिव्याप्तिः । तद्वारणाय गुणदवृत्तित्वमपि समवायस्वरूपान्यतरसंबन्धेन विवक्षणीयम् । अन्यतरत्वस्य द्रव्यत्वप्रकारकप्रमाविशेष्यत्वस्य च स्वरूपसंबन्धेन गुणवद्वृत्तितया न तद्धर्मम् आदाय द्रव्ये अतिव्याप्तिः । तथा च समवायसंबन्धावच्छिन्न-गुणनिष्ठाधेयतानिरूपिताधिकरणतावन्निरूपित-समवायस्वरूपान्यतरसंबन्धावच्छिन्नवृत्तित्वाभाववद्धर्मनिष्ठ-समवायस्वरूपान्यतरसंबन्धावच्छिन्नाधेयतानिरूपिताधिकरणत्वं इति भावः ।

तेनैव तद्वत्त्वम् इति । समवायेनैव धर्मवत्त्वम् इत्यर्थः ।

वस्तुतस्तु अवृत्तित्वं धर्मवत्त्वं च स्वरूपसंबन्धेनैव वाच्यम् । न तु तत्र समवायस्य प्रवेशः । गुणवत्तायां परं समवायः निवेशनीयः । गुणादौ लक्षणसमन्वयस्तु-

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

समवायसंबन्धेन गुणवति द्रव्ये स्वरूपसंबन्धेन अवृत्तिः यः धर्मः गुणत्वप्रकारक-प्रमाविशेष्यत्वादिः स्वरूपसंबन्धेन तद्वत्त्वम् आदाय करणीयः । परन्तु कर्मवदवृत्तिपदार्थविभाजकोपाधिमत्त्वं इति द्वितीयसाधर्म्यनिर्वचने गुणत्वप्रकारक-प्रमाविशेष्यत्वादेः पदार्थविभाजकत्वाभावेन ग्रहीतुम् अशक्यतया तमादाय लक्षणसमन्वयासंभवात्, गुणत्वादिकम् आदायैव समन्वयः वक्तव्यः । तत्र च पूर्वोक्तदोषाणां प्रसक्त्या अवृत्तित्वे उपाधिमत्तायां च समवाय-स्वरूपान्यतरसं-बन्धनिवेशः आवश्यकः ।।

कारिकावली

सामान्यपरिहीनास्तु सर्वे जात्यादयो मताः ।

मुक्तावली

समान्य इति । सामान्यानधिकरणत्वं सामान्यादीनाम् इत्यर्थः ।

दिनकरी

जात्यादीनामपि **एकार्थसमवायसंबन्धेन** सामान्यवत्त्वात् **सामान्यपरिहीना** इति मूलम् अयुक्तम्, अतः व्याचष्टे – **सामान्यानधिकरणत्वम्** इति । तथा च सामान्यनिरूपिताधिकरणता न सामान्यादौ, एकार्थसमवायस्य अधिकरणतानियामक-त्वाभावात् इति भावः ।

राजीवोल्लासः

एकार्थसमवायसंबन्धेन इति । स्वसमवायि-समवायसंबन्धेन इत्यर्थः । सामान्यादीनां त्रयाणां स्वसमवायिसमवायसंबन्धेन सामान्यवत्त्वात् सामान्यशून्यत्व-लक्षणस्य सामान्यादिषु अव्याप्तिः इति शङ्का । समाधानं तु – सामान्यनिरूपिता-धिकरणत्वाभाववत्त्वं सामान्यादीनां साधर्म्यम् । एकार्थसमवायस्य वृत्त्यनियामकतया तेन संबन्धेन सामान्यनिरूपिताधिकरणत्वं सामान्ये दुर्घटम् इति सामान्यनिरूपिता-धिकरणत्वाभावस्य सामान्यादौ सत्त्वात् न अव्याप्तिः इति ।।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

कारिकावली

पारिमाण्डल्यभिन्नानां कारणत्वमुदाहृतम्॥ १५ ॥

मुक्तावली

पारिमाण्डल्य इति । पारिमाण्डल्यम् अणुपरिमाणम् । तद्भिन्नानां कारणत्वम् इत्यर्थः । अणुपरिमाणं तु न कस्यापि कारणम् । तद्धि स्वाश्रयारब्धद्रव्यपरिमाणारम्भकं भवेत् । तच्च न सम्भवति । परिमाणस्य स्वसमानजातीयोत्कृष्टपरिमाणजनकत्वनियमात् । महदारब्धस्य महत्तरत्ववत् अणुजन्यस्य अणुतरत्वप्रसङ्गात् । एवं परममहत्परिमाणम् अतीन्द्रियसामान्यं विशेषाश्च बोध्याः ।।

दिनकरी

अप्रसिद्धत्वात् पारिमाण्डल्यपदार्थं निर्वक्ति – **पारिमाण्डल्म्** इति । **तद्भिन्नानाम्** इति । पारिमाण्डल्यभिन्नानाम् । ननु द्व्यणुकपरिमाणस्य कारणत्वाभावात् तत्र अव्याप्तिः । अतः पारिमाण्डल्यपदं द्व्यणुकपरिमाणस्याप्युपलक्षकम् । तेन तस्यापि अलक्ष्यत्वम् इति अभिप्रेत्य आह – **अणुपरिमाणं तु** इति । परमाणुद्व्यणुकसाधारणम् अणुपरिमाणं तु इत्यर्थः । पारिमाण्डल्यस्य कारणत्वे बाधकम् आह – **तद्धि** इति । अणुपरिमाणं हि इत्यर्थः । **तच्च** इति । चः त्वर्थे । तत्र हेतुम् आह – **परिमाणस्य** इति । **स्वसमानजातीय** इति । साजात्यम् अत्र परिमाणविभाजकोपाधिरूपेण बोध्यम् । **अणुजन्यस्य** इति । उत्कृष्टं च अणोः अणुतरमेव इति भावः । न च – अणुजन्यस्य अणुतरत्वम् अस्तु किं बाधकम्? इति – वाच्यम् । तथा सति त्रुटेः अचाक्षुषत्वप्रसङ्गात् । ननु तर्हि द्व्यणुकादिपरिमाणस्य किं जनकम्? इति चेत्, संख्या एव इति अवेहि । व्यक्तीभविष्यति च इदम् उपरिष्टात् । मूलस्य न्यूनतां परिहरति – **एवम्** इति । **बोध्याः** इत्यनेन अन्वयः । न कारणानि इति बोध्या इत्यर्थः । ऐन्द्रियकयोः महत्त्वसामान्ययोः स्वविषयकलौकिकप्रत्यक्षे हेतुत्वात् परमत्वातीन्द्रियत्वे इह विशेषणे ।।

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

राजीवोल्लासः

अप्रसिद्धत्वात् इति । लोकप्रसिद्धिविरहात् प्रयोगप्राचुर्याभावात् इति वा अर्थः । परिमण्डलस्य भावः पारिमाण्डल्यम् । परिमण्लशब्दस्य परमाणुः इत्यर्थः । पारिमाण्डल्यपदेन परमाणुपरिमाणमेव मुख्यवृत्त्या बोध्यते । परन्तु परमाणुपरिमाणवत् द्व्यणुकपरिमाणस्यापि कारणत्वाभावात् **''पारिमाण्डल्यभिन्नानाम्''** इत्यत्र विद्यमानः पारिमाण्डल्यशब्दः अजहल्लक्षणया द्व्यणुकपरिमाणस्यापि बोधकः इत्याशयेन **मुक्तावल्यां** ''पारिमाण्डल्यं अणुपरिमाणम्'' इति व्याख्यातम् । अणुशब्दस्तु परमाणुद्व्यणुकोभय वाचकः । अतः अणुपरिमाणम् इत्यस्य परमाणुपरिमाणम् द्व्यणुकपरिमाणं च इत्यर्थः । तदाह – **ननु द्व्यणुकपरिमाणस्य** इत्यादिना ।

''तच्च न संभवति'' इत्यत्र ''च''कारः न समुच्चयार्थकः । परमाणुपरिमाणस्य नित्यतया कालविधया, अतीन्द्रियतया प्रत्यक्षे विषयविधया च कारणत्वासंभवेन कार्यान्तरं प्रति कारणत्वस्य समुच्चयासंभवात् । अतः ''तु''कारार्थकत्वमाह – चः त्वर्थ इति ।

ननु **''परिमाणस्य स्वसमानजातीयोत्कृष्टपरिमाणजनकत्वनियमात्''** इति ग्रन्थेन परमाणुपरिमाणस्य द्व्यणुकपरिमाणस्य च स्वाश्रयारब्धद्रव्यपरिमाणारम्भकत्वासंभवः उपपाद्यते । परमाणुपरिमाणं स्वाश्रयपरमाणुजन्यद्व्यणुकपरिमाणजनकम्, द्व्यणुकपरिमाणं स्वाश्रयद्व्यणुकजन्यत्र्यणुकपरिमाणजनकम् इति कृत्वा परमाणुपरिमाणद्व्यणुकपरिमाणयोः कारणत्वं वक्तुं न शक्यते । तथा सति परिमाणस्य स्वसमानजातीयोत्कृष्टपरिमाणजनकत्वनियमस्य भङ्गापत्तेः इति मूलात् लभ्यते । तत्र इयम् आशङ्का भवति – परमाणुपरिमाणस्य द्व्यणुकपरिमाणजनकत्वे उक्तनियमभङ्गः संगच्छते । परमाणुपरिमाणस्य सजातीयं यत् द्व्यणुकपरिमाणं तत् परमाणुपरिमाणापेक्षया उत्कृष्टं न भवति । अणोः अणुतरस्यैव उत्कृष्टत्वात् । तथा च परमाणुपरिमाणस्य स्वसजातीयपरिमाणजनकत्वेऽपि स्वसजातीयोत्कृष्टपरि-

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

माणजनकत्वं द्व्यणुकपरिमाणजनकत्वे न घटते इति । द्व्यणुकपरिमाणस्य त्र्यणुकपरिमाणजनकत्वे तु उक्तनियमभङ्गः न संभवति । अणुपरिमाणात् त्रसरेणुपरिमाणम् उत्कृष्टं इति व्यवहारेण त्र्यणुकपरिमाणस्य द्व्यणुकपरिमाणापेक्षया उत्कृष्टत्वं वर्तते । एवं परिमाणत्वेन रूपेण द्व्यणुकपरिमाणसाजात्यं च वर्तते । अतः कथं नियमभङ्गः इति आशङ्कायाम् आह – साजात्यम् अत्र इति । उक्तनियमघटकसाजात्यं परिमाणविभाजकोपाधिरूपेण बोध्यम् । परिमाणविभाजकोपाधिरूपं च अणुत्त्वमहत्त्वादिकम् । तथा च स्ववृत्तिपरिमाणविभाजकोपाधिमत्स्वावधिकोत्कर्षवत्परिमाणजनकत्वम् परिमाणस्य इति नियमः । त्र्यणुकपरिमाणस्य परिमाणत्वेन रूपेण द्व्यणुकपरिमाणसजातीयत्वेऽपि परिमाणविभाजकोपाधिरूपाणुत्वत्त्वेन रूपेण साजात्यं नास्ति । त्र्यणुकपरिमाणस्य महत्त्वरूपत्वात् । तथा च त्रणुकपरिमाणस्य द्व्यणुकपरिमाणापेक्षया उत्कृष्टत्वेऽपि सजातीयत्वविरहात् स्वसजातीयोत्कृष्टपरिमाणजनकत्व-नियमभङ्गः सङ्गच्छते इति भावः ।

अचाक्षुषत्वप्रसङ्गात् इति । त्र्यणुकस्य अणुतरत्वे महत्वाभावात् चाक्षुषप्रत्यक्षविषयत्वं न स्यात् । चाक्षुषप्रत्यक्षं प्रति महत्त्वस्य हेतुत्वात् इति भावः । अथ एतद्दोषवारणाय त्र्यणुकपरिमाणं प्रति त्रित्वसंख्यैव हेतुरस्तु, द्व्यणुकपरिमाणस्य परमाणुपरिमाणात् उत्कर्षवत्त्वे बाधकाभावः इति चेत्, न । अणुतरापेक्षया अणोरेव महदुत्पादस्य युक्तत्वात् द्व्यणुकस्यैव असिद्धिप्रसङ्गात् ।

सङ्ख्या एव इति । परमाणुगतद्वित्वसंख्या द्व्यणुकपरिमाणं प्रति कारणम् । द्व्यणुकगतत्रित्वसंख्या त्र्यणुकगतमहत्त्वं प्रति कारणम् इति भावः । **व्यक्तीभविष्यति च इदम्** इति । इदं – द्व्यणुकादिपरिमाणे सङ्ख्यायाः कारणत्वम् उपरिष्टात् – गुणखण्डे व्यक्तं भविष्यति इत्यर्थः ।

मूलस्य न्यूनताम् इति । "पारिमाण्डल्यभिन्नानाम्" इति, मूले कारणत्वरूपस्य साधर्म्यस्य पारिमाण्डल्यम् अलक्ष्यं इति एतावन्मात्रं प्रतीयते ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

परममहत्परिमाण-अतीन्द्रियसामान्यविशेषाणामपि कारणत्वविरहात् तेषामपि अलक्ष्यत्वं अस्ति इति, तत्सूचनाय तद्भिन्नत्वस्य लक्ष्यतावच्छेदके अप्रवेशेन मूलस्य अवश्यवक्तव्यार्थाकथनरूपां न्यूनतां परिहरति **मुक्तावल्याम् – एवम्** इत्यादिना इति भावः । **न कारणानि इति बोध्या** इति । परममहत्परिमाणादीनाम् अपि कारणत्वाभावात् कारणत्वलक्षणस्य तद्भिन्नपदार्था एव लक्ष्याः इति भावः । महत्परिमाणे ''परम'' इति विशेषणस्य सामान्ये ''अतीन्द्रिय'' इति विशेषणस्य च प्रयोजनम् आह – **ऐन्द्रियकयोः** इति । तयोः विशेषणयोः अनुपादाने महत्परिमाणं सामान्यं च न कारणम् इति लभ्यते । तत्तु असङ्गतम् । महत्परिमाणस्य द्रव्यत्वादि-सामान्यस्य च इन्द्रियग्राह्यतया विषयविधया स्वविषयकलौकिकप्रत्यक्षं प्रति कारणत्वात् । तयोः विशेषणयोः उपादाने च परममहत्परिमाण-अतीन्द्रियसामान्ययोः ऐन्द्रियकत्वाभावात् प्रत्यक्षं प्रत्यपि कारणत्वं नास्ति इति न अनुपपत्तिः ।।

मुक्तावली

इदमपि योगिप्रत्यक्षे विषयस्य न कारणत्वम्, ज्ञायमानं सामान्यं न प्रत्यासत्तिः, ज्ञायमानं लिङ्गं न अनुमितिकरणम् इत्यभिप्रायेण उक्तम् । आत्ममानसप्रत्यक्षे आत्ममहत्त्वस्य कारणत्वात्, परममहत्परिमाणम् [1]आकाशादेः बोध्यम् ।।

दिनकरी

ननु योगिप्रत्यक्षे पारिमाण्डल्यस्यापि विषयविधया कारणत्वात् ''**पारिमाण्डल्यभिन्नानाम्**'' इति अयुक्तम्, अत आह – **इदमपि** इति । **यथा** योगजधर्मेण अतीतानागतविषयकं प्रत्यक्षम्, तथा विद्यमानविषयकम् अपि इति भावः । **ननु ज्ञायमानसामान्यस्य** प्रत्यासत्तित्वेन ज्ञायमानहेतोश्च अनुमितिकरणत्वेन पारिमाण्डल्यस्य सामान्यलक्षणाजन्यज्ञाने अनुमितौ च कारणत्वात्

1. आकाशादेः बोध्यम् इति। अत्र अतद्गुणसंविज्ञानबहुव्रीह्यादरेण कालदिशोः एव ग्रहणम् इति शब्दप्रत्यक्षे आकाशमहत्त्वेऽपि न क्षतिः इति प्रभाकृतः (सु)।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

पारिमाण्डल्यभिन्नानाम् इति मूलम् असङ्गतम्, अत आह – ज्ञायमानम् इति । आत्ममानस इति । विषयतया द्रव्यलौकिकप्रत्यक्षे समवायेन महत्त्वस्य हेतुत्वात् इति भावः । यद्यपि स्वप्रत्यक्षे इत्येव वक्तुम् उचितम्, तथापि टीकाकृन्मते आत्मैकत्वमहत्त्वयोः अयोग्यत्वात् प्रत्यक्षं न संभवति इति ''आत्ममानस'' इत्युक्तम् ।।

राजीवोल्लासः

ननु योगिप्रत्यक्षे विषयस्य कारणत्वाभावे का युक्तिः? इत्यत्र आह – यथा इति । लौकिकप्रत्यक्षे एव विषयस्य कारणत्वम् । योगिप्रत्यक्षं तु योगजधर्मजन्यत्वात् अलौकिकम् । तत्र न विषयस्य कारणत्वम् । इदानीम् अविद्यमानानामपि अतीतानाम् अनागतानां च विषयाणां योगजधर्मेण प्रत्यक्षस्वीकारात् । न च – अतीतानागतविषयाणांप्रत्यक्षपूर्वक्षणवृत्तित्वाभावेन कारणत्वासंभवेऽपि विद्यमानविषयाणां प्रत्यक्षपूर्ववृत्तित्वसत्त्वात् कुतः न कारणत्म् इति – वाच्यम् । अतीतानागतविषयवत् विद्यमानविषयस्यापि योगजधर्मादेव साक्षात्कारसंभवात् । तथा च लौकिकप्रत्यक्षे एव विषयस्य कारणत्वम् इति भावः ।

ननु ज्ञायमानसामान्यस्य इति । ज्ञानविषयभूतं सामान्यम् आलौकिकसन्निकर्षविधया प्रत्यक्षं प्रति कारणम् । ज्ञायमानं लिङ्गं च अनुमितिं प्रति कारणम् । पारिमाण्डल्यरूपसामान्यप्रत्यासत्तिजन्ये पारिमाण्डल्याश्रयविषकज्ञाने पारिमाण्डल्यस्य हेतुत्वात्, एवं पारिमाण्डल्यलिङ्गकानुमितौ ''परिमण्डलम् इतरभिन्नम्, पारिमाण्डल्यात्'' इत्याकारिकायां पारिमाण्डल्यस्य लिङ्गविधया करणत्वात् ''पारिमाण्डल्यभिन्नानां कारणत्वम्'' इति मूलम् असङ्गतम् इति आशङ्का । समाधानं तु – ज्ञायमानसामान्यं न सन्निकर्षः, ज्ञायमानलिङ्गं च न अनुमितिकरणम् । किन्तु सामान्यज्ञानं सन्निकर्षः, लिङ्गज्ञानम् अनुमितिकरणम् । तथा च पारिमाण्डल्यस्य प्रत्यासत्तिविधया वा लिङ्गविधया वा कारणत्वं नास्ति इति पारिमाण्डल्यभिन्नानाम् कारणत्वम् इति मूलस्य न असङ्गतिः इति ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

आत्मगतपरममहत्परिमाणस्य आत्मविषयकमानसप्रत्यक्षं प्रति कारणत्वात् "**परममहत्परिमाणं न कारणमिति बोध्यम्**" इति पूर्वोक्तं न सङ्गच्छते इत्याशङ्क्य परममहत्परिमाणपदेन आत्मातिरिक्ताकाशादिगतं परममहत्परिमाणं विवक्षितम् । तदेव न कारणम् । आत्मगतपरममहत्परिमाणं तु अकारणत्वेन न पूर्वग्रन्थाभिप्रेतम् इत्याशयेन **मुक्तावल्यां** "आत्ममानसप्रत्यक्षे आत्ममहत्त्वस्य कारणत्वात्" इति उक्तम् । कथं कारणत्वम् इति शङ्कायां **दिनकर्याम्** आह – **विषयतया** इति । द्रव्यनिष्ठलौकिकविषयतासंबन्धेन महत्त्वं कारणम् इति सामान्यतः कार्यकारणभावः । आत्मनः अपि द्रव्यत्वात् तन्निष्ठविषयता-संबन्धेन प्रत्यक्षे महत्त्वस्य कारणत्वम् इति भावः ।

यद्यपि स्वप्रत्यक्षे इति । स्वपदेन आत्मगतमहत्त्वं गृह्यते । आत्मगतमहत्त्वविषयकप्रत्यक्षे विषयविधया आत्मगतमहत्त्वस्य कारणत्वात् "स्वप्रत्यक्षे" इति वक्तव्ये "आत्ममानसप्रत्यक्षे" इति कुतः उक्तम् इति आशङ्का ।

समाधानं तु – **टीकाकृतां उदयनाचार्याणां** मते आत्मगतैकत्वमहत्त्वयोः इन्द्रियायोग्यत्वात् प्रत्यक्षं न संभवति इत्याशयेन "स्वप्रत्यक्षे" इत्यनुक्त्वा आत्ममानस-प्रत्यक्षेत्युक्तम् ।

वक्तुम् उचितम् इति । अत्र औचित्यम् उपस्थितिकृतलाघवरूपं बोध्यम् । **अयोग्यत्वात्** इति । आत्मगतस्य महत्त्वस्य इन्द्रियायोग्यत्वे सति आत्मा अणुर्वा महान् वा इति विवादासंभवात् इत्याशयः ।।

मुक्तावली

तस्यापि न कारणत्वमिति आचार्यणाम् आशय इति अन्ये । तन्न, ज्ञानातिरिक्तं प्रत्येव अकारणताया आचार्यैः उक्तत्वात् ।।

दिनकरी

केचित्तु – "**कारणत्वं च अन्यत्र पारिमाण्डल्यादिभ्यः**" इत्यत्र भाष्ये

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

''आदि''ग्रहणात् परममहत्त्वं गृह्यते इति वदताम् आचार्याणाम् आत्मपरिमाणमपि न कस्यचित् कारणम् इत्याशयः लभ्यते । न च – तत्र परममहत्पदम् आत्मपरिमाणातिरिक्त-परममहत्परिमाणपरम् इति – वाच्यम्, मानाभावात् इति वदन्ति ।

तन्मतं दूषयितुम् उपन्यस्यति – **तस्यापि** इति । आत्मपरममहत्परिमाणस्यापि इत्यर्थः । **ज्ञानातिरिक्तं प्रत्येव** इति । **कारणत्वं च ज्ञातृधर्मेतरकार्यापेक्षया** इति **आचार्यग्रन्थः** । ज्ञातृधर्माः ज्ञानादयः । **तदतिरिक्तभावकार्यं** प्रति कारणत्वं पारिमाण्डल्यभिन्नानां साधर्म्यम् इति तदर्थः । एवं च ''पारिमाण्डल्यादि'' इति ''आदि''पदेन परममहत्त्वं गृह्णताम् आचार्याणाम् अयम् आशयः यत् पारिमाण्डल्यस्य परममहत्त्वादीनां च ज्ञानातिरिक्तं प्रति न कारणत्वम्, न तु कारणत्वसामान्याभावः तदनुमत इति भावः ।

अत्र आचार्यैः ''पारिमाण्डल्यादि'' इति ''आदि'' **पदार्थेषु** सुखदुःखादेः **अजनितावयविरूपादेः** पाकनष्टपरमाणुरूपादेश्च **अगणनात्** तेषां लक्ष्यत्वम् अनुमतम् । एवं च तेषु ज्ञानाद्यतिरिक्तभावकार्यफलोपधायकत्वरूपस्य **आचार्यल-क्षणस्य** अव्याप्तिं परिचिन्त्य स पक्षः त्यक्तः **ग्रन्थकृता** इति ध्येयम् ।।

राजीवोल्लासः

केचित्तु इत्यादि । **''कारणत्वं च अन्यत्र पारिमाण्डल्यादिभ्यः''** इति **प्रशस्तपादभाष्ये** ''आदि'' शब्दात् परममहत्त्वं गृह्यते इति **उदयनाचार्यैः भाष्यटीकायां** उक्तम् । एवं वदतां तेषां परममहत्त्वसामान्यं न कारणम् इति आशयस्य लाभात् तत्सामान्यान्तर्गतं आत्मपरिमाणमपि न कस्यचित् कारणम् इति अभिप्रायः लभ्यते । न च – **टीकाग्रन्थे** विद्यमानं परममहत्त्वपदं आत्मपरिमाणा-तिरिक्तपरममहत्परिमाणपरम् इति – वाच्यम् । तत्र प्रमाणाभावात् इति केषांचित् आशयः ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

आत्मगतपरममहत्परिमाणस्य ज्ञानातिरिक्तं प्रत्येव अकारणत्वम् आचार्याभिप्रेतम् इति यत् मूलकारेण उक्तम् तत् उपपादयति – **कारणत्वं च** इत्यादिना । **तदतिरिक्त भावकार्यं प्रति** इति । ज्ञातृधर्मज्ञानाद्यतिरिक्तभावकार्यं प्रति इत्यर्थः । यद्यपि **आचार्यग्रन्थे** भावपदं नास्ति, तथापि द्व्यणुकपरिमाणस्य स्वध्वंसं प्रति प्रतियोगिविधया कारणत्वात् अलक्ष्ये द्व्यणुकपरिमाणे अतिव्याप्तिः स्यात् इति **आचार्यग्रन्थे** अनुक्तमपि भावपदं अध्याहर्तव्यम् इति भावः ।

ननु **आचार्यमते** भाष्यस्थ ''आदि'' शब्देन परममहत्परिमाणमात्रस्य ग्रहणात् पारिमाण्डल्यपरममहत्परिमाणयोः कुत्रापि अकारणत्वात् ते द्वे एव कारणत्वलक्षणस्य अलक्ष्ये । **मुक्तावलीकारेण** तु **''एवं परममहत्परिमाणं अतीन्द्रियसामान्यं विशेषश्च बोध्याः''** इति वदता अणुपरिमाण-परममहत्परिमाण-अतीन्द्रियसामान्य-विशेषाणाम् अलक्ष्यत्वं उक्तम् । तथा च **आचार्यपक्षः मुक्तावलीकारेण** त्यक्तः इति प्रतीयते । तत्पक्षत्यागे किं कारणम्? इति आशङ्कायां आह – **अत्र आचार्यैः** इत्यादिना । ''आदि''पदात् परममहत्त्वं गृह्यते इति वदद्भिः आचार्यैः पारिमाण्डल्यपरममहत्त्वयोः द्वयोः अलक्ष्यत्वसूचनात्, सुखदुःखादेः, येन अवयवेन अवयवी न उत्पादितः तद्गतरूपादेः, पाकात् नष्टस्य परमाणु-गतरूपादेश्च लक्ष्यत्वं अनुमतम् । परन्तु लक्ष्यभूतेषु तेषु ज्ञानातिरिक्तभाव-कार्यनिरूपितकारणत्वविरहात् कारणत्वरूपस्य लक्षणस्य अव्याप्तिरूपः दोषः **आचार्यपक्षे** वर्तते इत्यालोच्य **आचार्यपक्षः मुक्तावलीकृता** परित्यक्तः ।

न च – **मुक्तावलीकारपक्षेऽपि** अकारणत्वेन चतुर्णाम् एव निर्देशात् तदतिरिक्तानाम् अनुपदोक्तानां सुखदुःखादीनां लक्ष्यत्वम् अभिमतं प्रतीयते । तत्र च कारणत्वलक्षणाभावात् अव्याप्तिदोषः अस्त्येव इति – वाच्यम् । **मुक्तावलीकारमते ''विशेषाश्च''** इति अनुक्तसमुच्चायकेन ''च''कारेण सुखदुःखादीनामपि अलक्ष्यत्वसूचनेन तत्र लक्षणाभावस्य दोषावहत्वाभावात् इति तात्पर्यम् ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

आदिपदार्थेषु इति । **अगणनात्** इत्यनेन अन्वयः । **अजनितावयविरूपादेः** इति । अजनितः अवयवी येन अवयवेन सः अजनितावयवी । तस्य रूपादेः इति विग्रहः । अवयवगतरूपं हि अवयविगतरूपस्य कारणं भवेत् । येन अवयवेन अवयवी न उत्पादितः तद्गतरूपं तु न कारणम् इति आशयः । **तेषाम्** इति । सुखदुःखादि-अजनितावयवि-रूपादीनाम् इत्यर्थः । **फलोपधायकत्वरूपस्य** इति । समवायसंबन्धेन परिमाणं प्रति स्वाश्रयसमवेतत्वसंबन्धेन परिमाणत्वावच्छिन्नं कारणम् इति सामान्यतः कार्यकारणभावः वर्तते । यथा समवायसंबन्धेन परिमाणं घटे वर्तते । तत्प्रति कपालपरिमाणं स्वाश्रयसमवेतत्वसंबन्धेन कारणम् । स्वं – कपालपरिमाणम् । स्वाश्रयः – कपालम् । तत्समवेतत्वं घटे इति । एवं च समवायसंबन्धावच्छिन्नपरिमाणत्वावच्छिन्नकार्यतानिरूपित-स्वसमवायिसमवेतत्व-संबन्धावच्छिन्नकारणतावच्छेदकधर्मवत्त्वरूपस्य ज्ञानातिरिक्तभावकार्यान्तर्गतपरिमाण-रूपकार्य स्वरूपयोग्यत्वरूपकारणत्वस्य पारिमाण्डल्येऽपि सत्त्वात् पारिमाण्डल्ये अतिव्याप्तिः स्यात् । अतः कार्यफलोपधायकत्वमेव कारणत्वम् लक्षणतया विवक्षितम् । तत्तु पूर्वोक्तेषु सुखदुःखादिषु नास्ति इति भावः । एतेन सुखदुःखादिष्वपि स्वरूपयोग्यतारूपं कारणत्वम् अस्ति इति कथं तत्र अव्याप्तिः इति शङ्कायाः नावकाशः । फलोपधायकत्वं च अव्यवहितपूर्वत्वसंबन्धेन कार्यविशिष्टत्वम् । यदव्यवहितोत्तरं कार्यम् उत्पद्यते तदेव अव्यवहितपूर्वत्व-संबन्धेन कार्यविशिष्टं भवति ।।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

।। कारणत्वनिरूपणम् ।।

कारिकावली

अन्यथासिद्धिशून्यस्य नियता पूर्ववर्तिता ।
कारणत्वं भवेत् तस्य त्रैविध्यं परिकीर्तितम् ।। १६ ।।

समवायिकारणत्वं ज्ञेयम् अथाप्यसमवायिहेतुत्वम् ।
एवं न्यायनयज्ञैः तृतीयमुक्तं निमित्तहेतुत्वम् ।। १७ ।।

मुक्तावली

ननु कारणत्वं किम्? अत आह – **अन्यथासिद्धि इति । तस्य कारणत्वस्य ।।**

दिनकरी

मूले अन्यथासिद्धि इति । दण्डत्वादौ नियतपूर्ववृत्तितायाः सत्त्वात् अतिव्याप्तिः, अतः उक्तम् – अन्यथासिद्धिशून्यस्य इति । तद्घटत्वावच्छिन्ने ''अन्यत्र क्लृप्तनियतपूर्व'' इत्याद्यन्यथासिद्धिमत्यपि घटत्वावच्छिन्ने अनन्यथासिद्धे तद्रासभे अतिव्याप्तिवारणाय ''नियत'' इति । **नियतपूर्ववृत्तिजातीयता इत्यर्थः ।** तेन अरण्यस्थदण्डादौ अपि स्वरूपयोग्यतासम्पत्तिः, तज्जातीयत्वं च नियतपूर्ववृत्तितावच्छेदकदण्डत्वादिमत्त्वमेव इति ।।

राजीवोल्लासः

''अन्यथासिद्धिशून्यस्य नियतापूर्ववर्तिता'' इति मूलेन अन्यथा-सिद्धिशून्यत्वे सति कार्यनियतपूर्ववर्तित्वं कारणस्य लक्षणम् इति प्रतीयते । तत्र सत्यन्तस्य प्रयोजनम् आह – **दण्डत्वादौ इति ।** यस्मिन् देशे कार्यम् उत्पद्यते तस्मिन् देशे कार्योत्पत्तेः पूर्वं नियमेन यद्वर्तते तदेव नियतपूर्ववर्ति । घटाधिकरणदेशे दण्डः नियमेन घटात् पूर्वं वर्तते । दण्डत्वमपि स्वाश्रयाश्रयत्वसंबन्धेन घटाधिकरणदेशे वर्तते इति दण्डत्वादेरपि कारणत्वापत्तिः । तद्वारणाय अन्यथासिद्धिशून्यत्वनिवेशः ।

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

नियतपदस्य प्रयोजनम् आह – **तद्घटत्वावच्छिन्न** इत्यादिना । यस्य घटस्य उत्पत्तेः पूर्वं तद्देशे रासभः वर्तते तत्र रासभस्यापि घटपूर्ववर्तित्वात् घटकारणत्वस्य रासभे अतिव्याप्तिः । तद्वारणाय नियतत्वनिवेशः । रासभस्य तु घटनियत-पूर्ववर्तित्वं नास्ति इति न अतिव्याप्तिः ।

ननु रासभस्य "**पञ्चमो रासभादिः स्यात्**" इत्यादिना अन्यथासिद्धतायाः वक्ष्यमाणतया अन्यथासिद्धिशून्यत्वविरहादेव अतिव्याप्तेः अप्रसक्तेः नियतपदोपादानं किमर्थम् इति चेत्, उच्यते – रासभस्य तद्घटत्वावच्छिन्नं प्रति यद्यपि अन्यथासिद्धत्वम् अस्ति – तद्घटत्वावच्छिन्नात् अन्यत्र घटान्तरे क्लृप्तनियतपूर्ववर्तिभिः दण्डादिभिः एव तद्घटत्वावच्छिन्नस्यापि उत्पत्तिसंभवात् तद्भिन्नत्वस्य रासभे सत्त्वात् – तथापि घटत्वावच्छिन्नं प्रति रासभस्य अन्यथासिद्धिः वक्तुं न शक्यते । घटत्वावच्छिन्नात् अन्यत्र पटादौ क्लृप्तनियतपूर्ववर्तिभिः तन्त्वादिभिः घटत्वावच्छिन्नस्य उत्पत्तेरेव असंभवात् घटत्वावच्छिन्ननिरूपितअन्यथासिद्धिलक्षणविरहात् । तथा च घटत्वावच्छिन्नं प्रति अनन्यथासिद्धत्वं रासभे अस्ति इति तत्र अतिव्याप्तिः । तद्वारणाय नियतत्वनिवेशः । नियतत्वं च व्यापकत्वम् । कार्याधिकरणवृत्ति – अत्यन्ताभावाप्रतियोगित्वरूपम् । एतादृशं नियतत्वं कार्येऽपि अस्ति इति तत्र अतिव्याप्तिवारणाय पूर्ववर्तित्वनिवेशः । तथा च कार्यनिरूपित-अन्यथासिद्धि-शून्यत्वे सति कार्यव्यापकत्वे सति कार्यपूर्ववृत्तित्वम् कारणत्वम् इति उक्तं भवति । अरण्यस्थदण्डादौ घटपूर्ववर्तित्वविरहात् अव्याप्तिवारणाय आह – **नियतपूर्ववर्ति-जातीयता** इति । नियतपूर्ववर्तितावच्छेदकधर्मवत्त्वम् इति तदर्थः । घटनियतपूर्व-वर्तितावच्छेदकः यो धर्मः दण्डत्वम्, तद्वत्त्वम् अरण्यस्थदण्डेऽपि अस्ति इति न अव्याप्तिः । वस्तुतस्तु नियतत्वपूर्ववर्तित्वयोः पृथङ्निवेशापेक्षया कार्याव्यवहित-प्राक्क्षणावच्छेदेन कार्याधिकरणवृत्तिः यः अत्यन्ताभावः तत्प्रतियोगितानवच्छेद-कधर्मवत्त्वम् कार्यनियतपूर्ववर्तित्वम् इति विवक्षणीयम् ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

कारिकावली

[1]यत्समवेतं कार्यं भवति ज्ञेयं तु तदत्र समवायि।
तत्रासन्नं जनकं द्वितीयम्, आभ्यां परं तृतीयं स्यात्॥ १८॥

मुक्तावली

तत्र इति। समवायिकारणे प्रत्यासन्नं कारणं द्वितीयम् असमवायिकारणम् इत्यर्थः। अत्र यद्यपि तुरीतन्तुसंयोगस्य पटासमवायिकारणत्वं स्यात्, एवं वेगादीनाम् अभिघाताद्यसमवायिकारणत्वं स्यात्, एवं ज्ञानादीनामपि इच्छाद्यसमवायिकारणत्वं स्यात्, तथापि पटासमवायिकारणलक्षणे तुरीतन्तुसंयोगभिन्नत्वं देयम्। तुरीतन्तु-संयोगस्तु तुरीपटसंयोगं प्रति असमवायिकारणं भवत्येव। एवं वेगादिकमपि वेगस्यन्दाद्यसमवायिकारणं भवत्येव इति तत्तत्कार्यासमवायिकारणलक्षणे तत्तद्भिन्नत्वं देयम्। आत्मविशेषगुणानां तु कुत्रापि असमवायिकारणत्वं नास्ति। तेन तद्भिन्नत्वं सामान्यलक्षणे देयमेव ॥

दिनकरी

यत्समवेतम् इति। यदवच्छिन्नं स्वकारणतावच्छेदकयद्धर्मावच्छिन्ने समवायसंबन्धेन उत्पद्यते, तद्धर्मावच्छिन्नं प्रति तद्धर्मावच्छिन्नं समवायिकारणम् इत्यर्थः। घटत्वाद्यवच्छिन्नं हि स्वकारणतावच्छेदककपालत्वाद्यवच्छिन्ने समवाय-सम्बन्धेन उत्पद्यते इति भवति घटत्वाद्यवच्छिन्नं प्रति कपालत्वाद्यवच्छिन्नं समवायि-कारणम्। ''स्वकारणतावच्छेदक'' इत्युक्त्या च न द्रव्यत्वादेः घटादिसमवायि-कारणतावच्छेदकत्वम् इति।

तत्र आसन्नम् इति। इदं च समवायिकारणादौ अतिव्याप्तिवारणाय। पटसमवायिकारणतन्तुसमवेततन्तुत्वादौ अतिव्याप्तिवारणाय ''जनकम्'' इति। तन्तुत्वस्य अन्यथासिद्धत्वेन अनन्यथासिद्धनियतपूर्ववृत्तितायाः अभावेन न

1. कार्यं यत्समवेतं भवति इति योजना (सु).

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अतिप्रसङ्गः । मुक्तावल्याम् अत्र यद्यपि इति । तुरीतन्तुसंयोगस्य पटं प्रति कुतः न असमवायिकारणत्वम् इति तु न आशङ्कनीयम्, तुरीतन्तुसंयोगनाशे पटनाशापत्तेः । असमवायिकारणनाशस्य द्रव्यनाशजनकत्वात् ।

न च – असमवायिकारणनाशस्य द्रव्यनाशकत्वे प्रमाणाभावः इति – वाच्यम्, द्व्यणुकनाशान्यथानुपपत्तेः एव मानत्वात् इति । न च – तन्तुषु विनष्टेषु विनैव समवायि-कारणं द्रव्यस्य क्षणद्वयं स्थितिः स्यात् इति – वाच्यम् । इष्टापत्तेः । कारणान्तरकल्पने गौरवात् ।।

राजीवोल्लासः

ननु यत्समवेतं कार्यं भवति इत्यादिमूलग्रन्थात् यत्र समवायसंबन्धेन यत्कार्यम् उत्पद्यते, तत् तत्प्रति समवायिकारणम् इति लभ्यते । यत्र कपाले समवायसंबन्धेन यत्कार्यम् उत्पद्यते – घटः उत्पद्यते, तद्घटं प्रति कपालं समवायि-कारणम् । तथा सति कपालस्य कपालत्वेन यथा समवायिकारणत्वम्, तथा द्रव्यत्वेनापि घटसमवायिकारणत्वं स्यात् । एवं कपालत्वावच्छिन्नस्य घटत्वावच्छिन्नं प्रति यथा समवायिकारणत्वं तथा तद्घटत्वावच्छिन्नं प्रत्यपि समवायिकारणत्वं स्यात् इत्यतः व्याचष्टे – यदवच्छिन्नम् इति । यदवच्छिन्नं –घटत्वावच्छिन्नं स्वकारणतावच्छेदकयद्धर्मावच्छिन्ने – घटत्वावच्छिन्नकारणतावच्छेदक-कपालत्वा-वच्छिन्ने समवायसंबन्धेन उत्पद्यते, तद्धर्मावच्छिन्नं प्रति – घटत्वावच्छिन्नं प्रति तद्धर्मावच्छिन्नं – कपालत्वावच्छिन्नं समवायिकारणं भवति । अत्र यद्धर्मे स्वकारण-तावच्छेदकेति विशेषणदानात् द्रव्यत्वादेः व्यवच्छेदः । द्रव्यत्वस्य घटत्वावच्छिन्न-निरूपितकारणतावच्छेदकत्वविरहात् । तथा च तद्धर्मावच्छिन्न-समवायसंबन्धा-वच्छिन्न-कार्यतानिरूपित-स्वकारणतावच्छेदकधर्मावच्छिन्न-तादात्म्यसंबन्धाव-च्छिन्नकारणत्वं तद्धर्मावच्छिन्ननिरूपितसमवायिकारणत्वम् इति उक्तं भवति ।

इदम् च इत्यादि । ''समवायिकारणे प्रत्यासन्नं कारणम् असमवायि-

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

कारणम्'' इत्याशयेन ''तत्र आसन्नं जनकं द्वितीयम्'' इति कारिकावल्याम् उक्तम् । ''तत्र आसन्नम्'' इति विशेषणानुपादाने समवायिकारणेऽपि कारणत्व-सत्त्वात् अतिव्याप्तिः । तद्वारणाय ''समवायिकारणे प्रत्यासन्नम्'' इति कारणस्य विशेषणम् । ''कारणम्'' इति विशेष्यस्य अनुपादाने पटसमवायि-कारणतन्तुसमवेततन्तुत्वादौ अपि समवायिकारणप्रत्यासन्नत्वसत्त्वात् अति-व्याप्तिः । अतः कारणम् इति विशेष्योपादानम् । तन्तुत्वादेः कारणत्वविरहात् न अतिव्याप्तिः। कुतः कारणत्वं नास्ति? इति चेत् अन्यथासिद्धत्वेन अनन्यथा-सिद्धनियतपूर्व-वर्तित्वरूपकारणलक्षणविरहात् ।

तुरीतन्तुसंयोगस्य इत्यादि । समवायिकारणे प्रत्यासन्नं कारणं असम-वायिकारणम् इति उक्तौ तुरीतन्तुसंयोगे पटसमवायिकारणतन्तुसमवेते अतिव्याप्तिः स्यात् इति तद्वारणाय पटासमवायिकारणलक्षणे तुरीतन्तुसंयोगभिन्नत्वं निवेशनीयमिति मुक्तावल्याम् उक्तम्। तत्र तुरीतन्तुसंयोगस्य पटं प्रति असमवायिकारणत्वं कुतो नास्ति इति शङ्का जायते । तत्र इदं समाधानम् – असमवायिकारणनाशस्य द्रव्यनाशं प्रति हेतुत्वात् पटं प्रति तुरीतन्तुसंयोगः यदि असमवायिकारणं स्यात् तदा तुरीतन्तुसंयोगस्य नाशे सति पटस्य नाशः स्यात् । न च – असमवायिकारणनाशस्य द्रव्यनाशं प्रति हेतुत्वे प्रमाणाभावः । सर्वत्र समवायिकारणनाशादेव द्रव्यनाशसंभवात् इति – वाच्यम् । द्व्यणुकनाशानु-पपत्तेः तत्र प्रमाणत्वात् । द्व्यणुकस्य हि परमाणुः समवायिकारणम् । तस्य नित्यतया तन्नाशात् द्व्यणुकनाशः वक्तुं न शक्यते । किन्तु परमाणुद्वयसंयो-गरूपस्य असमवायिकारणस्य नाशादेव द्व्यणुकस्य नाशः वक्तव्यः । तदनुरोधेन सर्वत्र असमवायिकारणनाश एव द्रव्यनाशं प्रति हेतुः इति कार्यकारणभावः कल्पनीयः इति भावः ।

ननु समवायिकारणनाशस्य द्रव्यनाशं प्रति हेतुत्वम् अनङ्गीकृत्य

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

असमवायिकारणनाशस्य द्रव्यनाशं प्रति हेतुत्वाङ्गीकारे पटस्य समवायिकारणं विना क्षणद्वयं स्थितिः अङ्गीकर्तव्या स्यात् । तन्तुषु विनष्टेषु तन्तुद्वयसंयोगनाशात् पटनाशः वक्तव्यः । तत्र प्रथमक्षणे तन्तुनाशः । द्वितीयक्षणे तन्तुद्वयसंयोगनाशः । तृतीयक्षणे पटनाशः । तत्र प्रथमक्षणद्वये समवायिकारणं तन्तुं विनाऽपि पटस्य स्थितेः इति चेत्, न । इष्टापत्तेः। समवायिकारणनाशात् द्रव्यनाशः इति मतेऽपि समवायिकारणनाशक्षणे तन्तुं विनापि पटस्थितेः अङ्गीकरणीयत्वात् । तद्वत् क्षणद्वयस्थितौ बाधकाभावात् ।

समवायिकारणं विना एकक्षणम् अधिकं द्रव्यस्य स्थितिः भवेत् इति भीत्या क्वचित् समवायिकारणनाशात् द्रव्यनाशः, क्वचित् असमवायिकारणनाशात् द्रव्यनाशः इति कार्यकारणभावद्वयकल्पने गौरवात् । सर्वत्र असमवायिकारण-नाशात् द्रव्यनाशः इति एककार्यकारणभावं कल्पयित्वा क्षणद्वयस्थितिकल्पने लाघवात् इत्याशयेन आह – **न च तन्तुषु विनष्टेषु** इति ।

दिनकरी

अथ द्रव्यनाशासमवायिकारणनाशयोः असमानाधिकरणयोः कथं हेतुहेतु-मद्भाव इति चेत्, **अत्र आहुः** – प्रतियोगितया द्रव्यनाशत्वावच्छिन्नं प्रति स्वप्रतियोगिसमवायिसमवेतत्वकालिकविशेषणतोभयसंबन्धेन नाशत्वेन हेतुता इति । इह कालिकसंबन्धस्य कारणतावच्छेदकसंबन्धत्वे घटादेः क्षणिकत्वापत्तिः, अतः स्वप्रतियोगिसमवायिसमवेतत्वनिवेशः । स्वप्रतियोगिजन्यत्वसंबन्धश्च दण्डनाशात् घटनाशापत्तेः उपेक्षितः । भाविनाशम् आदाय अतिप्रसङ्गवारणाय कालिकसंबन्धनिवेशः । **यदि तु** कपालपवनसंयोगनाशात् घटनाशापत्तिः एवमपि दुर्वारैव इति विभाव्यते, **तदा** स्वप्रतियोगिजन्यत्व-स्वप्रतियोगिसमवायिसमवेत-त्व-कालिकविशेणतैतत्त्रितयसंबन्धेन नाशत्वेन हेतुता बोध्या । **न च** – **एवमपि** तुरीतन्तुसंयोगनाशात् पटनाशापत्तिः इति – **वाच्यम्** । **तुरीतन्तुसंयोगस्य पटं**

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्रति कारणतैव न संभवति । किन्तु तुर्येव संयोगसंबन्धेन तन्तुनिष्ठा सती पटजनिका इति तत्र **अतिप्रसङ्गाभावात्** । एवं च विशेषलक्षणेषु तुरीतन्तुसंयोगादिभेदानाम् अनिवेशेन लाघवमपि इति **केचित्** ।।

राजीवोल्लासः

अथ इत्यादि । द्रव्यनाशं प्रति असमवायिकारणनाशस्य कारणत्वे कार्यकारणयोः एकाधिकरणवृत्तित्वं न संभवति ।

न च – पटनाशस्य स्वरूपसंबन्धेन स्वप्रतियोगिसमवायिकारणतन्तुवृत्तित्वात्, तन्तुसंयोगनाशस्यापि स्वरूपसंबन्धेन स्वप्रतियोगिसमवायिकारणतन्तुवृत्तित्वात् एकाधिकरणवृत्तित्वं अस्त्येव । ध्वंसप्रागभावयोः स्वप्रतियोगिसमवायिकारणवृत्तित्वनियमात् इति – वाच्यम् ।

यत्र यत्किंचित्तन्तुसंयोगनाशात् सहस्रतन्तुकपटनाशः तत्र तन्तुसंयोगनाशानधिकरणतन्तुष्वपि पटनाशोत्पत्या व्यतिरेकव्यभिचारप्रसङ्गात् इति शङ्काग्रन्थस्य अभिप्रायः ।

समाधानम् आह – **अत्र आहुः** इत्यादिना । प्रतियोगितासंबन्धेन द्रव्यनाशत्वावच्छिन्नं प्रति स्वप्रतियोगिसमवायिसमवेतत्व-कालिकविशेषणत्वोभयसंबन्धेन नाशः कारणम् इति कार्यकारणभावः । स्वं – असमवायिकारणनाशः । सहस्रतन्तुकपटनाशः प्रतियोगितासंबन्धेन सहस्रतन्तुकपटे वर्तते । तत्र यत्किंचित्तन्तुसंयोगनाशः स्वप्रतियोगिसमवायिसमवेतत्वसंबन्धेन कालिकविशेषणतासंबन्धेन च वर्तते । स्वं – यत्किंचित्तन्तुसंयोगनाशः । तत्प्रतियोगी यत्किंचित्तन्तुसंयोगः । तत्समवायी यत्किंचित्तन्तुः । तत्समवेतत्वं सहस्रतन्तुकपटे इति । एवं तन्तुसंयोगनाशसमानकालिकत्वं च तत्र वर्तते । तत्र कालिकसंबन्धमात्रस्य कारणतावच्छेदकसंबन्धत्वे घटादेः क्षणिकत्वापत्तिः । घटादौ उत्पत्तिक्षणमारभ्य यत्किंचिन्नाशस्य कालिकसंबन्धेन सत्त्वात् । अतः स्वप्रतियोगिसमवायिसमवेतत्वनिवेशः । तेन संबन्धेन नाशस्तु

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

असमवायिकारणनाशः एव । न तु यत्किंश्चिन्नाश इति न दोषः ।

न च – यत्किंश्चिन्नाशस्य व्यावर्तनाय स्वप्रतियोगिजन्यत्वरूपसंबन्ध एव निवेश्यताम् । किं स्वप्रतियोगिसमवायिसमवेतत्वरूपगुरुभूतसंबन्धनिवेशेन? इति – वाच्यम् । तथा सति दण्डनाशात् घटनाशापत्तेः । दण्डनाशः स्वप्रतियोगिदण्डजन्यत्वसंबन्धेन घटे वर्तते इति तत्र प्रतियोगितासंबन्धेन नाशस्य आपत्तिः । ''स्वप्रतियोगि'' इत्यादि संबन्धनिवेशे तु तेन संबन्धेन दण्डनाशः घटे नास्ति इति न दोषः । स्वं – दण्डनाशः । तत्प्रतियोगी – दण्डः । तत्समवायी – दण्डावयवः तत्समवेतत्वं घटे नास्ति । अर्थात् अनेन संबन्धेन असमवायिकारणसंयोगनाश एव द्रव्ये भवितुमर्हति । कालिकसंबन्धानिवेशे यत्र उत्पन्नस्य घटस्य वर्षानन्तरं असमवायिकारणकपालसंयोगनाशात् नाशः भविष्यति, तत्र भाविनः असमवायिकारणनाशस्य इदानीम् अपि स्वप्रतियोगिसमवायिसमवेतत्वसंबन्धेन घटे सत्त्वात् इदानीं प्रतियोगितासंबन्धेन घटनाशापत्तिः । अतः कालिकसंबन्धनिवेशः । तन्निवेशे इदानीमापाद्यमानस्य घटनाशस्य भाविसंयोगनाशकालिकत्वं नास्ति इति न दोषः ।

शङ्कते यदि तु इति । एवमपि स्वप्रतियोगिसमवायिसमवेतत्वकालिकविशेषणत्व-उभयसंबन्धेन नाशस्य द्रव्यनाशं प्रति हेतुत्वकल्पनेऽपि कपालवायुसंयोगनाशात् घटनाशापत्तिः । स्वं – कपालवायुसंयोगनाशः । तत्प्रतियोगी – कपालवायुसंयोगः । तत्समवायी – कपालः तत्समवेतत्वस्य घटे सत्त्वात् । न च – स्वप्रतियोगिसमवायियावत्समवेतत्वस्य संबन्धत्वे न इयम् आपत्तिः संभवति । कपालवायुसंयोगप्रतियोगिसमवायियावदन्तर्गतवायुसमवेतत्वस्य घटे विरहात् – इति वाच्यम् । तथा विवक्षणेऽपि कपालरूपनाशात् घटनाशापत्तिः स्यात् इति भावः । समाधत्ते – तदा स्वप्रतियोगिजन्यत्व इति । तथा च प्रतियोगितासंबन्धेन द्रव्यनाशं प्रति स्वप्रतियोगिजन्यत्व – स्वप्रतियोगिसमवायिसमवेतत्व – कालिकविशेषणत्व – एतत्त्रितयसंबन्धेन नाशः कारणम् । अत्र

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

स्वप्रतियोगिजन्यत्वरूपतृतीयसंबन्धनिवेशात् कपालवायुसंयोगनाशात् कपालरूपनाशाच्च घटनाशापत्तिः न भवति । स्वं – कपालवायुसंयोगनाशः कपालरूपनाशश्च । तत्प्रतियोगी – कपालवायुसंयोगः कपालरूपं च । तज्जन्यत्वस्य घटे अभावात् । **न च एवम् अपि** इति । तृतीयसंबन्धनिवेशेऽपि तुरीतन्तुसंयोगनाशात् पटनाशापत्तिः । तुरीतन्तुसंयोगनाशप्रतियोगितुरीतन्तुसंयोगजन्यत्वात् पटस्य इति शङ्का । इयम् च शङ्का स्वप्रतियोगि–समवायि–समवेतत्वशरीरे यावत्वानिवेशे बोध्या ।

समाधत्ते – तुरीतन्तुसंयोगस्य इति । तुरीतन्तुसंयोगस्य पटं प्रति कारणत्वं न अङ्गीक्रियते । किन्तु संयोगसंबन्धेन तुर्येव कारणम् इति स्वीक्रियते । तथा च तुरीतन्तुसंयोगनाशप्रतियोगितुरीतन्तुसंयोगजन्यत्वं पटे नास्ति इति न तुरीतन्तुसंयोगनाशात् पटनाशापत्तिः इति भावः । **अतिप्रसङ्गाभावात्** इति । तुरीतन्तुसंयोगस्य पटजनकत्वाभावात् इति भावः ।

ननु एवं तुरीतन्तुसंयोगस्य पटं प्रति अकारणत्वे तत्र पटासमवायिकारणलक्षणातिव्याप्तिविरहेण तल्लक्षणे तुरीतन्तुसंयोगभिन्नत्वविशेषणस्य ग्रन्थकृदुपात्तस्य वैयर्थ्यप्रसङ्गः इति आशङ्कायाम् एवमपि अस्माकं लाघवमेव इति न उपादेयमेव तत् इत्याह – **एवं च** इति । **''इति केचित्''** इत्यस्य **''अत्र आहुः''** इति पूर्वत्र अन्वयः । तथा च **''अत्र आहुः''** इत्यारभ्य **''इति केचित्''** इत्यन्तम् **दिनकरीकाराननुयायिनः** मतम् ।।

दिनकरी

वस्तुतस्तु स्वप्रतियोगिनिष्ठासमवायिकारणतानिरूपितफलोपधानात्मकजन्यसंबन्धेन नाशत्वेन हेतुता, तुरीतन्तुसंयोगस्तु निमित्तं, न तु असमवायी इति न तन्नाशे पटनाश इति अन्यत्र विस्तरः ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

''वेगादीनाम्'' इति ''आदि''ना स्पर्शसंग्रहः । ''अभिघातादि'' इति ''आदि''ना नोदनपरिग्रहः । ''ज्ञानादि'' इति ''आदि''ना इच्छापरिग्रहः । ''इच्छादि'' इति ''आदि''ना प्रवृत्तेः परिग्रहः ।।

राजीवोल्लासः

इदानीं दिनकरीकारः स्वमतम् आह – वस्तुतस्तु इति । प्रतियोगिता-संबन्धेन द्रव्यनाशं प्रति स्वप्रतियोगिनिष्ठ – असमवायिकारणतानिरूपित – फलोपधानात्मकजन्यतासंबन्धेन नाशः कारणम् इति कार्यकारणभावः । फलोपधानं नाम – अव्यवहितोत्तरक्षणोत्पत्तिकत्वसंबन्धेन कारणविशिष्टत्वम् कार्यस्य । स्वं – असमवायिकारणनाशः – कपालद्वयसंयोगनाशः । स्वप्रतियोगी – कपालद्वयसंयोगः। तन्निष्ठा या असमवायिकारणता तन्निरूपितजन्यत्वं घटे वर्तते । तत्र प्रतियोगितासंबन्धेन नाशः वर्तते । एवं सहस्रतन्तुकपटनाशस्थलेऽपि स्वं – यत्किंचित्तन्तुसंयोगनाशः । तत्प्रतियोगी – यत्किंचित्तन्तुसंयोगः । तन्निष्ठासमवायिकारणतानिरूपितजन्यत्वं सहस्रतन्तुकपटे वर्तते । तत्र प्रतियोगितासंबन्धेन नाशः भवति इति कार्यकारणयोः एकाधिकरणवृत्तित्वम् । तुरीतन्तुसंयोगनाशात् पटनाशापत्तिस्तु न भवति । स्वप्रतियोगितुरीतन्तुसंयोगनिष्ठासमवायिकारणतानिरूपितजन्यत्वस्य पटे अभावात् । पटं प्रति तुरीतन्तु-संयोगस्य निमित्तकारणत्वेन असमवायिकारणत्वाभावात् । स्वानधिकरणतन्तुनिष्ठस्य स्वव्यवहितपूर्ववर्तिस्वसमानाधिकरणस्य वा तन्तुद्वयसंयोगस्य नाशेन स्वनाशवारणाय फलोपधाननिवेशः । तादृशफलोपधानात्मकजन्यत्वं च तादृशासमवायिकारणतानिरूपकत्वे सति स्वप्रतियोग्यव्यवहितोत्तरक्षणावच्छिन्न-प्रतियोगिसामानाधिकरण्यरूपम् । ''अस्मात् इदम्'' इति व्यवहारसिद्धप्रयोज्यता-ख्यस्वरूपसंबन्धविशेषः वा । एवं भाविनाशम् आदाय घटादेः क्षणिकत्वा-पत्तिवारणाय कालिकसंबन्धोऽपि प्रवेशनीयः । एतल्लाभायैव अन्यत्र विस्तर इति उक्तम् ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

नोदन इति । शब्दजनकसंयोगः अभिघातः । तद्भिन्नः संयोगः नोदनम् । अभिघातं प्रति वेगस्य असमवायिकारणत्वं स्यात् । तद्भिन्नसंयोगे नोदनाख्ये क्रियायाः असमवायिकारणत्वं स्यात् । तद्वारणाय तत्तद्भिन्नत्वं असमवायिकारण-लक्षणे निवेशनीयम् इति भावः ।

अत्र यद्यपि तयोः असमवायिकारणत्वेऽपि न तन्नाशात् अभिघातादिना-शापत्तिः । द्रव्यनाशं प्रत्येव असमवायिकारणनाशस्य हेतुत्वात् इति इष्टापत्तिः संभवति, तथापि असमवायिकारणमन्तरा क्षणत्रयं कार्यस्थितेः अनिष्टतया तदापत्तिरेव अत्र इष्टापत्तिबाधिका इति मन्तव्यम् इति **तरङ्गिणीकाराः** ।।

वस्तुतस्तु कर्मजसंयोगस्य पाकजरूपादेश्च कर्मपाकादिनाशानन्तरमपि चिरस्थायित्वात् न इदं युक्तम् इति **सुबोधिनीकाराः** ।।

दिनकरी

तन्तुसमवेतत्वे सति तुरीतन्तुसंयोगाद्यन्यत्वे सति पटकारणत्वं पटा-समवायिकारणत्वम् इति विशिष्यैव लक्षणं वक्तव्यम् इत्याह – **तथापि** इति । **वस्तुतस्तु** तुरीतन्तुसंयोगत्वावच्छिन्नप्रतियोगिताकभेदः पटासमवायिकारण-लक्षणघटकतया ग्रन्थकर्तुः नाभिप्रेतः, अपि तु तन्तुभिन्नसमवेतत्वावच्छिन्न-प्रतियोगिताकभेद एव । अन्यथा हस्ततन्तुसंयोगादिभेदानां पृथङ्निवेशापत्त्या भेदकूटनिवेशने गौरवात् इति ध्येयम् ।।

राजीवोल्लासः

ननु पटासमवायिकारणलक्षणे तुरीतन्तुसंयोगभिन्नत्वं देयम् इति मूलात् तुरीतन्तुसंयोगत्वावच्छिन्नप्रतियोगिताकभेदः लक्षणघटकतया निवेशनीय इति प्रतीयते । परन्तु तथा निवेशेऽपि हस्ततन्तुसंयोगादीनामपि पटासमवायिकारणत्वस्य अनिष्टतया तत्र अतिव्याप्तिवारणाय हस्ततन्तुसंयोगादिभिन्नत्वस्यापि पृथक् निवेशापत्या गौरवं स्यात् । अतः सर्वेषां भेदानां सङ्ग्रहः यथा स्यात् तथा "**तुरीतन्तुसंयोगभिन्नत्वम्**"

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

इत्यस्य अर्थो वर्णनीयः इत्याशयेन आह – **वस्तुतस्तु** इत्यादिना । तथा च ''तुरीतन्तुसंयोगभिन्नत्वम्'' इत्यनेन तन्तुभिन्नसमवेतत्वावच्छिन्नप्रतियोगिताकभेदः विवक्षितः । तेन तुरीतन्तुसंयोगभेदः हस्ततन्तुसंयोगभेदः इत्यादयः सर्वे भेदाः सङ्गृहीता भवन्ति । तुरीतन्तुसंयोगः तन्तुभिन्नतुरीसमवेतः, हस्ततन्तुसंयोगः तन्तुभिन्नहस्तसमवेतः । अतः तन्तुभिन्नसमवेतत्वेन रूपेण तुरीतन्तुसंयोगहस्ततन्तुसंयोगादीनां सङ्ग्रहात् तन्तुभिन्न-समवेतत्वावच्छिन्नप्रतियोगिताकभेदः इत्यनेन तुरीतन्तुसंयोगभेद-हस्ततन्तुसंयोगभेदादयः सङ्गृहीता भवन्ति । तुरीतन्तुसंयोगत्वावच्छिन्नप्रतियोगिताकभेदत्वेन भेदनिवेशे तु हस्ततन्तुसंयोगभेदस्य तुरीतन्तुसंयोगत्वावच्छिन्नप्रतियोगिताकत्वं नास्ति इति सङ्ग्रहः न स्यात् इति भावः ।।

दिनकरी

एतेन – तन्तुमात्रसमवेतत्वनिवेशेनैव उपपत्तौ तुरीतन्तुसंयोगान्यत्वनिवेशनम् अनुचितम् इति अपास्तम् । मात्रपदस्य अस्मदुक्तार्थकत्वात् । **एवम् इच्छाद्यसमवायिकारणलक्षणे** आत्ममात्रसमवेतत्वावच्छिन्नप्रतियोगिताकभेद एव निवेश्यः, न तु ज्ञानत्वाद्यच्छिन्नभेदः इति बोध्यम् ।।

राजीवोल्लासः

एतेन इति । पटासमवायिकारणलक्षणे तुरीतन्तुसंयोगे अतिव्याप्तिवारणाय तुरीतन्तुसंयोगभिन्नत्वस्थाने तन्तुमात्रसमवेतत्वनिवेशनमेव उचितम् । तुरीतन्तुसंयोगस्य तन्त्वतिरिक्ततुरीसमवेतत्वात् तन्तुमात्रसमवेतत्वविरहात् अतिव्याप्तिवारणसंभवात् । तन्तुभिन्नासमवेतत्वे सति तन्तुसमवेतत्वं हि तन्तुमात्रसमवेतत्वम् इति कैश्चित् उक्तम् अपास्तम् । तन्तुमात्रसमवेतत्वं हि अस्मदुक्तार्थे एव पर्यवसितम् । तन्तुभिन्नासमवेतत्वस्य तन्तुभिन्नसमवेतत्वावच्छिन्नप्रतियोगिताकभेदरूपत्वात् । प्रत्युत तन्तुसमवेतत्वस्य अधिकस्य निवेशात् गौरवम् ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

न च – तन्तुसमवेतत्वानुपादाने असमवेतकालादौ पटकारणे अतिव्याप्तिः स्यात् इति – वाच्यम् । तत्र अतिव्याप्तिवारणाय समवेतत्वनिवेशस्य आवश्यकत्वेऽपि तन्तुपदनिवेशस्य आधिक्यात् इत्यवधेयम् । एतदुक्तं भवति – तन्तुभिन्नसमवेतत्वावच्छिन्नप्रतियोगिताकभेदवत्त्वे सति समवेतत्वे सति कारणत्वम् असमवायिकारणलक्षणम् । तन्तुमात्रसमवेतत्त्वनिवेशपक्षे तु तन्तुभिन्नसमवेतत्वावच्छिन्नप्रतियोगिताकभेदवत्त्वे सति तन्तुसमवेतत्वे सति कारणत्वं लक्षणम् । तत्र तन्तुसमवेतत्वे सति इत्यत्र तन्तुपदम् अधिकम् इति ।

एवम् इच्छाद्यसमवायिकारणलक्षणे इति । इच्छाद्यसमवायिकारणलक्षणे ज्ञानादिषु अतिव्याप्तिवारणाय तत्तद्भिन्नत्वनिवेशापेक्षया आत्ममात्रसमवेतत्वावच्छिन्नप्रतियोगिताभेद एव निवेश्यः । तेनैव ज्ञानादिभेदानां सङ्ग्रहात् पृथङ्निवेशे गौरवम् इति भावः । अत्र "आदि"पदं कार्यसामान्यपरम् । तथा च असमवायिकारणसामान्यलक्षणे ज्ञानभेदनिवेशे इच्छाभेदस्यापि निवेशनीयतया गौरवम् इति एकभेदनिवेश एव उचितः इति **तरङ्गिणीस्वारस्यात्** ज्ञानभेद – इच्छाभेदादीनां आत्ममात्रसमवेतत्वावच्छिन्नप्रतियोगिताकभेदत्वेन सङ्ग्रह इति **दिनकर्याशयः** लभ्यते । **सुबोधिनीकारास्तु** – "आत्ममात्रसमवेतत्वावच्छिन्नप्रतियोगिताकभेदः" इत्यस्य आत्मेतरसमवेतत्वम् इत्यर्थम् उक्त्वा ज्ञानादिषु आत्मेतरसमवेतत्वविरहात् न अतिव्याप्तिः इति व्याख्यानं कुर्वन्ति । तत्र प्रथमव्याख्याने "मात्र" पदानुपादाने ज्ञानासमवायिकारणे आत्ममनस्संयोगे आत्मसमवेतभिन्नत्वविरहेण अव्याप्तिः । अतः मात्रपदम् । तदुपादाने आत्ममनस्संयोगस्य आत्मनि मनसि च समवेततया आत्ममात्रसमवेतत्वं नास्ति इति आत्ममात्रसमवेतभिन्नत्वम् अक्षतम् । अतः न अव्याप्तिः ॥

मुक्तावली

अत्र समवायिकारणे प्रत्यासन्नत्वं द्विविधम् कार्यैकार्थप्रत्यासत्त्या

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

कारणैकार्थप्रत्यासत्त्या च । आद्यं यथा – घटादिकं प्रति कपालसंयोगादिकम् असमवायिकारणम् । तत्र कार्येण घटेन सह कारणस्य कपालसंयोगस्य एकस्मिन् कपाले प्रत्यासत्तिः अस्ति । द्वितीयं यथा – घटरूपं प्रति कपालरूपम् असमवायिकारणम् । स्वगतरूपादिकं प्रति समवायिकारणं घटः । तेन सह कपालरूपस्य एकस्मिन् कपाले प्रत्यासत्तिः अस्ति । **तथा च** क्वचित् समवायसंबन्धेन क्वचित् स्वसमवायिसमवेतत्वसंबन्धेन इति **फलितोऽर्थः** । **इत्थं च** कार्यैकार्थकारणैकार्थान्यतरप्रत्यासत्त्या कारणं ज्ञानादिभिन्नम् असमवायिकारणम् इति सामान्यलक्षणं पर्यवसितम् ।।

दिनकरी

तथा च इति । द्विविधप्रत्यासत्तिविवक्षणे च इत्यर्थः । **फलितोऽर्थ इति** । द्विविधप्रत्यासत्त्योः इति शेषः । पर्यवसितम् असमवायिकारणलक्षणम् आह – **इत्थं च इति** । कार्यैकार्थप्रत्यासत्तिः – समवायसम्बन्धः, कारणैकार्थप्रत्यासत्तिः – स्वसमवायिसमवेतत्वसंबन्धः । **तथा च** समवाय-स्वसमवायिसमवेतत्वान्यतरसंबन्धेन कारणत्वे सति आत्मविशेषगुणान्यत्वं सामान्यतः असमवायिकारणत्वम् इत्यर्थः । अत्र पटासमवायिकारणस्य तन्तुसंयोगस्य पटरूपासमवायिकारणस्य तन्तुरूपस्य च संग्रहाय समवाय-स्वसमवायिसमवेतत्वयोः प्रवेशः । घटरूपं प्रति घटस्य असमवायिकारणतावारणाय समवायिकारणे प्रत्यासन्नत्वे सति कारणत्वं परित्यज्य तादृशान्यतरप्रत्यासत्त्या कारणत्वपर्यन्तानुधावनम् । आत्मविशेषगुणान् वारयितुं विशेष्यभागः ।।

राजीवोल्लासः

फलितोऽर्थः इति । मुक्तावल्यां कयोः शब्दयोः फलितोऽर्थः इति जिज्ञासायाः पूरणाय द्विधप्रत्यासत्योः इति शेष इति दिनकर्याम् उक्तम् । अत्र समवायिकारणे प्रत्यासन्नवं द्विविधम् – कार्यैकार्थप्रत्यासत्या कारणैकार्थप्रत्यासत्या च

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

इति व्यवहितपूर्वं विद्यमाने मुक्तावलीग्रन्थे तृतीयाविभक्त्यन्तद्विविधप्रत्यासत्तिबोधक-पदयोः एकस्य समवायसंबन्धेन इति अन्यस्य स्वसमवायिसमवेतत्वसंबन्धेन इति **फलितः अर्थः** इति मुक्तावल्यर्थः इति भावः । तथा च **मुक्तावल्यां प्रथमस्य** ''क्वचित्'' शब्दस्य एकस्य तृतीयान्तप्रत्यासत्तिशब्दस्य इत्यर्थः । द्वितीयस्य ''क्वचित्'' शब्दस्य अन्यस्य तृतीयान्तप्रत्यासत्तिशब्दस्य इत्यर्थः ।

ननु **तथा च** इत्यादिना घटादिकं प्रति कपालादिसंयोगस्य समवायेन घटरूपादिकं प्रति कपालरूपादेः स्वसमवायिसमवेतत्वसंबन्धेन कारणत्वम् अभिधाय **''इत्थं च''** इत्यादिना असमवायिकारणलक्षणघटककारणतायां कार्यैकार्थप्रत्यासत्ति कारणैकार्थप्रत्यासत्त्यन्यतरावच्छिन्नत्वकथनं सन्दर्भविरुद्धम्; कार्यैकार्थप्रत्यासत्तेः प्रकृतकार्यसमवाय्यनुयोगिकसमवायरूपत्वात् लाघवेन केवलसमवायस्यैव कारणतावच्छेदकत्वात् कारणैकार्थप्रत्यासत्तेः प्रकृतकार्यकारणसमवाय्यनुयो-गिकसमवायरूपायास्तु कारणतावच्छेदकत्वस्यैव असंभवात् तेन संबन्धेन कपालरूपादेः घटादिरूपाधिकरणे असत्त्वात् इति आशङ्कां निरसितुं तदर्थम् आह – **कार्यैकार्थ** इति । तथा च समवाये प्रकृतकार्य-समवाय्यनुयोगिकत्वं कार्यकारणयोः ऐकाधिकरण्यलाभायैव प्रदर्शितम्, न तु समवायस्य तेन रूपेण कारणतावच्छेदक-संबन्धत्वलाभाय इति भावः । एवं द्वितीयेऽपि कारणपदस्य प्रकृतकार्यकारणघटितार्थक-तया प्रकृतकार्यकारणेन सह एकस्मिन् अर्थे कारणघटिता स्वसमवायिसमवेतत्वरूपा प्रत्यासत्तिः इत्येव अर्थः इति **तरङ्गिणी** ।।

तथा च इत्यादि । समवायसंबन्धावच्छिन्नकार्यतानिरूपित-स्वसमवाय-स्वसमवायि-समवेतत्व-अन्यतरसंबन्धावच्छिन्नकारणत्वे सति आत्मविशेषगुणभिन्नत्वं सामान्यतः असमवायिकारणस्य लक्षणम् । तत्र कारणतायां समवायसंबन्धा-वच्छिन्नत्वानिवेशे पटासमवायिकारणे तन्तुसंयोगे समवायसंबन्धेन कारणत्वसत्त्वेऽपि स्वसमवायिसमवेतत्वसंबन्धेन कारणत्वं नास्ति इति अव्याप्तिः । तद्वारणाय

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

समवायसंबन्धावच्छिन्नत्वनिवेशः । स्वसमवायिसमवेतत्वसंबन्धावच्छिन्नत्वानिवेशे पटरूपं प्रति असमवायिकारणे तन्तुरूपे समवायसंबन्धेन पटरूपं प्रति समवायसंबन्धेन कारणत्वं नास्ति इति अव्याप्तिः । तद्वारणाय स्वसमवायिसमवेतत्वान्यतरसं-बन्धावच्छिन्नत्वनिवेशः । एवं विषयतासंबन्धावच्छिन्नप्रत्यक्षनिष्ठकार्यतानिरूपित-समवायसंबन्धावच्छिन्नकारणतावति अवयविद्रव्यनिष्ठे महत्त्वे अतिव्याप्तिवारणाय कारणतायां समवायसंबन्धावच्छिन्नकार्यतानिरूपितत्वनिवेशः । समवायिकारणे प्रत्यासन्नत्वे सति कारणत्वम् इति यथाश्रुतासमवायिकारणलक्षणस्य स्वीकारे घटरूपं प्रति घटस्य असमवायिकारणत्वं स्यात् । घटरूपं प्रति घटस्य कारणत्वात् समवायिकारणे घटे तादात्म्यसंबन्धेन घटस्य प्रत्यासन्नत्वाच्च । अतः यथाश्रुतार्थं परित्यज्य समवाय-स्वसमवायि-समवेतत्वान्यतरसंबन्धावच्छिन्नत्वनिवेशः ।

यद्वा यथाश्रुतार्थस्वीकारे घटरूपं प्रति समवायिकारणे घटे स्वसमवा-यिसमवेतत्वसंबन्धेन प्रत्यासन्नत्वं घटस्य अस्ति इति घटे अतिव्याप्तिः । अतः समवायिकारणे प्रत्यासन्नत्वे सति कारणत्वम् इति यथाश्रुतलक्षणं परित्यज्य उक्तान्यतरप्रत्यासत्त्यवच्छिन्नं कारणत्वम् इति निवेशितम् । घटरूपं प्रति घटस्य तादात्म्यसंबन्धेन कारणत्वे अपि समवायसंबन्धेन वा स्वसमवायिसमवेतत्वसंबन्धेन वा कारणत्वं नास्ति इति तादृशान्यतरसंबन्धावच्छिन्नकारणत्वविरहात् न अतिव्याप्तिः इति भावः ।

अन्यतरप्रत्यासत्त्या इति । तृतीयायाः अवच्छिन्नत्वम् अर्थः । तच्च कारणत्वान्वयि ।

विशेष्यभाग इति । आत्मविशेषगुणान्यत्वम् इत्यर्थः ।।

दिनकरी

यत्तु कार्यनाशजनकनाशप्रतियोगित्वं तत्त्वम् इति, तन्न । द्वित्वनाश-प्रयोजकनाशप्रतियोगिन्याम् अपेक्षाबुद्धौ अतिव्याप्तेः इति । **अवयवमात्रसंयोगत्वं**

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

द्रव्यासमवायिकारणत्वम् इत्यादिविशिष्यैव लक्षणं निर्वाच्यम्, **अखण्डोपाधिरेव वा तत् इति अन्ये** ।।

राजीवोल्लासः

यत्तु इति । कार्यनाशजनकनाशप्रतियोगित्वम् असमवायिकारणत्वम् । कार्यनाशजनकः नाशः असमवायिकारणनाशः । तत्प्रतियोगित्वं असमवायिकारणे अस्तीति लक्षणसमन्वयः । **तत्त्वम्** इति । असमवायिकारणत्वं इत्यर्थः ।

द्वित्वनाश इति । अपेक्षाबुद्धिनाशात् द्वित्वनाशः इति सिद्धान्तात् द्वित्वनाशं प्रति जनकः यः नाशः अपेक्षाबुद्धिनाशः तत्प्रतियोगित्वम् अपेक्षाबुद्धौ अस्ति इति तत्र द्वित्वं प्रति असमवायिकारणत्वापत्तिः । कार्यनाशजनकनाशप्रतियोगित्वरूपस्य असमवायिकारणलक्षणस्य सत्त्वात् ।

अवयवमात्रसंयोगत्वम् इति । अवयवमात्रसमवेतसंयोगत्वम् इत्यर्थः । तुरीतन्तुसंयोगे पटासमवायिकारणत्ववारणाय मात्रपदम् । इत्यादिविशिष्यैव इत्यत्र ''आदि'' पदेन रूपनिष्ठसमवायसंबन्धावच्छिन्नकार्यतानिरूपितकारणताशालित्वे सति रूपत्वं रूपासमवायिकारणलक्षणम् इत्यादीनां परिग्रहः । अत्र ''अवयवमात्रसंयोगत्वं द्रव्यासमवायिकारणस्य लक्षणम्'' इत्युक्तौ पटानारम्भकतन्तुद्वयसंयोगे अतिव्याप्तिः इत्यालोच्य असमवायिकारणत्वं पदार्थान्तरं इति मताभिप्रायेण आह – **अखण्डोपाधिरेव वा** इति ।।

मुक्तावली

आभ्यां – समवायिकारणासमवायिकारणाभ्याम् **परं भिन्नं कारणं**, तृतीयं निमित्तकारणम् इत्यर्थः ।।

दिनकरी

भिन्नं कारणम् इति । **अत्र** इदं बोध्यम् । **समवायिकारणत्वासमवायिकारणत्वभिन्नकारणत्वमेव** निमित्तकारणत्वम् । तेन तुरीपटसंयोगं प्रति तुरीतन्तुसंयोगस्य

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

असमवायिकारणत्वेऽपि न तस्य पटं प्रति निमित्तकारणत्वक्षतिः इति ।।

राजीवोल्लासः

भिन्नं कारणम् इति इति । ननु समवायिकारणासमवायिकारणभिन्नत्वे सति कारणत्वस्य निमित्तकारणलक्षणत्वे पटनिमित्तकारणे तुरीतन्तुसंयोगे अव्याप्तिः । तस्य तुरीपटसंयोगासमवायिकारणत्वेन सत्यन्तविरहात् । न च – तत्कार्यसमवायिकारणासमवायिकारणभिन्नत्वे सति तत्कार्यकारणत्वं तत्कार्यं प्रति निमित्तकारणत्वम् इति विशिष्यैव लक्षणं वक्तव्यम् । तथा च तुरीतन्तुसंयोगस्य पटसमवायिकारणासमवायिकारणाभ्यां भिन्नत्वेन न तत्र पटनिमित्तकारणत्वानुपपत्तिः इति – वाच्यम् । तथा सति ध्वंसं प्रति निमित्तकारणे प्रतियोग्यादौ अव्याप्तेः, तस्य समवायिकारणासमवायिकारणयोः अप्रसिद्धेः इति आशङ्कां निराकुरुते – **अत्र इदम्** इत्यादिना इति बोध्यम् ।

समवायिकारणत्व इति । समवायिकारणत्वभिन्नं असमवायिकारणत्वभिन्नं च कारणत्वं निमित्तकारणत्वम् । तुरीपटसंयोगं प्रति तुरीतन्तुसंयोगस्य असमवायिकारणत्वेन असमवायिकारणभिन्नत्वविरहेऽपि तुरीतन्तुसंयोगनिष्ठा या पटनिरूपिता निमित्तकारणता तस्यां समवायिकारणत्वभिन्नत्वस्य असमवायिकारणत्व-भिन्नत्वस्य च सत्त्वात् न अव्याप्तिः । ध्वंसं प्रति निमित्तकारणे प्रतियोगिनि या कारणता तस्यां अन्यत्रप्रसिद्धसमवायिकारणता–असमवायिकारणताभिन्नत्वम् अस्ति इति न अव्याप्तिः इति भावः ।।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

।। अन्यथासिद्धिनिरूपणम् ।।

कारिकावली

येन सह पूर्वभावः कारणमादाय वा यस्य ।
अन्यं प्रति पूर्वभावे ज्ञाते यत्पूर्वभावविज्ञानम् ।। १९ ।।

मुक्तावली

इदानीम् अन्यथासिद्धत्वमेव केषाम्? तदाह – **येन** इति । **यत्कार्यं प्रति** कारणस्य पूर्ववृत्तिता **येन रूपेण** गृह्यते, तत्कार्यं प्रति तद्रूपम् अन्यथासिद्धम् इत्यर्थः । यथा घटं प्रति दण्डत्वम् इति ।।

दिनकरी

यत्कार्यं प्रति इति । यद्धर्मावच्छिन्नं प्रति इत्यर्थः । **येन रूपेण** इति । यद्रूपावच्छेदेन इत्यर्थः । इत्थं च तद्धर्मावच्छिन्ननिरूपितनियतपूर्ववृत्तित्वग्रहविशेष्यतावच्छेदकत्वे सति तद्धर्मावच्छिन्नं प्रति स्वतन्त्रान्वयव्यतिरेकशून्यत्वं तद्धर्मावच्छिन्नं प्रति अन्यथासिद्धित्वं प्रथमम् इत्यर्थः । **द्वितीयान्यथासिद्धदण्डरूपादिवारणाय** सत्यन्तम् । **''कपालसंयोगः घटपूर्ववर्ती''** इत्यादिग्रहे कपालस्यापि तादृशविशेष्यतावच्छेदकत्वात् तत्र अतिव्याप्तिवारणाय विशेष्यम् ।।

राजीवोल्लासः

''अन्यथासिद्धिशून्यस्य नियता पूर्ववर्तिता कारणत्वं भवेत्'' इति ग्रन्थेन पूर्वं कारणत्वशरीरे अन्यथासिद्धिशून्यत्वं निवेशितम् । तत्र केषाम् अन्यथासिद्धिर्भवति? अन्यथासिद्धिर्नाम का? इति जिज्ञासायां **''येन सह पूर्वभावः''** इत्यादिना पञ्चविधान्यथासिद्धयः प्रतिपादिताः । तत्र **''येन सह पूर्वभावः''** इत्यस्य **''यत्कार्यं प्रति कारणस्य पूर्ववृत्तिता येन रूपेण गृह्यते तत्कार्यं प्रति तद्रूपमन्यथासिद्धम् इत्यर्थः''** इति मुक्तावल्याम् उक्तः । तत्र **''यत्कार्यं**

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्रति'' इत्यादेः यथाश्रुतार्थकत्वे यत्कार्यनिरूपितपूर्ववर्तित्वग्रहविशेष्यतावच्छेदकं यद्रूपं तत् तत्कार्यं प्रति अन्यथासिद्धम् इति लभ्यते । यथा घटं प्रति दण्डत्वम् । ''दण्डः घटपूर्ववृत्तिः'' इत्याकारकग्रहे दण्डत्वस्य विशेष्यतावच्छेदकत्वात् तत् अन्यथासिद्धम् । एवं सति तद्धटविषयकप्रत्यक्षं प्रति तद्धटस्य विषयविधया तद्व्यक्तित्वेन कारणत्वात् तद्धटविषयकप्रत्यक्षपूर्ववृत्तित्वग्रहविशेष्यतावच्छेदकत्वं तद्धटनिष्ठतद्व्यक्तित्वस्य अस्ति इति तद्व्यक्तित्वं तद्धटविषयकप्रत्यक्षं प्रति यथा अन्यथासिद्धम्, तथा स्वविषयकप्रत्यक्षं प्रत्यपि अन्यथासिद्धम् स्यात् स्वं-तद्व्यक्तित्वम् । ''यत्कार्यम्'' इत्यनेन तद्व्यक्तित्वविषयकं तद्व्यक्तित्वाश्रयघटाव-गाहिप्रत्यक्षं गृहीत्वा तन्निरूपितपूर्ववृत्तित्वप्रकारकग्रहविशेष्यतावच्छेदकत्वस्य तद्व्यक्तित्वे सुसंपादत्वात् । अतः ''यत्कार्यं प्रति'' इत्यस्य ''यद्धर्मावच्छिन्नकार्यं प्रति'' इत्यर्थः । यद्धर्मपदेन कार्यतावच्छेदकधर्मः ग्राह्यः । तथा च यद्धर्मावच्छिन्न-कार्यतानिरूपितकारणनिष्ठपूर्ववृत्तित्वग्रविशेष्यतावच्छेदकः यः धर्मः, सः तद्धर्मावच्छिन्नकार्यं प्रति अन्यथासिद्धः इति निष्कृष्टार्थः । तद्व्यक्तित्वविषयकप्रत्यक्षे विषयविधया कारणस्य तद्व्यक्तित्वस्य कार्यतावच्छेदकं तद्व्यक्तित्वविषयक-प्रत्यक्षत्वम् । तदवच्छिन्नकार्यतानिरूपितपूर्ववृत्तित्वग्रहविशेष्यतावच्छेदकत्वं तद्व्यक्तित्वे नास्ति । तद्व्यक्तित्वं हि तद्व्यक्तित्वाश्रयतद्व्यक्तिविषय-कप्रत्यक्षत्वावच्छिन्नकार्यतानिरूपितपूर्ववृत्तित्वग्रहविशेष्यतावच्छेदकम् ''तद्व्यक्तिः तद्व्यक्तिविषयकप्रत्यक्षपूर्ववृत्ति'' इति ग्रहम् आदाय भवति । तद्व्यक्तित्वविषय-कप्रत्यक्षत्वावच्छिन्नकार्यतानिरूपितपूर्ववृत्तित्वग्रहविशेष्यतावच्छेदकं तद्व्यक्तित्वं न भवति । ''तद्व्यक्तित्वं तद्व्यक्तित्वविषयकप्रत्यक्षपूर्ववृत्ति'' इति ग्रहे तद्व्यक्तित्वस्य विशेष्यतया विशेष्यतावच्छेदकत्वविरहात् । अतः तद्व्यक्तित्वं स्वविषयकप्रत्यक्षे अन्यथासिद्धम् न भवति । एतेन इदमुक्तं भवति – यस्य यत्कार्यं प्रति अन्यथासिद्धत्वमापाद्यते, तस्य तद्विशिष्टनिरूपितकार्यतावच्छेदकावच्छिन्न-कार्यतानिरूपितपूर्ववृत्तित्वग्रहविशेष्यतावच्छेदकत्वम् आवश्यकम् इति ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

न च – तद्व्यक्तित्वविषयकप्रत्यक्षे तद्व्यक्तित्वस्य स्वतन्त्रान्वयव्यतिरेकसत्त्वात् स्वतन्त्रान्वयव्यतिरेकशून्यत्वविरहात् न अन्यथासिद्धत्वापत्तिः इति – वाच्यम् । तद्व्यक्तित्वे तद्व्यक्तिविषयक प्रत्यक्षत्वावच्छिन्नं प्रति अन्यथासिद्धे अव्याप्तिभिया तद्व्यक्तिविषयकप्रत्यक्षत्वावच्छिन्ननिरूपितस्वतन्त्रान्वयव्यतिरेकशून्यत्वमेव लक्षणे निवेशनीयम् । तथा च तद्व्यक्तित्वे अतिव्याप्तेः दुर्वारत्वात् । तद्वारणाय ''यत्कार्यं प्रति'' इत्यस्य ''यद्धर्मावच्छिन्नं प्रति'' इति व्याख्यानम् आवश्यकम् इति भावः ।

''येन सह'' इति मूलेन यद्विषयकज्ञानसमानकालीनत्वं ग्रहणे लभ्यते, तच्च न लक्षणोपयोगि इति साहित्यरूपमर्थं परित्यज्य मुक्तावल्यां व्याख्यानं कृतम् । इत्थं च **''येन''** इति तृतीयायाः विशेष्यतावच्छेदकत्वरूपं प्रकारत्वमर्थः । तस्य निरूपकतासंबन्धेन ग्रहणे अन्वयः । तथा च यत्कार्यनिरूपिता कारणनिष्ठा पूर्ववृत्तिता यद्धर्मनिष्ठविशेष्यतावच्छेदकतानिरूपकग्रहविषयः भवति तद्रूपं अन्यथासिद्धम् इति मूलार्थः । तेन निष्कृष्टम् अर्थं आह – इत्थं च इत्यादिना । तद्धर्मः घटत्वम् । तदवच्छिन्ननिरूपितं यत् नियतपूर्ववृत्तित्वं तत्प्रकारकग्रहविशेष्यता-वच्छेदकत्वे सति तद्धर्मावच्छिन्ननिरूपितस्वतन्त्रान्वयव्यतिरेकशून्यत्वं तद्धर्मावच्छिन्ननिरूपितम् अन्यथासिद्धत्वम् ।

तथा हि – ''दण्डः घटत्वावच्छिन्ननियतपूर्ववृत्तिः'' इत्याकारकग्रहे नियतपूर्ववृत्तित्वं प्रकारः, दण्डत्वावच्छिन्नः विशेष्यः । दण्डत्वं विशेष्यतावच्छेदकम् । अतः घटत्वावच्छिन्ननिरूपितनियतपूर्ववृत्तित्वप्रकारकग्रहविशेष्यतावच्छेदकत्वं दण्डत्वे अस्ति । एवं घटत्वावच्छिन्नं प्रति नियतपूर्ववर्तिनः अपि दण्डत्वस्य स्वातन्त्र्येण अन्वयव्यतिरेकौ न स्तः । किन्तु दण्डद्वारैव तौ स्तः इति घटत्वावच्छिन्ननिरूपितस्वतन्त्रान्वयव्यतिरेकशून्यत्वं च अस्ति इति प्रथमान्यथा-सिद्धत्वलक्षणस्य दण्डत्वे समन्वयः ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

मूले "कारणस्य" इति स्वरूपकथनम् । न तु तस्य लक्षणे प्रवेशः । यद्वा "कारणस्य" इति षष्ठ्याः विशेष्यत्वमर्थः । तस्य निरूपकतासंबन्धेन ग्रहधात्वर्थग्रहे अन्वयः । अथ वा षष्ठ्यर्थविशेष्यत्वस्य तृतीयार्थावच्छेदकतायां निरूपितत्वसंबन्धेन अन्वयः । "गृह्यते" इत्यत्र आख्यातस्य प्रकारत्वरूपं विषयत्वमर्थः । तच्च पूर्ववर्तितायाम् अन्वेति । प्रतिशब्दार्थः निरूपितत्वम् । तस्यापि पूर्ववर्तितायाम् अन्वयः । तथा च यद्धर्मावच्छिन्ननिरूपितपूर्ववृत्तित्वं यद्रूपनिष्ठविशेष्तावच्छेदकताककारणविशेष्यकग्रहनिरूपितप्रकारतावत्, अथ वा कारणनिष्ठ-विशेष्यतानिरूपित-यद्रूपनिष्ठावच्छेदकताकग्रहनिरूपित-प्रकारतावत् तद्रूपम् अन्यथासिद्धमिति । एवं "**यस्य स्वातन्त्र्येण अन्वयव्यतिरेकौ न स्तः**" इति अग्रिमभागस्य प्रथमान्यथासिद्धेऽपि अनुकर्षः इति च मनसि निधाय **दिनकर्याम्** "**इत्थं च**" इत्यादिना निष्कृष्टार्थः कथितः । अस्मिन् लक्षणे ग्रहपदेन प्रमारूपः ग्रहः विवक्षितः । अन्यथा "दण्डरूपवान् घटनियतपूर्ववृत्तिः" इति भ्रममादाय द्वितीयान्यथासिद्धे दण्डरूपे अतिव्याप्तिः स्यात् । तस्य भ्रमत्वं च पूर्ववृत्तित्वग्रहे प्रकारीभूतपूर्ववृत्तितायां विशेष्यतावच्छेदकधर्मनिष्ठस्वरूपसंबन्धरूपा-वच्छेदकतानिरूपकत्वभाननियमात् तादृशावच्छेदकत्वस्य च समनियतानां मध्ये लघुधर्मे एव स्वीकारात् दण्डत्वापेक्षया दण्डरूपस्य गुरुतया अवच्छेदकत्वविरहात् – अवच्छेदकत्वाभाववति तत्र अवच्छेदकत्वविषयकतया बोध्यम् ।

सत्यन्तस्य प्रयोजनम् आह – **द्वितीयान्यथासिद्ध** इति । तद्धर्मावच्छिन्न-निरूपितस्वतन्त्रान्वयव्यतिरेकशून्यत्वमात्रोक्तौ द्वितीयान्यथासिद्धे दण्डरूपेऽपि घटत्वावच्छिन्ननिरूपितस्वतन्त्रान्वयव्यतिरेकशून्यत्वसत्त्वात् अतिव्याप्तिः । तद्वारणाय सत्यन्तम् । सत्यन्तनिवेशे तु पूर्वोक्तरीत्या दण्डत्वस्यैव घटत्वावच्छिन्ननिरूपितनियत-पूर्ववृत्तित्वग्रहविशेष्यतावच्छेदकत्वात् दण्डरूपे तदभावात् न अतिव्याप्तिः । विशेष्यदलस्य प्रयोजनम् आह – **कपालसंयोग** इति । विशेष्यानुपादाने "कपालसंयोगः

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

घटपूर्ववर्ती'' इति ग्रहे विशेष्यः कपालसंयोगः विशेष्यतावच्छेदकं कपालमिति कपालस्यापि घटपूर्ववर्तित्वग्रहविशेष्यतावच्छेदकत्वात् तत्र अतिव्याप्तिः । तद्वारणाय विशेष्यम् । तदुपादाने कपालस्य घटत्वावच्छिन्नं प्रति स्वातन्त्र्येण अन्वयव्यतिरेक-सत्त्वात् स्वतन्त्रान्वयव्यतिरेकशून्यत्वं नास्तीति न अतिव्याप्तिः ।।

मुक्तावली

द्वितीयम् अन्यथासिद्धम् आह – **कारणम्** इति । **यस्य स्वातन्त्र्येण अन्वयव्यतिरेकौ** न स्तः, **किं तु कारणम्** आदायैव अन्वयव्यतिरेकौ **गृह्येते** तत् अन्यथासिद्धम् । यथा दण्डरूपम् ।।

दिनकरी

किंतु कारणम् इति । **कारणत्वं च अत्र** पृथगन्वयव्यतिरेकशालित्वम्, तेन न आत्माश्रयः । **स्वातन्त्र्येण** तत्कार्यनिरूपितान्वयव्यतिरेकशून्यत्वे सति **तत्कार्यकारणावच्छिन्न**स्वनिष्ठतत्कार्यनिरूपितनियतपूर्ववृत्तित्वग्रहविशेष्यँताकं यत् तत् तत्कार्यं प्रति अन्यथासिद्धम् इत्यर्थः । **''कपालसंयोगः घटपूर्ववर्ती''** इत्यादिपूर्ववृत्तित्वग्रहविशेष्यतायाः कपालसंयोगनिष्ठायाः कपालावच्छिन्नत्वात् कपालसंयोगे अतिव्याप्तिवारणाय सत्यन्तम् । **दण्डत्वादिवारणाय** विशेष्यम् इति । **अत्र** इतरान्वयव्यतिरेकप्रयुक्तान्वयव्यतिरेकशालित्वम् तत्त्वम् इत्युक्तौ प्रथमद्वितीयान्यथासिद्ध्योः संग्रहेऽपि भेदेन अन्यथासिद्धिद्वयप्रदर्शनं शिष्यबुद्धि-वैशद्यार्थम् इति बोध्यम् ।।

राजीवोल्लासः

''कारणम् आदाय वा'' इति मूलस्थ ''वा''कारः अवधारणार्थकः । कारणम् आदायैव इत्यर्थः । तेन स्वतन्त्रान्वयव्यतिरेकवत्त्वं व्यवच्छिद्यते इत्याशयेन शेषपूरणेन व्याचष्टे **मुक्तावल्याम् – यस्य स्वातन्त्र्येण** इत्यादिना । आदानम् अत्र ज्ञानम् । तथा च **''कारणम् आदाय''** इत्यस्य कारणविषयकज्ञानोत्तर-

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

कालीनत्वम् अर्थः । तस्य "**गृह्येते**" इत्यत्र धात्वर्थज्ञाने अन्वयः । तथा च यस्य वस्तुतः स्वातन्त्र्येण अन्वयव्यतिरेकौ न स्तः, किन्तु कारणविषयकज्ञानोत्तरकालीनः अन्वयव्यतिरेकग्रहः तत् अन्यथासिद्धम् इत्युक्तं भवति । विशिष्टबुद्धौ विशेषणज्ञानस्य हेतुत्वात् "दण्डरूपं घटान्वयव्यतिरेकवत्" इति ग्रहस्य कारणभूतदण्डविषय-कज्ञानोत्तरकालीनत्वम् । प्रथमपादात् "पूर्वभावः" इति अनुवर्तते, तस्यैव व्याख्या – **अन्वयव्यतिरेकौ** इति । नियतत्वांशस्यापि लक्षणे प्रवेशं सूचयितुं व्यतिरेकपदो-पादानम् । तथा च तत्कार्यनिरूपितस्वतन्त्रान्वयव्यतिरेकशून्यत्वे सति तत्कार्यका-रणग्रहोत्तरकालीनतत्कार्यनिरूपितान्वयव्यतिरेकग्रहविशेष्यत्वंद्वितीयान्यथासिद्धिः ।

यद्वा "**कारणम्**" इत्यस्य स्वतन्त्रान्वयव्यतिरेकशालीत्यर्थः । तथा च स्वतन्त्रान्वयव्यतिरेकशालि किञ्चिज्ज्ञात्वा यस्य अन्वयव्यतिरेकौ ज्ञायेते तत् अन्यथासिद्धम् इत्यर्थः । स्वतन्त्रान्वयव्यतिरेकशालि किञ्चिद्विषयकज्ञानोत्तर-कालीनान्वयव्यतिरेकप्रकारकज्ञानविषयो यः भवति सः अन्यथासिद्धः ।

ननु अन्यथासिद्धलक्षणे "**कारणम् आदाय**" इति स्वभिन्नस्य कारणस्य कारणत्वेन प्रवेशे कारणत्वस्य अनन्यथासिद्धिघटितत्वेन आत्माश्रयः इति, अत आह – **कारणत्वं च अत्र** इति । तथा च अत्र कारणशब्दस्य पृथगन्वयव्यरिकशालि इत्यर्थः । "स्वातन्त्र्येण तत्कार्यनिरूपितान्वयव्यतिरेकशून्यत्वे सति" इत्यादि पूर्वोक्तमूललभ्यलक्षणापेक्षया फलितं लघुलक्षणम् आह – **स्वातन्त्र्येण** इत्यादिना । **तत्कार्यकारणा-वच्छिन्न** इति । अस्य ग्रहविशेष्यतायाम् अन्वयः । "स्वनिष्ठ" इत्यस्यापि विशेष्यतायामेव अन्वयः । "तत्कार्यनिरूपित" इत्यस्य नियतपूर्ववृत्तित्वे अन्वयः । पूर्ववृत्तित्वग्रहः – पूर्ववृत्तित्वप्रकारकग्रहः । दण्डरूपे घटनिरूपितान्वयव्य-तिरेकशून्यत्वं वर्तते । तथा "दण्डरूपं घटनियतपूर्ववृत्ति" इत्याकारकः यः ग्रहः तन्निरूपिता दण्डरूपनिष्ठा विशेष्यता तस्यां घटकारणदण्डावच्छिन्नत्वम् अस्ति इति तत्कार्यकारणावच्छिन्न-स्वनिष्ठतत्कार्यनिरूपित-नियतपूर्ववृत्तित्वग्रहविशेष्यताकत्वं

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

दण्डरूपे अस्ति इति तत्र द्वितीयान्यथासिद्धलक्षणस्य समन्वयः । दण्डरूपनिष्ठविशेष्यतायां रूपत्वं हि अवच्छेदकम्, कथं दण्डः अवच्छेदकः इति न आशङ्कनीयम् । विशेष्ये यत् विशेषणतया भासते तत् विशेष्यतावच्छेदकम् । ''दण्डरूपम्'' इत्यस्य समवेतत्वसंबन्धेन दण्डविशिष्टं रूपम् इत्यर्थः । तथा च विशेष्ये रूपे दण्डस्य विशेषणत्वात् तस्य विशेष्यतावच्छेदकत्वम् । अत्र सत्यन्तस्य प्रयोजनम् आह – **कपालसंयोग** इत्यादिना । ''कपालसंयोगः घटपूर्ववर्ति'' इत्यस्मिन् ग्रहे घटपूर्ववर्तित्वं प्रकारः । समवेतत्वसंबन्धेन कपालविशिष्टसंयोगः विशेष्यः । कपालं विशेष्यतावच्छेदकम् । कपालं च घटस्य कारणम् । अतः उक्तज्ञानीया कपालसंयोगनिष्ठा विशेष्यता घटकारण-कपालावच्छिन्ना भवति इति तत्कार्यकारणावच्छिन्नविशेष्यताकत्वसत्त्वात् कपाले द्वितीयान्यथासिद्धिलक्षणस्य अतिव्याप्तिः । तद्वारणाय सत्यन्तम् । कपालस्य स्वतन्त्रान्वयव्यतिरेकवत्त्वात् तच्छून्यत्वं नास्ति इति न अतिव्याप्तिः । सत्यन्तमात्रोक्तौ प्रथमान्यथासिद्धे दण्डत्वे अतिव्याप्तिः । तद्वारणाय विशेष्यम् । तदुपादाने ''दण्डत्वं घटनियतपूर्ववर्ति'' इत्याकारकग्रहनिरूपितदण्डत्वनिष्ठविशेष्यतायाः घटकारणदण्डावच्छिन्नत्वं नास्ति इति न अतिव्याप्तिः । तदाह – **दण्डत्वादिवारणाय** इति ।

ननु प्रथमान्यथासिद्धिलक्षणे सत्यन्तदलं द्वितीयान्यथासिद्धिलक्षणे विशेष्यदलं च परित्यज्य उभयसाधारणम् – एकमेव अन्यथासिद्धिलक्षणं कुतः न कृतम् इति आशङ्क्य समाधत्ते – **अत्र इतर** इति । इतरपदेन अन्यथासिद्धिभिन्नं गृह्यते । तथा च यस्य इतरान्वयव्यतिरेकप्रयुक्तौ अन्वयव्यतिरेकौ तत् अन्यथासिद्धम् । अनेन दण्डत्वदण्डरूपयोः द्वयोः अपि सङ्ग्रहः । एवं सङ्ग्रहे संभवत्यपि अन्यथासिद्धिद्वय-प्रदर्शनं अवान्तरविशेषपर्यालोचनद्वारा शिष्यबुद्धिवैशद्यार्थम् ।।

मुक्तावली

तृतीयम् आह – **अन्यं प्रति** इति । **अन्यं प्रति** पूर्ववृत्तित्वं गृहीत्वैव यस्य

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

यत्कार्यं प्रति पूर्ववृत्तित्वं गृह्यते, तस्य तत्कार्यं प्रति अन्यथासिद्धत्वम् । यथा घटादिकं प्रति आकाशस्य । तस्य हि घटादिकं प्रति कारणत्वम् आकाशत्वेनैव स्यात् । तद्धि शब्दसमवायिकारणत्वम् । एवं च तस्य शब्दं प्रति कारणत्वं गृहीत्वैव घटादिकं प्रति जनकत्वं ग्राह्यम् । अतः तत् अन्यथासिद्धम् ।

ननु **शब्दाश्रयत्वेन** तस्य कारणत्वे का अन्यथासिद्धिः इति चेत्, **पञ्चमी इति गृहाण ।**

ननु आकाशस्य शब्दं प्रति जनकत्वे किम् अवच्छेदकम् इति चेत्, **कवत्त्वादिकं विशेषपदार्थो वा इति ।**

दिनकरी

अन्यं प्रति इति । **फलाननुगुणम्** अन्यं प्रति इत्यर्थः । तेन न कुलालजनके चतुर्थान्यथासिद्ध्याश्रये अतिव्याप्तिः । शङ्कते – **शब्दाश्रयत्वेन** इति । **''अन्यं प्रति''** इत्यादितृतीयान्यथासिद्ध्यभावात् इति भावः । **पञ्चमी इति ।** **''अवश्यक्लृप्तनियतपूर्ववर्तिन''** इत्यादिकेत्यर्थः । **यद्यपि** – ''शब्दः द्रव्यजन्यः जन्यगुणत्वात्'' इत्यनुमित्यात्मककार्यकारणभावग्रहरूपानुकूलतर्कसहकृतेनैव ''शब्दः, द्रव्याश्रितः गुणत्वात्'' इत्यनुमानेन **शब्दाश्रयत्वं गगने गृहीत्वा** तेन रूपेण घटपूर्ववृत्तित्वं ग्राह्यम् । तथा च शब्दपूर्ववृत्तित्वं गृहीत्वैव गगनस्य घटपूर्ववृत्तित्वग्रहात् तृतीयैव अन्यथासिद्धिः संभवति,– **तथापि ''अन्यं प्रति''** इत्यस्य यथाश्रुतार्थकत्वे अपूर्वं प्रति यागस्य अन्यथासिद्धिः स्यात् । स्वर्गं प्रति पूर्ववृत्तित्वं गृहीत्वैव **गृहीतकारणत्वान्यथानुपपत्त्या** यागव्यापारत्वेन अपूर्वकल्पनात् । अतः अन्यं प्रति पूर्ववृत्तित्वघटितरूपेण यस्य यज्जनकत्वं तस्य तेन रूपेण तं प्रति अन्यथासिद्धत्वम् इत्येतावत्पर्यन्तं विवक्षणम् आवश्यकम् । यागस्य स्वर्गपूर्ववृत्तित्वघटितस्वर्गजनकत्वेन अपूर्वं प्रति अन्यथासिद्धत्वेऽपि यागत्वेन हेतुत्वे अन्यथासिद्ध्यभावात् ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

एवं च शब्दपूर्ववृत्तित्वघटितशब्दजनकत्वेन गगनस्य अन्यथासिद्धत्वेऽपि तदघटितशब्दाश्रयत्वेन हेतुत्वे तृतीयान्यथासिद्ध्यसंभवः इति अभिप्रायः ।

शब्दाश्रयत्वाष्टद्रव्यातिरिक्तद्रव्यत्वादिना गगनस्य घटं प्रति हेतुत्वेऽपि तृतीयैव अन्यथासिद्धिः । **अन्यं प्रति पूर्ववृत्तित्वानुपपादकं** यं प्रति यस्य पूर्ववृत्तित्वं गृह्यत इत्यर्थात् न अपूर्वं प्रति यागस्य अन्यथासिद्धिः इत्यपि केचित् । **कवत्त्वादिकम्** इति । विनिगमनाभावेन बहूनाम् वर्णानां कारणतावच्छेदकत्वे गौरवात् वर्णानाम् असार्वकालिकत्वाच्च आह – **विशेषपदार्थो वा** इति ।

राजीवोल्लासः

"**अन्यं प्रति पूर्वभावे ज्ञाते**" इत्यादिना तृतीयान्यथासिद्धिलक्षणम् उक्तम् । अस्य लक्षणस्य चतुर्थान्यथासिद्ध्याश्रये कुलालपितरि अतिव्याप्तिः । तथा हि – प्रकृतकार्यघटापेक्षया अन्यं कुलालं प्रति पूर्ववृत्तित्वं गृहीत्वैव कुलालपितुः घटं प्रति पूर्ववृत्तित्वं गृह्यते, कुलालपितृत्वस्य कुलालजनकत्वरूपत्वात् इति । अतः "अन्यम्" इत्यस्य अर्थान्तरम् आह – "**फलाननुगुणम्**" इति । कार्याजनकमित्यर्थः । प्रकृतकार्याननुगुणम् अन्यं प्रति इति तदर्थः । कुलालः यद्यपि घटापेक्षया अन्यः, अथापि घटोत्पत्तौ अनुगुणः इति कृत्वा अन्यपदेन कुलालं गृहीत्वा कुलालापितरि अतिव्याप्तेः न प्रसक्तिः ।

शङ्कते – **यद्यपि** इति । कार्यसामान्यं प्रति साधारणकारणस्य आकाशस्य शब्दसमवायिकारणत्वेन घटं प्रति कारणत्वे तृतीयान्यथासिद्धेः संभवेऽपि शब्दाश्रयत्वेन रूपेण कारणत्वे कथं तृतीयान्यथासिद्धिः इत्याशङ्क्य **मूले तदानीं पञ्चमान्यथासिद्धिः** इत्युक्तम् । अत्र शब्दाश्रयत्वेन घटं प्रति कारणत्वेऽपि आकाशस्य तृतीयान्यथासिद्धिः भवितुमर्हति इति **यद्यपि** इत्यादिना आक्षिपति । तथा हि – आकाशस्य शब्दाश्रयत्वं "शब्दः द्रव्याश्रितः; गुणत्वात्" इत्यनुमानेनैव ग्राह्यम् । तस्मिन् अनुमाने शब्दस्य गुणत्वम् अस्तु, द्रव्याश्रितत्वं मास्तु इति अप्रयोजकत्वशङ्कायां शब्दस्य यदि

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

द्रव्याश्रितत्वं न स्यात् तर्हि द्रव्यजन्यत्वं न स्यात् इति अनुकूलतर्कः वक्तव्यः । स च तर्कः शब्दस्य द्रव्यजन्यत्वे सत्येव वक्तुं शक्यः । शब्दस्य द्रव्यजन्यत्वं तु "शब्दो द्रव्यजन्यः, जन्यगुणत्वात्" इत्यनुमानेन वक्तव्यम् । तथा च शब्दस्य द्रव्यजन्यत्वं गृहीत्वा पश्चादेव द्रव्याश्रितत्वं ग्राह्यम् । द्रव्याश्रितत्वे गृहीते तुल्यवित्तिवेद्यतया आकाशरूपद्रव्यस्य शब्दाश्रयत्वं सुग्रहम् । एवं च प्रथमतः आकाशस्य शब्दजनकत्वं गृहीत्वैव शब्दाश्रयत्वं ग्राह्यम् इति "अन्यं प्रति पूर्ववृत्तित्वं गृहीत्वैव" इत्यादि तृतीयान्यथासिद्धिरपि शब्दाश्रयत्वेन घटकारणत्वेऽपि संभवति इति पञ्चमान्यथासिद्धिपर्यन्तानुधावनम् किमर्थम् इति आक्षेपः ।

कार्यकारणभावग्रहरूप इति । कार्यकारणभावग्रहेण रूपं स्वरूपं यस्य तर्कस्य सिद्ध्यति तादृशानुकूलतर्केत्यर्थः । शब्दतदाश्रययोः कार्यकारणभावे ज्ञाते सत्येव "शब्दः यदि द्रव्याश्रितः न स्यात्, तदा द्रव्यजन्यः न स्यात्" इत्यनुकूलतर्कस्य स्वरूपं निष्पद्यत इत्याशयः । **शब्दाश्रयत्वं गगने गृहीत्वा** इति । शब्दे द्रव्याश्रितत्वे गृहीते द्रव्यस्य शब्दाश्रयत्वं तुल्यवित्तिवेद्यतया गृह्यते इत्याशयः ।

उक्ताक्षेपं समाधत्ते – **तथापि** इत्यादिना । **"अन्यं प्रति पूर्ववृत्तित्वं गृहीत्वा"** इत्यस्य यथाश्रुतार्थकत्वे अपूर्वं प्रति कारणस्य यागस्य अन्यथासिद्धिः स्यात् । "यजेत स्वर्गकामः" इति श्रुतिप्रतिपन्नस्य स्वर्गसाधनत्वस्य क्षणध्वंसिनि यागे अनुपपत्त्या अपूर्वं कल्प्यते । तथा च अन्यं प्रति – स्वर्गं प्रति पूर्ववृत्तित्वं ज्ञात्वैव यागस्य गृहीतस्वर्गपूर्ववृत्तित्वान्यथानुपपत्त्या अपूर्वरूपं व्यापारं कल्पयित्वा अपूर्वकारणत्वम् अपूर्वपूर्ववृत्तित्वं ग्राह्यम् इति यागस्य अपूर्वं प्रति अन्यथा-सिद्धत्वापत्तिः । तद्वारणाय एवं तृतीयान्यथासिद्धिलक्षणं विवक्षणीयम् – अन्यं प्रति पूर्ववृत्तित्वेन घटितेन रूपेण यस्य यज्जनकत्वं तस्य तं प्रति अन्यथासिद्धत्वमिति । यागस्य स्वर्गपूर्ववृत्तित्वघटितेन स्वर्गजनकत्वेन रूपेण अपूर्वं प्रति जनकत्वे यद्यपि अन्यथासिद्धत्वं भवति, तथापि यागत्वेन रूपेण अपूर्वजनकत्वे न अन्यथासिद्धिः ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

यागत्वस्य स्वर्गपूर्ववृत्तित्वघटितत्वाभावात् । एतादृशं विवक्षितं तृतीयान्यथासिद्धत्वम् आकाशस्य शब्दपूर्ववृत्तित्वघटितेन शब्दजनकत्वेन रूपेण घटं प्रति कारणत्वे यद्यपि संभवति, तथापि शब्दपूर्ववृत्तित्वाघटितेन शब्दाश्रयत्वेन रूपेण घटकारणत्वे तृतीयान्यथासिद्धिः न संभवति इति आशयेन मुक्तावल्यां पञ्चमान्यथासिद्धत्वम् उक्तम् इति समाधानग्रन्थस्य आशयः ।

गृहीतकारणत्वान्यथानुपपत्त्या इति । ''स्वर्गकामः यजेत'' इति श्रुत्या गृहीतं यत् यागस्य स्वर्गकारणत्वं तस्य अन्यथा – अपूर्वाख्यव्यापारं विना असंभवरूपेण अर्थापत्तिप्रमाणेन इत्यर्थः । शब्दाश्रयत्वादिरूपेण आकाशस्य घटकारणत्वेऽपि तृतीयान्यथासिद्धिः भवितुमर्हति इति मन्यमानानां केषांचित् मतम् आह – **शब्दाश्रयत्व** इत्यादिना । आकाशे शब्दाश्रयत्वं वर्तते । एवम् अष्टद्रव्यातिरिक्तद्रव्यत्वमपि वर्तते । पृथिव्यादिचतुष्टयं कालादिचतुष्टयं च इति अष्टौ द्रव्याणि । तदतिरिक्तत्वात् आकाशस्य । आकाशस्य घटं प्रति शब्दाश्रयत्वेन वा अष्टद्रव्यातिरिक्तद्रव्यत्वेन वा कारणत्वेऽपि तृतीयैव अन्यथासिद्धिः वक्तुं शक्यते । तथा हि – ''अन्यं प्रति'' इत्यस्य पूर्ववृत्तित्वानुपपादकं इत्यर्थः । तथा च पूर्ववृत्तित्वानुपपादकं यं प्रति पूर्ववृत्तित्वं गृहीत्वैव यस्य यं प्रति पूर्ववृत्तित्वं गृह्यते तं प्रति तस्य अन्यथासिद्धत्वम् । यागस्य यद्यपि स्वर्गपूर्ववृत्तित्वं गृहीत्वैव अपूर्वपूर्ववृत्तित्वं गृह्यते, तदापि स्वर्गः यागनिष्ठस्य अपूर्वपूर्ववृत्तित्वस्य उपपादकः । स्वर्गाभावे यागस्य अपूर्वजनकत्वाभावात् । तथा च ''पूर्ववृत्तित्वानुपपादकं प्रति पूर्ववृत्तित्वं गृहीत्वैव'' इत्यादिलक्षणाभावात् न यागस्य अपूर्वं प्रति अन्यथासिद्धत्वम् । आकाशस्य शब्दं प्रति पूर्ववृत्तित्वं गृहीत्वैव घटं प्रति पूर्ववृत्तित्वं गृह्यते । तत्र शब्दः आकाशनिष्ठघटपूर्ववृत्तित्वस्य अनुपपादक एव । तथा च लक्षणसत्त्वात् शब्दाश्रयत्वेन कारणत्वेऽपि आकाशस्य तृतीयान्यथासिद्धिः वक्तुं शक्यत इत्याशयः ।

अत्र पूर्ववृत्तित्वानुपपादकत्वं च पूर्ववृत्तित्वाभावप्रयोजकीभूताभावाप्रतियोगित्वम् । यागनिष्ठस्य अपूर्वपूर्ववृत्तित्वस्य यः अभावः तत्प्रयोजकः स्वर्गाभावः

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

तत्प्रतियोगित्वं स्वर्गस्य इति स्वर्गः पूर्ववृत्तित्वोपपादकः । आकाशनिष्ठस्य घटपूर्ववृत्तित्वस्य यो अभावः तत्प्रयोजकः शब्दाभावः न भवति इति शब्दस्य तत्प्रयोजकीभूताभावाप्रतियोगित्वम् अनुपपादकत्वम् । तथा च **दिनकर्यां अन्यं प्रति** इत्यस्य विवरणम् – **पूर्ववृत्तित्वानुपपादकं यं प्रतीति** । तत्र पूर्ववृत्तित्वस्य निरूपकाकाङ्क्षायां यं प्रति अन्यथासिद्धत्वम् उपपादनीयं तदेव निरूपकम् । तथा च ''अन्यं प्रति'' इत्यस्य प्रकृतकार्यपूर्ववृत्तित्वानुपपादकं यं प्रति इत्यर्थः । ''यं प्रति'' इत्यनन्तरं ''पूर्ववृत्तित्वं गृहीत्वैव'' इति अध्याहर्तव्यम् । ''गृह्यते'' इत्यनन्तरं तं प्रति तदन्यथासिद्धम् इति पूरणीयम् । तथा च प्रकृतकार्यपूर्ववृत्तित्वा-नुपपादकं यं प्रति यस्य पूर्ववृत्तित्वं गृहीत्वैव यस्य यं प्रति पूर्ववृत्तित्वं गृह्यते तं प्रति तत् अन्यथासिद्धम् इत्यर्थः ।

यद्वा **दिनकर्यां ''अन्यं प्रति''** इत्यतः पूर्वं ''अन्यं प्रति पूर्ववृत्तित्वं गृहीत्वैव'' इति संयोजनीयम् । **''गृह्यते''** इत्यनन्तरं ''तं प्रति तदन्यथासिद्धम्'' इति पूरणीयम् । **दिनकरीस्थस्य ''अन्यं प्रति''** इत्यस्य पूर्ववृत्तित्वे अन्वयः । अन्यनिरूपितेति तदर्थः । मूले विद्यमान **''यं प्रति''** इत्यस्य ''अन्यं प्रति'' पूर्ववृत्तित्वानुपपादकम् इति विशेषणं अधिकतया **दिनकर्यां** संयोजितम् । तथा च अन्यं प्रति पूर्ववृत्तित्वं गृहीत्वैव अन्यं प्रति पूर्ववृत्तित्वानुपपादकं यं प्रति यस्य पूर्ववृत्तित्वं गृह्यते तं प्रति तत् अन्यथासिद्धम् इति फलितः अर्थः । अन्यं प्रति-स्वर्गं प्रति पूर्ववृत्तित्वं यागस्य गृहीत्वैव, यागस्य अपूर्वं प्रति पूर्ववृत्तित्वं गृह्यते । परन्तु तत् अपूर्वं **अन्यं प्रति** – स्वर्गं प्रति पूर्ववृत्तित्वस्य उपपादकम् । अपूर्वाभावे यागस्य स्वर्गपूर्ववृत्तित्वानुपपत्तेः इति अन्यं प्रति पूर्ववृत्तित्वानुपपदाकत्व-रूपविशेषणविरहात् तद्धटितलक्षणाभावात् अपूर्वं प्रति यागस्य न अन्यथासिद्धत्वम् ।

आकाशस्य तु **अन्यं प्रति** – शब्दं प्रति पूर्ववृत्तित्वं गृहीत्वैव शब्दपूर्ववृत्ति-त्वानुपपादकं घटं प्रति पूर्ववृत्तित्वं गृह्यते इति लक्षणसत्त्वात् अन्यथासिद्धत्वम्

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

इत्याशयः । अन्यं प्रति पूर्ववृत्तित्वानुपपादकम् इत्यस्य अन्यनिरूपितपूर्ववृत्तित्वाभावप्रयोजकीभूताभावाप्रतियोगिनं इत्यर्थः । यं इत्यस्य विशेषणम् एतत् । अपूर्वाभावे यागस्य स्वर्गाव्यवहितपूर्ववर्तित्वं न घटते । स्वजन्यापूर्वसंबन्धेनैव यागस्य स्वर्गाव्यवहितपूर्ववृत्तित्वात् इति तादृशाभावप्रतियोगित्वमेव अपूर्वस्य, न तु अप्रतियोगित्वम् । अस्मिन् मते गौरवरूपं अस्वारस्यं केचित् इत्यनेन सूचितम् । किञ्चिन्निरूपितनियतपूर्ववृत्तित्वग्रहाधीनप्रकृतकार्यनिरूपितपूर्ववृत्तित्वग्रहविषयत्वं मूललभ्या तृतीयान्यथासिद्धिः । **दिनकर्युक्ता** अन्यथासिद्धिस्तु किञ्चिन्निरूपितपूर्ववृत्तित्वग्रहाधीनकिञ्चिन्निरूपितपूर्ववृत्तित्वघटितरूपावच्छिन्नप्रकृतकार्यनिरूपितजनकत्वग्रहविषयत्वम् । केषाञ्चिन्मते – किञ्चिन्निरूपितपूर्ववृत्तित्त्वग्रहाधीनतन्निरूपितपूर्ववृत्तित्वाभावप्रयोजकीभूताभावाप्रतियोगि प्रकृतकार्यनिरूपितपूर्ववृत्तित्वग्रहविषयत्वम् अन्यथासिद्धिः इति ।

(1) शब्दनिरूपितपूर्ववृत्तित्वग्रहः ''आकाशः शब्दपूर्ववृत्तिः'' इति ग्रहः । तदधीनः यः प्रकृतकार्यनिरूपितपूर्ववृत्तित्वग्रहः – ''आकाशः घटपूर्ववृत्तिः'' इति ग्रहः । तद्विषयत्वं आकाशस्य वर्तत इति आकाशस्य अन्यथासिद्धत्वम् ।

(2) शब्दनिरूपितपूर्ववृत्तित्वग्रहः ''आकाशः शब्दपूर्ववृत्तिः'' इति ग्रहः । तदधीनः ग्रहः ''आकाशः शब्दजनकत्वेन घटजनकः'' इति ग्रहः । शब्दजनकत्वं शब्दपूर्ववृत्तित्वघटितम् । घटजनकत्वं शब्दजनकत्वावच्छिन्नम् । तादृशग्रहविषयत्वम् आकाशे अस्ति ।

(3) शब्दनिरूपितपूर्ववृत्तित्वग्रहः ''आकाशः शब्दपूर्ववृत्तिः'' इति ग्रहः । तदधीनः ग्रहः ''आकाशः घटपूर्ववृत्तिः'' इति ग्रहः । तत्र घटः शब्दपूर्ववर्तित्वानुपपादकः भवति । शब्दनिरूपितपूर्ववृत्तित्वाभावप्रयोजकीभूताभावप्रतियोगी भवति । तद्विषयत्वं आकाशे अस्ति इति समन्वयः ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

कारिकावली

जनकं प्रति पूर्ववृत्तितामपरिज्ञाय न यस्य गृह्यते ।
अतिरिक्तमथापि यद्भवेन्नियतावश्यकपूर्ववर्तिनः ।। २० ।।

मुक्तावली

चतुर्थम् अन्यथासिद्धम् आह – **जनकं प्रति** इति । यत्कार्यजनकं प्रति पूर्ववृत्तित्वं गृहीत्वैव यस्य यत्कार्यं प्रति पूर्ववृत्तित्वं गृह्यते, तस्य तत्कार्यं प्रति अन्यथासिद्धत्वम् । यथा कुलालपितुः घटं प्रति । तस्य हि कुलालपितृत्वेन घटं प्रति जनकत्वे अन्यथासिद्धिः; कुलालत्वेन रूपेण जनकत्वे तु इष्टापत्तिः । कुलालमात्रस्य घटं प्रति जनकत्वात् ।

पञ्चमम् अन्यथासिद्धम् आह – **अतिरिक्तम्** इति । **अवश्यक्लृप्तनियतपूर्ववर्तिन एव कार्यसंभवे तद्भिन्नम् अन्यथासिद्धम्** इत्यर्थः । अत एव प्रत्यक्षे महत्त्वं कारणम् अनेकद्रव्यत्वम् अन्यथासिद्धम् । तत्र हि महत्त्वम् अवश्यक्लृप्तं, तेन अनेकद्रव्यत्वम् अन्यथासिद्धम् । न च – वैपरीत्ये किं विनिगमकम् इति वाच्यम् । महत्त्वत्वजातेः कारणतावच्छेदकत्वे लाघवात् ।।

दिनकरी

यत्कार्यजनकं प्रति इति । यद्यपि अत्रापि "अन्यं प्रति" इत्याद्यभिधाने तृतीयचतुर्थान्यथासिद्ध्योः संग्रहे फलाननुगुणत्वतदनुगुणत्वयोः विशेषणयोः उपादानेन तयोः भेदेन अभिधाने प्रयोजनाभावः, तथापि शिष्यबुद्धिवैशद्याय तथा उक्तम् इति ।

अवश्यक्लृप्त इति । गन्धं प्रति अवश्यक्लृप्तगन्धप्रागभावेनैव गन्धोत्पत्तिसंभवे तत्सहभूतरूपप्रागभावादि पाकजगन्धं प्रति अन्यथासिद्धम् । एवं घटजातीयं प्रति अवश्यक्लृप्तनियतपूर्ववर्तिभिः दण्डादिभिरेव घटोत्पत्तिसंभवे रासभः अन्यथासिद्धः इत्यर्थः ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

ननु अवश्यक्लृप्तनियतपूर्ववर्तिना पाकजरूपप्रागभावेन गन्धोत्पत्तिसंभवे रूप-प्रागभावेन गन्धप्रागभावस्य अन्यथासिद्धिः स्यात् । **"यत्कारणत्वम् अवश्यक्लृप्तम्"** इत्युक्तौ च आत्माश्रयः स्यात् इति चेत्, **अत्र आहुः** –

लघुत्वरूपम् अवश्यक्लृप्तत्वम् इह बोध्यम् । लघुत्वं च शरीरकृतम् उपस्थितिकृतं संबन्धकृतं च । तत्र **प्रथमम्** अनेकद्रव्य(समवेतत्वा)[त्वा]पेक्षया महत्त्वे । **द्वितीयं** गन्धं प्रति रूपप्रागभावापेक्षया गन्धप्रागभावे । **गन्धात्मकप्रतियोगि-ज्ञानसत्त्वेन** शीघ्रं तदुपस्थितेः । तृतीयं दण्डत्वदण्डरूपाद्यपेक्षया दण्डे । स्वाश्रयदण्डघटितपरम्पराया गुरुत्वात् इति ।

ननु **निबन्धान्तरेषु** "अन्यत्र क्लृप्त" इति दृश्यते, तत्कथम् अत्र "अवश्यक्लृप्त" इति कृतम्? अतः तस्य फलम् आह – **अत एव** इति । अन्यथा महत्त्वस्य **अनेकद्रव्यत्वात् अन्यत्र** क्लृप्तनियतपूर्ववर्तित्वाभावेन तस्य अन्यथासिद्धिः महत्त्वेन न स्यात् इति भावः । **अत्र अनेकद्रव्यत्वं** न अनेकद्रव्यसमवेतत्वम् । तस्य द्व्यणुकेऽपि सत्त्वेन द्व्यणुकप्रत्यक्षापत्तेः । समवेतसमवेतद्रव्यत्वं तत् इत्यपि न । आत्मनि तस्य अभावेन आत्मप्रत्यक्षानुपपत्तेः । किंतु अणुभिन्नद्रव्यत्वम् इति बोध्यम् ।।

राजीवोल्लासः

गन्धं प्रति इत्यादि । "अवश्यक्लृप्तनियतपूर्ववर्तिभिरेव कार्यसंभवे तद्भिन्नम् अन्यथासिद्धम्" इति पञ्चमान्यथासिद्धस्य लक्षणम् उक्तम् । तस्य समन्वयः क्रियते अनेन ग्रन्थेन । यत्र पाकवशात् रूपादीनां परावृत्तिः भवति, तत्र रूपाद्युत्पत्तेः पूर्वं रूपादिप्रागभावाः वर्तन्ते । तत्र रूपं प्रति रूपप्रागभाव एव कारणम् इति कुतः? गन्धप्रागभावोऽपि रूपं प्रति कारणमस्तु । एवं गन्धं प्रत्यपि गन्धप्रागभाव एव कारणम् इति कुतः? रूपप्रागभावोऽपि कारणमस्तु इति शङ्कायां रूपं प्रति गन्धप्रागभावस्य अन्यथासिद्धत्वात् गन्धं प्रति रूपप्रागभावस्य अन्यथासिद्धत्वात्

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

न कारणत्वम् इति वक्तव्यम् । कथं अन्यथासिद्धत्वम्? इति शङ्कायां तदुपपाद्यते – यद्यपि गन्धरूपयोः समानकालोत्पत्तिकत्वेन गन्धरूपप्रागभावयोः पूर्ववर्तित्वम् अवश्यक्लृप्तम् । तथापि अभावज्ञाने प्रतियोगिज्ञानस्य कारणत्वेन गन्धात्मककार्योपस्थित्यनन्तरं गन्धप्रागभावस्यैव शीघ्रम् उपस्थितिः संभवति; न तु रूपप्रागभावस्य । तदुपस्थितेः रूपज्ञानसापेक्षत्वात् इति उपस्थितिकृतलाघवेन गन्धं प्रति गन्धप्रागभाव एव नियतपूर्ववृत्तित्वेन अवश्यक्लृप्तः । पाकजगन्धात्मककार्योपस्थित्यनन्तरं तु गन्धप्रागभावरूपप्रागभावयोः युगपदेव उपस्थितिः संभवति । रूपपरावर्तकतेजस्संयोगस्यैव पाकपदार्थतया गन्धोपस्थितिकाले रूपोपस्थितेरपि आवश्यकत्वात् । तथा च अपाकजस्थले गन्धं प्रति उपस्थितिकृतलाघवात् अवश्यक्लृप्तपूर्ववर्तिना गन्धप्रागभावेनैव पाकजगन्धस्य उत्पत्तिसंभवे तद्भिन्नः रूपप्रागभावः पाकजगन्धं प्रति अन्यथासिद्धः इति तात्पर्यम् ।

घटजातीयं प्रति इति । घटत्वेन रूपेण घटसजातीयं घटान्तरं प्रति अवश्यक्लृप्तनियतपूर्ववर्तिभिः दण्डादिभिरेव घटोत्पत्तिसंभवे – तद्घटस्यापि उत्पत्तिसंभवे तद्भिन्नः रासभः तद्घटं प्रति अन्यथासिद्धः ।

ननु इत्यादि । गन्धरूपयोः युगपदुत्पन्नत्वेन गन्धप्रागभाववत् रूपप्रागभावोऽपि गन्धनियतपूर्ववर्तित्वेन अवश्यक्लृप्त इति रूपप्रागभावभिन्नः गन्धप्रागभावः गन्धं प्रति कुतो न अन्यथासिद्धः? इति प्रश्नः । **यत्कारणत्वं अवश्यक्लृप्तम्** इति । यस्य यं प्रति कारणत्वम् अवश्यक्लृप्तं तद्भिन्नम् अन्यथासिद्धम् । अपाकजगन्धस्थले गन्धं प्रति गन्धप्रागभावस्यैव कारणत्वं क्लृप्तम्, न तु रूपप्रागभावस्य । अतः अवश्यक्लृप्तकारणताकेन गन्धप्रागभावेन रूपप्रागभाव एवान्यथसिद्धः । न तु अतादृशेन रूपप्रागभावेन गन्धप्रागभावः इत्युक्तौ तु आत्माश्रयः दोषः । अन्यथासिद्धिशरीरे अन्यथासिद्ध्यभावघटितस्य कारणत्वस्य प्रवेशात् इति भावः ।

अत्र आहुः इति । अवश्यक्लृप्तत्वं लघुनियतपूर्ववृत्तित्वरूपम् अत्र विवक्षितम् ।

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

तथा च लघु नियतपूर्ववृत्ति च यत् तत एव कार्यसंभवे तद्भिन्नम् अन्यथासिद्धम् इत्यर्थः । लघुत्वं शरीरकृतं उपस्थितिकृतं संबन्धकृतं च इति त्रिविधम् । तत्र प्रथमं लघुत्वं अनेकद्रव्यसमवेतत्वापेक्षया महत्वे । प्रत्यक्षं प्रति महत्त्वं कारणं वा तत्समनियतं अनेकद्रव्यसमवेतत्वं कारणं वा इति संदेहे अनेकद्रव्यसमवेतत्वापेक्षया महत्त्वस्य शरीरतः लघुत्वात् लघुना नियतपूर्ववृत्तिना च महत्त्वेन च प्रत्यक्षसंभवे तद्भिन्नं अनेकद्रव्यसमवेतत्वम् अन्यथासिद्धम् । अतः तत् न प्रत्यक्षं प्रति कारणम् । **अनेकद्रव्यत्वम्** इति पाठे अनेकं द्रव्यं अवयवतया यस्य तत् अनेकद्रव्यम् तस्य भावः अनेकद्रव्यत्वम् । अनेकद्रव्यसमवेतत्वम् इति तस्यापि अर्थः ।

उपस्थितिकृतं लघुत्वं गन्धं प्रति रूपप्रागभावापेक्षया गन्धप्रागभावे । गन्धरूपकार्योपस्थित्यनन्तरं गन्धात्मकप्रतियोगिज्ञानस्य सत्त्वेन गन्धप्रागभावस्यैव शीघ्रमुपस्थितिः संभवति, न तु रूपप्रागभावस्य । तथा च यस्य यदपेक्षया शीघ्रमुपस्थितिः भवति, तस्य तदपेक्षया उपस्थितिकृतं लघुत्वम् । तथा च लघुना अपाकजगन्धस्थले नियतपूर्ववर्तिना च गन्धप्रागभावेनैव पाकजगन्धोत्पत्तिसंभवे तद्भिन्नः रूपप्रागभावः अन्यथासिद्धत्वात् न गन्धं प्रति कारणम् ।

संबन्धकृतं लघुत्वं दण्डत्व-दण्डरूपाद्यपेक्षया दण्डे । घटं प्रति दण्डस्य यथा नियतपूर्ववृत्तित्वम् अस्ति, तथा दण्डत्व-दण्डरूपयोरपि तदस्ति । अतः दण्डवत् दण्डत्वदण्डरूपयोरपि घटकारणत्वम् अस्तु इति शङ्कायां संबन्धकृतं लघुत्वं दण्डे एव वर्तते । दण्डस्य हि घटं प्रति संयोगसंबन्धेन कारणत्वम् । दण्डत्वदण्डरूपयोः तु स्वाश्रयदण्डसंयोगरूपपरम्परासंबन्धेन कारणत्वम् । संयोगापेक्षया स्वाश्रय-संयोगरूपपरम्परायाः गुरुत्वात् संबन्धकृतलाघवं दण्डस्यैव । तथा च यस्य कारणत्वं लघुना संबन्धेन भवति तस्य संबन्धकृतं लघुत्वम् । एवं च संबन्धकृतलाघववता नियतपूर्ववर्तिना दण्डेनैव घटोत्पत्तिसंभवे तद्भिन्ने दण्डत्वदण्डरूपे अन्यथासिद्धे ।

प्रथमम् इति । शरीरकृतम् इत्यर्थः । **द्वितीयम्** इति – उपस्थितिकृतम्

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

इत्यर्थः । **गन्धात्मकप्रतियोगिज्ञानसत्त्वेन** इति । अभावज्ञाने प्रतियोगिज्ञानस्य कारणत्वात् इति भावः । कथम् अभावज्ञाने प्रतियोगिज्ञानस्य कारणत्वम् इति चेत् – एवम् । प्रतियोग्यभावयोः प्रतियोग्यनुयोगिभावरूपसंबन्धसत्त्वात् तत्संबन्धिनः एकस्य प्रतियोगिनः ज्ञानात् अपरस्य संबन्धिनः अभावस्य स्मरणं भवति । तथा च एकसंबन्धिज्ञानम् अपरसंबन्धिस्मारकम् इति प्रतियोगिज्ञानस्य अभावज्ञान-कारणत्वम् ।

यद्वा अभावज्ञाने - गन्धप्रागभावत्वेन गन्धप्रागभावरूपाभावविशेषज्ञाने प्रतियोगिज्ञानस्य गन्धज्ञानस्य हेतुत्वम् । अभावत्वेन साधारणरूपेण गन्धप्रागभावज्ञाने तु गन्धज्ञानं नापेक्षितम् । गन्धज्ञानं विनापि ''अभावः'' इति पदजन्यस्य अभावत्वप्रकारकगन्धप्रागभावज्ञानस्य संभवात् ।

निबन्धान्तरेषु इति । **चिन्तामण्यादिग्रन्थेषु** इत्यर्थः । निबन्धान्तरेषु विद्यमानस्य 'अन्यत्र क्लृप्त'' इत्यस्य स्थाने ''अवश्यक्लृप्त'' इति किमर्थं मुक्तावल्यां पठितम् इत्याशङ्क्य तस्य फलं स्वयमेव आह – **मुक्तावलीकारः – अत एव** इति । ''अन्यत्र क्लृप्त'' इत्यादेः अन्यथासिद्धत्वम् अनुक्त्वा अवश्यक्लृप्तनियतपूर्ववर्ति-भिन्नस्य अन्यथासिद्धत्वकथनादेव इत्यर्थः । निबन्धान्तरेषु दृश्यमानरीत्या अन्यथासिद्धत्वाङ्गीकारे अनेकद्रव्यसमवेतत्वस्य महत्त्वेन अन्यथासिद्धत्वं न स्यात् । ''अन्यत्र'' इति शब्दस्य हि यत् अन्यथासिद्धत्वेन इष्टं तच्छून्ये प्रकृतकार्यसजातीय-कार्योत्पत्तिस्थले इत्यर्थः । यथा यद्घटव्यक्त्युत्पत्तेः पूर्वं दण्डचक्रादिभिः सह रासभोऽपि वर्तते, तत्र रासभस्य अन्यथासिद्धत्वं एवम् उपपादनीयम्–

अन्यत्र – रासभरहिते एतद्घटसजातीयघटान्तरोत्पत्तिस्थले नियतपूर्ववर्तिभिः दण्डादिभिरेव एतद्घटस्यापि उत्पत्तिसंभवे तद्भिन्नः रासभः अन्यथासिद्ध इति ।

अनेकद्रव्यसमवेतत्वस्य तु ''अन्यत्र'' इत्यादि अन्यथासिद्धत्वं न संभवति । अन्यत्र – अनेकद्रव्यसमवेतत्वरहितस्थले क्लृप्तपूर्ववर्तिना महत्त्वेनैव कार्यसंभवे

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

इत्यस्य वक्तुम् अशक्यत्वात् । यत्र यत्र महत्त्वं तत्र सर्वत्र अनेकद्रव्यसमवेतत्वस्य नियमेन वर्तमानतया अनेकद्रव्यसमवेतत्वं विहाय महत्त्वहेतुकस्य प्रत्यक्षस्यैव अभावात् । अतः निबन्धान्तरेषु दृश्यमानम् "अन्यत्र क्लृप्त" इत्येतदुपेक्ष्य "अवश्यक्लृप्त" इति पठितम् ।

महत्त्वस्य अवश्यक्लृप्तत्वं तु पूर्वोक्तरीत्या उपपादनीयम् इति भावः ।

अनेकद्रव्यत्वात् अन्यत्र इति । ल्यब्लोपे पञ्चमी । अनेकद्रव्यत्वं विहाय अन्यत्र इत्यर्थः । अनेकद्रव्यत्वशून्ये इति यावत् । **अत्र अनेकद्रव्यत्वम्** इत्यादि । यद्यपि पूर्वं अनेकद्रव्यसमवेतत्वं अनेकद्रव्यत्त्वम् इति उक्तम्, तथापि तत्र अनुपपत्तिं पर्यालोच्य प्रकारान्तरेण अर्थः उच्यते । अनेकद्रव्यसमवेतत्वं अनेकद्रव्यत्वं इत्युक्तौ तस्य द्व्यणुकेऽपि सत्त्वेन द्व्यणुकस्य प्रत्याक्षापत्तेः । समवेतसमवेतत्वं अनेकद्रव्यत्वम् इत्युक्तौ यद्यपि द्व्यणुकस्य असमवेतपरमाणुसमवेतत्वेन समवेतसमवेतत्वविरहात् प्रत्यक्षापत्तिः वारयितुं शक्यते, परन्तु आत्मनि निरवयवे समवेतसमवेतत्वविरहात् तस्य प्रत्यक्षानुपपत्तिः । अतः अणुशब्देन परमाणुः - द्व्यणुकं च गृह्यते । तद्भिन्नद्रव्यत्वं त्र्यणुकादेः अवयविनः आत्मनश्च अस्ति इति न अनुपपत्तिः इति भावः ।

कारिकावली

एते पञ्चान्यथासिद्धा दण्डत्वादिकमादिमम् ।
घटादौ दण्डरूपादि द्वितीयमपि दर्शितम् ॥ २१ ॥
तृतीयं तु भवेद्व्योम कुलालजनकोऽपरः ।
पञ्चमो रासभादिः स्याद् एतेष्वावश्यकस्त्वसौ ॥ २२ ॥

मुक्तावली

रासभादिः इति । यद्यपि यत्किंचिद्घटव्यक्तिं प्रति रासभस्य नियपूर्ववृत्तित्वमस्ति, तथापि तद्घटजातीयं प्रति सिद्धकारणभावैः दण्डादिभिरेव तद्व्यक्तेरपि संभवे रासभः

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अन्यथासिद्धः इति भावः । एतेषु पञ्चसु अन्यथासिद्धेषु मध्ये पञ्चमः अन्यथासिद्धः आवश्यकः । **अनेनैव परेषां** चरितार्थत्वात् । तथाहि – दण्डादिभिः अवश्यक्लृप्तनियतपूर्ववर्तिभिः एव कार्यसंभवे दण्डत्वादिकम् अन्यथासिद्धम् । न च – वैपरीत्ये किं विनिगमकम् इति – वाच्यम् । दण्डत्वस्य कारणत्वे दण्डघटितायाः परम्परायाः संबन्धत्वकल्पने गौरवात् । एवम् अन्येषामपि **अनेनैव चरितार्थत्वं** संभवति ।।

दिनकरी

अनेन – पञ्चमान्यथासिद्धेन । **परेषाम्** – दण्डत्वदण्डरूपाकाश-कुलालपितृणाम् । **चरितार्थत्वम्** – संग्रहः । अनियतरासभादेः वारणाय ''नियत'' इत्यादि । न च – **अनियतरासभादेः** पञ्चमान्यथासिद्धत्वात् तेनैव वारणे नियतपदं व्यर्थम् इति – वाच्यम् । अवश्यक्लृप्तत्वस्य एकस्य अभावेन यत्र यत्र प्रामाणिकानां न कारणत्वव्यवहारः तत्तद्भेदस्य निवेशनीयतया नियतपदेनैव रासभादेः वारणे तद्भेदस्य अप्रवेशात् इत्यभिप्रायात् । पूर्ववर्तित्वं च अव्यवहितपूर्ववर्तित्वम्, तेन व्यवहितपूर्ववर्ति(त्व)व्युदासः । अत एव (च) यागादेः स्वर्गकारणत्वानुपपत्त्या [अपूर्वकल्पनया] अपूर्वसंबन्धेन अव्यवहितपूर्ववर्तित्वोपपादनं ग्रन्थकृतां सङ्गच्छते । अन्यथा यागस्यापि नियतपूर्ववृत्तित्वाबाधेन अपूर्वकल्पनं न स्यात् इति ।

न च – एतादृशस्य कारणत्वे व्यतिरेकव्यभिचारज्ञानस्य **नियमांशग्रहे ग्राह्याभावावगाहितया विरोधित्वेऽपि** अन्वयव्यभिचारग्रहस्य कथं कारणताग्रहविरो-धित्वम् इति – वाच्यम् । **''अवश्यक्लृप्त''** इत्याद्यन्यथासिद्धिज्ञानप्रयोजकत्त्वात् तदितरनिखिलतत्कार्यकारणसत्त्वे तत्कार्यव्यतिरेकः यद्व्यतिरेकात् तेन अवश्यक्लृप्तेन नियतपूर्ववर्तिना अन्यथासिद्धत्वज्ञानात् ।

नव्यास्तु – कारणत्वस्य अनन्यथासिद्धनियतपूर्ववर्तितावच्छेदकधर्मवत्त्व-रूपत्वे प्रतिबन्धकाभावस्य तत्तद्व्यक्तित्वेन हेतुत्वापत्तिः । यत्र न कारणत्वव्यवहारः

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

तत्तद्व्यक्तिभेदकूटवत्त्वं तु सर्वज्ञेनैव ज्ञेयम् । तत्तद्व्यक्तिभेदकूटवत्त्वसंबन्धेन कार्यविशिष्टः यः धर्मः तद्वत्त्वं तत् इत्यपि न युक्तम् । तस्य संबन्धत्वसन्देहात् । तस्मात् कारणत्वं पदार्थान्तरमेव इति – आहुः ।

तदसत् । कारणत्वस्य अतिरिक्तत्वे दण्डादौ सर्वदा तत्प्रत्यक्षापत्तेः । न च –''अनन्यथासिद्धत्वे सति'' इत्यादिधर्मः तद्व्यञ्जक इति – वाच्यम् । तादृशधर्मज्ञानस्य आवश्यकत्वेन तस्यैव कारणताग्रहरूपत्वौचित्यात् । अस्तु वा दण्डत्वादिकमेव कारणत्वम्, घटादिकार्यसंबन्धितया तद्ग्रहे उक्तधर्मस्य व्यञ्जकत्वात् इति ।

परे तु – कार्यान्वयव्यतिरेककालपूर्वकालान्वयव्यतिरेकशालित्वम् इति – ऊचुः । तत् अयुक्तम् । आत्मादौ सुखादिकारणे प्रागभावरूपव्यतिरेकासंभवेन अव्याप्तेः ।।

राजीवोल्लासः

अवश्यक्लृप्तनियतपूर्ववृत्तिभिन्नत्वम् अन्यथासिद्धत्वम् । तच्छून्यत्वे सति कार्यनियतपूर्ववृत्तित्वं कारणस्य लक्षणम् । रासभस्यापि ''अन्यत्र क्लृप्त'' इत्यादि निबन्धान्तरोक्तान्यथासिद्धत्वविरहेऽपि ''अवश्यक्लृप्त'' इत्यादि अनुपदोक्तान्यथा-सिद्धत्वसत्त्वात् अनन्यथासिद्धविशेषणेनैव रासभे कारणलक्षणस्य अतिव्याप्तिवारणसं-भवात् कारणलक्षणे नियतपदं किमर्थम्? इत्याशङ्क्य आह – अनियतरासभादेः इत्यादिना ।

कार्याव्यापकस्य रासभादेः कारणत्ववारणायैव कारणलक्षणे नियतपदम् । ननु अनियतरासभादेः ''अवश्यक्लृप्त'' इत्यादिपञ्चमान्यथासिद्धत्वात् अनन्यथासिद्धत्व-विशेषणेनैव रासभादिवारणसंभवात् नियतपदं व्यर्थम् इति चेत् – उच्यते । केचन अन्यथासिद्धाः कार्यानियताः भवन्ति, यथा रासभादयः । केचन अन्यथासिद्धाः कार्यनियताः भवन्ति, यथा दण्डत्व-दण्डरूपादयः । कार्यनियताः अन्यथासिद्धाः

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

स्वल्पाः सुज्ञेयाश्च । कार्यानियताः अन्यथासिद्धाः तु अनल्पाः असर्वज्ञदुर्ज्ञेयाश्च । तत्र कारणलक्षणे निविष्टं अनन्यथासिद्धत्वं अनुगतरूपेण निर्वक्तुम् अशक्यम् । अनन्यथासिद्धत्वं हि अन्यथासिद्धभिन्नत्वम् । अन्यथासिद्धत्वं च सर्वानुगतम् एकं दुर्वचम् । न च – अवश्यक्लृप्तपूर्ववर्तिभिन्नत्वं सर्वानुगतम् अन्यथासिद्धत्वम् इति – वाच्यम् । अवश्यक्लृप्तत्वस्य एकस्य अनुगतस्य अभावात् । न च – लघुनियतपूर्ववृत्तित्वं अनुगतम् अवश्यक्लृप्तत्वम् । लघुत्वस्यापि त्रिविधतायाः पूर्वम् उक्ततया तद्घटक-शरीर-उपस्थिति-संबन्धानां अनेकत्वेन तद्घटितलघुत्वस्य अनुगतत्वाभावात् । तस्मात् ''अनन्यथासिद्धत्वम्'' इत्यनेन यत्र यत्र प्रामाणिकानां कारणत्वव्यवहारः नास्ति प्रत्येकं तत्तद्व्यक्तिभेदकूटवत्त्वमेव विवक्षणीयम् । तत्र च अनियतरासभादिरूपाणां अन्यथासिद्धानां असंख्यातानां तत्तद्व्यक्तित्वावच्छिन्न-भेदकूटनिवेशापेक्षया तेषां नियतपदेनैव वारणम् उचितम् । नियतान्यथासिद्धानां दण्डत्वादीनां तत्तद्व्यक्तित्वेन भेदस्तु निवेशनीय एव इति ग्रन्थकृतः अभिप्रायः इति भावः । इत्थं च इदं पर्यवस्यति – नियतपदेन वारयितुम् अशक्येषु दण्डत्व-दण्डरूपादिष्वपि प्रामाणिकानां कारणत्वव्यवहारः नास्ति । नियतपदेन वारयितुं शक्येषु रासभादिष्वपि प्रामाणिकानां कारणत्वव्यवहारः नास्ति । तथापि अनन्यथासिद्धपदेन नियतपदाव्यावर्त्यानां अन्यथासिद्धानामेव तत्तद्व्यक्तित्वेन भेदः विवक्षितः । रासभादीनां तु भेदः न विवक्षितः । तेषां नियतपदेनैव वारणात् इति । एवं च यत्र यत्र प्रामाणिकानां कारणत्वव्यवहारः नास्ति नियतपदेन व्यावृत्तिश्च न भवति तत्तद्भिन्नत्वे सति कार्यनियतपूर्ववृत्तित्वं कारणत्वम् इति उक्तं भवति ।

यद्यपि रासभादौ अतिव्याप्तिवारकतया नियतपदोपादानप्रदर्शनं दिनकर्यां पुनरुक्तम् – घटत्वावच्छिन्नं प्रति अनन्यथासिद्धे रासभे अतिव्याप्तिवारणाय ''नियत इति'' इत्यस्य पूर्वम् उक्तत्वात्, तथापि पूर्वम् ''अन्यत्र क्लृप्तनियतपूर्ववर्तिभिरेव कार्यसंभवे तत्सहभूतम् अन्यथासिद्धम्'' इति प्राचीनैः निरुक्ता पञ्चमान्यथासिद्धिः घटत्वावच्छिन्नं प्रति रासभस्य न संभवति । घटत्वावच्छिन्नात् अन्यत्र

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

क्लृप्तनियतपूर्ववर्तिभिः घटोत्पादासंभवात् इत्येवंरूपेण रासभस्य घटं प्रति अनन्य-थासिद्धत्वम् उपपाद्य ''नियत'' इति पदस्य सार्थक्यम् उक्तम् । इदानीं तु ग्रन्थकारैः **''अतिरिक्तम् अथापि यद्भवेत् नियतावश्यकपूर्वभाविनः''** इत्येवं पञ्चमान्यथासिद्धेः निर्वचनात् तदनुसारेण रासभोऽपि घटत्वावच्छिन्नं प्रति अन्यथासिद्ध एव इति तद्वैयर्थ्यम् इति आशङ्कां समाधातुं पूर्वम् उक्तस्यापि पुनः अनुवादः इति मन्तव्यम् ।

पूर्ववृत्तित्वं च इति । कारणलक्षणघटकं पूर्ववृत्तित्वं च इत्यर्थः । कार्यनियतत्वे सति कार्याव्यवहितपूर्ववृत्तित्वं कारणत्वम् इति वक्तव्यम् । तेन व्यवहितपूर्ववर्तिनः कारणत्वव्युदासः । अत्र **दिनकर्यां** ''व्यवहितपूर्ववर्तित्वव्युदासः'' इत्यत्र ''त्व''इति अधिकम् । व्यवहितपूर्ववर्तिव्युदासः इति पाठः । व्यवहितपूर्ववर्तिनां कारणत्वनिरासः इति तदर्थः ।

ननु अस्तु व्यवहितपूर्ववर्तिनामपि कारणत्वम्, को दोषः? इति अत आह – **अत एव इति** । अत्र ''च''कारः प्रक्षिप्तः । ''अपूर्वकल्पनया अपूर्वसंबन्धेन'' इति पाठः । यदि व्यवहितपूर्ववर्तिनः अपि कारणत्वं स्यात्, तदा व्यवहितस्य यागादेः अपि स्वर्गकारणत्वसंभवेन स्वर्गकारणत्वानुपपत्त्यभावात् अपूर्वकल्पनायाः अनावश्यकत्वात् स्वर्गकारणत्वानुपपत्त्या अपूर्वं परिकल्प्य अपूर्वसंबन्धेन यागादेः स्वर्गाव्यवहितपूर्ववृत्तित्वोपपादनं ग्रन्थकृतां न संगच्छते । तदव्यवहितपूर्ववृत्तित्वं च घटप्रागभावाधिकरणक्षणवृत्तित्वे सति घटाधिकरणक्षणावृत्तित्वम् ।

शङ्कते – **न च एतादृशस्य इति** । अनन्यथासिद्धकार्यनियतपूर्ववृत्तित्वस्य कारणत्वरूपत्वे व्यतिरेकव्यभिचारज्ञानस्य कारणत्वग्रहे नियमांशभानं प्रति ग्राह्या-भावविषयकतया प्रतिबन्धकत्वं संभवति । व्यतिरेकव्यभिचारः हि कारणतावच्छेदकत्वेन अभिमते धर्मे कार्यसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वम् । कार्यसमानाधि-करणाभावप्रतियोगितावच्छेदकधर्मवत्त्वं कारणत्वेन अभिमतस्य व्यतिरेकव्यभिचार

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

इति यावत् । कारणत्वं च नियतत्वघटितम् । नियतत्वं च कार्यसमानाधिकरणाभावप्रतियोगितानवच्छेदकधर्मवत्त्वम् । व्यतिरेकव्यभिचारज्ञाने सति कारणतावच्छेदकत्वेन अभिमतधर्मे कार्यसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वज्ञानं भवति । तच्च ज्ञानं कारणतावच्छेदकत्वेन अभिमते धर्मे कार्यसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वज्ञानं प्रति तदभाववत्तानिश्चयविधया प्रतिबन्धकम् । अन्वयव्यभिचारज्ञानस्य तु कथं कारणत्वग्रहप्रतिबन्धकत्वम्? स्व-स्वेतर-निखिलकारणसत्त्वसमानकालीनकार्याभावसामानाधिकरण्यरूपान्वयव्यभिचारज्ञानस्य कारणत्वघटककिञ्चित्पदार्थज्ञानाप्रतिबन्धकत्वात् इति भावः ।

नियामांशग्रहे इति । व्यापकत्वज्ञाने इत्यर्थः । **ग्राह्यभावावगाहितया** इति । कारणत्वग्रहे विषयः यः पदार्थः कार्यसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वरूपः तदभावविषयकतया इत्यर्थः । **विरोधित्वे अपि** इति । तद्वत्ताबुद्धौ तदभावज्ञानमुद्रया प्रतिबन्धकत्वेऽपि इत्यर्थः ।

समाधत्ते – **अवश्यक्लृप्त** इत्यादिना । कारणताघटकानन्यथासिद्धत्वज्ञाने अन्वयव्यभिचारज्ञानं प्रतिबन्धकम् । अन्वयव्यभिचारज्ञानम् अवश्यक्लृप्तत्वज्ञानप्रतिबन्धद्वारा अवश्यक्लृप्तभिन्नत्वरूपान्यथासिद्धिज्ञानं जनयति । तेन ज्ञानेन कारणताघटकः यः भेदः अन्यथासिद्धभेदः तत्प्रतियोगित्वज्ञानं भवति । तेन ज्ञानेन अन्यथासिद्धभेदकूटवत्त्वरूपानन्यथासिद्धत्वज्ञानं प्रतिबध्यते । भेदप्रतियोगित्वज्ञानस्य अन्यथासिद्धभेदाभावव्याप्यवत्ताज्ञानविधया भेदकूटवत्त्वरूपानन्यथासिद्धज्ञानप्रतिबन्धकत्वम् । एतदुक्तं भवति – तदितरनिखिलकारणसत्त्वसमानकालीनकार्याभावसामानाधिकरण्यरूपान्वयव्यभिचारज्ञानं कार्याभावासामानाधिकरण्यपर्यवसितकार्याभावप्रयोजकीभूताभावप्रतियोगित्वरूपावश्यक्लृप्तत्वज्ञानप्रतिबन्धद्वारा कारणताघटकभेदप्रतियोगित्वज्ञानं जनयति । तदपि तदभावव्याप्यवत्ताज्ञानविधया भेदकूटवत्त्वरूपानन्यथासिद्धत्वज्ञानं प्रतिबध्नाति इति ।

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

कार्याभावप्रयोजकीभूताभावप्रतियोगित्वरूपं कारणनिष्ठम् अवश्यक्लृप्तत्वं कार्याभावासामानाधिकरण्ये पर्यवस्यति । अतः कार्याभावासामानाधिकरण्यरूपावश्य-क्लृप्तत्वज्ञानं प्रति कार्याभावसामानाधिकरण्यरूपान्वयव्यभिचारज्ञानं प्रतिबन्धकम् । यत्र यत्र भेदप्रतियोगित्वं तत्र तत्र भेदाभावः । यथा घटे घटभेदप्रतियोगित्वं वर्तते । अतः तत्र घटभेदाभावः अस्ति । अतः "घटः घटभेदप्रतियोगित्ववान्" इति ज्ञानं, "घटः घटभेदवान्" इति ज्ञानस्य प्रतिबन्धकम् । घटभेदप्रतियोगित्वस्य घटभेदाभावव्याप्यत्वात् तादृशप्रतियोगित्वज्ञानस्य घटभेदाभावव्याप्यवत्ताज्ञानविधया घटभेदज्ञानप्रतिबन्धकत्वम् । तद्वत् प्रकृतेऽपि अन्वयव्यभिचारज्ञानेन अवश्यक्लृप्तत्वज्ञाने प्रतिबद्धे सति "अन्वयव्यभिचारि अवश्यक्लृप्तभिन्नम्" अर्थात् "कारणतायां घटकः यः अन्यथासिद्धभेदः तत्प्रतियोगी" इति ज्ञानं जायते । तादृशभेदप्रतियोगित्वं च अन्यथासिद्धभेदाभावव्याप्यम् । अतः तादृशभेदप्रतियोगित्वज्ञानं अन्यथा-सिद्धभेदवत्त्वज्ञानप्रतिबन्धकम् इत्यवधेयम् ।

कारणत्वं पदार्थान्तरम् इति वदतां **नव्यानां** मतम् आह – **नव्यास्तु** इत्यादिना । पूर्वं अनन्यथासिद्धनियतपूर्ववर्तितावच्छेदकधर्मवत्त्वं कारणत्वम् इत्युक्तम् । तथा सति प्रतिबन्धकाभावस्य तत्तद्व्यक्तित्वेनैव कारणत्वं स्यात्, न तु मण्यभावत्वा-दिरूपेण । मण्यभावनिष्ठतद्व्यक्तित्वापेक्षया स्वरूपसंबन्धावच्छिन्नमणित्वावच्छिन्न-प्रतियोगिताकाभावत्वस्य गुरुतया तस्य नियतपूर्ववर्तितावच्छेदकत्वविरहात् । नियतपूर्ववर्तितावच्छेदकं लघु तद्व्यक्तित्वमेव इति तद्वत्त्वस्य कारणत्वरूपत्वे मण्यभावस्य तद्व्यक्तित्वेन हेतुत्वं स्यात् । न च – अस्तु प्रतिबन्धकाभावस्य तद्व्यक्तित्वेनैव कारणत्वम्, का नो हानिः इति –वाच्यम् । दाहादिकं प्रति मण्यभावत्वादिना कारणतायाः सर्ववादिसंमतायाः विलोपप्रसङ्गात् ।

किञ्च कारणताशरीरे निविष्टस्य अनन्यथासिद्धत्वस्य, यत्र यत्र न कारणत्व-व्यवहारः तत्तद्व्यक्तिभेदकूटवत्त्वरूपस्य सर्वज्ञेनैव ज्ञातुं शक्यतया असर्वज्ञदुर्ज्ञेयत्वापत्तिः । तत्तद्व्यक्तिभेदकूटवत्त्वसंबन्धेन कार्यविशिष्टः यः धर्मः तद्वत्त्वं

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

कारणत्वम् इत्यपि न युक्तम् । तादृशभेदकूटवत्त्वस्य संबन्धत्वे विवादात् । तस्मात् कारणत्वं पदार्थान्तरम् इति नव्यानाम् आशयः ।

ननु कारणत्वं न अनन्यथासिद्धनियतपूर्ववर्तितावच्छेदकधर्मवत्त्वरूपम् । अपि तु यद्यद्धर्मावच्छिन्ने प्रामाणिकानां न कारणत्वव्यवहारः तत्तद्धर्मभिन्नधर्मस्यैव कारणत्वरूपत्वम् अङ्गीकरणीयम् । अतः न प्रतिबन्धकाभावस्य तत्तद्व्यक्तित्वेन हेतुत्वापत्तिरूपः पूर्वोक्तदोषः इति अत आह – **यत्र** इति । यद्धर्मावच्छिन्ने इत्यर्थः । **भेदकूटवत्त्वम्** इत्यस्यापि भेदकूटवद्धर्मवत्त्वं इत्यर्थः । **सर्वज्ञेनैव** इति । कारणतावच्छेदकभिन्नसकलधर्माणां तत्तद्व्यक्तित्वेन अस्मदादीनां ज्ञानासंभवात् इति भावः ।

ननु यद्यद्धर्मावच्छिन्ने न कारणत्वव्यवहारः तत्तद्व्यक्तिभेदकूटवत्त्वसंबन्धेन प्रकृतकार्यविशिष्टः यः धर्मः तद्वत्त्वमेव कारणत्वम् इत्युक्तौ असर्वज्ञदुर्ज्ञेयत्वरूपः दोषः न । विशिष्टबुद्धौ संसर्गज्ञानस्य अहेतुत्वेन पूर्वमनुपस्थितानामपि संसर्गघटकतया भाने बाधकाभावात् इति आशङ्कां निराकरोति – **तत्तद्व्यक्ति** इति । **तस्य** इति – तादृशभेदकूटस्य इत्यर्थः ।

कारणत्वस्य अतिरिक्तत्वे इति । कारणत्वं यदि अतिरिक्तपदार्थः स्यात्, तदा दण्डादौ कारणत्वस्य सर्वदा प्रत्यक्षं स्यात् । कदाचित् दण्डादौ घटकारणताप्रत्यक्षानुरोधेन कारणतायां योग्यत्वस्य अङ्गीकरणीयतया यदा यदा दण्डप्रत्यक्षं तदा तदा तद्गतरूपादिवत् तद्गतघटकारणतायाः अपि प्रत्यक्षापत्तिः ।

स्वमते तु कारणतायाः व्यापकत्वघटितत्वेन व्यापकत्वज्ञानं प्रति सहचारज्ञान-व्यभिचारज्ञानाभावयोः हेतुत्वेन तद्विलम्बात् न सर्वदा व्यापकताघटितकारणतायाः प्रत्यक्षापत्तिः इति भावः ।

न च अनन्यथासिद्धत्वे सति इति । अतिरिक्तपदार्थरूपस्य कारणत्वस्य अनन्यथासिद्धत्वे सति नियतपूर्ववर्तित्वं व्यञ्जकम् । अतः व्यञ्जकज्ञानकाले एव

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

कारणत्वस्य प्रत्यक्षम् । न तु सर्वदा इति न वाच्यम् । व्यञ्जकज्ञानस्य कारणताज्ञानार्थम् अवश्यापेक्षिततत्वेन व्यञ्जकधर्मज्ञानस्यैव कारणत्वज्ञानरूपतायाः उचितत्वात् इति भावः । **तद्व्यञ्जक** इति । कारणताप्रत्यक्षजनकप्रत्यक्षविषय इत्यर्थः ।

ननु व्यञ्जकतादृशधर्मज्ञानस्य कारणताज्ञानात् पूर्वम् आवश्यकत्वेऽपि न तादृशधर्मस्य कारणतारूपत्वसंभवः पूर्वोक्तदोषात् इति, अत आह – **अस्तु वा** इति । कारणत्वस्य पदार्थान्तरस्य कल्पने गौरवात् दण्डत्वादिकमेव कारणत्वम् । न च – दण्डत्वस्य कारणतारूपत्वे यदा यदा दण्डप्रत्यक्षं तदा तदा संयुक्तसमवाय-रूपसंनिकर्षेण दण्डत्वप्रत्यक्षवत् घटकारणत्वस्यापि प्रत्यक्षापत्तिः । कारणत्वस्य दण्डत्वानतिरेकात् इति – वाच्यम् । घटादिकार्यनिरूपितत्वेन रूपेण दण्डत्व-रूपकारणत्वग्रहे अनन्यासिद्धत्वे सति नियतपूर्ववृत्तित्वं व्यञ्जकम् । अतः न सर्वदा घटनिरूपितकारणतायाः प्रत्यक्षापत्तिः इति भावः ।

अत्र इदम् बोध्यम् – दण्डत्वादिकमेव कारणत्वम् इति मते व्यभिचारग्रहस्य कारणताग्रहविघटकत्वं व्यञ्जकधर्मज्ञानविघटनद्वारा इति केचित् । कारणत्वा-भावव्याप्यवत्ताज्ञानविधया इति तु परे ।

वस्तुतस्तु कारणतायाः दण्डत्वादिरूपत्वे दण्डत्व-घटकारणत्वयोः अवच्छेद्या-वच्छेदकभावबोधकस्य ''दण्डत्वेन घटकारणम्'' इत्यादिव्यवहारस्य अनुपपत्तिः । अभेदे अवच्छेद्यावच्छेदकभावासंभवात् । अतः पदार्थान्तरमेव कारणता । सा च अवच्छेदकधर्मसंबन्धभेदात् भिन्ना इति **नव्यानाम् मतमेव युक्तम्** ।

परे तु इति । कार्यान्वयव्यतिरेकयोः – कार्यप्रतियोगिकसंसर्गकार्यप्रागभावयोः अधिकरणभूतः यः कालः तत्पूर्वकालवर्तिनौ यौ कारणस्य अन्वयव्यतिरेकौ तद्वत्त्वं कारणत्वम् । कार्यसंसर्गकालपूर्वकालवृत्तिसंसर्गप्रतियोगित्वे सति कार्यप्रागभावकाल-पूर्वकालवृत्तिप्रागभावप्रतियोगित्वं कारणत्वम् इति फलितः अर्थः । स्वस्य स्वकारण-त्वापत्तिवारणाय कार्यान्वयकालपूर्वत्वं कार्यान्वयकालत्वव्यापकध्वंसप्रतियोगित्वरूपं

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

विवक्षितम् । कार्यव्यतिरेककालपूर्वत्वं तु कार्यप्रागभावकालवृत्तिध्वंसप्रतोयोगित्वरूपम् ।

आत्मादौ इति । एतादृशस्य कारणत्वस्य सुखादिकारणे आत्मादौ अव्याप्तिः । आत्मप्रागभावस्य अप्रसिद्धतया प्रागभावरूपव्यतिरेकघटितस्य उक्तलक्षणस्य अभावात् इति भावः ।।

।। समवाय्यसमवायिकारणत्वरूपसाधर्म्यद्वयवर्णनम् ।।

कारिकावली

समवायिकारणत्वं द्रव्यस्यैवेति विज्ञेयम् ।
गुणकर्ममात्रवृत्ति ज्ञेयमथाप्यसमवायिहेतुत्वम् ।। २३ ।।

मुक्तावली

समवायि इति । स्पष्टम् । **गुणकर्म** इति । **असमवायिकारणत्वं** गुणकर्मभिन्नानां वैधर्म्यम्, न तु गुणकर्मणोः साधर्म्यम् इत्यत्र तात्पर्यम् । **अथ वा** असमवायिकारणवृत्ति-सत्ताभिन्नजातिमत्त्वं तदर्थः । तेन ज्ञानादीनाम् असमवायिकारणत्वविरहेऽपि न अव्याप्तिः ।।

दिनकरी

मूले गुणकर्ममात्रवृत्त्यसमवायिकारणत्वम् इत्युक्तम्, तच्च अयुक्तम् । आत्मविशेषगुणेषु अव्याप्तेः । अतः वैधर्म्यपरतया मूलं व्याचष्टे – **असमवायिकारणत्वम्** इति । साधर्म्यप्रकरणे वैधर्म्यकथनम् अयुक्तम् इत्याशयात् आह – **अथ वा** इति । **सत्ताभिन्नद्रव्यत्वरूपजातिमति द्रव्ये अतिव्याप्तिवारणाय वृत्त्यन्तम्** । तत्रैव सत्ताजातिम् आदाय अतिव्याप्तिवारणाय ''सत्ताभिन्न'' इति । तत्रैव द्रव्यगुणान्यतरत्वरूपधर्मम् आदाय अतिव्याप्तिवारणाय ''जाति'' इति । वृत्तित्वं

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

जातिमत्त्वं च समवायेन विवक्षितम् । तेन गुणादौ द्रव्यत्वस्य कालिकेन वृत्तित्वात् द्रव्यस्य च कालिकेन गुणत्वादिमत्त्वात् द्रव्ये न अतिव्याप्तिः ।।

राजीवोल्लासः

मूले इति । "गुणकर्ममात्रवृत्ति" इति कारिकायां "असमवायिकारणत्वं गुणकर्ममात्रवृत्ति" इति कथनेन गुणानाम् कर्मणः च असमवायिकारणत्वं साधर्म्यम् इति लभ्यते । तद्युक्तम् । आत्मविशेषगुणानां कुत्रापि असमवायिकारणत्वाभावेन तेषु अव्याप्तेः । अतः वैधर्म्यपरतया गुणभिन्नानाम् असमवायिकारणत्वं वैधर्म्यम् इति तात्पर्येण व्याचष्टे **मुक्तावल्याम्** इत्यर्थः । वैधर्म्यं नाम अवृत्तिः धर्मः । असमवायिकारणत्वं गुणकर्मभिन्नेषु अविद्यमानः धर्मः । न तु गुणकर्मणो विद्यमानः धर्मः । तथा च "गुणकर्ममात्रवृत्ति" इति मूलस्य "गुणकर्मेतरावृत्तित्वे सति गुणकर्मवृत्ति" इत्यर्थकस्य विवक्षावशात् विशेषणांश एव तात्पर्यम् इति भावः ।

सत्ताभिन्न इति । गुणकर्मणोः असमवायिकारणत्वं साधर्म्यम् इत्यत्र यदि तात्पर्यं न स्यात्, तदा साधर्म्यप्रकरणे वैधर्म्यकथनम् अयुक्तं स्यात् इत्याशयेन जातिघटितसाधर्म्यपरतया **अथ वा** इत्यादिना **मुक्तावल्यां** व्याख्यानं कृतम् । असमवायिकारणवृत्तिः सत्ताभिन्ना या जातिः तद्वत्त्वम् असमवायिहेतुत्वम् इत्यस्य अर्थः । इदं च आत्मगुणेषु ज्ञानादिषु अपि अस्ति । तथा हि – असमवायिकारणं संयोगादिः तद्वृत्तिः या सत्ताभिन्ना जातिः गुणत्वरूपा जातिः तद्वत्त्वस्य आत्मगुणेषु ज्ञानादिषु सत्त्वात् । अत्र जातौ सत्ताभिन्नत्वानिवेशे असमवायिकारण-संयोगादिवृत्तिसत्तारूपजातिमत्त्वस्य द्रव्येऽपि सत्त्वात् तत्र अतिव्याप्तिः । तद्वारणाय तन्निवेशः । एवं जातौ असमवायिकारणवृत्तित्वानिवेशे सत्ताभिन्ना या द्रव्यत्वरूपा जातिः तद्वत्वस्य द्रव्ये सत्त्वात् तत्र अतिव्याप्तिः । असमवायिकारणवृत्तित्वस्य निवेशे तु द्रव्यत्वं असमवायिकारणवृत्ति न भवति । द्रव्यस्य कुत्रापि असमवायिकारणत्वाभावात् । द्रव्यस्य असमवायिकारणत्वे हि तद्वृत्तिः द्रव्यत्वजातिः

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

असमवायिकारणवृत्तिः भवेत् । जातिपदस्थाने धर्मपदं निवेश्य असमवायिकारण-वृत्तिसत्ताभिन्नधर्मवत्त्वं गुणकर्मणोः साधर्म्यम् इत्युक्तौ असमवायिकारणसंयोगादिवृत्तिः सत्ताभिन्नः धर्मः द्रव्यगुणान्यतरत्वम् । तद्वत्वस्य द्रव्ये सत्त्वात् द्रव्ये अतिव्याप्तिः, तद्वारणाय जातिपदनिवेशः । असमवायिकारणवृत्तित्वं समवायसंबन्धेन विवक्षणीयम् । अन्यथा असमवायिकारणे संयोगादौ कालिकसंबन्धेन वर्तमानसत्ताभिन्ना जातिः द्रव्यत्वमपि भवति । तद्वत्त्वस्य द्रव्ये सत्त्वात् तत्र अतिव्याप्तिः । एवं जातिमत्त्वमपि समवायसंबन्धेन विवक्षितम् । अन्यथा असमवायिकारणवृत्ति सत्ताभिन्नगुणत्वजातेः कालिकसंबन्धेन द्रव्येऽपि सत्त्वात् तत्र अतिव्याप्तिः ।

न च – वृत्तित्वे समवायसंबन्धावच्छिन्नत्वनिवेशे अन्यतरत्वमादाय कथम् अतिव्याप्तिः । अन्यतरत्वस्य स्वरूपसंबन्धेनैव वृत्तित्वात् इति – वाच्यम् । वृत्तित्ववृत्तिमत्त्वयोः समवायसंबन्धः निवेशनीयः इत्यत्रैव जातिपदस्य तात्पर्यात् । तथा च असमवायिकारणनिरूपितसमवायसंबन्धावच्छिन्नवृत्तितावत्सत्ताभिन्न-जातिनिष्ठसमवायसंबन्धावच्छिन्न-आधेयतानिरूपकत्वम् साधर्म्यम् इति फलति ॥

॥ नित्यद्रव्यातिरिक्तानां सप्तपदार्थानां साधर्म्यवर्णनम् ॥

कारिकावली

अन्यत्र नित्यद्रव्येभ्य आश्रितत्वमिहोच्यते ।

मुक्तावली

अन्यत्र इति । नित्यद्रव्याणि परमाण्वाकाशादीनि विहाय आश्रितत्वं साधर्म्यम् इत्यर्थः । आश्रितत्वं तु समवायादिसंबन्धेन वृत्तिमत्त्वम् । विशेषणतया नित्यानामपि कालादौ वृत्तेः ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

दिनकरी

ननु "गगनादिकं सर्वदैव अस्ति" इत्यादिव्यवहारात् नित्यद्रव्येषु अपि कालिकसंबन्धेन आश्रितत्वसत्त्वात् **"अन्यत्र नित्यद्रव्येभ्यः"** इति मूलम् अयुक्तम्, अत आह – **आश्रितत्वम्** इति । **समवायादिसंबन्धेन** – सर्वाधारतानियामक-कालिकसंबन्धातिरिक्तसंबन्धेन । **विशेषणतया** इति । कालिकविशेषणतया इत्यर्थः । **अत्र नित्यद्रव्यातिरिक्तत्वं** लक्ष्यतावच्छेदकम् । न च संयोगेन परमाणोरपि वृत्तेः परमाणौ अतिव्याप्तिः । तत्संयोगस्य वृत्त्यनियामकत्वात् इति ।।

राजीवोल्लासः

ननु **"अन्यत्र नित्यद्रव्येभ्यः आश्रितत्वम् इह उच्यते"** इति कारिकायां "इह" शब्देन पूर्वपरामृष्टद्रव्यार्थकत्वे इह – पूर्वप्रकृतद्रव्येषु मध्ये नित्यद्रव्येभ्यः **अन्यत्र** – नित्यद्रव्यातिरिक्तद्रव्येषु इत्यर्थात् नित्यद्रव्यातिरिक्तद्रव्याणाम् आश्रितत्वं साधर्म्यम् इति लाभात् आश्रितत्वस्य लक्ष्यतावच्छेदकं नित्यद्रव्यातिक्तद्रव्यत्वम् इति लभ्यते । तथा सति लक्ष्यतावच्छेदकानाक्रान्ते गुणे कर्मणि च आश्रितत्वसत्त्वात् तत्र अतिव्याप्तिः इति आशङ्क्य कारिकास्थ "इह" शब्देन द्रव्यं न परामृश्यते । अपि तु न्यायसिद्धान्तः परामृश्यते । तथा च इह – न्यायसिद्धान्ते नित्यद्रव्यातिरिक्तानाम् आश्रितत्वं साधर्म्यम् इति मूलार्थात् आश्रितत्वस्य नित्यद्रव्यातिरिक्तत्वं लक्ष्यतावच्छेदकम् । गुणकर्मणोः अपि नित्यद्रव्यातिरिक्तत्वात् लक्ष्यत्वेन तत्र लक्षणसत्त्वं न दोषाय इत्याशयेन आह – **अत्र नित्यद्रव्यातिरिक्तत्वम्** इति । तर्हि "इह" इति पदस्य किं प्रयोजनम् इति चेत्, उच्यते – न्यायसिद्धान्ते इत्यर्थकस्य "इह" इति पदस्य अनुपादाने वेदान्तिनां मते नित्यद्रव्यातिरिक्तस्य नित्यज्ञानस्य आश्रितत्वविरहात् तत्र अव्याप्तिः इति शङ्का स्यात्, तद्वारणाय "इह" इति पदमुपात्तम् । इदं लक्षणं न्यायसिद्धान्ते उक्तम् । अतः वेदान्तसिद्धान्ते लक्षणाभावेऽपि न क्षतिः । न्यायसिद्धान्ते नित्यज्ञानस्य ईश्वराश्रितत्वाङ्गीकारात् अव्याप्त्यभावः ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

"आश्रितत्वं तु समवायादिसंबन्धेन" इति मूले "आदि" शब्देन संयोगोऽपि गृह्यते । एवं च परमाणोः अपि परमाण्वन्तरे संयोगसंबन्धेन आश्रितत्वात् परमाणौ अतिव्याप्तिः इति आशङ्क्य परमाणुसंयोगस्य वृत्त्यनियामकत्वात् न अतिव्याप्तिः इति आह – **न च संयोगेन** इति । **वृत्त्यनियामकत्वात्** इति । पतनप्रतिबन्धकसंयोगस्यैव वृत्तिनियामकत्वात् जन्यगुरुत्वस्य प्रकृष्टगुरुत्वस्य वा पतनकारणतया तदभावादेव परमाणोः पतनासंभवेन परमाणुद्वयसंयोगस्य पतनप्रतिबन्धकत्वे मानाभावात् परमाणुसंयोगस्य न वृत्तिनियामकत्वम् इति भावः ।।

।। द्रव्यमात्रसाधर्म्यवर्णनम् ।।

कारिकावली

क्षित्यादीनां नवानां तु द्रव्यत्वं गुणयोगिता ।। २४ ।।

मुक्तावली

इदानीं द्रव्यस्यैव विशिष्य साधर्म्यं वक्तुम् उपक्रमते – **क्षित्यादीनाम्** इति ।।

दिनकरी

"क्षित्यादीनां नवानां तु" इति मूलस्थ "तु" शब्देन सूचितम् अर्थं प्रकटयति – **इदानीम्** इति ।।

राजीवोल्लासः

"तु" शब्देन सूचितम् अर्थम् इति । "क्षित्यादीनां नवानां तु" इति "तु" शब्देन इदानीं द्रव्याणामेव साधर्म्यं वक्ष्यते, न तु द्रव्यतदतिरिक्तगुणादिसाधारणं साधर्म्यम् इति बोधनद्वारा पूर्वतनस्य द्रव्यतदतिरिक्तसाधारणसाधर्म्यप्रकरणस्य व्यवच्छेदेन प्रकरणान्तरम् इदम् इति सूच्यते इति भावः ।।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

।। क्षित्यप्तेजोवायुमनसां साधर्म्यवर्णनम् ।।

कारिकावली

क्षितिर्जलं तथा तेजः पवनो मन एव च।
परापरत्वमूर्तत्वक्रियावेगाश्रया अमी ।। २५ ।।

मुक्तावली

क्षितिः इति । पृथिव्यप्तेजोवायुमनसां परत्वम् अपरत्वं मूर्तत्वं कर्मवत्त्वं वेगवत्त्वं च साधर्म्यम् । न च – यत्र घटादौ परत्वम् अपरत्वं वा न उत्पन्नं, तत्र अव्याप्तिः इति – वाच्यम् । परत्वादिसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात् । मूर्तत्वम् अपकृष्टपरिमाणवत्त्वम् । तच्च एषामेव, गगनादिपरिमाणस्य कुतोऽपि अपकृष्टत्वाभावात् । पूर्ववत् कर्मवत्त्वं कर्मसमानाधिकरणद्रव्यत्वव्याप्य-जातिमत्त्वम् । वेगवत्त्वं वेगवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वं च बोध्यम् ।।

दिनकरी

ननु धात्वर्थः क्रिया, तत्र अतिप्रसङ्गः इति, अत आह – **कर्मवत्त्वम्** इति । वेगवत्त्वं वेगसंबन्धित्वम् । दिक्कृतयोः परत्वापरत्वयोः हेतुः 'इदमस्मात् संनिकृष्टम्'' इति अपेक्षाबुद्धिः, कालकृतयोः परत्वापरत्वयोः हेतुः ''अयमस्मात् अल्पतरकालसंबद्धः'' इति अपेक्षाबुद्धिश्च यत्र न उत्पन्ना, तत्र परत्वापरत्वयोः अनुत्पादात् अव्याप्तिम् आशङ्क्य निरस्यति – न च इत्यादिना । **आत्मनि अतिव्याप्तिवारणाय समानाधिकरणान्तम्** । तत्रैव सत्ताम् आदाय अतिव्याप्तिवारणाय **द्रव्यत्वव्याप्य** इति । द्रव्यत्वान्यत्वेनापि जातिः विशेषणीया । तेन न द्रव्यत्वव्याप्यद्रव्यत्वम् आदाय अतिव्याप्तिः । **अपकृष्ट** इति । **अविभुवृत्ति-परिमाणवत्त्वम्** इत्यर्थः । तेन परमाणौ न अव्याप्तिः ।

क्रियाजनकतावच्छेदकं मूर्तत्वं जातिः इत्यपि केचित् ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

तच्च इति । निरुक्तमूर्तत्वं च इत्यर्थः । "**चः**" त्वर्थे । **पूर्ववत्** इति । "परत्वापरत्वसमानाधिकरण" इत्यादिकथितविवक्षितार्थवत् इत्यर्थः ।।

राजीवोल्लासः

"**ननु क्रियावेगाश्रया अमी**" इति कारिकायां क्रियापदेन क्रियाश्रयत्वम् पृथिव्यप्तेजोवायुमनसां साधर्म्यम् इति लभ्यते । "क्रिया" इति पदस्य धात्वर्थः इत्यर्थः । "धात्वर्थो हि क्रिया ज्ञेयः भाव इत्यभिधीयते" इति **हरिकारिकोक्तेः** । तथा च "जानाति" इत्यादौ ज्ञानेच्छादेः अपि धात्वर्थत्वेन क्रियात्वात् तद्वत्त्वस्य आत्मनि सत्त्वात् संयोगादिरूपधात्वर्थस्य आकाशादौ अपि सत्त्वात् तत्र अतिव्याप्तिः इत्याशङ्क्य **कारिकास्थ**क्रियापदेन चलनरूपा क्रिया विवक्षिता, न तु धात्वर्थः इत्याशयेन **मुक्तावल्यां कर्मवत्त्वम्** इति व्याख्यातम् । तदाह – **ननु धात्वर्थ** इति । **तत्र अतिप्रसङ्ग** इति । धात्वर्थस्य क्रियात्वे क्रियावत्त्वलक्षणस्य आत्मादौ अतिव्याप्तिः इत्यर्थः । कर्मवत्त्वम् इत्युक्तौ तु स्पन्दरूपकर्मवत्त्वस्य अत्र विवक्षिततया आत्मादौ तद्विरहात् न अतिव्याप्तिः । वेगेन तुल्यं वेगवत् तस्य भावः वेगवत्त्वम् इति व्युत्पत्त्या वेगसदृशत्वं वेगवत्त्वम् इति भ्रमं निरसितुम् आह – **वेगसंबन्धित्वम्** इति । तथा च वेगः अस्य अस्ति इति वेगवत् तस्य भावः वेगवत्त्वम् इति व्युत्पत्या समवायसंबन्धेन वेगाश्रयत्वरूपं वेगसंबन्धित्वम् अत्र विवक्षितम् । वेगसादृश्यविवक्षायां तु गुणत्वेन वेगसदृशेषु गुणेषु अतिव्याप्तिः इति भावः ।

आत्मनि अतिव्याप्तिवारणाय इत्यादि । परत्वादिसमानाधिकरण-द्रव्यत्वव्याप्यजातिमत्त्वं क्षित्यप्तेजोवायुमनसां पञ्चानां साधर्म्यम् । तत्र द्रव्यत्वव्याप्य-आत्मत्वजातिमति आत्मनि अतिव्याप्तिवारणाय "**परत्वादिसमानाधिकरण**" इति जातौ विशेषणम् । आत्मत्वजातिस्तु न परत्वादिमद्वृत्तिः । आत्मनि कालकृतस्य वा दिक्कृतस्य वा परत्वादेः अभावात् । सत्ताजातिम् आदाय तत्रैव आत्मादौ अतिव्याप्तिवारणाय "द्रव्यत्वव्याप्य" इति जातिविशेषणम् । सत्ता तु द्रव्यत्वव्यापिका

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

न तु द्रव्यत्वव्याप्या इति न सा ग्रहीतुं शक्यते । परत्वाद्यधिकरणवृत्तिः द्रव्यत्वव्याप्या जातिः द्रव्यत्वमपि भवति । तद्वत्वस्य आत्मादिषु सत्त्वात् पुनः अतिव्याप्तिः । तद्वारणाय जातौ "**द्रव्यत्वान्य**" इत्यपि विशेषणम् देयम् ।

द्रव्यत्वान्यत्वेनापि इति । वस्तुतस्तु द्रव्यत्वव्याप्यत्वं प्रकृते द्रव्यत्वन्यून-वृत्तित्वमेव, लाघवात् । तच्च द्रव्यत्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वरूपं न द्रव्यत्वे इति तत् आदाय न अतिव्याप्तिसंभवः । न च गुणत्वादेः अपि तथात्वात् तदादायैव अतिव्याप्तिः इति शङ्कनीयम्, तेषां परत्वापरत्व-सामानाधिकरण्यविरहात् इति युक्तम् उत्पश्यामः इति **तरङ्गिणीकाराः** ।

ननु मूर्तत्वम् अपकृष्टपरिमाणवत्त्वम् इत्युक्तौ परमाणुपरिमाणस्य अणुतरत्वेन उत्कृष्टस्य कुतोऽपि अपकृष्टत्वाभावात् परमाणुषु अव्याप्तिः इत्याशङ्क्य आह – **अविभुवृत्तिपरिमाणवत्त्वम्** इति । तथा च परमाणुपरिमाणमपि विभु-भिन्नपरमाणुवृत्तितया अविभुवृत्तिपरिमाणं भवति । तद्वत्वस्य परमाणुषु सत्त्वात् न अव्याप्तिः इति भावः । तथा च अविभुवृत्तित्वं अपकर्षाणुत्वत्वान्यतरवत्त्वस्य परिचायकम् । इत्थं च "**गगनादिपरिमाणस्य कुतोऽपि अपकृष्टत्वाभावात्**" इति युक्तिप्रदर्शनमपि संगतं वेदितव्यम् ।

मतान्तरम् आह – **क्रियाजनकतावच्छेदकम्** इत्यादि । मूर्तत्वं न अपकृष्ट-परिमाणवत्त्वम् । किन्तु क्रियाजनकतावच्छेदिका काचन जातिः इति **केषाञ्चिन्मतम्** ।

"**च**" कारेण समुच्चयितव्यस्य अर्थान्तरस्य अभावात् तद्वैयर्थ्यं इति आशङ्कानिरासाय आह – **चस्त्वर्थे** इति । त्वर्थेन "च" इत्यनेन विभुपरिमाणे पृथिव्यादिसमवेतत्वस्य व्यवच्छेदबोधनात् न तस्य वैयर्थ्यम् इति भावः ।।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

।। कालाकाशात्मदिशां पृथिव्यप्तेजोवाय्वाकाशानां च साधर्म्यवर्णनम् ।।

कारिकावली

कालखात्मदिशां सर्वगतत्वं परमं महत् ।
क्षित्यादि पञ्च भूतानि चत्वारि स्पर्शवन्ति हि ।। २६ ।।

मुक्तावली

काल इति । कालाकाशात्मदिशां सर्वगतत्वं परममहत्त्वं च साधर्म्यम् । सर्वगतत्वं – सर्वमूर्तसंयोगित्वम् । परममहत्त्वत्वं जातिविशेषः, **अपकर्षा**-नाश्रयपरिमाणवत्त्वं वा ।

क्षित्यादि इति । पृथिव्यप्तेजोवाय्वाकाशानां भूतत्वम् । तच्च **बहिरिन्द्रियग्राह्य**-विशेषगुणवत्त्वम् । अत्र ग्राह्यत्वं **लौकिकप्रत्यक्षस्वरूपयोग्यत्वं** बोध्यम् । तेन "ज्ञातः घटः" इति प्रत्यक्षे ज्ञानस्यापि उपनीतभानविषयत्वात् तद्वति आत्मनि न अतिव्याप्तिः । न वा प्रत्यक्षाविषयरूपादिमति परमाण्वादौ अव्याप्तिः । तस्यापि स्वरूपयोग्यत्वात् महत्त्वलक्षणकारणान्तरासन्निधानाच्च न प्रत्यक्षत्वम् ।

अथवा आत्मावृत्तिविशेषगुणवत्त्वं तत्त्वम् । **चत्वारि इति** । पृथिव्यप्तेजोवायूनां **स्पर्शवत्त्वम्** ।।

दिनकरी

कालादौ स्पन्दाभावेन असंभवम् आशङ्क्य आह – **सर्वमूर्त इति** । **"अहं** महान्" इति प्रतीतिविषयपरममहत्त्वत्वस्य गगनपरिमाणादिसाधारणस्य जातित्व-संभवेऽपि आत्मपरिमाणम् अयोग्यम् इति टीकाकृन्मतम् अनुसृत्य आह – **अपकर्ष इति** । यद्यप्यणुपरिमाणेषु द्व्यणुकपरिमाणमेव अपकर्षाश्रयः, न परमाणुपरिमाणम् इति परमाणौ अतिव्याप्तिः, तथापि अपकर्षानाश्रयमहत्परिमाणवत्त्वं तथा बोध्यम् ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

बहिरिन्द्रिय इति । **आत्मनि अतिव्याप्तिवारणाय** बहिःपदम् । बहिरिन्द्रियग्राह्यजातीयसंयोगादिमति कालादौ अतिव्याप्तिवारणाय **विशेष** इति । विशेषगुणत्वं च **गुणनिरूपणे** वक्ष्यते । द्रव्यत्वम् आदाय अतिव्याप्तिवारणाय **गुण** इति । लौकिकत्वनिवेशस्य फलम् आह – **तेन** इति । "**ज्ञातः घटः**" इति ज्ञाने च प्रकारीभूतज्ञानांशे न लौकिकी विषयता । चक्षुरादेः तत्र लौकिकसन्निकर्षा-भावात् इति भावः । **स्वरूपयोग्यताप्रवेशस्य** फलम् आह – **न वा** इति । ननु परमाणुरूपादेः योग्यत्वे कुतः न तस्य प्रत्यक्षम्? अत आह – **महत्त्व** इति । **लौकिकविषयतया** द्रव्यसमवेतप्रत्यक्षे सामानाधिकरण्यसंबन्धेन कारणस्य महत्त्वस्य परमाणुरूपादौ अभावात् न तल्लौकिकप्रत्यक्षम् इति भावः ।

ननु चक्षुरिन्द्रियादिगतरूपादिविशेषगुणानाम् अनुद्भूतत्वेन बहिरिन्द्रिय-ग्रहणायोग्यत्वात् चक्षुरादौ अव्याप्तिम् आशङ्क्य **लाघवात्** च आह – **अथ वा** इति । **अत्र च कल्पे** दैशिकपरत्वापरत्वम् आदाय मनसि अतिव्याप्तिवारणाय **विशेष** इति । **स्पर्शवत्त्वं** – **समवायेन स्पर्शवत्त्वम्** ।।

राजीवोल्लासः

कालादौ स्पन्दाभावेन इति । कालखात्मदिशां सर्वगतत्वं साधर्म्यम् इत्युक्तौ सर्वगतत्वम् इत्यत्र गमनक्रियायाः अन्तर्भूतत्वात् कालादौ स्पन्दाभावेन लक्षणस्य असंभवः इत्याशङ्क्य सर्वसंयोगानुकूलक्रियावत्त्वं न सर्वगतत्वम् । किन्तु सर्वमूर्तसंयोगित्वम् इति आह – **सर्वमूर्त** इति इति भावः ।

ननु परममहत्त्वत्वस्य जातित्वम् अभिधाय तस्य कारणताद्यनवच्छेदकत्वेन तत्र जातित्वसाधकप्रमाणविरहेण अपकर्षानाश्रयपरिमाणत्वं वा तत् इति कल्पान्तरम् अनुसृतं **मूले** । तच्च अयुक्तम् । आत्मगतपरिमाणे तादृशजातेः प्रत्यक्षसंभवेन प्रत्यक्षप्रमाणस्यैव तत्साधकस्य सत्त्वात् इति आशङ्कां निरस्यति – **अहम्** इत्यादि । **आत्मनि अतिव्याप्तिवारणाय** इत्यादि । बहिरिन्द्रियग्राह्यविशेषगुणवत्त्वं भूतत्वम् ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

तच्च पृथिव्यप्तेजोवाय्वाकाशानां साधर्म्यम् । बहिरिन्द्रियग्राह्याः बहिरिन्द्रियजन्य-प्रत्यक्षविषयाः ये विशेषगुणाः तद्वत्त्वम् इति तदर्थः । तत्र बहिःपदानुपादाने इन्द्रियग्राह्यविशेषगुणवत्त्वं इत्येतावन्मात्रोक्तौ मनोरूपेन्द्रियजन्यप्रत्यक्षविषयज्ञानादि-विशेषगुणवत्त्वस्य आत्मनि सत्त्वात् तत्र अतिव्याप्तिः, तद्वारणाय बहिःपदम् । ज्ञानादीनां बहिरिन्द्रियग्राह्यत्वविरहात् न तान् आदाय अतिव्याप्तिः । विशेषपदानुपादाने बहिरिन्द्रियजन्यप्रत्यक्षविषयसंयोगादिरूपसामान्यगुणाश्रये कालादौ अतिव्याप्तिः । तद्वारणाय विशेषगुण इति । कालादौ विशेषगुणविरहात् न अतिव्याप्तिः ।

न च – संयोगप्रत्यक्षे यावदाश्रयप्रत्यक्षस्य कारणत्वेन कालप्रत्यक्षाभावात् कालगतसंयोगः न प्रत्यक्षविषय इति बहिरिन्द्रियजन्यप्रत्यक्षविषयसंयोगस्य काले अभावात् कथम् अतिव्याप्तेः प्रसक्तिः इति – वाच्यम् । अत्र लक्षणे बहिरिन्द्रिय-ग्राह्यपदेन बहिरिन्द्रियजन्यप्रत्यक्षविषयजातिमान् इति अर्थः विवक्षणीयः । अन्यथा पृथिव्यादिपरमाणुषु अव्याप्तिः स्यात् । तद्गतानां विशेषगुणादीनां रूपादीनां अतीन्द्रियतया बहिरिन्द्रियजन्यप्रत्यक्षविषयत्वाभावात् । जातिमत्त्वविवक्षायां तु बहिरिन्द्रियजन्यप्रत्यक्षविषया घटगतरूपादिषु वर्तमाना या जातिः रूपत्वादिजातिः, तद्वान् विशेषगुणः परमाणुगतरूपादिरपि, तद्वत्वस्य परमाणुषु सत्त्वात् न अव्याप्तिः । एवं च कालघटसंयोगस्य अप्रत्यक्षत्वेऽपि बहिरिन्द्रियजन्यप्रत्यक्षविषयः भूतलघटसंयोगः तद्वृत्तिजातिः संयोगत्वम्, तद्वान् यः गुणः कालसंयोगरूपो गुणः, तद्वत्वस्य काले सत्त्वात् तत्र अतिव्याप्तिः, तद्वारणाय विशेषपदम् । संयोगस्य सामान्यगुणत्वेन विशेषगुणत्वाभावात् न तमादाय अतिव्याप्तिः ।

विशेषगुणत्वं नाम प्रकृते सामान्यगुणभिन्नत्वे सति गुणत्वं विवक्षितम् । तत्र गुणत्वानुपादाने द्रव्यत्वमपि बहिरिन्द्रियग्राह्यं सामान्यगुणभिन्नं च । तद्वत्त्वस्य कालादिद्रव्ये सत्त्वात् अतिव्याप्तिः । तद्वारणाय गुणपदम् । द्रव्यत्वं तु न गुण इति न तदादाय अतिव्याप्तिः । न च – एवम् अपि द्रव्यत्वे बहिरिन्द्रियग्राह्यजातिविरहादेव तदादाय न अतिव्याप्तिः इति – वाच्यम् । द्रव्यत्वपदस्य द्रव्येतरासमवेतार्थकतया

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

क्रियाया अपि तथात्वेन ताम् आदाय मनसि अतिव्याप्तेः एव तात्पर्यविषयत्वात् ।

ज्ञातो घट इति । बहिरिन्द्रियग्राह्यत्वं बहिरिन्द्रियजन्यलौकिकप्रत्यक्ष-विषयत्वम् । तत्र लौकिकत्वानुपादाने "ज्ञातो घटः" इत्याकारकं यत् ज्ञानांशे अलौकिकं प्रत्यक्षं तद्विषयः यः विशेषगुणः – ज्ञानं तद्वत्त्वस्य आत्मनि सत्त्वात् अतिव्याप्तिः । लौकिकत्वनिवेशे तु ज्ञानांशे प्रत्यक्षनिरूपिता लौकिकी विषयता नास्ति । तदंशे चक्षुःसंयोगादिरूपलौकिकसन्निकर्षविरहात् । अतः न अतिव्याप्तिः । **स्वरूपयोग्यताप्रवेशस्य इति** । बहिरिन्द्रियग्राह्यत्वं बहिरिन्द्रियजन्यप्रत्यक्षस्व-रूपयोग्यत्वम् । न तु बहिरिन्द्रियजन्यप्रत्यक्षविषयत्वमात्रम् । तथा सति परमाणुषु बहिरिन्द्रियजन्यप्रत्यक्षविषयस्य विशेषगुणस्य अभावात् अव्याप्तिः । परमाणुगतानां रूपादिगुणानां अतीन्द्रियत्वात् । स्वरूपयोग्यत्वविवक्षायां तु बहिरिन्द्रियजन्यप्रत्यक्ष-विषयजातिमत्त्वं स्वरूपयोग्यत्वम् । घटरूपादौ बहिरिन्द्रियजन्यप्रत्यक्षविषयायाः रूपत्वजातेः परमाणुरूपेऽपि सत्त्वात् परमाणुरूपं बहिरिन्द्रियजन्यप्रत्यक्षविषय-जातिमत् । तादृशजातिमद्रूपवत्त्वस्य परमाणुषु सत्त्वात् न अव्याप्तिः ।

ननु परमाणुरूपादेः प्रत्यक्षस्वरूपयोग्यत्वे कुतः न परमाणोः प्रत्यक्षम् इति आशङ्क्य महत्त्वाभावात् न प्रत्यक्षम् इति मूले उक्तम् । तन्न युक्तम् । घटरूपादौ महत्त्वाभावे अपि घटप्रत्यक्षदर्शनात् परमाणुरूपे महत्त्वाभावेऽपि परमाणुप्रत्यक्षसंभवात् इति आशङ्क्य आह – **लौकिकविषयतया इति** । लौकिकसन्निकर्षप्रयोज्यविषयतया इत्यर्थः । तथा च परमाणुरूपे बहिरिन्द्रियजन्यलौकिकप्रत्यक्षविषयजातिमत्त्वरूपस्य प्रत्यक्षयोग्यत्वस्य सत्त्वेऽपि लौकिकविषयतासंबन्धेन द्रव्यसमवेतविषयकप्रत्यक्षं प्रति स्वाधिकरणवृत्तित्वसंबन्धेन महत्त्वस्य कारणत्वात् परमाणुरूपे तेन संबन्धेन महत्त्वं नास्ति, परमाणोः महत्त्वाभावात् । अतः परमाणुरूपं न लौकिकप्रत्यक्षविषयः, घटादिगतरूपं तु महत्त्वसमानाधिकरणम्, अतः लौकिकप्रत्यक्षविषयः भवति ।

ननु बहिरिन्द्रियजन्यलौकिकप्रत्यक्षविषयजातिमद्विशेषगुणवत्त्वम् साधर्म्यम्

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

इति उक्तावपि पृथिव्यादिभूतान्तर्गते चक्षुरादौ अव्याप्तिः । चक्षुरादौ विद्यमानानां रूपादिविशेषगुणानाम् अनुद्भूतत्वेन बहिरिन्द्रियग्रहणायोग्यत्वात् इति आशङ्क्य **अथ वा** इति लक्षणान्तरम् उक्तम् इति आह – **ननु चक्षुरिन्द्रियादि** इत्यादिना । बहिरिन्द्रियजन्यलौकिकप्रत्यक्षं प्रति उद्भूतरूपत्वेनैव कारणतया कारणतावच्छेदकीभूतधर्मवत्त्वस्यैव योग्यतारूपत्वात् चक्षुरादिगते अनुद्भूतरूपे उद्भूतरूपत्वविरहात् न स्वरूपयोग्यत्वम् इति आशयेन उक्तम् – **ग्रहणायोग्यत्वात्** इति ।

ननु बहिरिन्द्रियजन्यलौकिकप्रत्यक्षस्वरूपयोग्यत्वं न लक्षणे निवेश्यते, किन्तु बहिरिन्द्रियजन्यलौकिकप्रत्यक्षविषयगुणत्वन्यूनवृत्तिजातिमत्त्वमेव लक्षणघटकम् । तथा च तथाविधरूपत्वादिजातेः चक्षुरादिरूपेऽपि सत्त्वेन न चक्षुरादौ अव्याप्तिः इति अस्वरसात् आह – **लाघवात् च** इति ।

अथ वा इति पक्षे आत्मावृत्तिविशेषगुणवत्त्वं भूतत्वम् । तच्च पञ्चभूतानां साधर्म्यम् । तत्र विशेषपदस्य पूर्वोक्तरीत्या संयोगादिरूपसामान्यगुणमादाय कालादौ अतिव्याप्तिवारणरूपं प्रयोजनं न संभवति । आत्मावृत्तिपदेन आत्मवृत्तितानवच्छेदधर्मवत् इत्यर्थविवक्षायां कालनिष्ठसंयोगे आत्मवृत्तितानवच्छेदकधर्मः नास्ति । संयोगत्वरूपधर्मस्य आत्मवृत्तितावच्छेदकत्वात्, संयोगस्य आत्मवृत्तित्वात् इति आशङ्कां निराकर्तुं विशेषपदस्य प्रयोजनान्तरम् आह – **अत्र च कल्पे** इति । तथा च आत्मावृत्तिः गुणः दैशिकं परत्वम् अपरत्वं च । तद्वत्त्वं मनसि अस्ति इति तत्र अतिव्याप्तिः, तद्वारणाय विशेषपदम् । परत्वमपरत्वं च न विशेषगुण इति न अतिव्याप्तिः । नित्ये मनसि कालिकपरत्वापरत्वयोः असंभवात् दैशिकपरत्वापरत्वम् इति उक्तम् ।

समवायेन स्पर्शवत्त्वम् इति । समवायेन इत्यनुक्तौ कालिकविशेषणतासंबन्धेन दैशिकविशेषणतासंबन्धेन च स्पर्शवतोः कालदिशोः अतिव्याप्तिः स्यात् । अतः समवायेन स्पर्शवत्त्वं विवक्षणीयम् इति भावः ।।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

।। क्षित्यप्तेजोवायूनां साधर्म्यवर्णनम् ।।

कारिकावली

द्रव्यारम्भः चतुर्षुः स्यात् ....

मुक्तावली

द्रव्यारम्भ इति । पृथिव्यप्तेजोवायुषु चतुर्षु द्रव्यारम्भकत्वम् । न च द्रव्यानारम्भके घटादौ अव्याप्तिः । द्रव्यसमवायिकारणवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात् ।।

दिनकरी

द्रव्यसमवायिकारण इत्यादि । सत्तादिकम् आदाय गगने अतिव्याप्तिवारणाय द्रव्यत्वव्याप्य इति ।।

राजीवोल्लासः

सत्तादिकम् आदाय इत्यादि । पृथिव्यप्तेजोवायूनां चतुर्णां द्रव्यारम्भकत्वं – द्रव्यजनकत्वं साधर्म्यम् इत्युक्तम् । तथा च सति द्रव्याजनके घटादौ अवयविनि अव्याप्तिः इति आशङ्क्य ''द्रव्यारम्भकत्वम्'' इत्यनेन द्रव्यसमवायिकारणवृत्ति-द्रव्यत्वव्याप्यजातिमत्त्वं विवक्षितम् इति उक्तम् । तत्र दलप्रयोजनम् उच्यते – द्रव्यसमवायिकारणं कपालादि । तद्वृत्तिः द्रव्यत्वव्याप्या जातिः पृथिवीत्वादिः । तद्वत्त्वस्य द्रव्यानारम्भके घटे सत्त्वात् लक्षणसमन्वयः । द्रव्यसमवायिकारणघटादिवृत्तिः या सत्तारूपा जातिः तद्वत्त्वस्य गगने सत्त्वात् तत्र अतिव्याप्तिः, तद्वारणाय जातौ ''द्रव्यत्वव्याप्य'' इति विशेषणम् । यद्यपि द्रव्यत्वमपि द्रव्यत्वव्याप्यजातिः, तद्वत्वस्य गगने सत्त्वात् अतिव्याप्तिः, तथापि पूर्वोक्तरीत्या जातौ द्रव्यत्वान्यत्वमपि विशेषणं देयम् । अथवा द्रव्यत्वव्याप्यत्वं द्रव्यत्वन्यूनवृत्तित्वम् । तच्च द्रव्यत्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वरूपम् द्रव्यत्वे नास्ति इति न तदादाय गगने अतिव्याप्तिः ।।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

।। आकाशात्मनोः साधर्म्यवर्णनम् ।।

कारिकावली

..............अथ आकाशशरीरिणाम् ।
अव्याप्यवृत्तिः क्षणिकः विशेषगुण इष्यते ।। २७ ।।

मुक्तावली

अथ आकाश इति । आकाशात्मनाम् अव्याप्यवृत्तिक्षणिकविशेषगुणवत्त्वं साधर्म्यम् इत्यर्थः ।

आकाशस्य विशेषगुणः शब्दः । स च अव्याप्यवृत्तिः । यदा किंचिदवच्छेदेन शब्दः उत्पद्यते, तदा अन्यावच्छेदेन तदभावस्यापि सत्त्वात् ।

क्षणिकत्वं च तृतीयक्षणवृत्तिध्वंसप्रतियोगित्वम् । योग्यविभुविशेषगुणानां स्वोत्तरवृत्तिविशेषगुणनाश्यत्वात् प्रथमशब्दस्य द्वितीयशब्देन नाशः ।

एवं ज्ञानादिकम् अपि । ज्ञानादिकं यदा आत्मनि विभौ शरीरावच्छेदेन उत्पद्यते, तदा घटाद्यवच्छेदेन तदभावः अस्त्येव । एवं ज्ञानादिकमपि क्षणद्वया-वस्थायि । इत्थं च अव्याप्यवृत्तिविशेषगुणवत्त्वं क्षणिकविशेषगुणवत्त्वं च अर्थः ।

दिनकरी

आकाशशरीरिणाम् इति मूले शरीरिपदम् आत्मपरम् इत्यभिप्रायेण आह – आकाशात्मनाम् इति । लक्ष्ये लक्षणं योजयितुं शब्दज्ञानादीनाम् अव्याप्यवृत्तित्वं क्षणिकत्वं च उपपादयति – आकाशस्य इत्यादिना । क्षणिकस्य विशेषगुणस्य अनभ्युपगमात् आह – क्षणिकत्वं च इति । घटादिव्यावृत्तये तृतीयक्षणवृत्ति इति । स्वोत्तरवृत्ति इति । स्वपदं नाश्यत्वाभिमतपरम् । तदुत्तरवृत्तिः – तद्द्वितीय-क्षणवृत्तिः यः विशेषगुणः तन्नाश्यत्वात् इत्यर्थः । अत्र च यत्र प्रतियोगितासंबन्धेन योग्यविभुविशेषगुणनाशः, तत्र स्वसामानाधिकरण्य-स्वाव्यवहितपूर्ववर्तित्वोभयसंबन्धेन

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

योग्यविशेषगुणः इति सामानाधिकरण्येन नाशकत्वं बोध्यम् । कार्यतावच्छेदके योग्यत्वोपादानेन प्रायश्चित्तादिजन्यादृष्टनाशे न व्यभिचारः । योग्यत्वं च लौकिकसाक्षात्कारविषयनिर्विकल्पकान्यतरत्वम्, अतीन्द्रियजातिशून्यत्वं वा । रूपादिनाशे व्यभिचारवारणाय ''विभु'' इति । संयोगादिनाशे व्यभिचारवारणाय ''विशेष'' इति । कारणतावच्छेदके योग्यत्वविशेषत्वयोः उपादानात् न द्वितीयक्षणोत्पन्नादृष्टसंयोगादिना तृतीयक्षणे अपेक्षाबुद्धिनाशः । सामानाधिकरण्यसंबन्धनिवेशात् न शब्दादिना व्यधिकरणानां ज्ञानेच्छादीनां नाशः । स्वाव्यवहितपूर्ववृत्तित्वसंबन्धनिवेशाच्च न ज्ञानादीनाम् उत्पत्तिकालिकेच्छादिना नाशः ।

केचित्तु – स्वत्वस्य तत्तद्व्यक्तिपर्यवसायितया तत्तद्गुणस्य तत्तद्गुणः नाशकः, अपेक्षाबुद्धेस्तु द्वित्वप्रत्यक्षम् इति – आहुः ।

परे तु – एतत्क्षणोत्पन्नयोग्यविभुविशेषगुणत्वेन नाश्यता, एतत्क्षणोत्तरक्षणवृत्तित्वविशिष्टगुणत्वेन नाशकता, अपेक्षाबुद्धिनाशे तु द्वित्वप्रत्यक्षविशेषसामग्री । चरमज्ञानादिकं तु उत्तरक्षणवृत्तित्वविशिष्टं स्वयमेव नाशकम् । एतत्क्षणोत्पन्नसकलविशेषगुणसाधारणं च इदम् इत्यपि – आहुः ।

शब्दस्याव्याप्यवृत्तित्वक्षणिकत्वे उपपाद्य ज्ञानादीनामपि ते उपपादयति – **एवम्** इति । क्षणिकपदस्य वैयर्थ्यात् लक्षणद्वयाभिप्रायेण अर्थम् आह – **इत्थं च** इति ।।

राजीवोल्लासः

मूले शरीरपदं आत्मपरम् इति । अथ **आकाशशरीरिणाम्** इत्यत्र शरीरिपदस्य यथाश्रुतार्थस्वीकारे शरीरवतां जीवात्मनाम् एव साधर्म्यम् उच्यत इति अर्थः स्यात्, वस्तुतः अशरीरस्य ईश्वरस्यापि साधर्म्यम् अत्र विवक्षितम् इति वक्ष्यमाणतया शरीरिपदं आत्मसामान्यपरम् इति भावः ।

क्षणिकस्य विशेषगुणस्य इति । एकक्षणमात्रवृत्तिविशेषगुणस्य इत्यर्थः ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

क्षणिकत्वं च तृतीयक्षणवृत्तिध्वंसप्रतियोगित्वम् इति मूले उक्तम् । तत्र ध्वंसे ''तृतीयक्षणवृत्ति'' इति विशेषणस्य प्रयोजनम् आह – घटादिव्यावृत्तये इति । तथा च ध्वंसप्रतियोगित्वं यदि क्षणिकत्वं तदा घटादिषु विद्यमानानां विशेषगुणानामपि ध्वंसप्रतियोगित्वात् क्षणिकविशेषगुणवत्त्वं घटादिषु अस्ति इति तत्र अतिव्याप्तिः स्यात् । तद्वारणाय तृतीयक्षणवृत्तिध्वंसप्रतियोगित्वम् इति उक्तम् । एतादृशं क्षणिकत्वं तु घटगतरूपादीनां नास्ति इति न अतिव्याप्तिः । न च – एवं विवक्षायाम् अपि यद्घटरूपादिकं तृतीयक्षणे नष्टं तद्घटे अतिव्याप्तिः इति – वाच्यम् । अस्य दोषस्य मुक्तावल्यामेव ''चतुःक्षणवृत्ति'' इत्यादिना समाधास्यमानत्वात् । **स्वपदम्** इत्यादि । ''योग्यविभुविशेषगुणानां स्वोत्तरवृत्तिविशेषगुणनाश्यत्वात्'' इत्यत्र ''स्व'' पदं नाश्यत्वाभिमतगुणपरम् । तदुत्तरवृत्तिः तद्द्वितीयक्षणवृत्तिः यः विशेषगुणः तन्नाश्यत्वात् – तदधीननाशप्रतियोगित्वात् इत्यर्थः । अत्र स्वत्वस्य अननुगतत्वेन तत्तद्व्यक्तिविश्रान्त एव कार्यकारणभावः इति तत्तद्व्यक्तिनाशं प्रति तत्तद्व्यक्तित्वेनैव कारणता युक्ता । तथा सति अनन्तकार्यकारणभावापत्या गौरवम् इति आशयेन अनुगतं कार्यकारणभावम् आह – **अत्र च** इत्यादिना ।

प्रतियोगितासंबन्धेन ज्ञाननाशः ज्ञानेऽस्ति, तत्रैव अनन्तरोत्पन्ना इच्छा स्वाव्यवहितपूर्वत्व–स्वसामानाधिकरण्योभयसंबन्धेन अस्ति । ज्ञानस्य इच्छाव्यवहितपूर्ववृत्तित्वात् इच्छाधिकरणात्मवृत्तित्वाच्च । कार्यतावच्छेदककोटौ विशेषगुणे योग्यत्वविशेषणानुपादाने प्रायश्चित्तजन्यादृष्टनाशे अन्वयव्यभिचारः । तथा हि – अदृष्टोत्पत्त्यव्यवहितोत्तरक्षणे उत्पन्नमपि ज्ञानादिकं न अदृष्टनाशकम्, किन्तु प्रायश्चित्तमेव । तथा च अदृष्टे स्वाव्यवहितपूर्वत्व-स्वसामानाधिकरण्योभयसंबन्धेन ज्ञानादिरूपविशेषगुणसत्त्वेऽपि प्रतियोगितासंबन्धेन नाशरूपकार्यानुत्पत्त्या अन्वयव्यभिचारः । अतः योग्यत्वनिवेशः । तन्निवेशे च अदृष्टस्य प्रत्यक्षायोग्यतया अदृष्टनाशस्य योग्यविशेषगुणनाशत्वरूपकार्यतावच्छेदकानाक्रान्ततया तदनुत्पत्तावपि

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

न क्षतिः । कारणसत्त्वे कार्यतावच्छेदकावच्छिन्नानुत्पत्तावेव अन्वयव्यभिचारात् । कार्यतावच्छेदकशरीरे "विभु" इति विशेषणानुपादाने रूपनाशे व्यतिरेकव्यभिचारः । घटादौ रूपोत्पत्त्यनन्तरक्षणे आत्मादौ विभुपदार्थे योग्यस्य ज्ञानादिविशेषणगुणस्य उत्पत्तावपि स स्वसामानाधिकरण्यसंबन्धेन रूपे नास्ति । तथा च तादृशसंबन्धेन योग्यविशेषगुणरूपनाशस्य रूपादौ सत्त्वेन व्यतिरेकव्यभिचारः । विभुपदोपादाने च रूपस्य विभुविशेषगुणत्वाभावेन रूपनाशे विशेषगुणनाशत्वरूपकार्यतावच्छेदकानाक्रान्तत्वात्, कारणं विना कार्यतावच्छेदकाक्रान्तोत्पत्तावेव व्यतिरेकव्यभिचारप्रसक्तेः न क्षतिः । तत्रैव विशेषपदानुपादाने योग्यविभुगुणस्य आत्मघटसंयोगस्य नाशे तदनन्तरोत्पन्नेन ज्ञानादिना अजन्ये अन्वयव्यभिचारः । कारणतावच्छेदकशरीरे योग्यत्वस्यानुपादाने अपेक्षाबुद्ध्यनन्तरोत्पन्नेन अदृष्टेन विभ्वात्मविशेषगुणेन तृतीयक्षणे अपेक्षाबुद्धेर्नाशानुत्पत्या अन्वयव्यभिचारः । एवं विशेषत्वानुपादाने अपेक्षाबुद्ध्यनन्तरक्षणोत्पन्नेन आत्मघटसंयोगादिना तृतीयक्षणे अपेक्षाबुद्धिनाशानुत्पत्या अन्वयव्यभिचारः । अतः योग्यत्वविशेषत्वयोः उपादानम् । अदृष्टस्य योग्यत्वविरहात् संयोगादेः विशेषगुणत्वविरहाच्च कारणतावच्छेदकानाक्रान्ततया नान्वयव्यभिचारः । योग्यविशेषगुणस्य रूपादेः स्वसामानाधिकरण्यसंबन्धेनाभावेऽपि प्रतियोगितासंबन्धेन ज्ञानादौ नाशोत्पत्या व्यतिरेकव्यभिचारस्य वारणाय कारणतावच्छेदकशरीरे विभ्विति विशेषणम् । स्वाव्यवहितपूर्वत्वसंबन्धेन ज्ञानानन्तरोत्पन्नशब्दादेः ज्ञाने सत्त्वेऽपि तत्र प्रतियोगितासंबन्धेन नाशानुत्पत्या अन्वयव्यभिचारवारणाय सामानाधिकरण्यसंबन्धनिवेशः । ज्ञाने सामानाधिकरण्यसंबन्धेन ज्ञानाव्यवहितपूर्वोत्पन्नेच्छायाः सत्वेऽपि नाशानुत्पत्या अन्वयव्यभिचारवारणाय स्वाव्यवहितपूर्वत्वसंबन्धनिवेश इति । स्वाव्यवहितपूर्वत्वं च स्वप्रागभावाधिकरणकालप्रागभावानधिकरणत्वे सति स्वप्रागभावाधिकरणत्वम् । स्वोत्तरकालस्य स्वाव्यवहितपूर्वत्वापत्तिवारणाय विशेष्यम् । स्वपूर्वतृतीयक्षणस्य स्वाव्यवहितपूर्वत्वापत्तिवारणाय सत्यन्तम् ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अत्र च अपेक्षाबुद्धिद्वितीयक्षणोत्पन्नपुरुषान्तरीयज्ञानादिना तृतीयक्षणे तन्नाश-वारणाय स्वसामानाधिकरण्यनिवेशः । अपेक्षाबुद्धिद्वितीयक्षणे च तत्पुरुषस्य न योग्यविशेषगुणोत्पादः इति सिद्धान्तः । ज्ञानादेः क्षणिकत्ववारणाय स्वाव्यवहितपूर्ववृत्तित्वरूपद्वितीयसंबन्धनिवेशः । **अदृष्टनाशे न व्यभिचार इति ।** न अन्वयव्यभिचारः इत्यर्थः ।

ननु योग्यत्वस्य लौकिकप्रत्यक्षविषयत्वरूपत्वेन निर्विकल्पकस्य तादृशयोग्यत्वविरहेण स्वोत्तरोत्पन्नज्ञानादिना नाशः न स्यात् इत्यतः योग्यतां निर्विकल्पकसाधारणतया निर्वक्ति – **योग्यत्वं च इति** । प्रकृतकार्यकारणभावघटकं योग्यत्वं लौकिकसाक्षात्कारविषयनिर्विकल्पकान्यतरत्वम् । अतः योग्यपदेन निर्विकल्पकस्यापि ग्रहीतुं शक्यतया तस्य स्वोत्तरोत्पन्नज्ञाननाश्यत्वं संभवति इति भावः ।

लाघवात् आह – **अतीन्द्रिय इति** । निर्विकल्पकत्वं तु न जातिः । निष्प्रकारकत्वविशिष्टज्ञानत्वस्यैव निर्विकल्पकत्वरूपत्वात् । तद्घटकज्ञानत्वजातेः अतीन्द्रियत्वविरहात् । तथा च अतीन्द्रियजातिशून्यत्वरूपं योग्यत्वं निर्विकल्पकेऽपि अक्षतम् इति भावः ।

रूपादिनाशे व्यभिचारवारणाय इति । व्यतिरेकव्यभिचारवारणाय इत्यर्थः । एवं **संयोगादिनाशे व्यभिचारवारणाय** इत्यत्रापि व्यतिरेकव्यभिचारवारणाय इत्यर्थः ।

व्यधिकरणानाम् इति । इदं च समानाधिकरणगुणानामेव नाशकत्वम् इति वस्तुगतिमनुरुध्य उक्तम् । व्यधिकरणशब्देन ज्ञानेच्छादीनां नाशेऽपि ज्ञानेच्छादेः द्विक्षणावस्थायित्वनिर्वाहेण इष्टापत्तिसंभवात् । अतः पूर्वोक्तरीत्यैव सामानाधिकरण्यसंबन्धनिवेशस्य प्रयोजनं द्रष्टव्यम् ।

उत्पत्तिकालिकेच्छादिना इति । पूर्वक्षणोत्पन्नेच्छादिना इत्यर्थः । "ज्ञानादिना उत्पत्तिकाले इच्छादीनां नाशः" इति पाठः । "ज्ञानोत्तरम् इच्छा" इति सर्वत्र

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

संभवात् एष वरीयान्'' इति **सुबोधिनीकाराः** । अपेक्षाबुद्धिनाशं प्रति तृतीय-क्षणोत्पन्नद्वित्वनिर्विकल्पकव्यक्तीनां तत्तद्व्यक्तित्वेन कारणत्वे अनन्तकार्यकारण-भावापत्त्या गौरवात् तत्र द्वित्वप्रत्यक्षत्वरूपेण एककारणताया अपि वक्तुं शक्यत्वेन गौरवस्वीकारस्य अनौचित्यात् इत्याशयेन आह – **अपेक्षाबुद्धेः तु इति** ।

चरमज्ञानादिकं तु इति । अत्र कार्यकारणभावानन्त्यप्रयुक्तगौरवम् ''आहुः'' इत्यनेन सूचितम् । चरमज्ञानस्य नाशकं गुणान्तरं न अपेक्षितम् । किन्तु उत्तरक्षण-वृत्तित्वविशिष्टं चरमज्ञानमेव स्वस्य नाशकम् । **इदम् इति** । एतत्क्षणोत्पन्नयोग्य-विभुविशेषगुणत्वम् इत्यर्थः ।।

मुक्तावली

पृथिव्यादौ रूपादिः विशेषगुणः अस्ति इति अतः **''अव्याप्यवृत्ति''** इति उक्तम् । पृथिव्यादौ अव्याप्यवृत्तिः संयोगादिः अस्ति इति **''विशेषगुण''** इति उक्तम् ।

न च – रूपादीनामपि कदाचित् तृतीयक्षणे नाशसंभवात् क्षणिकविशेषगुणवत्त्वं क्षित्यादौ अतिव्याप्तम् इति – वाच्यम् । **चतुःक्षणवृत्तिजन्यावृत्तिजातिमद्विशेषगुण-वत्त्वस्य तदर्थत्वात्** ।

अपेक्षाबुद्धिः क्षणत्रयं तिष्ठति । क्षणचतुष्टयं तु न किमपि जन्यज्ञानादिकं तिष्ठति । **रूपत्वादिकं** तु क्षणचतुष्टयस्थायिन्यपि रूपादौ वर्तते इति **तद्व्युदासः** । **ईश्वरज्ञानस्य** चतुःक्षणवृत्तित्वात् ज्ञानत्वस्य तद्वृत्तित्वात् ''जन्य'' इत्युक्तम् । **यदि आकाशजीवात्मनोः** साधर्म्यं तदा ''जन्य'' इति न देयम् । **द्वेषत्वादिकम्** आदाय लक्षणसमन्वयात् । **परममहत्त्वस्य** तादृशगुणत्वात् **चतुर्थक्षणे द्वित्वादीनां** नाशाभ्युपगमात् द्वित्वादीनामपि **तथात्वात्** तद्वारणाय ''विशेष'' इति । त्रिक्षणवृत्तित्वं वा वक्तव्यम् । इच्छात्वादिकम् आदाय आत्मनि लक्षणसमन्वयः ।।

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

दिनकरी

अव्याप्यवृत्ति इति उक्तम् इति । न च – रूपादीनामपि **कालिकाव्याप्यवृत्तित्वात्** कथं तद्वारणम् इति – वाच्यम् । अव्याप्यवृत्तिपदेन दैशिकाव्याप्यवृत्तित्वस्य उक्तत्वात् । **विशेषगुण इति उक्तम् इति** । विशेषगुणाश्च—

"बुद्ध्यादिषट्कं स्पर्शान्ताः स्नेहः सांसिद्धिको द्रवः ।
अदृष्टभावनाशब्दा अमी वैशेषिका गुणाः ॥"

इति वक्ष्यमाणाः । तल्लक्षणं तु गुणनिरूपणे वक्ष्यते ।

यत्तु अव्याप्यवृत्तिविशेषगुणवत्त्वम् ईश्वरे अव्याप्तम्, तद्गुणानां व्याप्यवृत्तित्वात् इति, तन्न । अव्याप्यवृत्तिपदेन अव्याप्यवृत्तिवृत्तिगुणत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात् । **चतुःक्षणवृत्ति इति** । चतुःक्षणवृत्तीनि यानि जन्यानि घटादीनि तदवृत्तिर्या जातिः ज्ञानत्वादिः तद्वान् विशेषगुणः ज्ञानादिः तद्वत्त्वस्य आत्मादौ सत्त्वात् लक्षणसमन्वयः । **अत्र च वृत्तित्वं समवायेन** विवक्षितम् । तेन जन्यमात्रे कालिकेन ज्ञानत्वस्य वृत्तित्वेऽपि न क्षतिः । वृत्त्यन्तं च ज्ञानत्वादेः जन्यवृत्तित्वात् असंभववारणाय । **तदर्थत्वात् इति** । क्षणिकविशेषगुणवत्त्वार्थत्वात् इत्यर्थः ।

ननु त्रिक्षणवृत्तित्वम् उपेक्ष्य चतुःक्षणवृत्तित्वपर्यन्तानुधावने प्रयोजनाभावः । न च – त्रित्वचतुष्ट्वयोः लाघवगौरवविरहेण चतुष्ट्वोपादाने इच्छैव नियामिका इति – वाच्यम् । प्रथमोपस्थितत्वरूपलाघवस्य त्रित्वे संभवात्, अत आह – **अपेक्षाबुद्धिः इति** । तथा च त्रिक्षणवृत्तित्वस्य प्रवेशे ज्ञानत्वस्य **संग्रहः न स्यात्** इति भावः । "चतुःक्षणवृत्तिजन्यावृत्ति" इत्यस्य फलम् आह – **रूपत्वादिकं तु इति** । **तद्व्युदासः** – रूपत्वजातिव्युदासः । तथा च रूपत्वजातिमद्विशेषगुणवति घटादौ या अतिव्याप्तिः सा निरस्ता इति भावः । "जन्य" इत्यस्य फलम् आह – **ईश्वर इति** । "शरीरिणाम्" इत्यत्र मूले शरीरिपदस्य यथाश्रुतार्थकत्वाभिप्रायेण आह – **यदि आकाशजीवात्मनोः इति** । ननु जन्यत्वाप्रवेशे ज्ञानत्वेच्छात्व-

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

प्रयत्नत्वजातीनां चतुःक्षणवृत्यवृत्तित्वाभावात् कथं लक्षणसमन्वयः इति, अत आह – **द्वेषत्वादिकम्** इति । ''आदि'' ना शब्दत्वपरिग्रहः । **विशेषपदस्य** कृत्यम् आह – **परममहत्त्वस्य** इति । **तादृशगुणत्वात्** इति । चतुःक्षणवृत्तिजन्यावृत्तिजातिमद्गुणत्वात् इत्यर्थः । **ननु परममहत्त्वत्वं न जातिः,** किं तु अपकर्षानाश्रयपरिमाणत्वम् इति उक्तम् । तथा च कथं तदादाय अतिप्रसङ्ग इति, अत आह – **चतुर्थक्षणे द्वित्वादीनाम्** इति । **यद्वा** – ननु जन्यपदानुपादाने परममहत्त्वत्वस्य चतुःक्षणवृत्तिवृत्तित्वात् न परममहत्त्वमादाय कालादौ अतिव्याप्तिः, अत आह – **चतुर्थक्षण** इति । **द्वित्वादीनाम्** इति । **तथात्वात्** इति । **तादृशजातिमद्गुणत्वात्** इत्यर्थः । **प्रथमोपस्थितत्वरूपलाघवम्** अभिसन्धाय आह – **त्रिक्षण** इति ॥

राजीवोल्लासः

कालिकाव्याप्यवृत्तित्वात् इति । किञ्चित्कालावच्छेदेन स्वाधिकरणवृत्तित्व–स्वप्रतियोगित्वोभयसंबन्धेन अभावविशिष्टत्वम् कालिकाव्याप्यवृत्तित्वम् । स्वं – रूपाभावः । उत्पत्तिक्षणावच्छेदेन स्वाधिकरणं घटः । तद्वृत्तित्वं द्वितीयक्षणावच्छेदेन रूपे वर्तते । स्वं – रूपाभावः तत्प्रतियोगित्वं च रूपे वर्तते । अतः एतदुभयसंबन्धेन रूपाभावविशिष्टत्वात् रूपस्य कालिकाव्याप्यवृत्तित्वम् ।

यत्तु इति । अव्याप्यवृत्तिविशेषगुणवत्त्वम् आकाशात्मनां साधर्म्यम् इत्युक्ते ईश्वररूपात्मनि लक्षणस्य अव्याप्तिः । ईश्वरे विद्यमानानां ज्ञानादिविशेषगुणानां व्याप्यवृत्तित्वात् इति शङ्का –

समाधानं तु – अव्याप्यवृत्तिपदेन अव्याप्यवृत्तिवृत्तिगुणत्वव्याप्यजातिमत्त्वं विवक्षितम् । तथा च अव्याप्यवृत्तिपदार्थे वर्तमाना या गुणत्वव्याप्यजातिः तद्वद्विशेषगुणवत्त्वं शरीरात्मनां साधर्म्यम् । अव्याप्यवृत्तयः जीवगताः ज्ञानादयः तद्वृत्तिः गुणत्वव्याप्या जातिः ज्ञानत्वेच्छात्वादिः । तद्वान् विशेषगुणः नित्यज्ञानेच्छादिः । तद्वत्त्वम् ईश्वरेऽस्तीति न अव्याप्तिः ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अत्र च वृत्तित्वम् इति । ''चतुक्षणवृत्तिजन्यावृत्ति'' इत्यत्र चतुक्षण-वृत्तिजन्यनिरूपितसमवायसंबन्धावच्छिन्नवृत्तित्वाभाववत्त्वं विवक्षणींयम् । अन्यथा चतुःक्षणवृत्तीनि या जन्यानि घटादीनि कालिकसंबन्धेन तद्वृत्तित्वमेव ज्ञानत्वादिजातौ अस्ति इति तदवृत्तिजातिमतः विशेषगुणस्य अप्रसिद्ध्या लक्षणस्य असंभवः स्यात् । समवायसंबन्धावच्छिन्नवृत्तित्वाभावोक्तौ तु चतुःक्षणवृत्तिषु जन्येषु घटादिषु ज्ञानत्वादिजातेः कालिकसंबन्धेन वृत्तित्वेऽपि समवायसंबन्धेन वृत्तित्वाभावात् ज्ञानत्वादिजातीनामपि चतुःक्षणवृत्तिजन्यावृत्तितया तद्वद्विशेषगुणस्य ज्ञानादेः प्रसिद्ध्या न असंभवः । तथा च **''वृत्तित्वं समवायेन''** इत्यस्य ''जन्यावृत्तित्वप्रतियोगिभूतं जन्यवृत्तित्वं समवायसंबन्धावच्छिन्नम्'' इत्यर्थः । **न क्षतिः** इति । न असंभव इत्यर्थः ।

''चतुःक्षणवृत्ति'' इत्यस्य फलम् आह – **वृत्यन्तं च** इति । तथा च ''चतुःक्षणवृत्ति'' इत्यस्य अनुपादाने जन्यावृत्तिजातिमद्विशेषगुणवत्त्वम् इत्येतावन्मात्रोक्तौ ज्ञानत्वादिजातेः जीवात्मगतजन्यज्ञानादिवृत्तित्वात् ज्ञानादिकम् आदाय लक्षणं न संभवेत् । अतः ''चतुःक्षणवृत्ति'' इति जन्यविशेषणम् । चतुः क्षणवृत्तिजन्यं तु न ज्ञानादिकम्, तस्य द्विक्षणमात्रवृत्तित्वात् । अपि तु घटादिकमेव । तदवृत्तित्वं ज्ञानत्वादौ अस्ति इति न असंभवः । **सङ्ग्रहः न स्यात्** इति । अनेन ज्ञानत्वम् आदाय आत्मनि लक्षणसमन्वयार्थमेव त्रिक्षणवृत्तित्वम् उपेक्ष्य चतुःक्षणवृत्तित्वं लक्षणे निवेशितम् । इच्छात्वम् आदाय लक्षणसमन्वये तु ''त्रिक्षणवृत्ति'' इत्यपि शक्यते वक्तुम् इति सूचितम् ।

यथाश्रुतार्थकत्वाभिप्रायेण इति । शरीरविशिष्टार्थकत्वाभिप्रायेण इत्यर्थः । **चतुःक्षणवृत्त्यवृत्तित्वाभावात्** इति । चतुःक्षणावृत्तिजातिमद्विशेषगुणवत्त्वम् आकाशजीवात्मनोः साधर्म्यम् इत्युक्तौ ज्ञानेच्छाप्रयत्नान् आदाय जीवात्मनि समन्वयः न संभवति । तद्गतानां ज्ञानत्व-इच्छात्व-प्रयत्नत्वजातीनां चतुःक्षणवृत्तिषु ईश्वरगतज्ञानेच्छाप्रयत्नेषु वर्तमानतया चतुःक्षणवृत्त्यवृत्तित्वाभावात् इति भावः ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

द्वेषत्वादिकम् इति । ईश्वरे द्वेषाभावात् द्वेषत्वं चतुःक्षणवृत्तिज्ञानेच्छाप्रयत्नावृत्तिरेव । तद्वान् विशेषगुणः द्वेषः तद्वत्त्वम् जीवे अस्ति इति लक्षणसमन्वयः ।

विशेषपदस्य इति । चतुःक्षणवृत्तिजन्यावृत्तिः या जातिः परममहत्त्वत्वरूपा जातिः तद्वान् गुणः परममहत्त्वम् । तद्वत्त्वस्य कालादौ सत्त्वात् तत्र अतिव्याप्तिः, तद्वारणाय विशेषपदम् । परममहत्त्वं तु न विशेषगुण इति तदादाय न अतिव्याप्तिः ।

ननु परममहत्वत्त्वं न जातिः इति । विशेषपदानुपादानेऽपि परममहत्त्वम् आदाय कालादौ न अतिव्याप्तिप्रसक्तिः । परममहत्त्वत्वाख्यजातेः अनङ्गीकारात् । चतुःक्षणवृत्ति-जन्यावृत्तिजातिमत्त्वस्य परममहत्त्वे अभावात् । परममहत्त्वत्वं तावत् अपकर्षानाश्रयपरिमाणत्वम्, न तु जातिः इति आशङ्क्य विशेषपदानुपादाने परममहत्त्वम् आदाय अतिव्याप्त्यभावेऽपि द्वित्वादिगुणान् आदाय कालादौ अतिव्याप्तिः । तथा हि – चतुःक्षणवृत्तीनि यानि जन्यानि घटादीनि तदवृत्तिः या जातिः द्वित्वत्वादिः तद्वान् यः गुणः द्वित्त्वादिः, तद्वत्वस्य कालादौ सत्त्वात् । काले हि कालघटद्वित्वं वर्तते । अतः विशेषपदोपादानम् । द्वित्वादिकं तु न विशेषगुण इति न दोषः । जन्यपदानुपादानपक्षे परममहत्त्वत्वस्य जातिरूपत्वेऽपि परममहत्त्वम् आदाय कालादौ अतिव्याप्तिः न संभवति । परममहत्त्वत्वस्य चतुःक्षणवृत्तिपरममहत्त्ववृत्तित्वात् तस्य चतुःक्षणवृत्त्यवृत्तित्वाभावात् । किन्तु द्वित्वादिकम् आदाय अतिव्याप्तिवारणाय विशेषपदोपादानम् इति आशयेन आह – यद्वा इति । तादृशजातिमद्गुणत्वात् इति । चतुःक्षणवृत्त्यवृत्तिजातिमद्गुणत्वात् इत्यर्थः ।

प्रथमोपस्थितत्वरूपलाघवम् इति । चतुःक्षणापेक्षया त्रिक्षणस्य प्रथमोपस्थितत्वात् तदनुसारेण त्रिक्षणवृत्त्यवृत्तिजातिमद्विशेषगुणवत्त्वम् साधर्म्यम् इति भावः ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

।। पृथिव्यप्तेजसां साधर्म्यवर्णनम् ।।

कारिकावली

रूपद्रवत्वप्रत्यक्षयोगिनः प्रथमास्त्रयः ।

मुक्तावली

रूपद्रवत्व इति । पृथिव्यप्तेजसां रूपवत्त्वं द्रवत्ववत्त्वं प्रत्यक्षविषयत्वं च इत्यर्थः । **न च – चक्षुरादीनां** भर्जनकपालस्थवह्नेः ऊष्मणश्च रूपवत्त्वे किं मानम् इति – वाच्यम् । **तत्रापि** तेजस्त्वादिना रूपानुमानात् । एवं वाय्वानीत-पृथिवीजलतेजोभागानामपि पृथिवीत्वादिना रूपानुमानं बोध्यम् ।

न च – घटादौ द्रुतसुवर्णादिभिन्ने तेजसि च द्रवत्ववत्त्वम् अव्याप्तम् इति – वाच्यम् । द्रवत्ववद्वृत्ति-द्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात् । **घृतजतु**प्रभृतिषु पृथिवीषु जलेषु द्रुतसुवर्णादौ तेजसि च द्रवत्वसत्त्वात् तत्र च पृथिवीत्वादिसत्त्वात् तदादाय सर्वत्र लक्षणसमन्वयः ।

न च – प्रत्यक्षविषयत्वं परमाण्वादौ अव्याप्तम्, **अतिव्याप्तं च** रूपादौ इति – वाच्यम् । **चाक्षुषलौकिक**प्रत्यक्षविषयवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात् । आत्मनि अतिव्याप्तिवारणाय **चाक्षुष** इति ।।

दिनकरी

चक्षुरादीनाम् इत्यादिना घ्राणादिपरिग्रहः । **तत्रापि** - चक्षुरादिषु अपि । पृथिवीत्वादौ द्रवत्ववद्वृत्तित्वम् उपपादयति – **घृतजतु** इत्यादिना । योगिप्रत्यक्षविषयत्वात् आह – **अतिव्याप्तं च** इति । "**घटः वायुमान्**" इति वाय्वंशे उपनीतभानात्मकघटविशेष्यकचाक्षुषविषयवायुवृत्तिद्रव्यत्वव्याप्यवायुत्व-जातिमति वायौ अतिव्याप्तिवारणाय **लौकिक** इति ।।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

राजीवोल्लासः

पृथिव्यप्तेजसां प्रत्यक्षविषयत्वं साधर्म्यम् इति उक्तम् । तत् पृथिव्यादिपरमाणुषु अव्याप्तम् । परमाणूनां प्रत्यक्षविषयत्वाभावात् । एवम् अलक्ष्येषु रूपादिषु अपि प्रत्यक्षविषयत्वसत्त्वात् अतिव्याप्तं च इति **मुक्तावल्याम्** उक्तम् । तत्र प्रथमदोषं विहाय द्वितीयदोषकथने हेतुम् आह – **योगिप्रत्यक्षविषयत्वात्** इति । परमाणुषु अस्मदीयप्रत्यक्षविषयत्वाभावेऽपि योगिप्रत्यक्षविषयत्वसत्त्वात् प्रत्यक्षविषयत्वं न अव्याप्तम् इति आलोच्य रूपादौ अतिव्याप्तिः उक्ता इति भावः ।

चाक्षुषलौकिकप्रत्यक्षविषयवृत्तिद्रव्यत्वव्याप्यजातिमत्वस्य विवक्षितत्वात् इति **मुक्तावली** । चक्षुरिन्द्रियजन्यलौकिकप्रत्यक्षविषयवृत्तिः द्रव्यत्वव्याप्या या जातिः तद्वत्त्वं पृथिव्यप्तेजसां साधर्म्यतया उक्तं प्रत्यक्षविषयत्वम् इत्यर्थः । तत्र द्रव्यत्वव्याप्यजातिमत्वमात्रोक्तौ द्रव्यत्वव्याप्यवायुत्वजातिम् आदाय वायौ अतिव्याप्तिः । तद्वारणाय चाक्षुषलौकिकप्रत्यक्षविषयेति जातिविशेषणम् । वायुत्वं तु न चाक्षुषलौकिकप्रत्यक्षविषयवृत्ति । सत्ताजातिमादाय वाय्वादौ अतिव्याप्तिवारणाय द्रव्यत्वव्याप्येति जातिविशेषणम् । मानसप्रत्यक्षविषयवृत्त्यात्मत्वजातिम् आदाय आत्मनि अतिव्याप्तिवारणाय चाक्षुष इति । तत्र लौकक्किपदस्य प्रयोजनम् आह – **घटो वायुमान्** इति । ''घटः वायुमान्'' इत्याकारकं वाय्वंशे ज्ञानलक्षणप्रत्यासत्तिरूपालौकिकसन्निकर्षजन्यं घटांशे लौकिकचाक्षुषं च घटविशेष्यकवायुविशेषणकप्रत्यक्षं, तद्विषयः वायुः, तद्वृत्तिवायुत्वजातिमत्त्वस्य वायौ सत्त्वात् अतिव्याप्तिः, तद्वारणाय **लौकिकप्रत्यक्षविषय** इति उक्तम् । यद्यपि ''लौकिक'' इति विशेषणे दत्तेऽपि ''घटः वायुमान्'' इति प्रत्यक्षस्य घटांशे लौकिकत्वस्य सत्त्वात् पूर्वोक्तरीत्या वायौ अतिव्याप्तिः, अथापि लौकिकत्वं न प्रत्यक्षविशेषणम् । किन्तु प्रत्यक्षविषयतायां विशेषणम् । तथा च चाक्षुषप्रत्यक्षनिरूपितलौकिकविषयतावद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वं लक्षणतया विवक्षितम् ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

''घटः वायुमान्'' इति चाक्षुषप्रत्यक्षनिरूपितलौकिकविषयतावान् वायुः न भवति । किन्तु घटादिरेव । तद्वृत्तिद्रव्यत्वव्याप्यजातिः पृथिवीत्वादिकमेव । तद्वत्त्वं वायौ नास्ति इति न अतिव्याप्तिः ।

मूले – तत्रापि तेजस्त्वादिना रूपानुमानात् इति । तत्रापि – चक्षुरादिषु अपि । रूपानुमानप्रकारश्च – ''चक्षुरिन्द्रियवाय्वानीततेजोभागभर्जनकपालस्थ-वह्न्यूष्माणः, रूपवन्तः, तेजस्त्वात्'' इति । एवं ''घ्राणेन्द्रियवाय्वानीतपृथिवीभागौ रूपवन्तौ पृथिवीत्वात्'', ''रसनेन्द्रियवाय्वानीतजलभागौ रूपवन्तौ, जलत्वात्'', इत्यादयः अनुमानप्रयोगाः ऊह्याः ।।

।। पृथिवीजलयोः पृथिवीतेजसोः च साधर्म्यवर्णनम् ।।

कारिकावली

गुरुणी द्वे रसवती, द्वयोः नैमित्तिको द्रवः ।। २८ ।।

मुक्तावली

गुरुणी इति । **गुरुत्ववत्त्वं** रसवत्त्वं च पृथ्वीजलयोः इत्यर्थः । न च – घ्राणेन्द्रियादीनां वाय्वानीतपार्थिवादिभागानां च रसादिमत्त्वे किं मानम् इति – वाच्यम् । तत्रापि पृथ्वीत्वादिना तदनुमानात् ।

द्वयोः इति । पृथिवीतेजसोः इत्यर्थः । न च नैमित्तिकं द्रवत्वं घटादौ वह्न्यादौ च अव्याप्तम् इति – वाच्यम् । नैमित्तिकद्रवत्वसमानाधिकरणद्रव्यत्वव्याप्य-जातिमत्त्वस्य विवक्षितत्वात् ।।

दिनकरी

गुरुत्ववत्त्वम् इति । गुरुत्वं रक्तिकमाषकतोलकत्वादि । इदम् उपलक्षणम् ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

पतनवत्त्वम् इत्यपि बोध्यम् । पतनत्वं गुरुत्वासमवायिकारणककर्मत्वम् । "उल्का पतति" इत्यादिप्रयोगस्तु लाक्षणिकः । वस्तुतस्तु गुरुत्वासमवायिकारण-कर्मवृत्तिपतनत्वं जातिविशेष एव ।।

राजीवोल्लासः

पतनत्वं निर्वक्ति – गुरुत्व इति । गुरुत्वासमवायिकारणकं कर्म पतनम् इति उच्यते । न च – परमाणूनां सर्वदा पतनापत्त्या प्रकृष्टगुरुत्वस्यैव पतनासमवायि-कारणत्वेन अङ्गीकरणीयतया परमाणौ तदभावेन पतनासंभवात् अव्याप्तिः इति – वाच्यम् । पतनवद्वृत्ति- द्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षणीयत्वात् इति भावः ।

ननु एवमपि "उल्का पतति" इति प्रयोगानुपपत्तिः । तेजोरूपोल्कायां गुरुत्वाभावेन पतनासंभवात् इति, अत आह – **उल्का** इति । **लाक्षणिक** इति । "गम" धात्वर्थ इत्यादिः । लाघवम् अभिप्रेत्य आह – **वस्तुतस्तु** इति । **जातिविशेष एव** इति । गुरुत्वजन्यतावच्छेदकतयैव तत्सिद्धिः इति भावः इति तरङ्गिणीकाराः ।।

।। भूतात्मनोः साधर्म्यवर्णनम् ।।

कारिकावली

आत्मानः भूतवर्गाश्च विशेषगुणयोगिनः ।

मुक्तावली

आत्मान इति । पृथिव्याप्तेजोवाय्वाकाशात्मनां विशेषगुणवत्त्वम् इत्यर्थः ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ वैधर्म्यनिरूपणम् ॥

कारिकावली

यदुक्तं यस्य साधर्म्यं वैधर्म्यमितरस्य तत् ॥ २९ ॥

मुक्तावली

यदुक्तम् इति । ज्ञेयत्वादिकं विहाय इति बोध्यम् । तत्तु न कस्यापि वैधर्म्यम्, केवलान्वयित्वात् ॥

दिनकरी

ननु सप्तानामपि साधर्म्यं ज्ञेयत्वम् तत् कस्य वैधर्म्यम्? इति आशङ्कायाम् आह – ज्ञेयत्वादिकम् इति ॥

राजीवोल्लासः

ननु मूले ''यदुक्तं यस्य साधर्म्यं वैधर्म्यम् इतरस्य तत्'' इति सामान्यतः अभिधानम् अयुक्तम् । सप्तपदार्थानां साधर्म्ये ज्ञेयत्वादौ तदितराप्रसिद्ध्या तदितरवैधर्म्यत्वाभावात् इति शङ्काम् अपनेतुं मुक्तावल्यां ज्ञेयत्वादिकं विहाय इति पूरयति इति आह – ननु इत्यादि ॥

॥ सामान्यतः द्रव्यगुणवर्णनम् ॥

कारिकावली

स्पर्शादयोऽष्टौ वेगाख्यः संस्कारो मरुतो गुणाः ।
स्पर्शाद्यष्टौ रूपवेगौ द्रवत्वं तेजसो गुणाः ॥ ३० ॥

स्पर्शादयोऽष्टौ वेगश्च द्रवत्वं च गुरुत्वकम् ।
रूपं रसस्तथा स्नेहो वारिण्येते चतुर्दश ॥ ३१ ॥

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

स्नेहहीना गन्धयुता क्षिताबेते चतुर्दश ।
बुद्ध्यादिषट्कं संख्यादिपञ्चकं भावना तथा ॥ ३२ ॥

धर्माधर्मौ गुणा एते आत्मनः स्युश्चतुर्दश ।
संख्यादिपञ्चकं कालदिशोः शब्दश्च ते च खे ॥ ३३ ॥

संख्यादिपञ्चकं बुद्धिरिच्छा यत्नोऽपि चेश्वरे ।
परापरत्वे संख्याद्याः पञ्च वेगश्च मानसे ॥ ३४ ॥

मुक्तावली

स्पर्शादय इति । ते च – संख्यादिपञ्चकम् । खे – आकाशे ॥

दिनकरी

"वायोर्नवैकादश तेजसो गुणा जलक्षितिप्राणभृतां चतुर्दश ।
दिक्कालयोः पञ्च षडेव चाम्बरे महेश्वरेऽष्टौ मनसस्तथैव च ॥"

इति प्राचीनश्लोकम् अनुसृत्य वायोः तावत् गुणान् आह – मूले **स्पर्शादयोऽष्टौ** इति । स्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वानि अष्टौ वेगाख्यसंस्कारश्च वायोः गुणाः इत्यर्थः । तेजसः गुणान् आह – **स्पर्शाद्यष्टौ** इति । अपां गुणान् आह – **स्पर्शादयोऽष्टौ** इति । पृथिव्याः गुणान् आह – **स्नेहहीना** इति । एते- अव्यवहितपूर्वोक्ताः । आत्मनः गुणान् आह – **बुद्ध्यादिषट्कम्** इति । बुद्धिसुखदुः- खेच्छाद्वेषप्रयत्नाः, **संख्यादिपञ्चकं** – संख्यापरिमाणपृथक्त्वसंयोगविभागाः । कालदिशोः गुणानाम् ऐक्यात् एकोक्त्यैव आह – **संख्यादि पञ्चकम्** इति । आकाशस्य गुणान् आह – **शब्दश्च** इति । तथा च आकाशे शब्दः संख्यादयः पञ्च एवं षड्गुणा इत्यर्थः । ईश्वरस्य गुणान् आह – **संख्यादि** इति ।

अत्र नव्याः – ईश्वरस्य परिमाणवत्त्वे प्रमाणाभावः । न च – द्रव्यत्वेन तदनुमानम् इति – वाच्यम् । अप्रयोजकत्वात्; ईश्वरे द्रव्यत्वसत्त्वे मानाभावाच्च । अत एव तत्र संयोगविभागयोः सत्त्वेऽपि मानाभावः । पृथक्त्वस्य च गुणत्वमेव

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

निरस्तम् । यथा च ईश्वरे सुखसंभवः तथा अग्रे व्यक्तीभविष्यति । एवं च संख्याबुद्धीच्छाप्रयत्नसुखानीति पञ्चैव ईश्वरस्य गुणाः इति – आहुः ।।

राजीवोल्लासः

ईश्वरे संख्या-परिमाण-पृथक्त्व-संयोग-विभाग-बुद्धि-इच्छा-प्रयत्नाः अष्टौ गुणाः सन्ति इति **''संख्यादिपञ्चकं बुद्धिः इच्छा यत्नः अपि च ईश्वरे''** इति मूले उक्तम् । तत्र ईश्वरे केचन गुणाः न सन्ति इति वदतां नव्यानां मतम् आह – **अत्र नव्याः** इत्यादिना । ईश्वरे परिमाणं नास्ति, प्रमाणाभावात् । न च – ''ईश्वरः परिमाणवान्, द्रव्यत्वात्, घटादिवत्'' इति अनुमानेन ईश्वरे परिमाणसिद्धिः इति – वाच्यम् । उक्तानुमाने अनुकूलतर्कविरहात् । ईश्वरे द्रव्यत्वम् अस्तु, परिमाणं मास्तु इति शङ्कायां तद्वारकः तर्कः दुर्वचः । जन्यपरिमाणं प्रति द्रव्यस्य कारणत्वेऽपि परिमाणत्वावच्छिन्नं प्रति द्रव्यत्वावच्छिन्नस्य कारणत्वाभावात् कार्यकारणभावरूपस्य अनुकूलतर्कस्य अभावात् ।

ननु द्रव्यत्वं यदि परिमाणव्यभिचारि स्यात्–परिमाणं विनापि स्यात्, तर्हि निरूपाधिकं न स्यात् – निरूपाधिकम् इति व्यवहारविषयः न स्यात् । व्यभिचारिणः सोपाधिकत्वनियमात् इति अनुकूलतर्कसहकृतेन पूर्वोक्तानुमानेन ईश्वरेऽपि परिमाणसिद्धिः निष्प्रत्यूहैव । अन्यथा कालदिशोरपि परिमाणासिद्धिप्रसङ्गात् इति – वाच्यम् । ईश्वरे द्रव्यत्वरूपहेतुसत्त्वे एव प्रमाणाभावात्, द्रव्यत्वेन परिमाणानुमानासंभवात् । **अत एव** – ईश्वरे द्रव्यत्वे प्रमाणाभावादेव ईश्वरे संयोगविभागौ अपि न स्तः । द्रव्यत्वेनैव हि ईश्वरे संयोगविभागौ साधनीयौ । एवं पृथक्त्वं गुण एव न भवति । तस्य अन्योन्याभावरूपत्वात् । अतः पृथक्त्वाख्यः गुणोऽपि ईश्वरे नास्ति । एवं च संख्या-बुद्धि-इच्छा-प्रयत्न-सुखानीति पञ्चैव ईश्वरस्य गुणाः इति नव्यानां मतम् ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

तथा अग्रे व्यक्तीभविष्यति इति । आत्मनिरूपणे वेदान्तिमत-प्रस्तावे । (नित्यं) ''विज्ञानम् आनन्दं ब्रह्म'' इति, ''आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चन'' – इत्यादिश्रुतिभिः ईश्वरे नित्यसुखसिद्धेः इति भावः ।

आहुः इति अस्वरसोद्भावनम् । ''अन्तर्बहिश्च तत्सर्वं व्याप्य नारायण-स्थितः''इति श्रुत्या सर्वमूर्तसंयोगित्वरूपस्य विभुत्वस्य उक्ततया ईश्वरे संयोगस्य अङ्गीकर्तव्यत्वात् । संयोगे स्वीकृते च तत्समवायिकारणतावच्छेदकतया सिद्धं द्रव्यत्वमपि ईश्वरे स्वीकरणीयम् । द्रव्यत्वेन च परिमाणसिद्धिः । (नित्यं) ''विज्ञानमानन्दम्'' इति श्रुतिस्थस्य आनन्दशब्दस्य दुःखाभावपरतया तया श्रुत्या ईश्वरे न सुखसिद्धिः; यथा च पृथक्त्वम् अन्योन्याभावातिरिक्तम् तथा गुणखण्डे व्यक्तीभविष्यति इत्यादिकं नव्यमते अस्वारस्यबीजम् अवसेयम् ।।

।। पृथिवीनिरूपणम् ।।

कारिकावली

तत्र क्षितिर्गन्धहेतुर्नानारूपवती मता ।
षड्विधस्तु रसस्तत्र गन्धस्तु द्विविधो मतः ।। ३५ ।।

मुक्तावली

साधर्म्यवैधर्म्ये निरूप्य संप्रति प्रत्येकं पृथिव्यादिकं निरूपयति – तत्र इति । गन्धहेतुः इति । गन्धसमवायिकारणम् इत्यर्थः । यद्यपि गन्धवत्त्वमात्रं पृथिव्या लक्षणम् उचितम्, तथापि पृथिवीत्वजातौ प्रमाणोपन्यासाय कारणत्वम् उपन्यस्तम् । तथाहि – पृथिवीत्वं हि गन्धसमवायिकारणतावच्छेदकतया सिद्ध्यति; अन्यथा गन्धत्वावच्छिन्नस्य आकस्मिकत्वापत्तेः । न च – पाषाणादौ गन्धाभावात् गन्धवत्त्वम् अव्याप्तम् इति – वाच्यम् । तत्रापि गन्धसत्त्वात् । अनुपलब्धिस्तु अनुत्कटत्वेनापि उपपद्यते ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

कथम् अन्यथा तद्भस्मनि गन्धः उपलभ्यते? भस्मनः हि पाषाणध्वंस-जन्यत्वात् पाषाणोपादानोपादेयत्वं सिद्ध्यति; **यद्द्रव्यं** यद्द्रव्यध्वंसजन्यं तत् तदुपादानोपादेयम् इति व्याप्तेः ।

दृष्टं च एतत् खण्डपटे महापटध्वंसजन्ये । इत्थं च पाषाणपरमाणोः पृथिवीत्वात् तज्जन्यपाषाणस्यापि पृथिवीत्वम् । तथा च तस्यापि गन्धवत्त्वे बाधकाभावः ।।

दिनकरी

गन्धहेतुत्वं कालादौ गतम्, अतः व्याचष्टे – **गन्ध इति** । **गन्धवद्वृत्तिद्रव्यत्व-व्याप्यजातिमत्त्वम्** इत्यर्थः । तेन **सुरभ्यसुरभिकपालारब्धनिर्गन्धघटे** न अव्याप्तिः । **वृत्त्यन्तेन** न जलादौ अतिव्याप्तिः । "द्रव्यत्वव्याप्य" इत्यनेन तत्रैव सत्ताम् आदाय सा न । न वा जातिपदोपादानात् जलपृथिव्यन्यतरत्वम् आदाय सा । **गन्धवत्त्वं वृत्तित्वं च** समवायेन । तेन कालिकसंबन्धेन गन्धवति, समवायसंबन्धाव-च्छिन्नवृत्तित्ववज्जलत्वादिमति, पृथिवीनिरूपितकालिकसंबन्धावच्छिन्न-वृत्तित्ववज्जलत्वादिमति वा जलादौ न अतिव्याप्तिः । **प्रमाणोपन्यासाय इति** । यद्यपि पृथिवीत्वस्य प्रत्यक्षतया न प्रमाणान्तरापेक्षा, तथापि **अयोग्यसाधारण्येन** प्रत्यक्षासंभवात् तत्साधारण्येन पृथिवीत्वसिद्ध्यर्थं तदुपन्यास इति भावः । **अन्यथा** – गन्धत्वावच्छिन्नं प्रति पृथिव्याः हेतुत्वानङ्गीकारे । **आकस्मिकत्वापत्तेः** – नियतकारणानियम्यत्वापत्तेः इत्यर्थः । तथा च कार्यमात्रवृत्तेः गन्धत्वस्य कार्यतावच्छेदकत्वनियमात् तदवच्छिन्ने पृथिवीत्वेन हेतुत्वम् आवश्यकम् इति भावः ।

इदम् उपलक्षणम् । रूपादिनाशकतावच्छेदकतयापि पृथिवीत्वजातिसिद्धिः द्रष्टव्या । प्रतियोगितासंबन्धेन आश्रयनाशाजन्यरूपनाशं प्रति स्वसमवायिपृथिवी-समवेतत्व-स्ववृत्तिरूपत्वोभयसंबन्धेन विलक्षणतेजःसंयोगत्वेन हेतुत्वात् पृथिवीत्वस्य

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

तादृशनाशकतावच्छेदकसंबन्धघटकत्वात् । **आश्रयनाशजन्यरूपनाशे** व्यभिचारवारणाय अजन्यान्तं नाशविशेषणम् । घटाग्निसंयोगेन पटरूपनाशापत्तिवारणाय समवेतत्वान्तस्य नाशकतावच्छेदकसंबन्धे प्रवेशः । तेजोवृत्तिरूपे प्रतियोगितासंबन्धेन तादृशरूपनाशापत्तिवारणाय तद्घटकतया पृथिवीत्वप्रवेशः । स्वसमानाधिकरण-रसगन्धादौ प्रतियोगितासंबन्धेन तादृशरूपनाशोत्पत्त्यापत्तिवारणाय स्ववृत्तिरूपत्वस्य नाशकतावच्छेदकसंबन्धे प्रवेशः । स्ववृत्तित्वं च कालिकविशेषणतया बोध्यम् । **स्वसमवायिपृथिवीसमवेतत्वविशिष्टरूपत्वस्य** संबन्धत्वे रूपत्वविशिष्टस्व-समवायि-समवेतत्वम् आदाय विनिगमनाविरहेण नाश्यनाशकभावद्वयापत्तिः इति तत्त्यागः । **एतेन** पाकजगन्धे **तेजःसंयोगस्य** कारणत्वेन अपाकजे च सुरभ्यादिगन्धादौ अवयवगतसुरभ्यादेः नियामकत्वेन गन्धत्वेन पृथिवीत्वेन कार्यकारणभावे मानाभावात् पृथिवीत्वं न जातिः इति **प्रत्युक्तम्** ।

ननु गन्धवत्त्वस्य पृथिवीलक्षणत्वे पाषाणादौ गन्धशून्ये अव्याप्तिः इति शङ्कां निराकरोति **न च** इत्यादिना । **तत्रापि** – पाषाणादावपि । **पृथिवीत्वेन** इति शेषः । **गन्धसत्त्वात्** – **गन्धानुमानात्** । **ननु पाषाणादौ गन्धसत्त्वे** अनुपलम्भः न स्यात् इति, अत आह – **अनुपलब्धिस्तु** इति । **अनुत्कटत्वेन** – अनुद्भूतत्वेन ।

ननु पाषाणस्य पृथिवीत्वे एव मानाभावे नितरां तदधीनगन्धवत्त्वे इत्यतः तत्र पृथिवीत्वसाधनाय भूमिकाम् आरचयति **कथम् अन्यथा** इत्यादिना । **अन्यथा** – पाषाणादौ पृथिवीत्वानङ्गीकारे । **तद्भस्मनि** – पाषाणभस्मनि । **यद्यपि पाषाणे** पृथिवीत्वाभावे अलक्ष्यत्वादेव गन्धवत्त्वलक्षणं न अव्याप्तम् इति व्यर्थः तत्र गन्धसाधनाय परिश्रमः, तथापि वस्तुस्थितिम् अनुरुध्य तथा उक्तम् इति ध्येयम् । **पाषाणभस्मनि गन्धः** प्रत्यक्षसिद्धः, तेन तत्र पृथिवीत्वम् अङ्गीकरणीयम् । ततश्च भस्मारम्भकावयवेषु अपि पृथिवीत्वसिद्धिः । ततश्च पाषाणारम्भकावयवेषु अपि पृथिवीत्वम् अङ्गीकरणीयम्, भस्मारम्भकावयव-पाषाणारम्भकावयवयोः ऐक्यात् ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

एवं च पाषाणस्यापि पृथिवीत्वसिद्धिः इत्यभिप्रायः । तदेतत् विशदयति – **भस्मनो हि** इति । **एतेन – पाषाणे** इव तद्भस्मन्यपि अनुद्भूतगन्धापत्तिवारणाय पाषाणावयवेषु पाकाङ्गीकारः आवश्यकः । एवं च पाकोत्पादितगन्धवद्भिः पाषाणावयवैरेव तद्भस्मारम्भः निर्गन्धैश्च तैरेव पाषाणारम्भ इति **''अन्यथा तद्भस्मनि''** इत्याद्यसङ्गतिः इति – परास्तम् । तथासत्यपि **उक्तप्रणाल्या** पाषाणे पृथिवीत्वसिद्ध्या तेन गन्धानुमानसंभवात् इति । **यद्द्रव्यम्** इति । **अत्र** च घटध्वंसप्रत्यक्षे घटोपादानानुपादेये व्यभिचारवारणाय प्रथमं द्रव्यपदम् । **अथ वा** घटध्वंसजन्यरूपध्वंसे व्यभिचारवारणाय तत् । मिथ्याज्ञानध्वंसजन्यकायव्यूहे नवीनमते, दण्डस्वरूपदण्डप्रागभावध्वंसजन्ये घटे वा व्यभिचारवारणाय द्वितीयं द्रव्यपदम् । प्रतिबन्धकद्रव्यात्यन्ताभावजन्ये द्रव्ये व्यभिचारवारणाय ध्वंसपदम् । ध्वंसत्वेन च इह जनकत्वं विवक्षितम् । तेन **प्राचां मते** प्रतिबन्धकसंसर्गाभावत्वेन तस्य हेतुत्वेऽपि न क्षतिः । **ध्वंसजन्यत्वं** च अदृष्टाद्वारकं विवक्षितम् । तेन शालग्रामशिलाध्वंसजन्ये नारकीयशरीरे न व्यभिचारः । न च – दुग्धध्वंसजन्ये दध्नि दुग्धावयवजन्यत्वस्वीकारे दध्नोऽपि दुग्धत्वापत्त्या दुग्धावयवैः दधि न जन्यते इति अङ्गीकरणीयम्, तथा च दध्नि व्यभिचार इति – वाच्यम् । दध्नः द्व्यणुकातिरिक्तदुग्धध्वंसजन्यत्वास्वीकारात्, द्व्यणुकरूपदुग्धध्वंसजन्यत्वेऽपि तस्य न तत्र व्यभिचारः; तदुपादानपरमाणुजन्यत्वस्य दध्नि सत्त्वात् । न च – दुग्धपरमाणुजन्यत्वेन दध्नोऽपि दुग्धत्वापत्तिः इति – वाच्यम् । दुग्धपरमाणौ दुग्धत्वाभावात् । द्रव्यत्वव्याप्यव्याप्यजातेः परमाणौ **मानाभावात्** । अन्यथा परमाणुस्वरूपदुग्धजन्यत्वेन दुग्धत्वापत्तिवारणासंभवात् दधित्वदुग्धत्वयोः परमाणुवृत्तित्वे जातिसङ्करप्रसङ्गात् इति । व्याप्तिबोधार्थं दृष्टान्तम् आह – **दृष्टं च एतत्** इति ।।

राजीवोल्लासः

''तत्र क्षितिः गन्धहेतुः'' इति कारिकायां विद्यमानस्य ''गन्धहेतुः'' इति पदस्य गन्धसमवायिकारणम् इत्यर्थः इति मुक्तावल्याम् व्याख्यानं कृतम् ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

तत्र यथाश्रुतस्य गन्धकारणम् इत्यर्थस्य परित्यागे बीजम् आह – **गन्धहेतुत्वम्** इति । तथा च यथाश्रुतार्थस्वीकारे गन्धकारणत्वं पृथिव्याः लक्षणं स्यात् । तथा सति कालादौ अतिव्याप्तिः । कार्यसामान्यं प्रति कालादीनां साधारणकारणतया गन्धकारणत्वस्यापि तत्र सत्त्वात् । तद्वारणाय ''गन्धहेतुः'' इत्यस्य गन्धसमवायि-कारणत्वम् इत्यर्थं स्वीकृत्य समवायसंबन्धावच्छिन्न-गन्धत्वावच्छिन्न-गन्धनिष्ठकार्यतानिरूपित-तादात्म्यसंबन्धावच्छिन्न-कारणत्वरूपं गन्धसमवायि-कारणत्वं पृथिव्याः लक्षणम् इति वक्तव्यम् । तत्तु कालादौ नास्ति इति न अतिव्याप्तिः इति भावः ।

ननु गन्धसमवायिकारणत्वापेक्षया लाघवात् गन्धवत्त्वमेव पृथिव्याः लक्षणम् उचितम् इति **यद्यपि** इत्यादिना **मुक्तावल्यां** यत् आशङ्कितं तन्न संगच्छते – सुरभ्यसुरभिकपालाभ्याम् आरब्धे निर्गन्धे घटे अव्याप्त्या गन्धवत्त्वस्य लक्षणत्वासंभवात् इत्यत्र आह – **गन्धवद्वृत्ति** इति । ''गन्धवत्त्वम्'' इत्यनेन गन्धवद्वृत्तिद्रव्यत्व-व्याप्यजातिमत्त्वं विवक्षितम् । सुरभ्यसुरभिकपालारब्धघटे गन्धाभावेऽपि गन्धवत्कुसुमादिवृत्तिः या द्रव्यत्वव्याप्या पृथिवीत्वजातिः तद्वत्त्वस्य सत्त्वात् न अव्याप्तिः ।

न च – एतादृशजातिघटितलक्षणस्य कथं गन्धसमवायिकारणत्वापेक्षया लघुत्वम् इति – वाच्यम् । गन्धसमवायिकारणत्वं लक्षणम् इति पक्षेऽपि सुरभ्यसुरभिकपालारब्धनिर्गन्धघटे गन्धसमवायिकारणत्वविरहेण अव्याप्त्यापत्त्या गन्धसमवायिकारणवृत्ति- द्रव्यत्वव्याप्यजातिमत्त्वमेव लक्षणतया विवक्षणीयम् । तदपेक्षया च गन्धवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य लघुत्वम् इत्याशयात् । **निर्गन्धघटे** इति । घटे सुरभिगन्धं प्रति कपाले विद्यमानस्य असुरभिगन्धस्य असुरभिगन्धं प्रति सुरभिगन्धस्य च प्रतिबन्धकत्वात् तत्र न कोऽपि गन्धः जायते इति आशयेन निर्गन्धघटे इति उक्तम् । जातौ ''गन्धवद्वृत्तित्व''विशेषणस्य

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

''द्रव्यत्वव्याप्य'' इति विशेषणस्य धर्मपदम् अनुपादाय जातिपदोपादानस्य च क्रमशः प्रयोजनम् आह – **वृत्यन्तेन** इत्यादिना । तथा च द्रव्यत्वव्याप्यजलत्वजातिमत्त्वस्य जले सत्त्वात् तत्र अतिव्याप्तिवारणाय जातौ गन्धवद्वृत्तित्वविशेषणम् । जलत्वं तु न गन्धवद्वृत्ति । एवं गन्धवद्वृत्तिः या जातिः सत्ता तद्वत्त्वस्य जलादौ सत्त्वात् अतिव्याप्तिः । तद्वारणाय जातौ ''द्रव्यत्वव्याप्य'' इति विशेषणम् । सत्ता तु न द्रव्यत्वव्याप्या । एवं गन्धवद्वृत्तिद्रव्यत्वव्याप्यधर्मवत्त्वम् इति उक्तौ गन्धवत्पृथिवीवृत्तिः यः द्रव्यत्वव्याप्यः धर्मः जलपृथिव्यन्तरत्वम्, तद्वत्त्वस्य जले सत्त्वात् तत्र अतिव्याप्तिः । तद्वारणाय जातिपदोपादानम् । अन्यतरत्वं तु न जातिः । एवं गन्धवत्त्वे वृत्तित्वे च समवायसंबन्धावच्छिन्नत्वं निवेशनीयम् इति आह – **गन्धवत्त्वं वृत्तित्वं च** इति । कालिकसंबन्धेन गन्धवति जले समवायसंबन्धेन वर्तमाना या जलत्वजातिः तद्वत्त्वस्य जले सत्त्वात् अतिव्याप्तिः । तद्वारणाय समवायसंबन्धेन गन्धवत्त्वं निवेशनीयम् । जलस्य कालिकसंबन्धेन गन्धवत्त्वेऽपि समवायेन गन्धवत्त्वाभावात् न उक्तदोषः । तथा समवायसंवन्धेन गन्धवती या पृथिवी तत्र कालिकसंबन्धेन वर्तमाना जातिः जलत्वमपि, तद्वत्त्वम् आदाय जले अतिव्याप्तिः । तद्वारणाय वृत्तित्वे समवायसंबन्धावच्छिन्नत्वनिवेशः । पृथिवीनिरूपितसमवायसंबन्धावच्छिन्नवृत्तित्वं जलत्वे नास्ति इति न उक्तदोषः । तथा च समवायसंबन्धावच्छिन्नगन्धनिष्ठाधेयतानिरूपिताधिकरणतावन्निरूपितसमवायसंबन्धावच्छिन्नवृत्तित्ववद्द्रव्यत्वव्याप्यजातिमत्वं गन्धवत्त्वम् इत्यनेन विवक्षितम् इति न कोऽपि दोषः ।

अयोग्यसाधारण्येन इति । प्रत्यक्षायोग्यपरमाण्वादिवृत्तित्वेन इत्यर्थः । प्रत्यक्षायोग्येषु परमाणुषु पृथिवीत्वस्य प्रत्यक्षाभावात् परमाणुषु पृथिवीत्वं नास्ति इति शङ्कावारणाय परमाणुष्वपि पृथिवीत्वसिद्ध्यर्थं प्रमाणोपन्यासः । तथा च परमाणौ प्रत्यक्षेण न पृथिवीत्वजातिसिद्धिः, अपि तु तत्रापि गन्धोत्पत्या गन्धरूपकार्यहेतुकानुमानेनैव गन्धकारणतावच्छेदकपृथिवीत्वजातिसिद्धिः इति भावः ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

नियतकारणानियम्यत्वापत्तेः इति । नियतकारणाजन्यत्वापत्तेः इत्यर्थः । तथा च गन्धं प्रति पृथिवीत्वेन अकारणत्वे कदाचित् जलादौ अपि गन्धोत्पत्तिः स्यात् इति भावः ।

तथा च इति । कार्यमात्रवृत्तेः गन्धत्वस्य समवायिकारणकार्यतावच्छेदकत्वनियमात् गन्धत्वावच्छिन्नकार्यतानिरूपित-समवायिकारणतावच्छेदकतया पृथिवीत्वजातिः सिद्ध्यति । ''समवायसंबन्धावच्छिन्न-गन्धत्वावच्छिन्नकार्यतानिरूपिततादात्म्यसंबन्धावच्छिन्नकारणता, किञ्चिद्धर्मावच्छिन्ना, कारणतात्वात्'' इति अनुमानम् अत्र विवक्षितम् ।

ननु न इयम् आपत्तिः संभवति – पाकजगन्धे विजातीयतेजःसंयोगत्वेन तेजःसंयोगस्य, अपाकजगन्धे अवयवगन्धस्यैव कारणतया जलादौ तदुभयाभावादेव गन्धोत्पत्त्यसंभवात् इत्यतः प्रकारान्तरेणापि पृथिवीत्वं साधयति – **इदम् उपलक्षणम्** इति । विजातीयतेजस्संयोगवशात् पृथिव्यामेव रूपादिनाशः भवति, न जलादौ । अतः रूपादिनाशकता-वच्छेदकतया पृथिवीत्वजातिसिद्धिः । तथा हि – प्रतियोगितासंबन्धेन आश्रयनाशाजन्यरूपनाशं प्रति स्वसमवायिपृथिवीसमवेतत्व-स्ववृत्तिरूपत्वोभयसंबन्धेन विलक्षणतेजःसंयोगः हेतुः इति कार्यकारणभावः कल्पनीयः । पृथिव्यां हि रूपादिनाशः आश्रयनाशं विनापि पाकवशात् भवति । जलादिषु रूपादिनाशस्तु आश्रयनाशादेव भवति । आश्रयनाशाजन्यरूपनाशः प्रतियोगितासंबन्धेन पृथिवीरूपे वर्तते । तत्र पृथिव्यनुयोगिकविलक्षणतेजःसंयोगः स्वसमवायिपृथिवीसमवेतत्वसंबन्धेन वर्तते । स्वं – विलक्षणतेजःसंयोगः । तत्समवायी तेजः पृथिवी च । अतः स्वसमवायिपृथिवीमादाय तत्समवेतत्वं रूपे वर्तते । एवं स्ववृत्तिरूपत्वं च वर्तते । स्ववृत्तिरूपत्वं नाम कालिकसंबन्धेन स्ववृत्तित्वे सति रूपत्वम् । पार्थिवरूपे विजातीयतेजस्संयोगकालिकत्वात् कालिकसंबन्धेन विजातीयतेजःसंयोगवृत्तित्वम् अस्ति । रूपत्वं च अस्ति । अतः उक्तोभयसंबन्धेन विलक्षणतेजःसंयोगस्य रूपे वर्तमानतया कार्यकारणयोः एकाधिकरणवृत्तित्वनिर्वाहः ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

कारणतावच्छेदकसंबन्धमध्ये पृथिवीपदम् अघटयित्वा स्वसमवायिसमवेतत्वं संबन्धतया निवेशनीयम् । स्वसमवायिसमवेतत्वं इत्यस्य विलक्षणतेजस्संयोगप्रतियोगिकत्वविशिष्ट-समवायानुयोगिसमवेतत्वम् इत्यर्थः । विलक्षणतेजस्संयोगप्रतियोगिकसमवायानुयोगि पृथिव्येव भवति इति आशयेन पृथिवीपदं संबन्धघटकतया उपात्तम् । पृथिवीत्वजातिंसाधकानुमानप्रकारस्तु – आश्रयनाशाजन्यरूपनाशनिष्ठ प्रतियोगितासंबन्धावच्छिन्नकार्यतानिरूपित-विलक्षणतेजःसंयोगनिष्ठकारणतावच्छेदकसंबन्धघटकस्वसमवायानुयोगिता – विलक्षणतेजस्संयोगप्रतियोगिकत्वविशिष्ट-समवायानुयोगिता – किञ्चिद्धर्मावच्छिन्ना, अनुयोगितात्वात्, घटसंयोगप्रतियोगिकत्व-विशिष्टसमवायनिरूपितभूतलनिष्ठानुयोगितावत्'' इति । **तादृशनाशकतावच्छेदकसंबन्धघटकत्वात्** – तादृशनाशजनकतावच्छेदकः यः संबन्धः तद्घटकत्वात् – तद्घटकानुयोगितावच्छेदकत्वात् इत्यर्थः ।

कार्यतावच्छेदकशरीरे कारणतावच्छेदकशरीरे च प्रविष्टानां विशेषणानां संबन्धानां च प्रयोजनम् आह – **आश्रयनाशजन्यरूपनाशे** इत्यादिना । कार्यतावच्छेदकशरीरे ''आश्रयनाशाजन्य'' इति विशेषणानुपादाने प्रतियोगितासंबन्धेन रूपनाशस्य जलगतरूपेऽपि वर्तमानतया तत्र च विलक्षणतेजस्संयोगरूपकारणविरहात् व्यतिरेकव्यभिचारः । तद्वारणाय ''आश्रयनाशाजन्य'' इति रूपनाशस्य विशेषणम् । जलगतरूपनाशस्य आश्रयनाशजन्यतया तस्य आश्रयनाशाजन्यरूपनाशत्व-रूपकार्यतावच्छेदकानाक्रान्ततया न उक्तव्यभिचारः ।

स्वरूपसंबन्धेन आश्रयनाशाजन्यरूपनाशस्य पृथिव्यामपि वर्तमानतया तत्र उक्तोभयसंबन्धेन विलक्षणतेजःसंयोगरूपकारणाभावात् व्यतिरेकव्यभिचारः । तद्वारणाय प्रतियोगितासंबन्धस्य कार्यतावच्छेदकत्वम् उक्तम् । कारणतावच्छेदकताशरीरे स्वसमवायिसमवेतत्वसंबन्धानिवेशे घटाग्निसंयोगेन पटरूपनाशापत्तिः । तथा हि – प्रतियोगितासंबन्धेन पटरूपनाशः पटरूपे वर्तते । तत्र घटाग्निसंयोगः स्वनिरूपित-कालिकसंबन्धावच्छिन्नवृत्तित्वविशिष्टरूपत्वसंबन्धेन वर्तते इति । अतः

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

स्वसमवायिसमवेतत्वसंबन्धनिवेशः । घटाग्निसंयोगस्तु अनेन संबन्धेन पटरूपे नास्ति । स्वं – घटाग्निसंयोगः । स्वसमवायि – घटः, तत्समवेतत्वस्य पटरूपे असत्त्वात् । अतः घटाग्निसंयोगात् न पटरूपनाशापत्तिः ।

"स्वसमवायिपृथिवीसमवेतत्वम्" इत्यत्र पृथिवीपदानिवेशे पृथिवीतेजस्संयोगस्य समवायि तेजः अपि भवति । तद्वृत्तित्वं तेजोरूपेऽस्ति । स्ववृत्तिरूपत्वं च तत्र अस्ति इति स्ववृत्तिरूपत्व–स्वसमवायिसमवेतत्वोभयसंबन्धेन तेजःपृथिवीसंयोगस्य तेजोरूपे वर्तमानतया तत्र प्रतियोगितासंबन्धेन नाशापत्तिः । तद्वारणाय संबन्धमध्ये पृथिवीपदप्रक्षेपः । स्वसमवायिपृथिवीसमवेतत्वं तु तेजोरूपे नास्ति इति उक्तसंबन्धेन कारणविरहात् न नाशापत्तिः ।

वस्तुतस्तु – "स्वसमवायिसमवेतत्वम्" इत्यस्य स्वप्रतियोगिकसमवायवत्समवेतत्वम् इति यथाश्रुतार्थम् अवलम्ब्य एतद्दोषकथनम् । विलक्षणतेजःसंयोगप्रतियोगिकत्वविशिष्ट-समवायानुयोगिसमवेतत्वम् इति अर्थस्वीकारे तु पृथिवीत्वाप्रवेशेऽपि न उक्तदोषः । तेजस्संयोगप्रतियोगिकत्वविशिष्टसमवायानुयोगित्वस्य तेजोभिन्ने एव सत्त्वेन तेजसि अभावात् ।

कारणतावच्छेदकशरीरे स्ववृत्तिरूपत्वात्मकसंबन्धानिवेशे रूपसमानाधिकरणरसगन्धादौ विलक्षणतेजस्संयोगस्य स्वसमवायिसमवेतत्वसंबन्धेन पृथिव्यां वर्तमानतया तेन संबन्धेन कारणसत्त्वात् प्रतियोगितासंबन्धेन रूपनाशस्य उत्पत्तिः स्यात् । रूपनाशस्तु न उत्पद्यत इति अन्वयव्यभिचारः । तद्वारणाय स्ववृत्तिरूपत्वस्य संबन्धतया निवेशः । रसगन्धादौ रूपत्वविरहात् स्ववृत्तिरूपत्वसंबन्धेन तेजःसंयोगरूपकारणाभावात् न उक्तापत्तिः ।

"स्ववृत्तिरूपत्वम्" इत्यत्र स्ववृत्तित्वानुपादाने रूपत्वं विलक्षणतेजस्संयोगस्य संबन्धः इति वक्तव्यम् । तत्र तु प्रमाणं नास्ति । रूपत्वस्य निष्प्रतियोगिकत्वात् । अतः स्ववृत्तित्वविशिष्टरूपत्वस्य निवेशः । तद्घटकस्य आधेयत्वरूपस्य वृत्तित्वस्य

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

सप्रतियोगिकत्वात् तद्घटितस्ववृत्तिरूपत्वात्मकपरम्परासंबन्धस्य तेजस्संयोगप्रतियोगिकत्वम् अस्ति इति तस्य संबन्धत्वं निर्वहति ।

एतदुक्तं भवति – निष्प्रतियोगिकस्य रूपत्वस्य तेजस्संयोगसंबन्धत्वं दुर्घटम् । अतः स्ववृत्तित्वविशिष्टरूपत्वं संबन्धः । परम्परासंबन्धे प्रविष्टस्य विशेषणस्य सप्रतियोगिकत्वे विशेषणविशिष्टस्य परम्परासंबन्धस्य सप्रतियोगिकत्वनियमात् स्ववृत्तिरूपत्वघटकाधेयतारूपवृत्तेः तेजःसंयोगप्रतियोगिकत्वेन तद्घटितस्य स्ववृत्तिरूपत्वस्य तेजःसंयोगप्रतियोगिकसंबन्धत्वं संभवति इति भावः । रूपे तेजस्संयोगवृत्तित्वविरहात् स्ववृत्तित्वं च कालविशेषणतया बोध्यम् इति उक्तम् ।

ननु उभयसंबन्धनिवेशापेक्षया स्वसमवायिपृथिवीसमवेतत्वविशिष्टरूपत्वम् एकमेव कारणतावच्छेदकसंबन्धः अस्तु । तद्घटकसमवायस्य तेजस्संयोगप्रतियोगिकत्वादेव तद्घटितविशिष्टस्य तेजस्संयोगप्रतियोगिकत्वं निर्वहति इति आशङ्क्य स्वसमवायिसमवेतत्वविशिष्टरूपत्वस्य संबन्धत्वं वा रूपत्वविशिष्टस्वसमवायिसमवेतत्वस्य संबन्धत्वं वा इत्यत्र विनिगमनाविरहात् उभाभ्याम् अपि संबन्धाभ्यां पृथक् कार्यकारणभावद्वयं कल्पनीयम् स्यात् इति आलोच्य विशिष्टरूपत्वस्य संबन्धत्वपरित्यागः इति समाधानम् आह **स्वसमवायिपृथिवीसमवेतत्वविशिष्टरूपत्वस्य इति** ।

इदम् उपलक्षणम् इत्यादिना मूलोक्तरीतिं परित्यज्य रूपनाशजनकतावच्छेदकतया पृथिवीत्वजातिसाधने हेतुम् आह – एतेन इत्यादिना । तेजःसंयोगस्य इति । विजातीयतेजःसंयोगत्वेन इति शेषः । तेन जलादौ न गन्धापत्तिः । वैजात्यस्य पृथिव्यनुयोगिकसंयोगे एव स्वीकारात् इति हृदयम् । प्रत्युक्तम् इति । गन्धत्वावच्छिन्नं प्रति पृथिवीत्वेन रूपेण कारणतायाः अभावेऽपि रूपनाशजनकतावच्छेदकसंबन्धघटकत्वेनैव पृथिवीत्वजातिसिद्धेः इति भावः ।

इदम् उक्तम् भवति । गन्धत्वेन पृथिवीत्वेन च गन्धपृथिव्योः कार्यकारणभावः

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

यदि स्यात्, तदैव मूलोक्तरीत्या गन्धसमवायिकारणतावच्छेदकतया पृथिवीत्वजातिः सिद्ध्येत् । तादृशकार्यकारणभावे एव प्रमाणाभावः ।

ननु तादृशकार्यकारणभावानङ्गीकारे जलेऽपि गन्धोत्पत्त्यापत्तिः इति चेत्, किं जले पाकजगन्धः आपाद्यते, उत अपाकजगन्धः ।

नाद्यः । पाकजगन्धं प्रति विजातीयतेजस्संयोगत्वेन तेजस्संयोगस्य कारणतया वैजात्यस्य पृथिव्यनुयोगिकतेजस्संयोगे एव स्वीकारात् वैजात्यविशिष्टतेजस्संयोगत्वरूप-कारणतावच्छेदकस्य जलगततेजस्संयोगे अभावादेव तत्र पाकजगन्धोत्पत्त्यसंभवात् ।

न द्वितीयः । अपाकजसुरभ्यादिगन्धं प्रति अवयवगतसुरभ्यादिगन्धस्य कारणतया अवयवजले गन्धाभावादेव अवयविजले गन्धोत्पत्त्यसंभवात् । तथा च मूलोक्तरीत्या पृथिवीत्वजातिः न सिद्ध्यति इति शङ्का **इदम् उपलक्षणम्** इत्यादिना रूपनाशजनकतावच्छेदकसंबन्धघटकतया पृथिवीत्वजातिसिद्ध्युपपादनेन निराकृता इति भावः ।

ननु पाषाणादौ गन्धसत्त्वात् इति मूलम् असङ्गतम् । तत्र तत्साधकप्रमाणा-भावात् इत्याशङ्कानिरासाय **गन्धसत्त्वात्** इत्यस्य **गन्धानुमानात्** इत्यर्थकताया आवश्यकतया केन हेतुना गन्धानुमानम् इत्याशङ्कायां मूले हेत्वनुक्तेः न्यूनता स्यात् इति, अत आह – **पृथिवीत्वेन इति शेष** इति । तथा च **तत्रापि गन्धसत्त्वात्** इत्यस्य पाषाणादावपि पृथिवीत्वेन हेतुना गन्धानुमानात् इत्यर्थः । "पाषाणः गन्धवान् पृथिवीत्वात्, पुष्पादिवत्" इति अनुमानम् अत्र विवक्षितम् ।

ननु पाषाणादौ गन्धसत्त्वे इति । पृथिवीत्वहेतुकानुमानेन पाषाणादौ गन्धसत्त्वे निश्चिते सति कुतः सः न उपलभ्यते इति शङ्का । अनुद्भूतत्वात् पाषाणस्थगन्धस्य अनुपलब्धिः इति समाधानम् ।

ननु पाषाणस्य पृथिवीत्वे इति । पृथिवीत्वेन हेतुना पाषाणे गन्धानुमानं न संभवति । पाषाणे पृथिवीत्वरूपहेतोरेव असिद्धेः इत्याशङ्कानिरासाय पाषाणे

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

पृथिवीत्वसाधनाय उपोद्धातम् आरचयति – **कथम् अन्यथा** इत्यादिना मुक्तावल्याम् इति भावः ।

यद्यपि पाषाणे इति । पाषाणे पृथिवीत्वाभावेन अलक्ष्यत्वात् तत्र गन्धाभावेऽपि न गन्धवत्त्वलक्षणस्य अव्याप्तिदोषः । लक्ष्ये लक्षणासत्त्वे एव अव्याप्तेः प्रसक्तेः । तथा च अव्याप्तिपरिहारार्थं पृथिवीत्वसाधनप्रयासः न उचितः इति शङ्का । तथापि पाषाणे पृथिवीत्वाभावः यदि स्यात् तर्हि पृथिव्यन्यद्रव्यत्वं वक्तव्यम् । पाषाणस्य पृथिव्यन्यद्रव्यत्वं तु सिद्धान्तविरुद्धम् । अतः पाषाणस्य पृथिवीत्वम् आवश्यकम् इति पृथिव्यां तत्र गन्धाभावात् अव्याप्तिशङ्कायां तत्परिहारार्थः प्रयासः उचित एव । **''कथमन्यथा तद्भस्मनि गन्ध उपलभ्यते''** इति **मुक्तावलीग्रन्थेन** पाषाणस्य पृथिवीत्वाभावे पाषाणभस्मनि गन्धोपलब्धिः न स्यात् इति उक्तम् । कुतः न स्यात् इति शङ्कायां **भस्मनो हि** इत्यादिना तदुपपादनं कृतम् । तदेव स्पष्टीकरोति – **पाषाणभस्मनि गन्धः** इत्यादिना । पाषाणस्य भस्मीकरणे तद्भस्मनि गन्धः प्रत्यक्षेण गृह्यते । गन्धस्तु पृथिवीत्वं विना न संभवति इति भस्मनां पृथिवीत्वम् अङ्गीकरणीयम् । पाषाणभस्मनः पृथिवीत्वात् भस्मारम्भकावयवेष्वपि पृथिवीत्वम् आवश्यकम् । अवयवावयविनोः एकजातीयत्वनियमात् । भस्मारम्भकेषु परमाणुषु पृथिवीत्वसिद्धौ च पाषाणारम्भकेष्वपि अवयवेषु पृथिवीत्वं सिद्ध्यति । भस्मारम्भकाणां पाषाणारम्भकाणां च अवयवानाम् एकत्वात् । पाषाणारम्भकावयवेषु पृथिवीत्वसिद्धौ च तदारब्धे पाषाणेऽपि पृथिवीत्वं सिद्ध्यति । तेन च पाषाणे गन्धः सिद्ध्यति । पाषाणारम्भकावयवानां भस्मारम्भकावयवानां च ऐक्यं कथम् इति जिज्ञासायां मूले ''भस्मनः हि'' इत्यादिना तत् उपपादितम् । यद्द्रव्यं यद्द्रव्यध्वंसजन्यं तत् तदुपादानोपादेयम् – तत्समवायिकारणजन्यम् – इति व्याप्तेः भस्मनः पाषाणध्वंसजन्यत्वात् पाषाणसमवायिकारणजन्यत्वं सिद्ध्यति । तेन ये परमाणवः पाषाणस्य परम्परया समवायिकारणभूताः ते एव भस्मनोऽपि समवायिकारणम् इति । तथा च –

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

1. पाषाणः गन्धवान्, पृथिवीत्वात् ;
2. पाषाणः पृथिवी, पृथिवीत्वाश्रयपाषाणावयवजन्यत्वात् ;
3. पाषाणावयवः पृथिवी, पृथिवीत्वाश्रयभस्मजनकत्वात् ;
4. भस्म पाषाणवयवजन्यम्, पाषाणध्वंसजन्यत्वात् ;
5. भस्म पृथिवी, गन्धवत्वात्;

इति पञ्च अनुमानानि अत्र विवक्षितानि ।

ननु पाषाणावयव–पाषाणभस्मावयवयोः ऐक्यात् भस्मावयवे गन्धसत्त्वात् गन्धवद्भस्मावयवजन्यत्वादेव पाषाणे गन्धसिद्धिसंभवे पाषाणे गन्धसिद्धये पृथिवीत्व-सिद्ध्यधीनत्वकथनम् अनुचितम् इति शङ्कां निरासितुम् आह – **एतेन पाषाण इव** इति । एतेन – गन्धसिद्धेः पृथिवीत्वसिद्ध्यधीनत्वप्रदर्शनेन इत्यर्थः । भस्मनि गन्धसत्त्वात् तदवयवे गन्धसत्त्वं, तदारब्धत्वात् पाषाणे गन्धः इति रीत्या पाषाणे गन्धसाधने पाषाणे यथा अनुद्भूतगन्धः तथा तद्भस्मन्यपि अनुद्भूतगन्धोऽस्तु इत्यापत्तिः भवति । तद्वारणाय पाषाणावयवेषु पाकमङ्गीकृत्य पाकोत्पादितगन्धवद्भिः पाषाणावयवैः तद्भस्मारम्भः । निर्गन्धैः तैरेव पाषाणारम्भः इति स्वीकरणीयम् । तथा च भस्मनि गन्धसत्त्वात् तदवयवे गन्धः इति प्रणालिकया पाषाणे गन्धसाधनम् अशक्यम् । अतः गन्धेन भस्मनि पृथिवीत्वमनुमाय तेन तदवयवे पृथिवीत्वम् अनुमाय पृथिवीत्ववदवयवजन्यत्वेन हेतुना पाषाणे पृथिवीत्वम् अनुमाय तेन पाषाणे गन्धसिद्धिः इति प्रणालिकैव युक्ता इति भावः ।

न च गुणग्रन्थे पाकप्रक्रियायां निर्गुणे परमाणुद्रव्ये द्रव्यारम्भानुगुणक्रियानुत्पत्तेः वक्ष्यमाणतया कथं निर्गन्धैः अवयवैः द्रव्यारम्भः इति वाच्यम् । लाघवात् स्पर्शस्यैव द्रव्यारम्भानुगुणक्रियोपयोगित्वात् । तथा च पाषाणपरमाणूनां गन्धसमवायि-कारणतावच्छेदकपृथिवीत्वनिश्चयात् पूर्वं गन्धनिश्चयासंभवात् निर्गन्धत्वसंभावनायाः उपपत्तिः ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

उक्तप्रणाल्या इति इति । पाषाणभस्मनि गन्धः प्रत्यक्षसिद्धः इत्यादिना पूर्वोक्तरीत्या इत्यर्थः ।

''भस्मनः हि'' इत्यादिमूलग्रन्थे ''भस्म पाषाणोपादानोपादेयम्, पाषाणध्वंसजन्यत्वात्'' इत्यनुमानं विवक्षितम् । तस्मिन् अनुमाने यत् पाषाणध्वंसजन्यं तत् पाषाणोपादानोपादेयम् इति विशेषव्याप्तेः पक्षातिरिक्तदृष्टान्तविरहात् दुर्वचतया ''यद्द्रव्यं यद्द्रव्यध्वंसजन्यं तत् तदुपादानोपादेयम्'' इति सामान्यमुखीव्याप्तिः प्रदर्शिता । तादृशव्याप्तिघटकदलानां प्रयोजनं वक्तुम् आरभते – **अत्र च** इत्यादिना । प्रथमद्रव्यपदानुपादाने ''यत् यद्द्रव्यध्वंससजन्यं तत् तदुपादानोपादेयम्'' इति व्याप्तिस्वीकारे यत् – घटध्वंसप्रत्यक्षम् यद्द्रव्यध्वंसजन्यम् – घटात्मकद्रव्यध्वंसजन्यम् – प्रत्यक्षे विषयस्य कारणत्वात् – तत् घटध्वंसप्रत्यक्षम् घटोपादानोपादेयम् न भवति, घटसमवायिकारणकपालाजन्यत्वात् इति व्यभिचारः । द्रव्यध्वंसजन्यत्वरूपहेतुसत्त्वात् घटोपादानोपादेयत्वरूपसाध्याभावाच्च । तद्वारणाय ''यद्द्रव्यम्'' इति उक्तम् । घटध्वंसप्रत्यक्षं तु द्रव्यं न भवति । अतः न व्यभिचारः । द्रव्यत्वे सति द्रव्यध्वंसजन्यत्वस्यैव हेतुत्वात् ।

ननु ध्वंसत्वेन ध्वंसजन्यत्वं विवक्षणीयम् इति अग्रे वक्ष्यति । तथा च घटध्वंसप्रत्यत्क्षे न व्यभिचारः । प्रत्यक्षं प्रति घटध्वसंस्य विषयत्वेनैव हेतुत्वात् ध्वंसत्वेन हेतुत्वाभावात् इति, अत आह – **अथ वा** इति । आश्रयनाशजन्यरूपनाशे – घटध्वंसजन्यरूपध्वंसे घटोपादानोपादेयत्वं नास्ति इति व्यभिचारः । तद्वारणाय ''यद्द्रव्यम्'' इति उक्तम् । रूपध्वंसस्तु द्रव्यं न भवति इति न व्यभिचारः ।

द्वितीयद्रव्यपदानुपादाने – ''यद्द्रव्यं यद्ध्वंसजन्यं तत् तदुपादानोपादेयम्'' इति व्याप्तिस्वरूपं स्यात् । तथा सति मिथ्याज्ञानध्वंसजन्यशरीरसमूहे मिथ्याज्ञानोपादानोपादेयत्वाभाववति व्यभिचारः । अथ वा दण्डस्वरूपः यः दण्डप्रागभावध्वंसः तज्जन्ये घटे दण्डप्रागभावोपादानोपादेयत्वाभाववति व्यभिचारः । तद्वारणाय द्वितीयं

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

द्रव्यपदम् । तदुपादाने च उक्तस्थलद्वयेऽपि द्रव्यध्वंसजन्यत्वरूपहेतुः नास्ति इति न व्यभिचारः ।

कायव्यूह इति । झटिति प्रारब्धक्षयार्थं सौभरिप्रभृतीनां युगपत् अनेकशरीरपरिग्रहः पुराणेषु श्रूयते । तादृशकायसमूहे मिथ्याज्ञानजन्यानादिवासनाध्वंसः अपि हेतुत्वेन अङ्गीकरणीयः, तत्त्वज्ञानरहितानां युगपदनेकशरीरपरिग्रहस्य क्वापि अननुभावात् इति "यद्ध्वंसजन्यम्" इत्युक्तौ वासनोपादानानुपादेये कायसमूहे भवति व्यभिचार इति भावः । **नवीनमत** इति । दण्डप्रागभावध्वंसस्य **नवीनमते** दण्डरूपत्वानङ्गीकारेण दण्डजन्यघटादौ वक्ष्यमाणव्यभिचारासंभवेन उक्तमेव प्रयोजनं तन्मते इति सूचनाय इदम् उक्तम् । **प्राचीनमते** घटेऽपि व्यभिचारः तदनुपादाने इति आह – **दण्ड** इति । ध्वंसपदमनुपादाय "यद्द्रव्यं यद्द्रव्यसंसर्गाभावजन्यम् तत् तदुपादानोपादेयम्" इति व्याप्तिस्वीकारे प्रतिबन्धकात्यन्ताभावजन्ये द्रव्ये – मण्यभावजन्ये वन्हौ व्यभिचारः । वन्हिरूपद्रव्यस्य मणिरूपद्रव्यसंसर्गाभावजन्यत्वात् मण्युपादानोपादेयत्वाभावाच्च व्यभिचारः भवति । तद्वारणाय ध्वंसपदम् । वन्हेः मणिध्वंसजन्यत्वविरहात् हेतुः नास्ति इति न व्यभिचारः ।

प्राचीनमते वन्हिं प्रति मण्यत्यन्ताभावस्य प्रतिबन्धकसंसर्गाभावत्वेन हेतुत्वात् संसर्गाभावत्वेन रूपेण मणिध्वंसोऽपि हेतुः । अतः मणिध्वंसजन्ये वन्हौ मण्युपादानोपादेयत्वरूपसाध्याभावात् व्यभिचारः । अतः अत्र द्रव्यध्वंसजन्यत्वं द्रव्यध्वंसत्वावच्छिन्नजनकतानिरूपितजन्यत्वरूपं हेतुतया विवक्षणीयम् । मणिध्वंसनिष्ठसंसर्गाभावत्वावच्छिन्नजनकतानिरूपितजन्यत्वस्य वन्हौ सत्त्वेऽपि तन्निष्ठध्वंसत्वावच्छिन्नजनकतानिरूपितजन्यत्वविरहात् न व्यभिचारः ।

प्राचां मते इति । **नवीनमते** तु प्रतिबन्धकात्यन्ताभावस्यैव कार्यहेतुतया नायं व्यभिचारः संभवति इति भावः ।

ध्वंसजन्यत्वं च इति । शालग्रामशिलाध्वंसजन्ये नारकीयशरीरे

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

द्रव्यध्वंसजन्यत्वरूपहेतुसत्त्वात् शालग्रामशिलोपादानोपादेयत्वरूपसाध्याभावाच्च व्यभिचारः । तद्वारणाय अदृष्टाद्वारकं ध्वंसजन्यत्वं विवक्षणीयम् । शालग्रामशिलाध्वंसः अधर्मरूपादृष्टद्वारैव नारकीयशरीरं जनयति इति अदृष्टाद्वारकध्वंसजन्यत्वं नारकीयशरीरे नास्ति इति न व्यभिचारः । तथा च द्रव्यत्वे सति द्रव्यध्वंसनिष्ठध्वंसत्वावच्छिन्नजनकतानिरूपितादृष्टाद्वारकजन्यत्वं हेतुः इति फलितम् । द्रव्यध्वंसनिष्ठध्वंसत्वावच्छिन्नस्वजन्यादृष्टसंबन्धानवच्छिन्नजनकतानिरूपितजन्यत्वं हेतुः इति यावत् ।

न च दुग्धध्वंसजन्ये इति । दुग्धे तक्रातञ्चने सति किञ्चित्कालानन्तरं दधि निष्पद्यते । तत् स्थूलं दधि नैयायिकमते दुग्धध्वंसजन्यम् । तत्र दुग्धावयवजन्यत्वाङ्गीकारे दध्नोऽपि दुग्धत्वप्रसङ्गात् स्थूलैः दुग्धावयवैः दधि न जन्यत इति अङ्गीकरणीयम् । तथा च दुग्धध्वंसजन्यत्वरूपहेतुमति दध्नि दुग्धोपादानोपादेयत्वसाध्यविरहात् व्यभिचारः इति – न च वाच्यम् । दध्नः दुग्धद्व्यणुकव्यतिरिक्तदुग्धध्वंसजन्यत्वानङ्गीकारात् । दुग्धद्व्यणुकध्वंसजन्यत्वरूपहेतुसत्त्वेऽपि दुग्धद्व्यणुकावयवपरमाणुजन्यत्वरूपसाध्यमपि दध्नि अस्ति इति व्यभिचारविरहात् ।

द्व्यणुकातिरिक्त इति । इदं च उपादानपदस्य साक्षात् अवयवपरताभिप्रायेण उक्तम् । ''तदुपादानोपादेयम्'' इत्यस्य तदारम्भकपरमाण्वारब्धम् इत्यर्थकत्वे तु स्थूलदध्नोऽपि स्थूलदुग्धध्वंसजन्यत्वेऽपि न क्षतिः । तदारम्भकपरमाण्वारब्धत्वस्य तत्र सत्त्वात् । परमाणौ तदारम्भकत्वं च तत्सत्ताप्रयोजकसत्तावत्त्वमेव शक्यते निर्वक्तुम् । अन्यथा स्थूलपाषाणारम्भकावयवोपादेयत्वे भस्मनोऽपि पाषाणत्वापत्त्यविशेषात् दधिपर्यन्तानुधावने प्रयोजनाभाव एव इति चिन्तनीयम् इति **तरङ्गिणीकाराः** ।

न च – दध्नः दुग्धपरमाणुजन्यत्वे दुग्धत्वापत्तिः इति – वाच्यम् । दुग्धपरमाणौ दुग्धत्वाभावात् । दुग्धपरमाणौ दुग्धत्वसत्त्वे हि तज्जन्यस्य दध्नः दुग्धत्वप्रसक्तिः ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

कुतः दुग्धपरमाणौ दुग्धत्वं नास्ति? इति चेत् – परमाणुषु द्रव्यत्वव्याप्य-व्याप्यजातिसत्त्वे प्रमाणाभावात् । द्रव्यत्वव्याप्या जलत्वजातिः तद्व्याप्यं दुग्धत्वं परमाणौ नास्ति इति ।

मानाभावात् इति । दुग्धारम्भकपरमाणूनाम् अन्यत्र गमनं दध्यारम्भकतद्भिन्न-परमाणूनाम् अत्र आगमनम् इत्यस्य कल्पनं तत्प्रयोजकविरहेण अयुक्तम् इति भावः । **अन्यथा** – परमाणौ दुग्धत्वजातिं स्वीकृत्य दधिद्व्यणुकस्य दुग्धपरमाणु-जन्यत्वाङ्गीकारे दध्नः दुग्धत्वापत्तेः वारणं न संभवति । न च – दध्नः दुग्धत्वम् इष्टम् – इति वाच्यम् । दधित्वदुग्धत्वयोः परमाणुवृत्तित्वे द्वयोः जात्योः साङ्कर्यप्रसङ्गात् । दधित्वं विहाय दुग्धत्वं दुग्धद्व्यणुकादौ । दुग्धत्वं विहाय दधित्वं दधिद्व्यणुकादौ । उभयोः दधित्वदुग्धत्वयोः परमाणौ समावेशात् सङ्कर इति भावः ।।

मुक्तावली

नानेति । शुक्लनीलादिभेदेन नानाजातीयं रूपं पृथिव्यामेव वर्तते, न तु जलादौ, तत्र शुक्लस्यैव सत्त्वात् । पृथिव्यां तु एकस्मिन्नपि धर्मिणि पाकवशेन नानारूपसंभवात् ।

न च – यत्र नानारूपं न उत्पन्नं तत्र अव्याप्तिः इति – वाच्यम् । **रूपद्वयवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य, रूपनाशवद्वृत्तिद्रव्यत्वव्याप्य-जातिमत्त्वस्य** वा वाच्यत्वात् । **वैशेषिकनये** पृथिवीपरमाणौ रूपनाशस्य रूपान्तरस्य च सत्त्वात्, **न्यायनये** घटादौ अपि तत्सत्त्वात् लक्षणसमन्वयः ।

षड्विध इति । मधुरादिभेदेन यः षड्विधरसः स पृथिव्यामेव । जले मधुर एव रसः । अत्रापि पूर्ववत् रसद्वयवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वं लक्षणार्थः अवसेयः ।

गन्धस्तु द्विविध इति वस्तुस्थितिमात्रम्, न तु द्विविधगन्धवत्त्वं लक्षणम्, द्विविधत्वस्य व्यर्थत्वात् । द्वैविध्यं च सौरभासौरभभेदेन बोध्यम् ।।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

दिनकरी

मूले नानारूपवत्त्वं लक्षणान्तरमुक्तम् । तत् लक्ष्ये प्रतिपादयति – **शुक्ल** इत्यादिना । अलक्ष्ये लक्षणस्य असत्त्वं प्रतिपादयति – **न तु** इति । **रूपद्वय** इति । रूपद्वयवद्वृत्तिसत्तारूपजातिमति गुणादौ अतिव्याप्तिवारणाय **द्रव्यत्वव्याप्य** इति । द्रव्यत्वव्याप्यजलत्वादिजातिमति जलादौ अतिव्याप्तिवारणाय **रूपद्वयवद्वृत्ति** इति । द्रव्यत्वव्याप्यजलपृथिव्यन्यतरत्वादिरूपधर्मम् आदाय जलादौ अतिव्याप्तिवारणाय **जाति** इति ।

अपेक्षाबुद्धिविशेषविषयत्वरूपद्वित्वादिघटितत्वेन गौरवात् आह – **रूपनाश** इति । अत्रापि प्रतिपदव्यावृत्तिः पूर्ववत् बोध्या । **''षड्विधस्तु रसः तत्र''** इति मूलोक्तं रसस्य षड्विधत्वं प्रकाशयति – **मधुर** इत्यादिना । ननु यत्र नानारसाः न उत्पन्नाः तत्र अव्याप्तिः इति, अत आह – **अत्रापि** इति । ननु मूले **''गन्धस्तु द्विविधो मतः''** इत्यनेन द्विविधगन्धवत्त्वं पृथिव्याः लक्षणं प्रदर्शितम्, तच्च अयुक्तम् । द्वैविध्यांशस्य वैयर्थ्यात् इति अत आह – **वस्तुस्थितिमात्रम्** इति । वस्तुगत्या गन्धः द्विविधः तिष्ठति इति सूचयितुम् उक्तम्, न तु लक्षणे द्वैविध्यस्यापि प्रवेशः इत्यर्थः । गन्धस्य द्वैविध्यं प्रकाशयति – **द्वैविध्यं च** इति ।।

राजीवोल्लासः

अपेक्षाबुद्धि इति । रूपद्वयवद्वृत्तित्वं नाम द्वित्वाश्रयरूपवद्वृत्तित्वम् । तत्र रूपनिष्ठं द्वित्वं न संख्यारूपम् । गुणे गुणानङ्गीकारात् । अपि तु अपेक्षाबुद्धिविशेष-विषयत्वरूपम् । तथा च अपेक्षाबुद्धिविशेषविषयरूपवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वं पर्यवस्यति । तदपेक्षया लाघवात् अपेक्षाबुद्धिविशेषविषयाघटितं रूपनाशवद्वृत्ति-द्रव्यत्वव्याप्यजातिमत्त्वं लक्षणम् उक्तम् इति भावः ।

न च – नाशत्वं नाम जन्याभावत्वम् । जन्यत्वं च व्याप्तिरूपनियमघटितं इति इदं लक्षणमेव पूर्वापेक्षया गुरु इति – वाच्यम् । नाशत्वम् अखण्डोपाधिरूपम् इति स्वीकारात् ।।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

कारिकावली

स्पर्शस्तस्यास्तु विज्ञेयो ह्यनुष्णाशीतपाकजः ।
नित्यानित्या च सा द्वेधा नित्या स्यादणुलक्षणा ।। ३६ ।।

मुक्तावली

स्पर्श इति । तस्याः – पृथिव्याः । अनुष्णाशीतस्पर्शवत्त्वं वायौ अपि वर्तत इति, अतः उक्तं **पाकज इति । इत्थं च** पृथिव्याः स्पर्शः अनुष्णाशीत इति ज्ञापनार्थं तदुक्तम् । पाकजस्पर्शवत्त्वमात्रं तु लक्षणम्, अधिकस्य वैयर्थ्यात् । **यद्यपि पाकजस्पर्शः पटादौ** नास्ति, तथापि **पाकजस्पर्शवद्वृत्तिद्रव्यत्वव्याप्य-जातिमत्त्वम्** अर्थो बोध्यः । **नित्या इति । सा** – पृथिवी द्विविधा नित्या अनित्या च इत्यर्थः । **अणुलक्षणा** परमाणुरूपा पृथिवी नित्या ।।

दिनकरी

अनुष्णाशीतत्वस्य वैयर्थ्यात् आह – **इत्थं च** इति । पाकजस्पर्शवत्त्वमात्रोक्तौ च इत्यर्थः । न्यायमते पाकजस्पर्शाभाववति पटे, वैशेषिकमते पाकजस्पर्शस्य परमाणुष्वेव विद्यमानत्वात् अवयविनि, **भागासिद्धिम्** आशङ्क्य निषेधति – **यद्यपि** इति । **पाकजस्पर्श** इति । ''पटादौ'' इति ''आदि'' पदेन वैशेषिकमते अवयविमात्रपरिग्रहः । **सत्तारूपजातिम्** आदाय गगनादौ अतिव्याप्तिवारणाय **द्रव्यत्वव्याप्य** इति । द्रव्यत्वसमानाधिकरणसत्तामादाय अतिव्याप्तिवारणाय व्याप्यभागः । स्पर्शसमानाधिकरणजलत्वादिकम् आदाय जलादौ अतिव्याप्तिवारणाय **पाकज** इति । पाकजद्रवत्वसमानाधिकरणतेजस्त्वम् आदाय तेजसि अतिव्याप्तिवारणाय **स्पर्श** इति । जलपृथिव्यन्यतरत्वम् आदाय जलादौ अतिव्याप्तिवारणाय **जाति** इति ।

अत्र च पृथिवीत्वस्य लक्ष्यतावच्छेदकत्वात् लक्षणत्वं न संभवति इति तत्परित्यागः । वस्तुतस्तु पृथिवीत्वजातिरपि पृथिव्याः लक्षणम् । न च –

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

व्यतिरेकसहचारेणापि अन्वयव्याप्तिरेव गृह्यते इति आचार्यमते पक्षतावच्छेदकस्य न हेतुत्वम् – इति वाच्यम् । ''हेतुः साध्यसमानाधिकरणः'' इति ज्ञानेऽपि ''हेतुमान् साध्यवान्'' इति बोधस्य अनिष्पन्नत्वेन पक्षतावच्छेदकत्वेऽपि हेतुत्वा-विरोधात्, व्यतिरेकव्याप्तेः गमकतायां तु सुतराम् । अणुत्वस्य द्व्यणुकेऽपि सत्त्वात् आह – परमाणुरूपा इति ।।

राजीवोल्लासः

भागासिद्धिम् इति – अव्याप्तिम् इत्यर्थः ।

पाकजस्पर्शाभाववति पटादौ अव्याप्तिवारणाय पाकजस्पर्शवद्वृत्तिद्रव्यत्व-व्याप्यजातिमत्त्वं पाकजस्पर्शवत्त्वम् इत्यनेन विवक्षितम् इति उक्तम् । तत्र दलप्रयोजनम् आह – **सत्तारूप** इत्यादिना । पाकजस्पर्शवत्फलादिवृत्तिः या जातिः सत्ता तद्वत्त्वस्य अलक्ष्ये जलादावपि सत्त्वात् अतिव्याप्तिः । तद्वारणाय जातौ द्रव्यत्वव्याप्येति विशेषणम् । द्रव्यत्वव्याप्येत्यस्य स्थाने द्रव्यत्वसमानाधि-करणेत्युक्तौ पुनरपि सत्तामादाय अतिव्याप्तिः, सत्तायाः द्रव्यत्वाधिकरण-द्रव्यवृत्तित्वात् । अतः द्रव्यत्वसमानाधिकरणेत्यनुक्त्वा द्रव्यत्वव्याप्येत्युक्तम् । द्रव्यत्वव्याप्यत्वं च द्रव्यत्वन्यूनवृत्तित्वम् । सत्तायां तु द्रव्यत्वन्यूनवृत्तित्वं नास्ति इति न दोषः । स्पर्शे ''पाकज'' इति विशेषणानुपादाने अपाकजस्पर्शवज्जलादि-वृत्तिद्रव्यत्वव्याप्यजलत्वादिजातिमति जलादौ अतिव्याप्तिः । तद्वारणाय ''पाकज'' इति स्पर्शविशेषणम् । स्पर्शपदम् अनुपादाय पाकजवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वं पृथिव्याः लक्षणम् इत्युक्तौ पाकजं – तेजस्संयोगजन्यं यत् द्रवत्वम् नैमित्तिकद्रवत्वं तद्वत्सुवर्णादिवृत्तिद्रव्यत्वव्याप्यतेजस्त्वजातिमति तेजसि अतिव्याप्तिः स्यात् । तद्वारणाय स्पर्शपदोपादानम् । जातिपदस्य स्थाने धर्मपदस्य निवेशे पाकजस्पर्शवत्फलादिवृत्तिः द्रव्यत्वव्याप्यः यः धर्मः जलपृथिव्यन्यतरत्वं तद्वत्त्वं जले अस्ति इति तत्र अतिव्याप्तिः । अतः जातीत्युक्तम् । अन्यतरत्वं तु न जातिः ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

ननु गन्धवत्त्वादीनि बहूनि पृथिव्याः लक्षणानि उक्तानि । तत्र पृथिवीत्वजातिमत्त्वमपि लक्षणतया कुतः न उक्तम् इति आशङ्क्य पृथिवीत्वजातेः पृथिवीलक्षणत्वे लक्ष्यतावच्छेदकं लक्षणं च अभिन्नं स्यात् इति पृथिवीत्वस्य लक्षणत्वपरित्याग इति आह – **अत्र च पृथिवीत्वस्य इति** ।

पृथिव्याः पृथिवीत्वं लक्षणमित्युक्ते लक्ष्या पृथिवी, लक्ष्यतावच्छेदकं पृथिवीत्वम्, लक्षणमपि पृथिवीत्वमेव इति लक्षणलक्ष्यतावच्छेदकयोः अभेदः स्यात् । ननु अस्तु नाम तयोः अभेदः, तावता को दोषः इति चेत्, – श्रूयताम् । लक्षणस्य हि लक्ष्ये इतरभेदानुमितिः प्रयोजनम् । लक्षणं लक्ष्योद्देश्यकेतरभेदविधेयकानुमितिजनकमिति यावत् । यथा गोः सास्नावत्त्वं लक्षणं चेत् ''गौः स्वेतरभिन्ना, सास्नावत्त्वात्'' इत्यनुमानेन गोः इतरभिन्नत्वं सिद्ध्यति । तथा प्रकृतेऽपि पृथिव्याः यदि पृथिवीत्वं लक्षणं तदा ''पृथिवी इतरभिन्ना, पृथिवीत्वात्'' इत्यनुमानं प्रयोक्तव्यम् । तत्र ''पृथिवी इतरभिन्ना'' इत्यनुमितिः । तां प्रति इतरभेदव्याप्यपृथिवीत्ववती पृथिवी इति परामर्शः कारणम् । व्याप्तिश्च हेतुव्यापकसाध्यसामानाधिकरण्यरूपा । तथा च पृथिवीत्वव्यापकेतरभेदसमानाधिकरणपृथिवीत्ववत् पृथिवी इति परामर्शस्य आकारः सम्पन्नः । तत्र पृथिवीत्वे इतरभेदसामानाधिकरण्ये भासमाने तुल्यवित्तिवेद्यतया इतरभेदे पृथिवीत्वसामानाधिकरण्यमपि भासते । तुल्यवित्तिवेद्यता नाम एकज्ञानविषयत्वम् । अनुमितौ च पक्षवृत्तित्वात्मकं पक्षतावच्छेदकसामानाधिकरण्यं साध्ये भासते । एवं च अनुमितिविषयस्य इतरभेदे पृथिवीवृत्तित्वस्य परामर्शेन विषयीकृततया परामर्शसिद्धस्यैव विषयस्य अनुमित्या साधनात् सिद्धसाधनाख्यः दोषः प्रसजति । अनुमितेः पूर्वं पक्षे साध्यनिश्चयसत्त्वे सिद्धसाधनदोषः भवति । पृथिव्याः यदि पृथिवीत्वजातिमत्त्वं लक्षणं तदा सिद्धसाधनाख्यदोषः प्रसजतीति पर्यालोच्य लक्षणान्तरानुधावनं कृतमिति भावः ।

वस्तुतस्तु इत्यादि । पृथिव्याः पृथिवीत्वम् लक्षणम् इति उक्तावपि न

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

दोषः । लक्षणस्य केवलव्यतिरेकित्वात्, व्यतिरेकव्याप्तिविशिष्टहेतुमत्तावगाहिपरामर्शे "इतरभेदाभावव्यापकीभूताभावप्रतियोगिपृथिवीत्ववती पृथिवी" इत्याकारके हेतुरूपे पक्षतावच्छेदके इतरभेदरूपसाध्यसामानाधिकरण्यस्य अभानेन परामर्शवेलायां पक्षतावच्छेदकरूपहेतुमति पक्षे साध्यस्य असिद्धेः सिद्धसाधनस्य अनवकाशात् इति भावः ।

ननु **उदयनाचार्याणां मते** केवलव्यतिरेकिस्थलेऽपि व्यतिरेकसहचारज्ञानात् अन्वयव्याप्तिग्रहणपूर्वकमेव अनुमितिः भवति । तथा हि – व्यापकसामानाधिकरण्यरूपान्वयव्याप्तिज्ञानमेव सर्वत्र अनुमितौ कारणम् । न च – एवम् अन्वयसहचारज्ञानेन "पृथिवी इतरेभ्यो भिद्यते गन्धवत्त्वात्" इत्यादौ अन्वयव्याप्तिज्ञानासंभवात् कथम् अनुमितिः इति – वाच्यम् । तत्र व्यतिरेकसहचारग्रहेणैव अन्वयव्याप्तिग्रहस्वीकारात् । तथा च अन्वयसहचारमात्रगृहीतव्याप्तिकत्वमेव केवलान्वयित्वम् । हेतौ व्यतिरेकसहचारमात्रगृहीतव्याप्तिकत्वं केवलव्यतिरेकित्वम् । उभयसहचारगृहीतव्याप्तिकत्वम् अन्वयव्यतिरेकित्वम् इति **आचार्यमतम्** । उभयव्याप्तिज्ञानस्य अनुमितिकारणतावादि**मणिकारमत** एव गृहीतान्वयमात्रव्याप्तिमत्त्वादिकं केवलान्वयित्वादिकम् इति बोध्यम् । तथा च पृथिव्याः पृथिवीत्वं लक्षणम् इति उक्तावपि "पृथिवी इतरेभ्यो भिद्यते" इत्याकारकानुमितिः व्यतिरेकसहचारगृहीतान्वयव्याप्तिविशिष्टहेतुमत्पक्षविषयकपरामर्शजन्या भवति । परामर्शस्य आकारस्तु – पृथिवीत्वव्यापकपृथिवीतरभेदसमानाधिकरणपृथिवीत्ववती इयम्" इति । अस्मिन् परामर्शे पृथिवीत्वरूपहेतौ – पक्षतावच्छेदके – इतरभेदरूपसाध्यसमानाधिकरणत्वस्य भानात् तुल्यवित्तिवेद्यतया इतरभेदरूपसाध्ये पृथिवीत्वरूपपक्षतावच्छेदकसामानाधिकरण्यमपि भासते । तथा च अनुमितिविषयस्य साध्ये पक्षतावच्छेदकसामानाधिकरण्यस्य अनुमितेः पूर्वं परामर्शवेलायामेव सिद्धत्वात् सिद्धसाधनरूपः दोषः भवति । अतः पक्षतावच्छेदकस्य न हेतुत्वम् इति आशयेन शङ्कते – **न च व्यतिरेकसहचारेण** इति । समाधत्ते – **हेतुः साध्यसमानाधिकरण** इति । अनुमितिसमानाकारायाः

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

सिद्धेः एव अनुमितिप्रतिबन्धकत्वम् । पक्षतावच्छेदकहेत्वोः यत्र ऐक्यं तत्र ''हेतुमान् साध्यवान्'' इत्याकारिका अनुमितिः । परामर्शकारस्तु तत्समानाकारकः न भवति । किन्तु हेतुः साध्यसमानाधिकरणः इत्याकारकः । स तु न अनुमितिविरोधी इति पक्षतावच्छेदकस्यापि हेतुत्वे बाधकाभावात् लक्ष्यतावच्छेदमपि लक्षणं भवितुम् अर्हति इति भावः ।

केवलव्यतिरेकिस्थले **मणिकारमतानुसारेण** व्यतिरेकव्याप्तिविषयकपरामर्श एव अनुमितिहेतुः इति स्वीकारे तु व्याप्तिज्ञाने हेतुसाध्ययोः सामानाधिकरण्यमेव न भासत इति सिद्धसाधनस्य अनवकाशात् पक्षतावच्छेदकहेत्वोः ऐक्ये व्यतिरेकव्याप्तिपरामर्शात् अनुमितेः सुतरामुत्पत्या पक्षतावच्छेदकस्य हेतुत्वेऽपि न कोऽपि दोषः इत्याशयेन आह – **व्यतिरेकव्याप्तेः गमकतायां** इति । गमकतायां इत्यस्य अनुमितिप्रयोजकतायाम् इत्यर्थः ।।

कारिकावली

अनित्या तु तदन्या स्यात् सैवावयवयोगिनी ।

मुक्तावली

तदन्या – परमाणुभिन्ना पृथिवी द्व्यणुकादिरूपा सर्वापि अनित्या इत्यर्थः । **सैव** – अनित्या पृथिव्येव अवयवती इत्यर्थः ।

ननु अवयविनि किं मानम्? **परमाणुपुञ्जैरेव** उपपत्तेः । न च – परमाणूनाम् अतीन्द्रियत्वात् घटादेः **प्रत्यक्षत्वं न स्यात्** इति – वाच्यम् । **एकस्य परमाणोः** अप्रत्यक्षत्वेऽपि **तत्समूहस्य** प्रत्यक्षत्वसंभवात् । **यथा** एकस्य केशस्य दूरेऽप्रत्यक्षत्वेऽपि **तत्समूहस्य** प्रत्यक्षत्वम् । न च ''एकः घटः स्थूलः'' इति बुद्धेः अनुपपत्तिः इति – वाच्यम् । ''एकः महान् धान्यराशिः'' इतिवत् उपपत्तेः ।

मैवम् । परमाणोः अतीन्द्रियत्वेन तत्समूहस्यापि **प्रत्यक्षत्वायोगात्** । **दूरस्थकेशस्तु** न अतीन्द्रियः, **सन्निधाने तस्यैव** प्रत्यक्षत्वात् । न च – तदानीं

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

दृश्यपरमाणुपुञ्जस्य उत्पन्नत्वात् न प्रत्यक्षत्वे विरोधः इति – वाच्यम् । अदृश्यस्य दृश्यानुपादानत्वात् । **अन्यथा** चक्षुरुष्मादिसन्ततेः कदाचित् दृश्यत्वप्रसङ्गात् । न च – अतितप्ततैलादौ कथम् अदृश्यदहनसन्ततेः दृश्यदहनोत्पत्तिः इति – वाच्यम् । तत्र तदन्तःपातिभिः दृश्यदहनावयवैः स्थूलदहनोत्पत्तेः उपगमात् । न च – अदृश्येन द्व्यणुकेन कथं दृश्यत्रसरेणोः उत्पत्तिः इति – वाच्यम् । यतः न वयं दृश्यत्वमदृश्यत्वं वा कस्यचित् **स्वभावात्** आचक्ष्महे, किं तु महत्त्वोद्भूतरूपादि-कारणसमुदायवशात् दृश्यत्वम्, तदभावे च अदृश्यत्वम् । तथा च त्रसरेणोः महत्त्वात् प्रत्यक्षत्वं, न तु द्व्यणुकादेः तदभावात् । न हि त्वन्मतेऽपि संभवति इदम्, परमाणौ महत्त्वाभावात् । इत्थं च अवयविसिद्धौ तेषाम् उत्पादविनाशयोः प्रत्यक्षसिद्धत्वात् अनित्यत्वम् ।।

दिनकरी

बौद्धः शङ्कते – **ननु** इति । ननु "अयं घटः" इत्यादिप्रतीतिरेव तत्र प्रमाणं भविष्यति, अत आह – **परमाणुपुञ्जैरेव** इति । विलक्षणसंस्थानविशिष्टैः परमाणुभिः एव इत्यर्थः । **उपपत्तेः** इति । "अयं घटः" इत्यादिप्रतीतेः उपपत्तेः इत्यर्थः । **तत्समूहस्य** – परमाणुसमूहस्य । तत्र दृष्टान्तमाह – **यथा** इति । **तत्समूहस्य** – केशसमूहस्य । **अनुपपत्तिः** इति । परमाणूनाम् अनेकत्वात् अणुत्वाच्च इति भावः । **इतिवत् उपपत्तेः** इति । तत्र यथा धान्यसमूहस्य एकत्वात् "एक" इति प्रतीतिः, एवं संयोगविशेषस्यैव महत्त्वात्मकतया "महान्" इति प्रतीतिः, तथा **परमाणुपुञ्जेषु अपि** इति भावः । **प्रत्यक्षत्वायोगात्** इति । तथा च स्वभावतः अयोग्यानां परमाणूनां परस्परसंयोगमात्रेण योग्यत्वं न संभवति इति भावः । दूरस्थकेशस्तु स्वभावतः न अतीन्द्रिय इति त्वदुक्तदृष्टान्तस्य वैषम्यम् इति आह – **दूरस्थकेशस्तु** इति । **तस्यैव** इति । **तस्य** – दूरस्थकेशस्य । "एव"कारश्च तच्छब्दप्राक्तनसन्निधानपदेन अन्वेति । तथा च सन्निधानत एव तस्य प्रत्यक्षत्वात् इत्यर्थः । तथा च दूरत्वस्य प्रतिबन्धकत्वात् तद्दशायाम् अप्रत्यक्षत्वमात्रं तस्य, न

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

तु स्वाभाविकम् अप्रत्यक्षत्वम् इति भावः । **उत्पन्नत्वात्** इति । **क्षणभङ्गवादिनां** मते परमाणूनाम् उत्पत्तिस्वीकारात् इति भावः । **अन्यथा** – **अदृश्यस्य दृश्योपादानत्वे** । **तत्र** – तादृशदहनोत्पत्तिस्थले । **तदन्तःपातिभिः** – अतितप्ततैलान्तःपातिभिः । **स्वभावात्** – कारणनैरपेक्ष्यात् । **उद्भूतरूपादि** इति । ''आदि''ना आलोकादिपरिग्रहः । **तदभावे** – महत्त्वोद्भूतरूपाद्यभावे । **तदभावात्** – महत्त्वाभावात् इत्यर्थः ।

अत्र **नास्तिकमतानुयायिनः** – परस्परविभक्तपरमाणूनां महत्त्वाभावात् अप्रत्यक्षत्वेऽपि परस्परसंयुक्तानां पुञ्जात्मनां तेषां प्रत्यक्षे बाधकाभावः । न च – महत्त्वाभाव एव बाधकः, परस्परविलक्षणसंयोगरूपस्यैव महत्त्वस्य प्रत्यक्षजनकत्वात् । न च – परमाणूनां नित्यत्वात् घटादौ उत्पत्तिनाशप्रतीत्यनुपपत्तिः इति – वाच्यम् । तन्मते पदार्थमात्रस्यैव क्षणिकत्वात् परमाणूनाम् उत्पत्तिनाशयोः स्वीकारात् । न च – परमाणुपुञ्जेषु घटत्वाङ्गीकारे ''कपालाद् घटः'' इति प्रतीत्यनुपपत्तिः, परमाणूनां कपालजन्यत्वाभावात् इति – वाच्यम् । तन्मते कपालस्यापि परमाणुपुञ्जरूपतया घटरूपपुञ्जेषु कपालरूपपुञ्जजन्यत्वस्वीकारात्, पुञ्जात् पुञ्जोत्पत्तिः इति तेषां सिद्धान्तात् इत्याहुः ।

तन्न । ''घटः'' इत्यादिप्रतीतिविषयताया अनेकपरमाणुषु कल्पने गौरवात् इति अवयवातिरिक्तावयविसिद्धिः इति दिक् ॥

राजीवोल्लासः

विलक्षणसंस्थानविशिष्टैः इति । विलक्षणसंयोगविशिष्टैः इत्यर्थः ।

मुक्तावल्यां प्रत्यक्षत्वं न स्यात् इति । तथा च ''घटादिः न परमाणवः परमाण्ववृत्तिप्रत्यक्षत्वरूपधर्मवत्त्वात्'' इत्यनुमानेन परमाण्वतिरिक्तावयविसिद्धिः इति भावः । उक्तानुमाने हेतुभूतस्य प्रत्यक्षत्वस्य परमाण्ववृत्तित्वं नास्ति इति तेन हेतुना परमाणुभिन्नत्वसाधनं न संभवति इति समाधत्ते – **एकस्य परमाणोः** इति ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

दिनकर्यां तथा परमाणुपुञ्जेषु अपि इति । परमाणुपुञ्जस्य एकत्वात् ''एकः'' इति एकत्वप्रतीतिः, संयोगविशेषस्य महत्त्वात्मकतया ''महान्'' इति प्रतीतिश्च उपपद्यते इति भावः । **तथा च स्वभावत इति** । स्वभावतः प्रत्यक्षायोग्यानां परमाणूनां परस्परं संयोगमात्रेण प्रत्यक्षयोग्यत्वं न संभवति । दूरस्थकेशस्तु दूरस्थत्वात् प्रत्यक्षायोग्यः, न तु स्वभावतः इति केशसमूहस्य प्रत्यक्षत्वं संभवति । ततः दृष्टान्तदार्ष्टान्तिकयोः वैषम्यम् इति भावः । **मूले सन्निधाने इति** । समीपस्थत्वे सति इत्यर्थः । **तस्यैव** – दूरस्थकेशस्यैव । ननु ''तस्यैव'' इत्यस्य दूरस्थकेशस्यैव इत्यर्थकत्वे ''एव''कारासङ्गतिः । घटादेरपि सन्निधाने सति प्रत्यक्षत्वात्, अत आह – **एवकारश्च इति** । ''एव''कारस्य तच्छब्दात् पूर्वं विद्यमानेन सन्निधानपदेन अन्वयः । तथा च दूरस्थकेशस्य सन्निधाने एव प्रत्यक्षत्वात् इत्यर्थः । ''एव'' कारेण दूरस्थत्वे सति प्रत्यक्षत्वं न संभवति इति बोध्यते । एवं च केशनिष्ठस्य दूरत्वस्य प्रत्यक्षप्रतिबन्धकत्वात् दूरस्थतादशायां अप्रत्यक्षत्वं तस्य । न तु स्वाभाविकम् अप्रत्यक्षत्वं इति भावः ।

ननु अदृश्यपरमाणुपुञ्जात् दृश्यपरमाणुपुञ्जस्य ''घट'' इत्याकारकप्रत्यक्षात् पूर्वं उत्पत्तिः मूलोक्ता न संगच्छते । परमाणूनां नित्यत्वात् इति आशङ्क्य आह – **क्षणभङ्गवादिनाम् इति** । उत्पन्नस्य वस्तुतः स्वोत्पत्यनन्तरक्षणे विनाशः क्षणभङ्गः । तद्वादिनां बौद्धानां मते परमाणूनामपि उत्पत्तिः स्वीक्रियत इति भावः । **अदृश्यस्य इति** – स्वभावतः दर्शनायोग्यस्य द्रव्यस्य इत्यर्थः । **दृश्योपादानत्वे इति** । दर्शनयोग्यद्रव्योपादानत्वे इत्यर्थः ।

दिक् इति । त्र्यणुक एव अवयवधाराया विश्रान्तिः इति दीधितिकारमते त्र्यणुकपुञ्जस्य केशसमूहवत् प्रत्यक्षसंभवेऽपि नानात्र्यणुकानां तादृशप्रतीतिविषयत्व-कल्पने गौरवादेव अतिरिक्तावयविसिद्धिः इति सूचितम् ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

मुक्तावली

तेषां च अवयवधाराया अनन्तत्वे **मेरुसर्षपयोः** अपि **साम्यप्रसङ्गः** । अतः **क्वचिद्विश्रामः** वाच्यः । **यत्र तु** विश्रामः तस्य अनित्यत्वे **असमवेतकार्योत्पत्तिप्रसङ्गः**, अतः तस्य नित्यत्वम् । **महत्परिमाणतारतम्यस्य** गगनादौ विश्रान्तत्वमिव अणुपरिमाणतारतम्यस्यापि क्वचिद्विश्रान्तत्वम् अस्ति इति तस्य परमाणुत्वसिद्धिः । न च – त्रसरेणौ एव विश्रामः अस्तु इति – वाच्यम् । ''त्रसरेणुः सावयवः, **चाक्षुषद्रव्यत्वाद्, घटवत्**'' इति अनुमानेन **तदवयवसिद्धौ** ''त्रसरेणोः अवयवाः सावयवाः, महदारम्भकत्वात् कपालवत्'' इति अनुमानेन **तदवयवसिद्धेः** । न च इदम् अप्रयोजकम्, अपकृष्टमहत्त्वं प्रति अनेकद्रव्यवत्त्वस्य प्रयोजकत्वात् । न च – एवं क्रमेण तदवयवधारापि सिद्ध्येत् इति – वाच्यम् । अनवस्थाभयेन **तदसिद्धेः** इति ।।

दिनकरी

मेरुसर्षपयोः इति । ''**अपि**'' शब्दः ''**साम्यप्रसङ्गः**'' इत्युत्तरं संबध्यते, तेन च द्व्यणुकस्य सावयवारब्धत्वे **महत्त्वापत्तिः** समुच्चीयते । साम्यं – **परिमाणतारतम्याभावः, परिमाणकारणीभूतायाः** अवयवसङ्ख्यायाः उभयत्र साम्यात् इति भावः । न च – मेर्ववयवानां सर्षपतुल्यपरिमाणवत्त्वम्, न तु सर्षपावयवानां सर्षपतुल्यपरिमाणवत्त्वम् इति अवयवपरिमाणविशेषात् विशेषः इति – वाच्यम् । मेर्ववयवसर्षपावयवयोः अपि अनन्तावयवत्वेन तत्परिमाणतारतम्याभावस्यापि आपादनीयत्वात् । **न च** – मेरुसर्षपयोः अवयवगतप्रचयाख्यसंयोगविशेषात् तद्विशेषः इति – वाच्यम् । **प्रचयविशेषस्यापि** संख्याविशेषनियम्यत्वेन संख्याविशेषाभावे तद्विशेषानुपपत्तेः इति ।

ननु तथापि विश्रमाश्रयस्य नित्यत्वे मानाभावः इति, अत आह – **यत्र तु** इति । **असमवेतकार्योत्पत्तिप्रसङ्गः** इति । **असमवेतभावकार्योत्पत्तिप्रसङ्गः**

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

इत्यर्थः । ननु तस्य नित्यत्वसिद्धावपि अणुत्वे किं मानम्? इति अत आह – **महत्परिमाण इति । चाक्षुषद्रव्यत्वात् इति । अत्र आत्मनि व्यभिचारवारणाय** चाक्षुषपदम् । घटाभावे व्यभिचारवारणाय द्रव्यपदम् । **तदवयवसिद्धौ** इति । त्रसरेण्ववयवसिद्धौ इत्यर्थः । **तदसिद्धेः** इति । अवयवधाराया असिद्धेः इत्यर्थः ।

अत्र नव्याः – "त्रसरेणोः अवयवाः सावयवाः" इत्याद्यनुमानयोः उक्तयोः अप्रयोजकत्वेन त्रुटावेव विश्रामः । न च – चाक्षुषं प्रति महत्त्वं कारणम्, तथा च त्रुटौ महत्त्वम् आवश्यकम्, तच्च अवयवसंख्याजन्यम् इति अवयवं विना तत् न उत्पद्यते इति अनुकूलतर्कसत्त्वात् न अप्रयोजकत्वं द्व्यणुकसाधकानुमानस्य इति – वाच्यम् । त्रसरेणुमहत्त्वस्य नित्यत्वस्वीकारेण उक्ततर्कानवतारात् । न च – अणुव्यवहारस्य अणुपरिमाणनिबन्धनतया तदाश्रयद्रव्यसिद्धिः आवश्यकी इति – वाच्यम् । तस्य अपकृष्टपरिमाणनिबन्धनत्वात्, महत्यपि महत्तमात् अणुव्यवहारात् । न च – एवं त्रसरेणुपुञ्ज एव अस्तु अवयवी इति – वाच्यम् । विशकलितेष्वपि तेषु "घट" इत्यादिप्रत्ययप्रसङ्गात् । न च – तत्संयोगवृत्त्येव घटत्वम्, "घटः द्रव्यम्" इत्यादिप्रतीतौ च परम्परया तद्भानम् इति – वाच्यम् । संभवति साक्षात्संबन्धविषयत्वे परम्परासंबन्धविषयकत्वकल्पने गौरवात् – इत्याहुः ।

ननु परमाणुत्रयेण कुतः न द्रव्यान्तरोत्पत्तिः? परमाणुद्वयेन द्व्यणुकवत् । एवं द्व्यणुकद्वयेन द्रव्यान्तरोत्पत्त्यापत्तिः, त्रिभिः द्व्यणुकैः त्र्यणुकवत् इति चेत्, न । प्रमाणाभावेन तादृशद्रव्यासिद्धौ परमाणुत्रये द्व्यणुकद्वये च द्रव्यारम्भकसंयोगाकल्पनात् ।

अत्र इदं चिन्त्यम् । त्रिभिः परमाणुभिः एव त्र्यणुकम् अस्तु, परमाणुभ्याम् अनारम्भस्तु सिद्धान्तिनां द्व्यणुकाभ्याम् अनारम्भ इव मानाभावात् फलबलेन त्रयाणामेव युगपत् द्रव्यारम्भकसंयोगकल्पनात् । वस्तुतः गवाक्षरन्ध्रे दृश्यमानानां द्व्यणुकत्वमेव युक्तम् अणुद्वयारब्धत्वे लाघवात् इति ।।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

राजीवोल्लासः

मूले साम्यप्रसङ्ग इति । मेरुः यदि सर्षपावयवपर्याप्तसंख्याधिकसंख्यापर्याप्त्यधिकरणावयवकः न स्यात्, तदा सर्षपपरिमाणोत्कृष्टपरिमाणवान् न स्यात् इति तर्कः अत्र विवक्षितः । दर्शिततर्कोत्थापकं आपादकस्य आपाद्यव्याप्यत्वं बोधयितुं तदभावयोः प्रयोज्यप्रयोजकभावम् आह **दिनकर्याम् – परिमाणकारणीभूताया** इति । अन्यदेव परिमाणतारतम्यप्रयोजकम् अस्ति इति शङ्कां अपनयति – **न च** इत्यादिना । **प्रचयविशेषस्य** इति । परिमाणोत्कर्षप्रयोजकत्वविशिष्टप्रचयस्य इत्यर्थः । ''विशिष्टे विधिनिषेधौ विशेषणमुपसंक्रामतः, सति विशेष्ये बाधे'' इति नियमेन सिद्धं परिमाणोत्कर्षप्रयोजकत्वं तत्रैव यत्र अवयवसंख्यानियमः । यथा द्वित्रैः प्रचितैः अवयवैः आरब्धद्रव्यपरिमाणस्य उत्कर्षः, द्वित्रैः पञ्चषैर्वा अवयवैः आरब्धद्रव्यपरिमाणापेक्षया भवेत्, न तु सहस्रावयवारब्धद्रव्यपरिमाणापेक्षया, सुतरां संख्याविहीनावयवारब्धद्रव्यपरिमाणापेक्षया इति भावः ।

मूले **क्वचित् विश्राम** इति । क्वचित् अवयवसमुदायघटके कस्मिंश्चित् विश्रामः-निरवयवत्वम् वाच्यः – अङ्गीकार्यः । यद्वा क्वचित् – कुत्रचित् विश्रामः निरवयवत्वसमानाधिकरणस्वघटकत्वम् । अवयवधारायाः इत्यनुषज्यते ।

महत्त्वापत्तिः इति । द्व्यणुकस्य सावयवपरमाणुजन्यत्वं यदि स्यात् तदा स्वाश्रयसमवेतसमवेतत्वसंबन्धेन द्व्यणुकावयवावयवगतायाः बहुत्वसंख्यायाः द्व्यणुके सत्त्वात् द्व्यणुके अपकृष्टमहत्त्वं स्यात् । अपकृष्टं महत्वं प्रति स्वाश्रयसमवेतसमवेतत्वसंबन्धेन संख्यायाः कारणत्वात् । तथा च द्व्यणुके महत्वसत्त्वात् तस्य प्रत्यक्षविषयत्वं स्यात् ।

परिमाणतारतम्याभाव इति । परिमाणनिष्ठापकर्षसमानाधिकरणोत्कर्षः परिमाणतारतम्यम् । तदभावः परिमाणतारतम्याभावः । **परिमाणकारणीभूताया** इति । परिमाणगतोत्कर्षापकर्षप्रयोजिकाया इत्यर्थः ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

संयोगविशेषात् इति । मुष्टिपरिमिततूलस्य यथा प्रचयविशेषेण परिमाणतारतम्यम् अनुभवसिद्धं, तथा मेरोरवयवेषु अत्यन्तशिथिलसंयोगात् मेरुपरिमाणस्य उत्कर्षः सर्षपावयवेषु च किंचिच्छिथिलसंयोगात् तत्परिमाणस्य अपकर्ष इति भावः । **असमवेतभावकार्योत्पत्तिप्रसङ्ग** इति । यत्र परमाणौ अवयवधारायाः विश्रान्तिः तस्य – परमाणोः अनित्यत्वे सति क्वचित् असमवेतस्यैव परमाणुरूपकार्यस्य उत्पत्तिः प्रसज्यते । कार्यं सर्वं क्वचित् समवेतं सदेव उत्पद्यते इति नियमः । तस्य नियमस्य परमाणूत्पत्तौ भङ्गः स्यात् । यद्यपि ध्वंसरूपं कार्यं क्वचित् असमवेतमेव उत्पद्यते, तथापि भावरूपं कार्यं सर्वमपि समवेतमेव उत्पद्यते इति नियमात् परमाणुरूपभावकार्यस्य निरवयवस्य उत्पत्तिस्वीकारे पूर्वोक्तनियमभङ्गः स्यात् इति भावः ।

मुक्तावल्यां महत्वपरिमाणतारतम्यस्य इति । ''अणुपरिमाणतारतम्यं क्वचित् विश्रान्तम्, परिमाणतारतम्यत्वात्, महत्परिमाणतारतम्यतवत्'' इत्यनुमानम् अत्र विवक्षितम् । ''अणुपरिमाणतारतम्यम्'' इत्यस्य अणुत्वनिष्ठः अपकर्षसमानाधिकरणोत्कर्षः इत्यर्थः । अयमेव पक्षः । ''क्वचिद्विश्रान्तम्'' इति साध्यम् । किञ्चिन्निष्ठापकर्षासमानाधिकरणोत्कर्षावधिनिष्ठः परिमाणतारतम्यत्वं हेतुः । परिमाणनिष्ठापकर्षसमानाधिकरणोत्कर्षत्वं हेतुः इति यावत् । महत्परिमाणतारतम्यं दृष्टान्तः । महत्त्वनिष्ठापकर्षसमानाधिकरणोत्कर्षः इति तदर्थः । अत्र च पर्वताद्यपेक्षया घटः अणुः, तदपेक्षया कपालः अणुतरः, तदपेक्षया त्रसरेणुः अणुतम इत्यादि व्यवहारात् कपालनिष्ठाणुत्वे त्रसरेणुनिष्ठाणुत्वापेक्षया अपकर्षस्य घटनिष्ठाणुत्वापेक्षया उत्कर्षस्य च सत्त्वात् तादृशापकर्षसमानाधिकरणोत्कर्षस्य पक्षत्वम् । ''घटो महान्'', ''गजो महत्तरः'', ''पर्वतो महत्तमः'' इत्यादिव्यवहारात् गजमहत्त्वे पर्वतमहत्वात् अपकर्षस्य घटमहत्त्वात् उत्कर्षस्य च सद्भावात् गजमहत्त्वनिष्ठस्य अपकर्षसमानाधिकरणोत्कर्षस्य दृष्टान्तत्वम् । तादृशमहत्त्वे परममहत्परिमाणनिष्ठापकर्षासमानाधिकरणोत्कर्षावधित्वसद्भावात् दृष्टान्ते साध्योपपत्तिः । पक्षे च उक्तसाध्यसिद्धौ

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अपकर्षासमानाधिकरणोत्कर्षाश्रयपरिमाणसिद्ध्या तदाश्रयपरमाणुसिद्धिः । अत्र उत्कर्षत्वमात्रस्य पक्षतावच्छेदकत्वे परममहत्परिमाणनिष्ठोत्कर्षे उक्तसाध्यविरहात् बाधः स्यात् इति अपकर्षासमानाधिकरणेति विशेषणम् । तावतापि सिद्धसाधनस्य अवारणात् अणुपरिमाणनिष्ठेति उत्कर्षविशेषणम् । अणुपरिमाणनिष्ठोत्कर्षत्वेन पक्षत्वे सिद्ध्यत्परमाणुनिष्ठपरिमाणनिष्ठोत्कर्षे बाधः स्यात् इति अपकर्षसमानाधिकरण इति उत्कर्षविशेषणम् । अनुमितेः प्राक् उक्तबाधज्ञानासंभवेऽपि अनुमित्यनन्तरं तथाविधबाधज्ञानात् उत्पन्नानुमितौ अप्रामाण्यग्रहसंभवात् तस्यापि परिहरणीयत्वमेव । अवधिनिष्ठत्वस्य उत्कर्षावधिनिष्ठत्वस्य वा साध्यत्वे सिद्धसाधनं स्यात् इति साध्यशरीरे अपकर्षासमम्नाधिकरणत्वम् उत्कर्षविशेषणम् । उत्कर्षत्वमात्रस्य हेतुत्वे परममहत्परिमाणनिष्ठोत्कर्षे व्यभिचारात् अपकर्षसमानाधिकरणेति विशेषणम् ।

अत्र आत्मनि व्यभिचारवारणाय इति । "त्रसरेणुः सावयवः, चाक्षुषद्रव्यत्वात्, घटवत्" इत्यनुमाने हेतौ चाक्षुषपदानुपादाने सावयवत्वरूपसाध्याभाववति आत्मनि द्रव्यत्वसत्त्वात् व्यभिचारः । तद्वारणाय चाक्षुषपदम् । चक्षुरिन्द्रियजन्यप्रत्यक्षविषयत्वे सति द्रव्यत्वं हेतुः । आत्मनि सत्यन्तविरहात् न व्यभिचारः । अत्रैव द्रव्यत्वानुपादाने सावयवत्वाभाववति घटाभावे चाक्षुषत्वसत्त्वात् व्यभिचारः । तद्वारणाय द्रव्यत्वात् इति । न च – घटगतरूपादिगुणादिषु सावयवत्वविरहात् तत्रैव व्यभिचारस्य वक्तुं शक्यतया घटाभावपर्यन्तानुधावनं किमर्थम् इति – वाच्यम् । अत्र साध्यस्य सावयवत्वस्य अवयवसमवेतत्वरूपतया गुणादिषु अवयवसमवेतत्वस्य सत्त्वेन व्यभिचारासंभवात् । घटाभावे तु समवेतत्वविरहात् व्यभिचारस्य संभवात् । **परम्परया इति** । "घटः द्रव्यम्" इत्यादिप्रतीतौ स्वाश्रयसमवायित्वसंबन्धेन घटत्वभानम् इत्यर्थः । **आहुः** इत्यनेन विलक्षणसंयोगविशिष्टत्र्यणुकपुञ्ज एव घटत्वाङ्गीकारे न एष दोषः इति अस्वरसः सूचितः । **अत्र इदम् चिन्त्यम् इति** । अपकृष्टमहत्त्वं प्रति स्वाश्रयसमवेतत्वसंबन्धेन बहुत्वसंख्यैव हेतुः, न तु समवेतसमवेतत्वसंबन्धेन अनेकद्रव्यवत्त्वम्, गौरवात् इत्यभिप्रायः ।।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

कारिकावली

सा च त्रिधा भवेत् देहमिन्द्रियं विषयस्तथा ॥ ३७ ॥

मुक्तावली

सा च इति । सा – कार्यरूपा पृथिवी त्रिविधा । शरीरेन्द्रियविषयभेदात् इत्यर्थः ।

दिनकरी

मूलस्थस्य "**देहमिन्द्रियं विषयस्तथा**" इत्यस्य त्रैविध्ये हेतुपरत्वं सूचयितुम् अर्थम् आह – **सा कार्यरूपा** इति ॥

राजीवोल्लासः

हेतुपरत्वं – कार्यपरत्वम् । परमाणोः विषयत्वेऽपि "**विषयस्तथा**" इत्यस्य जन्यविषयार्थकतया परमाणोः तथात्वं नास्त्येव । अत एव कारिकायां अग्रेऽपि "**विषयो द्व्यणुकादिस्तु ब्रह्माण्डान्तः उदाहृतः**" इत्येवं वक्ष्यति इति भावः ॥

कारिकावली

योनिजादिः भवेद्देहम् इन्द्रियं घ्राणलक्षणम् ।
विषयो द्व्यणुकादिस्तु ब्रह्माण्डान्त उदाहृतः ॥ ३८ ॥

मुक्तावली

तत्र देहम् उदाहरति – **योनिजादि** इति । योनिजम् अयोनिजं च इत्यर्थः । योनिजमपि द्विविधम् – जरायुजम् अण्डजं च इति । जरायुजं मानुषादीनाम् । अण्डजं सर्पादीनाम् । अयोनिजं स्वेदजोद्भिज्जादिकम् । स्वेदजाः कृमिदंशाद्याः । उद्भिदः तरुगुल्माद्याः । नारकिणां शरीरमपि अयोनिजम् ।

न च – मानुषादिशरीराणां पार्थिवत्वे किं मानम् इति – वाच्यम् ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

गन्धादिमत्त्वस्यैव प्रमाणत्वात् । न च – क्लेदोष्मादेः उपलम्भात् आप्यत्वादिकमपि स्यात् इति – वाच्यम् । तथा सति जलत्वपृथिवीत्वादिना संकरप्रसङ्गात् । न च – तर्हि जलीयत्वादिकमेव अस्तु, न तु पार्थिवत्वम् इति – वाच्यम् । क्लेदादीनां विनाशेऽपि शरीरत्वेन प्रत्यभिज्ञानात् गन्धाद्युपलब्धेश्च पृथिवीत्वसिद्धेः । **तेन** पार्थिवादिशरीरे जलादीनां निमित्तत्वमात्रं बोध्यम् ।

शरीरत्वं न जातिः, पृथिवीत्वादिना साङ्कर्यात् । **किंतु** चेष्टाश्रयत्वम्, वृक्षादीनामपि चेष्टाश्रयत्वात् न अव्याप्तिः ।।

दिनकरी

योनिजम् – शुक्रशोणितयोः परस्परमेलनजन्यम् । तद्भिन्नम् अयोनिजम् । **जरायुजम्** इति । गर्भवेष्टनचर्मपुटकं जरायुः । **मानुषादीनाम्** इति ''आदि''ना पशुमृगादीनां परिग्रहः । ''**सर्पादीनाम्**'' इति ''आदि''ना विहङ्गमादिपरिग्रहः । **स्वेदजम्** उदाहरति – **कृमिदंशाद्या** इति । तच्छरीराणाम् उत्पत्तेः अधर्मविशेषसहितेभ्यः अणुभ्य एव स्वीकारात् इति भावः । ''**उद्भिज्जादिकम्**'' इति ''आदि''ना देवादिशरीरपरिग्रहः । तच्छरीराणामुत्पत्तेः धर्मविशेषसहितेभ्यः अणुभ्य एव स्वीकारात् इति भावः । तेषाम् अयोनिजत्वे तु आगम एव ''ब्रह्मणो मानसा मन्वादयः पुत्राः'' इत्यादिः प्रमाणम् । ''योनिं विना न शरीरम्'' इत्येवंविधागमे च योनिपदं कारणमात्रपरम्, शरीरपदं वा मनुष्यदेहपरम् । ''**गन्धादि**'' इति ''आदि''ना शुक्लेतररूपपरिग्रहः । ''**क्लेदोष्मादेः** इत्यादिना व्यूहावकाशपरिग्रहः । **क्लेदः** – क्षरणं, स्वेद इति यावत् । **ऊष्मा** – पाकः औष्ण्यम् इति यावत् । तच्च शरीरसंबन्धेन पुष्पादौ रूपादिपरावृत्त्या अनुमीयते, अनुष्णात् तदनुत्पत्तेः । **व्यूहः** – क्रिया । **अवकाशः** – मुखादौ अन्नादिगत्यप्रतिबन्धः । ननु कथं तर्हि शरीरे पाञ्चभौतिकत्वव्यवहारः इति, अत आह – **तेन** इति । शरीरस्य पार्थिवत्वसाधनेन इत्यर्थः । एवं च शरीरे पाञ्चभौतिकत्वव्यवहारः न पञ्चभूतोपादानकत्वनिबन्धनः,

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

किंतु तज्जन्यत्वनिबन्धनः । तत्रापि एकैकस्य उपादानत्वं चतुर्णां निमित्तत्वम् इति विवेकः । **किन्तु चेष्टा** इति । चेष्टात्वं जातिविशेषः "चेष्टते" इति प्रत्यक्षसिद्धः । न च – शरीरत्वमेव पृथिवीत्वादिव्याप्यजातिः, चेष्टात्वं तु **तत्क्रियात्वम्** इति – वाच्यम् । पृथिवीत्वादिना **सङ्करेण** पृथिवीत्वादिव्याप्यानेकशरीरत्वकल्पने गौरवात् ।।

राजीवोल्लासः

तत्क्रियात्वम् इति । शरीरसमवेतक्रियात्वमित्यर्थः । **सङ्करेण** इति । पृथिवीत्वं विहाय शरीरत्वस्य जलीयशरीरादौ, शरीरत्वं विहाय पृथिवीत्वस्य घटादौ, उभयोश्च मानुषादिशरीरे समावेशेन इत्यर्थः । एतादृशसाङ्कर्यपरिहारार्थं पृथिवीत्वव्याप्यानाम् अनेकेषां शरीरत्वानां कल्पने गौरवात् ।

मुक्तावली

न च – वृक्षादेः शरीरत्वे किं मानम् इति – वाच्यम् । आध्यात्मिकवायुसंबन्धस्य प्रमाणत्वात् । तत्रैव किं मानम् इति चेत्, न । भग्नक्षतसंरोहणादिना तदुन्नयनात् । यदि हस्तादौ शरीरव्यवहारः न भवति, तदा अन्त्यावयवित्वेन विशेषणीयम् ।

न च – यत्र शरीरे चेष्टा न जाता, तत्र अव्याप्तिः इति – वाच्यम् । तादृशे प्रमाणाभावात् । अथवा चेष्टावदन्त्यावयविवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वं अन्त्यावयविमात्रवृत्तिचेष्टावद्वृत्तिजातिमत्त्वं वा तत् । मानुषत्वचैत्रत्वादिजातिम् आदाय लक्षणसमन्वयः ।

न च – नृसिंहशरीरे कथं लक्षणसमन्वयः? तत्र नृसिंहत्वस्य एकव्यक्तिवृत्तितया जातित्वाभावात्, जलीयतैजसशरीरवृत्तितया देवत्वस्यापि जातित्वाभावात् इति – वाच्यम् । कल्पभेदेन नृसिंहशरीरस्य नानात्वेन नृसिंहत्वजात्या लक्षणसमन्वयात् ।।

दिनकरी

आध्यात्मिक इति । आध्यात्मिकवायुः प्राणाख्यः । शङ्कते – तत्रैव

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

इति । **भग्नक्षत इति** । भग्नक्षतयोः विभागविशेषविश्लिष्टावयवयोः संरोहणम् । ''आदि''ना वृद्धिसंग्रहः । वृद्धिश्च अवयवोपचयः । **तदुन्नयनात् इति** । आध्यात्मिकवायुसम्बन्धानुमितेः ।

ननु भग्नक्षतसंरोहणादिहेतुभूतवायोः प्राणत्वे प्रमाणाभावः इति चेत्, न ।

''नर्मदातीरसंजाताः सरलार्जुनपादपाः ।
नर्मदातोयसंस्पर्शात्ते यान्ति परमां गतिम् ।।

गुरुं हुंकृत्य तुंकृत्य विप्रं निर्जित्य वादतः ।
श्मशाने जायते वृक्षः कङ्कगृध्रोपसेवितः ।।''

इत्यागमस्यैव तत्र मानत्वात् । **अन्त्यावयवित्वेन इति** । द्रव्यानारम्भकद्रव्यत्वेन इत्यर्थः । मृतशरीरे चेष्टाया अभावेन अव्याप्तेः आह – **अथ वा इति** । घटत्वम् आदाय घटे अतिव्याप्तिवारणाय ''**चेष्टावत्**'' इति । हस्तादौ अतिव्याप्तिवारणाय ''**अन्त्यावयवि**'' इति ।

न च – हस्तत्वादिकं न जातिः, पृथिवीत्वादिना सङ्करात् इति – वाच्यम् । पृथिवीत्वादिव्याप्यनानाहस्तत्वाद्यङ्गीकारात् । पृथिवीत्वरूपतादृशजातिमति घटादौ अतिव्याप्तिः, अतः लक्षणान्तरम् आह – **अन्त्यावयवि इति** । ''**अन्त्यावयविमात्रवृत्ति**'' इत्यनेन द्रव्यत्वादिजातिव्युदासः । ''**चेष्टावद्वृत्ति**'' इत्यनेन घटत्वादिव्युदासः । चेष्टा च हिताहितप्राप्तिपरिहारार्था क्रिया ग्राह्या, न तु स्पन्दनमात्रं ग्राह्यम्, घटादावपि सत्त्वात् । ननु देवत्वजातिम् आदाय लक्षणसमन्वयः इति, अत आह – **जलीय इति** । **देवत्वस्यापि इति** ।''अपि''ना नृसिंहत्वपरिग्रहः । **जातित्वाभावात् इति** । जातिसाङ्कर्यात् इति भावः । जातिसाङ्कर्यस्य अदोषत्वे देवत्वशरीरत्वादेः नानाजातित्वाङ्गीकारे वा देवत्वशरीरत्वजातिम् आदायैव लक्षणसमन्वयः इति ध्येयम् ।।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

राजीवोल्लासः

भग्नक्षतसंरोहणं नाम भङ्गादिना स्वनाशानन्तरं स्वावयवेषु स्वसजातीयोत्पत्तिः । तथा च ''वृक्षादिः प्राणवान् भग्नक्षतसंरोहवत्त्वात्'' इति अनुमानम् अत्र विवक्षितम् ।

प्राणत्वे प्रमाणाभाव इति । संरोहणादिकं प्रति वायुसंबन्धविशेष एव निमित्तम् । इत्थं च प्राणवत्त्वसाधने पूर्वोक्तहेतोः अप्रयोजकत्वम् इति भावः ।

मानत्वात् इति । धर्मविशेषेण उत्तमगतिप्राप्तेः वृक्षस्य जीवशरीरत्वम् आवश्यकम् । तच्छरीरिजीवस्यैव उत्तमगतिप्राप्तिसंभवात् जीवात्मनः भोगायतनस्य च प्राणवत्त्वनियमात् इति भावः । **द्रव्यानारम्भकद्रव्यत्वेन** इति । इदं च अन्त्यावयविपदार्थप्रदर्शनम् । यदि च गगनादौ अन्त्यावयविव्यवहारः नास्ति, तदा द्रव्यपदं कार्यद्रव्यपरम् । लक्षणे तु समवायेन द्रव्यविशिष्टान्यत्वरूपं द्रव्यानारम्भकत्वं निवेशनीयम् ।

मूले – **तादृशे प्रमाणाभावात्** इति । योगाभ्यासपाटवेन बहुकालं निश्चेष्टतासंपादनेऽपि तत्र शरीरे उपचयापचयादर्शनेन पूर्वदृष्टात् चेष्टावतः शरीरात् भेदे प्रमाणाभावात् इति भावः ।

न च इति । यद्यपि हस्तत्वस्य जातित्वाभावेऽपि पृथिवीत्वादिकमादायैव अतिव्याप्तिः प्रसज्यत एव, तथापि पृथिवीत्वादिकम् आदाय एतल्लक्षणे घटादौ अतिव्याप्तेः वक्ष्यमाणतया तत् आदाय व्यावृत्तिप्रदर्शनम् अनुचितम् इति हस्तत्वस्य जातित्वसाधनाय परिश्रमः । ननु अत्र शरीरलक्षणप्रविष्टं चेष्टात्वं यदि शरीरक्रियानिष्ठजातिविशेषः, तदा मन्त्रादिमहिम्ना नोदनं विनापि यत्र अचेतने घटादौ क्रियोत्पत्तिः, तत्रापि मन्त्रमहिम्ना ''घटः चेष्टते'' इति प्रयोगात् तत्रापि तादृशजातेः अङ्गीकरणीयतया घटत्वम् आदाय घटादौ अतिव्याप्तिः । यदि च

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

शरीरक्रियात्वं चेष्टात्वं तदा आत्माश्रय इत्यतः चेष्टात्वं प्रकारान्तरेण निर्वक्ति – **चेष्टा च** इति ।

अन्त्यावयविमात्रवृत्ति इति । अन्त्यावयविमात्रवृत्तित्वं च द्रव्यानारम्भकवृत्तित्वे सति द्रव्यारम्भकावृत्तित्वम् । तत्र द्रव्यानारम्भकवृत्तित्वनिवेशे प्रयोजनविरहात् द्रव्यारम्भकावृत्तित्वम् अत्र ''अन्त्यावयविमात्रवृत्ति'' इत्यनेन विवक्षितम् । तथा च द्रव्यारम्भकावृत्ति-चेष्टावद्वृत्ति-जातिमत्त्वं लक्षणम् इति पर्यवसितम् । यद्यपि पूर्वलक्षणे द्रव्यत्वव्याप्यत्वस्थाने द्रव्यत्वव्याप्यव्याप्यत्वनिवेशे पृथिवीत्वमादाय न अतिव्याप्तिः । द्रव्यत्वव्याप्यव्याप्यत्वं च स्वसमानाधिकरणभेद-प्रतियोगितावच्छेकदकत्व-स्वसामानाधिकरण्योभयसंबन्धेन द्रव्यविभाजकधर्मवत्त्व-रूपम् । तथापि लाघवमेव पूर्वलक्षणं परित्यज्य उत्तरलक्षणानुसरणे बीजं अवसेयम् ।

चेष्टा च इति । हितप्राप्तिः – इष्टप्राप्तिः । अहितपरिहारः – अनिष्टनिवृत्तिश्च अर्थः – प्रयोजनम् यस्याः सा क्रिया चेष्टा । **जातिसाङ्कर्यात्** इति । देवत्वस्य जलत्वादिना साङ्कर्यात् इत्यर्थः । जलत्वं विहाय देवत्वं सूर्यशरीरे । देवत्वं विहाय जलत्वं सरिज्जलादौ । उभयोः देवत्वजलत्वयोः वरुणशरीरे समावेशात् साङ्कर्यम् ।।

मुक्तावली

इन्द्रियम् इति । घ्राणेन्द्रियं पार्थिवम् इत्यर्थः । पार्थिवत्वं कथम् इति चेत्, इत्थम् – ''घ्राणेन्द्रियं पार्थिवम्, रूपादिषु मध्ये गन्धस्यैव अभिव्यञ्जकत्वात्, कुङ्कुमगन्धाभिव्यञ्जकगोघृतवत्'' । न च – दृष्टान्ते स्वीयरूपादिव्यञ्जकत्वात् असिद्धिः इति – वाच्यम् । परकीयरूपाद्यव्यञ्जकत्वस्य **तदर्थत्वात्** । न च नवशरावगन्धव्यञ्जकजले अनैकान्तिकत्वम् इति – वाच्यम् । **तस्य** सक्तुरसाभिव्यञ्ज-कत्वात् । यद्वा ''परकीय'' इति न देयम्, वायूपनीतसुरभिभागानां दृष्टान्तत्व-संभवात् । न च – घ्राणेन्द्रियसन्निकर्षस्य गन्धमात्राभिव्यञ्जकत्वात् तत्र व्यभिचारः इति – वाच्यम् । द्रव्यत्वे सति इति विशेषणात् ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

दिनकरी

रूपादिषु मध्ये इति । रसगन्धस्पर्शशब्दाः आदिपदार्थाः । नवशरावगन्धव्यञ्जकजले मनसि च व्यभिचारवारणाय ''एव'' कारः । तद्दाने च सक्तुरसस्यापि अभिव्यञ्जकत्वात् न दोषः । घ्राणेन्द्रिये गन्धत्वाभिव्यञ्जकत्वात् हेत्वप्रसिद्धिवारणाय हेतौ मध्यान्तम् । न च – **असिद्धिवारकविशेषणं** निरर्थकम् इति – वाच्यम् । **व्यभिचारज्ञान** इव हेत्वप्रसिद्धावपि व्याप्तिज्ञानाभावेन व्याप्तिग्रहौपयिकाप्रसिद्धिवारकविशेषणोपादानस्य सर्वसिद्धत्वात् । **तदर्थत्वात्** – हेतुवाक्यघटकमध्यान्तपदसमभिव्याहृत''एव''कारार्थत्वात् । तथा च दृष्टान्ते स्वीयरूपादिव्यञ्जकघृतादौ असिद्धिवारणाय परकीयत्वं रूपादौ विशेषणं देयम् इति भावः । **तस्य इति** । नवशरावगन्धव्यञ्जकजलस्य इत्यर्थः । न च – येन नवशरावगन्धव्यञ्जकजलेन सक्तुरसः न अभिव्यञ्जितः तत्र जलविशेषे अनैकान्तिक इति – वाच्यम् । परकीयरूपादिविषयकसाक्षात्कारस्वरूपायोग्यत्वस्य विवक्षितत्वात् नवशरावगन्धव्यञ्जकजलेऽपि रसव्यञ्जकतावच्छेदकजलत्वस्य सत्त्वात् इति । ''परकीय'' इति विशेषणाप्रवेशे लाघवात् आह – **यद्वा** इति । तददाने हेतुम् आह – **वायूपनीत** इति । **इदम् अत्र बोध्यम्** – ''रूपाद्यव्यञ्जकत्वे सति'' **इत्यस्य हेतुत्रये तात्पर्यम्** । **शब्दाव्यञ्जकत्वे सति** गन्धव्यञ्जकत्वस्य नवशरावगन्धव्यञ्जकोदके व्यभिचारेण तत्र ग्रन्थकर्तुः तात्पर्याभावात् । तत्र हेतुषु रूपरसस्पर्शानां परकीयत्वं विशेषणम् । **न च – प्रथमहेतोः** नवशरावगन्धव्यञ्जकजले व्यभिचारः, लुप्ताक्षरमषीनीलरूपव्यञ्जकत्वात् । **न च तृतीयहेतोः** तत्र व्यभिचारः । **एतदस्वरसेनापि ''यद्वा''** इति कल्पान्तरप्रणयनात् । तत्रापि परकीयत्वविशेषणाघटितं हेतुत्रयम् इति । **तत्र** – घ्राणेन्द्रियसन्निकर्षे । इन्द्रियत्वं न जातिः **तेजस्त्वादिना साङ्कर्यात्**, किन्तु ''शब्देतर'' इत्यादिना वक्ष्यमाणं बोध्यम् ।

राजीवोल्लासः

मूले ''रूपादिषु मध्ये गन्धस्यैव अभिव्यञ्जकत्वात्'' इति ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

''एव''कारार्थः प्रकृते गन्धभिन्नाव्यञ्जकत्वम् । तत्र गन्धभिन्ने निर्धारणसप्तम्यन्तार्थस्य रूपादिघटकत्वस्य अन्वयः । ''मध्ये'' इत्यव्ययं च तात्पर्यग्राहकम् । तथा च रूपादिपञ्चकघटकं यत् गन्धभिन्नं तदव्यञ्जकत्वात् इति हेतुः । यत्र यत्र रूपादिषु मध्ये गन्धस्यैव व्यञ्जकत्वम्, तत्र पार्थिवत्वम् । यथा कुङ्कुमगन्धाभिव्यञ्जकगोघृते । घ्राणेन्द्रियमपि रूपादिपञ्चकमध्ये गन्धस्यैव व्यञ्जकम् इति हेतोः तत्र पार्थिवत्वं सिद्ध्यति । अभिव्यञ्जकत्वं च प्रत्यक्षजनकत्वम् । हेतौ ''एव''कारानुपादाने रूपादिघटकगन्धविषयकप्रत्यक्षजनकत्वं हेतुः स्यात् । तथा सति पार्थिवत्वरूपसाध्याभाववति नवशरावगन्धव्यञ्जकजले, प्रत्यक्षसामान्यहेतौ मनसि च व्यभिचारः । तद्वारणाय ''एव''कारः । तद्दाने च गन्धभिन्नाव्यञ्जकत्वे सति गन्धव्यञ्जकत्वं हेतुः । नवशरावगन्धव्यञ्जकजले गन्धभिन्नसक्तुरसव्यञ्जकत्वात्, मनसि च गन्धभिन्नरूपादिव्यञ्जकत्वात् गन्धभिन्नाव्यञ्जकत्वं नास्ति इति न व्यभिचारः ।

मध्यान्तस्य अनुपादाने गन्धभिन्नगन्धत्वव्यञ्जकत्वस्यैव घ्राणेन्द्रिये सत्त्वेन गन्धभिन्नाव्यञ्जकत्वघटितहेत्वभावात् स्वरूपासिद्धिः । तद्वारणाय रूपादिषु मध्ये इति मध्यान्तस्य निवेशः । तेन च रूपादिघटकं यत् गन्धभिन्नं तदव्यञ्जकत्वे सति गन्धव्यञ्जकत्वं हेतुः लभ्यते । घ्राणेन्द्रिये गन्धभिन्नगन्धत्वव्यञ्जकत्वसत्त्वेऽपि तत् गन्धत्वं रूपादिपञ्चकघटकं न भवति इति न स्वरूपासिद्धिः । रूपादिघटकगन्धभिन्न-रूपादिचतुष्टयाव्यञ्जकत्वस्य घ्राणेन्द्रिये सत्त्वात् । अत्र गन्धव्यञ्जकत्वं स्वरूपकीर्तनम्, न तु तस्य हेतौ निवेशः, प्रयोजनविरहात् ।

न च असिद्धिवारकविशेषणम् इति । स्वरूपासिद्धिवारणाय हि ''रूपादिषु मध्ये'' इति विशेषणं दत्तम् । तावता तद्विशेषणं सार्थकं न भवति । हेतुघटकविशेषणानां व्यभिचारवारकतयैव सार्थकत्वम् इति नियमात् इति भावः । **व्यभिचारज्ञाने इव** इति । यथा व्यभिचारज्ञाने सति हेतौ व्याप्तिज्ञानं न

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

संभवति, तथा हेतोः अप्रसिद्धावपि व्याप्तिज्ञानं न संभवति । तथा च हेतुघटकदलानां सार्थक्यं व्याप्तिग्रहानुकूलत्वप्रयुक्तम् । यथा व्यभिचारवारकस्य विशेषणस्य व्याप्तिग्रहानुकूलत्वात् सार्थक्यम्, तथा असिद्धिवारकविशेषणस्यापि व्याप्तिग्रहानुकूलत्वात् सार्थक्यम् इति भावः ।

स्वरूपायोग्यत्वस्य इति । परकीयरूपादिविषयकसाक्षात्कारजनकतावच्छेदकधर्मशून्यत्वस्य इत्यर्थः । नवशरावगन्धव्यञ्जकजले सक्तुरसविषयकसाक्षात्कारजनकतावच्छेदकजलत्वजातिमत्त्वसत्त्वेन तच्छून्यत्वविरहात् न व्यभिचार इति भावः ।

ननु **''रूपादिषु मध्ये''** इत्यादिहेतौ शब्दाव्यञ्जकत्वप्रवेशः व्यर्थः । श्रोत्रे गन्धव्यञ्जकत्वविरहेणैव व्यभिचारविरहात् । ''आदि'' शब्देन रसगन्धस्पर्शानां ग्रहणेऽपि रसाव्यञ्जकत्वे सति गन्धव्यञ्जकत्वमात्रस्य हेतुतासंभवेन रूपस्पर्शाव्यञ्जकत्वस्य हेतुघटकत्वेऽपि प्रयोजनाभावः इत्यस्वरसात् प्रकारान्तरेण मुक्तावलीग्रन्थतात्पर्यं वक्तुम् आरभते – **इदम् अत्र बोध्यम्** इति ।

हेतुत्रये तात्पर्यम् इति । परकीयरूपाव्यञ्जकत्वे सति गन्धव्यञ्जकत्वम्; परकीयरसाव्यञ्जकत्वे सति गन्धव्यञ्जकत्वम्, परकीयस्पर्शाव्यञ्जकत्वे सति गन्धव्यञ्जकत्वम् इति हेतुत्रयम् । न च शब्दाव्यञ्जकत्वे सति गन्धव्यञ्जकत्वस्यापि हेतुत्वसंभवात् हेतुचतुष्टये तात्पर्यम् इति वक्तव्ये हेतुत्रये तात्पर्यं इत्युक्तिः असंगता इति, अत आह – **शब्दाव्यञ्जकत्वे सति** इति । नवशरावगन्धव्यञ्जके जले पार्थिवत्वाभाववति शब्दाव्यञ्जकत्वे सति गन्धव्यञ्जकत्वस्य सत्त्वेन व्यभिचारात् तस्य हेतुत्वे ग्रन्थकर्तुः तात्पर्याभावात् इत्यर्थः ।

न च प्रथमहेतोः इति । परकीयरूपाव्यञ्जकत्वे सति गन्धव्यञ्जकत्वरूपप्रथमहेतोः नवशरावगन्धव्यञ्जकजले सत्त्वेन व्यभिचार इति नाशङ्कनीयम् ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

जले लुप्ताक्षरमषीगतनीलरूपव्यञ्जकत्वसत्त्वेन परकीयमषीरूपाव्यञ्जकत्वविरहात् व्यभिचारस्य अप्रसक्तिः इत्यर्थः ।

न च तृतीयहेतोः इति । परकीयस्पर्शाव्यञ्जकत्वे सति गन्धव्यञ्जकत्वस्य तृतीयहेतोः तत्र नवशरावगन्धव्यञ्जकजले व्यभिचारः । तत्र परकीयस्पर्शाव्यञ्जकत्वात् गन्धव्यञ्जकत्वाच्च इति – न च वाच्यम् । तत्र व्यभिचाररूपदोषप्रयुक्तास्वारस्यादपि **यद्वा** इत्यादि कल्पान्तरावलम्बनात् । तस्मिन् कल्पे परकीयत्वाघटितस्य हेतुत्रयस्य विवक्षणात् नवशरावगन्धव्यञ्जकजले स्वगतस्पर्शव्यञ्जकत्वसत्त्वेन स्पर्शाव्यञ्जकत्व-विशिष्टहेत्वभावेन व्यभिचाराभावात् ।

एतदस्वरसेनापि इति ''अपि'' शब्देन ''परकीय'' इति विशेषणाप्रवेश-प्रयुक्तलाघवं समुच्चीयते । एवं च परकीयत्वघटितहेतोः विवक्षायां नवशरावगन्धव्यञ्जक-जले परकीयस्पर्शाव्यञ्जकत्वे सति गन्धव्यञ्जकत्वसत्त्वात् व्यभिचारः । अतः परकीयत्वघटितहेतोः परित्यागेन ''**यद्वा**'' इति कल्पान्तरानुसरणम् । लाघवाच्च कल्पान्तरानुसरणम् इति भावः ।

तेजस्त्वादिना साङ्कर्यात् इति । तेजस्त्वं विहाय इन्द्रियत्वं घ्राणेन्द्रिये । इन्द्रियत्वं विहाय तेजस्त्वं अग्नौ । इन्द्रियत्वतेजस्त्वयोः उभयोः चक्षुरिन्द्रिये समावेश इति साङ्कर्यम् । ''**शब्देतर**''**इत्यादिना वक्ष्यमाणम्** इति । शब्देतरोद्भूत-विशेषगुणानाश्रयत्वे सति ज्ञानकारणमनस्संयोगाश्रयत्वम् इन्द्रियलक्षणम् ।।

मुक्तावली

विषय इति । उपभोगसाधनं विषयः । **सर्वमेव कार्यजातम् अदृष्टाधीनम्** । **यत्कार्यं यददृष्टाधीनं तत् तदुपभोगं साक्षात् परम्परया वा जनयत्येव** । नहि बीजप्रयोजनाभ्यां विना कस्यचिदुत्पत्तिरस्ति । तेन द्व्यणुकादिः ब्रह्माण्डान्तः सर्वमेव विषयः भवति । शरीरेन्द्रिययोः विषयत्वेऽपि **प्रकारान्तरेण** उपन्यासः शिष्यबुद्धिवैशद्यार्थः ।।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

दिनकरी

ननु विषयत्वं न जातिः, सामान्यादौ सत्त्वात्, अतः तल्लक्षणम् आह – उपभोग इति । यद्यपि साक्षादुपभोगसाधनत्वं द्व्यणुकादौ अव्याप्तम्, साक्षात्परम्परा-साधारणभोगसाधनत्वं परमाणौ अपि इति ''द्व्यणुकादिः ब्रह्माण्डान्तः'' इति ग्रन्थविरोधः, तथापि साक्षात्परम्परासाधारणभोगसाधनत्वं विवक्षितम् । परमाणुरपि विषय एव । कार्यरूपपृथिव्या एव त्रिप्रकारेण विभजनात् कार्यपृथिवीविषय एव ''द्व्यणुक'' इत्यादिना प्रदर्शित इति न तद्ग्रन्थविरोधः । अत एव उक्तं ''तदुपभोगं साक्षात्परम्परया वा जनयत्येव'' इति । ''कार्यजातम्'' इत्यत्र जातपदं संपातादायातम् । अदृष्टाधीनम् इति । अत्र कार्यमात्रं प्रति अदृष्टस्य हेतुता, न समवायसम्बन्धेन घटाद्यधिकरणे कपालादौ समवायेन तदभावात् व्यभिचारात् । यत्तु स्वसमवायिसंयोगेन अदृष्टं कार्यमात्रे हेतुरिति, तन्न । शब्दरूपकार्याधिकरणे गगने अदृष्टसमवाय्यात्मसंयोगाभावेन व्यभिचारात् । परन्तु स्वसमवायिसंयुक्तसंयोगेन तस्य हेतुता बोध्या ।

इदं तु बोध्यम् । अदृष्टस्य कार्यमात्रं प्रति हेतुता, न साक्षात् । नहि सामग्रीसमवधाने अदृष्टविलम्बेन कार्यविलम्बः दृष्टः, येन तत्साक्षाद्धेतुः स्यात् । परंतु सामग्रीसम्पादकतया प्रायः परम्परयैव तदुपयोगः । क्वचित्तु मेघसंचारादौ साक्षादेव तद्धेतुः, अन्यथा सामग्रीसंपादकत्वस्यैव अनुपपत्तेः इति । एतदर्थमेव साक्षात्परम्परासाधारणजन्यत्वबोधकम् अधीनपदम् उपात्तम् । यददृष्टाधीनं-यत्पुरुषीयादृष्टाधीनम् । तत्-तत्कार्यम् इत्यर्थः । तदुपभोगं-तत्पुरुषस्योपभोगम् । तेन-द्व्यणुकादिकार्यस्य तत्तत्पुरुषोपभोगसाधनत्वेन ।

ननु एवं सर्वस्यैव विषयत्वेन शरीरेन्द्रियविषयभेदेन पृथिव्याः त्रैविध्यं न सिद्ध्येत् इति, अत आह – शरीरेन्द्रिययोः इति ।।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

राजीवोल्लासः

सामान्यादौ सत्त्वात् इति । सामान्यादौ विषयत्वम् अस्ति । विषयत्वं यदि जातिः स्यात् तर्हि सामान्यादौ विषयत्वं न स्यात् । जातौ जात्यनङ्गीकारात् इति भावः । **तल्लक्षणम्** इति – विषयलक्षणम् इत्यर्थः । तथा च उपभोगसाधनत्वं विषयस्य लक्षणम् । उपभोगः नाम सुखदुःखसाक्षात्कारः ।

यद्यपि इत्यादि । साक्षात् उपभोगसाधनत्वं द्व्यणुकादौ नास्ति इति अव्याप्तिः । साक्षाद्वा परम्परया वा उपभोगसाधनत्वं परमाणौ अपि अस्ति इति तस्य विषयत्वाभावप्रतिपादकस्य **''द्व्यणुकादिः ब्रह्माण्डान्तः सर्वमेव विषयः''** इति ग्रन्थस्य विरोधः । तथापि साक्षात्परम्परासाधारणं उपभोगसाधनत्वमेव विवक्षितम् । परमाणोरपि परम्परया उपभोगसाधनत्वात् विषयत्वम् इष्टमेव । न च ग्रन्थविरोधः । कार्यस्य पृथिव्या एव शरीरेन्द्रियविषयभेदेन त्रेधा विभजनात् कार्यपृथिव्यन्तर्गतः विषय एव **''द्व्यणुकादिः ब्रह्माण्डान्तः''** इत्यनेन प्रदर्शित इति विरोधाभावात् । तथा च सर्वमेव विषयः भवति इत्यत्र विषयपदं जन्यविषयपरम् ।

साक्षात्परम्परासाधारणभोगसाधनत्वम् इति । भोगसाधनसाधनत्वं परम्परया भोगसाधनत्वम् । यदि एवं तदा अन्त्यावयविनामेव भोगसाधनत्वं अग्रे साधनीयम्, तत एव तत्कारणावयवधारासु भोगसाधनत्वबोधसंभवात् इति न आशङ्कनीयम् । येन हेतुना अन्त्यावयविषु भोगसाधनत्वं सिद्ध्यति तेनैव जन्यसामान्येऽपि इति सूचनार्थं अन्त्यावयविभिन्नेष्वपि भोगसाधनत्वोपवर्णनम् । अत्र इत्थम् अनुमानप्रयोगः – **''द्व्यणुकादिकम् अदृष्टाधीनम्, कार्यत्वात्''**, **''द्व्यणुकादि उपभोगसाधनम्, अदृष्टाधीनत्वात्''** इति । तत्र प्रथमानुमानोपयोगि-व्याप्तिः **''सर्वमेव कार्यजातम् अदृष्टाधीनम्''** इत्यनेन प्रदर्शिता । द्वितीयानुमानोपयोगिव्याप्तिः **''यत्कार्यं यददृष्टाधीनम्''** इति ग्रन्थेन प्रदर्शिता इत्यवधेयम् ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अत एव इति । साक्षात्परम्परासाधारणस्य उपभोगसाधनत्वस्य विवक्षितत्वादेव इत्यर्थः । **जातपदं संपातादायातम्** इति । **''सर्वमेव कार्यम्''** इति सर्वपदेनैव अशेषकार्यलाभात् अशेषत्वार्थकजातपदस्य अनावश्यकत्वात् इत्यर्थः ।

ननु अदृष्टाधीनत्वम् अदृष्टजन्यत्वम् । तच्च घटादिकार्यस्य न संभवति इति आशङ्कते – **अत्र कार्यमात्रं प्रति** इति । समवायसंबन्धेन कार्यं प्रति समवायसंबन्धेन अदृष्टस्य हेतुत्वं न संभवति । समवायसंबन्धेन घटरूपकार्यस्य कपाले सत्त्वेन तत्र समवायसंबन्धेन अदृष्टस्य अभावात् । तथा च समवायसंबन्धेन अदृष्टं विनापि समवायसंबन्धेन कार्योत्पत्त्या व्यतिरेकव्यभिचारः ।

यत्तु इति । समवायसंबन्धेन कार्यं प्रति स्वसमवायिसंयोगसंबन्धेन अदृष्टं कारणम् इति उक्ते न व्यतिरेकव्यभिचारः । कपाले अदृष्टस्य स्वसमवायि-आत्मसंयोगसंबन्धेन सत्त्वात् इति भावः । **तन्न** इति । समवायसंबन्धेन शब्दात्मकं कार्यम् आकाशे अस्ति । तत्र च स्वसमवायिसंयोगसंबन्धेन अदृष्टं नास्ति । विभुद्वयसंयोगानङ्गीकारेण आकाशे अदृष्टसमवाय्यात्मसंयोगाभावात् । तथा च व्यतिरेकव्यभिचार इति भावः ।

परन्तु इति । समवायसंबन्धेन कार्यं प्रति स्वसमवायिसंयुक्तसंयोगसंबन्धेन अदृष्टस्य हेतुत्वम् । गगनेऽपि अदृष्टसमवाय्यात्मसंयुक्तवाय्वादिसंयोगसत्त्वेन उक्तसंबन्धेन अदृष्टस्य सत्त्वात् न व्यतिरेकव्यभिचारः । घटादावपि आत्मसंयुक्तपवनादिसंयोगमादायैव अदृष्टसत्त्वं उपपादनीयम् इति भावः ।

''यत्कार्यं यददृष्टजन्यम्'' इति उपेक्ष्य **''यत्कार्यं यददृष्टाधीनम्''** इत्युक्तेः प्रयोजनं वक्तुम् उपक्रमते – **इदं तु बोध्यम्** इति । अदृष्टस्य कार्यसामान्यं प्रति साक्षात् हेतुत्वं न संभवति । स्वेतरयावत्कारणसमवधाने यद्विलम्बेन कार्यविलम्बः तस्यैव कार्यं प्रति साक्षात् हेतुत्वात् । दण्डचक्रादियावत्कारणसमवधाने अदृष्टविलम्बेन घटादिकार्यविलम्बस्य अदर्शनात् अदृष्टं न साक्षात् हेतुः । किन्तु

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

कार्यसामग्रीसंपादकतया परम्परयैव अदृष्टस्य कार्यं प्रति उपयोगः । तत्कार्यजनका-दृष्टाभावे तत्कार्यकारणानामेव उत्पादासंभवात् । परन्तु क्वचित् मेघसञ्चारादौ साक्षादेव अदृष्टं हेतुः । **अन्यथा** इति । कार्यसामान्यं प्रति अदृष्टस्य अकारणत्वे अदृष्टस्य सामग्रीसंपादकत्वमपि नोपपद्यते । सामग्रीसंपत्तिरूपकार्यजनकत्वस्यैव सामग्रीसंपादकतारूपत्वात् इति भावः । **एतदर्थमेव** इति । अदृष्टस्य मेघसञ्चारादौ घटादिकार्यसामग्रीसंपत्तौ च साक्षात् हेतुत्वम् । घटादिकार्यं प्रति तत्सामग्रीसंपत्तिद्वारा हेतुत्वम् । तथा च साक्षात्परंपरासाधारणम् अदृष्टजन्यत्वमेव घटादेः उपभोगसाधनत्वे हेतुः इति ज्ञापनार्थं ''अदृष्टजन्यम्'' इत्यनुक्त्वा ''अदृष्टाधीनम्'' इति उक्तम् इति भावः ।

त्रैविध्यं न सिद्ध्येत् इति । परस्परविरुद्धानां पृथिवीत्वव्याप्यधर्माणामेव पृथिवीविभाजकत्वात् शरीरत्वेन्द्रियत्वयोः परस्परासमानाधिकरणत्वेऽपि विषयत्वं शरीरत्वेन्द्रियत्वविरुद्धं न भवति । शरीरेन्द्रिययोरपि विषयत्वात् । तथा च शरीरत्वेन इन्द्रियत्वेन विषयत्वेन च पृथिव्याः त्रेधा विभागः न संभवति इति शङ्का । मूले **प्रकारान्तरेण** इत्यस्य शरीरेन्द्रियव्यतिरिक्ततया इत्यर्थः । तथा च विभाजकं विषयत्वं शरीरेन्द्रियातिरिक्तत्वविशिष्टभोगसाधनत्वम् । तच्च शरीरत्वेन्द्रियत्वासमानाधिकरणमेव इति न विभागानुपपत्तिः इति समाधानम बोध्यम् ।

॥ जलनिरूपणम् ॥

कारिकावली

वर्णः शुक्लो रसस्पर्शौ जले मधुरशीतलौ ।
स्नेहस्तत्र द्रवत्वं तु सांसिद्धिकमुदाहृतम् ॥ ३९ ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

मुक्तावली

जलं निरूपयति – **वर्णः शुक्लः** इति । **स्नेहसमवायिकारणतावच्छेदकतया** जलत्वजातिसिद्धिः । **यद्यपि स्नेहत्वं** नित्यानित्यवृत्तितया न कार्यतावच्छेकम्, तथापि जन्यस्नेहत्वं **तथा** बोध्यम् । अथ परमाणौ जलत्वं न स्यात्, तत्र जन्यस्नेहाभावात् । **तस्य च नित्यस्य स्वरूपयोग्यत्वे फलावश्यंभावनियमात्** इति चेत्, न । **जन्यस्नेहजनकतावच्छेदिकाया जन्यजलत्वजातेः** सिद्धौ, **तदवच्छिन्न**जनकतावच्छेदकतया जलत्वजातिसिद्धेः ।।

दिनकरी

जलत्वजातौ प्रमाणम् आह – **स्नेह** इति । **कारणतावच्छेदकतया धर्मसिद्धौ** बाधकाभावात् तस्य **जातित्वम्** इति भावः ।

नित्यवृत्तिधर्मस्य कार्यतावच्छेदकत्वाभावेन स्नेहत्वस्य कार्यतावच्छेदकत्वं न संभवति इति शङ्कते – **यद्यपि** इति । **तथा** – कार्यतावच्छेदकम् । वस्तुतस्तु नित्यसाधारणधर्मस्य कार्यतावच्छेदकत्वे दोषाभावात् जन्यपदं न देयमेव । ननु यथा अरण्यस्थदण्डादौ **फलानुपधायके** कारणतावच्छेदकतया दण्डत्वादिजातिः, **तथा अत्रापि भविष्यति इति**, अत आह – **तस्य** इति । **दण्डादेः स्वरूपयोग्यतायां** न कापि **क्षतिः** । **तस्य** अनित्यत्वेन फलोपधायकत्वाभावात् इति भावः । **जन्यजलत्वजातेः – जन्यजलमात्रवृत्तिजातेः** । **तदवच्छिन्न** इति । जन्यजलत्व-जात्यवच्छिन्नेत्यर्थः । **न च – एवं जलान्त्यावयविनि जलत्वं न स्यात्** इति – वाच्यम् । जलस्य **अन्त्यावयवित्वानुपगमात्** । ननु जलत्वावच्छिन्नं प्रति समवायसंबन्धेन **स्नेहस्यैव कारणत्वम्** अस्तु, अतिरिक्तजातिकल्पनापेक्षया लाघवात् इति चेत्, न । जलत्वावच्छिन्नं प्रति **स्नेहत्वेन** कारणत्वं शीतस्पर्शत्वेन वा इत्यत्र विनिगमनाविरहेण अतिरिक्तजातिसिद्धेः, **क्लृप्तम्** आदाय कल्पनीयेन विनिगमना-विरहाभावात् इति ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

केचित्तु – धूमादिकं प्रति आर्द्रेन्धनादेः कारणत्वं निर्विवादम्, आर्द्रत्वं च जलसंयुक्तत्वम् । तथा च जलसंयुक्तेन्धनत्वेन इन्धनसंयुक्तजलत्वेन वा कारणता इत्यत्र विनिगमनाविरहात् जलत्वेन्धनत्वयोः **पार्थक्येन** कारणतावच्छेदकतया जलत्वजातिसिद्धिः इति आहुः ।

परे तु – स्थूलजलवृत्तिप्रत्यक्षसिद्धजलत्वरूपजात्यवच्छिन्नसमवायिकारणतावच्छेदकतया परमाणुसाधारणजलत्वजातिसिद्धिः कार्यतावच्छेदककारणतावच्छेदकयोः ऐक्ये क्षत्यभावात्, नित्यसाधारणधर्मस्य कार्यतावच्छेदकत्वे दोषाभावाच्च – इति आहुः ।।

राजीवोल्लासः

''स्नेहकारणतावच्छेदकतया जलत्वजातिसिद्धिः'' इति मूलम् । ''समवायसंबन्धावच्छिन्नस्नेहत्वावच्छिन्नकार्यतानिरूपिततादात्म्यसंबन्धावच्छिन्नकारणता किञ्चिद्धर्मावच्छिन्ना, कारणतात्वात्'' इत्यनुमानेन जलत्वजातिसिद्धिः इति तदाशयः ।

ननु स्नेहसमवायिकारणतावच्छेदकतया जलत्वस्य सिद्धावपि तस्य जातित्वं न सिद्ध्यति । कारणतात्वस्य जात्यवच्छिन्नत्वं विनापि आकाशादिनिष्ठायां शब्दादिकारणातायां सद्भावेन कारणतात्वेन हेतुना जलत्वजात्यवच्छिन्नत्वस्य साधयितुम् अशक्यत्वात् । आकाशनिष्ठा हि शब्दकारणता अष्टद्रव्यातिरिक्तत्वाद्युपाध्यवच्छिन्ना, आकाशत्वस्य जातित्वाभावात् इत्याशङ्कायाम् आह – **कारणतावच्छेदकतया धर्मसिद्धौ** इति । स्नेहकारणतावच्छेदकत्वेन जलत्वस्य सिद्धौ तस्य जातित्वे व्यक्त्यभेदादिरूपबाधकस्य अभावेन ''सिद्ध्यतः धर्मस्य जातित्वे लाघवम्'' इति लाघवज्ञानरूपसहकारिवशाच्च जलत्वस्य जातित्वं सिद्ध्यति इति भावः । ''जातित्वम्'' इत्यस्य अनन्तरं लाघवात् इति शेषः । एतेन कारणतावच्छेदकीभूतं जलत्वं शीतस्पर्शवत्त्वमेव, न जातिः, तत्कल्पने गौरवात् इति निरस्तम् ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

शीतत्वरूपजातिविशिष्टानाम् अनेकेषां स्पर्शानां कारणतावच्छेदकत्वकल्पने गौरवात् लाघवेन जलत्वजातेरेव कारणतावच्छेदकत्वस्य उचितत्वात् इति भावः ।

नित्यवृत्तिधर्मस्य इति । कार्यमात्रवृत्तिधर्मस्यैव कार्यतावच्छेदकत्वम् । स्नेहत्वं तु नित्ये जलपरमाणुगतस्नेहे, कार्ये अवयविजलगतस्नेहे च वर्तत इति कार्यमात्रवृत्तित्वाभावात् न कार्यतावच्छेदकम् । तथा च स्नेहत्वावच्छिन्नकार्यतायाः अप्रसिद्ध्या तदवच्छिन्नकार्यतानिरूपितकारणतावच्छेदकतया जलत्वजातिः न सिद्ध्यति इति आशङ्क्य जन्यत्वविशिष्टस्नेहत्वं कार्यतावच्छेदकम् इति समाधत्ते मूले इति भावः ।

जन्यस्नेहत्वं नाम जन्यत्वविशिष्टस्नेहत्वम् । वैशिष्ट्यं च सामानाधिकरण्य-संबन्धेन । तथा च जन्यश्चासौ स्नेहश्च जन्यस्नेहः तस्य भावः जन्यस्नेहत्वम् इति विग्रहः, न तु जन्यं च तत् स्नेहत्वं च इति विग्रहः । स्नेहत्वस्य अजन्यत्वात् । तथा च जन्यत्वविशिष्टस्नेहत्वावच्छिन्नकार्यतानिरूपितकारणतावच्छेदकतया जलत्वजातिसिद्धिः ।

वस्तुतस्तु इति । नित्यानित्योभयवृत्तिधर्मस्य कार्यतावच्छेदकत्वे दोषाभावात् स्नेहत्वमपि कार्यतावच्छेदकम् भवितुम् अर्हति । अतः जन्यपदं न देयम् । न च – कार्यताशून्यनित्यवृत्तिधर्मस्य कथं कार्यतावच्छेदकत्वम्? अतिप्रसक्तत्वात् । कार्यतानतिप्रसक्तधर्मस्यैव कार्यतावच्छेदकत्वात् इति – वाच्यम् । जलत्वावच्छिन्न-कारणतानिरूपितकार्यतायाः प्रकृते स्नेहवद्वृत्त्यत्यन्ताभावप्रतियोगितानवच्छेदक-जलत्वकत्वरूपायाः जलपरमाणुस्नेहेऽपि वर्तमानतया स्नेहत्वस्य उक्तकार्यतानति-प्रसक्तत्वात् तदवच्छेदकत्वं संभवत्येव इति आशयात् । जन्यस्नेहकारणतावच्छेदकतया जलत्वजातिसाधने जलपरमाणौ जलत्वं न स्यात् । तत्र जन्यस्नेहरूपकार्याभावात् इति आशङ्क्य यथा अरण्यस्थदण्डदौ घटादिरूपकार्याजनके घटकारणतावच्छेदक-दण्डत्वजातिः अस्ति, तथा जलपरमाणौ जन्यस्नेहाभावेऽपि तत्कारणतावच्छेदक-

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

जलत्वजातिः भविष्यति इति तदुपरि समाधानम् आशङ्क्य मूले उक्तं **तस्य च नित्यस्य स्वरूपयोग्यत्वे फलावश्यंभावनियमात्** इति । यत्र यत्र नित्यत्वे सति यत्किंचित्कार्यजनकतावच्छेदकधर्मवत्त्वं तत्र कार्योत्पादकत्वनियमः । अरण्यस्थ-दण्डादेः अनित्यतया तत्र घटकारणतावच्छेदकदण्डत्वसत्त्वेऽपि न घटोत्पादकत्वम् । जलपरमाणोश्च नित्यतया तत्र स्नेहकारणतावच्छेदकजलत्वसत्त्वे अवश्यं स्नेहरूपकार्यो-त्पत्तिः स्यात् इति मूलस्य आशयः । अत्र इदम् अनुमानं विवक्षितम् – ''परमाणुः नित्यत्वविशिष्टजन्यस्नेहस्वरूपयोग्यत्वाभाववान्, स्नेहानुत्पादकत्वात्, घटवत्'' इति । अत्र विशेषणवति जलपरमाणौ सिद्ध्यन् विशिष्टाभावः विशेष्याभावे पर्यवस्यति इति स्वरूपयोग्यत्वरूपस्य जलत्वस्य अभावः सिद्ध्यति इति आक्षेपकर्तुः तात्पर्यम् ।

फलानुपधायके इति । घटरूपकार्यानुत्पादके इत्यर्थः । **तथा अत्रापि भविष्यति** इति । स्नेहानुत्पादकजलपरमाणावपि जन्यस्नेहकारणतावच्छेदकजातिः निराबाधा भविष्यति इत्यर्थः । **दण्डादेः स्वरूपयोग्यतायाम्** इति । घटकारणताव-च्छेदकजातिमत्तायां स्वीकृतायामपि इत्यर्थः । **क्षतिः** – फलोत्पादकत्वापत्तिः । **तस्य** – दण्डादेः ।

ननु ''**जन्यजलत्वजातेः**'' इति मूलस्य कः अर्थः ? जन्यायाः जलत्वजातेः इति अर्थः न संभवति । जलत्वस्य अजन्यत्वात् । जन्यत्वविशिष्टजलत्वजातेः इत्यपि अर्थः न संभवति । जलत्वस्यैव जातित्वेन जन्यत्वविशिष्टजलत्वस्य जातित्वाभावात् इति, अतः व्याचष्टे – **जन्यजलत्वजातेः** – **जन्यजलमात्र-वृत्तिजातेः** इति । तथा च जन्यस्नेहजनकतावच्छेदकतया जन्यजलमात्रवृत्तिः जलत्वव्याप्या काचन जातिः सिद्ध्यति । तादृशजात्यवच्छिन्नजनकतावच्छेदकतया जन्याजन्यसाधारणजलत्वजातिसिद्धिः इति भावः ।

न च एवम् इति । जन्यजलत्वावच्छिन्नकार्यतानिरूपितकारणतावच्छेदकतया जलत्वजातिसिद्धेरङ्गीकारे अन्त्यावयाविनि जले जलत्वजातिः न स्यात् । तत्र

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

जन्यजलस्य अनुत्पत्तेः इति न च वाच्यम् । जलस्य अन्त्यावयवित्वानङ्गीकारात् । **जलान्त्यावयविनि इति** । जलान्तरजननायोग्ये अवयवि जले इत्यर्थः । **जलत्वं न स्यात् इति** । तादृशजले जन्यजलजनकतावच्छेदकजातिस्वीकारे तस्य जलान्तर-जननायोग्यतैव न स्यात् इति भावः । **अन्त्यावयिवित्वानुपगमात् इति** । जलमात्र एव जलान्तरसंयोगेन बृहज्जलजननयोग्यता सत्त्वात् इति भावः ।

स्नेहस्यैव कारणत्वम् इति । "न तु तादात्म्यसंबन्धेन जलत्वावच्छिन्नस्य" इति "एव" कारेण विवक्षितम् । तथा च समवायसंबन्धेन जन्यजलमात्रवृत्तिजात्य-वच्छिन्नं प्रति समवायसंबन्धेन स्नेहः कारणम् । न तु तादात्म्यसंबन्धेन जलं कारणम् । तथा च जन्यजलत्वावच्छिन्नकार्यतानिरूपितकारणतावच्छेदकतया जलत्वजातिः न सिद्ध्यति । न च द्वयोरपि कार्यकारणभावयोः संभवात् कथं जलत्वजातिनिराकरणम् इति – वाच्यम् । जन्यजलत्वावच्छिन्नं प्रति तादात्म्येन जलत्वावच्छिन्नस्य कारणत्वे कारणतावच्छेदकतया अतिरिक्तजातिकल्पनप्रयुक्तगौरवं स्यात् । अतः तादृशकार्यकारणभाव एव नास्ति इति आशयेन शङ्का ।

समाधानं तु – समवायसंबन्धेन जलत्वावच्छिन्नं प्रति समवायसंबन्धेन स्नेहत्वेन स्नेहस्य कारणत्वं वा तेन संबन्धेन शीतस्पर्शत्वेन शीतस्पर्शस्य कारणत्वं वा इत्यत्र विनिगमनाविरहेण तादात्म्यसंबन्धेन जलस्यैव कारणत्वं सिद्ध्येत् । तेन च जलत्वजातिसिद्धिः इति ।

ननु तादात्म्यसंबन्धेन जलत्वेनापि कारणत्वं न संभवति, स्नेहशीतस्पर्शाभ्यां विनिगमनाविरहात् इत्यत्र आह – **क्लृप्तम् आदाय इति** । कल्पनीयस्य हि कारणतावच्छेदकत्वं धर्मिग्राहकप्रमाणसिद्धम् । क्लृप्तस्य तु न तथात्वं इति विनिगमकस्यैव सत्त्वात् इति भावः ।

प्रकारान्तरेण जलत्वजातिसिद्धिं वदतां मतम् आह – **केचित्तु इति** । धूमं प्रति आर्द्रेन्धनस्य कारणत्वं निर्विवादम् । आर्द्रेन्धनसत्त्वे धूमः, तदभावे तदभावः

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

इत्यन्वयव्यतिरेकसद्भावात् । इन्धनस्य आर्द्रत्वं च जलसंयुक्तत्वम् । तथा च धूमं प्रति जलसंयुक्तेन्धनत्वेन इन्धनस्य कारणत्वं वा इन्धनसंयुक्तजलत्वेन जलस्य कारणत्वं वा इत्यत्र विनिगमकाभावात् जलत्वेन्धनत्वयोः द्वयोरपि पृथक्कारणतावच्छेदकत्वं वक्तव्यम् इति धूमनिष्ठकार्यतानिरूपितकारणतावच्छेदकतया जलत्वजातिः सिद्ध्यति, इन्धनत्वजातिश्च सिद्ध्यति ।

पार्थक्येन इति । इदं च वस्तुगतिमनुरुध्य उक्तम् । जलसंयुक्तेन्धनत्वेन धूमं प्रति कारणत्वेऽपि कारणतावच्छेदकं यत् जलसंयुक्तेन्धनत्वं तत्कोटिप्रविष्टतया जलत्वजातिसिद्धेः इति ।

आहुः इति अस्वरसोद्भावानम् । तद्बीजं तु इन्धननिष्ठस्य परमाणुरूपजलसंयोगस्य धूमप्रयोजकत्वे प्रमाणाभावेन परमाणुसाधारणजलत्वजातिसिद्धिः दुर्वचा इति । किञ्च जलसंयोगस्य धूमकारणतावच्छेदकत्वं न जलसंयोगत्वेन, किन्तु परमाणुरूपजलसंयोगव्यावृत्तरूपेणैव । तथा च परमाणुसाधारणस्य जलत्वस्य न कारणतावच्छेदकत्वम् ।

परे तु इति । स्थूलजले विद्यमानतया प्रत्यक्षसिद्धा या जलत्वजातिः तदवच्छिन्नसमवायिकारणतावच्छेदकतया परमाणुसाधारणजलत्वजातिः सिद्ध्यति । समवायसंबन्धेन स्थूलजलवृत्तिजलत्वावच्छिन्नं प्रति तादात्म्यसंबन्धेन जलत्वावच्छिन्नस्य कारणतया जलत्वावच्छिन्नसमवायसंबन्धावच्छिन्नकार्यतानिरूपिततादात्म्यसंबन्धावच्छिन्नकारणतावच्छेदकतया जलत्वजातिसिद्धिः इति यावत् ।

कार्यतावच्छेदककारणतावच्छेदकतयोः एकत्वेऽपि न क्षतिः । कार्यकारणयोः अवयवावयविजलयोः भिन्नत्वात् ।

न च – नित्यानित्यजलसाधारणस्य जलत्वस्य कथं कार्यतावच्छेदकत्वम्? कार्यमात्रवृत्तिधर्मस्यैव कार्यतावच्छेदकत्वात् इति – वाच्यम् । पूर्वमेव ''वस्तुतस्तु'' इत्यादिना नित्यसाधारणधर्मस्य कार्यतावच्छेदकत्वे दोषाभावस्य उपपादितत्वात् ।।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

मुक्तावली

शुक्लरूपमेव जलस्य इति दर्शयितुम् उक्तं वर्णः शुक्लः इति । **न तु शुक्लरूपवत्त्वं लक्षणम्** । **अथवा नैमित्तिकद्रवत्ववदवृत्ति-रूपवद्वृत्ति-द्रव्यत्वसाक्षाद्व्याप्य-जातिमत्त्वम्** । **अभास्वरशुक्लेतररूपासमानाधिकरणरूपवद्वृत्ति-द्रव्यत्व-साक्षाद्व्याप्यजातिमत्त्वं वा तदर्थः** ।।

दिनकरी

न तु इति । **पृथिव्यादौ अतिव्याप्तेः इति** शेषः । शुक्लरूपवत्त्वस्य लक्षणत्वेऽपि न क्षतिः इत्यभिप्रेत्य आह – **अथवा इति** । **द्रव्यत्वव्याप्यवायु-त्वजातिम् आदाय** वायौ अतिव्याप्तिवारणाय **रूपवद्वृत्ति इति** । यथा च वायुत्वं जातिः तथाग्रे वक्ष्यते । पृथिवीत्वादिजातिम् आदाय पृथिव्यादौ अतिप्रसङ्गवारणाय **नैमित्तिकद्रवत्ववदवृत्ति इति** । **''साक्षात्''** इति पटत्वादिवारणाय । द्रव्यत्व-साक्षाद्व्याप्यत्वं च द्रव्यत्वव्याप्याव्याप्यत्वमात्रम्, न तु द्रव्यत्वव्याप्यत्वस्यापि तत्रान्तर्भावः । रूपवद्वृत्तित्वविशेषणेनैव रूपत्वादीनां वारणात् तन्निवेशे प्रयोजना-भावात् । **यद्यपि** अवश्योपस्थितिकद्रवत्वस्यैव रूपस्थाने प्रवेशः युक्तः, तेनापि वायुत्वादेः वारणात्; एवं च द्रवत्ववद्वृत्तित्वाभावादेव पटत्वादीनां वारणसंभवे **''द्रव्यत्वसाक्षाद्व्याप्य''** इत्यपि न देयम् इति लाघवम्, तथापि मूले **''वर्णः शुक्लः''** इत्यादिना **रूपघटितलक्षणस्य** उक्तत्वात् तदघटितलक्षणपरिष्कारे मूलविरोधः स्यात् इति तथा न कृतम् इति ध्येयम् । **मूर्तत्वजात्यनभ्युपगमेन च इदम्** । तेन जलत्वस्य द्रव्यत्वव्याप्यमूर्तत्वव्याप्यत्वेऽपि न क्षतिः । **जलघटान्यतरत्वम् आदाय घटादौ** अतिव्याप्तिवारणाय **''जाति''** इति । क्वचित् **''शुक्लरूपवद्वृत्ति''** इति पाठः । तत्र शुक्लपदं रूपपदं वा संपातात् आयातम् । एवमेव च व्यावृत्तिः **''अभावस्वरशुक्लेतररूप''** इत्यत्र रूपवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यपदयोः **बोध्या** । पृथिवीत्वम् आदाय पृथिव्याम् अतिव्याप्तिवारणाय **''अभास्वरशुक्लेतररूपा-समानाधिकरण''** इति । जलत्वस्य शुक्लरूपसामानाधिकरण्यात् असंभव इति

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

''शुक्लेतर'' इति । तेजस्त्वम् आदाय तेजसि अतिव्याप्तिवारणाय **''अभास्वर''** इति ।।

राजीवोल्लासः

शुक्लरूपवत्त्वं कुतः न लक्षणम् इत्यत्र आह – **पृथिव्यादौ अतिव्याप्तेः** इति । ''आदि''शब्देन तेजः गृह्यते । तथा च अलक्ष्ययोः पृथिवीतेजसोरपि शुक्लरूपवत्त्वस्य सत्त्वेन अतिव्याप्त्यापत्त्या शुक्लरूपवत्त्वं जलस्य न लक्षणम् इति भावः ।

शुक्लरूपवत्त्वस्य लक्षणत्वेऽपि पृथिवीतेजसोः यथा अतिव्याप्तिः न स्यात्, तथा परिष्कृतं **अथवा** इत्यादिना मूले । परिष्कृतलक्षणघटकदलानां प्रयोजनम् आह – **द्रव्यत्वव्याप्यवायुत्वजातिम् आदाय** इत्यादिना । द्रव्यत्वसाक्षाद्व्याप्या जातिः वायुत्वम् । तद्वत्वं वायौ अस्ति इति तत्र अतिव्याप्तिः । तद्वारणाय **रूपवद्वृत्ति** इति जातिविशेषणम् । वायुत्वं तु रूपशून्यवायुवृत्ति । न तु रूपवद्वृत्ति इति वायुत्वम् आदाय न अतिव्याप्तिः । रूपवद्घटादिवृत्तिः द्रव्यत्वसाक्षाद्व्याप्या जातिः पृथिवीत्वम् । तद्वत्वं पृथिव्याम् अस्ति इति तत्र अतिव्याप्तिः । तद्वारणाय, रूपवद्वृत्तितेजस्त्वजातिम् आदाय तेजसि अतिव्याप्तिवारणाय च जातौ **नैमित्तिकद्रवत्ववदवृत्ति** इति विशेषणम् । पृथिवीत्वं नैमित्तिकद्रवत्ववद्घृतादिवृत्ति । तेजस्त्वं नैमित्तिकद्रवत्ववत्सुवर्णादिवृत्ति इति पृथिवीत्वतेजस्त्वयोः ग्रहीतुम् अशक्यतया न उक्तातिव्याप्तिः । घटत्वपटत्वादिजातीनामपि नैमित्तिकद्रवत्ववदवृत्तिरूपवद्वृत्तितया तद्वति घटपटादौ अतिव्याप्तिः । तद्वारणाय ''द्रव्यत्वव्याप्य'' इत्यनुक्त्वा **''द्रव्यत्वसाक्षाद्व्याप्य''** इत्युक्तम् । द्रव्यत्वसाक्षाद्व्याप्यत्वं च द्रव्यत्वव्याप्याव्याप्यत्वे सति द्रव्यत्वव्याप्यत्वम् । घटत्वपटत्वादीनां द्रव्यत्वव्याप्यपृथिवीत्वव्याप्यतया द्रव्यत्वव्याप्याव्याप्यत्वं नास्ति इति न उक्तदोषः । अत्र लक्षणे द्रव्यत्वव्याप्याव्याप्यत्वमात्रं प्रवेशनीयम् । न तु द्रव्यत्वव्याप्यत्वमपि । न च – तदप्रवेशे

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

द्रव्यत्वव्याप्याव्याप्यरूपत्वादिजातिम् आदाय रूपादौ अतिव्याप्तिः इति – वाच्यम् । रूपत्वादीनां रूपवद्वृत्तित्वविरहादेव ग्रहीतुम् अशक्यत्वात् । तथा च प्रयोजनाभावात् द्रव्यत्वव्याप्यत्वं न निवेशनीयम् ।

यद्यपि इत्यादि । पृथिवीत्वादिवारणाय **नैमित्तिकद्रवत्त्ववदवृत्ति** इति विशेषणस्य अवश्यम् उपात्ततया तद्घटकतया द्रवत्वस्य उपस्थितत्वेन उपास्थिति-कृतलाघवात् ''रूपवद्वृत्ति'' इत्यस्य स्थाने ''द्रवत्ववद्वृत्ति'' इत्येव निवेशयितुम् उचितम् । तथा च नैमित्तिकद्रवत्ववदवृत्ति-द्रवत्ववद्वृत्ति-द्रव्यत्वसाक्षाद्व्याप्यजातिमत्वं जलस्य लक्षणम् । वायुत्वस्य द्रवत्ववद्वृत्तित्वविरहात् न वायुत्वमादाय वायौ अतिव्याप्तिः । एवं च घटत्वपटत्वादीनामपि द्रवत्ववद्वृत्तित्वाभावादेव वारणसंभवात् ''द्रव्यत्वसाक्षाद्व्याप्य''इत्यपि विशेषणं न देयम् इति लाघवम् अस्ति, तथापि **''वर्णः शुक्लः''** इति **कारिकायां** वर्णपदस्य रूपार्थकतया रूपघटितस्य लक्षणस्यैव विवक्षितत्वात् रूपाघटितस्य द्रवत्वघटितस्य लक्षणस्य परिष्कारे **कारिकाविरोधः** स्यात् । अतः ''रूपवद्वृत्ति'' इति विशेषणं दत्तम् इति भावः ।

रूपघटितलक्षणस्य इति । ननु वर्णपदानुसारेण रूपघटितलक्षणे **कारिकायां** शुक्लपदस्यापि उपात्तत्वेन तस्य च उक्तलक्षणाघटकतया **कारिकाविरोधः** दुर्वार एव इति चेत्, न – नैमित्तिकद्रवत्ववदवृत्ति-शुक्लवद्वृत्ति-द्रव्यत्वसाक्षाद्व्याप्य-जातिमत्त्वस्यापि लक्षणतया विवक्षितत्वात् ।

ननु जले कथं लक्षणसमन्वयः? जलत्वजातेः द्रव्यत्वव्याप्यमूर्तत्वव्याप्यतया द्रव्यत्वव्याप्याव्याप्यत्वरूपद्रव्यत्वसाक्षाद्व्याप्यत्वविरहात् इति आशङ्क्य आह – **मूर्तत्वजात्यनभ्युपगमेन** इति । भूतत्वेन साङ्कर्यात् मूर्तत्वं न जातिः इति भावः । **इदम्** इति । ''नैमित्तिकद्रवत्त्ववदवृत्ति'' इत्यादिलक्षणम् इत्यर्थः ।

धर्मपदमुपेक्ष्य जातिपदनिवेशस्य प्रयोजनम् आह – **जलघटान्यतरत्व-मादाय** इति । जलघटान्यतरत्वं नैमित्तिकद्रवत्ववदवृत्ति रूपवद्वृत्ति च । तद्वत्त्वं

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

घटे अस्ति इति अतिव्याप्तिः । अतः जातिपदम् उपात्तम् । अन्यतरत्वं तु न जातिः ।

एवमेव इति । एकस्मिन् लक्षणे "शुक्ल", "रूप" पदयोः घटकत्वेन अपरितोषात् मूले कारिकानुसारिलक्षणान्तरम् इति अवधेयम् । **बोध्या इति** । वायुत्वम् आदाय अतिव्याप्तिवारणाय, पटत्वादिकम् आदाय तद्वारणाय च रूपवद्वृत्तित्व–द्रव्यत्वसाक्षाद्व्याप्यत्वयोः प्रवेशः इत्यर्थः ।

न च – पटे नीलादिरूपस्यापि अनुभवसिद्धतया असमानाधिकरणान्तेनैव पटत्वादिवारणसंभवात् शङ्खादौ अतिव्याप्तिवारणमेव साक्षात्पदप्रयोजनम् । तथा च "**एवमेव**" इति कीर्तनम् असङ्गतम् इति – वाच्यम् । नीलपटादिस्थले नीलादिरूपं न पटस्य, अपि तु नीलयुक्तद्रव्यान्तरस्यैव इति सिद्धान्तात् इति **तरङ्गिणीकाराः** ।।

मुक्तावली

रसस्पर्शौ इति । जलस्य मधुर एव रसः । **शीत एव स्पर्शः** । तिक्तवदवृत्ति-मधुरवद्वृत्ति-द्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वं तदर्थः ।।

दिनकरी

शीत एव इति । यद्यपि "शीतं गुणः" इति कोशात् क्लीबतैव उचिता, तथापि विशेष्यस्य स्पर्शशब्दस्य पुंलिङ्गत्वात् पुंलिङ्गतया निर्देशः । "शुक्लं रूपम्" इत्यादौ शुक्लपदस्य क्लीबतैव इति । द्रव्यत्वव्याप्या या पृथिवीत्वरूपा जातिः ताम् आदाय पृथिव्याम् अतिव्याप्तिवारणाय **तिक्तावृत्ति इति** । शेषं दर्शितदिशा अवसेयम् ।।

मुक्तावली

ननु शुक्लरूपमेव इति कुतः? कालिन्दीजलादौ नीलिमोपलब्धेः इति चेत्, न । नीलजनकतावच्छेदिकायाः पृथिवीत्वजातेः अभावात् जले नीलरूपासंभवात्,

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

कालिन्दीजले नीलत्वप्रतीतिस्तु आश्रयौपाधिकी । **अत एव** वियति विक्षेपे धवलिमोपलब्धिः ।।

दिनकरी

ननु जले नीलरूपाभावे कथं नीलरूपप्रतीतिः? अत आह – **कालिन्दी** इति । स्वसमवायिसंयोगसंबन्धेन **उपष्टभक**पार्थिवभागगतनीलरूपप्रतीतिः कालिन्दीजलादौ इति भावः । **अत एव** इति । उपदर्शितसंबन्धस्य ''जलं नीलम्'' इति प्रतीतिनियामकत्वादेव इत्यर्थः । **वियति** इति । तदा **उपदर्शित-संबन्धघटकसंयोगनाशात्** इति भावः ।।

राजीवोल्लासः

उपष्टम्भक इति । कालिन्दीजलसंयुक्तः यः पार्थिवभागः तद्गतस्य नीलरूपस्य स्वसमवायिसंयोगसंबन्धेन कालिन्दीजले प्रतीतिः ।

उपदर्शितसंबन्धघटकसंयोगनाशात् इति । कालिन्दीजलस्य आकाशे विक्षेपदशायां पूर्वोक्ते संबन्धे स्वसमवायिसंयोगे घटकः यः संयोगः पार्थिवभागसंयोगः तस्य नाशात् इत्यर्थः ।।

मुक्तावली

अथ जले माधुर्ये किं मानम्? नहि प्रत्यक्षेण कोऽपि रसः तत्र अनुभूयते । न च – नारिकेलजलादौ माधुर्यम् उपलभ्यते एव इति – वाच्यम् । तस्य आश्रयौपाधिकत्वात् । अन्यथा जम्बीरजलादौ आम्लादिरसोपलब्धेः आम्लादिमत्त्वमपि स्यात् इति चेत्, न । हरीतक्यादिभक्षणस्य जलरसव्यञ्जकत्वात् । न च – हरीतक्यामेव जलोष्मसंयोगात् रसान्तरोत्पत्तिः इति – वाच्यम् । कल्पनागौरवात् । पृथिवीत्वस्य अम्लादिजनकतावच्छेदकत्वात् च जले न आम्लादिकम् । जम्बीररसादौ तु आश्रयौपाधिकी तथा प्रतीतिः ।।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

दिनकरी

तत्र जले । **तस्य** माधुर्यस्य । **अन्यथा** – आश्रयौपाधिकत्वाभावे । ''व्यञ्जकत्वात्'' इत्युत्तरं ''हरीतकीभक्षणोत्तरं प्रत्यक्षेण माधुर्योपलम्भात्'' इति पूरणीयम् । **कल्पनागौरवात्** इति । अवयवरसाजन्यस्य पृथिवीरसस्य **अग्निसंयोग-साध्यत्वदर्शनात्** एतदनुरोधमात्रेण जलसंयोगस्यापि पृथिवीरसोत्पादकत्वस्वीकारे अतिरिक्तकार्यकारणभावस्य हरीतक्यां मधुररसस्य च कल्पने गौरवात् इति भावः ।

ननु अस्तु जले मधुरो रसः, तथापि जम्बीरजलादौ प्रत्यक्षसिद्धस्य अम्लरस-स्यापि स्वीकारे बाधकाभाव इति, अत आह – **पृथिवीत्वस्य** इति । **अम्लादिजन-कतावच्छेदकत्वात्** इति । यद्यपि पृथिवीत्वस्य अम्लादेः जनकतावच्छेदकतावन्म-धुरजनकतावच्छेदकत्वम् अपि अस्ति इति तुल्यम्, तथापि हरीतक्यादिभक्षणोत्तरं जलेऽपि मधुरोपलब्धेः तत्र मधुरस्वीकारस्य **आवश्यकतया जलत्वेनापि** मधुरं प्रति हेतुत्वं कल्प्यते इति भावः ।

ननु जम्बीरसलिलादौ अम्लप्रत्यक्षात् जलत्वेन अम्लादिरसेऽपि तुल्यवत् हेतुत्वं स्यात्, अत आह – **जम्बीररसादौ** इति । स्वसमवायिसंयोगेन जम्बीर-गताम्लरसप्रतीतिः तद्गतजले इत्यर्थः । **शुष्केऽपि** जम्बीरे आम्लप्रतीतेः तत्र आम्लरसस्य आवश्यकत्वे तस्यैव तद्गतजले परम्परया प्रतीतिः । **हरीतक्यां** तु मधुररसाभावात् न हरीतकीगतमाधुर्यस्य जले प्रतीतिः इति भावः । कर्कटीभक्षणोत्तरं जलपाने तिक्तरसस्य अनुभवात् तिक्तरसोऽपि जले स्यात् इति तु न, जलपानात् पूर्वमपि कर्कट्यां तिक्तरसोपलब्धेः, कर्कटीभक्षणोत्तरं रसनाग्रवर्तिपित्तक्षोभे तदीयतिक्तोपलब्धेः वैद्यकसिद्धत्वाच्च । वस्तुतः निदाघपीतनिर्मलगङ्गाजलमाधुर्यस्य अनुभवसिद्धस्य अपलापासंभवात् मधुर एव इति युक्तम् ।

एतेन – हरीतक्यादौ न जलसंयोगेन माधुर्यम् उत्पद्यते, येन कल्पनागौरवम् । परंतु हरीतक्यां कषायवत् मधुररसोऽपि स्वीक्रियते । **तद्व्यञ्जकश्च** जलसंयोगः, न

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

तु तद्गतरसान्तरस्य, **फलबलात्** । यदि च चित्ररूपवत् चित्ररसे **मानाभावात्** गुणविरोधेन नीरसैव हरीतकी, **रसप्रतीतिस्तु** अवयवेषु रससत्त्वात् **परम्परया** इत्युच्यते, तदास्तु जलसंयोगः हरीतक्यवयवगतमाधुर्यस्यैव व्यञ्जकः इति – **अपास्तम्** ।।

राजीवोल्लासः

अग्निसंयोगसाध्यत्वदर्शनात् इति । पाकजत्वदर्शनात् इत्यर्थः । **तत्र** – हरीतक्याम् । "**आवश्यकतया**" इत्यस्य "**अनुभवानुरोधेन**" इत्यादिः । "**जलत्वेन**" इत्यस्य "**पृथिवीत्वेन इव**" इत्यादिः । ननु जम्बीरगतरसस्य जले भानं जलगतरसस्य जम्बीरे भानं वा इत्यत्र विनिगमकं दुर्लभम् इति आशङ्क्य आह – **शुष्केऽपि** इति । न च एवं हरीतकीगतमधुररसस्यैव जलेऽपि परंपरया भानस्वीकारेणैव उपपत्तौ जले मधुररसोऽपि न स्यात् इति, अत आह – **हरीतक्याम्** इति । **तद्व्यञ्जकश्च** इति । हरीतकीमधुररसव्यञ्जकस्तु इत्यर्थः । **रसान्तरस्य** – कषायरसस्य । **फलबलात्** – तत्प्रत्यक्षरूपकार्यबलात् इत्यर्थः । **मानाभावात्** इति । चित्ररसस्य अप्रामाणिकत्वे तत्र चित्ररूपे इव अवयवगतनानारसानां हेतुत्वसंभवेऽपि नीरसद्रव्यप्रत्यक्षे बाधकाभावेन चित्ररूपवत् चित्ररसानङ्गीकारे क्षतिविरहात् नानारसावयवकद्रव्ये परस्परविरोधेन कस्यापि रसस्यानुत्पत्या नीरसैव हरीतकी इति समुदायार्थः ।

न च एवं हरीतकीभक्षणे तस्यापि रसस्य प्रत्यक्षं न स्यात्, अनुभूयते च कषायरसप्रत्यक्षम्, अत आह – **रसप्रतीतिस्तु** इति । **परंपरया** – स्वाश्रयसमवेत-त्वसंबन्धेन । **अपास्तम्** इति । गङ्गाजले माधुर्यस्य प्रत्यक्षसिद्धत्वात् इति भावः इति **तरङ्गिणीकाराः** ।।

मुक्तावली

एवं जन्यशीतस्पर्शजनकतावच्छेदकं जलत्वम्, जन्यजलत्वं वा बोध्यम् । घृष्टचन्दनादौ तु शैत्योपलब्धिः चन्दनान्तर्वर्तिशीततरसलिलस्यैव । तेजः संयोगात् जले उष्णप्रतीतिः औपाधिकी स्फुटैव, तत्र पाकासंभवात् ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

स्नेहस्तत्र इति । घृतादौ अपि तदन्तर्वर्तिजलस्यैव स्नेहः, जलस्य स्नेहसमवायिकारणत्वात् । तेन जले एव स्नेह इति मन्तव्यम् ।

द्रवत्वम् इति । सांसिद्धिकद्रवत्वत्वं जातिविशेषः प्रत्यक्षसिद्धः । तदवच्छिन्न-जनकतावच्छेदकमपि तदेव इति भावः । तैलादौ अपि जलस्यैव द्रवत्वम्, स्नेहप्रकर्षेण च दहनानुकूल्यम् इति वक्ष्यति ।।

दिनकरी

जलत्वजातौ अनुमानान्तरं प्रमाणम् आह – एवम् इति । ननु जलत्वाभावेऽपि घृष्टचन्दनादौ शैत्योत्पत्तेः व्यभिचारेण कथं जन्यजलत्वेन तत्र हेतुत्वम्? अत आह – घृष्ट इति । पूर्वं ''शीत एव स्पर्शः'' इत्युक्तम्, तत् साधयति – तेजः संयोगात् इति । तत्र – जले । विवेचयिष्यते च पाकासंभवम् उपरिष्टात् । ''घृतादौ इति ''आदि'' पदेन तैलपरिग्रहः । ''जलस्यैव स्नेहः'' इत्यनन्तरं स्वाश्रयसंयोगेन प्रतीयते इति शेषः । तेन – घृतादौ समवायेन स्नेहनिरासेन । जल एव इति । स्नेहस्य अवान्तरविशेषाभावात् स न उत्कीर्तितः । तदवच्छिन्न-जनकतावच्छेदकम् – सांसिद्धिकद्रवत्वत्वावच्छिन्नजनकतावच्छेदकम् । तदेव – जन्यजलत्वमेव । तदवच्छिन्नजनकतावच्छेदकं जलत्वम् इति भावः । अथ एवंरीत्या परमाणुव्यावृत्तम् आद्व्यणुकं जलत्वम् एकम्, परमाणुसाधारणं द्वितीयम् इति जलत्वयोः भेदे भेदाग्रहः कुतः? इति चेत्, समनियतयोग्यव्यक्तिवृत्तित्वात् इति । एवम् अग्रेऽपि । ''तैलादौ'' इति ''आदि'' पदेन क्षीरपरिग्रहः, न तु घृतस्य, तत्र नैमित्तिकद्रवत्वस्य समवायेनैव सत्त्वात् । ''द्रवत्वम्'' इत्यनन्तरं स्वाश्रयसंयोगेन प्रतीयत इति शेषः । ननु तैले जलस्य सत्त्वे तैलस्य दहनानुकूल्यं न स्यात्, जलस्य दहनप्रतिकूलत्वात् इति, अत आह – स्नेहप्रकर्षेण इति । प्रकृष्टस्नेहस्य दहनानुकूल्यमेव । अपकृष्टस्नेहस्यैव दहनप्रतिकूलत्वात् इति भावः । इति वक्ष्यति इति । स्नेहनिरूपणावसरे इति शेषः ।।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

राजीवोल्लासः

ननु घृतादावपि तदन्तर्गतजलस्यैव स्नेहः इति मूलम् असङ्गतम् । घृतादेः पार्थिवत्वेन तत्र जलीयस्नेहासंभवात् । अतः पूरयति – **जलस्यैव** इति । जलगतः स्नेह एव स्वाश्रयसंयोगसंबन्धेन घृतादौ प्रतीयते इत्यर्थः । परमाणुसाधारण-जलत्वसिद्ध्यर्थम् आह – **तदवच्छिन्न** इति । जन्यजलत्वावच्छिन्नेत्यर्थः । **अथ एवं रीत्या** इति । जन्यशीतस्पर्शादिजनकतावच्छेदकतया जन्यजलत्वजातिः सिद्ध्यति । जन्यजलत्वावच्छिन्नजनकतावच्छेदकतया जलत्वजातिः सिद्ध्यति इति पूर्वोक्तरीत्या अङ्गीकारे द्व्यणुकमारभ्य अवयविजलेषु परमाणुव्यावृत्तं एकं जलत्वं, परमाणुजलेष्वपि अन्यत् जलत्वम् इति जलत्वजात्योः भेदः अङ्गीकरणीयः । वस्तुतस्तु जलत्वयोः भेदो न गृह्यते । तत् कुतः इति शङ्कायां **समनियतयोग्य-व्यक्तिवृत्तित्वात् भेदाग्रहः** इति समाधानम् उक्तम् । तस्य अयमर्थः – प्रत्यक्षयोग्यजलव्यक्तिषु तयोः जलत्वयोः समनियततया वृत्तित्वात् भेदः न गृह्यत इति ॥

कारिकावली

नित्यतादि प्रथमवत्, किन्तु देहमयोनिजम् ।
इन्द्रियं रसनं, सिन्धुर्हिमादिर्विषयो मतः ॥ ४० ॥

मुक्तावली

प्रथमवत् इति । **पृथिव्या इव** इत्यर्थः । तथाहि – जलं द्विविधम् – नित्यम् अनित्यं च । परमाणुरूपं नित्यम्, द्व्यणुकादि सर्वम् अनित्यम्, अवयवसमवेतं च । अनित्यमपि त्रिविधम् – शरीरेन्द्रियविषयभेदात् । पृथिवीतः यो विशेषः तम् आह – **किंतु** इति । **देहम् अयोनिजम्** अयोनिजमेव इत्यर्थः । जलीयं शरीरम् अयोनिजं वरुणलोके प्रसिद्धम् ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

इन्द्रियम् इति । जलीयम् इत्यर्थः । तथाहि – "रसनं जलीयं, गन्धाद्यव्यञ्जकत्वे सति रसव्यञ्जकत्वात्, सक्तुरसाभिव्यञ्जकोदकवत्" । रसनेन्द्रियसंनिकर्षे व्यभिचारवारणाय द्रव्यत्वं देयम् ।

विषयं दर्शयति – **सिन्धुहिमादिः** इति । "आदि" पदात् सरित्कासारकरकादिः सर्वोऽपि ग्राह्यः । न च – हिमकरकयोः **कठिनत्वात्** पार्थिवत्वम् इति – वाच्यम् । ऊष्मणा **विलीनस्य तस्य** जलत्वस्य प्रत्यक्षसिद्धत्वात्, "यद्द्रव्यं यद्द्रव्यध्वंसजन्यम्" इति व्याप्तेः जलोपादानोपादेयत्वसिद्धेः । अदृष्टविशेषेण द्रवत्वप्रतिरोधात् करकायाः काठिन्यप्रत्ययस्य भ्रान्तित्वात् ।।

दिनकरी

प्रथमवत् इति । **षष्ठीसमर्थाद्वतिः** इत्यभिप्रायेण आह – **पृथिव्या इव** इत्यर्थः इति । एवम् अग्रेऽपि । **जलीयं शरीरम्** इति । **तच्च** पार्थिवावयवैः उपष्टब्धं बोध्यम् । **तेन जलमात्रे** हस्तपादादिव्यवस्थाया असंभवेऽपि **न क्षतिः** । ननु तादृशशरीरे मानाभावः अनुपलम्भात् इति, अत आह – **वरुणलोक** इति । तत्र च श्रुतिरेव प्रमाणम् इति भावः ।

गन्ध इति । **रसव्यञ्जके** मनसि व्यभिचारवारणाय **गन्धाद्यव्यञ्जकत्व** इति । **कासारः** – **सरः** । **करकादिः** इत्यत्र "आदि" पदात् कूपादिपरिग्रहः । **कठिनत्वात्** इति । कठिनस्पर्शवत्त्वात् इत्यर्थः । **विलीनस्य तस्य** इति । **सप्तम्यर्थे षष्ठी** । क्वचित् "**विलीनयोः**" इति पाठः । स तु ऋजुरेव । विलीनताया द्रवत्वरूपाया जलत्वव्यञ्जकत्वात् इति भावः । ननु विलीनता नैमित्तिकद्रवत्वमेव, तदुक्तम् "**ऊष्मणा**" इति । तच्च न जलत्वव्यञ्जकम् । यदि च "**विलीने तस्मिन्**" इत्यस्य तस्मिन् नष्टे सति इत्यर्थः, तथापि करकादिनाशोत्तरं द्रव्यान्तरोत्पादात् तत्रैव द्रवत्वजलत्वयोः प्रत्यक्षं, न करकायां, नष्टत्वात्, अत आह – **यद्द्रव्यम्** इति । तथा च करकादिनाशोत्पन्नद्रव्यान्तरे

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

जलत्वस्य प्रत्यक्षसिद्धत्वात् उक्तव्याप्त्या करकादिषु जलत्वसिद्धिः इति भावः । ननु हिमकरकयोः पार्थिवत्वाभावे कथं काठिन्यप्रत्ययः इति, अत आह – **अदृष्टविशेषेण** इति ।।

राजीवोल्लासः

षष्ठी समर्थात् इति । षष्ठीविभक्त्यन्तात् समर्थात् प्रातिपदिकात् ''वति''प्रत्ययः । पृथक्पृथगर्थोपस्थापकानां पदानां परस्परविशेष्यविशेषणभावावगाहि-एकविशिष्टार्थोपस्थितिजनकत्वं सामर्थ्यम् ।

तच्च – जलीयं शरीरं च पार्थिवभागैः उपष्टब्धं भवति । **तेन** – पार्थिवभागोपष्टब्धत्वेन वरूणशरीरस्य हस्तपादाद्यवयवाः भवन्ति । **जलमात्रे** – पार्थिवभागानुपष्टब्धे केवले जले हस्तपादाद्यवयवव्यवस्थायाः असंभवे अपि न क्षतिः ।

रसव्यञ्जके मनसि इत्यादि । ''रसनं जलीयं, गन्धादिविषयकसाक्षात्काराजनकत्वे सति रसविषयकसाक्षात्कारजनकत्वात्, सक्तुरसाभिव्यञ्जकजलवत्'' इत्यनुमानं रसनेन्द्रियस्य जलत्वे प्रमाणम् । अत्र हेतौ सत्यन्तानिवेशे ज्ञानसामान्यहेतौ मनसि रसविषयकसाक्षात्कारजनकत्वरूपहेतुसत्त्वात् जलत्वरूपसाध्याभावाच्च व्यभिचारः । अतः सत्यन्तम् । सत्यन्तमात्रोक्तौ घटादौ व्यभिचारः । अतः रसव्यञ्जकत्वात् इति । जलत्वाभाववति रसनेन्द्रियसन्निकर्षे संयुक्तसमवायाख्ये गन्धाद्यव्यञ्जकत्वे सति रसव्यञ्जकत्वसत्त्वात् व्यभिचारः, तद्वारणाय द्रव्यत्वे सति इत्यपि हेतौ विशेषणं देयम् ।

सप्तम्यर्थे षष्ठी इति । ऊष्मणा विलीने तस्मिन् हिमकरके ।।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ तेजोनिरूपणम् ॥

कारिकावली

उष्णः स्पर्शस्तेजसस्तु स्याद्रूपं शुक्लभास्वरम् ।

मुक्तावली

तेजो निरूपयति – उष्ण इति । उष्णत्वं स्पर्शनिष्ठः जातिविशेषः प्रत्यक्षसिद्धः । इत्थं च जन्योष्णस्पर्शसमवायिकारणतावच्छेदकं तेजस्त्वं जातिविशेषः । तस्य परमाणुवृत्तित्वं तु जलत्वस्येव अनुसन्धेयम् । न च – उष्णस्पर्शवत्त्वं चन्द्रकिरणादौ अव्याप्तम् इति – वाच्यम् । तत्रापि उष्णस्य सत्त्वात् । किंतु तदन्तःपातिजलस्पर्शेन अभिभवात् अग्रहः । एवं रत्नकिरणादौ पार्थिवस्पर्शेन अभिभवात्, चक्षुरादौ च अनुद्भूतत्वात् अग्रहः ॥

दिनकरी

इत्थं च इति । उष्णत्वजातिसिद्धौ च इत्यर्थः । ननु कथं तर्हि जन्योष्णस्पर्शसमवायिकारणभिन्नेषु परमाणुषु तेजस्त्वजातिसिद्धिः इति, अत आह – तस्य इति । तेजस्त्वस्य इत्यर्थः । जलत्वस्येव इति । यथा च जन्यजलत्वावच्छिन्नजनकतावच्छेदकतया जलपरमाणौ जलत्वजातिसिद्धिः, तथा जन्यतेजस्त्वावच्छिन्नजनकतावच्छेदकतया तेजःपरमाणौ अपि तेजस्त्वरूपजातिसिद्धिः इत्यर्थः । इदमुपलक्षणम् । समवायेन विलक्षणनीलोत्पत्तित्वावच्छिन्नं प्रति समवायेन तेजःसंयोगत्वेन हेतुत्वात् तेजस्त्वजातिसिद्धिः इत्यपि द्रष्टव्यम् । ''चन्द्रकिरणादौ'' इति ''आदि''ना रत्नकिरणादेः परिग्रहः । तत्रापि – चन्द्रकिरणादावपि । ननु तर्हि औष्ण्यप्रतीतिः कुतः न? इति, अत आह – किंतु इति । तदन्तःपातिजलस्पर्शेन इति । चन्द्रकिरणान्तर्गतजलभागशीतस्पर्शेन इत्यर्थः । ननु चक्षुरादिनिष्ठस्य उष्णस्पर्शस्य केनापि अनभिभूतत्वात् प्रत्यक्षापत्तिः, अत आह – चक्षुरादौ च इति ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

राजीवोल्लासः

प्रकारान्तरेणापि तेजस्त्वजातिं साधयति – **इदम् उपलक्षणम्** इति । पृथिव्यां तेजस्संयोगवशात् पूर्वरूपनाशपूर्वकं विलक्षणनीलादिरूपं जायते । तेन समवायसंबन्धेन विलक्षणनीलरूपं प्रति समवायसंबन्धेन तेजःसंयोगः कारणम् इति कार्यकारणभावः अङ्गीकरणीयः । एवं च कारणतावच्छेदकं तेजस्त्वविशिष्टतेजःप्रतियोगिकसंयोगत्वम् । तदवच्छेदकप्रविष्टतया तेजस्त्वजातिः सिद्ध्यति ।

मूले अभिभवात् इति । प्रतिबन्धात् इत्यर्थः । उष्णस्पर्शनिष्ठलौकिक-विषयतासंबन्धेन स्पार्शनं प्रति स्वाश्रयसंयुक्तसमवेतत्वसंबन्धेन उष्णान्यस्पर्शः प्रतिबन्धकः इति भावः ।

चक्षुरादौ इति । "आदिना" "प्रभा" परिग्रहः । अथ रत्नकिरणादौ अपि स्पर्शः अनुद्भूत एवास्तु । किं तत्र अभिभवकल्पनेन इति चेत्, न । धर्मिणोऽपि स्पार्शनाभावप्रसङ्गात् । सुवर्णादिद्रवत्वस्पार्शनोपपत्तये धर्मिणि उद्भूतस्पर्शाङ्गीकारस्य आवश्यकत्वाच्च ।।

मुक्तावली

रूपम् इत्यादि । वैश्वानरे **मरकतकिरणादौ** च पार्थिवरूपेणाभिभवात् शुक्लरूपाग्रहः । अथ तद्रूपाग्रहे वैश्वानरादेः चाक्षुषत्वं न स्यात् इति चेत्, न । अन्यदीयरूपेणैव धर्मिणः ग्रहसंभवात्, शङ्खस्येव पित्तपीतिम्ना । वह्नेस्तु शुक्लं रूपं नाभिभूतम्, किंतु तदीयं शुक्लत्वम् अभिभूतम् इति अन्ये ।।

दिनकरी

"**मरकतकिरणादौ**" इति "आदि"ना सुवर्णपरिग्रहः । "**स्याद्रूपं शुक्लभास्वरम्**" इति मूलम् । तत्र "**शुक्ल**" इति स्वरूपकथनम् । भास्वररूपमात्रस्य लक्षणत्वे अतिप्रसङ्गाभावात् । भास्वरत्वं जातिविशेषः । स च तेजोरूपमात्रवृत्तिः, शुक्लत्वव्याप्यश्च इति । ननु रूपाविषयकद्रव्यप्रत्यक्षस्याभावात् वैश्वानरादेः

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

चाक्षुषत्वानापत्तिः इति शङ्कते – **तद्रूपाग्रह** इति । **वैश्वानरादेः अचाक्षुषत्वे** तद्गतसंख्यादिगुणानामपि चाक्षुषत्वं न स्यात् इति, योग्यव्यक्तिमात्रवृत्तित्वाभावात् इत्यपि सूचितम् । **अन्यदीयरूपेणैव** इति । पार्थिवरूपेणैव इत्यर्थः । **मतान्तरम्** आह – **वह्नेस्तु** इति ।

राजीवोल्लासः

ननु तेजोगतरूपाणां अनेकविधत्वात् पीतत्वशुक्लत्वादिना साङ्कर्यात् भास्वरत्वस्य जातित्वं न संभवति । शुक्लत्वं विहाय भास्वरत्वं भास्वरपीते । भास्वरत्वं विहाय शुक्लत्वं अभास्वरशुक्ले । उभयोः भास्वरशुक्ले समावेशात् इत्याशङ्कां निराकरोति – **शुक्लत्वव्याप्यश्च इति** इति । तथा च भास्वरत्वं शुक्लत्वाभाववति पीतादौ नास्त्येव । अतः न साङ्कर्यम् ।

कारिकावली

नैमित्तिकं द्रवत्वं तु नित्यतादि च पूर्ववत् ॥ ४१ ॥

मुक्तावली

नैमित्तिकम् इति । सुवर्णादिरूपे तेजसि तत्सत्त्वात् । न च – नैमित्तिकद्रवत्वं दहनादौ अव्याप्तम्, घृतादौ अतिव्याप्तं च इति – वाच्यम् । पृथिव्यवृत्ति-नैमित्तिक-द्रवत्ववदवृत्ति-जातिमत्त्वस्य विवक्षितत्वात् ।

पूर्ववत् इति । जलस्येव इत्यर्थः । तथा हि – तत् द्विविधम् – नित्यम् अनित्यं च । नित्यं परमाणुरूपम् । तदन्यत् अनित्यम् अवयवि च । तच्च त्रिधा – शरीरेन्द्रियविषयभेदात् । शरीरम् अयोनिजमेव । तच्च सूर्यलोकादौ प्रसिद्धम् ॥

दिनकरी

सुवर्णादिरूपे तेजसि तत्सत्त्वात् इति । तेन न असंभव इति भावः । **पृथिव्यवृत्ति** इति । नैमित्तिकद्रवत्ववद्वृत्तिपृथ्वीत्वरूपजातिम् आदाय पृथिव्याम्

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अतिव्याप्तिवारणाय **पृथिव्यवृत्ति** इति । पृथिव्यवृत्तिजलत्वजातिमादाय जले अतिव्याप्तिवारणाय **नैमित्तिकद्रवत्ववद्वृत्ति** इति । वायुतेजोन्यतरत्वम् आदाय वायौ अतिव्याप्तिवारणाय **''जाति''** इति ।।

राजीवोल्लासः

ननु सुवर्णरूपतेजसि नैमित्तिकद्रवत्वसत्त्वं मूले प्रदर्शितम् । तच्च अनर्थकमेव । तावतापि अव्याप्तेः अपरिहारात् इति आशङ्कायाम् आह – **तेन** इति । तत्कथनेन इत्यर्थः । तथा च तद्ग्रन्थस्य असंभवपरिहारकत्वमेव । अव्याप्तिपरिहारस्तु उत्तरग्रन्थेनैव करणीय इति भावः ।।

कारिकावली

इन्द्रियं नयनं वह्निः स्वर्णादिर्विषयो मतः ।

मुक्तावली

अत्र यो विशेषः तम् आह – **इन्द्रियम्** इति । – ''चक्षुः तैजसम्, **परकीयस्पर्शाद्यव्यञ्जकत्वे** सति परकीयरूपव्यञ्जकत्वात्, प्रदीपवत्'' । प्रदीपस्य स्वीयस्पर्शव्यञ्जकत्वात् प्रथमं **परकीय** इति । घटादेः स्वीयरूपव्यञ्जकत्वात् व्यभिचारवारणाय द्वितीयं **परकीय** इति । अथवा प्रभाया दृष्टान्तत्वसंभवात् आद्यं **परकीय** इति न देयम् । चक्षुःसंनिकर्षे व्यभिचारवारणाय द्रव्यत्वं देयम् ।।

दिनकरी

परकीयस्पर्शादि इति । गन्धाव्यञ्जकत्वादिघटितहेत्वन्तरसूचनाय ''आदि''पदेन गन्धादिपरिग्रहः । चक्षुषः परकीयरूपादिव्यञ्जकत्वादसिद्धिवारणाय स्पर्शपदम् ।

अत्र केचित् आहुः – चक्षुः विषयासंबद्धमेव ग्राहकम् । यदि प्राप्यकारि स्यात्, तदा रसनादिवत् अधिष्ठानासंबद्धं न गृह्णीयात् । न च एवम् । गोलकासंबद्धग्रहणात् । किंच यदि चक्षुः प्राप्य गृह्णीयात्, तर्हि स्वतोऽधिकपरिमाणवत्

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

न गृह्णीयात् । न खलु नखरञ्जनिका परशुच्छेद्यं छिनत्ति इति । शाखाचन्द्रमसोः तुल्यकालग्रहणानापत्तिश्च । गतिक्रमेण प्राप्यग्रहणे हि सन्निहितक्रमेण ग्रहणं स्यात्, न तु तुल्यकालमुपलम्भः । अनुभवति तु उन्मीलयन्नेव नयने शाखां शीतमयूखं च । एवं च प्राप्यकारित्वानुरोधेन गोलकातिरिक्तं चक्षुः परैः अङ्गीक्रियते, गोलकस्य चन्द्रादिप्राप्यसंभवात् । अप्राप्यकारित्वे च गोलकमेव चक्षुः, तच्च न तैजसम् इति ।

तदसत् । अधिष्ठानासंबद्धार्थग्राहिण्याः प्रदीपप्रभाया इव चक्षुषोऽपि प्राप्यकारित्वसंभवात्, पृथुतरग्रहणस्य च गोलकनिर्गतस्य महतश्च चक्षुषः पृथ्वग्रत्वेन प्रदीपप्रभाया इव उपपत्तेः, स्वाधिकपरिमाणवद्द्रव्यग्राहिणा त्वगिन्द्रियेण व्यभिचारात्, तादृशनियमे मानाभावाच्च । तुल्यकालग्रहणं च असिद्धमेव । तदभिमानस्य कालसंनिकर्षेणैव उपपत्तेः । अचिन्त्यो हि तेजसः लाघवातिशयेन वेगातिशयः, यत् प्राचीनाचलचूडावलम्बिन्येव भगवति मयूखमालिनि भवनोदरेषु आलोक इति अभिमानः लोकानाम् ।

यत्तु आहुः शालिकाचार्याः – चक्षुर्बाह्यालोकाभ्याम् आरब्धेन चक्षुषा तावदर्थसंस्पृष्टेन युगपत् तावदर्थग्रहणम् इति शाखाचन्द्रमसोः तुल्यकालग्रहणम् उपपद्यत एव इति ।

तन्न । चक्षुर्बाह्यालोकाभ्याम् आरब्धस्य चक्षुषः पृष्ठभागेऽपि सत्त्वात् पृष्ठभागस्थितपदार्थग्रहणापत्तेः । पृष्ठदेशस्थबाह्यालोकैः चक्षुरुत्पादे मानाभाव इति चेत्, अग्रदेशस्थबाह्यालोकैरपि तदुत्पादे मानाभावः । तदनभ्युपगमेऽपि चाक्षुषोपपादनस्य अनुपदमुक्तत्वात् इति । लाघवात् आह – **अथ वा** इति ॥

राजीवोल्लासः

इदानीं चक्षुरिन्द्रियस्य प्राप्यकारित्वनिराकरणपूर्वकं गोलकातिरिक्तं चक्षुः निराकुर्वतां मतं दर्शयति – **अत्र केचित्** इत्यादिना । चक्षुरिन्द्रियं विषयं प्राप्य – विषयसंबद्धं सत् न विषयग्राहकम् । किन्तु विषयासंबद्धं सदेव ग्राहकम् । यदि

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

विषयेण संयुज्य ग्राहकम् स्यात्, तदा रसनेन्द्रियादिवत् इन्द्रियाधिष्ठानसंबद्धमेव गृह्णीयात् । न च एवं गृह्णाति चक्षुः । चक्षुरिन्द्रियाधिष्ठानगोलकासंबद्धस्यैव घटादेः ग्रहणात् । तथा च "चक्षुः विषयं अप्राप्य तत्प्रकाशकारि, अधिष्ठानासंबद्धग्राहकत्वात्, यन्नैवं तन्नैवं यथा रसनादिकम्" इत्यनुमानम् अत्र विवक्षितम् ।

किञ्च यदि चक्षुः प्राप्य गृह्णीयात् तर्हि स्वापेक्षया अधिकपरिमाणयुक्तं वस्तु न गृह्णीयात् । न खलु नखरञ्जनिका स्वापेक्षया अधिकपरिमाणयुक्तं परशुच्छेद्यं वस्तु छिनत्ति । तथा च चक्षुरिन्द्रियं स्वविषयसंबद्धं सत् तद्गतफलजनकं न भवति । तदपेक्षया न्यूनपरिमाणवत्त्वात् । "यत् यत्संबद्धं सत् यत्संबन्धिफलजनकं तत् तदपेक्षया न न्यूनपरिमाणवत्, यथा नखरञ्जनिका नखेन संबद्ध्य छेदनरूपं फलं जनयति, नखापेक्षया च न न्यूनपरिमाणवती", इति व्यतिरेकव्याप्तिमूलकम् अनुमानम् अत्र विवक्षितम् ।

किञ्च चक्षुरिन्द्रियस्य प्राप्यग्राहकत्वे शाखाचन्द्रमसोः समकाले प्रत्यक्षं न स्यात् । चक्षुरिन्द्रियगतिक्रमेण विषयग्रहणे हि सन्निहितस्य पूर्वं ग्रहणम् व्यवहितस्य पश्चात् ग्रहणम् युक्तम् । न तु सन्निहितव्यवहितयोः युगपद्ग्रहणम् । एवं च चक्षुषः प्राप्यकारित्वे सत्येव गोलकातिरिक्तं चक्षुरिन्द्रियं सिद्ध्येत् गोलकस्य चन्द्रप्राप्त्य-संभवात् । पूर्वोक्तयुक्त्या अप्राप्यकारित्वे सिद्धे सति गोलकमेव चक्षुः, तच्च पार्थिवम् इति न तैजसम् इति केचित् आहुः ।

तन्मतं दूषयति – तदसत् इत्यादिना । यथा प्रदीपप्रभा दीपरूपाधिष्ठानासंबद्धं घटादिकं गृह्णाति, तथा चक्षुषोऽपि अधिष्ठानगोलकासंबद्धघटादिग्राहकत्वसंभवात् । तथा च प्रदीपप्रभायां प्रथमानुमाने व्यभिचारः । प्रदीपप्रभावदेव गोलकात् निर्गतस्य चक्षुरिन्द्रियस्य अग्रभागः पृथुः इति कृत्वा पृथुतरग्राहकत्वम् उपपद्यते । एवं त्वगिन्द्रियं यथा स्वाधिकपरिमाणवद्द्रव्यग्राहि, तथा चक्षुरिन्द्रियमपि भवितुमर्हति । तथा च द्वितीयानुमाने त्वगिन्द्रिये व्यभिचारः । शाखाचन्द्रयोः तुल्यकालग्रहणस्य

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

असिद्धत्वात् तेन हेतुना अप्राप्यकारित्वं न अनुमातुं शक्यते । एककालीनत्व-भ्रमस्य अतिसन्निहितकालत्वेन उपपत्तेः ।

ननु शाखातः चन्द्रस्य अतिदूरवृत्तित्वेन झटिति चन्द्रचक्षुस्संयोगासंभवात् शाखाचन्द्रयोः अत्यन्तसान्निध्यमेव नास्ति, कथं शाखाचन्द्रग्रहणयोः समानकालिकत्वभ्रमः? इति चेत्, न । देशतः शाखाचन्द्रयोः सान्निध्याभावेऽपि चाक्षुषस्य तेजसः लाघवातिशयेन वेगातिशयात् एककाले द्वयोः ग्रहणं संभवत्येव । यथा भगवति सूर्ये उदयाचलशिखरावलम्बिनि सति अतिदूरवर्ति भवनोदरेषु आलोकः इति भ्रमः तद्वत् ।

यत्तु आहुः इत्यादि । चक्षुरिन्द्रियबाह्यालोकाभ्यां चक्षुरिन्द्रियमन्यज्जायते । तेन यावन्तो विषयाः संबद्ध्यन्ते तावतां विषयाणां युगपत् प्रत्यक्षं भवति । अतः चक्षुर्बाह्यालोकारब्धेन चक्षुरिन्द्रियेण शाखाचन्द्रोभयसंबद्धेन एककाले तदुभयग्रहणं उपपद्यते इति मतमपि न युक्तम् । चक्षुर्बाह्यालोकाभ्यां जन्यस्य चक्षुषः शरीरपृष्ठभागेऽपि सत्त्वेन पृष्ठदेशस्थितपदार्थानामपि तेन चक्षुरिन्द्रियेण ग्रहणं स्यात् । यदि तु पृष्ठदेशस्थितबाह्यालोकैः चक्षुरिन्द्रियं न उत्पाद्यते प्रमाणाभावात् इत्युच्यते, तर्हि अग्रदेशस्थितबाह्यालोकेऽपि चक्षुरिन्द्रियोत्पादे प्रमाणाभावः । तर्हि युगपत् शाखाचन्द्रमसोः ग्रहणं कथम् इति चेत्, गोलकातिरिक्तस्य चक्षुरिन्द्रियस्य लाघवातिशयप्रयुक्तवेगातिशयात् एककाले दूरवर्तिपदार्थसंयोगपूर्वकं ग्रहणम् उपपद्यत इति पूर्वमेव उक्तत्वात् ॥

मुक्तावली

विषयं दर्शयति – वह्नि इति । ननु सुवर्णस्य तैजसत्वे किं मानम्? इति चेत्, न । "सुवर्णं तैजसम्, असति प्रतिबन्धके अत्यन्तानलसंयोगे सति अनुच्छिद्यमानद्रवत्वात्, यन्नैवं तन्नैवं, यथा पृथिवी" इति । न च अप्रयोजकम्, पृथिवीद्रवत्वस्य जन्यजलद्रवत्वस्य अत्यन्ताग्निसंयोगनाश्यत्वात् । ननु

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

पीतिमगुरुत्वाश्रयस्यापि तदानीं द्रुतत्वात् तेन व्यभिचार इति चेत्, न । **जलमध्यस्थमषीक्षोदवत् तस्य अद्रुतत्वात् ।।**

दिनकरी

तैजसत्वे किं मानम्? इति । ''सुवर्णं पार्थिवं, नैमित्तिकद्रवत्ववत्त्वात्'' इत्यनुमानस्य पार्थिवत्वसाधकस्यैव सत्त्वात् । समाधत्ते – **न** इति । **सुवर्णम्** इति । **न च** – **अत्र** पीतरूपवद्द्रव्यात्मकस्य सुवर्णस्य पक्षत्वे बाधः, तैजससुवर्णस्य च अनुमानात् पूर्वम् असिद्ध्या पक्षाप्रसिद्धिः । धर्मशास्त्रे पीतद्रव्येऽपि सुवर्णपदप्रयोगेन तस्यापि सुवर्णपदवाच्यतया सुवर्णपदवाच्यत्वस्य पक्षतावच्छेदकत्वे बाधतादवस्थ्यात् इति – वाच्यम् । **अत्यन्तानलसंयोगे सति** अनुच्छिद्यमानद्रवत्वाधिकरणत्वस्यैव पक्षतावच्छेदकत्वात् । अवच्छेदकावच्छेदेन साध्यसिद्धेः उद्देश्यतया पक्षतावच्छेदक-हेत्वभेदप्रयुक्तस्य सामानाधिकरण्येन सिद्धसाधनस्य अदोषत्वात् । **असति प्रतिबन्धक** इति । जलमध्यस्थघृतादौ व्यभिचारवारणाय ''असति प्रतिबन्धक'' इति । अग्निसंयोगानाश्यद्रवत्ववति घृतादौ व्यभिचारवारणाय ''संयोगे सति'' इत्यन्तम् । तादृशद्रवत्वस्य स्वसमानाधिकरणात्यन्ताग्निसंयोगासमानकालीनत्वात् न व्यभिचारः । ''**अनुच्छिद्यमानद्रवत्वात्**'' इत्यस्य ''अनुच्छिद्यमानद्रवत्वाधि-करणत्वात्'' इत्यर्थः, न तु उच्छिद्यमानद्रवत्वानधिकरणत्वात् इति, गगनादौ व्यभिचारात् । **अग्निसंयोगनाश्यत्वात्** इति । एतच्च उपलक्षणम् । ''अग्नेरपत्यं प्रथमं हिरण्यम्'' इत्याद्यागमान्यथानुपपत्तेरपि अनुकूलतर्कत्वात् इति । एतेन आश्रयनाश-जन्यद्रवत्वनाशे व्यभिचारवारणाय द्रवत्वे आश्रयनाशनाश्यद्रवत्वव्यावृत्तं जातिविशेषं कल्पयित्वा विजातीयद्रवत्वनाशं प्रति अग्निसंयोगत्वेन हेतुता स्वीकार्या । तच्च वैजात्यं सुवर्णद्रवत्वव्यावृत्तमपीति दर्शितानुकूलतर्कः असङ्गतः । सुवर्णस्य पृथिवीत्वेऽपि तदीयद्रवत्वस्य अग्निसंयोगनाश्यतावच्छेदकानाक्रान्ततया अत्यन्ताग्निसंयोगसत्त्वेऽपि नाशापत्तेः असंभवात् इत्यपि परास्तम् । **क्षोदः** – चूर्णम् । **तस्य** – पीतिमगुरुत्वाश्रयस्य ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

राजीवोल्लासः

मूले ''सुवर्णं पार्थिवम्, नैमित्तिकद्रवत्ववत्त्वात्, घृतादिवत्'' इति पार्थिवत्त्वसाधकप्रमाणस्यैव सत्त्वात् सुवर्णस्य तैजसत्त्वे प्रमाणं नास्ति इति आशङ्क्य ''सुवर्णं तैजसम् असति प्रतिबन्धके अत्यन्तानलसंयोगे सत्यपि अनुच्छिद्यमानद्रवत्ववत्त्वात्, यन्नैवं तन्नैवं, यथा पृथिवी'' इति व्यतिरेक्यनुमानं सुवर्णस्य तैजसत्त्वसाधकतया उपन्यस्तम् । तत्र शङ्कते – **न च अत्र** इति । सुवर्णे पीतरूपवद्द्रव्यात्मकस्य भागस्य पक्षत्वे तत्र तैजसत्वरूपसाध्याभावात् बाधः । तैजसभागस्य पक्षत्वं तु न संभवति; अनुमानात् पूर्वं तस्य असिद्ध्या पक्षाप्रसिद्धेः । सुवर्णपदवाच्यं पक्षः, सुवर्णपदवाच्यत्वं पक्षतावच्छेदकम्, इति स्वीकारेऽपि अवच्छेदकावच्छेदेन साध्यसिद्धेः उद्देश्यतया पीतरूपवद्भागेऽपि सुवर्णपदप्रयोगस्य धर्मशास्त्रे विद्यमानतया सुवर्णपदवाच्यत्ववति पीतरूपवद्द्रव्ये तैजसत्वरूपसाध्याभावात् बाधो दुर्वारः ।

समाधत्ते – **अत्यन्तानलसंयोगे सति** इति । अत्यन्तानलसंयोगे सति अनुच्छिद्यमानद्रवत्वाधिकरणत्वं पक्षतावच्छेदकम् । तदवच्छेदेन तैजसत्वं साधयितुम् इष्टम् । पीतरूपवद्द्रव्यस्य अत्यन्तानलसंयोगे सति अनुच्छिद्यमानद्रवत्वाधिकरणत्व-रूपपक्षतावच्छेदकानाक्रान्ततया तत्र साध्याभावेऽपि न बाधस्य अवकाशः । न च – पक्षतावच्छेदकहेत्वोः ऐक्यात् व्याप्तिज्ञानकाले एव साध्यसिद्धेः सिद्धसाधनम् इति – वाच्यम् । व्याप्तिज्ञानकाले साध्ये पक्षतावच्छेदकात्मकहेतुसामानाधिकरण्यस्य सिद्धावपि अनुमितिविषयीभूतस्य पक्षतावच्छेदकावच्छिन्नत्वस्य साध्येऽसिद्ध्या सिद्धसाधनस्य अप्रसक्तेः ।

एतदुक्तं भवति – अवच्छेदकावच्छेदेन साध्यानुमितिं प्रति अवच्छेदकाव-च्छेदेन साध्यसिद्धिरेव विरोधिनी । न तु सामानाधिकरण्येन साध्यसिद्धिः इति ।

हेतुघटकदलानां प्रयोजनं वदति – **जलमध्यस्थ** इत्यादिना । जलमध्य-

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

स्थघृते तैजसत्वरूपसाध्याभावात् अत्यन्ताग्निसंयोगेऽपि अनुच्छिद्यमानद्रवत्ववत्वरूप-हेतुसत्त्वाच्च व्यभिचारः । तद्वारणाय ''असति प्रतिबन्धके'' इत्युक्तम् । तत्र जलरूपप्रतिबन्धकसत्त्वात् प्रतिबन्धकासमवधानकालीनानुच्छिद्यमानद्रवत्ववत्त्वं नास्ति इति न व्यभिचारः । ''अत्यन्तानलसंयोगे सति'' इति अनुक्तौ अग्निसंयोगरहितघृतादौ अनुच्छिद्यमानद्रवत्वसत्त्वात् व्यभिचारः । अतः ''अत्यन्तानलसंयोगे सति'' इति उक्तम् । घृतादौ अग्निसंयोगे सति उच्छिद्यमानद्रवत्वमेव अस्ति इति न व्यभिचारः ।

''अनुच्छिद्यमानद्रवत्वात्'' इत्यस्य ''उच्छिद्यमानद्रवत्वानधिकरणत्वात्'' इत्यर्थाङ्गीकारे आकाशादौ व्यभिचारः । उच्छिद्यमानद्रवत्वानधिकरणत्वसत्त्वात् । अतः अनुच्छिद्यमानं यत् द्रवत्वं तदधिकरणत्वात् इत्यर्थः । आकाशादेस्तु द्रवत्वाधिकरणत्वविरहात् न व्यभिचारः । तथा च प्रतिबन्धकासमवधानकालीना-त्यन्ताग्निसंयोगसमानकालीनानुच्छिद्यमानद्रवत्वानधिकरणत्वं हेतुः ।

मूले न च अप्रयोजकम् इति । सुवर्णे हेतुरस्तु साध्यं मास्तु इति अप्रयोजकशङ्का न कार्या । यदि सुवर्णस्य तैजसत्वं न स्यात्, किन्तु पृथिवीत्वं वा जलत्वं वा स्यात्, तर्हि असति प्रतिबन्धके अत्यन्ताग्निसंयोगे सति अनुच्छिद्यमान-द्रवत्ववत्वं न स्यात् । पृथिवीद्रवत्वस्य जन्यजलद्रवत्वस्य च अत्यन्ताग्निसंयो-गनाश्यत्वात् । अनेन पृथिवीद्रवत्वनाशं प्रति जन्यजलद्रवत्वनाशं प्रति च अत्यन्ताग्निसंयोगः कारणम् इति कार्यकारणभावरूपः अनुकूलतर्कः उक्तः । **दिनकर्यां** अनुकूलतर्कान्तरमपि प्रदर्शयति – **एतत् च उपलक्षणम्** इत्यादिना । एवं च यदि सुवर्णस्य पृथिवीत्वं जलत्वं वा स्यात् तर्हि ''अग्नेरपत्यं प्रथमं हिरण्यम्'' इति सुवर्णस्य तैजसत्वबोधकश्रुतेरनुपपत्तिः अनुकूलस्तर्क इति भावः ।

अनुकूलतर्कत्वात् इति – ''सुवर्णं यदि तैजसं न स्यात् तर्हि अग्नेरपत्यं इति आगमप्रतिपाद्याग्न्यपत्यत्ववत् न स्यात्'' इति तर्कस्य आकारः । अग्न्यपत्यत्वं नाम अग्निसमवायिकारणसमवायिकारणकत्वम् ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

एतेन इति । सुवर्णस्य तैजसत्वप्रतिपादकागमरूपप्रमाणसद्भावेन । इत्यपि परास्तम् इत्यनेन अन्वयः । द्रवत्वनाशं प्रति अग्निसंयोगः कारणम् इति कार्यकारणभावः न संभवति । अग्निसंयोगं विनापि घृतादिरूपाश्रयनाशात् जायमाने तद्गतद्रवत्वनाशे व्यतिरेकव्यभिचारात् । अतः आश्रयनाशनाश्ये द्रवत्वे अविद्यमानं जातिविशेषं कल्पयित्वा तादृशविलक्षण जातिविशिष्टद्रवत्वनाशं प्रति अग्निसंयोगः कारणम् इति कार्यकारणभावः वक्तव्यः । सा च विलक्षणा जातिः यथा आश्रयनाशनाश्यद्रवत्व-व्यावृत्ता, तथा सुवर्णगतद्रवत्वव्यावृत्तापि इति पूर्वोक्तः अनुकूलतर्कः असङ्गतः । सुवर्णस्य पृथिवीत्वेऽपि तदीयद्रवत्वे अग्निसंयोगनाश्यतावच्छेदकविलक्षणजातिविरहेण अत्यन्ताग्निसंयोगे सत्यपि पृथिवीद्रवत्वस्य नाशापत्तेः संभवात् । तथा च सुवर्णस्य पृथिवीत्वेऽपि बाधकाभावः इति शङ्का निरस्ता । तैजसत्वबोधकश्रुतिवाक्यस्य सुवर्णस्य पृथिवीत्वे बाधकत्वात् इति भावः ।

यद्यपि पार्थिवभागस्य तदानीं द्रवत्वाङ्गीकारेऽपि तेजोरूपद्रवद्रव्यान्तरस्य प्रतिबन्धकस्य सत्त्वात् न व्यभिचार इति शक्यते वक्तुं, तथापि पार्थिवद्रवत्वनाश-प्रतिबन्धकत्वेन जलस्यैव क्लृप्ततया नैमित्तिकद्रवत्ववतः तेजसः अनुमानात् पूर्वम् असिद्धतया न तत्प्रतिबन्धकसत्ताम् आदाय व्यभिचारवारणसंभवः । पार्थिवद्रवत्वनाश-प्रतिबन्धकत्वेन द्रव्यान्तरकल्पनं तु ''अपरे तु'' इत्यादिना वक्ष्यमाणं मतान्तरमेव अनुसरति इति भावः ।।

मुक्तावली

अपरे तु – पीतिमाश्रयस्य अत्यन्ताग्निसंयोगेऽपि पूर्वरूपापरावृत्तिदर्शनात् तत्प्रतिबन्धकं विजातीयद्रवद्रव्यं कल्प्यते । तथाहि – अत्यन्ताग्निसंयोगी पीतिमगुरुत्वाश्रयः, विजातीयरूपप्रतिबन्धकद्रवद्रव्यसंयुक्तः, अत्यन्ताग्निसंयोगे सत्यपि पूर्वरूपविजातीयरूपानधिकरणत्वात्, जलमध्यस्थपीतपटवत् । तस्य च पृथिवीजलभिन्नस्य तेजस्त्वनियमात् ।।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

दिनकरी

प्रकारान्तरेण तस्य तैजसत्वं साधयतां मतम् उपन्यस्यति – **अपरे तु** इत्यादिना । **तत्प्रतिबन्धकं** – रूपपरावृत्तिप्रतिबन्धकम् । **अग्निसंयोगस्य** तैजससुवर्णेऽपि सत्त्वात् उक्तं "**पीतिम**" इति । साध्ये **विजातीयपदम्** उद्देश्यसिद्ध्यर्थम् । हेतौ सत्यन्तम् अग्निसंयोगरहिते पूर्वरूपविजातीयरूपानाधारे घटे व्यभिचारवारणाय । **अत्र हेतौ** पृथिवीत्वं देयम्, तेन जलपरमाणौ न व्यभिचारः । यथाकथंचित् अग्निसंयुक्ते घटे तद्वारणाय "**अत्यन्त**" इति । न च अप्रयोजकत्वं, विरोधिद्रवद्रव्यसंबन्धं विना पार्थिवाग्निसंयोगस्य पूर्वरूपविजातीयरूपजनकत्वात् इति भावः । न च **द्रवद्रव्यात् अन्यदेव प्रतिबन्धकं** वाच्यम् । अदृष्टकल्पनापत्तेः इति । **तस्य च** इति । **तस्य** – द्रवद्रव्यस्य । **पृथिवीजलभिन्नस्य** इति । पृथिव्याः पक्षीकृतपीतिमाश्रयाया विजातीयत्वाभावात् जलस्य तत्र **असंभवात्** इति भावः । **तेजस्त्वनियमात्** इति । वाय्वादौ रूपाभावात् इति भावः । न च अन्धकारे पीतिमरूपाश्रयद्रव्यग्रहापत्तिः, सुवर्णरूपालोकसंयोगसत्त्वात् इति – वाच्यम् । उद्भूतानभिभूतरूपालोकसंयोगस्यैव द्रव्यप्रत्यक्षे हेतुत्वात् सुवर्णरूपस्य तु अभिभूतत्वात् । न च -- तदानीं पीतरूपस्याप्यग्रहात् सजातीयग्रहणकृतम् अग्रहणम्, न तु सुवर्णरूपस्य अभिभूतत्वेन इति न तस्य अभिभूतत्वम् इति – वाच्यम् । लघुतया सजातीयसंबन्धस्यैव अभिभवपदार्थत्वात् । न च – तथापि अन्धकारे सुवर्णस्य साक्षात्कारापत्तिः । तेजोभिन्नद्रव्यप्रत्यक्षं प्रत्येव आलोकसंयोगस्य हेतुत्वात् इति – वाच्यम् । सुवर्णभिन्नं यत्तेजः तद्भिन्नद्रव्यप्रत्यक्षं प्रत्येव तस्य हेतुत्वात् ।

नवीनास्तु – सुवर्णं पार्थिवमेव । "पीतं सुवर्णं द्रुतम्" इति साक्षात्संबन्धेन द्रवत्वप्रतीतेः भ्रमत्वायोगात् । "द्रुतं, द्रुततरम्" इति प्रतीतेः द्रवत्वस्यापि अत्यन्तोच्छेदात् । पृथिवीत्वस्य पीतरूपसमवायिकारणतावच्छेदकत्वात् रूपनाशे तादात्म्येन स्वर्णस्य विरोधित्वाच्च न पीतरूपनाश इति – वदन्ति ।।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

राजीवोल्लासः

अग्निसंयोगस्य इति । अत्यन्ताग्निसंयोगी पीतिमगुरुत्वाश्रयः पक्षः । पीतरूपगुरुत्वयोः यः आश्रयः सुवर्णगतः भागः तं पक्षीकृत्य अत्र रूपान्तरप्रतिबन्धकं द्रवद्रव्यं साध्यते । तत्र पक्षतावच्छेदककोटौ ''पीतिम'' इति पदानुपादाने अग्निसंयुक्तः यः गुरुत्वाश्रयः तेजोभागः तस्यापि पक्षतावच्छेदकाक्रान्ततया तत्र पृथिवीत्वघटितहेतोः असत्त्वात् भागासिद्धिः । तद्वारणाय ''पीतिमाश्रय'' इत्युक्तम् । साध्ये ''विजातीयम्'' इत्यस्य द्रवद्रव्येऽन्वयः । तथा च विजातीयं यत् रूपप्रतिबन्धकद्रवद्रव्यम् तत्संयुक्तत्वं साध्यम् । पृथिवीजलव्यतिरिक्तस्य उद्देश्यस्य द्रव्यस्य सिद्ध्यर्थं साध्ये ''विजातीय''पदम् । **अत्र हेतौ इति** । अस्मिन् अनुमाने हेतौ ''पृथिवीत्वे सति'' इत्यपि विशेषणं देयम् । अन्यथा जलपरमाणौ रूपप्रतिबन्धकद्रवद्रव्य-संयुक्तत्वसाध्याभाववति अत्यन्ताग्निसंयोगे सत्यपि पूर्वरूपविजीतीयरूपानधि-करणत्वहेतुसत्त्वात् व्यभिचारः । तद्वारणाय ''पृथिवीत्वं'' हेतुविशेषणं देयम् इत्यर्थः । **विरोधि इति** । विजातीयरूपप्रतिबन्धकेत्यर्थः । **द्रवद्रव्यादन्यत् इति** । अदृष्टादिकम् इत्यर्थः । तत्र **असंभवात् इति** । सांसिद्धिकद्रवत्वस्य सुवर्णे अननुभवात् इति । **उद्भूतानभिभूत इति** । उद्भूतं अनभिभूतं च यत् रूपं तद्वान् यः आलोकः तत्संयोगस्यैव द्रव्यप्रत्यक्षे हेतुत्वात् ।

नवीनास्तु इति । जलमध्यस्थमषीक्षोदन्यायेन सुवर्णगतपीतद्रव्यस्य द्रवत्वानङ्गीकारे ''पीतं सुवर्णं द्रुतम्'' इति साक्षात्संबन्धेन द्रवत्वावगाहिप्रतीतेः अनुपपत्तिः । तथा च तैजसत्वाभाववति पीतिमगुरुत्वाश्रयपार्थिवभागे अनुच्छिद्यमान-द्रवत्वाधिकरणत्वरूपहेतुसत्त्वेन व्यभिचारात् पूर्वोक्तानुमानं न सुवर्णस्य तैजसत्व-साधकम् । नापि सुवर्णस्य जलत्वम् । जलीयद्रवत्वस्य ''द्रुतं'', द्रुततरम्'' इति प्रतीत्या अत्यन्तोच्छेदात् अनुच्छिद्यमानद्रवत्ववत्वस्य तत्र अनुपपत्तेः । किञ्च पृथिवीत्वस्य पीतरूपसमवायिकारणतावच्छेदकत्वात् पृथिवीत्वावच्छिन्ने एव समवायसंबन्धेन पीतरूपं भवितुं अर्हति इति पीतरूपवत्तया प्रतीयमानं सुवर्णं

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

पार्थिवमेव । न च – सुवर्णस्य पार्थिवत्वे अग्निसंयोगे सति कुतः न तद्रूपस्य नाश इति – वाच्यम् । रूपनाशं प्रति तादात्म्येन सुवर्णस्य प्रतिबन्धकत्वात् इति **नवीनानां मतम्** ।

।। वायुनिरूपणम् ।।

कारिकावली

अपाकजोऽनुष्णाशीतस्पर्शस्तु पवने मतः ।। ४२ ।।

मुक्तावली

वायुं निरूपयति – **अपाकज** इति । अनुष्णाशीतस्पर्शस्य पृथिव्यामपि सत्त्वात् उक्तम् **अपाकज** इति । अपाकजस्पर्शस्य जलादावपि सत्त्वात् उक्तम् **अनुष्णाशीत** इति । एतेनं वायवीयः विजातीयस्पर्शः दर्शितः । **तज्जनकतावच्छेदकं** वायुत्वम् इति भावः ।।

दिनकरी

वायौ प्रमाणं दर्शयितुं मूले ''अपाकजोऽनुष्णाशीतस्पर्शस्तु पवने मतः'' इत्युक्तम् । तत्र अपाकजादिपदानां क्रमेण व्यावृत्तिम् आह – **अनुष्णाशीतस्पर्श** इति । **उक्तम् अपाकज** इति । **यद्यपि** अपाकजानुष्णाशीतस्पर्शवत्त्वं पटादौ अतिव्याप्तम्, तथापि अपाकजानुष्णाशीतस्पर्शवन्मात्रवृत्ति-द्रव्यत्वसाक्षाद्व्याप्य-जातिमत्त्वम्, पाकजस्पर्शवदवृत्ति-अनुष्णाशीतस्पर्शवद्वृत्ति-द्रव्यत्वसाक्षाद्व्याप्य-जातिमत्त्वं वा तदर्थोऽवसेयः । **एतेन** – स्पर्शस्य अनुष्णाशीतत्वादिकथनेन । **तज्जनकतावच्छेदकम्** इति । तथा च विजातीयस्पर्शजनकतावच्छेदकतया वायुत्वजातिसिद्धिः । इदम् उपलक्षणम् । शब्दविशेषस्य वह्नित्वावच्छिन्नस्य वा निमित्तकारणतावच्छेदकतया वायुत्वजातिसिद्धिः इत्यपि द्रष्टव्यम् ।।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

राजीवोल्लासः

वायौ प्रमाणं दर्शयितुम् इति । वायौ प्रमाणस्य एष ज्ञेयः स्पर्शादिलिङ्गक इति मूले एव दर्शयिष्यमाणतया भावप्रधाननिर्देशोऽयं ''वायौ'' इति । वायुत्वे इति तदर्थः । अपाकजानुष्णाशीतस्पर्शस्य वायुवृत्तित्वकथनेन तादृशस्पर्शसमवायिकारणतावच्छेदकतया वायुत्वजातेः सिद्ध्या वायुत्वे प्रमाणम् उक्तं भवति । अत एव मुक्तावल्यां ''तज्जनकतावच्छेदकं वायुत्वम् इति भावः'' इति वायुत्वे प्रमाणप्रदर्शकतया उपसंहारः कृतः ।

यद्यपि इत्यादि । अपाकजः यः अनुष्णाशीतस्पर्शः तद्वत्वं वायोः लक्षणम् इत्युक्तावपि पटादिपृथिव्यां अपाकजानुष्णाशीतस्पर्शसत्त्वात् अतिव्याप्तिः । तद्वारणाय जातिघटितं लक्षणं वक्तव्यम् । तच्च अपाकजानुष्णाशीतस्पर्शवन्मात्रवृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वम् इति । पृथिवीत्ववारणाय''मात्र''पदम् । पृथिवीत्वस्य अपाकजानुष्णाशीतस्पर्शवद्भिन्ने पार्थिवपरमाणौ वर्तमानतया ''मात्र'' पदेन तद्व्युदासः । अपाकजानुष्णाशीतस्पर्शवन्मात्रवृत्तित्वं च अपाकजानुष्णाशीतस्पर्शवद्भिन्नावृत्तित्वे सति अपाकजानुष्णाशीतस्पर्शवद्वृत्तित्वम् । तत्र विशेष्यस्य लक्षणस्य निवेशे प्रयोजनविरहात् तादृशस्पर्शवद्भिन्नावृत्तित्वमात्रं लक्षणघटकम् । आत्मत्वादिजातेः तादृशस्पर्शवद्भिन्नवृत्तित्वादेव वारणसंभवात् । पटत्वादिजातेः अपि अपाकजानुष्णाशीतस्पर्शवद्भिन्नावृत्तित्वात् द्रव्यत्वव्याप्यत्वाच्च तद्वति पटादौ अतिव्याप्तिवारणाय साक्षात्पदम् । द्रव्यत्वसाक्षाद्व्याप्यत्वं च द्रव्यत्वव्याप्यजात्यव्याप्यत्वे सति द्रव्यत्वव्याप्यत्वम् । तत्र विशेष्यनिवेशे प्रयोजनाभावात् द्रव्यत्वव्याप्यजात्यव्याप्यत्वमात्रं निवेशनीयम् । पटत्वादिजातेः द्रव्यत्वव्याप्यपृथिवीत्वव्याप्यत्वात् तद्व्युदासः । गुणादिवृत्तिजातीनाम् अनुष्णाशीतस्पर्शवद्भिन्नवृत्तितया तद्भिन्नावृत्तित्वदलेनैव वारणात् द्रव्यत्वव्याप्यत्वं न निवेशनीयम् । अपाकजानुष्णाशीतस्पर्शवद्भिन्नावृत्तिः यः धर्मः वायुघटद्वित्वम् । तद्वत्त्वस्य पटे सत्त्वात् अतिव्याप्तिः । तद्वारणाय धर्मपदमुपेक्ष्य ''जाति'' पदम् । अनुष्णाशीतपदानुपादाने

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

''अपाकजस्पर्शवद्भिन्नावृत्ति'' इति निवेशेनैव यद्यपि पृथिवीत्वं वारयितुं शक्यते, अपाकजस्पर्शवद्भिन्नपटादिवृत्तित्वात् तस्य, तथापि जलत्वादिजातीनां अपाकज-स्पर्शवद्भिन्नावृत्तित्वात् तद्वारणासंभवात् जलत्वादिमति जलादौ अतिव्याप्तिः स्यात् । तद्वारणाय ''अनुष्णाशीतस्पर्शवत्'' इत्युक्तम् । जलत्वं तु अपाकजानुष्णाशीत-स्पर्शवद्भिन्नजलवृत्ति इति तद्व्युदासः ।

अस्मिन् लक्षणे ''मात्र''पदघटकतया ''साक्षात्''पदघटकतया च अभावद्वयावच्छिन्नवृत्तित्वद्वयघटितत्वात् एकाधिकरणाधेयत्वघटितं लघुभूतं द्वितीयं लक्षणं उच्यते – **पाकजस्पर्शवदवृत्ति** इति । अनुष्णाशीतस्पर्शवद्वृत्तिपृथिवीत्ववति घटादौ अतिव्याप्तिवारणाय जातौ ''पाकजस्पर्शवदवृत्ति'' इति विशेषणम् । पृथिवीत्वस्य पाकजस्पर्शवद्वृत्तितया तन्निरासः । पाकजस्पर्शवदवृत्ति–जलत्ववति जले अतिव्याप्तिवारणाय ''अनुष्णाशीतस्पर्शवद्वृत्ति'' इति जातिविशेषणम् । जलत्वं तु अनुष्णाशीतस्पर्शवद्वृत्ति न भवति इति तन्निरासः । अन्यत् पूर्ववत् ।।

विजातीयस्पर्शः इति । पृथिव्यादिस्पर्शव्यावृत्तजात्यवच्छिन्नस्पर्शः इत्यर्थः ।।

कारिकावली

तिर्यग्गमनवानेष ज्ञेयः स्पर्शादिलिङ्गकः ।

मुक्तावली

एषः – वायुः **स्पर्शादिलिङ्गकः** । वायुर्हि स्पर्श-शब्द-धृति-कम्पैः अनुमीयते । **विजातीयस्पर्शेन** विलक्षणशब्देन तृणादीनां धृत्या शाखादीनां कम्पनेन च वायोः अनुमानात् । यथाच वायुर्न प्रत्यक्षः तथा अग्रे वक्ष्यते ।।

दिनकरी

मूले स्पर्शादिलिङ्गक इति । स्पर्शादीनि लिङ्गानि पक्षः यस्य स तथा ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

मुक्तावल्यां धृति इति । धृतिः – गुरुणः द्रव्यस्य अपतनम् । **विजातीयस्पर्शेन इति** । तृतीयान्तचतुष्कम् "**अनुमानात्**" इत्यनेन अन्वितम् ।

अनुमितिप्रकारस्तु – "**योऽयं रूपवद्द्रव्यासमवेतः स्पर्शः, स क्वचिदाश्रितः, स्पर्शत्वात् पृथिवीसमवेतस्पर्शवत्**" । **पृथिव्यादिस्पर्शे** सिद्धसाधनवारणाय "रूपवद्द्रव्यासमेवत" इति विशेषणम् ।

एवम् "**असति** रूपवद्द्रव्याभिघाते योऽयं पर्णादिषु **शब्दसन्तानः, स स्पर्शवद्वेगवद्द्रव्यसंयोगजन्यः**, अविभज्यमानावयवद्रव्यसंबन्धिशब्दसन्तानत्वात्, दण्डाभिहतभेरीशब्दसन्तानवत्" । पृथिव्याद्यभिघातजन्मनि सिद्धसाधनवारणाय "असति" इत्यादिपक्षविशेषणम् । विभागजन्मनि शब्दे व्यभिचारवारणाय हेतौ "अविभज्यमान" इति ।

एवं "**नभसि** तृणतूलस्तनयित्नुविमानादीनां धृतिः स्पर्शवद्वेगवद्द्रव्यसंयोग-हेतुका, अस्मदाद्यनधिष्ठितद्रव्यधृतित्वात्, नौकाधृतिवत्" । जलादिगततृणादौ सिद्धसाधनवारणाय "नभसि" इति । **प्रयत्नवदात्मसंयोगहेतुकधृत्यादौ** व्यभिचार-वारणाय "अस्मदादि" इति ।

एवं "**रूपवद्द्रव्याभिघातमन्तरेण तृणे कर्म**, स्पर्शवद्वेगवद्द्रव्याभिघातजन्यम्, **विजातीयकर्मत्वात्**, नदीपूराहतकाशादिकर्मवत्" इति । **अग्रे वक्ष्यत इति** । आत्मनिरूपणावसरे इत्यर्थः ।।

राजीवोल्लासः

यः अयं रूपवद्द्रव्यासमवेतः स्पर्श इति । "स्पर्शः क्वचित् आश्रितः, स्पर्शत्वात्" इत्युक्तौ स्पर्शत्वाधिकरणे पृथिव्यादिस्पर्शे क्वचिदाश्रितत्वस्य सिद्धत्वात् सिद्धसाधनम् । तद्वारणाय "रूपवद्द्रव्यासमवेत" इति पक्षविशेषणम् । पृथिव्यादिस्पर्शस्य रूपवद्द्रव्यसमवेततया तत्र साध्यसिद्धावपि न दोषः । पक्षतावच्छेदकाश्रये साध्यसिद्धेः एव दोषत्वात् । **तदाह पृथिव्यादिस्पर्शे इति** ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

इदं च सिद्धसाधनं स्पर्शत्वसामानाधिकरण्येन क्वचिदाश्रितत्वसाधनाभिप्रायेण । स्पर्शत्वावच्छेदेन साध्यसिद्धेरुद्देश्यत्वे तु स्पर्शत्वसामानाधिकरण्येन साध्यसिद्धिः न दोषाय । अवच्छेदकावच्छेदेन साध्यसिद्धौ अवच्छेदकावच्छेदेन सिद्धेरेव प्रतिबन्धकत्वात् ।

शब्दलिङ्गकम् अनुमानम् आह – **एवम् असति** इति । ''रूपवद्दण्डाद्यभिघातं विनापि योऽयं पर्णादिषु शब्दसन्तानः श्रूयते सः स्पर्शवद्वेगवद्द्रव्यसंयोगजन्यः, अविभज्यमानावयवद्रव्य-संबन्धिशब्दसन्तानत्वात्, दण्डाभिहतभेरीशब्दसन्तानवत्'' । भेर्यां दण्डेन अभिहतायां शब्दसन्तानः जायते । भेर्यवयवानां विभागं विनापि तत्र शब्दसन्तानः भवति । तथा च अविभज्यमानावयवकद्रव्यसंबन्धिशब्दसन्तानत्वरूप-हेतुः तत्र वर्तते । एवं स्पर्शवद्वेगवच्च यद्द्रव्यं दण्डः, तदीयाभिघाताख्यसंयोगजन्यत्वरूपं साध्यं च तत्र वर्तते । एवं पर्णादिषु विद्यमानः शब्दसन्तानोऽपि स्पर्शवद्वेग-वद्द्रव्यसंयोगजन्यः इति साधने तादृशं द्रव्यं वायुरेव इति सिद्ध्यति । अत्र पर्णावच्छिन्नस्य प्रथमशब्दस्य अप्रत्यक्षत्वात् पक्षप्रसिद्धिसंपादनाय सन्तानग्रहणम् । एवं च साध्यघटकं जन्यत्वं जन्यतज्जन्यादिसाधारणं प्रयोज्यत्वम् इति बोध्यम् ।

शब्दसन्तान इति । यद्यपि वेगवद्द्रव्यसंयोगस्यैव शब्दजनकतया साध्ये स्पर्शवत्त्वविशेषणम् अनर्थकम्, शब्दजनने स्पर्शानुपयोगात्, तथापि उक्तानुमानेनैव वायोः स्पर्शस्यापि सिद्ध्यर्थं तदुपात्तम् । साध्ये व्यर्थविशेषणत्वस्य अदोषत्वात् इति ध्येयम् ।

यत्तु – गगनादिसंयोगहेतुकत्वसिद्ध्या अर्थान्तरतावारणाय **स्पर्शवत्** इति । ननु एवमपि तेजस्संयोगहेतुकत्वसिद्ध्या अर्थान्तरता तदवस्थैव इति अस्वरसात् आह – **वेगवत्** इति । तन्न । वेगपदं च अत्र द्रव्यान्तरक्रियाजनकवेगपरम्, तेन तेजस्यपि वेगसत्त्वेन तदुपादानेऽपि न अर्थान्तरतापत्तिः । एवं च स्पर्शवत्त्वोपादानं वायौ स्पर्शसिद्ध्यर्थमेव इति अवधेयम् ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

पर्णादिषु दण्डाद्यभिघातजन्यः यः शब्दसन्तानः तत्र सिद्धसाधनवारणाय "असति रूपवद्द्रव्याभिघात" इति पक्षविशेषणम् । रूपवद्द्रव्याभिघातासमानकालीनत्वम् तदर्थः । रूपवद्द्रव्यभिघाताजन्यत्वं वा तदर्थः । अवयवविभागजन्ये शब्दे संयोगजन्यत्वरूपसाध्याभाववति व्यभिचारवारणाय हेतौ "अविभज्यमानावयव" इति द्रव्यविशेषणम् । अवयवविभागाजन्यः द्रव्यावच्छिन्नः यः शब्दसन्तानः तत्त्वं हेतुः । द्रव्यसंबन्धित्वं च द्रव्यावच्छिन्नत्वम् ।

धृतिहेतुकमनुमानम् आह – **एवं नभसि** इति । "आकाशे तृण-तूल-स्तयित्नु-विमानादीनां धृतिः – अपतनं, स्पर्शवद्वेगवद्द्रव्यहेतुका, अस्मदाद्यनधिष्ठित-द्रव्यधृतित्वात्, नौकाधृतिवत्" । अस्मदाद्यनधिष्ठितद्रव्यधृतित्वं नाम प्रयत्नवदात्मसंयोगानधीनद्रव्यधृतित्वम् । जलमध्यस्थनौकारूपद्रव्यस्य अपतने प्रयत्नवदात्मसंयोगानधीनद्रव्यधृतित्वं वर्तते । स्पर्शवद्वेगवच्च यद्द्रव्यं जलं तत्संयोगहेतुकत्वं च वर्तते । तथा प्रयत्नवदात्मसंयोगं विनापि आकाशे तृणतूलादीनां या धृतिः सापि स्पर्शवद्वेगवद्वायुरूपद्रव्यसंयोगहेतुका इति वायुसिद्धिः । "नभसि धृतिः" इत्यस्य वायुभिन्नस्पर्शवदनधिष्ठिततृणादीनां धृतिः इत्यर्थः । नभस्संयुक्तार्थकत्वे जलस्थतृणादिधृतेः नभस्संयुक्ततृणादिधृतित्वानपायात् सिद्धसाधनप्रसक्तेः ।

प्रयत्नवदात्मसंयोगहेतुकधृत्यादौ इति । प्रयत्नवज्जीवात्मसंयोगहेतुकतच्छरीरधृतौ द्रव्यधृतित्वसद्भावात् स्पर्शवद्वेगवद्द्रव्यसंयोगहेतुकत्वाभावाच्च व्यभिचारः । तद्वारणाय "अस्मादाद्यनधिष्ठित" इति हेतुविशेषणम् । प्रयत्नवज्जीवात्मसंयोगाहेतुकद्रव्यधृतित्वं हेतुः । शरीरधृतिस्तु प्रयत्नवज्जीवात्मसंयोगहेतुकधृतिः इति प्रयत्नवज्जीवात्मसंयोगाहेतुकद्रव्यधृतित्वरूपहेतोः अभावात् न व्यभिचारः ।

कम्पहेतुकम् अनुमानम् आह – **एवं रूपवद्द्रव्य** इति । "रूपवद्द्रव्याभिघातासमानकालिकं तृणगतं कर्म स्पर्शवद्वेगवद्द्रव्यसंयोगजन्यम्, विजातीयकर्मत्वात् नदीपूराहतकाशादिकर्मवत्" । नदीप्रवाहसंयुक्तकाशादिकम्पनवत् इति तदर्थः ।

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

काशादिनिष्ठक्रियायां विजातीयकर्मत्वम् अस्ति । स्पर्शवद्वेगवच्च यद्द्रव्यं नदीप्रवाहः तदभिघातजन्यत्वं च अस्ति । अभिघातोऽपि संयोगविशेषः । एवं रूपवद्द्रव्याभिघातं विना तृणस्य यत् चलनं तदपि वेगवद्द्रव्यसंयोगजन्यम् इति साध्यते । तच्च द्रव्यं वायुरेव इति वायुसिद्धिः । पार्थिवद्रव्याभिघातजन्यतृणादिकर्मणि सिद्धसाधनवारणाय "रूपवद्द्रव्याभिघातम् अन्तरेण" इति पक्षे विशेषणम् । रूपवद्द्रव्याभिघाता-समानकालीनम् इति वा तदजन्यम् इति वा तदर्थः । शरीरचेष्टात्मकक्रियायां व्यभिचारवारणाय हेतौ **विजातीय** इति । विलक्षणा इति तदर्थः । वैलक्षण्यं च प्रकृते वेगाजन्यत्वे सति चेष्टाभिन्नत्वम् एव ।।

कारिकावली

पूर्ववन्नित्यताद्युक्तं देहव्यापि त्वगिन्द्रियम् ।। ४३ ।।

मुक्तावली

पूर्ववत् इति । वायुः द्विविधः – नित्यः अनित्यश्च । परमाणुरूपः नित्यः । तदन्यः अनित्यः अवयवसमवेतश्च । सोऽपि त्रिविधः – शरीरेन्द्रियविषयभेदात् । तत्र शरीरम् अयोनिजं पिशाचादीनाम् । परंतु जलीयतैजसवायवीयशरीराणां पार्थिवभागोपष्टम्भात् उपभोगक्षमत्वम्, जलादीनां प्राधान्यात् जलीय-त्वादिकम् इति ।

अत्र यो विशेषः तम् आह – **देहव्यापि** इति । शरीरव्यापकं स्पर्शग्राहकम् इन्द्रियं त्वक्, तच्च वायवीयम्, रूपादिषु मध्ये स्पर्शस्यैव अभिव्यञ्जकत्वात्, अङ्गसङ्गिसलिलशैत्याभिव्यञ्जकव्यजनपवनवत् ।।

दिनकरी

मूले **पूर्ववत् नित्यताद्युक्तम्** इति । पूर्ववत् – जलवत् इत्यर्थः । "नित्यतादि" इति "आदि"ना अनित्यत्वपरिग्रहः । उक्तं – बोध्यम् इत्यर्थः । एतदेव स्पष्टयति मुक्तावल्याम् – वायुः द्विविध इति । तत्र – तेषु मध्ये ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अयोनिजम् । अयोनिजमेव इत्यर्थः । **पिशाचादीनाम्** इति । मरुतां लोके प्रसिद्धम् इति शेषः । ननु वायोः ताल्वादिवाग्व्यापाराभावात् करचरणाद्यभावेन च आहरणविहरणाद्यभावात् कथं भोगायतनत्वम्? इति, अत आह – **परंतु** इति । जलीयतैजसशरीरयोरपि आक्षेपस्य तुल्यत्वात् प्रकरणलाघवम् अभिप्रेत्य साधारण्येन समाधानम् आह – **जलीयतैजसवायवीय** इति । ननु कथं तर्हि जलीयत्वादि-व्यपदेशः इति, अत आह – **जलादीनाम्** इति ।

अत्र – त्वगिन्द्रिये । **यः विशेषः** अधिष्ठानादिः । **शरीरव्यापकम्** इति । न च – नखलोमकेशादीनां त्वगिन्द्रियानाधारत्वात् असंभवः इति – वाच्यम् । तेषां **संयोगिद्रव्यत्वेन** शरीरत्वाभावात् । मूलस्थ "**त्वगिन्द्रियम्**" इत्यस्य त्वचि स्थितम् इन्द्रियम् इत्यर्थः । एतेन – देहसहजावरणं त्वगित्युच्यते, तच्च पार्थिवं प्रत्यक्षसिद्धं च इति न इन्द्रियं, न च वायवीयम् इति – परास्तम् ।

त्वगिन्द्रियलक्षणम् आह – **स्पर्श** इति । कार्यमात्रजनककालादौ अतिव्याप्तिवारणाय "**इन्द्रियम्**" इति । चक्षुरादौ अतिव्याप्तिवारणाय **स्पर्शग्राहक** इति । **त्वक्** – त्वगिन्द्रियम् इत्यर्थः । **तच्च** इति । त्वगिन्द्रियं च इत्यर्थः । पक्षे स्पर्शत्वाभिव्यञ्जकत्वात् असिद्धिवारणाय "**रूपादिषु मध्ये**" इति । मनसि व्यभिचारवारणाय "**एव**"कारः । त्वगिन्द्रियसन्निकर्षे व्यभिचारवारणाय "**द्रव्यत्वे सति**" इत्यपि बोध्यम् । **अङ्गसङ्गिसलिलं** – स्वेदः ।।

राजीवोल्लासः

संयोगिद्रव्यत्वेन इति । शरीरसंयुक्तद्रव्यत्वेन इत्यर्थः । **त्वगिन्द्रियलक्षणम् आह** इति । अत्र इदम् बोध्यम् । देहव्यापित्वे सति इन्द्रियत्वरूपं लक्षणं **कारिकायाम्** एव प्रतिपादितम् । **मुक्तावल्यां** "स्पर्शग्राहक" इति पूरणं त्वगिन्द्रिये प्रमाणोपन्यासाय इत्यपि शक्यते वक्तुम् इति ।।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

कारिकावली

प्राणादिस्तु महावायुपर्यन्तो विषयो मतः ।

मुक्तावली

विषयं दर्शयति – **प्राणादिः** इति । यद्यपि अनित्यः वायुः चतुर्विधः तस्य चतुर्थी विधा प्राणादिः इत्युक्तम् आकरे, तथापि संक्षेपादेव त्रैविध्यम् उक्तम् । **प्राणस्तु एक एव नानास्थानवशात् मुखनिर्गमादिनानाक्रियाभेदाच्च** नानासंज्ञां लभते ।

दिनकरी

आकरे – प्रशस्तपादभाष्यादौ । **प्राणस्तु एक एव** इति । कथं तर्हि अपानादिव्यवहार इति, अत आह – **स्थानवशात्** इति ।

"हृदि प्राणः गुदेऽपानः समानः नाभिसंस्थितः ।
उदानः कण्ठदेशस्थः व्यानः सर्वशरीरगः" ।।

इति स्थानभेदात् इत्यर्थः । **क्रियाभेदाच्च** इति । मुखनासिकाभ्यां निष्क्रमणप्रवेशनात् प्राणः, मलादीनाम् अधोनयनात् अपानः, आहारेषु पाकार्थं वह्नेः समुन्नयनात् समानः, उदूर्ध्वं नयनात् उदानः, नाडीमुखेषु विततनाद् व्यान इति क्रियाभेदाद्धि पञ्चसंज्ञा लभते; न तु संज्ञाभेदेन संज्ञिभेद इति भावः ।।

राजीवोल्लासः

"शरीरम् इन्द्रियं विषयः प्राणः" इति प्राणस्य **आकरे** – प्रशस्तपादभाष्ये पृथगुक्तिः व्यजनपवनादिविषयान्तरात् अस्य वैलक्षण्यसूचनाय । वैलक्षण्यं च सर्वोपभोग-निमित्तत्वमेव । अत एव मृतशरीरावच्छेदेन न उपभोगः इति **सुबोधिनीकाराः** ।।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

।। आकाशनिरूपणम् ।।

कारिकावली

आकाशस्य तु विज्ञेयः शब्दो वैशेषिको गुणः ।। ४४ ।।

मुक्तावली

आकाशं निरूपयति – आकाशस्य इति । आकाशकालदिशाम् एकैकव्यक्तित्वात् आकाशत्वादिकं न जातिः, किंतु आकाशत्वं शब्दाश्रयत्वम् । ''वैशेषिकः'' इति कथनं तु विशेषगुणान्तरव्यवच्छेदाय ।

एतेन प्रमाणमपि दर्शितम् । तथा हि – ''शब्दः गुणः, चक्षुर्ग्रहणायोग्य-बहिरिन्द्रियग्राह्यजातिमत्त्वात्, स्पर्शवत्'', ''शब्दः द्रव्यसमवेतः, गुणत्वात्, संयोगवत्'' इत्यनुमानेन शब्दस्य द्रव्यसमवेतत्वे सिद्धे ''शब्दः न स्पर्शवद्विशेषगुणः, अग्निसंयोगासमवायिकारणकत्वाभावे सति अकारणगुणपूर्वकप्रत्यक्षत्वात्, सुखवत्'' ।

पाकजरूपादौ व्यभिचारवारणाय सत्यन्तम् । पटरूपादौ व्यभिचारवारणाय अकारणगुणपूर्वक इति । जलपरमाणुरूपादौ व्यभिचारवारणाय प्रत्यक्ष इति । न दिक्कालमनसां गुणः, विशेषगुणत्वात्, रूपवत्; न आत्मगुणः बहिरिन्द्रिययोग्यत्वात्, रूपवत् ।

इत्थं च शब्दाधिकरणं नवमं द्रव्यं गगनात्मकं सिद्ध्यति । न च वाय्ववयवेषु सूक्ष्मशब्दक्रमेण वायौ कारणगुणपूर्वकः शब्दः उत्पद्यताम् इति – वाच्यम् । अयावद्द्रव्यभावित्वेन वायोः विशेषगुणत्वाभावात् ।।

दिनकरी

आकाश इति । कालत्वं दिक्त्वं न जातिः इति अग्रे वक्तव्यम् भवति, तत् लाघवेन अत्रैव प्रसङ्गात् युगपदभिहितम् । न जातिः इति । अनेकसमवेतत्वाभावात् इति शेषः । तेन एकव्यक्तित्वस्य जातित्वाभावहेतुत्वे वैयधिकरण्यम् इति प्रत्युक्तम् ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

किंतु इति । आश्रयता च अत्र समवायेन विवक्षिता, तेन कालस्य जगदाधारत्वेन शब्दाश्रयत्वेऽपि न क्षतिः । मूले ''**वैशेषिक**'' पदस्य वैयर्थ्यम् आशङ्क्य आह – **वैशेषिक इति** इति । इत्थं च ''**शब्दः**'' इति मूलं सावधारणं ज्ञेयम् । **एतेन** – **विशेषगुणत्वकथनेन** । **प्रमाणम्** इति । आकाश इत्यादिः । तच्च ''शब्दः पृथिव्याद्यष्टद्रव्यातिरिक्तद्रव्याश्रितः, अष्टद्रव्यानाश्रितत्वे सति द्रव्याश्रितत्वात्'' इत्येवंरूपं बोध्यम् । **दर्शितं** – सूचितम् । अत्र अनुमाने स्वरूपासिद्धिं परिहर्तुम् आह – **तथा हि** इति । घटादौ व्यभिचारवारणाय ''**चक्षुर्ग्रहणायोग्य**'' इति । आत्मनि व्यभिचारवारणाय ''**बहिरिन्द्रियग्राह्य**'' इति । रसत्वादिव्यावृत्तये ''**जातिमत्**'' इति । एतच्च **अनुमानम्** अग्रिमद्रव्यसमवेतत्वसाधकानुमाने स्वरूपासिद्धिनिरासाय इति बोध्यम् । **गुणत्वात्** इति । एतदनुमानेन उक्तपरिशेषानुमाने हेतौ विशेष्यासिद्धिः निरस्ता । विशेषणासिद्ध्युद्धाराय आह – **शब्दः न स्पर्शवद्विशेषगुण** इति । न स्पर्शवतः द्रव्यस्य पृथिव्यादिचतुष्टयस्य विशेषगुणः इत्यर्थः । **अकारणगुणपूर्वकप्रत्यक्षत्वात्** इति । अकारणगुणपूर्वकत्वे सति प्रत्यक्षत्वात् इत्यर्थः । हेतुसत्त्वं प्रतिपादयितुं ''**पाकज**'' इति । **जलपरमाणु** इति । अनित्यानां पार्थिवरूपादीनां केषांचित् अग्निसंयोगासमवायिकारणकत्वात् केषांचित् कारणगुणपूर्वकत्वात् अत्र उपेक्षा । **न दिक्काल** इति । ''शब्दः'' इत्यनुवर्तते । **बहिरिन्द्रिय** इति । मनसः अन्यत् इन्द्रियं बहिरिन्द्रियम् । **योग्यत्वात्** – तत्प्रत्यक्षत्वात् इत्यर्थः । **एतेन** अनात्मगुणग्राहकेन्द्रियत्वं बाह्येन्द्रियत्वम्, तच्च मनसि अतिप्रसक्तम्, तेनापि रूपादिग्रहणात् इति – **निरस्तम्** । **इत्थं च** – अनेन प्रकारेण पृथिव्याद्यष्टद्रव्यानाश्रितत्वसिद्धौ च । **सिद्ध्यति** इति । पूर्वोक्तपरिशेषानुमानेन सिद्ध्यति इत्यर्थः ।

ननु एतत्सर्वं तदा उपपद्येत, यदि शब्दस्य विशेषगुणत्वे किंचित् प्रमाणं स्यात्, तत्रैव मानं न पश्यामः इति चेत्, न । ''**शब्दः विशेषगुणः, लौकिकप्रत्यासत्त्या इन्द्रियग्राह्यत्वे सति लौकिकप्रत्यासत्त्या द्वीन्द्रियग्रहणयोग्यताराहित्ये च**

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

सति गुणत्वव्याप्यजातिमत्त्वात्'' इत्यनुमानस्यैव तत्र प्रमाणत्वात् । प्रभात्वम् आदाय व्यभिचारवारणाय **''गुणत्वव्याप्य''** इति । **''गुरुत्वत्वम्''** आदाय व्यभिचारवारणाय **प्रथमं सत्यन्तम्** । ''संख्यात्वम्'' आदाय व्यभिचारवारणाय **द्वितीयं सत्यन्तम्** । **सांसिद्धिकद्रवत्वस्नेहधर्माधर्मभावनासु** प्रकृतहेतोः अभावेऽपि तत्र हेत्वन्तरेणैव विशेषगुणत्वं साधनीयम् इति ।

पूर्वोक्तानुमाने बाधं स्वरूपासिद्धिं च आशङ्कते – **न च** इति । **वायौ** इति । **तथा च** स्पर्शवद्वायुविशेषगुणत्वस्य अत्र सत्त्वात् तदभावसाधने बाध इति भावः । **कारणगुणपूर्वकत्वकथनं तु** अकारणपूर्वकत्वघटितहेतोः असिद्धिप्रदर्शनार्थम् । **अयावद्द्रव्यभावित्वेन** इति । स्वाश्रयनाशजन्यनाशप्रतियोगि यद्यत् तत्तद्भिन्नत्वेन इत्यर्थः । ननु तथापि आकाशे प्रत्यक्षमेव प्रमाणं किमिति न उपन्यस्तम् इति चेत्, न । चाक्षुषत्वप्रयोजकस्य महत्त्वे सति उद्भूतरूपवत्त्वस्य आकाशे असंभवेन चक्षुषः प्रमाजनकत्वासंभवात् । ननु यदि आकाशः न चाक्षुषः तदा, ''इह पक्षी'' इति चाक्षुषे अधिकरणत्वेन किंभासते इति चेत्, आलोक एव इति परिकलय ॥

राजीवोल्लासः

मूले आकाशादीनां एकव्यक्तित्वात् आकाशत्वादिकं न जातिः इति उक्तम् । तेन आकाशत्वादिकं पक्षः, जातित्वाभावः साध्यः, आकाशादीनां एकैकव्यक्तित्वात् इति हेतुः इति लभ्यते । तत्र हेतुसाध्ययोः सामानाधिकरण्यं नास्ति । जातित्वाभावरूपं साध्यं आकाशत्वादिनिष्ठम् । एकैकव्यक्तित्वरूपहेतुः आकाशादिनिष्ठम् इत्याशङ्क्य जातित्वाभावरूपसाधकहेतुः अनेकसमवेतत्वाभावः इत्याशयेन शेषं पूरयति – **अनेकसमवेतत्वाभावात् इति शेषः** इति । आकाशत्वादेः अनेकसमवेतत्वाभावे आकाशादीनां एकव्यक्तित्वं प्रयोजकम् इत्याशयेन मूलोक्तिः इति भावः ।

इत्थं च इति । वैशेषिकपदस्य आकाशे शब्दातिरिक्तविशेषगुणव्यवच्छेदपरत्वे च इत्यर्थः । **सावधारणम्** इति । शब्द एव इति एवकारसहितम् इत्यर्थः ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

विशेषगुणत्वकथनेन इति । शब्दे विशेषगुणत्वसिद्ध्यनन्तरमेव गुणत्वेन हेतुना द्रव्याश्रितत्वं साधयितुं शक्यते । तदनन्तरं च परिशेषानुमानेन आकाशः साधयितुं शक्यते । एवं च शब्दस्य विशेषगुणत्वम् आकाशसाधकम् इत्याशयेन प्रमाणं दर्शितं इति उक्तम् ।

परिशेषानुमाने अष्टद्रव्यानाश्रितत्वे सति द्रव्याश्रितत्वं हेतुः । तस्य हेतोः पक्षावृत्तित्वरूपस्वरूपासिद्धिपरिहाराय "**तथा हि**" इत्यादिना मूले हेतुसाधकानुमानानि उक्तानि । तत्र प्रथमतः द्रव्याश्रितत्वं – "शब्दः द्रव्यसमवेतः, गुणत्वात्, संयोगवत्" इत्यनुमानेन साधनीयम् । तस्मिन् अनुमाने स्वरूपासिद्धिशङ्कापरिहाराय शब्दस्य गुणत्वं साध्यते "शब्दः गुणः" इत्यादिना । तत्र हेतुघटकपदानां प्रयोजनम् आह – **घटादौ** इति । चक्षुर्ग्रहणायोग्या बहिरिन्द्रियग्राह्या च या जातिः तद्वत्त्वं हेतुः । बहिरिन्द्रियग्राह्यघटत्वादिजातिमत्त्वस्य घटादौ सत्त्वात् गुणत्वरूपसाध्याभावाच्च व्यभिचारः । तद्वारणाय "**चक्षुर्ग्रहणायोग्य**" इति जातौ विशेषणम् । घटत्वादिजातेः चक्षुर्ग्रहणयोग्यत्वात् तद्व्यावृत्तिः । चक्षुर्ग्रहणायोग्यत्वं च चक्षुरिन्द्रियजन्यप्रत्यक्षाविषयत्वम् । चक्षुरिन्द्रियजन्यप्रत्यक्षाविषयभूता आत्मत्वजातिः तद्वत्त्वस्य आत्मनि सत्त्वात् तत्र व्यभिचारः । तद्वारणाय "**बहिरिन्द्रियग्राह्य**" इति जातिविशेषणम् । आत्मत्वजातेः बहिरिन्द्रियजन्यप्रत्यक्षविषयत्वाभावात् तन्निरासः । "**जातिमत्**" इति पदानुपादाने चक्षुर्ग्रहणायोग्यत्वे सति बहिरिन्द्रियग्राह्यत्वं हेतुः स्यात् । तथा सति रसत्वजातौ चक्षुर्ग्रहणायोग्यत्वस्य बहिरिन्द्रियग्राह्यत्वस्य च सत्त्वात् गुणत्वाभावाच्च व्यभिचारः स्यात् । तद्वारणाय "जातिमत्" पदम् । रसत्वे तु चक्षुर्ग्रहणायोग्यबहिरिन्द्रियग्राह्यजातिमत्त्वं नास्ति, जातौ जात्यनङ्गीकारात् इति न व्यभिचारः । यद्वा "चक्षुर्ग्रहणायोग्यबहिरिन्द्रियग्राह्यजातिमत्त्वात्" इत्यस्य चक्षुर्ग्रहणायोग्यत्वे सति बहिरिन्द्रियग्राह्यत्वे सति जातिमत्त्वात् इत्यर्थः । बहिरिन्द्रियग्राह्यत्वे सति जातिमत्त्वस्य घटादौ सत्त्वात् व्यभिचारः । तद्वारणाय "चक्षुर्ग्रहणायोग्यत्वे सति" इति । घटादेः तु चक्षुर्ग्राह्यत्वात् न व्यभिचारः ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

चक्षुर्ग्रहणायोग्यत्वे सति जातिमत्त्वस्य आत्मनि सत्त्वात् व्यभिचारः । तद्वारणाय "बहिरिन्द्रियग्राह्यत्वे सति" इति । चक्षुर्ग्रहणायोग्यत्वे सति बहिरिन्द्रियग्राह्यत्वस्य "यो गुणः यदिन्द्रियग्राह्यः" इति न्यायेन रसत्वादिजातौ सत्त्वात् तत्र व्यभिचारः । तद्वारणाय "जातिमत्त्वात्" इति । एतच्च अनुमानम् इति । शब्दस्य गुणत्वसाधकम् इदम् अनुमानं शब्दस्य द्रव्यसमवेतत्वसाधके वक्ष्यमाणानुमाने गुणत्वरूपहेतोः पक्षावृत्तितया स्वरूपासिद्धिः इति शङ्कानिराकरणार्थम् इति भावः । एतदनुमानेन इति । "शब्दः द्रव्यसमवेतः गुणत्वात्", इत्यनुमानेन शब्दे द्रव्यसमवेतत्वस्य सिद्ध्या पूर्वोक्तपरिशेषानुमाने हेतुघटकस्य द्रव्याश्रितत्वरूपविशेष्यस्य असिद्धिः निराकृता भवति । एवं च परिशेषानुमाने विशेष्यासिद्धिपरिहारार्थं शब्दस्य द्रव्यसमवेतत्वसाधनम् इति भावः ।

विशेषणासिद्ध्युद्धाराय इति । पूर्वोक्तपरिशेषानुमाने हेतुघटकं यत् विशेषणम् अष्टद्रव्यानाश्रितत्वम् तस्य असिद्धिः पक्षावृत्तित्वम् इति शङ्कानिरासाय इत्यर्थः । शब्दः न स्पर्शवद्विशेषगुणः । स्पर्शवतः द्रव्यस्य पृथिव्यादिचतुष्टयस्य विशेषगुणः न भवति । अनेन शब्दे पृथिव्यादिचतुष्टयविशेषगुणभिन्नत्वं साध्यम् इति फलति । तत्र हेतुः "अग्निसंयोगासमवायिकारणकत्वाभावे सति अकारणगुणपूर्वकप्रत्यक्षत्वात्" इति । सत्यन्तस्य अपाकजत्वम् इति अर्थः । "अकारणगुणपूर्वकप्रत्यक्षत्वात्" इत्यस्य कारणगुणाजन्यत्वे सति प्रत्यक्षत्वात् इत्यर्थः । "कारणम्" इत्यस्य स्वाश्रयसमवायिकारणम् इत्यर्थः । एवं च स्वाश्रयसमवायिकारणनिष्ठगुणाजन्यत्वे सति प्रत्यक्षविषयत्वं हेतुः । इदं च सुखे वर्तते । सुखे मानसप्रत्यक्षविषयत्वम् अस्ति । स्वाश्रयसमवायिकारणनिष्ठगुणाजन्यत्वं च वर्तते । अपाकजत्वं च सुखे वर्तते । स्पर्शवत्पृथिव्यादिचतुष्टयगुणभिन्नत्वरूपसाध्यं च वर्तते । तद्वत् शब्दोऽपि अपाकजः । अकारणगुणपूर्वकः । प्रत्यक्षविषयश्च इति कृत्वा तत्र पृथिव्यादिचतुष्टयविशेषगुणभिन्नत्वं सिद्ध्यति । पाकजरूपादौ अकारणगुणपूर्वकप्रत्यक्षत्वसत्त्वात् स्पर्शवद्विशेषगुणभिन्नत्वरूपसाध्याभावाच्च व्यभिचारः । तद्वारणाय

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

''अग्निसंयोगासमवायिकारणत्वाभावे सति'' इति विशेषणम् । पटरूपादौ अपाकजत्वे सति प्रत्यक्षत्वसत्त्वात् उक्तसाध्याभावाच्च व्यभिचारः । तद्वारणाय अकारणगुणपूर्वकत्वनिवेशः । पटरूपादौ स्वाश्रयपटसमवायिकारणतन्तुगतरूपात्मकगुणजन्यत्वात् तदजन्यत्वरूपाकारणगुणपूर्वकत्वं नास्ति इति न व्यभिचारः ।

जलपरमाणुरूपे अपाकजत्वे सति अकारणगुणपूर्वकत्वसत्त्वात् व्यभिचारः । तद्वारणाय ''प्रत्यक्षत्वात्'' इत्युक्तम् । ''अकारणगुणपूर्वकप्रत्यक्षत्वात्'' इत्यस्य अकारणगुणपूर्वकं यत् प्रत्यक्षम् तद्विषयत्वात् इति यथाश्रुतार्थविवक्षायां कारणगुणपूर्वकपटरूपादौ व्यभिचारः वारयितुं न शक्यते । पटरूपविषयकं यत् प्रत्यक्षं तत् अकारणगुणपूर्वकमेव । प्रत्यक्षाश्रयस्य आत्मनः कारणाभावात् । तथा च अकारणगुणपूर्वकप्रत्यक्षविषयत्वं पटरूपादौ अस्ति इति व्यभिचारस्य दुर्वारतया व्याचष्टे – **अकारणगुणपूर्वकत्वे सति प्रत्यक्षत्वात् इति** । प्रत्यक्षत्वात् इत्यस्य प्रत्यक्षविषयत्वात् इत्यर्थः । एवं च अकारणगुणपूर्वकत्वं प्रत्यक्षे नान्वेति । किन्तु प्रत्यक्षविषयेऽन्वेति । तेन अकारणगुणपूर्वकः सन् प्रत्यक्षविषयः तत्त्वं हेतुः । तेन फलितं अकारणगुणपूर्वकत्वे सति प्रत्यक्षविषयत्वं हेतुः ।

हेतुसत्त्वम् प्रतिपादयितुम् इति । सत्यन्तानुपादाने रूपादौ व्यभिचार इति वक्तव्ये पाकजरूपादौ इति किमर्थम् उक्तम् इति शङ्कायां अकारणगुणपूर्वकत्वे सति प्रत्यक्षत्वरूपो हेतुः पाकजरूप एव भवितुम् अर्हति । अपाकजरूपस्य कारणगुणपूर्वकत्वनियमात् । पाकजरूपे तु अकारणगुणपूर्वकत्वरूपहेतुः अस्ति इति पाकजत्वोक्त्या हेतुसत्ता उपपादिता भवति । हेतुसत्त्वाच्च व्यभिचारः भवति । तद्वारणाय ''अपाकजत्वे सति'' इति सत्यन्तम् इति भावः ।

पार्थिवरूपादौ प्रत्यक्षपदस्य व्यभिचारवारणरूपं प्रयोजनम् अनुक्त्वा जलपरमाणुरूपादौ प्रयोजनोक्तेः बीजं प्रदर्शयति – **अनित्यानां पार्थिवरूपादीनाम् इति** । पार्थिवरूपादिषु अनित्येषु केषांचित् फलादीनां पाकजत्वात् अपाकजत्वं

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

नास्ति । केषांचित् पटादीनां कारणगुणपूर्वकत्वं च वर्तते । अतः अकारणगुणपूर्वकत्वं नास्ति । अपाकजत्वे सति अकारणगुणपूर्वकत्वरूपः विशिष्टहेतुः पार्थिवरूपादौ नास्ति । किन्तु जलपरमाणुरूपादावेव वर्तते इति आशयेन पार्थिवरूपादिकम् उपेक्ष्य जलपरमाणुरूपादौ व्यभिचारः प्रदर्शित इत्यर्थः । तत्प्रत्यक्षत्वात् इत्यर्थ इति । बहिरिन्द्रियजन्यप्रत्यक्षविषयत्वात् इत्यर्थः ।

एतेन इति । मनसः अन्यदिन्द्रियं बहिरिन्द्रियम् । तज्जन्यप्रत्यक्षविषयत्वं बहिरिन्द्रिययोग्यत्वम् इति व्याख्यानेन वक्ष्यमाणं निरस्तम् इत्यन्वयः । अनात्मगुणग्राहकम् इन्द्रियं बहिरिन्द्रियम्, तज्जन्यप्रत्यक्षविषयत्वं बहिरिन्द्रिययोग्यत्वम् इति यदि व्याख्यानं क्रियते, तर्हि मनसोऽपि बहिरिन्द्रियत्वं प्रसज्यते । मनसः ज्ञानसामान्यहेतुत्वेन अनात्मगुणभूतरूपादिग्राहकत्वस्यापि सद्भावात् । तथा च बहिरिन्द्रियभूतं यत् मनः तद्योग्यत्वम् आत्मविशेषगुणेषु वर्तते, तेषु च आत्मविशेषगुणभिन्नत्वरूपं साध्यं नास्ति इति व्यभिचारः दुर्वारः । तेषु व्यभिचार-वारणार्थं हेतौ बहिरिन्द्रियपदोपादानम् इति शङ्का निरस्ता । बहिरिन्द्रियपदस्य प्रकृते मनोभिन्नम् इन्द्रियम् इत्यर्थात् इति भावः ।

इत्थं च अनेन प्रकारेण इति । ''शब्दः न स्पर्शवद्विशेषगुणः'' इत्यादिना उक्तेन अनुमानत्रयेण शब्दस्य आकाशातिरिक्तपृथिव्याद्यष्टद्रव्यानाश्रितत्वसिद्धौ तद्घटितेन पूर्वोक्तपरिशेषानुमानेन शब्दस्य आकाशात्मकनवमद्रव्याश्रितत्वं सिद्ध्यति इति भावः ।।

शब्दस्य विशेषगुणत्वं साधयति – **शब्दः विशेषगुणः** इत्यादिना । यत्र यत्र लौकिकसन्निकर्षेण इन्द्रियग्राह्यत्वं लौकिकसन्निकर्षेण द्वीन्द्रियग्रहणयोग्यताराहित्यं, गुणत्वव्याप्यजातिमत्त्वं च अस्ति, तत्र विशेषगुणत्वम् इति व्याप्तिः रूपादौ विशेषगुणे दृश्यते । शब्देऽपि तादृशहेतुसत्त्वात् विशेषगुणत्वं सिद्ध्यति । विशेषगुण-त्वाभाववत्यां प्रभायां प्रभात्वजातिमादाय व्यभिचारवारणाय जातौ ''गुणत्वव्याप्य''

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

इति विशेषणम् । प्रभायां संयोगरूपसन्निकर्षेण चक्षुरिन्द्रियग्राह्यत्वम् अस्ति, इन्द्रियद्वयग्रहणयोग्यता च नास्ति, जातिमत्त्वं च अस्ति इति व्यभिचारस्य प्रसक्तिः । "गुणत्वव्याप्य" इति विशेषणे दत्ते च प्रभात्वे गुणत्वव्याप्यत्वं नास्ति, प्रभायाः गुणत्वविरहात् इति न व्यभिचारः । अतीन्द्रियं गुरुत्वं द्वीन्द्रियग्रहणायोग्यम् । गुणत्वव्याप्यगुरुत्वत्वजातिमच्च इति गुरुत्वे व्यभिचारः । तद्वारणाय इन्द्रियग्राह्यत्वे सति इति विशेषणम् । गुरुत्वस्य इन्द्रियग्राह्यत्वं नास्ति इति न व्यभिचारः । गुरुत्वस्यापि उपनयसन्निकर्षेण इन्द्रियग्राह्यत्वात् व्यभिचारः । तद्वारणाय **लौकिकप्रत्यासत्त्या** इति ।

लौकिकप्रत्यासत्त्या इन्द्रियग्राह्यत्वे सति गुणत्वव्याप्यसंख्यात्वजातिमत्त्वं संख्यायाम् अस्ति इति सामान्यगुणे तत्र व्यभिचारवारणाय "द्वीन्द्रियग्रहणयोग्यताराहित्ये सति" इत्युक्तम् । संख्यायां तु चक्षुस्त्वगिन्द्रियद्वयग्रहणयोग्यत्वात् न व्यभिचारः । पक्षे शब्दे उपनयमर्यादया चक्षुर्ग्राह्यत्वसत्त्वात् चक्षुःश्रोत्ररूपद्वीन्द्रियग्रहणयोग्यत्वात् तद्योग्यताराहित्यं नास्ति इति स्वरूपासिद्धिः । तद्वारणाय "लौकिकप्रत्यासत्त्या द्वीन्द्रियग्रहणयोग्यताराहित्ये" इत्युक्तम् । शब्दे तु समवायेन एकेन्द्रियग्राह्यत्वम् ।

सांसिद्धिकद्रवत्व इति । सांसिद्धिकद्रवत्वस्नेहयोः त्वक्चक्षुरुभयग्राह्यत्वात् द्वीन्द्रियग्रहणयोग्यताराहित्यं नास्ति । धर्माधर्मभावनानाम् अतीन्द्रियत्वात् इन्द्रियग्राह्यत्वमेव नास्ति । अतः तेषु विशेषगुणत्वम् उक्तहेतुना साधयितुं न शक्यते । किन्तु हेत्वन्तरेणैव विशेषगुणत्वं साधनीयम् । "सांसिद्धिकद्रवत्वस्नेहधर्माधर्मभावनाः विशेषगुणाः, स्थितिस्थापकान्यत्वे सति विभिन्नद्रव्यविभाजकोपाधिमद्व्यक्तिद्वयवृत्तितानवच्छेदकगुणत्वव्याप्यजातिमत्त्वात्, सुखवत्" इत्यनुमानेन तेषां विशेषगुणत्वं साधनीयम् इति भावः । संयोगत्वसंख्यात्वम् आदाय संयोगसंख्यादौ व्यभिचारवारणाय गुणत्वव्याप्यजातौ विभिन्नद्रव्य-

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

विभाजकोपाधिमद्व्यक्तिद्वयवृत्तितानवच्छेदकत्वविशेषणम् । संयोगः जलत्वपृथिवीत्व-रूपद्रव्यविभाजकोपाधिमत्पृथिवीजलरूपव्यक्तिद्वयवृत्तिः; संयोगत्वं तादृशव्यक्ति-द्वयवृत्तितावच्छेदकम् इति तद्व्युदासः । एवं स्थितिस्थापकस्य पृथिवीमात्रवृत्तित्वेन तादृशोपाधिमद्व्यक्तिद्वयवृत्तितानवच्छेदकगुणत्वव्याप्यसंस्कारत्वाख्यजातिमत्त्वात् तत्र व्यभिचारवारणाय ''स्थितिस्थापकान्यत्व'' इति विशेषणम् ।

पूर्वोक्तानुमाने इति । शब्दे स्पर्शवद्विशेषगुणत्वाभावसाधके अनुमाने इति । शब्दः आकाशे नोत्पद्यते । किन्तु वाय्ववयवेषु सूक्ष्मशब्दक्रमेण वायावेव कारणगुणपूर्वकः शब्दः उत्पद्यताम् इति शङ्का । अनया शङ्कया शब्दे स्पर्शवद्वायुविशेष-गुणत्वस्य आपादनात् स्पर्शवद्विशेषगुणत्वाभावरूपसाध्याभावात्मकः बाधः शङ्कितो भवति । ''कारणगुणपूर्वकः शब्दः'' इत्यनेन तस्मिन्नेव अनुमाने अकारणगुणपूर्वकत्व-रूपहेतोः असिद्धिः आशङ्किता भवति इति भावः । तदेव उपपादयति – **तथा च** इति । श्रोत्रसमीपे पृथिवीजलतेजसामभावेऽपि शब्दस्य श्रूयमाणत्वात् पृथिवीजलतेजांसि उपेक्ष्य शब्दस्य वायुगुणत्वम् आशङ्कितम् ।

अयावद्द्रव्यभावित्वेन इति । अनेन विपक्षे बाधकः तर्कः उच्यते । ''यदि शब्दः स्पर्शवतः वायोः विशेषगुणः स्यात् तर्हि अयावद्द्रव्यभावी न स्यात् । किन्तु आश्रयनाशजन्यनाशप्रतियोगी स्यात्'' इति तर्कस्य आकारः ।

कारिकावली

इन्द्रियं तु भवेत् श्रोत्रमेकः सन्नपि उपाधितः ।

मुक्तावली

तत्र च शरीरस्य विषयस्य च अभावात् इन्द्रियं दर्शयति – **इन्द्रियम्** इति । ननु आकाशं लाघवात् एकं सिद्धम्, श्रोत्रं पुरुषभेदाद्भिन्नं कथम् आकाशं स्यात्?

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

इति चेत्, तत्र आह – **एक** इति । आकाशः एकः सन्नपि उपाधेः कर्णशष्कुल्या भेदात् भिन्नं श्रोत्रात्मकं भवति इत्यर्थः ।।

दिनकरी

ननु आकाशीयशरीरविषययोः प्रदर्शनम् उज्झित्वा कथम् इन्द्रियप्रदर्शनम् "**इन्द्रियं तु भवेच्छ्रोत्रम्**" इति अनेन ग्रन्थेन क्रियते? इति आशङ्क्य आह – **तत्र च** इति । आकाशे च इत्यर्थः । **कर्णशष्कुल्या भेदात्** इति । चैत्रादिकर्णशष्कुल्यवच्छिन्नम् आकाशं चैत्रादिश्रोत्रम् इति भावः ।

नव्यास्तु शब्दनिमित्तकारणत्वेन क्लृप्तस्य ईश्वरस्यैव शब्दसमवायिकारणत्वम् । न च – ईश्वरस्य शब्दसमवायिकारणत्वं जीवस्य वा इत्यत्र विनिगमनाविरहः । जीवस्य शब्दसमवायित्वे ज्ञानवत् शब्दस्यापि मानसत्वापत्तेः । अदृष्टादिवत्प्रतिबन्धकल्पने च अतिगौरवम् । न च – एवं कर्णशष्कुलीविवरावच्छिन्नाकाशस्य कथं श्रोत्रत्वोपपत्तिः इति – वाच्यम् । तथाविधस्य ईश्वरस्यैव श्रोत्रत्वोपपत्तेः इति – आहुः ।

स्वतन्त्रास्तु – मृदङ्गादीनामेव गुणः शब्दः । शब्दं प्रति मृदङ्गत्वादिना समवायिकारणतायाः स्वीकारात् । प्राचीनैरपि मृदङ्गत्वादिना निमित्तकारणतायाः स्वीकारात्, "मृदङ्गे शब्दः" इत्यादिप्रतीतेश्च । न च तत्र अवच्छेदकत्वं विषयः, मानाभावात् । अन्यथा तत्र अवच्छेदकताख्यस्वरूपस्य संबन्धस्य अन्यत्र समवायस्य कल्पने गौरवात् इति – वदन्ति इति ।।

राजीवोल्लासः

आकाशम् अनङ्गीकुर्वतां मतम् आह – **नव्यास्तु** इत्यादिना । शब्दसमवायिकारणत्वेन हि आकाशः साध्यते । शब्दसमवायिकारणत्वं तु ईश्वरस्यैव । न च ईश्वरस्य शब्दनिमित्तकारणत्वात् शब्दसमवायिकारणत्वं कथम्? इति – वाच्यम् । एकस्यैव एककार्यनिरूपितनिमित्तकारणत्वसमवायिकारणत्वयोः संभवात् । यथा

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

ईश्वरघटसंयोगं प्रति ईश्ववरस्य समवायिकारणत्वं निमित्तकारणत्वं च । एवं च शब्दनिमित्तकारणत्वेन क्लृप्तस्य ईश्वरस्यैव शब्दसमवायिकारणत्वसंभवात् ईश्वरातिरिक्ताकाशसद्भावे प्रमाणाभावः । न च – ईश्वरस्य जीवस्य वा शब्द-समवायिकारणत्वम् इत्यत्र विनिगमनाविरहः इति – वाच्यम् । जीवस्य शब्दसमवायि-कारणत्वे जीवसमवेतत्वं शब्दस्य वक्तव्यम् । तथा सति जीवसमवेतज्ञानादिवत् जीवसमवेतशब्दस्यापि मानसप्रत्यक्षविषयत्वापत्तेः । शब्दस्य मानसत्वं प्रति प्रतिबन्धकं किञ्चित् अस्ति इति कल्पने कल्पनागौरवमेव दोषः । तर्हि श्रोत्रेन्द्रियत्वं कस्य? इति चेत्, कर्णशष्कुल्यवच्छिन्नस्य ईश्ववरस्यैव श्रोत्रत्वम् इति **नव्यानाम्** आशयः । **जीवस्य शब्दसमवायित्वे** इति । "शब्दः मानसः, जीवसमवेतत्वात्, ज्ञानवत्" इत्यनुमाने तात्पर्यम् । **अतिगौरवम्** इति । विनिगमनाविरहेण नाना-जीवेषु शब्दसमवायिकारणतायाः मानसत्वप्रतिबन्धककल्पनायाश्च गौरवात् इति भावः ।

आहुः इति । अदृष्टादीनां शब्दमानसप्रत्यक्षे कारणत्वाकल्पनेन उपपत्तौ न प्रतिबन्धकताकल्पनागौरवम् । "अशब्दमस्पर्शम्" इत्यादिश्रुत्या ईश्वरस्य शब्दशून्यत्वकथनात् कथम् शब्दसमवायिकारणत्वं भवितुम् अर्हति इति अस्वरसबीजम् अवगन्तव्यम् । तथा च ईश्वरातिरिक्तस्य आकाशस्यैव शब्दसमवायिकारणत्वं युक्तम् ।

सवतन्त्राः तु इत्यादि । शब्दः मृदङ्गादीनामेव गुणः । अतः शब्दस्य मृदङ्गादिकमेव समवायिकारणम् । न च – मृदङ्गादौ अनेकत्र शब्दसमवायिकारणता-कल्पने गौरवात्, लाघवात् एकस्य आकाशस्य सिद्धिः इति – वाच्यम् । **प्राचीनैः** अपि मृदङ्गादिषु अनेकेषु मृदङ्गत्वादिरूपेण शब्दं प्रति निमित्तकारणतायाः स्वीकारात्, तथैव तेषु समवायिकारणताया अपि स्वीकर्तुं शक्यत्वात् । न च हस्तमृदङ्गसंयोगादीनाम् एव शब्दं प्रति निमित्तकारणत्वात् मृदङ्गत्वादिना निमित्तकारणत्वं नास्ति इति

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

निमित्तकारणत्वदृष्टान्तेन मृदङ्गत्वादिना समवायिकारणत्वं न संभवति इति – वाच्यम् । ''मृदङ्गे शब्दः'' इत्यादिप्रतीत्या मृदङ्गे शब्दाश्रयत्वावगमात् मृदङ्गत्वादिना शब्दसमायिकारणतायाः तन्निमित्तकारणतायाश्च स्वीकरणीयत्वात् । न च – ''अग्रे वृक्षः कपिसंयोगी'' इत्यत्र सप्तम्या अग्रस्य कपिसंयोगावच्छेदकत्वं यथा प्रतीयते, तथा ''मृदङ्गे शब्दः'' इत्यत्रापि मृदङ्गस्य शब्दावच्छेदकत्वमेव प्रतीयते, न तु शब्दाश्रयत्वम् इति – वाच्यम् । उक्तप्रतीतेः अवच्छेदकत्वविषयकत्वे प्रमाणाभावात् । ''घटे रूपम्'' इत्यादौ सप्तम्या समवायसंबन्धावच्छिन्नाश्रयत्वं बोध्यते, ''मृदङ्गे शब्द'' इत्यादौ अवच्छेदकत्वं बोध्यत इति वैरूप्यकल्पने गौरवात् । तथा च गुणगुणिनोः समवायसंबन्धं स्वीकृत्य समवायसंबन्धावच्छिन्नाधारताविषयकतया ''घटे रूपम्'' इत्यादिप्रतीतिवत् शब्दमृदङ्गयोः समवायं स्वीकृत्य ''मृदङ्गे शब्द'' इति प्रतीतेः शब्दनिरूपितसमवायसंबन्धावच्छिन्नधारताविषयकत्वं स्वीकरणीयम् । तथा च मृदङ्गस्य शब्दसमवायिकारणत्वं निवारयितुं न शक्यते इति स्वतन्त्राणां मतम् ।

वदन्ति इति अनेन स्वतन्त्राणां मते अस्वारस्यं सूच्यते । शब्दः तावत् अयावद्द्रव्यभावी अपाकजश्च । अतः तस्य मृदङ्गादिरूपपृथिवीविशेषगुणत्वं न संभवति । पृथिवीविशेषगुणानां आश्रयनाशजन्यनाशप्रतियोगित्वेन यावद्द्रव्यभावित्वात् पाकजत्वाच्च । अयावद्द्रव्यभावित्वादेव शब्दः जलतेजोवायूनामपि गुणः न भवति । एवं शब्दस्य मृदङ्गादिगुणत्वे आश्रयादन्यत्र अनुपलब्धिप्रसङ्गः । पृथिव्यादि-गुणानां स्वाश्रयादन्यत्र ग्रहणाभावात् । समुपलभ्यते च शब्दः मृदङ्गादेः अन्यत्र कर्णशष्कुलीदेशे इति ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ कालनिरूपणम् ॥

कारिकावली

जन्यानां जनकः कालः जगतामाश्रयो मतः ॥ ४५ ॥

मुक्तावली

कालं निरूपयति – **जन्यानाम्** इति । तत्र प्रमाणं दर्शयितुम् आह – **जगताम् आश्रय** इति । **''इदानीं घटः''** इत्यादिप्रतीतिः **सूर्यपरिस्पन्दादिकं** यदा विषयीकरोति तदा सूर्यपरिस्पन्दादिना घटादेः संबन्धः वाच्यः । स च संबन्धः संयोगादिः न संभवति इति काल एव संबन्धघटकः कल्प्यते । इत्थं च तस्य आश्रयत्वमेव सम्यक् ॥

दिनकरी

मूले जन्यानां जनक इति । कार्यत्वावच्छिन्नं प्रति निमित्तकारणम् इत्यर्थः । **अत्र च** कालिकसंबन्धावच्छिन्नकार्यतानिरूपितम् अधिकरणविधया निमित्तत्वं काललक्षणम् । कालिकसंबन्धावच्छिन्नेतिकरणात् दिशि अधिकरणविधयेति-करणात् अदृष्टेश्वरयोः न अतिव्याप्तिः इति बोध्यम् । ननु कार्यमात्रं प्रति कालस्य निमित्तकारणत्वे किं मानम्? इति चेत्? अत्र आहुः – ''अद्य घटः भविष्यति'', ''श्वः पटः भविता'' इत्यादिप्रत्ययेन तत्तत्कार्योत्पत्त्यधिकरणत्वेन कालः विषयीक्रियते । तत्तदुत्पत्त्यधिकरणत्वेन व्यवहारविषयस्य तत्तदुत्पत्तिहेतुत्वनियमात् । तदुत्पत्तिहेतुत्वस्य तद्धेतुत्वव्याप्यत्वात् । तत्तत्कार्यविशेषं प्रति तत्तत्कालविशेषस्य हेतुत्वे सिद्धे, ''यद्विशेषयोः'' इति व्याप्त्या कार्यमात्रे कालस्य हेतुतासिद्धिः इति । सा च हेतुता निमित्तकारणतैव ।

न च – कार्यमात्रे कालस्य निमित्तहेतुत्वं न संभवति, स्वसमवेतद्वित्व-पृथक्त्वसंयोगविभागं प्रति कालस्य समवायिकारणत्वेन तद्भिन्नत्वघटितस्य निमित्तकारणत्वस्य तत्र अभावात् इति **आचार्योक्तं** शङ्क्यम्, समवायसंबन्धेन

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

द्वित्वादिकं प्रति तस्य समवायिकारणत्वेऽपि कालिकसंबन्धेन द्वित्वादिकार्यं प्रति निमित्तकारणत्वस्य अनपायात् । एवमेव कार्यमात्रे दिशः अपि निमित्तकारणत्वं बोध्यम् ।

राजीवोल्लासः

जन्यानां जनकः कालः इति मूलम् । अनेन कार्यसामान्यं प्रति कालस्य कारणत्वं बोध्यते । कारणत्वस्य समवायिकारणत्वादिभेदेन त्रिविधत्वात् कार्यसामान्यं प्रति कीदृशं कारणत्वं कालस्य इंति जिज्ञासायां काले समवायसंबन्धेन घटादिकार्यस्य अनुत्पत्या समवायिकारणत्वासंभवात् असमवायिकारणत्वस्य द्रव्ये असत्त्वात् च निमित्तकारणत्वम् एव इति आशयेन व्याचष्टे – **कार्यत्वावच्छिन्नं प्रति** इति । ननु कार्यसामान्यनिरूपितनिमित्तकारणत्वस्य दिगादिष्वपि सत्त्वात् तत्र अतिव्याप्तिः इति आशङ्क्य आह – **अत्र च** इति । तथा च कालिकसंबन्धावच्छिन्न-कार्यत्वावच्छिन्नकार्यतानिरूपिताधिकरणत्वावच्छिन्नकारणत्वं कालस्य लक्षणम् । कालिकसंबन्धेन कार्यसामान्यं प्रति कालः अधिकरणं भवति इति कालस्य अधिकरणत्वेन रूपेण कारणत्वम् अस्ति इति लक्षणसमन्वयः । अत्र कार्यतायां कालिकसंबन्धावच्छिन्नत्वानिवेशे दिशोऽपि कार्यसामान्यं प्रति अधिकरणत्वेन रूपेण कारणत्वात् तत्र अतिव्याप्तिः । कालिकसंबन्धावच्छिन्नत्वनिवेशे तु दिशः दैशिकसंबन्धेन कार्यं प्रत्येव अधिकरणविधया कारणत्वात् दैशिकसंबन्धावच्छिन्न-कार्यत्वावच्छिन्नकार्यतानिरूपिताधिकरणत्वावच्छिन्नकारणतायाः दिशि सत्त्वेऽपि कालिकसंबन्धावच्छिन्नकार्यतानिरूपितकारणताया असत्त्वात् न अतिव्याप्तिः । कारणतायां अधिकरणत्वावच्छिन्नत्वानिवेशे अदृष्टेश्वरयोः कालिकसंबन्धेन कार्यसामान्यं प्रति कारणत्वसत्त्वात् अतिव्याप्तिः । अधिकरणत्वावच्छिन्नत्वनिवेशे तु अनयोः कार्यसामान्याधिकरणत्वविरहात् न अतिव्याप्तिः ।

अत्र आहुः – कार्यसामान्यं प्रति कालस्य कालत्वेनैव कारणत्वं युक्तम्, न तु अधिकरणत्वेन । अधिकरणत्वस्य दिगादिष्वपि सत्त्वेन अतिप्रसक्ततया

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

कालिकसंबन्धावच्छिन्नकार्यत्वावच्छिन्नकार्यतानिरूपित कालनिष्ठकारणतायां अवच्छेदकत्वासंभवात् । तथापि कालत्वस्य एकव्यक्तिवृत्तित्वेन जातित्वासंभवात् कालिकसंबन्धावच्छिन्नाधिकरणत्वम् एव कालत्वम् इति आशयेन **अधिकरणविधया** इति **दिनकर्याम्** उक्तम् । तथा च कालत्वस्यैव कारणतावच्छेदकत्वेऽपि कालत्वस्य अधिकरणतारूपत्वात् न असङ्गतिः । परन्तु कालिकसंबन्धावच्छिन्नाधिकरणत्वस्य ''जन्यमात्रं कालोपाधिः'' इति न्यायेन घटादिष्वपि सत्त्वेन तत्र अतिव्याप्तिः इति शङ्का जायते । अतः ''अधिकरणविधया'' इत्यस्य तादात्म्यसंबन्धेन इत्यर्थः । कार्यसामान्याधारस्य कालस्य तादात्म्यसंबन्धेनैव कारणत्वात् । तथा च कालिकसंबन्धावच्छिन्नकार्यत्वावच्छिन्नकार्यतानिरूपिततादात्म्यसंबन्धावच्छिन्न-कारणत्वं काललक्षणम् इति फलितम् । ''निमित्तत्वम्'' इत्यस्य कारणत्वम् इत्येव अर्थः । न तु निमित्तकारणत्वम् इति । तन्निवेशे प्रयोजनाभावात् इति ।

कार्यसामान्यं प्रति कालस्य निमित्तकारणत्वे प्रमाणं प्रदर्शयति – **अत्र आहुः** इत्यादिना । ''भविष्यति'' इत्यस्य उत्पत्स्यते इत्यर्थः । ''भविता'' इत्यस्य उत्पत्ता इत्यर्थः । तथा च ''अद्य घटः भविष्यति'', ''श्वः घटः भविता'' इत्यादिप्रतीत्या घटपटादितत्तत्कार्योत्पत्त्यधिकरणत्वेन कालः विषयीक्रियते । तेन घटाद्युत्पत्त्यधिकरणत्वं कालस्य लभ्यते । यत् यदुत्पत्त्यधिकरणत्वेन प्रतीयते, तत् तदुत्पत्तिहेतुः इति व्याप्तिः । यथा ''कपाले घट उत्पद्यते'' इत्यादौ घटोत्पत्त्यधि-करणत्वेन प्रतीयमानस्य कपालस्य घटोत्पत्तिहेतुत्वम् । एवं यत् यदुत्पत्तिहेतुः तत् तद्धेतुः इति व्याप्तिः । यथा घटोत्पत्तिहेतोः कपालस्य घटहेतुत्वम् । एवं च ''अद्य घटः भविष्यति'' इत्यादि प्रतीत्या कालस्य घटाद्युत्पत्त्यधिकरणत्वे सिद्धे तेन घटाद्युत्पत्तिहेतुत्वं सिद्ध्यति । तेन च घटादिहेतुत्वं कालस्य सिद्ध्यति ।

अत्र एवम् अनुमानप्रयोगः – ''कालः घटादिहेतुः, घटाद्युत्पत्तिहेतुत्वात्, कपालादिवत्'', ''कालः घटाद्युत्पत्तिहेतुः, घटाद्युत्पत्त्यधिकरणत्वेन प्रतीयमानत्वात्,

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

कपालादिवत्'' इति । एवञ्च तत्तत्कार्यविशेषं प्रति ''अद्य'', ''श्वः'' इत्यादि शब्दोल्लिख्यमानानां कालविशेषाणां कारणत्वे सिद्धे सति ''यद्विशेषयोः कार्यकारणभावः स तत्सामान्ययोरपि'' इति न्यायेन कार्यसामान्यं प्रति कालसामान्यस्य – कालत्वावच्छिन्नस्य हेतुत्वं सिद्ध्यति । तच्च हेतुत्वं निमित्तकारणत्वम् एव, समवायिकारणत्वादेः दुर्वचत्वात् ।

व्यवहारविषयस्य इति । प्रतीतिविषयस्य इत्यर्थः । पूर्वं ''**इत्यादिप्रत्ययेन**'' इत्युक्तेः । व्यवहारस्य प्रतीतिमूलकत्वात् कार्ये कारणोपचारः अयम् ।

न च कार्यमात्रे इत्यादि । कार्यसामान्यं प्रति कालस्य निमित्तकारणत्वं न संभवति । कार्यसामान्यान्तर्गतद्वित्वादिकं प्रति कालस्य समवायिकारणत्वात् । तथा हि – कालघटद्वित्वं, कालस्य घटात् पृथक्त्वम्, कालघटसंयोगः, कालघटविभागश्च काले समवायसंबन्धेन उत्पद्यते । तेन द्वित्वादिकं प्रति कालस्य समवायिकारणत्वं सिद्ध्यति । द्वित्वादिनिष्ठसमवायसंबन्धावच्छिन्नकार्यतानिरूपिततादात्म्यसंबन्धावच्छिन्नकारणत्वम् एव कालस्य द्वित्वादिसमवायिकारणत्वम् । तथा च समवायिकारणभिन्नत्वे सति असमवायिकारणभिन्नत्वे सति कारणत्वरूपस्य निमित्तकारणत्वस्य काले अभावात् इति उदयनाचार्योक्तरीत्या आशङ्का ।

समाधानं तु – तुरीपटसंयोगं प्रति तुरीतन्तुसंयोगस्य असमवायिकारणत्वेऽपि पटं प्रति तुरीतन्तुसंयोगस्य निमित्तकारणत्वात् असमवायिकारणभिन्नत्वघटितस्य निमित्तकारणत्वस्य तत्र अभावात् अव्याप्त्यापत्त्या समवायिकारणताभिन्ना असमवायिकारणताभिन्ना च कारणता निमित्तकारणता इति पूर्वं कारणप्रकरणे निर्णीतत्वात् कालनिष्ठायाः कालिकसंबन्धावच्छिन्नद्वित्वादिनिष्ठकार्यतानिरूपिततादात्म्यसंबन्धावच्छिन्नकारणतारूपायाः निमित्तकारणतायाः समवायसंबन्धावच्छिन्नद्वित्वादिनिष्ठकार्यतानिरूपिततादात्म्यसंबन्धावच्छिन्नकारणत्वरूपसमवायिकारणत्वापेक्षया भिन्नत्वात् कालस्य निमित्तकारणत्वम् अक्षतम् एव इति ।

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

दिनकरी

मुक्तावल्यां तत्र इति । **तत्र** – **काले** । **जगताम् आश्रयः मत इति** । ''**कालः सर्ववान्**'' इति प्रतीत्या सर्वाधिकरणत्वेन कालसिद्धिः इति भावः । **ननु एतादृशी** प्रतीतिः दिग्विषयिणी एव अस्तु, अतिरिक्तकालकल्पने गौरवात् इति न केवलम् अनया प्रतीत्या कालः सिध्यति, परंतु प्रमाणान्तरेण काले सिद्धे प्रकृतप्रतीतिबलात् सर्वाधारत्वं कल्प्यते इति आह – **इदानीम्** इत्यादिना । **सूर्यपरिस्पन्दादिकम्** इति । ''इदानीम्'', ''तदानीम्'' इति प्रतीतिः महाकालं विषयीकरोति इति तु न वाच्यम् । तथा सति ''इदानीं घटः, न तदानीम्'' इति प्रतीत्यनुदयापत्तेः ।

न च – **तत्तत्क्रियाविशिष्टमहाकाल** एव ''इदानीम्'' इत्यादिप्रत्ययविषयः । तथा च ''इदानीं घटः, न तदानीम्'' इति प्रत्ययस्य ''एतत्क्रियाविशिष्टमहाकाले घटः, न तत्क्रियाविशिष्टमहाकाले'' इत्यर्थ इति – वाच्यम् । **तथा सति** तत्तत्क्रियाविशिष्टमहाकालापेक्षया लाघवेन तत्तत्क्रियाया एव तादृशप्रतीतिविषयत्वस्य उचितत्वात् । ''इति'' इत्यनन्तरं **स्वाश्रयतपनसंयोगिसंयोग** एव संबन्धः वाच्यः तत्र इति शेषः । न च – आकाशमेव संबन्धघटकम् आस्ताम् इति – वाच्यम् । आकाशदिगात्मनां विनिगमनाविरहेण अतिरिक्तैककालस्य तथात्वात् । **इत्थं च** इति । अतिरिक्तकालसिद्धौ च इत्यर्थः । **सम्यक्** इति । ''कालः सर्ववान्'' इति प्रतीतेः अतिरिक्तकालविषयकत्वस्य उचितत्वात् इति भावः ।।

राजीवोल्लासः

कालः सर्ववान् इति । ''कालः सर्ववान्'' इति प्रतीतिः कालसद्भावे प्रमाणम् इति भावः ।

ननु एतादृशी इति । ''कालः सर्ववान्'' इति प्रतीतिः कालसद्भावे न प्रमाणम् । तस्याः दिग्विषयकत्वेन अतिरिक्तकालकल्पने गौरवात् । तथा च

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

अनया प्रतीत्या केवलया न कालः सिद्ध्यति, किन्तु प्रमाणान्तरेण काले सिद्धे अनया प्रतीत्या कालस्य सर्वाधारत्वं सिद्ध्यति इति आह मूले – **इदानीं घट** इत्यादिना इति भावः ।

''इदानीम्'' इत्यादिप्रतीतिः सूर्यपरिस्पन्दादिकं विषयीकरोति इति मूले उक्तम् । तत् उपपादयति – **इदानीम्** इत्यादिना । ''इदानीं घटः'', ''तदानीं घटः'' इत्यादिप्रतीतिः ''इदानीं'', ''तदानीम्'' इति महाकालं विषयीकरोति इति वक्तुं न शक्यते । तथा सति ''इदानीं घटः, न तदानीम्'' इति प्रतीत्यनुदयापत्तेः । ''इदानीं'', ''तदानीम्'' इति शब्दयोः महाकालवाचकत्वात्, ''महाकाले घटः'', ''महाकाले घटाभावः'' इत्येवं घटतदभावयोः महाकालवृत्तित्वं तादृशप्रतीतिः विषयीकरोति इति पर्यवस्यति । एवं च एकत्रैव घटतदभावयोः विरोधात् ''इदानीं घटः'', ''न तदानीम्'' इति प्रतीत्यनुदयप्रसङ्गः इति तात्पर्यम् । **न च तत्तक्रियाविशिष्टमहाकाल** इति । सूर्यपरिस्पन्दरूपतत्तक्रियाविशिष्टमहाकाल एव ''इदानीम्'' इति प्रतीतेः विषयः । तथा च ''इदानीं घटः'', ''न तदानीम्'' इति प्रत्ययस्य एतत्सूर्यपरिस्पन्दनरूपक्रियाविशिष्टमहाकाले घटः, तत्परिस्पन्द-विशिष्टमहाकाले न घटः इत्यर्थः । तथा च अवच्छेदकीभूतयोः क्रिययोः भेदात् एकत्रैव महाकाले घटतदभावयोः प्रतीतौ न अनुपपत्तिः । यथा अग्रावच्छिन्न-वृक्षे कपिसंयोगः, मूलावच्छिन्नवृक्षे कपिसंयोगाभावः, इति प्रतीतौ एकत्रैव वृक्षे अवच्छेदकभेदेन कपिसंयोगतदभावयोः प्रतीतेः न अनुपपत्तिः तद्वत् इति भावः ।

तथा सति इति । ''इदानीं'', ''तदानीम्'' इति प्रतीतेः तत्तत्क्रियावच्छिन्न-महाकालविषयकत्वे गौरवात् तदपेक्षया लाघवेन तत्तक्रियाया एव तादृशप्रतीतिविषयत्वं वाच्यम् । तथा च अस्यां सूर्यपरिस्पन्दरूपक्रियायां घटः, अन्यस्यां सूर्यपरिस्पन्दरूपक्रियायां घटाभावः इति ''इदानीं घटः'', ''न तदानीम्'' इति

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्रतीतेः अर्थः । तत्र सूर्यपरिस्पन्दरूपक्रियायाः घटाधिकरणत्वं भासते, घटाधिकरणत्वं क्रियायाः केन संबन्धेन इति जिज्ञासायां संयोगादिसंबन्धासंभवात् स्वाश्रय-तपन-संयोगि-संयोगसंबन्धेनैव क्रियावृत्तित्वम् घटादेः वक्तव्यम् । स्वं – सूर्यपरिस्पन्धः । स्वाश्रयः – सूर्यः, तत्संयोगी – कालः तत्संयोगः घटस्य । एवं च एतादृशसंबन्धघटकतया कालः सिद्ध्यति । न च – तादृशसंबन्धघटकः आकाश एव । सूर्यसंयोग्याकाशसंयोगस्य घटे सत्त्वात् स्वाश्रयसंयोगिसंयोगरूपपरम्परासंबन्धस्य घटे आकाशमादायापि घटयितुं शक्यत्वात् इति – वाच्यम् । आकाशदिगात्मनां विनिगमनाविरहेण अतिरिक्तस्य एकस्य कालस्यैव संबन्धघटकत्वात् । क्लृप्तानां विनिगमनाविरहे कल्प्यम् अन्यत् प्रसिद्ध्यति इति न्यायात् ।

स्वाश्रयतपनसंयोगिसंयोग एव इति । इदम् उपलक्षणम् । ''इदानीं रूपम्'' इत्यादौ स्वाश्रयतपनसंयोगिसंयोगिसमवायः संबन्धः । ''इदानीं रूपत्वम्'' इत्यादौ तादृशसंयोगिसंयोगिसमवेतसमवायः संबन्धः इति ऊह्यम् ।

एतावता ''इदानीं घटः'' इत्यादिप्रतीतिः एव कालसद्भावे प्रमाणम् । तादृशप्रतीतौ सूर्यपरिस्पन्दस्य क्रियायाः घटस्य च यः संबन्धः स्वाश्रयसंयोगिसंयोगरूपः तद्घटकतयाकालस्यापि विषयत्वात् इत्युक्तं भवति । एवञ्च ''इदानीं घटः'' इत्यादिप्रतीतिविषयसंबन्धघटकतया काले सिद्धे ''कालः सर्ववान्'' इति प्रतीतेरपि सर्वाधारत्वेन अतिरिक्तकालविषयकत्वम् एव युक्तम् । दिग्विषयकत्वे कालशब्दस्य दिशि लक्षणा स्यात् ।।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

कारिकावली

परापरत्वधीहेतुः क्षणादिः स्यात् उपाधितः ।

मुक्तावली

प्रमाणान्तरं दर्शयति – **परापरत्व** इति । **परत्वापरत्वादिबुद्धेः** असाधारणं निमित्तं काल एव । परत्वापरत्वयोः असमवायिकारणसंयोगाश्रयः लाघवात् अतिरिक्तः काल एव कल्प्यते इति भावः ।

दिनकरी

परत्वापरत्वबुद्धेः इति । **ज्येष्ठे परत्वप्रत्ययः**, कनिष्ठे अपरत्वप्रत्ययः, स च परत्वापरत्वगुणविशेषाधीनः । परत्वापरत्वे च सासमवायिकारणके, भावकार्यत्वात् । असमवायिकारणं च तयोः कालपिण्डसंयोग एव इति परत्वापरत्वयोः असमवायि-कारणसंयोगाश्रयतया कालसिद्धिः इति भावः । "परत्वापरत्वयोः" इत्यस्यैव वक्तुम् उचितत्वेऽपि तद्बुद्धिपर्यन्तानुधावनं कालिकपरत्वापरत्वयोः प्रमाणं दर्शयितुम् ।

न च – पिण्डगतरूपादेरेव परत्वापरत्वासमवायिकारणत्वम् अस्तु इति – वाच्यम् । कालिकपरत्वापरत्वयोः वायौ उत्पत्त्या व्यभिचारात् । **अत एव** पृथिवीपिण्डसंयोगस्य न तत्र कारणत्वम् । पृथिव्यसंयुक्तपदार्थेऽपि तादृशपरत्वापरत्वयोः उत्पादेन व्यभिचारात् । ननु तथापि आकाशदिगात्ममनोभिः पिण्डसंयोगस्य तथात्वं स्यात्, किं कालकल्पनया, इति अत आह – **लाघवात्** इति । आकाशदिग्भ्यां पिण्डसंयोगस्य तथात्वे जीवात्मभिः प्रत्येकं विनिगमनाविरहात् आत्ममनसोः तु अनन्तत्वात् न तथात्वम्, किंतु लाघवात् अतिरिक्तः काल एव तथात्वेन कल्प्यते इति भावः ।।

राजीवोल्लासः

परापरत्वधीहेतुः इति कारिकायां कालसद्भावे प्रमाणान्तरं प्रदर्शितं, परत्वापरत्वादिबुद्धिहेतुत्वेन कालसिद्धिः इति । तदेव उपपादयति – **ज्येष्ठे**

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

परत्वप्रत्ययः इत्यादिना । वयसा ज्येष्ठे परत्वप्रत्ययः कनिष्ठे अपरत्वप्रत्ययश्च ''रामः परः'', ''लक्ष्मणः अपरः'' इत्याद्याकारकः जायते । स च प्रत्ययः परत्वापरत्वगुणविशेषाधीनः ।

मुक्तावल्यां परत्वापरत्वबुद्धेः असाधारणं निमित्तम् इति उक्तम् । **''जन्यानां जनकः कालः''** इत्यनेनैव जन्यपरत्वापरत्वधीहेतुत्वसिद्ध्या पौनरुक्त्य-शङ्कानिरासाय असाधारणम् इति पदम् । तथा च ''जन्यानां जनकः'' इत्यत्र कार्यसामान्यं प्रति साधारणकारणत्वं कालस्य उक्तम् । अत्र तु परत्वापरत्व-धीरूपकार्यविशेषं प्रति कारणत्वेन कालसिद्धिः उच्यत इति न पौनरुक्त्यम् इति भावः ।

अत्र एवम् अनुमानम् – ''परत्वापरत्वे सासमवायिकारणके – असमवायि-कारणजन्ये, भावत्वे सति कार्यत्वात्, रूपादिवत्'' इति । रूपादीनां घटादिगतानां भावकार्यत्वात् असमवायिकारणजन्यत्वं वर्तते । घटगतरूपादीनां असमवायिकारणं कपालगतरूपादिकम् । परन्तु रामलक्ष्मणादिशरीरगतयोः परत्वापरत्वयोः अकारणगुणपूर्वकत्वात् शरीरावयवगतपरत्वापरत्वे असमवायिकारणे इति वक्तुं न शक्यते । अतः परत्वापरत्वयोः शरीरगतयोः असमवायिकारणं कालशरीरसंयोग एव । तदाश्रयतया च कालः सिद्ध्यति । एवञ्च मुक्तावल्यां **''परत्वापरत्वादिबुद्धेः असाधारणं निमित्तं काल एव''** इति यदुक्तं तस्य अयम् आशयः – परत्वापरत्वादिबुद्धिं प्रति परत्वापरत्वगुणः कारणम् । प्रत्यक्षे विषयस्य कारणत्वात् । परत्वापरत्वगुणं प्रति कालपिण्डसंयोगः असमवायिकारणम् । तद्घटकतया कालः अपेक्षित इति परंपरया परत्वापरत्वादिबुद्धिं प्रति कालस्य निमित्तत्वम् इति ।

ननु परत्वापरत्वयोः असमवायिकारणहेतुघटकतया कालसिद्धिः इति वक्तव्ये परत्वापरत्वबुद्धिहेतुत्वकथनं मूले किमर्थम् इति आशङ्क्य आह – **परत्वापरत्वयोः** इति । वस्तुतः परत्वापरत्वहेतुतयैव कालः सिद्ध्यति । तथापि परत्वापरत्वयोः

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

किं प्रमाणम् इति जिज्ञासायां ''अयं परः'', ''अयम् अपरः'' इति विलक्षणबुद्धिरेव प्रमाणम् इति वक्तुम् परापरत्वधीहेतुः इति उक्तम् इति भावः ।

न च पिण्डगतरूपादेः एव इति । यस्मिन् शरीरे परत्वम् अपरत्वं च उत्पद्यते, तच्छरीरगतरूपादिकमेव परत्वापरत्वयोः असमवायिकारणम् अस्तु । परत्वापरत्वनिष्ठसमवायसंबन्धावच्छिन्नकार्यतानिरूपितसमवायसंबन्धावच्छिन्न-कारणत्वरूपस्य असमवायिकारणलक्षणस्य सत्त्वात् इति – न च वाच्यम् । वायावपि कालिकपरत्वापरत्वयोः उत्पत्या तत्र च रूपाभावेन व्यतिरेकव्यभिचारात् रूपादेः असमवायिकारणत्वासंभवात् ।

न च – वायुगतपरत्वापरत्वयोः तद्गतः स्पर्शः असमवायिकारणम् अस्तु इति – वाच्यम् । तद्गतसंख्यादिकम् आदाय विनिगमनाविरहात् अनन्तगुणानां असमवायिकारणत्वप्रसङ्गात् लाघवात् कालसंयोगस्यैव असमवायिकारणत्वं वक्तुम् उचितम् इति भावः ।

अत एव इति । व्यतिरेकव्यभिचारादेव इत्यर्थः । पृथिव्याः शरीरस्य च यः संयोगः सः शरीरगतपरत्वापरत्वयोः असमवायिकारणम् इति वक्तुं न शक्यते । पृथिव्यसंयुक्तेषु आकाशगतमेघादिष्वपि कालिकपरत्वापरत्वयोः उत्पत्या तत्र पृथिवीसं-योगाभावेन व्यतिरेकव्यभिचारात् पृथिवीसंयोगस्य असमवायिकारणत्वासंभवात् ।

तथात्वं स्यात् इति । असमवायिकारणत्वं स्यात् इत्यर्थः ।

आकाशदिग्भ्याम् इत्यादि । ''आत्ममनसोः त्वनन्तत्वात्'' इत्येतत् ''जीवात्मभिः प्रत्येकं विनिगमनाविरहात्'' इत्यस्य उपपादकम् । तथा च अयम् आशयः – आकाशदिग्भ्यां सह शरीरसंयोगस्य परत्वापरत्वासमवायिकारणत्वे किं आकाशदिग्भ्यां सह पिण्डसंयोगस्य असमवायिकारणत्वम् उत जीवात्मभिः सह, एवं मनोभिस्सह इति विनिगमनाविरहात् आकाशदिशोः अनन्तजीवात्मनां मनसां च संयोगस्य असमवायिकारणत्वे गौरवप्रसङ्गात् अतिरिक्तम् एकं कालं

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

स्वीकृत्य तत्संयोगस्यैव असमवायिकारणत्वकल्पनम् उचितम् इति भावः ।

अत्र विभुभिः आकाशदिगात्मभिः पिण्डसंयोगस्य अवर्जनीयत्वेऽपि अणुभिः मनोभिः पिण्डसंयोगस्य अवर्जनीयत्वाभावात् मनस्संयोगमादाय विनिगमनाविरहोद्भावनं कथम् इति चिन्तनीयम् ।

तथात्वे इति । असमवायिकारणत्वे इत्यर्थः । **तथात्वम्** इति । असमवायिकारणत्वम् इत्यर्थः । **तथात्वेन** इति । असमवायिकारणसंयोगाश्रयत्वेन इत्यर्थः ।।

मुक्तावली

ननु एकस्य कालस्य सिद्धौ क्षण-दिन-मास-वर्षादिसमयभेदः न स्यात् इति, अत आह – क्षणादिः स्यात् उपाधितः इति । कालस्तु एकोऽपि उपाधिभेदात् क्षणादिव्यवहारविषयः ।।

दिनकरी

ननु यदि काल एक एव तदा क्षण-लव-काष्ठादिनानाव्यहारः तत्र न स्यात् । न च – एकस्मिन्नेव घटे ''घटः'', ''कलशः'', ''कुम्भः'' इति व्यवहारवत् अत्रापि क्षणादिनानाव्यवहारे बाधकाभावः इति – वाच्यम् । एकस्मिन् विरुद्धनानाव्यवहारायोगात् । नहि घटत्वकलशत्वादिकं मिथः विरुद्धम्, क्षणत्वदिनत्वादिकं तु विरुद्धमेव । न हि ''क्षणं दिनम्'' इति प्रतीतिः अस्ति इति आशङ्कते – **ननु एकस्य** इति । **समयभेदः** – समयभेदव्यवहारः । **विभिन्नव्यवहारविषयः** इति यावत् । एकस्मिन् विरुद्धनानाव्यवहारविषयत्वाभावात् इति भावः । **उपाधिभेदात्** इति । तथा च एकस्य कालस्य किंचिद्धर्मविशिष्टस्य क्षणत्वम्, किंचिद्धर्मविशिष्टस्य दिनत्वम्, न तु केवलस्य इति भावः । इदम् उपलक्षणम् । तादृशोपाधीनामेव क्षणत्वादिव्यवहारविषयत्वम्, न तु महाकालस्य इत्यपि द्रष्टव्यम् ।।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

राजीवोल्लासः

ननु एकस्य कालस्य इति ग्रन्थम् अवतारयति – **ननु यदि काल एक एव** इत्यादिना । **विरुद्धनानाव्यवहारायोगात्** इति । एकस्मिन् वस्तुनि विरुद्धनानाधर्मावच्छिन्नबोधकशब्दप्रयोगस्य असंभवात् इत्यर्थः । "घटः", "कलशः", "कुम्भः" इत्यादिशब्दानां विरुद्धनानाधर्मावच्छिन्नाबोधकत्वात् एकस्मिन्नेव घटे "घटः", "कलशः", "कुम्भः" इति अनेके शब्दाः प्रयोक्तुं शक्यन्ते । "क्षणः", "लवः", "काष्ठा" इत्यादिशब्दानां क्षणत्वलवत्वादि-रूपविरुद्धनानाधर्मावच्छिन्नबोधकत्वात् कथम् एकस्मिन् काले क्षणलवादि-नानाशब्दप्रयोगः इत्याशयः ।

"ननु एकस्य कालस्य सिद्धौ क्षण-दिन-मास-वर्षादिसमयभेदः न स्यात्" इति मुक्तावलीग्रन्थः । कालस्य एकत्वेन समयभेदाभावः इष्ट एव इति समयभेदः न स्यात् इत्यापत्तिः इष्टापत्तिः इति आशङ्क्य आह – **समयभेदः समयभेदव्यवहारः** इति । तथा च "समयभेदः न स्यात्" इत्यस्य समयभेदव्यवहारः न स्यात् इत्यर्थः । कालैकत्ववादिनां समयभेदाभावस्य इष्टत्वेऽपि समयभेदव्यव-हाराभावस्य अनिष्टतया समयभेदव्यवहाराभावापत्तिः इष्टापत्तिः न भवति इति तात्पर्यम् ।

ननु कालस्य एकत्वम् आपादकम्, विभिन्नव्यवहाराभावः आपाद्यः । अनयोः सामानाधिकरण्यविरहात् कथं आपाद्यापादकभावः इत्याशङ्क्य तात्पर्यम् आह – **विभिन्नव्यवहारविषय** इति । तथा च कालस्य एकत्वे क्षण-दिनादिविरुद्धनानाव्यवहारविषयत्वं न स्यात् इत्यापत्तिशरीरम् । अत्र कालनिष्ठम् एकत्वम् आपादकम् विरुद्धनानाव्यवहारविषयत्वाभावः आपाद्यः । अनयोः एककालनिष्ठतया सामानाधिकरण्यम् उपपद्यत इति भावः ।।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

मुक्तावली

उपाधिस्तु स्वजन्यविभागप्रागभावावच्छिन्नं कर्म, पूर्वसंयोगावच्छिन्नविभागः वा, पूर्वसंयोगनाशावच्छिन्नोत्तरसंयोगप्रागभावः वा, उत्तरसंयोगावच्छिन्नं कर्म वा । न च – उत्तरसंयोगानन्तरं क्षणव्यवहारः न स्यात् इति – वाच्यम् । कर्मान्तरस्यापि सत्त्वात् इति । महाप्रलये क्षणव्यवहारः यदि अस्ति, तदा ध्वंसेनैव उपपादनीय इति । दिनादिव्यवहारस्तु तत्तत्क्षणकूटैः इति ।।

दिनकरी

स्वजन्य इति । स्वं – क्रिया । घटगतैकक्रियानाशोत्तरोत्पन्नतद्गतक्रियान्तरजन्यविभागप्रागभावविशिष्टस्य प्रथमकर्मणः क्षणचतुष्टयावस्थायिनः क्षणत्वापत्तिः, अतः **स्वजन्य** इति । ननु एवं प्रथमक्षणे क्षणव्यवहारोपपादनेऽपि द्वितीयक्षणे कथं तदुपपादनम्? तत्र क्रियाजन्यविभागोत्पत्त्या विभागप्रागभावासंभवात् । न च – द्वितीयक्षणोत्पन्नक्रियान्तरस्यैव **निरुक्तविशिष्टस्य** तत्र क्षणत्वम् इति – वाच्यम् । प्रतिक्षणं क्रियोत्पत्तौ मानाभावात् । अतः तत्रापि क्षणव्यवहारोपपादकम् उपाधिम् आह – **पूर्वसंयोग** इति । **स्वजन्यविभागनाश्यपूर्वसंयोगविशिष्टस्वजन्यविभागः** इत्यर्थः । तेन स्वजन्यविभागस्य यत्किंचित्पूर्वसंयोगविशिष्टस्य द्वित्रिक्षणवृत्तित्वेऽपि यत्किंचिद्विभागस्य स्वजन्यविभागनाश्यपूर्वसंयोगविशिष्टस्य तथात्वेऽपि न क्षतिः । तृतीयक्षणे तदुपपादकम् उपाधिम् आह – **पूर्वसंयोगनाशावच्छिन्नोत्तरसंयोगप्रागभावः** वा इति । **स्वजन्यविभागजन्यपूर्वसंयोगनाशावच्छिन्नस्वजन्योत्तरसंयोगप्रागभाव** इत्यर्थात् न अतिप्रसङ्गः । क्वचित्पुस्तके ''पूर्वसंयोगनाशावच्छिन्नविभागः वा'' इति पाठः । स च प्रामादिकः । प्रथमद्वितीयचतुर्थक्षणेषु एकैकोपाधेः एव अभिहिततया तृतीयक्षणे उपाधिद्वयाभिधाने सन्दर्भविरोधापत्तेः । उत्तरसंयोगस्यैव विभागनाशकतायाः सिद्धान्तसिद्धतया निरुक्तोपाधेः क्षणद्वयावस्थायिनः क्षणत्वायोगाच्च । यदि च तत्पाठप्रामाण्येऽपि आग्रहः, तदा

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

पूर्वसंयोगनाशस्यैव विभागनाशकत्वाभिप्रायेण संयोजनीयः । चतुर्थक्षणे तम् आह – **उत्तरसंयोग** इति । स्वनाशकोत्तरसंयोगः इत्यर्थः । तेन सर्वस्यैव संयोगस्य उत्तरसंयोगतया तद्विशिष्टकर्मणः क्षणचतुष्टयावस्थायिनः क्षणत्वापत्तिः निरस्ता ।

ननु एतादृशक्षणलक्षणं महाप्रलयात्मकक्षणेऽव्याप्तम्, तत्र तादृशकर्माभावात् । न च – महाप्रलयस्य क्षणत्वाभाव इष्ट एव इति – वाच्यम् । तत्रापि क्षणव्यवहारस्य सत्त्वात् । अन्यथा महाप्रलयोत्पत्तौ उत्पत्तिलक्षणस्य तदधिकरणक्षणावृत्तित्वव्याप्य-स्ववृत्तिध्वंसप्रतियोगिताकसमयवृत्तित्वरूपस्य अव्याप्त्यापत्तेः । तत्र महाप्रलयाधि-करणक्षणाप्रसिद्धेः, अत आह – **महाप्रलय** इति । महाप्रलये क्षणव्यवहारः नास्त्येव । उत्पत्तिलक्षणस्य क्षणाघटितस्यैव स्ववृत्तिध्वंसप्रतियोगिकालावृत्तित्व-विशिष्टस्ववृत्तित्वरूपस्य तदुत्पत्तौ संभवात् इत्यभिप्रेत्य उक्तं **यदि** इति । **ध्वंसेनैव** इति । स्ववृत्तिध्वंसप्रतियोगिप्रतियोगिकयावद्ध्वंसविशिष्टसमयस्यैव तत्र क्षणव्यव-हारविषयत्वात् इति भावः ।।

राजीवोल्लासः

क्षणव्यवहारनियामकः उपाधिः **उपाधिस्तु** इत्यादिना मूले प्रदर्शितः । क्रिया, क्रियातो विभागः, विभागात् पूर्वसंयोगनाशः, पूर्वसंयोगनाशात् उत्तरसंयोगः तदनन्तरं पुनः क्रियादिकं जायते इति स्वीकारात् क्रियादि उत्तरसंयोगान्ताः उपाधयः क्षणव्यवहारनियामकाः । तादृशैकैकोपाधिविशिष्टः कालः क्षण इत्युच्यते । तत्र प्रथमक्षणव्यवहारनियामकोपाधिः स्वजन्यविभागप्रागभावावच्छिन्नं कर्म । स्वं – कर्म । तज्जन्यः यः विभागः तत्प्रागभावविशिष्टं प्रथमक्षणे कर्म भवति । घटनिष्ठ-एकक्रियानाशानन्तरं उत्पन्ना या घटनिष्ठा अन्या क्रिया तज्जन्यः यः विभागः तत्प्रागभावविशिष्टं यत् प्रथमकर्म तस्य क्षणचतुष्टयं विद्यमानस्य एकक्षणत्वापत्तिवारणाय विभागे स्वजन्यत्वनिवेशः । तथा च स्वजन्यप्रथमविभाग-प्रागभावावच्छिन्नस्य कर्मणः प्रथमक्षणे एव सत्त्वात् न क्षणचतुष्टयस्य एकक्षणत्वापत्तिः । तत् आह – **स्वं क्रिया** इत्यादिना ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

ननु एवम् इति । स्वजन्यविभागप्रागभावावच्छिन्नस्य कर्मणः प्रथमक्षणे सत्त्वेन तत्र क्षणव्यवहारस्य उपपादनेऽपि द्वितीयक्षणे विभागोत्पत्या विभागप्रागभावविशिष्टस्य कर्मणः अभावात् कथं तत्र क्षणव्यवहारस्य उपपत्तिः? न च – द्वितीयक्षणे क्रियान्तरोत्पत्त्या तज्जन्यविभागप्रागभावविशिष्टायाः तस्याः क्रियायाः द्वितीयक्षणे क्षणव्यवहारोपपादकत्वं इति' – वाच्यम् । प्रतिक्षणं क्रियोत्पत्तौ प्रमाणाभावात् इति आशङ्क्य द्वितीयक्षणे क्षणव्यवहारनियामकः **पूर्वसंयोगावच्छिन्नविभागः** इति उक्तं **मुक्तावल्याम्** इति भावः । **निरुक्तविशिष्टस्य** इति । स्वजन्यविभागप्रागभावविशिष्टस्य इत्यर्थः । पञ्चमक्षणे क्रियान्तरोत्पत्या प्रतिक्षणम् इति उक्तम् । **तत्रापि** इति । द्वितीयक्षणेऽपि इत्यर्थः । घटनिष्ठक्रियोत्पत्तिद्वितीयक्षणे घटे पूर्वदेशसंयोगः पूर्वदेशविभागश्च वर्तते । पूर्वदेशसंयोगावच्छिन्नः विभागः क्रियोत्पत्तिद्वितीयक्षणे क्षणव्यवहारनियामकः ।

ननु पूर्वसंयोगविशिष्टस्य विभागस्य द्वितीयक्षणे क्षणव्यवहारनियामकत्वस्वीकारे घटगतक्रियाजन्यः यः विभागः सः घटनिष्ठस्य कस्यचित् पूर्वसंयोगस्य नाशकः पूर्वसंयोगान्तरस्य अनाशकश्च भवति । घटस्य चलनेन पूर्वदेशसंयोगस्य नाशेऽपि घटे पूर्वं विद्यमानः यः पटादिसंयोगः तन्नाशः न भवति । एवं च घटगतक्रियाजन्यविभागस्य पटादिसंयोगात्मकपूर्वसंयोगविशिष्टस्य द्वित्रिक्षणवृत्तितया तस्य क्षणव्यवहारनियामकत्वापत्तिः । एवं स्वजन्यविभागनाश्यः यः पूर्वसंयोगः तद्विशिष्टस्य स्वजन्यपूर्वदेशविभागान्यस्य विभागस्य क्षणव्यवहारनियामकत्वापत्तिः । तद्वारणाय पूर्वसंयोगे स्वजन्यविभागनाश्यत्वं विभागे स्वजन्यत्वं च निवेशयति – **स्वजन्यविभागनाश्य** इत्यादिना । स्वं – क्रिया । क्रियाजन्येन विभागेन नाश्यः यः पूर्वसंयोगः तद्विशिष्टः तत्क्रियाजन्यः विभागः द्वितीयक्षणे क्षणव्यवहारनियामकः । **तथात्वेऽपि** इति । द्वित्रिक्षणवृत्तित्वेऽपि इत्यर्थः । **न क्षतिः** इति । न क्षणव्यवहारनियामकत्वापत्तिः इत्यर्थः । **तदुपपादकम्** इति । क्षणव्यवहारोपपादकम् इत्यर्थः । क्रियोत्पत्तितृतीयक्षणे पूर्वदेशसंयोगनाशस्य चतुर्थक्षणे उत्पत्स्यमानस्य

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

उत्तरदेशसंयोगस्य यः प्रागभावः तस्य च सत्त्वात् पूर्वदेशसंयोगनाशविशिष्टः उत्तरदेशसंयोगप्रागभावः तृतीयक्षणे क्षणव्यवहारनियामकः ।

यत्किञ्चित् पूर्वदेशसंयोगनाशावच्छिन्नस्य उत्तरदेशसंयोगप्रागभावस्य द्वितीयप्रथमक्षणादिष्वपि विद्यमानस्य क्षणव्यवहारनियामकत्वापत्तिवारणाय क्रियाजन्यविभागजन्यपूर्वसंयोगनाशावच्छिन्नस्य स्वाजन्योत्तरसंयोगप्रागभावस्य क्षणत्वापत्तिवारणाय च पूर्वसंयोगे स्वजन्यविभागजन्यत्वं उत्तरसंयोगे स्वजन्यत्वं च निवेशयति – **स्वजन्यविभाग** इत्यादिना । स्वं – क्रिया । तथा च क्रियाजन्यः यः विभागः तज्जन्यः यः पूर्वसंयोगनाशः तद्विशिष्टः स्वजन्योत्तरसंयोगस्य प्रागभावः तृतीयक्षणे क्षणव्यवहारनियामक इति भावः ।

क्वचित्पुस्तके इत्यादि । तथा च तत्पाठानुसारेण तृतीयक्षणे पूर्वसंयोग-नाशावच्छिन्नः विभागः वर्तत इति सोऽपि क्षणव्यवहारनियामक इति लभ्यते । तेन पूर्वसंयोगनाशावच्छिन्नोत्तरसंयोगप्रागभावः पूर्वसंयोगनाशावच्छिन्नविभागश्च इति उपाधिद्वयं क्षणव्यवहारनियामकम् इति लभ्यते । इदं तु सन्दर्भविरुद्धम् । प्रथमद्वितीयचतुर्थक्षणेषु एकैकोपाधेः एव क्षणव्यवहारनियामकत्वोक्त्या तृतीयक्षणे उपाधिद्वयाभिधानस्य अनुचितत्वात् । अतः स पाठः प्रामादिकः इति भावः ।

ननु तृतीयक्षणे उपाधिद्वयस्यापि संभवेन एकमात्राभिधाने न्यूनता स्यात् इति द्वयमपि उक्तम् । इतरत्र एकैकोपाधेः एव सत्त्वात् एकैकमेव उक्तम् इति न एतावता सन्दर्भविरोध इति, अत आह – **उत्तर** इति । पूर्वसंयोग-नाशावच्छिन्नविभागस्य तृतीयक्षणे चतुर्थक्षणे च विद्यमानतया क्षणद्वयस्थायिनः तस्य क्षणत्वं न संभवति इति भावः । विभागस्य तृतीयचतुर्थक्षणद्वयावस्थाने हेतुः **उत्तरसंयोगस्यैव विभागनाशकताया इति । उत्तरसंयोगस्यैव** इति । ''एव''कारेण पूर्वसंयोगनाशव्यवच्छेदः । तथा च उत्तरसंयोगोत्पत्तिक्षणेऽपि विभागः तिष्ठत्येव इति भावः ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

यदि च इति । पूर्वसंयोगनाश एव विभागनाशकः इति पक्षे पूर्वसंयोगनाशविशिष्टस्य विभागस्य तृतीयक्षणमात्रे सत्त्वात् क्षणत्वं संभवति इति भावः । **पूर्वसंयोगनाशस्यैव** इति । ''एव''कारेण उत्तरसंयोगव्यवच्छेदः । तेन उत्तरसंयोगोत्पत्तिक्षणे विभागः नश्यति इति पूर्वसंयोगनाशविशिष्टस्य विभागस्य तृतीयक्षणमात्रवृत्तितया क्षणव्यवहारनियामकत्वरूपं क्षणत्वं संभवति इति भावः ।

स्वनाशकोत्तरसंयोग इति । क्रियानाशकः उत्तरसंयोगः इत्यर्थः । उत्तरदेशसंयोगोत्तरं क्रिया न तिष्ठति इति लाभाय एतत् अभिहितम्, लाघवेन स्वजन्यत्वस्यैव वक्तुम् उचितत्वात् । न च – पूर्वसंयोगनाशस्यैव उत्तरसंयोगजनकत्वम् इति – वाच्यम् । तथा सति क्रियाविगमे अपि तदुत्पत्त्यापत्तेः । **''संयोगविभागयोः अनपेक्षकारणं कर्म''** इति सूत्रविरोधापत्तेश्च इति ।

तादृशकर्माभावात् इति । स्वजन्यविभागप्रागभावाद्यवच्छिन्नस्य कर्मणः अभावात् इत्यर्थः । इदम् उपलक्षणम् । उत्तरसंयोगप्रागभावादेः अपि अभावात् इत्यपि बोध्यम् ।

तदधिकरण इत्यादि । तत्पदं उत्पत्स्यमानपदार्थपरम् । अधिकरणत्वं क्षणावृत्तित्वघटकं वृत्तित्वम्, स्ववृत्तित्वं समयवृत्तित्वं च कालिकसंबन्धेन, व्याप्यत्वं व्यापकत्वं च स्वरूपसंबन्धेन । तथा च कालिकसंबन्धेन यदधिकरणनिरूपितक्षणनिरूपितकालिकसंबन्धावच्छिन्नवृत्तित्वाभावः यत्समयनिरूपितकालिकसंबन्धावच्छिन्नवृत्तिताकध्वंसप्रतियोगित्वव्यापकः तत्समयनिरूपित- कालिकसंबन्धावच्छिन्नवृत्तित्वम् उत्पत्तिः इति उक्तं भवति । घटाधिकरणभूतः यः आद्यक्षणः तद्वृत्तिध्वंसप्रतियोगित्वं यत्र अस्ति पटादौ, तत्र घटाधिकरणक्षणवृत्तित्वाभावस्य सत्त्वात्, घटस्य तादृशाद्यक्षणवृत्तित्वमेव उत्पत्तिः इति समन्वयः । द्वितीयादिक्षणवृत्तिध्वंसप्रतियोगिनः आद्यक्षणवृत्तित्वनियमात् आद्यक्षणवृत्तित्वस्य द्वितीयादिक्षणवृत्तिध्वंस-

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्रतियोगित्वव्यापकत्वविरहात् न द्वितीयादिक्षणसंबन्धस्य उत्पत्तिपदार्थत्वम् । अनेन आद्यक्षणसंबन्ध एव उत्पत्तिः इति फलितम् । तथा च यत्समयवृत्तिध्वंस-प्रतियोगित्वव्यापकः यदधिकरणक्षणवृत्तित्वसामान्याभावः तस्य तत्समयसंबन्धः उत्पत्तिः इति पर्यवसितः अर्थः । एतादृशम् उत्पत्तिलक्षणं महाप्रलये क्षणव्यवहाराभावे महाप्रलयोत्पत्तौ अव्याप्तं भवति । महाप्रलयाधिकरणक्षणाप्रसिद्धेः । अतः महाप्रलयेऽपि क्षणव्यवहारः आवश्यकः इति भावः ।

मूले **यदि अस्ति** इति । ''यदि'' शब्देन महाप्रलये क्षणव्यवहारः नास्त्येव इति सूचितम् । तत्र क्षणव्यवहाराभावे क्षणघटितस्य उत्पत्तिलक्षणस्य महाप्रलयोत्पत्तौ अव्याप्तिः इति आशङ्क्य आह – **उत्त्पत्तिलक्षणस्य क्षणाघटितस्यैव** इत्यादिना । स्ववृत्तिध्वंसप्रतियोगिकालावृत्तित्वे सति (घटे) स्ववृत्तित्वं उत्त्पत्तेः लक्षणम् । स्वपदद्वयं यत्समयवृत्तित्वम् उत्त्पत्तित्वेन अभिमतं तत्समयपरम् । अत्र घटोत्पत्तिप्राक्क्षणमादाय उत्पन्नघटस्य पुनरुत्पत्तिवारणाय स्ववृत्तित्वस्य संबन्धकोटौ प्रवेशः । द्वितीयादिक्षणसंबन्धस्यापि उत्पत्तिरूपत्वापत्तिवारणाय स्ववृत्तिध्वंसप्रतियो-गिकालावृत्तित्वस्य संबन्धकोटौ निवेशः । एवं च आद्यक्षणसंबन्ध एव उत्पत्तिः । तस्य तु क्षणत्वेन निवेशः नास्ति; किन्तु कालत्वेन निवेशः । अतः क्षणाघटितत्वम् अस्य उत्पत्तिलक्षणस्य । महाप्रलये क्षणव्यवहारः अस्ति इति पक्षे क्षणघटितमेव पूर्वोक्तम् उत्पत्तिलक्षणम् । तत्र महाप्रलयात्मकप्रथमक्षणे क्षणव्यवहारनियामकः उपाधिः नास्ति । स्वजन्यविभागप्रागभावावच्छिन्नकर्मण एव प्रथमक्षणव्यव-हारनियामकत्वात् महाप्रलयात्मकक्षणे कर्मणः अभावात्, तस्य नाशात् । अतः तत्र कथं क्षणव्यवहार इति शङ्का अवशिष्यते । सा च शङ्का **ध्वंसेनैव उपपादनीयः** इत्यनेन **मुक्तावलीग्रन्थेन** निराकृता । तदुपरि शङ्का भवति – ध्वंसस्य क्षणत्वे सृष्टिकालेऽपि ध्वंसरूपस्थूलकालस्य क्षणत्वेन व्यवहारापत्तेः । यदि च चरमध्वंस-व्यक्तेरेव तद्व्यक्तित्वेन क्षणत्वं, न अन्यध्वंसस्य इति उच्यते, तदा कुतः न

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अन्यध्वंसस्य तद्व्यक्तित्वेन क्षणव्यवहारविषयता, चरमध्वंसस्यैव तथात्वम् इत्यत्र बीजालाभः – इति । तद्वारणाय यथा नान्यध्वंसस्य तद्व्यक्तित्वेन क्षणव्यवहारविषयत्वं तथा विशेषणं प्रदर्शयति – स्ववृत्तिः इति । स्वं – महाप्रलयोत्पत्तिसमयः । स्ववृत्तिः यः ध्वंसः सर्वकार्याणां ध्वंसः । तत्प्रतियोगीनि यानि कार्याणि तत्प्रतियोगिकयावद्ध्वंस-विशिष्टसमयः महाप्रलयसमय एव भवति । महाप्रलयपूर्वकालीनसमयस्य स्ववृत्तिप्रतियोगिप्रतियोगिकयत्किञ्चिध्वंसविशिष्टत्वेऽपि यावद्ध्वंसविशिष्टत्वं नास्ति इति तद्व्यावृत्तिः ॥

॥ दिङ्निरूपणम् ॥

कारिकावली

दूरान्तिकत्वधीहेतुः एका विभ्वी दिगुच्यते ॥ ४६ ॥

मुक्तावली

दिशं निरूपयति – दूरान्तिक इति । दूरत्वमन्तिकत्वं च दैशिकं परत्वम् अपरत्वं बोध्यम् । तद्बुद्धेः असाधारणं बीजं दिगेव । दैशिकपरत्वापरत्वयोः असमवायिकारणसंयोगाश्रयतया लाघवात् एका दिक् सिद्ध्यति इति भावः ॥

दिनकरी

बीजं – प्रयोजकम् । कथं दिशः तत्र प्रयोजकत्वम्? तत् दर्शयति – दैशिकपरत्वापरत्वयोः इति । परत्वापरत्वबुद्धिं प्रति परत्वापरत्वे निमित्ते, "तत्र दिक्पिण्डसंयोगः", "तत्र दिक्" इति क्रमेण परम्परया दिशः तद्बुद्धौ निमित्तत्वं बोध्यम् । अत्रापि बुद्धिपर्यन्तानुधावनं दैशिकपरत्वापरत्वयोः प्रमाणं दर्शयितुम्, तादृशपरत्वापरत्वाभ्यामेव तदनुमितेः संभवात् इति ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

कारिकावली

उपाधिभेदात् एकापि प्राच्यादिव्यपदेशभाक् ।

मुक्तावली

ननु यदि एकैव दिक्, तदा प्राचीप्रतीच्यादिव्यवहारः कथम् उपपद्यते इति, अत आह – **उपाधिभेदात्** इति । **यत्पुरुषस्य** उदयगिरिसन्निहिता या दिक्, सा तत्पुरुषस्य प्राची । एवम् उदयगिरिव्यवहिता या दिक्, सा प्रतीची । एवं यत्पुरुषस्य सुमेरुसन्निहिता या दिक् सा उदीची । तद्व्यवहिता तु अवाची । ''सर्वेषामेव वर्षाणां मेरुः उत्तरतः स्थितः'' इति नियमात् ।।

दिनकरी

''प्रतीच्यादि'' इति ''आदि''ना उदीच्यादिपरिग्रहः । मूले **उपाधि** इति । वस्तुतः दिश एकत्वेऽपि तत्तदुपाधिभेदेन प्राच्यादिसंज्ञाभेदः इति भावः । प्राच्यादिसंज्ञासु निमित्तभूतान् उपाधीन् आह – **यत्पुरुषस्य** इति । **''पुरुषस्य''** इति पदार्थमात्रोपलक्षणम् । **पञ्चम्यर्थे षष्ठी** । दिक् – मूर्तम् । एवम् अग्रेऽपि । तथाच यदपेक्षया उदयगिरिसन्निहितं यन्मूर्तं सा ततः प्राची इत्यर्थः । तदपेक्षया उदयगिरिसन्निहितत्वं च तन्निष्ठोदयगिरिसंयुक्तसंयोगापेक्षया अल्पतरोदयगिरिसंयुक्त-संयोगवत्त्वम् । इत्थं च ''मथुरायाः प्राच्यः प्रयागः'' इत्यत्र मथुरानिष्ठोदयगिरिसंयुक्त-संयोगपर्याप्तसंख्याव्याप्यसङ्ख्यापर्याप्त्यधिकरणोदयगिरिसंयुक्तसंयोगवन्मूर्तवृत्तिः प्रयागः इति अन्वयबोधः । एवं ''काशीतः प्रतीच्यां प्रयागः'' इत्यत्र काशीनिष्ठो-दयगिरिसंयुक्तसंयोगपर्याप्तसङ्ख्याव्यापकसङ्ख्यापर्याप्त्यधिकरणोदयगिरिसंयुक्त-संयोगवन्मूर्तवृत्तिः प्रयागः । एवमन्यत्रापि बोधाः ऊहनीयाः । तन्निष्ठोदयाचलसंयुक्त-संयोगपरम्पराघटकं यत् मूर्तं तत् प्राची इत्यपि वदन्ति ।

दीधितिकृतस्तु दिक्कालौ न ईश्वरात् अतिरिच्येते, मानाभावात् । तत्तत्कालोपाधिदिगुपाधि-विशिष्टात् ईश्वरादेव क्षण-दिन-प्राची-प्रतीचीत्यादिव्यवहारोपपत्तेः इति आहुः ।

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

अत्र नव्याः – ईश्वरस्य दिक्कालरूपत्वं तत्तज्जीवस्य वा इति विनिगमनाविरहेण अतिरिक्तयोः तयोः स्वीकारः । न च – अत्र जीवस्य जगज्जनकत्वं परत्वापरत्वजनकत्वं च कल्प्यम्, ईश्वरस्य तु क्लृप्तम् इति लाघवम् इति – वाच्यम् । **संबन्धघटकयोः** दिक्कालयोः जगज्जनकत्वाकल्पनात्, दिक्कालोपाधीनामेव जगज्जनकत्वकल्पनात् परत्वापरत्वयोः **गुणत्वे एव मानाभावः**, सन्निकृष्टत्वविप्रकृष्टत्वाभ्यामेव परापरव्यवहारोपपत्तेः इति – वदन्ति ॥

राजीवोल्लासः

पञ्चम्यर्थे षष्ठी इति । ''अयम् अस्मात् सन्निहितः'' इत्यादिप्रयोगात् सन्निहितपदसमभिव्याहारे पञ्चम्यन्तप्रयोगस्यैव उचितत्वात् **यत्पुरुषस्य** इत्यत्र पञ्चम्यर्थे षष्ठी । अवधित्वं पञ्चम्यर्थः । तस्य सन्निहितपदार्थैकदेशसान्निध्ये निरूपकत्वसंबन्धेन अन्वयः । तथा च यत्पुरुषावधिकोदयगिरिसान्निध्यवती या दिक् सा तत्पुरुषस्य प्राची इत्यर्थः । **सा ततः प्राची इति** । तन्मूर्तावच्छिन्ना दिक् इत्यर्थः । **मथुरा निष्ठ इत्यादि** । मथुरानिष्ठः यः उदयगिरिसंयुक्तपदार्थसंयोगपरम्परा तत्पर्याप्ता या संख्या तद्व्याप्या-ततोन्यूना-या संख्या तत्पर्याप्त्यधिकरणं यः उदयगिरिसंयुक्तपदार्थसंयोगः तदाश्रयमूर्तवृत्तिः प्रयागः इत्यर्थः । काशीनिष्ठः यः उदयगिरिसंयुक्तसंयोगः तत्पर्याप्ता या संख्या तद्व्यापिका – तदधिका – या संख्या तत्पर्याप्त्यधिकरणभूतः यः उदयगिरिसंयुक्तसंयोगः तद्वन्मूर्तवृत्तिः प्रयागः । **एवम् अन्यत्रापि इति** । ''माहिष्मतीतः उत्तरस्यां अवन्तिका'' इत्यत्र माहिष्मतीनिष्ठमेरुसंयुक्तसंयोगपर्याप्तसंख्यान्यूनसंख्यापर्याप्त्यधिकरण मेरुसंयुक्तसंयोगवन्मूर्तवृत्तिः अवन्तिका इति बोधः । ''अवन्तिकातः दक्षिणायां माहिष्मती'' इत्यत्र अवन्तिकानिष्ठमेरुसंयुक्तसंयोगपर्याप्तसंख्याधिकसंख्यापर्याप्त्यधिकरणमेरुसंयुक्तसंयोगवन्मूर्तवृत्तिः माहिष्मती इति बोधः । **तन्निष्ठ इति** । यदपेक्षया प्राची सः तत्पदार्थः । तन्निष्ठः यः उदयगिरिसंयुक्तसंयोगः तत्परंपरायां घटकं यत् मूर्तं तत् तस्य प्राची इत्यर्थः ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

आहुः इत्यनेन दीधितिकारमते अस्वरसः सूचितः । तद्बीजं तु ''इदानीं'',''तदानीं'', ''प्राची'', ''प्रतीची'' इत्यादिव्यवहाराणां तत्तदुपाध्यवच्छिन्नेश्वरविषयकत्वे प्रत्येकं जीवमादाय तत्तदुपाध्यवच्छिन्नजीवविषयकत्वं वा तत्तदुपाध्यवच्छिन्नेश्वरविषयकत्वं वा इत्यत्र विनिगमनाविरहेण बहूनां ''इदीनीं'', ''तदानीम्'' इत्यादिव्यवहारविषयत्वकल्पने गौरवात्, लाघवात् अतिरिक्तस्य एकस्य कालस्य एकस्याः दिशश्च सिद्धिः । न च – कार्यसामान्यजनकत्वेन क्लृप्तस्य ईश्वरस्यैव कार्यसामान्यजनककालरूपता युक्ता, नतु जीवानाम् । जीवेषु कार्यसामान्यजनकतायाः अक्लृप्तत्वात् इति ईश्वरस्य कालत्वे विनिगमकम् अस्ति इति – वाच्यम् । कार्यसामान्यं प्रति ईश्वरीयकृतेरेव हेतुत्वेन क्लृप्तत्वात् कर्तुः ईश्वरस्य कार्यजनकत्वे प्रमाणाभावात् इति ।

एतादृशम् अस्वरसं स्पष्टीकर्तुं नव्यानां मतम् उपन्यस्यति – **अत्र नव्या** इति । **संबन्धघटकयोः** इति । स्वाश्रयतपनसंयोगिसंयोगघटकस्य कालस्य, मूर्तसंयोगिसंयोगघटकदिशश्च जगज्जनकत्वाकल्पनात् क्लृप्तस्य ईश्वरस्यैव जनकत्वम्, न तु कल्प्ययोः दिक्कालयोः इति शङ्कायाः नावकाश इति भावः । **गुणत्वे एव मानाभाव** इति । परत्वापरत्वयोः गुणत्वे सत्येव हि तदसमवायिकारणसंयोगाश्रयतया दिक्कालयोः सिद्धिः इति भावः ।

वदन्ति इति अस्वरसोद्भावनम् । नानोपाधीनां ज़गज्जनकत्वकल्पनापेक्षया कालदिशोः जगत्कारणत्वकल्पने लाघवात् ईश्वरस्य इव कालदिशोरपि जगत्कारणत्वस्य क्लृप्ततया कल्पनागौरवं नास्ति । एवं सन्निकृष्टत्वविप्रकृष्टत्वाभ्यां परापरव्यवहारस्वीकारे सन्निकृष्टत्वम् अल्पसंयुक्तसंयोगवत्त्वम्, विप्रकृष्टत्वं वहुतरसंयुक्तसंयोगवत्त्वम् इति वक्तव्यतया तद्घटकानां बहूनां संयोगानां परापरपदशक्यतावच्छेदकत्वस्वीकारे अतिगौरवापत्तेः । एवम् ''अयं परः'', ''अयम् अपरः'' इति लौकिकप्रत्यक्षानुपपत्तेश्च वहुभिः संयोगैः साकं इन्द्रियसन्निकर्षाभावात् इति ।।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ आत्मनिरूपणम् ॥

कारिकावली

आत्मेन्द्रियाद्यधिष्ठाता करणं हि सकर्तृकम् ॥ ४७ ॥

मुक्तावली

आत्मानं निरूपयति – **आत्मेन्द्रियाद्यधिष्ठाता** इति । आत्मत्वजातिस्तु सुखदुःखादिसमवायिकारणतावच्छेदकतया सिद्ध्यति ॥

दिनकरी

सुखदुःखादि इति । ''आदि''ना ज्ञानेच्छाद्वेषप्रयत्नधर्माधर्मभावनापरिग्रहः । यद्यपि आत्मत्वस्य अन्यात्मनि अप्रत्यक्षत्वेऽपि, स्वात्मनि **स्वरूपतः** मानसप्रत्यक्षविषयत्वम् अस्त्येव, तथापि **सकलात्मसाधारणानुगतप्रत्यक्षासंभवेन जातिरूपं तत् न सिद्ध्यति** । अनेकसमवेतत्वघटितजातित्वग्रहे अनेकव्यक्तिग्रहहेतुत्वस्य सर्वसिद्धत्वात् इति अनुमानमेव तत्र प्रमाणम् इत्यभिप्रायेण सुखदुःखादिसमवायिकारणतावच्छेदकतया तत्सिद्धिः प्रदर्शिता ।

अथ सुखत्वाद्यवच्छिन्नं प्रति आत्मत्वेन कारणत्वे मानाभावः । सुखदुःखद्वेषभावनाधर्माधर्मान् प्रति **यथाक्रमं** धर्माधर्मानिष्टसाधनत्वज्ञानानुभवविहितनिषिद्धकर्मणां समवायसंबन्धेन निमित्तकारणत्वावश्यकतया अतिप्रसङ्गाभावात्, **भावकार्याणां** समवायिकारणकत्वनियमस्य तु द्रव्यत्वेन तत्तद्व्यक्तिसमवेतं प्रति तत्तद्व्यक्तित्वेनैव वा समवायिकारणत्वमादायैव उपपन्नत्वात् इति चेत् –

अत्र **प्राञ्चः** – **कार्यमात्रवृत्तिजातेः** कार्यतावच्छेदकत्वनियमात् तादृशकार्यकारणभावस्य आवश्यकत्वात् । **न च** – तावता सुखत्वाद्यवच्छिन्नं प्रति सत्त्वेन द्रव्यत्वेन वा कारणत्वम् अस्तु, अदृष्टादेः निमित्तकारणत्वादेव अतिप्रसङ्गविरहात् इति – **वाच्यम्** । **व्याप्यलघुभूतधर्मे** कारणतावच्छेदके संभवति व्यापकधर्मेण कारणत्वकल्पनाया अन्याय्यत्वात् इति – **आहुः** ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

वस्तुतस्तु मनसि ज्ञानोत्पत्तिवारणाय ज्ञानत्वावच्छिन्नं प्रति आत्मत्वेन हेतुत्वम् आवश्यकम् इति ।।

राजीवोल्लासः

स्वरूपत इति । स्वांशे किञ्चिद्धर्माप्रकारकेत्यर्थः । तस्य मानसप्रत्यक्षेऽन्वयः । **सकलात्मसाधारण इति** । सकलात्मविशेष्यकात्मत्वप्रकारकप्रत्यक्षासंभवेन इत्यर्थः । यद्यपि स्वात्मविशेष्यकात्मत्वप्रकारकप्रत्यक्षं संभवति, तथापि स्वात्मातिरिक्तात्मनां स्वकीयमानसप्रत्यक्षविषयत्वाभावात् तद्विशेष्यकात्मत्वप्रकारकमानसप्रत्यक्षं न संभवति इति स्वात्मव्यतिरिक्तेषु आत्मसु आत्मत्वजातिः मानसप्रत्यक्षेण न सिद्ध्यति इति भावः । **जातिरूपं तत् न सिद्ध्यति इति** । यद्यपि स्वात्मविशेष्यकात्मत्वप्रकारक-मानसप्रत्यक्षसंभवेन आत्मत्वं मानसप्रत्यक्षेण सिद्ध्यति, तथापि जातित्वेन रूपेण आत्मत्वं न सिद्ध्यति । जातित्वं हि नित्यत्वे सति अनेकसमवेतत्वम् । तद्घटकस्य अनेकसमवेतत्वस्य ग्रहे अनेकव्यक्तीनां ग्रहस्य हेतुत्वात् अनेकात्मव्यक्तीनां प्रत्यक्षमन्तरा अनेकात्मसमवेतत्वघटितजातित्वप्रत्यक्षं न संभवति । तथा च स्वातिरिक्तानाम् आत्मनां प्रत्यक्षं विना आत्मत्वस्य जातिरूपत्वे प्रत्यक्षं न भवति इत्याशयेन आत्मत्वस्य जातित्वे अनुमानप्रमाणमुपन्यस्तम् मुक्तावल्याम् इति भावः । अनुमानप्रयोगस्तु – "समवायसंबन्धावच्छिन्न-सुखत्वदुःखत्वाद्यवच्छिन्न-कार्यतानिरूपित-तादात्म्यसंबन्धावच्छिन्नात्मनिष्ठकारणता, किञ्चिद्धर्मावच्छिन्ना, कारणतात्वात्" इति ।

आत्मनः सुखदुःखादिकं प्रति समवायिकारणत्वे मानाभावः । न च – आत्मभिन्नेऽपि सुखादीनाम् उत्पत्तिः स्यात् । आत्मनः समवायिकारणत्वे तु आत्मभिन्ने उत्पत्तिः न भवति इति – वाच्यम् । आत्मभिन्ने शरीरादौ सुखदुःखादि-निमित्तकारणभूतानां धर्माधर्मादीनां अभावादेव सुखदुःखाद्यनुत्पत्तेः इत्याशयेन शङ्कते – **अथ सुखदुःखाद्यवच्छिन्नं प्रति इति** । **यथाक्रमम् इति** । सुखस्य धर्मः,

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

दुःखस्य अधर्मः, द्वेषस्य अनिष्टसाधनत्वज्ञानम्, भावनायाः अनुभवः, धर्मस्य विहितकर्म, अधर्मस्य निषिद्धकर्म च समवायसंबन्धेन निमित्तकारणम् इति भावः । तथा च निमित्तकारणानां समवायसंबन्धेन आत्मन्येव सत्त्वात् तत्रैव सुखादीनाम् उत्पत्तिः न अन्यत्र इति आत्मनः सुखादिकं प्रति समवायिकारणत्वं मास्तु इति भावः ।

ननु भावकार्याणां ससमवायिकारणकत्वं – समवायिकारणजन्यत्वम् इति नियमात् सुखादिभावकार्याणां आत्मसमवायिकारणकत्वं आवश्यकम् इति आशङ्क्य आह – **भावकार्याणाम्** इति । सुखादिकं प्रति आत्मनां द्रव्यत्वेन वा तद्व्यक्तित्वेन वा समवायिकारणत्वम्, न तु आत्मत्वेन रूपेण । तथा च आत्मनः समवायिकारण-त्वेऽपि आत्मत्वजातिः न सिद्ध्यति, तस्य समवायिकारणतावच्छेदकत्वाभावात् इति भावः ।

कार्यमात्रवृत्तिजातेः इति । ''कार्यमात्रवृत्तिजातेः कार्यतावच्छेदकत्वम्'' इति नियमात् कार्यमात्रवृत्तिसुखत्वदुःखत्वादीनां यत्किञ्चिन्निष्ठकारणता-निरूपितकार्यतावच्छेदकत्वं वक्तव्यम् । अतः सुखत्वादेः आत्मत्वावच्छिन्नकारणता-निरूपितकार्यतावच्छेदकत्वनिर्वाहाय सुखत्वाद्यवच्छिन्नं प्रति आत्मत्वेन कारणत्वं कल्पनीयम् इति भावः । **न च तावता** इति । कार्यमात्रवृत्तिजातेः कार्यतावच्छेद-कत्वेऽपि सुखत्वाद्यवच्छिन्नं प्रति सत्त्वेन द्रव्यत्वेन वा कारणत्वं स्वीकृत्य सत्त्वद्रव्यत्वावच्छिन्नकारणतानिरूपितकार्यतावच्छेदकत्वम् एव सुखत्वादेः अस्तु, आत्मातिरिक्तद्रव्ये अदृष्टादिरूपनिमित्तकारणविरहादेव सुखाद्युत्पत्तिप्रसङ्गाभावात् इति भावः ।

व्याप्यलघुभूतधर्मे इति । व्याप्यः लघुभूतश्च यः धर्मः तस्य कारणताव-च्छेदकत्वे संभवति व्यापकस्य धर्मस्य कारणतावच्छेदकत्वं न युक्तम् । द्रव्यत्वं तु व्यापकम्, आत्मत्वं व्याप्यम् । अतः व्याप्यस्य आत्मत्वस्यैव सुखादिकारण-

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

तावच्छेदकत्वम् । तत्तद्व्यक्तित्वस्य व्याप्यत्वेऽपि अनेकेषां तत्तद्व्यक्तित्वानां कारणतावच्छेदकत्वं कल्पनीयम् इति गौरवम् ।

सुखादिकं प्रति द्रव्यत्वेन कारणत्वे अनुपपत्यन्तरम् आह – **वस्तुतस्तु** इति । द्रव्यत्वस्य मनस्यपि सत्त्वात् तत्र ज्ञानोत्पत्तिवारणाय ज्ञानत्वावच्छिन्नं प्रति आत्मत्वेन हेतुत्वम् आवश्यकम् । मनसि आत्मत्वविरहात् न ज्ञानोत्पत्यापत्तिः । तथा च ज्ञानत्वावच्छिन्नसमवायिकारणतावच्छेदकतया आत्मत्वजातिसिद्धिः इति भावः । **ज्ञानोत्पत्तिवारणाय** इत्येतत् सुखाद्युत्पत्तिवारणस्यापि उपलक्षणम् इति प्रतिभाति ।।

मुक्तावली

ईश्वरेऽपि सा जातिः अस्त्येव । अदृष्टादिरूपकारणाभावात् न सुखाद्युत्पत्तिः । नित्यस्य स्वरूपयोग्यत्वे फलावश्यम्भावः इत्यस्य **अप्रयोजकत्वात्** ।

परे तु – ईश्वरे सा जातिः नास्त्येव, प्रमाणाभावात् । न च – दशमद्रव्यत्वापत्तिः, ज्ञानवत्त्वेन विभजनात् इति – आहुः ।

इन्द्रियाद्यधिष्ठाता – इन्द्रियाणां शरीरस्य च परम्परया चैतन्यसंपादकः । यद्यपि आत्मनि ''अहं सुखी, दुःखी'' इत्यादि प्रत्यक्षविषयत्वम् अस्त्येव, तथापि **विप्रतिपन्नं प्रति** प्रथमत एव शरीरादिभिन्नः तत्प्रतीतिगोचरः इति प्रतिपादयितुं न शक्यते, इत्यतः प्रमाणान्तरं दर्शयति – **करणम्** इति । वास्यादीनां छिदादिकरणानां कर्तारम् अन्तरेण फलोपधानं न दृष्टम्, एवं चक्षुरादीनां ज्ञानकरणानामपि फलोपधानं कर्तारम् अन्तरेण न उपपद्यते इति अतिरिक्तः कर्ता कल्प्यते ।।

दिनकरी

ननु तथापि आत्मत्वजातेः भगवदात्मसाधारण्ये मानाभाव इति, अत आह – **ईश्वर** इति । ''आत्मा वा अरे द्रष्टव्यः'' इत्यादिश्रुतौ आत्मपदव्यवहारात् इति भावः । ननु तर्हि ईश्वरे सुखाद्युत्पत्तिः कुतः न भवति? इति, अत आह –

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अदृष्टादि इति । ''आदि''ना शरीरपरिग्रहः ।

ननु तथापि नित्यस्य **स्वरूपयोग्यत्वे फलावश्यंभाव** इति नियमेन ईश्वरस्य स्वरूपयोग्यत्वे फलोपधानापत्तिः इति, अत आह – **नित्यस्य** इति । **अप्रयोजकत्वात्** इति । जलपरमाणौ स्नेहानुत्पत्त्या तादृशनियमे मानाभावात् इति भावः ।

ननु ईश्वरे अदृष्टं कुतः न उत्पद्यते? इति चेत्, न । मिथ्याज्ञानरूपकारणाभावात् । मिथ्याज्ञानस्य अहेतुत्वे च मुक्तात्मन्यपि अदृष्टोत्पत्तिप्रसङ्गः । **वेदस्थ''आत्म''पदादेः** ज्ञानादिमति लक्षणापत्तिः इति अस्वरसः **आहुः** इत्यनेन सूचितः ।

''**इन्द्रियाद्यधिष्ठाता**'' इति मूलम् आत्मनि प्रमाणपरतया व्याचष्टे – **इन्द्रियाणाम्** इति । ''आदि'' पदसंग्राह्यम् आह – **शरीरस्य** इति । **परम्परया** – **जनकतासंबन्धेन** अवच्छेदकतासंबन्धेन वा । **चैतन्यं** – ज्ञानवत्त्वम् ।

एतेन आत्मनि प्रमाणं दर्शितम् – ''अचेतनं चेतनाधिष्ठिततया कार्यं करोति'' इति व्याप्तेः । ''अहं सुखी'' इत्यादिना ''अहं जानामि'' ''अहं करोमि'' इत्यादिपरिग्रहः । न च – आत्मा तावत् न प्रत्यक्ष इति **सूत्रभाष्यविरोधः** इति – वाच्यम् । **आत्मतत्त्वविवेके** परात्माभिप्रायेण भाष्यव्याख्यानस्य प्रदर्शितत्वात् । **विप्रतिपन्नं प्रति** इति । ''अहम्'' इति प्रतीतेः शरीराद्यतिरिक्तविषयकत्वे विप्रतिपन्नं प्रति इत्यर्थः ।।

राजीवोल्लासः

ईश्वरे ज्ञानसुखादीनाम् अनुत्पत्तेः तत्समवायिकारणतावच्छेदकीभूतात्मत्वजातेः ईश्वरात्मवृत्तित्वे प्रमाणाभावात् इत्याशङ्क्य ईश्वरात्मनि आत्मत्वजातिसत्त्वेऽपि सुखदुःखाद्युत्पत्तिकारणीभूतादृष्टाद्यभावात् न ईश्वरे सुखाद्युत्पत्त्यापत्तिः इति मूले समाहितम् । तावतापि ईश्वरे आत्मत्वसद्भावे प्रमाणानुपन्यासात् आह – **आत्मा वा अरे द्रष्टव्यः** इति । ईश्वरात्मन्यपि आत्मपदप्रयोगात् आत्मपदप्रवृत्तिनिमित्तभूता

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

आत्मत्वजातिः अस्ति इति भावः । अनेन आत्मपदशक्यतावच्छेदकतया आत्मत्वजातिसिद्धिः इत्यपि सूचितम् । **स्वरूपयोग्यत्वे** इति । कारणतावच्छेदकधर्मवत्त्वे इत्यर्थः ।

फलावश्यंभाव इति । कार्योत्पत्तेः आवश्यकत्वम् इत्यर्थः । "यत्र यत्र स्वरूपयोग्यत्वं तत्र कार्योत्पत्तिः" इति नियमः व्यभिचरितः इति आशयेन **मुक्तावल्याम् अप्रयोजकत्वात्** इति उक्तम् । व्यभिचारं प्रदर्शयति – **जलपरमाणौ** इति । जलपरमाणौ नित्ये स्नेहसमवायिकारणतावच्छेदकजलत्वजातिमत्वरूपस्य स्वरूपयोग्यत्वस्य सत्त्वेऽपि तत्र स्नेहानुत्पत्या कार्योत्पत्तिव्यभिचारित्वं स्वरूपयोग्यत्वस्य इति तात्पर्यम् ।

वेदस्थात्मपदादेः इति । ज्ञानवत्त्वेन आत्मनः विभागं स्वीकृत्य ईश्वरे आत्मत्वजात्यनङ्गीकारे **"आत्मा वा अरे द्रष्टव्यः"** इति वेदे ईश्वरपरस्य आत्मपदस्य ज्ञानवति लक्षणा स्यात् इति भावः । **जनकतासंबन्धेन** इति । इन्द्रियेषु जनकतासंबन्धेन ज्ञानवत्त्वस्य, शरीरे अवच्छेदकतासंबन्धेन ज्ञानवत्वस्य च संपादकः आत्मा इत्यर्थः ।

एतेन इति । आत्मनः उक्तपरंपरासंबन्धेन ज्ञानवत्त्वसंपादकत्वकथनेन आत्मनि प्रमाणं प्रदर्शितम् । तच्च प्रमाणं अनुमानात्मकम् । अनुमानं च – "इन्द्रियाणि ज्ञात्रधिष्ठितानि ज्ञानजनकानि, अचेतनत्वात्; यत्र यत्र अचेतनत्वं तत्र तत्र ज्ञात्रधिष्ठितत्वे सति कार्यजनकत्वम्" इति सामान्यमुखी व्याप्तिः । अचेतनस्य रथादेः ज्ञात्रधिष्ठितस्यैव कार्यजनकत्वदर्शनात् । ज्ञात्रधिष्ठितत्वं च ज्ञातृसहकृतत्वम् इति भावः ।

वस्तुतस्तु **"करणं हि सकर्तृकम्"** इत्यत्रैव अनुमानप्रमाणं प्रदर्श्यते इति **मुक्तावलीकारेण** उक्तत्वात् **"इन्द्रियाद्यधिष्ठाता"** इत्यत्र अनुमानप्रमाणप्रदर्शकत्वं **मुक्तावलीकारस्य** अनभिमतम् । अतः आत्मस्वरूपकथनमेव एतत् । इन्द्रियाणां

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

शरीरस्य च परंपरया चैतन्यवत्त्वसंपादकत्वं आत्मनः स्वरूपम् । "**आत्मेन्द्रियाद्यधिष्ठाता**" इत्यत्र आत्मपदेन आत्मत्वजातिमत्वं लक्षणम् इति सूचितम् । "**इन्द्रियाद्यधिष्ठाता**" इत्यनेन आत्मनः स्वरूपम् उच्यते । "**करणं हि सकर्तृकम्**" इत्यनेन आत्मनि प्रमाणम् उच्यते इति क्रमः **मुक्तावलीकारस्य** विवक्षितः ।

आत्मसाधकानुमानोपयोगिनी व्याप्तिः "**करणं हि सकर्तृकम्**" इत्यनेन प्रदर्श्यते – यत्र यत्र करणत्वं तत्र सकर्तृकत्वम् इति व्याप्तिः । एतादृशव्याप्तिमूलकम् अनुमानं तावत् – "इन्द्रियं सकर्तृकम्, फलोपधायकत्वात्मककारणत्वघटितकरणत्वात्, छेदनफलोपधायकवास्यादिवत्" । सकर्तृकत्वं च कर्तृप्रयोज्यत्वम् । कर्तृसहकृतत्वं इति यावत् । वास्यादीनां कर्तृसहकृतानाम् एव छेदनादिक्रियोपाधायककरणत्वं दृष्टम् । एवं चक्षुरादीनाम् अपि कर्तृसहकृतानामेव ज्ञानरूपफलोपधायककरणत्वम् संभवति इति कर्तुः आत्मनः सिद्धिः । इन्द्रियाणां करणत्वमेव असिद्धम् इति शङ्कापरिहाराय **मुक्तावल्यां** "**ज्ञानकरणानाम्**" इत्युक्तम् । अनेन इन्द्रियाणां करणत्वं धर्मिग्राहकप्रमाणसिद्धम् इति सूचितम् । धर्मिग्राहकप्रमाणं च "रूपाद्युपलब्धयः करणजन्याः, कार्यत्वात्, छेदनादिक्रियावत्" इति । तथा च इन्द्रियरूपधर्मिकग्राहकेन अनेन अनुमानेन इन्द्रियाणां करणत्वे सिद्धे करणत्वेन हेतुना कर्ता अनुमीयते इति सूचितम् । आत्मनि व्यभिचारवारणाय कारणत्वमात्रस्य हेतुत्वं परित्यज्य कारणत्वघटितकरणत्वस्य हेतुत्वोपन्यासः । व्यापारवत्कारणस्यैव करणत्वात् आत्मनः न करणत्वम् । इन्द्रियाणां तु सन्निकर्षरूपव्यापारद्वारा कारणत्वात् करणत्वम् । फलानुपधायके वास्यादौ स्वरूपयोग्यतारूपकारणत्वघटितकरणत्वस्य सत्त्वात् सकर्तृकत्वाभावाच्च व्यभिचारवारणाय फलोपधायकत्वरूपकारणत्वघटितस्य करणत्वस्य हेतुत्वेन उपन्यासः । अत्र साध्यमपि सकर्तृकत्वं न कृत्याश्रयसंबन्धवत्त्वमात्रम् । कृत्याश्रयविभ्वात्मसंबन्धस्य मूर्तमात्रे सिद्धत्वेन सिद्धसाधनतापत्तेः । किन्तु प्रकृतकार्योपधायककृतिकालीनत्वविशिष्टप्रकृतकार्योपधायककृत्यवच्छेदकशरीरसंबन्धवत्त्वम् । एवं च छिदिक्रियानुपधायकवास्यादौ

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

स्वरूपयोग्यतारूपकारणत्वघटितकरणत्वरूपहेतुमति कृतिकालीनत्वविशिष्ट-कृत्यवच्छेदकशरीरसंबन्धरूपसाध्याभावात् व्यभिचारवारणाय हेतौ फलोपधायकत्वरूपकरणतायाः निवेशः आवश्यक इति तात्पर्यम् ।

।। शरीरात्मवादिचार्वाकमतखण्डनम् ।।

कारिकावली

शरीरस्य न चैतन्यं मृतेषु व्यभिचारतः ।

मुक्तावली

ननु शरीरस्यैव कर्तृत्वम् अस्तु, अतः आह – शरीरस्य इति । ननु चैतन्यं ज्ञानादिकम् एव, मुक्तात्मनां त्वन्मत इव मृतशरीराणामपि तदभावे का क्षतिः? प्राणाभावेन ज्ञानाभावस्य सिद्धेः इति चेत्, न । शरीरस्य चैतन्ये, बाल्ये विलोकितस्य स्थाविरे स्मरणानुपपत्तेः, शरीराणाम् अवयवोपचयापचयैः उत्पादविनाशशालित्वात् । न च – पूर्वशरीरोत्पन्नसंस्कारेण द्वितीयशरीरे संस्कारः उत्पाद्यते इति – वाच्यम् । अनन्तसंस्कारकल्पने गौरवात् ।

एवं शरीरस्य चैतन्ये बालकस्य स्तन्यपाने प्रवृत्तिः न स्यात् । इष्टसाधनता-ज्ञानस्य तद्धेतुत्वात्, तदानीम् इष्टसाधनत्वानुभवाभावात् । मन्मते तु जन्मान्तरानुभूतेष्टसाधनत्वस्य तदानीं स्मरणादेव प्रवृत्तिः । न च – जन्मान्तरानुभूतम् अन्यदपि स्मर्यताम् इति – वाच्यम् । उद्बोधकाभावात् । अत्र तु अनायत्या जीवनादृष्टमेव उद्बोधकं कल्प्यते । इत्थं च संसारस्य अनादितया आत्मनः अनादित्वसिद्धौ अनादिभावस्य नाशासम्भवात् नित्यत्वं संभवति इति बोध्यम् ।।

दिनकरी

नैयायिकमते यथा मुक्तात्मनां ज्ञानाभावेन न ज्ञानाधिकरणत्वरूपं चैतन्यम्,

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

तथा ममापि मते मृतशरीरस्य न चैतन्यम् इति शरीरमेव आत्मा इति वादी **चार्वाकः** शङ्कते – **ननु चैतन्यम्** इति । **ज्ञानादिकं** – ज्ञानाद्यधिकरणत्वम् । **तदभावे** – ज्ञानाद्यभावे । ननु तव मते मृतशरीरे चैतन्याभावः किंनिबन्धनः? मन्मते तु प्राणविशिष्टात्मनः विरह एव तत्र प्रयोजक इति, अत आह – **प्राणाभावेन** इति । तथा च **लाघवात्** प्राणाभावः चैतन्यविरहे प्रयोजकः इति भावः ।

चार्वाकमतं परिहरति – **न** इति । **स्मरणानुपपत्तेः** इति । अनुभवाश्रयस्य बाल्यशरीरस्य तदानीम् अभावात् इति भावः । ननु बाल्यशरीरं तदा अस्त्येव इति, अत आह – **शरीराणाम्** इति । **संस्कार उत्पाद्यत** इति । **तथा च** स्वप्रयोज्यसंस्कारवत्त्वसंबन्धेन बाल्यशरीरसमवेतानुभवस्य स्थविरशरीरे सत्त्वात् न स्मरणानुपपत्तिः इति भावः । **गौरवस्य** फलमुखत्वात् दूषणान्तरम् आह – **एवम्** इति । **न स्यात्** इत्यत्र हेतुम् आह – **इष्ट** इति । **तद्धेतुत्वात्** – प्रवृत्तिहेतुत्वात् । **तदानीं** – स्तन्यपानप्रवृत्त्यव्यवहितपूर्वकाले । ननु प्रवृत्त्यन्यथानुपपत्तिः तवापि समाना इति आशङ्क्य स्वमते प्रवृत्त्यन्यथानुपपत्तिं परिहरति – **मन्मते तु** इति । **अन्यदपि** इति । इष्टसाधनत्वात् अन्यदपि इत्यर्थः । **अत्र तु** – स्तन्यपानप्रवृत्त्यनुकूलेष्टसाधनत्वस्मरणे तु ।

आत्मनः नित्यत्वं साधयति – **इत्थं च** इति । इत्थं च स्तन्यपानप्रवृत्त्यनुकूलेष्टसाधनतास्मरेण च । प्रागभावस्य नाशसम्भवात् आह – **भावस्य** इति । **नाशासम्भवात्** इति । **नाशं प्रति** जन्यभावत्वेन हेतुत्वात् आत्मनः अनादित्वेन जन्यभावत्वरूपहेतोः अभावेन नाशासंभवात् इत्यर्थः ।।

राजीवोल्लासः

लाघवात् इति । प्राणविशिष्टात्मविरहापेक्षया लघुत्वात् प्राणाभावस्यैव ज्ञानाभावे प्रयोजकत्वम् इति भावः ।

ननु पूर्वपूर्वशरीरनिष्ठसंस्कारेण उत्तरोत्तरशरीरे संस्कारोत्पत्तावपि न स्मरणस्य

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

उपपत्तिः, स्थविरशरीरे बालकशरीरगतस्य अनुभवस्य स्वजन्यसंस्कारवत्त्वसंबन्धेन विरहात् इति, अत आह – **तथा च** इति । स्वप्रयोज्यसंस्कारवत्त्वसंबन्धेन अनुभवः स्मरणं प्रति कारणम् । बालकशरीरगतस्य अनुभवस्य स्वजन्यसंस्कारसंबन्धेन तदनन्तरशरीरे एव सत्त्वेन स्थविरशरीरेऽभावेऽपि स्वप्रयोज्यसंस्कारवत्त्वसंबन्धेन स्थविरशरीरे सत्त्वात् न स्मरणानुपपत्तिः । जन्यजन्यस्यापि प्रयोज्यत्वात् इति भावः ।

गौरवस्य इति । अनेकसंस्कारव्यक्तिकल्पनरूपस्य गौरवस्य फलमुखत्वात् इति । फलं मुखं पूर्वकालीनं यस्य तत् फलमुखं तस्य भावः फलमुखत्वम् । प्रकृते च फलं विचारफलं शरीरस्य आत्मत्वनिश्चयः तन्मुखत्वात् – तदुत्तरकालीनत्वात् इत्यर्थः । तथा च शरीरस्य आत्मत्वे निश्चिते सति तदनन्तरम् अनेकसंस्कारकल्पनगौरवं ज्ञातं भवति, न तु शरीरस्य आत्मत्वनिश्चयात् पूर्वं गौरवज्ञानम् । तथा च उत्तरकालीनस्य गौरवज्ञानस्य पूर्वकालीनशरीरात्मनिश्चयाप्रतिबन्धकतया एतादृशगौरवं शरीरात्मत्वे न बाधकम् इति भावः ।

दूषणान्तरम् इति । शरीरस्य आत्मत्वे गौरवातिरिक्तं दूषणम् आह इत्यर्थः ।

मूले एवं शरीरस्य इत्यादि । शरीरस्य चेतनत्वस्वीकारे बालकस्य – सद्योजातस्य शिशोः स्तन्यपाने प्रवृत्तिः न स्यात्, प्रवृत्तिं प्रति "इदम् इष्टसाधनम्" इत्याकारकस्य इष्टसाधनत्वप्रकारकज्ञानस्य कारणत्वात् तदानीं अनुभवहेतोः अभावेन इष्टसाधनत्वानुभवात्मकस्य ज्ञानस्य असंभवात् । शरीरातिरिक्तात्मस्वीकारे तु बालात्मना जन्मान्तरे अनुभूतस्य इष्टसाधनत्वस्य इदानीं स्मरणादेव प्रवृत्तिः निर्वहति । न च – जन्मान्तरानुभूतस्य इदानीं स्मरणं भवति इति स्वीकारे जन्मान्तरानुभूतानाम् इष्टसाधनत्वातिरिक्तानाम् अपि स्मरणप्रसङ्गात् सर्वेषां जातिस्मरत्वं स्यात् इति – वाच्यम् । इष्टसाधनत्वविषयकसंस्कारस्यैव अदृष्टविशेषेण इदानीम् उद्बोधः । अतः

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

तदेव स्मर्यते । इतरविषयसंस्काराणां उद्बोधे कारणाभावात् इतरविषयाणां स्मरणं न भवति इति कल्पनात् । **अनायत्या** इत्यस्य अगत्या इत्यर्थः । इदानीम् इष्टसाधनत्वानुभवाभावेन अनुभवात् प्रवृत्तेः वक्तुम् अशक्यता स्मरणादेव स्तन्यपाने प्रवृत्तिः वक्तव्या । उद्बोधकाभावेन स्मरणमपि नास्ति इति स्वीकारे प्रवृत्त्यसंभवेन शिशुः शुष्ककण्ठः न जीवेत् । अतः शिशोः जीवनप्रयोजकम् अदृष्टं संस्कारम् उद्बोध्य स्तन्यपाने इष्टसाधनत्वं स्मारयति । तेन च तत्र बालस्य प्रवृत्तिः भवति इति जीवनान्यथानुपपत्तिरूपया अगत्या जीवनादृष्टं संस्कारोद्बोधकम् इति कल्प्यते । जन्मान्तरानुभूतानाम् इतरपदार्थानाम् अस्मरणेऽपि बालस्य जीवनोपपत्या इतरपदार्थस्मरणोपयोगिसंस्कारोद्बोधः न कल्प्यत इति भावः ।

संसारस्य अनादितया इति । संसारस्य अनादितया संसारिणः जीवस्य अनादित्वं सिद्ध्यति । जीवस्य अनादित्वे सिद्धे अनादेः भावपदार्थस्य नाशासंभवात् नित्यत्वम् – नाशशून्यत्वं सिद्ध्यति इति भावः । अनादेः प्रागभावस्य नाशसंभवात् **भावस्य** इति उक्तम् । **नाशं प्रति इति** । यत्र यत्र जन्यत्वे सति भावत्वं तत्र नाशप्रतियोगित्वम् । आत्मनि तु जन्यत्वविरहात् जन्यत्वे सति भावत्वरूपहेतोरभावात् नाशप्रतियोगित्वं नास्ति इति आत्मनः नित्यत्वम् इत्यर्थः ।।

।। इन्द्रियात्मवादिमतखण्डनम् ।।

कारिकावली

तथात्वं चेत् इन्द्रियाणाम् उपघाते कथं स्मृतिः ।। ४८ ।।

मुक्तावली

ननु चक्षुरादीनामेव ज्ञानादिकं प्रति कर्तृत्वं करणत्वं च अस्तु, विरोधे साधकाभावात्, अत आह – तथात्वम् इति । तथात्वम् – चैतन्यम् ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

उपघाते – नाशे सति । **अर्थात्** चक्षुरादीनामेव । **कथम्** इति । **पूर्वं चक्षुषा** साक्षात्कृतानां चक्षुरभावे स्मरणं न स्यात्, अनुभवितुः अभावात्, **अन्येन अनुभूतस्य** अन्येन स्मरणासंभवात्, **अनुभवस्मरणयोः सामानाधिकरण्येन** कार्यकारणभावात् इति भावः ।।

दिनकरी

ननु चक्षुरादीनामेव ज्ञानादिकं प्रति करणत्वं कर्तृत्वं च अस्तु इति । **करणत्वं** च व्यापारवत्त्वे सति कारणत्वम् । भवति हि चक्षुरादौ चक्षुःसंयोगादिरूप-व्यापारवति चाक्षुषज्ञानाव्यवहितपूर्वकालवृत्तित्वम् । **न तु फलोपहितत्वम्,** ''राजसूयेन स्वाराज्यकामः यजेत'' इत्यादौ यागादिनिष्ठकरणत्वादौ अप्रसङ्गात्, **करणत्वकारणत्वयोः अविशेषप्रसङ्गाच्च** । कर्तृत्वं च यद्यपि क्रियानुकूलकृतिमत्त्वं न संभवति अचेतने चक्षुरादौ, तथापि पूर्वपक्षिणा अतिरिक्तस्यात्मनः, कृत्यादीनाम् आत्मसमवेतत्वस्य च अनङ्गीकरणात् कृत्याश्रयत्वमपि चक्षुरादीनाम् अस्तु इत्यर्थः । ननु एकस्यैव कर्तृत्वे करणत्वे कर्तृकरणादिव्यवहारभेद अनुपपन्न इति, अत आह – **विरोध** इति । **विरोधे** – विभिन्नाधिकरणवृत्तित्वे । **तथा** च कर्तृत्वकरणत्वादि-लक्षणोपाधेः भेदात् कर्तृकरणादिव्यवहारभेदोपपत्तिः इत्याशयः । **''न चैतन्यम्''** इत्यत्र विशेष्यतया उपस्थितस्य अभावस्य तच्छब्देन परामर्शसंभवात् व्याचष्टे – **तथात्वं** – **चैतन्यम्** इति । **''उपघात'' पदस्य** लोके अवयवनाशे एव प्रयोगः, तदाह – **नाश** इति । मूले **''उपघाते कथं स्मृतिः''** इत्युक्तम्, तत्र उपघातः केषाम् इत्याकाङ्क्षायाः सत्त्वात् आह – **अर्थात्** इति । तथा च एकमेव **''इन्द्रियाणाम्''** इति पदम् आकाङ्क्षावशात् उभयत्र संबध्यते इत्याशयः । **''कथं स्मृतिः''**? इति मूलेन इन्द्रियाणां चैतन्यपक्षे स्मृत्यभाव आपादितः, तत्र हेतोः अनुक्तेः स्वयं हेतुं पूरयन् अर्थमाह – **पूर्वं चक्षुषा** इति । ननु इन्द्रियान्तरेणैव स्मृतिः भविष्यति इति, अत आह – **अन्येन अनुभूतस्य** इति । अत्र हेतुम् आह – **अनुभव** इति । यद्यपि व्यधिकरणयोः कार्यकारणभावविरहात्

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

"**सामानाधिकरण्येन**" इत्युक्तिः विफला, **तथापि** यत्र विषयतासंबन्धेन स्मृतिः तत्र विषयतासंबन्धेन अनुभवः इति ईदृशविषयत्वघटितसामानाधिकरण्यप्रत्यासत्त्या कार्यकारणभाव आवश्यकः, आत्मनिष्ठसामानाधिकरण्यघटितकार्यकारणभावेन घटाद्यनुभवोत्तरं पटादौ विषयतासंबन्धेन स्मृत्यापत्तेः अवारणात् इति । चक्षुःकर्तृकानुभवस्य घटे सत्त्वात् इन्द्रियान्तरकर्तृकं स्मरणं तत्र न अनुपपन्नम् इत्याशङ्कानिराकरणाय तथोक्तिः । समवायघटितसामानाधिकरण्यप्रत्यासत्त्या इति तदर्थः । चैत्रस्य घटानुभवकाले मैत्रस्य घटस्मरणवारणाय तत्तत्पुरुषीयत्वनिवेशे पुरुषभेदेन अनन्तकार्यकारणभावकल्पने गौरवात् समवायघटितसामानाधिकरण्य-प्रत्यासत्त्या तयोः हेतुहेतुमद्भावस्वीकारात् इति भावः इति ध्येयम् ॥

राजीवोल्लासः

"**ननु चक्षुरादीनाम् एव ज्ञानादिकं प्रति कर्तृत्वं करणत्वं च अस्तु**" इति मुक्तावल्याम् आशङ्कितम् । कर्तरि करणत्वासंभवात् कथम् इयम् आशङ्का संभवति । अतः कर्तुः करणत्वसंभवोपपादनेन आशङ्कां संगमयति "**करणत्वं कर्तृत्वं च**" इत्यादिना । व्यापारवत्त्वे सति कारणत्वं करणत्वम् । चक्षुरादीनां चक्षुस्संयोगादिरूपव्यापारवत्त्वे सति चाक्षुषज्ञानाद्यव्यवहितपूर्वकालवृत्तित्वरूप-कारणत्वसत्त्वात् करणत्वं संभवति । कर्तृत्वं च क्रियानुकूलकृतिमत्त्वम् अचेतने चक्षुरादौ यद्यपि न संभवति, तथापि चक्षुरादीन्द्रियाणामेव आत्मत्वं वदता पूर्वपक्षिणा कृत्याश्रयत्वमपि चक्षुरादीनां संमतम् । अतः कर्तृत्वं करणत्वं च एकस्यैव संभवति । विरुद्धयोः तयोः कथम् एकवृत्तित्वम् इति न आशङ्कनीयम् । तयोः भिन्नाधिकरण-वृत्तित्वरूपविरोधानङ्गीकारात् इति भावः । **न तु फलोपहितत्वम्** इति । करणत्वघटकं कारणत्वं न फलोपहितत्वरूपम् – न कार्याव्यवहितपूर्वक्षणवृत्तित्वरूपम् । "राजसूयेन स्वाराज्यकामो यजेत" इत्यादौ यागस्य फलाव्यवहितपूर्वक्षणवृत्तित्वाभावेन करणत्वानुपपत्तेः इत्यर्थः । ननु अव्यवहितपूर्वक्षणवृत्तित्वं कारणतावच्छेदकसंबन्धेन अवश्यं विवक्षणीयम् । अन्यथा संबन्धान्तरेण पूर्ववर्तिनि रासभादौ अतिव्याप्त्यापत्तेः ।

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

एवं च यागस्य स्वजन्यापूर्वसंबन्धेन कारणतया स्वजन्यापूर्वसंबन्ध एव कारणतावच्छेदकसंबन्धः । तेन संबन्धेन कार्याव्यवहितपूर्वक्षणवर्तित्वसत्त्वात् यागादौ न करणत्वस्य अनुपपत्तिः इत्यतः दोषान्तरम् आह – **करणत्वकारणत्वयोः अविशेषप्रसङ्गात्** इति । तथा च कारणत्वशरीरे फलोपहितत्वनिवेशेऽपि करणत्व-शरीरे तत् न निवेश्यते । किन्तु कार्याव्यवहितपूर्वकालवृत्तित्वमेव निवेश्यते । अतः कारणत्वकरणत्वयोः न अविशेषप्रसङ्गः । कारणत्वशरीरे क्षणत्वेन कालस्य करणत्वशरीरे कालत्वेन कालस्य च निवेशेन उभयोः भेदात् । तत्तु पूर्ववृत्तित्वम् न तु फलोपहितत्वम् इति भ्रमितव्यम् ।

व्यवहारभेदः इति । व्यवहारवैलक्षण्यम् इत्यर्थः । व्यवहारवैलक्षण्यं च व्यवहारनिमित्तयोः धर्मयोः विरोधे सत्येव भवितुम् अर्हति । न तु आनुपूर्वीभेदः अत्र भेदशब्दार्थः । एकार्थकयोरपि घटकुम्भशब्दयोः भेददर्शनात् असङ्गत्यापत्तेः ।

ननु कर्तृत्वकरणत्वयोः भिन्नाधिकरणवृत्तित्वाभावे कर्तृकरणपदयोः पर्यायतापत्तिः । एकार्थकत्वात् । न च इष्टापत्तिः । कर्तृपदप्रयोगस्थले करणपदाप्रयोगात् इति, अत आह – **तथा च** इति । कर्तृकरणयोः एकत्वेऽपि कर्तृत्वं करणत्वं च भिन्नधर्मौ । तद्भेदात् कर्तृकरणादिव्यवहारभेदः । घटकुम्भादिस्थले च घटत्वकुम्भत्व-धर्मयोरपि भेदाभावात् पर्यायत्वम् । तथा च एकार्थकत्वं न पर्यायत्वम्, किन्तु एकधर्मावच्छिन्नवाचकत्वमेव पर्यायत्वम् । घटकुम्भपदयोः घटत्वरूप – एकधर्माव-च्छिन्नवाचकत्वात् पर्यायत्वम् । कर्तृकरणपदयोस्तु कर्तृत्वकरणत्वयोः भिन्नतया कर्तृत्वकरणत्वरूपभिन्नधर्मावच्छिन्नवाचकतया न पर्यायत्वम् । तथा च "व्यवहारभेद" इत्यस्य कर्तृकरणशब्दयोः अपर्यायत्वम् इति फलितः अर्थः ।

ननु "तथात्वं चेत् इन्द्रियाणाम्" इत्यत्र तच्छब्देन किं परामृश्यते । न तावत् चैतन्यम् । सर्वनाम्नां पूर्वप्रकृतप्रधानपरामर्शित्वात्, "शरीरस्य न चैतन्यम्" इति पूर्वश्लोके नञर्थस्य अभावस्यैव प्रधानत्वात् । तस्यैव अत्र तच्छब्देन

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

परामर्शनीयत्वात् । अतः तथात्वं चैतन्यम् इति मुक्तावल्यां विवरणं न सङ्गच्छते इति आशङ्कते – **न च चैतन्यम् इत्यत्र** इति । **व्याचष्टे** इति । यद्यपि पूर्वप्रकृतः प्रधानभूतः नञर्थ एव "**तथात्वम्**" इत्यनेन परामर्शनीयः, तथापि चैतन्याभावरूपस्य नञर्थस्य परामर्शे सति इन्द्रियाणां चैतन्याभावश्चेत् उपधाते कथं स्मृतिः इत्यन्वयः न सङ्गच्छते । इन्द्रियाणां चैतन्याभावस्यैव इन्द्रियनाशे स्मरणाभावापादकत्वात् । अतः "**तथात्वम्**" इत्यनेन पूर्वश्लोके नञर्थे प्रतियोगितया विशेषणभूतं चैतन्यमेव परामृश्यते । इन्द्रियाणां चैतन्यं चेत् – ज्ञानवत्त्वं चेत् इन्द्रियाणां नाशे सति अनुभवरूपज्ञानाश्रयस्य इन्द्रियस्याभावात् स्मरणं कथं भवितुम् अर्हति इति आपादयितुं शक्यते । एवं च सर्वनाम्नां असति बाधके पूर्वप्रकृतप्रधानपरामर्शित्वम् इति न्यायः । प्रकृते तु अनन्वयरूपबाधकसत्त्वात् पूर्वप्रकृतम् अप्रधानं चैतन्यमेव परामृश्यते इत्यभिप्रायेण व्याचष्टे – **तथात्वं चैतन्यम्** इति भावः ।

उपघातपदस्य इति । लोके उपघातशब्दः अवयवनाशे एव प्रयुज्यते, न तु अवयविनाशे । मूले तु इन्द्रियरूपावयविनाशो विवक्षितः । न तु अवयवनाशः । अतः उपघातशब्दः अत्र लक्षणया नाशपरः, न तु अवयवनाशपरः इत्याशयेन **उपघाते – नाशे सति** इति व्याख्यातं मुक्तावल्याम् इति भावः ।

उभयत्र इति । **इन्द्रियाणाम्** इत्यस्य **तथात्वं, नाशे** इति उभयोः अन्वयः । इन्द्रियाणां तथात्वं चेत्, इन्द्रियाणां नाशे कथम् स्मृतिः इति श्लोकार्थः । **हेतुं पूरयन्** इति । स्मरणाभावे अनुभवितुः चक्षुषः अभावः हेतुः । तथा च अनुभवितुः अभावात् कथं स्मृतिः इति कारिकायाः अर्थः ।

अत्र हेतुम् आह इति । अत्र – अन्येन अनुभूतस्य अन्येन स्मरणासंभवे हेतुम् आह इत्यर्थः । अन्येन अनुभूतस्य अन्येन स्मरणाभावे अनुभवस्मरणयोः सामानाधिकरण्येन कार्यकारणभावः हेतुः इति मुक्तावल्याम् उक्तम् । तत्र सामानाधिकरण्येन इति किमर्थम्? व्यधिकरणयोः भिन्नाधिकरणे वर्तमानयोः

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

कार्यकारणभावविरहात् इति आशङ्कते – यद्यपि इति । समाधत्ते – तथापि इति । विषयनिष्ठप्रत्यासत्त्या कार्यकारणभावः आत्मनिष्ठप्रत्यासत्त्या कार्यकारणभाव इति ज्ञानयोः कार्यकारणभावः द्विविधः । विषयतासंबन्धेन स्मरणं प्रति विषयतासंवन्धेन अनुभवः कारणम् इति कार्यकारणभावः विषयतानिष्ठप्रत्यासत्त्या कार्यकारणभाव इति उच्यते । यथा पटविषयकस्मरणं प्रति पटविषयकानुभवः कारणम् । तत्र विषयतासंबन्धेन स्मरणं पटे वर्तते, तत्रैव विषयतासंवन्धेन अनुभवः वर्तत इति कार्यकारणयोः अनुभवस्मरणयोः विषयतासंवन्धेन पटरूपैकाधिकरणवृत्तित्वं भवति । समवायसंबन्धेन पटविषयकस्मरणं प्रति समवायसंवन्धेन पटविषयकः अनुभवः कारणम् इति कार्यकारणभावः आत्मनिष्ठप्रत्यासत्त्या कार्यकारणभाव इति उच्यते । समवायसंबन्धेन पटस्मरणं आत्मनि वर्तते । तत्रैव समवायसंवन्धेन पटानुभवः वर्तत इति कार्यकारणयोः अनुभवस्मरणयोः आत्मनि सामानाधिकरण्यम् ।

तत्र विषयनिष्ठप्रत्यासत्या कार्यकारणभावः अवश्यम् अङ्गीकरणीयः । आत्मनिष्ठप्रत्यासत्तिमात्रेण कार्यकारणभावस्वीकारे यस्मिन् आत्मनि घटानुभवः वर्तते तदात्मन्येव घटस्मरणं भवति । न तु अन्यस्मिन् आत्मनि इति आत्मान्तरे घटस्मरणवारणेऽपि समवायसंवन्धेन आत्मनि घटानुभवानन्तरं तदात्मगतस्मृतेः पटादौ विषयतासंवन्धेन आपत्तेः वारयितुम् अशक्यत्वात् । विषयनिष्ठप्रत्यासत्त्या कार्यकारणभावस्वीकारे तु विषयतासंवन्धेन स्मरणं प्रति विषयतासंवन्धेन अनुभवस्य कारणतया पटे विषयतासंवन्धेन अनुभवाभावात् विषयतासंवन्धेन स्मृतिः वारयितुं शक्यते । एवं च चक्षुषा घटानुभवानन्तरं चक्षुषः नाशेऽपि इन्द्रियान्तरकर्तृकं स्मरणं घटस्य भवितुम् अर्हति, घटे विषयतासंवन्धेन चक्षुः कर्तृकानुभवस्य सत्त्वात् तत्र विषयतासंवन्धेन इन्द्रियान्तरकर्तृकस्मरणस्य संभवात् । तथा च अन्येन अनुभूतस्य अन्येन स्मरणानुपपत्तिः नास्ति इति शङ्कां निराकर्तुं सामानाधिकरण्येन इति मुक्तावल्याम् उक्तम् । समवायघटितसामानाधिकरण्यसंबन्धेन अनुभवस्मरणयोः कार्यकारणभावोऽपि अवश्यं स्वीकरणीयः । विषयनिष्ठप्रत्यासत्त्या कार्यकारणभावमात्र-

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

स्वीकारे चैत्रस्य घटानुभवानन्तरं मैत्रस्य घटस्मरणप्रसङ्गः । विषयतासंबन्धेन चैत्रीयघटानुभवमैत्रीयघटस्मरणयोः घटे सत्त्वात् । आत्मनिष्ठप्रत्यासत्या कार्यकारणभावस्वीकारे तु समवायसंबन्धेन घटस्मरणं मैत्रे जायते, तत्र समवायसंबन्धेन चैत्रीयघटानुभवः नास्ति इति चैत्रस्य घटानुभवात् मैत्रस्य घटस्मरणं वारयितुं शक्यते । इत्थं च इन्द्रियात्मवादे चक्षुःकर्तृकानुभवस्य चक्षुष्येव समवायसंबन्धेन सत्त्वेन चक्षुषः नाशानन्तरं इन्द्रियान्तरेण घटादेः स्मरणं न स्यात् । तत्र अनुभवा-भावात् । न च – विषयनिष्ठप्रत्यासत्त्या कार्यकारणभावेऽपि चैत्रस्य घटानुभवोत्तरं मैत्रस्य घटस्मरणं आपादयितुं न शक्यते, विषयतासंबन्धेन तत्पुरुषीयस्मरणं प्रति विषयतासंबन्धेन तत्पुरुषीयानुभवः कारणमिति पुरुषविशेषं निरूप्य कार्यकारणभावस्य कल्पनात् । अतः आत्मनिष्ठप्रत्यासत्त्या कार्यकारणभावः मास्तु इति – वाच्यम् । पुरुषभेदेन अनन्तकार्यकारणभावकल्पने गौरवात् । आत्मनिष्ठप्रत्यासत्त्या कार्यकारणभावे तु कार्यकारणयोः शरीरे पुरुषविशेषानिवेशात् लाघवम् इति समुदायार्थः ।

वस्तुतस्तु – आत्मनिष्ठप्रत्यासत्या कार्यकारणभावस्वीकारेऽपि चैत्रस्य घटानुभवोत्तरं चैत्रस्य पटस्मरणवारणाय समवायसंबन्धेन तद्विषयकस्मरणं प्रति समवायसंबन्धेन तद्विषयकः अनुभवः कारणम् इति विषयविशेषान्निवेश्यैव कार्यकारणभावः वक्तव्यः । तत्र पुरुषाणाम् अपि विषयत्वात् विषयविशेषान् पुरुषविशेषांश्च निवेश्य कार्यकारणभावः कल्पनीय इति महागौरवम् । विषयनिष्ठप्रत्या-सत्या कार्यकारणभावे तु विषयतासंबन्धेन तत्पुरुषीयस्मरणं प्रति विषयतासंबन्धेन तत्पुरुषीयानुभवः कारणम् इति पुरुषविशेषमात्रनिवेशेन कार्यकारणभावः कल्प्यते । अनेन कार्यकारणभावेन अनुभवे यः विषयः भवति स एव स्मरणेऽपि विषयः इति विषयविशेषनिवेशस्य आवश्यकता नास्ति इति लाघवम् । तावतापि इन्द्रियात्मवादे विषयतासंबन्धेन तदिन्द्रियकर्तृकस्मरणं प्रति विषयतासंबन्धेन तदिन्द्रियकर्तृकः अनुभवः कारणम् इति पुरुषस्थाने इन्द्रियं निवेश्य कार्यकारणभावः कल्प्यते ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

तावतैव चक्षुषा अनुभूतस्य इन्द्रियान्तरेण स्मरणानुपपत्तिः उद्घाटयितुं शक्यते – इति अवधेयम् ।

।। मनआत्मवादिमतखण्डनम् ।।

कारिकावली

मनोऽपि न तथा, ज्ञानाद्यनध्यक्षं तदा भवेत् ।

मुक्तावली

ननु चक्षुरादीनां चैतन्यं मास्तु, मनसस्तु **नित्यस्य** चैतन्यं स्यात्, अत आह – **मनोऽपि** इति । **न तथा** – **न चेतनम्** । **ज्ञानादि** इति । **मनसः** अणुत्वात् प्रत्यक्षे महत्त्वस्य हेतुत्वात् मनसि ज्ञानसुखादिसत्त्वे तत्प्रत्यक्षानुपपत्तिः इत्यर्थः । **यथा च** मनसः अणुत्वं तथा **अग्रे वक्ष्यते** ।।

दिनकरी

इन्द्रियाणां चैतन्यपक्षे यः दोषः सः **अत्र कल्पे** नास्ति इति सूचयितुम् आह– **नित्यस्य** इति । ननु "तथा" इत्यत्र मूले तच्छब्देन पूर्वोपस्थितचैतन्यस्यैव परामर्शः स्यात्, तथा च **असङ्गतिः स्यात्**, अत आह – **न तथा** – **न चेतनम्** इति । **"अनध्यक्षं तदा भवेत्"** इति मूलेन मनसः चैतन्ये ज्ञानादेः अप्रत्यक्षत्वम् उक्तम्, तत्र हेतुं प्रदर्शयन् अर्थम् आह – **मनस** इति । **तत्प्रत्यक्ष** इति । ज्ञानादिप्रत्यक्षानुपपत्तिः इत्यर्थः । ननु मनसः अणुत्वमेव असिद्धम्, अत आह – **यथा च** इति । **अग्रे वक्ष्यत** इति । **"अयौगपद्यात् ज्ञानानां तस्य अणुत्वम् इहेष्यते"** इति ग्रन्थेन साधयिष्यते इत्यर्थः ।।

राजीवोल्लासः

अत्र कल्पे इति । मनसः चैतन्यम् इति पक्षे इत्यर्थः । **असङ्गतिः स्यात्**

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

इति । मनसः ज्ञानरूपत्वासंभवात् तच्छब्देन चैतन्यस्य परामर्शे ''मनः चैतन्यम्'' इति वाक्यार्थस्य असङ्गतिः इत्यर्थः । तच्छब्देन चेतनस्य परामर्शात् ''मनः चेतनं'' चैतन्याश्रयः इत्यर्थात् न असङ्गतिः इति भावः ।

ज्ञानादिप्रत्यक्षानुपपत्तिः इति । मनसः ज्ञानवत्त्वाङ्गीकारे ज्ञानादेः प्रत्यक्षं न स्यात् । गुणप्रत्यक्षं प्रति महत्त्वस्य सामानाधिकरण्यसंबन्धेन हेतुत्वात् मनसि महत्त्वं विना तद्गतस्य ज्ञानादिगुणस्य महत्त्वसामानाधिकरण्यविरहेण ज्ञानादेः प्रत्यक्षं न स्यात् । न च मनसः महत्त्वमेव अस्तु इति वाच्यम् । युगपज्ज्ञानानुत्पत्या मनसः अणुत्वस्य साधयिष्यमाणत्वात् ।।

।। क्षणिकविज्ञानात्मवादिमतखण्डनम् ।।

मुक्तावली

ननु अस्तु विज्ञानमेव आत्मा, तस्य स्वतः प्रकाशरूपत्वात् चेतनत्वम् । ज्ञानसुखादिकं तु तस्यैव आकारविशेषः । तस्यापि भावत्वादेव क्षणिकत्वम् । पूर्वपूर्वविज्ञानस्य उत्तरोत्तरविज्ञानहेतुत्वात् सुषुप्तावपि आलयविज्ञानधारा निराबाधैव, मृगमदवासनावासितवसन इव पूर्वपूर्वविज्ञानजनितसंस्काराणाम् उत्तरोत्तरविज्ञाने संक्रान्तत्वात् न अनुपपत्तिः स्मरणादेः इति चेत्, न । तस्य जगद्विषयकत्वे सर्वज्ञत्वापत्तिः । यत्किंचिद्विषयकत्वे विनिगमनाविरहः । सुषुप्तावपि विषयावभासप्रसङ्गश्च । तदानीं निराकारा चित्सन्ततिः अनुवर्तत इति चेत्, न । तस्याः प्रकाशत्वे प्रमाणाभावात् । अन्यथा घटादीनामपि ज्ञानत्वापत्तिः । न च – इष्टापत्तिः, विज्ञानव्यतिरिक्तवस्तुनः अभावात् इति – वाच्यम् । घटादेः अनुभूयमानस्य अपलपितुम् अशक्यत्वात् । आकारविशेष एव अयं विज्ञानस्य इति चेत्, – किमयम् आकारः अतिरिच्यते विज्ञानात्? तर्हि समायातं

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

विज्ञानव्यतिरिक्तेन । न अतिरिच्यते चेत्, तर्हि **समूहालम्बने** नीलाकारोऽपि पीताकारः **स्यात्** । **स्वरूपतः विज्ञानस्य अविशेषात्** । **अपोहरूपः** नीलत्वादिः विज्ञानधर्म इति चेत्, न । नीलत्वादीनां विरुद्धानाम् एकस्मिन् असमावेशात् । इतरथा विरोधावधारणस्यैव दुरुपपादत्वात् । न वा वासनासंक्रमः संभवति । **मातृपुत्रयोः** अपि वासनासंक्रमप्रसङ्गात् । **न च** – उपादानोपादेयभावः नियामक इति – वाच्यम् । वासनायाः संक्रमासंभवात् । **उत्तरस्मिन्** उत्पत्तिरेव **संक्रम** इति चेत्, न । **तदुत्पादकाभावात्** । **चितामेव** उत्पादकत्वे संस्कारानन्त्य-प्रसङ्गः । **क्षणिकविज्ञानेषु अतिशयविशेषः** कल्प्यत इति चेत्, न । मानाभावात् **कल्पनागौरवाच्च** ।।

दिनकरी

विज्ञानवादी शङ्कते – **ननु** इति । **विज्ञानमेव** इति । **आत्मनिरूपणस्य** प्रस्तुतत्वात् "आत्मा" इत्युक्तम्, वस्तुमात्रस्यैव तन्मते विज्ञानरूपत्वात् इति बोध्यम् । **अत्र विज्ञानत्वं** प्रमेयत्वस्य **सत्त्वस्य** वा व्यापकं न वा इति विप्रतिपत्तिः, **तत्र विधिकोटिः** योगाचारस्य निषेधकोटिः नैयायिकस्य इति बोध्यम् । **द्विविधं** विज्ञानम् – प्रवृत्तिविज्ञानम् आलयविज्ञानं च इति । तत्र "घटः" इति प्रवृत्तिविज्ञानम्, "अहम्" इति आलयविज्ञानम्, तदेवात्मा । **तस्य** – विज्ञानस्य । **ननु सुषुप्तौ आत्मा न सिद्ध्येत्**, पूर्वोत्पन्नविज्ञानस्य क्षणिकत्वेन नाशात् विज्ञानान्तरस्य च तदानीम् उत्पादकाभावात्, अत आह – **पूर्वपूर्व** इति । ननु विज्ञानस्य क्षणिकत्वेन तदाश्रितसंस्कारस्यापि क्षणिकत्वात् कालान्तरे स्मरणं न स्यात् इत्याशङ्कां परिहरति – **मृगमद** इति । विज्ञानस्य जगद्विषयकत्वं यत्किंचिद्विषयकत्वं वा अभिप्रेतम्, इति विकल्प्य आद्ये दूषणम् आह – **तस्य** इति । **तस्य** – विज्ञानस्य । **द्वितीये** आह – **यत्किंचित्** इति । आत्मस्वरूपविज्ञानस्य **सविषयत्वे** दूषणम् आह – **सुषुप्तौ** इति । शङ्कते – **तदानीम्** इति । **निराकारा** – निर्विषया । **चित्सन्ततिः** – विज्ञानसन्ततिः । **प्रकाशत्वे** – ज्ञानत्वे । ज्ञानत्वस्य विषयिताव्याप्यत्वात्

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

इति भावः । **अन्यथा – प्रमाणाभावेऽपि** तत्र ज्ञानत्वस्वीकारे । **आकारस्य** विज्ञानातिरिक्तत्वम् अनतिरिक्तत्वं वा इति विकल्प्य आद्ये दूषणम् आह – **तर्हि समायातम्** इति । द्वितीये तु आह – **समूहालम्बन** इति । ''नीलपीते'' इति समूहालम्बन इत्यर्थः । **स्यात्** इति । तदभिन्नाभिन्नस्य तदभिन्नत्वनियमात् इति भावः । एतदेव उपपादयति – **स्वरूपतः विज्ञानस्य** इति । विज्ञानस्वरूपस्य इत्यर्थः । **अविशेषात्** – एकत्वात् । ननु नीलाकारः पीताकारश्च अभिन्न एव, भेदप्रतीतिस्तु तद्धर्मयोः नीलत्वपीतत्वयोः भेदात् । न च तयोरपि विज्ञानस्वरूपत्वात् अभेदः, नीलत्वादेः अपारमार्थिकस्य पारमार्थिकविज्ञानेन अभेदासंभवात् इत्यभिप्रायवान् शङ्कते – **अपोहरूप** इति । **अनीलव्यावृत्तिरूप इत्यर्थः** । **इतरथा** – विरुद्धनीलत्वादीनाम् एकत्र समावेशे । ननु समूहालम्बने न नीलाकारः नवा पीताकारः अभ्युपेयते, परंतु चित्राकार एव इति न उक्तदोष इति **पूर्वोक्तवासनासंक्रमं मुख्यतया दूषयति – न वा** इति । **मातृपुत्रयोः** इति । मात्रा अनुभूतस्य गर्भस्थेन तनयेन स्मरणप्रसङ्गात् इति भावः । उपादानेन अनुभूतम् उपादेयेन स्मर्यते इत्यपि निरस्यति – **न च** इति । **शङ्कते – उत्तरस्मिन्** इति । **तदुत्पादक** इति । वासनोत्पादकेत्यर्थः । **चितामेव** इति । ज्ञानानामेव संस्कारोत्पादकत्वे तेषाम् आनन्त्यात् संस्कारानन्त्यापत्तिः इत्यर्थः । **शङ्कते – क्षणिक** इति । **अतिशयविशेषः** – शक्तिविशेषः । **उत्तरोत्तरविज्ञाननिष्ठसंस्कारानुकूलतया** इति शेषः । **गौरवात्** इति । ''स एव अयम्'' इत्यापामरप्रत्यभिज्ञानात् क्षणिकानन्तशक्तितत्प्रागभावध्वंसकल्पने गौरवात् इत्यर्थः ।।

राजीवोल्लासः

आत्मनिरूपणस्य इति । योगाचारमते वस्तुमात्रस्यैव विज्ञानरूपत्वात् ''विज्ञानमेव आत्मा'' इत्यनेन आत्मैव विज्ञानम् इति न उच्यते, किन्तु आत्मनः प्रकृतत्वात् आत्मा इति उक्तम् । तथा च वस्तुमात्रस्यैव ज्ञानरूपत्वात् आत्मापि ज्ञानरूप इति तात्पर्यम् । **विज्ञानमेव** इति ''एव''कारेण ज्ञातृत्वव्यवच्छेदः । तथा च योगाचारमते ज्ञानस्वरूपः आत्मा न तु ज्ञानाश्रयः । ज्ञानाश्रयत्वाभावे

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

कथम् आत्मनः चेतनत्वम्? ज्ञानाश्रयस्यैव चेतनपदार्थत्वात् इत्याशङ्कायां मुक्तावल्यां **"तस्य स्वतःप्रकाशरूपत्वात्, चेतनत्वम्"** इति उक्तम् । तथा च चेतनत्वं तन्मते न ज्ञानाधिकरणत्वम्, किन्तु स्वतःप्रकाशत्वम् । अन्यानधीनप्रकाशत्वम् इति भावः ।

ननु आत्मनः ज्ञानरूपत्वे "अहं जानामि" "अहं सुखी" इत्यादि ज्ञानादिविशिष्टत्वप्रत्ययः कथम् इत्यत्र आह – **ज्ञानसुखादिकं तु** इति । ज्ञानसुखादिकं तु विज्ञानस्यैव आकारविशेषः । तदभिन्नत्वे सति तद्भिन्नत्वेन भासमानत्वं तदाकारत्वम् । "घटः मृदाकारः" इति व्यवहारवत् । तथा च ज्ञानाभिन्नस्यापि ज्ञानसुखादेः ज्ञानभिन्नत्वेन भासमानतया ज्ञानाकारत्वात् "अहं जानामि", "अहं सुखी" इत्यादि विशिष्टप्रत्ययस्य न अनुपपत्तिः । न च ज्ञानस्य साकारत्वे मृदादिवत् विकारित्वप्राप्त्या अनित्यत्वापत्तिः इत्यत्र इष्टापत्तिम् आह – **तस्यापि भावत्वादेव** इति । "अपि" शब्दः घटादेः सर्वस्य सङ्ग्राहकः । भावत्वं नाम सत्त्वम् । सत्त्वं नाम अर्थक्रियाकारित्वम् । "यत् अर्थक्रियाकारि तत्सर्वं क्षणिकम्" इति व्याप्तिः । तथा हि – यत्किञ्चित् अर्थकरणे समर्थं वस्तु स्वोत्तरक्षणे एव स्वकार्यं सर्वं जनयेत् । विलम्बे मानाभावात् । असमर्थं चेत् कालान्तरेऽपि न जनयेत् । स्वभावस्य अनतिक्रमात् । अतः तत्तद्वस्तूत्पत्तितृतीयक्षणे अर्थक्रियायाः अनुत्पत्या तत्तद्वस्तुनः द्वितीयक्षणावस्थाने प्रमाणाभावात् एकक्षणमात्रवृत्तित्वरूपं क्षणिकत्वं सिद्ध्यति । अर्थक्रियोत्पत्तेः पूर्वक्षणे तु एतद्घटजातीयः अन्यो घटः उत्पद्यते । तावत्पर्यन्तं एतद्घटस्य स्थितिः न अपेक्षिता इति क्षणिकत्ववादिनां तात्पर्यम् ।

विज्ञानात्मवादिमतविचारे प्रसक्ते तद्विचाराङ्गभूतां विप्रतिपत्तिं दर्शयति दिनकर्याम् – **अत्र विज्ञानत्वम्** इत्यादिना । **तत्र विधिकोटिः** इति । विज्ञानत्वं प्रमेयत्वव्यापकं इति कोटिः योगाचारस्य । तन्मते प्रमेयसामान्यस्य विज्ञानरूपत्वात् ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

विज्ञानत्वं प्रमेयत्वव्यापकं न भवति इति निषेधकोटिः नैयायिकस्य । तन्मते प्रमेयसामान्यस्य ज्ञानरूपत्वानङ्गीकारात् । **सत्त्वस्य** इति । सत्त्वं नाम कालसंबन्धित्वम् ।

तत्र अयं घटः इति । ''घटः'' इत्याकारकं ज्ञानं प्रवृत्तिविज्ञानम्, ''अहम्'' इत्याकारकं ज्ञानम् आलयविज्ञानम् इति तेषां सिद्धान्तः । आलयविज्ञानमेव तन्मते आत्मा ।

ननु सुषुप्तौ आत्मा न सिद्ध्येत् इति । सुषुप्तेः पूर्वम् उत्पन्नस्य ''अहम्'' इत्याकारकस्य आलयविज्ञानस्य क्षणिकत्वेन नाशात् ज्ञानान्तरोत्पादकसामग्र्यभावाच्च सुषुप्तौ आत्मा न सिद्ध्येत् इति आशङ्क्य पूर्वपूर्वविज्ञानस्य उत्तरोत्तरविज्ञानहेतुत्वात् सुषुप्त्यवस्थायामपि क्षणिकविज्ञानधारा वर्तत एव । अतः सुषुप्तौ न आत्माभावः इति समाधत्ते **मुक्तावल्याम्** इति भावः ।

सविषयत्वे दूषणम् आह इति । ज्ञानं सविषयकं वा निर्विषयकं वा । सविषयकत्वेऽपि जगद्विषयकं वा यत्किञ्चिद्विषयकं वा । आद्ये सर्वज्ञत्वापत्तिः । द्वितीये विनिगमनाविरहः इति मूले उक्तम् । अनुभवबलात् तत्तद्विषयकत्वम् इति स्वीकारे न द्वितीयकल्पे विनिगमनाविरहः इति शङ्कायां ज्ञानस्य सविषयकत्वमेव दूषयति **सुषुप्तावपि** इत्यनेन इति भावः । ज्ञानस्य सविषयकत्वे सुषुप्तावपि विषयावभासप्रसङ्गात् ज्ञानस्य सविषयकत्वपक्षः न युक्तः इति भावः । निर्विषयकत्वरूपं द्वितीयकल्पमपि दूषयति **मुक्तावल्याम् तदानीं निराकारा** इति । ज्ञानं सुषुप्तिकाले निर्विषयकम्, अन्यदा तु सविषयकम् । अतः न काचित् अनुपपत्तिः इति आशङ्क्य निर्विषयकस्य ज्ञानस्य ज्ञानत्वे प्रमाणं नास्ति, ज्ञानत्वस्य सविषयकत्वव्याप्यत्वात् । तथा च ज्ञानं सर्वदैव सविषयकम् न तु कदाचिन्निर्विषयकम् इति भावः ।

प्रमाणाभावे अपि इति । ज्ञानत्वे प्रमाणं सविषयकत्वम् । सविषयकत्वस्य अभावेऽपि ज्ञानत्वस्वीकारे निर्विषयकस्यापि ज्ञानत्वस्वीकारे निर्विषयकस्य घटादेरपि

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

ज्ञानत्वापत्तिः । न च – तन्मते घटादीनां ज्ञानत्वम् इष्टमेव । ज्ञानातिरिक्तवस्तुनः अभावात् इति – वाच्यम् । ज्ञानातिरिक्ततया अनुभूयमानस्य घटादेः अपलपितुम् अशक्यत्वात् इति भावः ।

आकारस्य इति । ''घटादिः विज्ञानस्य आकारः'' इति स्वीकारे अयमाकारः विज्ञानातिरिक्तो वा तदनतिरिक्तो वा? आद्ये विज्ञानातिरिक्ताकारस्वीकारात् सर्वं विज्ञानरूपम् इति स्वसिद्धान्तविरोधः । द्वितीये घटाद्याकारास्य विज्ञानानतिरिक्तत्वे ''नीलपीते'' इति समूहालम्बनज्ञाने भासमानयोः नीलपीताकारयोः ज्ञानानतिरिक्तत्वात् नीलपीतयोरपि ऐक्यं स्यात् । तदभिन्नाभिन्नस्य तदभिन्नत्वम् इति नियमात् नीलाभिन्नज्ञानाभिन्नस्य पीतस्य नीलाभिन्नत्वनियमात् ।

अनीलव्यावृत्तिरूप इति । नीलभेदाभावरूप इत्यर्थः । **पूर्वोक्तवासनासङ्क्रमम्** इति । पूर्वपूर्वविज्ञानजनितसंस्काराणां उत्तरोत्तरविज्ञाने संक्रान्तत्वात् इति पूर्वोक्तं वासनासंक्रमं मुख्यतया दूषयति इति अर्थः ।

मुक्तावल्यां तदुत्पादकाभावात् इति । अनुभवस्यैव संस्कारोत्पादकत्वात् उत्तरविज्ञानेषु च अनुभवाभावात् इति भावः ।

उत्तरोत्तरविज्ञाननिष्ठसंस्कारानुकूलतया इति । तथा च यदा यदा यत्स्मरणम् अनुभवसिद्धं तदा तदा तज्ज्ञानेषु स्मरणोपयोगि संस्कारानुकूला शक्तिः अङ्गीक्रियते । अतः न स्मरणानुपपत्तिः इति आशङ्कायां प्रतिक्षणं उत्पद्यमानानां ज्ञानव्यक्तीनां भेदेन तद्गतशक्तेरपि भिन्नतया ज्ञानभेदेन अनन्तशक्तिकल्पनागौरवम् इति मूले दोषः प्रदर्शितः ।।

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

।। क्षणिकशरीरात्मवादिमतखण्डनम् ।।

मुक्तावली

एतेन क्षणिकशरीरेष्वेव चैतन्यं प्रत्युक्तम्, गौरवात् अतिशये मानाभावाच्च । **बीजादौ अपि सहकारिसमवधानासमवधानाभ्यामेव उपपत्तेः कुर्वद्रूपत्वाकल्पनात्** ।।

दिनकरी

ननु **क्षेत्रस्थबीजात्** अङ्कुरोत्पत्तिः, न कुसूलस्थबीजात् । अतः अङ्कुरत्वावच्छिन्नं प्रति कुर्वद्रूपत्वेन हेतुत्वम् अङ्गीक्रियते । कुर्वद्रूपत्वं च अङ्कुरजनकतावच्छेदकतया सिद्धः जातिविशेषः । स च **फलोपधायक**क्षणिकसमर्थबीजमात्रवृत्तिबीजत्वव्याप्यः कल्प्यते । एवम् अत्रापि कुर्वद्रूपत्वेनैव क्षणिकशरीरेषु उत्तरोत्तरशरीरनिष्ठवासनोत्पादकत्वं वाच्यम्, अत आह – **बीजादौ** इति । **उपपत्तेः** – कस्माच्चित् बीजात् अङ्कुरोत्पत्तिः कस्माच्चित् न इति नियमोपपत्तेः । **कुर्वद्रूपत्वाकल्पनात्** इति । कुसूलस्थबीजादिषु धरणिसलिलसंयोगादिरूपसहकार्यभावादेव अङ्कुरानुत्पत्तेः कुर्वद्रूपत्वं तद्रूपेण जनकत्वं च न कल्प्यते प्रमाणाभावात् इति भावः ।

अत्र वदन्ति – ''यत् सत् तत् क्षणिकम्'' इति व्याप्त्या जगतः क्षणिकता । तदनुरोधेन च कुर्वद्रूपत्वं, तद्रूपेण कार्यं प्रति हेतुत्वं च आवश्यकम् । न च तादृशव्याप्तौ मानाभावः । तादृशव्याप्त्यस्वीकारे कुसूलस्थबीजात् अङ्कुरोत्पत्तिवारणाय धरणिसलिलसंयोगादीनां सहकारित्वकल्पने गौरवात् । तादृशव्याप्तिस्वीकारे तु कुर्वद्रूपत्वेन हेतुत्वकल्पनात् कुसूलस्थबीजे कुर्वद्रूपत्वाभावादेव अङ्कुरानुत्पत्तेः न सहकारिता कारणान्तराणाम् इति लाघवात् ।

न च – क्षणिकत्वमतेऽपि बीजस्य धरणिसलिलसंयोगादेर्वा कुर्वद्रूपत्वेन हेतुत्वम् इत्यत्र विनिगमनाविरहेण सर्वेषां सहकारिणां कारणत्वकल्पनम् आवश्यकम्

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

इति – वाच्यम् । मन्मते अङ्कुरं प्रति बीजानां धरणिसलिलसंयोगादिसहकारिणां च कुर्वद्रूपत्वेनैव हेतुत्वकल्पनात् । कुर्वद्रूपत्वानङ्गीकारे तु बीजत्वधरणिसलिलसंयोगत्वादिनानाहेतुत्वकल्पने गौरवात् इति ।

तदसत् । **ईदृशगौरवापेक्षया** क्षणिकानन्तपदार्थकल्पने अतिगौरवात् । न च – लाघवात् कुर्वद्रूपत्वेन तेषाम् एकहेतुतासिद्धौ ईदृशं गौरवं न दोषाय, **फलमुखत्वात्** इति – वाच्यम् । **फलमुखगौरवस्यापि दोषत्वात्** । किं च जगतः क्षणिकत्वे ''स एव अयं घटः'' इति प्रत्यभिज्ञानुपपत्तेः, पूर्वकालीनघटाभेदस्य एतत्कालीनघटेऽभावात् । न च तज्जातीयाभेद एव तादृशप्रतीतेः विषयः । तन्मते जातेरपि क्षणिकत्वेन पूर्वकालीनघटवृत्तिघटत्वस्य एतत्कालीनघटे अभावात् । एतेन – जगतः क्षणिकत्वे नाशत्वावच्छिन्नं प्रति सत्त्वेन एकमेव हेतुत्वम् इति लाघवम् इति – अपास्तम् । यदपि स्थिरपदार्थाङ्गीकारे **एकस्मिन् पदार्थे** सामर्थ्यम् असामर्थ्यं च विरुद्धम् । **अतः तद्भेद** इति – तदपि न । **एकस्मिन्नेव पदार्थे** एककालावच्छेदेन सामर्थ्यतदभावयोरेव विरुद्धतया कालभेदेन तत्स्वीकारे **बाधकाभावात्** ।

यत्तु **पूर्वापरकालीनधर्मिणोः** अभेदे तद्धर्मयोः सामर्थ्यासामर्थ्ययोः भेदोऽनुपपन्नः तन्मते धर्मधर्मिणोरभेदात् इति । तन्न । **''घटत्वं न घटः''** इत्यादिप्रतीतीनाम् अप्रामाण्यापत्त्या धर्मधर्मिणोः अभेदस्य वक्तुम् अशक्यत्वात् इति दिक् ।।

राजीवोल्लासः

एवं क्षणिकशरीरेष्वेव चैतन्यम् इति पक्षेऽपि शरीरभेदेन अनन्तशक्तिकल्पनादोषः इत्यपि **मूले** प्रदर्शितम् । तत्र शङ्कते – **ननु क्षेत्रस्थबीजात्** इति । क्षेत्रे उप्तात् बीजादेव अङ्कुरस्य उत्पत्तिः, न तु कुसूलस्थबीजात् इति दृश्यते । अतः अङ्कुरत्वावच्छिन्नं प्रति बीजत्वेन न कारणत्वम् । किन्तु कुर्वद्रूपत्वेनैव कारणत्वम् । यादृशबीजाव्यवहितोत्तरं अङ्कुरस्य उत्पत्तिः तादृशबीजे एव कुर्वद्रूपत्वं कल्प्यते ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

कुर्वद्रूपत्वं नाम अङ्कुरोत्पादकतावच्छेदकतया सिद्धः जातिविशेषः । तादृशजातेः कुसूलस्थबीजे अभावात् न ततः अङ्कुरोत्पत्तिः । एवं यादृशशरीरनिष्ठसंस्कारवशात् स्मरणं जायते तादृशशरीराव्यवहितपूर्वक्षणवृत्तिशरीरे उत्तरशरीरनिष्ठसंस्कारजनक-तावच्छेदकं कुर्वद्रूपत्वम् अङ्गीक्रियते । अतः शरीरस्यापि कुर्वद्रूपत्वेनैव उत्तरशरीरनिष्ठ-संस्कारजनकत्वम् । तथा च सर्वेषु शरीरेषु कुर्वद्रूपत्वाकल्पनात् न अनन्तकुर्वद्रूपत्वकल्पनागौरवम् इति आशङ्क्य **''बीजादौ अपि''** इत्यादिना **मुक्तावल्यां** समाधानम् उक्तम् – क्षेत्रस्थबीजे सलिलसंयोगादिरूपसहकारिकारण-समवधानमस्ति । तद्वशात् क्षेत्रस्थबीजात् अङ्कुरोत्पत्तिः । कुसूलस्थबीजे तु तादृशसहकारिकारणसमवधानं नास्ति, अतः न तस्मात् अङ्कुरोत्पत्तिः इति एवं कुर्वद्रूपत्वं विनापि कस्माच्चित् बीजात् अङ्कुरोत्पत्तिः कस्माच्चित् न इति नियमस्य उपपत्तेः कुर्वद्रूपत्वकल्पने प्रमाणाभावः इति ।

फलोपधायक इति । अङ्कुररूपकार्योत्पादकं क्षणिकं शक्तं च यद्बीजं तन्मात्रवृत्ति यत् बीजत्वम् तदविनाभूतः इत्यर्थः । तेन फलानुपधायकेषु बीजेषु सः जातिविशेषः न कल्प्यत इति लभ्यते ।

तादृशव्याप्त्यस्वीकारे इति । ''यत् सत् तत् क्षणिकम्'' इति व्याप्तेः अनङ्गीकारे जगतः स्थिरत्वात् तदन्तर्गतबीजादेरपि स्थिरतया क्षेत्रस्थकुसूलस्थबीजयोः ऐक्यात् कुसूलस्थतादशायामपि बीजात् अङ्कुरोत्पत्तिवारणाय धरणिसलिलसंयोगादीनां सहकारिकारणत्वं कल्पनीयम् इति गौरवम् । ''यत् सत् तत् क्षणिकम्'' इति व्याप्तिस्वीकारे तु क्षेत्रस्थकुसूलस्थबीजयोः भिन्नतया क्षेत्रस्थबीजे एव कुर्वद्रूपत्वम् अस्ति न तु कुसूलस्थबीजे इति वक्तुं शक्यतया कुसूलस्थबीजात् कुर्वद्रूपत्वरहितात् न अङ्कुरोत्पत्तिः । तथा च धरणिसलिलसंयोगादीनां सहकारिकारणत्वं न कल्प्यत इति लाघवम् । **न च क्षणिकत्वमतेऽपि** इति । बीजादेः क्षणिकत्वमतेऽपि अङ्कुरोत्पत्तिपूर्वक्षणवर्तिनः बीजस्य धरणिसलिलसंयोगादेर्वा कुर्वद्रूपत्वेन हेतुत्वं कल्प्यते

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

इत्यत्र विनिगमनाविरहात् सहकारिणामपि कारणत्वकल्पनं न शङ्कनीयम् । क्षणिकत्वमते अङ्कुरं प्रति बीजानां धरणिसलिलसंयोगादिसहकारिणां च कुर्वद्रूपत्वेन एकरूपेण हेतुत्वकल्पनात् पृथक् पृथक् तेषां हेतुत्वस्य अकल्पनात् । स्थिरत्ववादिनां मते बीजत्वेन बीजस्य धरणिसलिलसंयोगत्वेन तादृशसंयोगादेश्च पृथक् हेतुत्वकल्पनेन गौरवात् इति । **ईदृशगौरवापेक्षया** इति । कतिपयपदार्थानां कारणत्वकल्पनगौरवापेक्षया क्षणिकानां अनन्तपदार्थानां कल्पने अतिगौरवात् । **फलमुखत्वात्** इति । नानाकारणत्वकल्पनापेक्षया लाघवेन कुर्वद्रूपत्वावच्छिन्नायाः एककारणतायाः सिद्धौ तदुपपत्तये क्षणिकनानाव्यक्तिकल्पनाप्रयुक्तगौरवस्य कारणत्वसिद्धिरूपफलोत्तरकालीनतया तादृशगौरवज्ञानस्य पूर्वकालीनकारणत्वसिद्धिप्रतिबन्धकत्वं नास्ति इति भावः ।

फलमुखगौरवस्यापि दोषत्वात् इति । उत्पन्नेऽपि कुर्वद्रूपत्वावच्छिन्नैककारणत्वनिश्चये उत्तरकालीनगौरवज्ञानेन अप्रमाण्यज्ञानोत्पत्त्या अप्रामाण्यज्ञानास्कन्दितेन निश्चयेन एककारणत्वसिद्ध्यसंभवात् इति भावः ।

एकस्मिन् पदार्थे इति । एकस्मिन् बीजे अङ्कुरोत्पादनसामर्थ्यं तदसामर्थ्यं च विरुद्धम् इत्यर्थः ।

अतः तद्भेद इति । ''क्षेत्रस्थबीजं कुसूलस्थबीजात् भिन्नम् । तदवृत्तिधर्मवत्त्वात् [कुसूलस्थबीजावृत्त्यङ्कुरसामर्थ्यरूपधर्मवत्त्वात्]'' इति अनुमानं विवक्षितम् । अस्मिन् अनुमाने स्वरूपासिद्धिं प्रदर्शयति – **एकस्मिन्नेव पदार्थे** इति । एकस्मिन्नेव बीजे एककालावच्छेदेन सामर्थ्यं तदभावश्च विरोधात् न संभवति । भिन्नकालावच्छेदेन सामार्थ्यतदभावयोः स्वीकारे नास्ति विरोधः । तथा च बीजे कुसूलस्थितिकालावच्छेदेन अङ्कुरजननसामर्थ्याभावः । क्षेत्रस्थितिकालावच्छेदेन अङ्कुरजननसामर्थ्यं च न विरुद्धम् । अतः स्थिरपदार्थाङ्गीकारे न कोऽपि विरोधः ।

पूर्वपरकालीनधर्मिणोः इति । कुसूलस्थितिकालीनबीजस्य क्षेत्रस्थितिकालीनबीजस्य च अभेदे सति तद्धर्मयोः सामर्थ्यासामर्थ्ययोः कथं भेदः? तन्मते धर्म्यतिरिक्त-

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

धर्मानङ्गीकारात् इति भावः । **घटत्वं न घट इति** । ''घटत्वं न घट'' इति प्रतीत्या धर्मिणः घटस्य धर्मस्य घटत्वस्य च नञा भेदावगाहनात् धर्मधर्मिणोः अभेदे सति तयोः भेदावगाहिप्रतीतेः अप्रमात्वं स्यात् इत्यर्थः ।

बाधकाभावात् इति । तथा च क्षेत्रस्थबीजे कुसूलस्थबीजावृत्तिधर्मवत्त्वरूप-हेत्वभावात् स्वरूपासिद्ध्या न पूर्वोक्तानुमानेन भेदसिद्धिः इति भावः ।।

।। नित्यविज्ञानात्मवादिवेदान्तिमतखण्डनम् ।।

मुक्तावली

अस्तु तर्हि क्षणिकविज्ञाने गौरवात् नित्यविज्ञानमेव आत्मा ''अविनाशी वा अरेऽयमात्मा'', ''सत्यं ज्ञानमनन्तं ब्रह्म'' इत्यादिश्रुतेश्च इति चेत्, न । तस्य सविषयत्वासंभवस्य दर्शितत्वात्, निर्विषयस्य ज्ञानत्वे मानाभावात्, सविषयकत्वस्यापि अननुभवात् । अतः विज्ञानादिभिन्नः नित्य आत्मा इति सिद्धम् । ''सत्यं ज्ञानम्'' इति ब्रह्मपरं, जीवे तु न उपयुज्यते ।

ज्ञानाज्ञानसुखित्वादिभिः जीवानां भेदसिद्धौ सुतराम् ईश्वरभेदः । अन्यथा बन्धमोक्षव्यवस्थानुपपत्तेः ।

योऽपि ईश्वराभेदबोधकः वेदः, सोऽपि तदभेदेन तदीयत्वं प्रतिपादयन् स्तौति, अभेदभावनयैव यतितव्यम् इति वदति । अत एव ''सर्वे आत्मानः समर्पिता'' इति श्रूयते ।

मोक्षदशायाम् अज्ञाननिवृत्तौ अभेदः जायते इत्यपि न । भेदस्य नित्यत्वेन नाशासंभवात् । भेदनाशेऽपि व्यक्तिद्वयं स्थास्यत्येव । न च – द्वित्वमपि नश्यति इति – वाच्यम् । तव निर्धर्मके ब्रह्मणि सत्यत्वाभावेऽपि सत्यस्वरूपं तत् इतिवत्, द्वित्वाभावेऽपि व्यक्तिद्वयात्मकौ तौ इति सुवचत्वात् । मिथ्यात्वाभावः

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अधिकरणात्मकः तत्र सत्यत्वम् इति चेत् – एकत्वाभावः व्यक्तिद्वयात्मकः द्वित्वम् इत्यपि उच्यताम् । **प्रत्येकम्** एकत्वेऽपि "पृथिवीजलयोः न गन्धः" इतिवत् उभयं न एकम् इत्यस्य सर्वजनसिद्धत्वात् । **योऽपि** तदानीम् अभेदप्रतिपादकः वेदः, सोऽपि निर्दुःखत्वादिना साम्यं प्रतिपादयति, संपदाधिक्ये "पुरोहितोऽयं राजा संवृत्तः" इतिवत् । **अत एव** 'निरञ्जनः परमं साम्यमुपैति' इति श्रूयते ।

ईश्वरोऽपि न ज्ञानसुखात्मा, किं तु ज्ञानाद्याश्रयः, **विज्ञानपदेन** ज्ञानाश्रयः एव उक्तः "यः सर्वज्ञः सर्ववित्" इत्याद्यनुरोधात् । आनन्दम् इत्यस्यापि **आनन्दवत्** इत्यर्थः । अर्शआदित्वात् मत्वर्थीयः अच् प्रत्ययः । अन्यथा पुँलिङ्गत्वापत्तेः । **आनन्दोऽपि** दुःखाभावे **उपचर्यते**, भाराद्यपगमे "सुखी संवृत्तः अहम्" इतिवत् । **अस्तु वा** तस्मिन् आनन्दः न त्वसौ आनन्दः, **"असुखम्"** इति श्रुतेः । न विद्यते सुखं यस्य इति कुतः नार्थः? इति चेत्, न । **क्लिष्टकल्पनापत्तेः, प्रकरणविरोधात्, अच्प्रत्ययविरोधाच्च** इति संक्षेपः ।।

दिनकरी

वेदान्ती शङ्कते – **अस्तु तर्हि** इति । **क्षणिकविज्ञान** इति । आत्मनः क्षणिकविज्ञानस्वरूपत्वपक्षे इत्यर्थः । आत्ममात्रस्य नित्यविज्ञानरूपत्वम् ईश्वरस्य वा इति विकल्प्य आद्ये दूषणम् आह – **तस्य** इति । **दर्शितत्वात्** इति । **"तस्य जगद्विषयकत्वे"**(पृ.410) इत्यादिग्रन्थेन दर्शितत्वात् इत्यर्थः । **तथा च जीवस्य तथात्वासंभवात्** न आत्ममात्रस्य नित्यज्ञानस्वरूपत्वम् इति भावः ।

ननु जीवस्य न जगद्विषयकत्वं, नवा नियतयत्किंचिद्विषयकत्वं ब्रूमः, परंतु यद्विषयकत्वं यत्र जीवे अनुभवसिद्धं तत्र तद्विषयकत्वम्, अत आह – **सविषयकत्वस्य** इति । ननु "सत्यं ज्ञानम्" इति श्रुतिरेव जीवस्य ज्ञानस्वरूपत्वे प्रमाणम्, अत आह – **सत्यम्** इति ।

ननु जीवब्रह्मणोः ऐक्यात् नित्यविज्ञानरूपत्वं जीवस्य निराबाधम् इत्यतः

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

जीवब्रह्मणोः भेदं साधयति – **ज्ञानाज्ञान** इति । ''**सुखित्वादि**'' इति''आदि''ना दुःखित्वपरिग्रहः । **सुतराम्** इति । जीवात्मनां नानात्वसिद्धौ **ईश्वरस्य एकस्य** अनेकजीवात्मकत्वासंभवात् एकत्वानेकत्वयोः विरोधात् इति भावः । **ईश्वरभेदः** – ईश्वरजीवात्मनोः सिद्ध्यति इति शेषः । **अन्यथा** – ईश्वरस्य जीवात्मकत्वे । **बन्धमोक्ष** इति । कश्चित् संसारी बद्धः कश्चिन्मुक्त इति व्यवस्थानुपपत्तिः स्यात् इत्यर्थः । चैत्रमैत्रात्मनोः ईश्वररूपयोः ऐक्यात् इति भावः ।

ननु कथं तर्हि ''**तत्त्वमसि**'' इत्यादितच्छब्दप्रतिपाद्यब्रह्मणि युष्मच्छब्दप्रतिपाद्यजीवस्य **अभेदबोधकः** वेदः प्रमाणम् इति, अत आह – **योऽपि** इति ।

मोक्षकाले जीवात्मनां ब्रह्मणा सह अभेदः उत्पद्यते इति मतं निरस्यति – **मोक्ष** इति । भेदस्य अनित्यत्वम् अभ्युपेत्यापि मोक्षकाले जीवब्रह्मणोः भेदं व्यवस्थापयति – **भेदनाशेऽपि** इति । भेदसत्त्वे व्यक्तिद्वयं निर्विवादमेव इति ''अपि''ना सूचितम् । **तव** – वेदान्तिनः । **निर्धर्मक** इति । **इदं च सत्यत्वाभावेऽपि** इत्यत्र हेतुतया उक्तम् ।

ननु **निर्धर्मकत्वं** स्वभिन्नधर्मशून्यत्वं मिथ्यात्वाभावरूपसत्यत्वस्य ब्रह्मरूपत्वात्, अभावस्याधिकरणात्मकत्वात् न अनुपपन्नम् इत्यभिप्रायेण शङ्कते – **मिथ्यात्वाभाव** इति । ननु कथम् एकत्वाधिकरणे तदभावरूपद्वित्वम्? अत आह – **प्रत्येकम्** इति । ननु ''ब्रह्मविद्ब्रह्मैव भवति'' इति श्रुतेः मोक्षदशायाम् अभेदः उत्पद्यत इत्यर्थिकायाः का गतिः? अत आह – **योऽपि** इति । **अत एव** – ''ब्रह्मविद्ब्रह्मैव भवति'' इति श्रुतेः **साम्यप्रतिपादकत्वादेव** । **निरञ्जनः** – निर्दुःखः । द्वितीये दोषम् आह – **ईश्वरोऽपि** इति । **विज्ञानपदेन** – ''नित्यम्'' इत्यादिश्रुत्यन्तर्गतविज्ञानपदेन । अधिकरणल्युडन्तेन विज्ञानाश्रयत्वबोधनात् इति भावः । **आनन्दवत् इत्यर्थ** इति । मत्वर्थीयाच्प्रत्ययान्तेन आनन्दशब्देन आनन्दवतः

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

बोधनात् । **अन्यथा** आनन्दम् इति नपुंसकत्वानुपपत्तेः इति भावः । **ननु आनन्दवत्** इत्यर्थः न सङ्गच्छते, तव मते ईश्वरे आनन्दाभावात्, अत आह – **आनन्दोऽपि** इति । लक्षणाकल्पनमेव तव दोषः इति, अत आह – **अस्तु वा** इति । **असुखम्** इति । "असुखम्" इत्यत्र नञा ब्रह्मणि सुखभेदबोधनात् इति भावः । **क्लिष्टकल्पनापत्तेः** इति । **बहुव्रीहौ** अन्यपदार्थलाभार्थं नञः तत्र लक्षणापत्तेः इत्यर्थः । नच – **नञ् तत्पुरुषेऽपि** नञः लक्षणा आवश्यकी, अन्यथा नञर्थस्य नामार्थतया भेदेन अन्वयासंभवात् इति – वाच्यम् । **तस्य नामत्वेऽपि** निपातत्वात् इति । ननु **नञ्तत्पुरुषेऽपि** तत्र असुखपदब्रह्मपदयोः एकधर्मिबोधकत्वलक्षणं सामानाधिकरण्यम् अनुभवसिद्धम् । अन्यथा तयोः समानवचनत्वानुपपत्तेः । अतः तन्निर्वाहार्थं नञः अभाववति लक्षणा तवापि आवश्यकी इति, अत आह – **प्रकरण** इति । **प्रत्ययविरोधाच्च** इति । आनन्दशब्दस्य पुँलिङ्गत्वनियमेन "आनन्दम्" इति रूपस्य मत्वर्थीयाच्प्रत्ययं विना अनुपपत्तेः इति भावः ।।

राजीवोल्लासः

मूले सविषयकत्वस्यापि अननुभवात् इति । "घटस्य ज्ञानम्" इत्यादिवत् "घटस्य अहम्" इति अनुभवाभावात् ।

ब्रह्मपरम् इति । "ब्रह्मविदाप्नोति परम्" इत्युपक्रम्य "सत्यं ज्ञानम् अनन्तम्" इत्यादिना ब्रह्मण एव लक्षणकथनात् तादृशवाक्यघटकं सत्यज्ञानादिपदमपि ब्रह्मपरमेव, न तु जीवपरम् इति भावः । **जीवानां भेदसिद्धौ** इति । "चैत्रजीवः मैत्रजीवात् भिन्नः, मैत्रजीवावृत्ति ज्ञानाज्ञानादिधर्मवत्त्वात्, यः यदवृत्तिधर्मवान् सः तद्भिन्नः", इत्यनुमानेन जीवानां परस्परं भेदः सिद्ध्यति इत्यभिप्रायः । **ईश्वरभेद** इति । ईश्वरात् भेदः इति पञ्चमीतत्पुरुषः । तेन जीवस्य ईश्वरात् भेदः विवक्षितः । अत्र "जीवः ईश्वराद्भिन्नः, तदवृत्तिधर्मवत्त्वात्" इति वा "ईश्वरः जीवाद्भिन्नः, तदवृत्तिधर्मवत्त्वात्" इति वा अनुमानं विवक्षितम् ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

दिनकर्यां जीवस्य तथात्वासंभवात् इति । सविषयकत्वासंभवात् इत्यर्थः । **ईश्वरस्यैकस्य** इति । यदि ईश्वरः नानाजीवात्मकः तदा ''द्यावापृथिवी जनयन् देव एकः'' इत्यादिश्रुतिसिद्धएकत्ववान् न स्यात् इति तर्केण ईश्वरविशेष्यक-नानाजीवात्मकत्वप्रकारकज्ञानं प्रतिबध्यते इति भावः ।

तत्त्वमसि इत्यादि । तत् – सार्वज्ञ्यादिविशिष्टं ब्रह्म, त्वमसि – त्वदभिन्नम् । **छान्दोग्योपनिषदि** श्वेतकेतुं प्रति उपदेशोऽयम् । **अभेदबोधक** इति । अभेदबोधोपयोग्याकाङ्क्षावान् इत्यर्थः ।

मुक्तावल्यां तदभेदेन इति । अस्य **स्तौति** इत्यनेन अन्वयः । स्तुतिर्नाम वस्तुतः तद्वृत्त्युत्कृष्टधर्मवत्तया बोधनम् । तद्घटकधर्मे ''अभेदेन'' इति तृतीयान्तार्थाभेदस्य अन्वयः । तथा च ईश्वराभेदरूपः यः जीवावृत्तिः धर्मः तद्बोधानुकूलाकाङ्क्षाशाली **तत्त्वमसि** इत्यादिः वेदः इति भावः ।

तदीयत्वं – तत्सेवकत्वम् । तथा च श्रुतेः तत्सेवकत्वप्रतिपादने एव तात्पर्यम् । तथा च उक्तश्रुतेः अभेदस्य प्रातीतिकार्थत्वेऽपि ईश्वरसेवकत्वमेव वास्तवार्थः । सेवकत्वे प्रापणीये अभेदभावना उपयोगिनी इति श्रुतिः बोधयति इति भावः । **समर्पिता** इति । सेवकत्वेन नियुक्ता इत्यर्थः । **आनन्दः अपि** इति । आनन्दशब्दः अपि इत्यर्थः । **उपचर्यते** – लक्षणया प्रयुज्यते ।

दिनकर्याम् – इदं च सत्यत्वाभावे इत्यत्र इति । ''निर्धर्मके'' इति कथनं ब्रह्मणि सत्यत्वाभावे हेतुः । यतः ब्रह्म धर्मसामान्यशून्यं अत एव ब्रह्मणि सत्यत्वरूपधर्मविशेषोऽपि नास्ति । एवं च सत्यत्वरूपधर्माभावेऽपि सत्यस्वरूपं ब्रह्म इति यथा भवद्भिः उच्यते, तथा जीवब्रह्मणोः द्वित्वरूपधर्माभावेऽपि व्यक्तिद्वयात्मकौ ब्रह्मजीवौ इति वक्तुं शक्यत्वात् इत्यर्थः ।

ननु निर्धर्मकत्वम् इति । निर्धर्मकत्वं नाम स्वभिन्नधर्मशून्यत्वम् । ब्रह्मणि

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

यत् सत्यत्वं तत् मिथ्यात्वाभावरूपम् । मिथ्यात्वाभावश्च ब्रह्मस्वरूपः । अभावस्य अधिकरणात्मकत्वात् । मिथ्यात्वाभावः मिथ्यात्वाभावाधिकरणब्रह्माभिन्नः । एवं च ब्रह्मणि मिथ्यात्वाभावरूपसत्यत्वस्य सत्त्वेऽपि तत्सत्यत्वं ब्रह्माभिन्नम् इति ब्रह्मभिन्नधर्मशून्यत्वरूपं निर्धर्मकत्वं मिथ्यात्वाभावरूपं सत्यत्वं च ब्रह्मणि भवितुम् अर्हति । अतः निर्धर्मकत्वं न सत्यत्वाभावे हेतुः इति अभिप्रायेण शङ्का ।

समाधानं तु – ब्रह्मजीवयोः विद्यमानं द्वित्वमपि एकत्वाभावरूपम्, तदपि अधिकरणीभूतब्रह्मजीवव्यक्तिद्वयात्मकम् इति वक्तुं शक्यतया मुक्तिदशायां व्यक्तिद्वयस्थितिः न वारयितुं शक्यते । **साम्यप्रतिपादकत्वात्** इति । ''एव'' कारस्य अवधारणार्थकत्ववत् इवार्थकत्वमपि वर्तते । यथा ''यजमानः स्पर्धमानः विष्णुरेव भूत्वा इमान् लोकान् जयति'' इत्यादौ । तद्वत् ''ब्रह्मवित् ब्रह्मैव भवति'' इति श्रुतावपि ''एव''कारस्य ''इव'' इत्यर्थः । तेन ब्रह्मविदः ब्रह्मसादृश्यमेव तया श्रुत्या प्रतिपाद्यते । सादृश्यं च निर्दुःखत्वादिना ।

मत्वर्थीयाच्प्रत्ययान्तेन आनन्दः अस्य अस्ति इति इत्यर्थे ''अर्श आदिभ्योऽच्'' इति सूत्रेण मतुबर्थे आनन्दशब्दात् अच् प्रत्यये दकारोत्तराकारस्य ''यस्य इति च'' इति लोपे आनन्दशब्दः निष्पद्यते । तस्य आनन्दवत् इत्यर्थः । **अन्यथा** इति । मत्वर्थीयाच्प्रत्ययान्तत्वाभावे आनन्दशब्दस्य आनन्दार्थकत्वे ''स्यात् आनन्दथुः आनन्दः'' इति कोशेन आनन्दशब्दस्य नित्यपुँल्लिङ्गत्वात् ''विज्ञानमानन्दम्'' इति नपुंसकलिङ्गं न सङ्गच्छते । आनन्दवदर्थकत्वे तु विशेष्यब्रह्मशब्दानुसारेण मतुबन्तशब्दवत् नपुंसकलिङ्गत्वं उपपद्यते इति भावः ।

ननु आनन्दवत् इत्यर्थः इति । आनन्दशब्दस्य आनन्दाश्रयः इत्यर्थस्वीकारे नैयायिकमते ईश्वरे आनन्दाभावात् आनन्दाश्रयो ब्रह्मेति श्रुत्यर्थस्य असङ्गतिः इति आशङ्का ।

समाधानं तु – आनन्दशब्दस्य लक्षणया दुःखाभावोऽर्थः । तथा च

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

"आनन्दम्" इत्यस्य दुःखाभाववत् इति अर्थः । ईश्वरे दुःखाभावस्य सत्त्वात् दुःखाभाववत्त्वम् उपपद्यते ।

असुखम् इत्यत्र इति । न सुखम् असुखम् इति नञ्तत्पुरुषेण ब्रह्मणि सुखभिन्नत्वं बोध्यते । तेन ब्रह्म सुखस्वरूपं न भवति, किन्तु सुखस्य आश्रयः । **बहुव्रीहौ इति** । "असुखम्" इति शब्दस्य सुखं न विद्यते यस्य तत् इति बहुव्रीहिसमासत्वम् आश्रित्य सुखाभाववत् इत्यपि अर्थः कुतः न संभवति इति शङ्कायां बहुव्रीहेः अन्यपदार्थप्रधानत्वेन अन्यपदार्थे लक्षणा स्वीकरणीया भवति । अतः "असुखम्" इति न बहुव्रीहिः, किन्तु नञ्तत्पुरुषः ।

न च नञ्तत्पुरुषे अपि इति । नञ्तत्पुरुषपक्षेऽपि असुखपदेन सुखभिन्नं इत्यर्थस्य बोधनीयतया भेदार्थकस्य नञः भिन्ने लक्षणा स्वीकरणीया । अन्यथा नञर्थस्य भेदस्य आश्रयतासंबन्धेन ब्रह्मणि अन्वयो वक्तव्यः । स तु न संभवति । नञर्थस्यापि नञ्रूपनामार्थतया एकस्य नामार्थस्य अन्यस्मिन् नामार्थे अभेदातिरिक्तसंबन्धेन अन्वयस्य अव्युत्पन्नतया आश्रयतासंबन्धेन अन्वयासंभवात् । नञः भिन्ने लक्षणायां तु तस्य अभेदसंबन्धेन ब्रह्मणि अन्वयात् नास्ति व्युत्पत्तिविरोधः । तथा च बहुव्रीहिपक्षे तत्पुरुषपक्षे च लक्षणायाः आवश्यकत्वात् तत्पुरुष एव इति कः निर्बन्धः इति शङ्का ।

तत्समाधानम् आह – **तस्य नामत्वेऽपि निपातत्वात् इति** । निपातातिरिक्तनामार्थयोरेव अभेदातिरिक्तसंबन्धेन न अन्वयः इति व्युत्पत्तिः । निपातार्थनामार्थयोस्तु अभेदातिरिक्तसंबन्धेन अन्वयः संभवत्येव । यथा "घटो नास्ति" इत्यादौ नञर्थेऽभावे प्रतियोगित्वसंबन्धेन घटस्य अन्वयः । तद्वत् प्रकृतेऽपि नञ्रूपनिपातार्थस्य भेदस्य अभेदातिरिक्तेन आश्रयत्वसंबन्धेन नामार्थे ब्रह्मणि अन्वयसंभवात् नञः भिन्ने लक्षणा न अङ्गीक्रियते । बहुव्रीहौ तु अन्यपदार्थे लक्षणाङ्गीकरणेऽपि सैव दोषः इति भावः ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

नन्वु नञ्तत्पुरुषः अपि इति । असुखशब्दस्य नञ्तत्पुरुषत्वेऽपि नञः भेदार्थकत्वे असुखपदब्रह्मपदयोः एकार्थबोधकत्वरूपं सामानाधिकरण्यं कथं घटते । नञर्थस्य सुखभेदस्य ब्रह्मपदार्थस्य ब्रह्मणः च अभेदाभावात् द्वयोः पदयोः एकार्थबोधकत्वविरहात् । आश्रयतासंबन्धेन अन्वयस्वीकारे द्वयोः पदयोः समानवचन-कत्वमपि न उपपद्यते । पदद्वयार्थयोः अभेदेन अन्वये सत्येव ''नीलमुत्पलम्'' इत्यादौ समानवचनकत्वदर्शनात् । तथा च एकार्थबोधकत्वस्य समानवचनकत्वस्य च उपपत्यर्थं ''असुखम्'' इत्यत्र नञः भेदवति लक्षणां स्वीकृत्य तस्य अभेदसंबन्धेन ब्रह्मणि अन्वयो वक्तव्यः इत्यालोच्य **मुक्तावल्यां प्रकरणविरोधात्** इति असुखपदस्य बहुव्रीहित्वपक्षे बाधान्तरम् उक्तम् । ''अस्थूलमनणु अह्रस्वं अदीर्घम्'' इति बृहदारण्यकोपनिषदि अस्थूलमित्यादि नञ्तत्पुरुषेण सह असुखशब्दस्य पाठात् नञ्तत्पुरुषपदघटितप्रकारणानुसारेण असुखशब्दोऽपि नञ्तत्पुरुष एव । न तु बहुव्रीहिरिति भावः ।

प्रत्ययविरोधाच्च इति । असुखशब्दस्य बहुव्रीहित्वम् आश्रित्य ''सुखाभाववत्'' इत्यर्थस्वीकारे ''आनन्दं ब्रह्म'' इत्यत्र पूर्वोक्तरीत्या मत्वर्थीयाच्-प्रत्ययान्तेन आनन्दशब्देन आनन्दाश्रयः ब्रह्म इत्यवगमात् तद्विरोधश्च भवति इति भावः ।

इति संक्षेप इति । एतेन, – ननु ''नेह नानास्ति किञ्चन'' इत्यादिश्रुत्या ब्रह्मणि सर्वधर्मनिषेधात् न ज्ञानसुखादिमत्त्वसंभव इति चेत्, न । ''सर्वज्ञः'' इत्यादिबहुश्रुतिविरोधात् हेयधर्माभावस्यैव ततो बोधात् इति आक्षेपसमाधानादिकम् अन्यतोऽवगन्तव्यम् इति बोधितम् इति सुबोधिनीकाराः ।।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ साङ्ख्यमतखण्डनम् ॥

मुक्तावली

एतेन – **प्रकृतिः कर्त्री**, पुरुषस्तु **पुष्करपलाशवत्** निर्लेपः, किन्तु चेतनः, **कार्यकारणयोः** अभेदात् कार्यनाशे सति कार्यरूपतया तन्नाशोऽपि **न स्यात्** इति अकारणत्वं तस्य, **बुद्धिगत**चैतन्याभिमानान्यथानुपपत्त्या तत्कल्पनम् । **बुद्धिश्च प्रकृतेः** परिणामः, सैव महत्तत्त्वम्, अन्तःकरणम् इति उच्यते । **तत्सत्त्वासत्त्वाभ्यां** पुरुषस्य संसारापवर्गौ । **तस्या एव** इन्द्रियप्रणालिकया परिणतिः ज्ञानरूपा घटादिना संबन्धः । पुरुषे कर्तृत्वाभिमानः बुद्धौ चैतन्याभिमानश्च **भेदाग्रहात्** । "**मम इदं** कर्तव्यम्" इति मदंशः **पुरुषोपरागः** बुद्धेः स्वच्छतया तत्प्रतिबिम्बात् अतात्त्विकः दर्पणमलिनिम्ना मुखोपरागः । "इदं" इति विषयोपरागः **इन्द्रियप्रणालिकया परिणतिभेदः** तात्त्विकः, निःश्वासाभिहतदर्पणस्येव मलिनिमा । "**कर्तव्यम्**" इति व्यापारांशः । तेन अंशत्रयवती बुद्धिः । तत्परिणामेन **ज्ञानेन पुरुषस्य अतात्त्विकः संबन्धः**, दर्पणस्य मलिनिम्ना इव मुखस्य उपलब्धिः उच्यते । ज्ञानवत् सुखदुःखेच्छाद्वेषधर्माधर्मा अपि बुद्धेः एव । **कृतिसामानाधिकरण्येन** प्रतीतेः । न च बुद्धिश्चेतना **(परिणामित्वात्) [परिणामत्वात्]** इति – मतमपास्तम् ।

कृत्यदृष्टभोगानामिव चैतन्यस्यापि सामानाधिकरण्यप्रतीतेः, **तद्भिन्ने मानाभावाच्च** । "चेतनः अहं करोमि" इति **चैतन्यांशे** भ्रम इति चेत्, **कृत्यंशेऽपि किं नेष्यते?** अन्यथा **बुद्धेः नित्यत्वे** मोक्षाभावः अनित्यत्वे तत्पूर्वम् असंसारापत्तिः ।

ननु अचेतनायाः प्रकृतेः कार्यत्वात् बुद्धेः अचेतनत्वम्, कार्यकारणयोः तादात्म्यात् इति चेत्, न । **असिद्धेः, कर्तुः** जन्यत्वे मानाभावात् । **वीतरागजन्मादर्शनात्** अनादित्वम् । अनादेः नाशासंभवात् नित्यत्वम् तत्किं प्रकृत्यादिकल्पनेन ।

न च – "**प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः । अहंकारविमूढात्मा कर्ताहमिति मन्यते**" इत्यनेन विरोधः इति – वाच्यम् । प्रकृतेः अदृष्टस्य गुणैः

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अदृष्टजन्यैः इच्छादिभिः ''कर्ता अहमेव'' इत्यस्य तदर्थत्वात् । **''तत्रैवं सति कर्तारमात्मानं केवलं तु यः''** इत्यादि वदता भगवता प्रकटीकृतः अयम् उपरिष्टादाशय इति संक्षेपः ।।

दिनकरी

सांख्यमतं दूषयितुम् उपन्यस्यति – **एतेन** इति । पूर्वोक्तयुक्त्या आत्मनः ज्ञानवत्त्वसाधनेन वक्ष्यमाणयुक्त्या च इत्यर्थः । **प्रकृतिः** इति । मूलप्रकृतिः इत्यर्थः । **कर्त्री** इति । **कर्तृत्वं च अत्र** कर्तृभूतान्तःकरणप्रकृतित्वम् । अनुकूलकृतिमत्त्वलक्षणकर्तृत्वस्य तन्मते अन्तःकरणधर्मत्वात् इति ध्येयम् । **पुष्करपलाशवत्** इति । पद्मपत्रवत् इत्यर्थः । **यथाच** पद्मपत्रम् अम्भसा लिप्तं न संभवति, तथा पुरुषः कर्तृत्वाद्याश्रयः न भवति इति भावः । तथाच ''पुरुषः कर्तृत्वाभाववान् कारणत्वाभावात्'' इति अनुमानं तत्र प्रमाणं बोध्यम् । **ननु तत्र** कारणत्वसत्त्वात् हेत्वसिद्धिः, अत आह – **कार्यकारणयोः** इति । **न स्यात्** इति । मा भवतु इत्यर्थः । **तस्य** – पुरुषस्य । ननु एतादृशपुरुषसत्त्वे किं मानम्? अत आह – **बुद्धिगत** इति । **क्वचित्प्रसिद्धस्यैव** चैतन्यस्य बुद्धौ आरोपसंभवात् इति भावः । **प्रकृतेः** इति । मूलप्रकृतेः इत्यर्थः । **ननु पुरुषस्य** कर्तृत्वाभावे तत्र धर्माधर्मयोः उत्पत्त्यभावात् तदधीनसुखदुःखयोः तत्र अनुत्पत्तौ दुःखध्वंसरूपमोक्षः पुरुषस्य न स्यात्, अत आह – **तत्सत्त्वासत्त्वाभ्याम्** इति । बुद्धिसत्त्वासत्त्वाभ्याम् इत्यर्थः । **बुद्धिसत्त्वे** इन्द्रियप्रणालिकया तत्परिणामेन ''अयं घटः'' इत्यादिज्ञानेन संबद्धः घटादिः विषयः स्वाकारज्ञानपरिणामिबुद्ध्या अगृहीतासंसर्गकत्वसंबन्धेन पुरुषनिष्ठः पुरुषस्वरूपतिरोधानेन पुरुषस्य संसार-संपादकः, बुद्धिनाशे तु तत्परिणामस्य ''अयं घटः'' इत्यादिज्ञानरूपस्य अभावात् विषयावच्छेदाभावात् कैवल्येनावस्थानं पुंसः मोक्षः । दुःखसंबन्धतद्ध्वंसरूपौ संसारमोक्षौ तु न पुंसः, किंतु बुद्धेरेव इति भावः ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

ननु पुरुषे साक्षात्संबन्ध एव विषयस्य अस्तु, स एव च तस्मिन् संसारव्यवहारनियामकः अस्तु, किम् उक्तबुद्धिघटितपरम्परासंबन्धेन? इति, अत आह – **तस्या एव इति । तथा च विषये बुद्धेरेव संबन्धः पुरुषसंबन्धः बुद्धिपुरुषयोः** असंसर्गाग्रहात्, न तु पुरुषे स्वातन्त्र्येण विषयसंबन्धः अस्ति, मानाभावात् ।

न च – विषयप्रकाशार्थं साक्षात्संबन्ध एव स्वीकार्यः, किम् उक्तपरंपरया? इति – वाच्यम् । तस्य पुरुषस्वभावनिबन्धनत्वे पुरुषस्य नित्यत्वेन तत्स्वभावाधीनविषयसंबन्धस्य सर्वदा सत्त्वात् मोक्षाभावप्रसङ्गात्, घटप्रकाशकाले पटादिरूपविषयस्वभावाधीनस्य पटादिरूपचैतन्यसंबन्धस्य सत्त्वात् पटादेरपि प्रकाशापत्तेः इति ।

यद्वा बुद्धितः ज्ञानस्य भेदम् आह – तस्या एव इति । तथा च बुद्धेः परिणतिः ज्ञानं, न तु बुद्धिरेव इति भावः । **भेदाग्रहात्** इति । **बुद्धिपुरुषयोः भेदाग्रहात्** इत्यर्थः ।

इदानीं बुद्धितः उपलब्धेः भेददर्शनार्थं बुद्धेः अंशत्रयं प्रदर्शयति – **मम इदं** इत्यादिना । **पुरुषोपरागः** – **पुरुषसंबन्धः** । दर्पणस्य यथा मुखसंबन्धः प्रतिबिम्बमात्रं, न तु तात्त्विकः, तथा बुद्धिपुरुषयोः भेदाग्रहात् एकत्वाभिमानः पुरुषोपरागः इत्यर्थः । **इन्द्रियप्रणालिकया** –इन्द्रियद्वारा । **परिणतिभेदः** – ''अयं घटः'' इत्यादिज्ञानरूपः परिणाम एव विषयेण घटादिना बुद्धेः संबन्धः इत्यर्थः । तस्य पारमार्थिकत्वे निःश्वासाभिहतदर्पणस्य मलिनिमा दृष्टान्तः । **कर्तव्यम् इति** इति । **पूर्वोक्तपुरुषोपरागविषयोपरागाभ्यां** कर्तव्यघटादेः अवभासः तेन ''कर्तव्यम्'' इति अध्यवसायः व्यापारांशः इत्यर्थः । **ज्ञानेन पुरुषस्य अतात्त्विकः संबन्ध** इति । अत्र ज्ञानेन पुरुषस्य यः अतात्त्विकः संबन्धः, स उपलब्धिः इति उच्यते इत्यन्वयः । अतात्त्विकत्वे दृष्टान्तम् आह – **दर्पणस्य मलिनिम्ना इव मुखस्य संबन्ध** इति । **तथाच ज्ञानेन सह** ''चेतनः अहम् इदं जानामि, करोमि'' इत्याकारेण बुद्धौ आरोपितस्य पुरुषस्य यः संबन्धः अतात्त्विकः, स उपलब्धिः, न

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

तु बुद्धिरेव उपलब्धिः इति भावः । **कृतिसामानाधिकरण्येन** इति । **अदृष्टस्य** अतीन्द्रियत्वेऽपि "धार्मिकः अहं करोमि" इत्यादौ तदंशे उपनीतभानरूपं तत्प्रत्यक्षं बोध्यम् । **(परिणामित्वात्) [परिणामत्वात्]** इति । (अनित्यधर्माश्रयत्वात्) [अनित्यधर्मत्वात्] इत्यर्थः । **कृत्यदृष्टभोगानाम्** इति । **कृतिः स्वसमानाधिकरणमेव** अदृष्टं जनयति, तच्च अदृष्टं स्वसमानाधिकरणमेव भोगं जनयति इति कृत्यदृष्टभोगानां परम्परया सामानाधिकरण्यप्रमितिवत् "चेतनः अहं करोमि" इति सामानाधिकरण्य-प्रमितिप्रतीतेः इत्यर्थः । **तद्भिन्न** इति । कर्तृभिन्ने । **मानाभावात्** इत्यस्य चेतन इत्यादिः । चः **पूर्वोक्तदूषणसमुच्चायकः** ।"**कर्तृत्वाश्रयः न चेतनः**, जन्यधर्माश्रयत्वात् घटवत्" इति बाधकसत्त्वात् "चेतनः अहं करोमि" इति प्रतीतिः चैतन्यांशे भ्रमः इति आशङ्कते – **चैतन्यांशे** इति । **कृत्यंशे** अपि इति । "**बुद्धिः कर्तृत्वाभाववती**, जन्यधर्माश्रयत्वात्" इति बाधकस्य तत्रापि सत्त्वात् इति भावः । **अन्यथा** इति । कर्तृचेतनयोः भेदाङ्गीकारे इत्यर्थः । **बुद्धेः नित्यत्वे** इति । **कर्तृभिन्नस्य** चेतनस्य स्वीकारे तस्मिन् सुखदुःखाभावात् संसारमोक्षयोः अनुपपत्त्या पूर्वोक्तरीत्या बुद्धिसत्त्वासत्त्वाभ्यामेव संसारापवर्गौ वाच्यौ । तथा च बुद्धेः नित्यत्वे तु तत्सत्त्वनिबन्धनस्य संसारस्य सर्वदा आपत्त्या मोक्षाभाव एव स्यात् । बुद्धेः अनित्यत्वे तु तत्र जन्यत्वं स्वीकरणीयम्, अजन्यस्य नाशासंभवात् । तथा च तदुत्पत्तेः पूर्वं तत्सत्त्वनिबन्धनः संसारः न स्यात् इत्यर्थः । **वस्तुतः** तदुत्पत्तेः पूर्वं तदाश्रितादृष्टादेः अभावात् बुद्धेः अनुत्पत्त्या संसारः कदापि न स्यात् इति अवधेयम् । **असिद्धेः** इति । **बुद्धौ प्रकृतिकार्यत्वाभावात्** इति भावः ।

ननु **कर्तृत्वेन** जन्यत्वानुमितिः परिशेषात् प्रकृतिजन्यत्वविषयिणी स्यात् इति, अत आह – **कर्तुः** इति । **कर्तृत्वस्य** जन्यत्वव्याप्यत्वे अनुकूलतर्काभावात् इति भावः । **प्रत्युत तद्विपरीतानादित्वग्राहकतर्कसत्त्वात् अनादित्वमेव कर्तुः** इत्याह – **वीतराग** इति । "वीतरागजन्मादर्शनात्" इति **न्यायसूत्रम्** । सरागजन्मदर्शनात् इति तदर्थः । **अनादित्वम्** इति । स्तन्यपाने बालस्य प्रवृत्तिः

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

न इष्टसाधनताज्ञानमन्तरेण, तच्च न अनुभवस्वरूपम् **बाधात्** । स्मरणस्य स्वसमानाधिकरणपूर्वानुभवसापेक्षतया पूर्वजन्मसत्त्वे पूर्वजन्मन्यपि प्रथमप्रवृत्त्यनुरोधेन तत्पूर्वस्य, एवं तत्पूर्वस्य जन्मनः सिद्धौ अनादित्वम् आत्मन इति भावः । अनादेः इत्यस्य भावस्य इति शेषः । जन्यभावत्वेन नाशे हेतुत्वात् इति भावः । **न च** इति । प्रकृतिः माया, तस्य गुणैः सत्त्वरजस्तमोलक्षणैः, क्रियमाणानि कर्माणि भवन्ति । अहङ्कारः ''अहम्'' इति प्रत्ययः तेन विमूढः आत्मा – अन्तःकरणं यस्य तथाविधः पुरुषः ''कर्ता अहम्'' इति मन्यते इत्यर्थकेन **भगवद्वचनेन** इत्यर्थः । तेन आत्मनः कर्तृत्वाभावप्रतिपादनात् इति भावः । **अहमेव** इति । तथा च तेन **स्वतन्त्रकर्तृत्वाभाव** एव आत्मनि प्रतिपाद्यते, नतु कर्तृत्वसामान्याभाव इति भावः । **प्रकटीकृतः अयम्** इति । ''**अधिष्ठानं** तथा कर्ता **करणं** च पृथग्विधम् । विविधाश्च पृथक् चेष्टा दैवं चैवात्र पञ्चमम्'' इत्यनेन पञ्चानामपि कर्तृत्वं प्रतिपाद्य ''तत्रैवं सति'' इत्यादिनापि स्वतन्त्रकर्तृत्वस्यैव आत्मनः निषिद्धत्वात् इति भावः । **एवं पुरुषस्यैव** कर्तृत्वम् अस्तु । न च – कारणत्वाभावेन कर्तृत्वाभाव एव साधनीय इति – वाच्यम् । स्वरूपासिद्धेः । कार्यकारणयोः अभेदात् कार्यनाशे कार्यरूपतया नाशः स्यात् इति अकारणत्वं पुरुषस्य इत्यपि न सत्, कार्यकारणयोः अभेदस्यैव असिद्धत्वात् इत्यादिविस्तरभिया न उक्तम् इत्यभिप्रायवान् आह – **संक्षेप** इति ।

राजीवोल्लासः

ज्ञानवत्त्वसाधनेन इति । शरीराद्यतिरिक्तस्य आत्मनः पूर्वं ज्ञानवत्त्वसाधनात् ''आत्मा ज्ञानवान्'' इति सिद्ध्यति । सांख्यास्तु आत्मनः ज्ञानवत्त्वं न स्वीकुर्वन्ति, किन्तु ज्ञानस्वरूपत्वं स्वीकुर्वन्ति । अतः तन्मतम् अयुक्तम् इत्यर्थः ।

ननु सांख्यमते अन्तःकरणस्यैव कर्तृत्वाङ्गीकारात् **प्रकृतिः कर्त्री** इति **मूलम्** असङ्गतम् इति आशङ्क्य आह – **कर्तृत्वं च अत्र** इति । ''प्रकृतिः कर्त्री''

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

इति वाक्योक्तं प्रकृतेः कर्तृत्वं कर्तृभूतान्तःकरणोपादानत्वरूपम् । तावता कर्तृत्वम् अन्तःकरणस्यैव, प्रकृतेः कर्तृत्वव्यवहारस्तु कर्तृभूतान्तःकरणोपादानत्वात् इति भावः । ''प्रकृतिः कर्त्री'' इत्यत्र अनुकूलकृतिमत्त्वरूपं कर्तृत्वं कुतो नार्थः इत्यत्र आह – **अनुकूल** इति । अनुकूलकृतिमत्त्वरूपस्य कर्तृत्वस्य सांख्यमते अन्तःकरणधर्मत्वेन प्रकृतौ अभावात्, अनुकूलकृतिमत्त्वरूपम् अर्थं परित्यज्य कर्तृभूतान्तःकरणप्रकृतित्वरूपः अर्थः उक्तः इत्याशयः ।

यथा च इति । पद्मपत्रं जलेन सन्निहितमपि जलेन लिप्तं यथा न भवति, तथा कर्तृत्वाश्रयान्तःकरणसन्निहितोऽपि पुरुषः अन्तःकरणगतकर्तृत्वाद्याश्रयो न भवति । तथा च ''पुरुषः कर्तृत्वाभाववान्, कारणत्वाभावात्'' इत्यनुमानं कर्तृत्वाभावे प्रमाणम् । अन्तःकरणस्य तु कारणभूतप्रकृतिविकारतया प्रकृतिकार्यत्वात् कार्यकारणयोः अभेदात् कारणत्वम् अस्ति इति विशेषः । पुरुषस्य तु घटादिकारणत्वे स्वीकृते कार्यकारणयोरभेदात् पुरुषस्य नित्यतया नाशाभाववत् पुरुषकार्यस्य घटादेरपि नाशो न स्यात् । अथ वा घटादेः नाशात् तदभिन्नस्य पुरुषस्यापि नाशः स्यात् । पुरुषस्य मा नाशः भवतु इत्येतदर्थं पुरुषस्य अकारणत्वम् । तथा च पुरुषस्य कारणत्वाभावे सिद्धे तेन हेतुना कर्तृत्वाभावः सिद्ध्यति । इदं च व्यतिरेक्यनुमानम् । ''यत्र यत्र कर्तृत्वाभावो नास्ति तत्र तत्र कारणत्वाभावो नास्ति'' इति व्यतिरेकव्याप्तिः । दृष्टान्तस्तु महत्तत्त्वम् अन्तःकरणं वा ।

ननु तत्र इति । **तत्र** – पुरुषे । **हेत्वसिद्धिः** – कारणत्वाभावरूपहेतोः असिद्धिः । **एतादृशपुरुषसत्त्वे** इति । अकारणस्य कर्तृत्वादिशून्यस्य चैतन्यरूपस्य पुरुषस्य सत्त्वे किं प्रमाणम् इत्यर्थः । **क्वचित्प्रसिद्धस्यैव** इति । ''अहं जानामि'' इति बुद्धौ चैतन्याभिमानः सर्वेषां भवति । अभिमानश्च आरोपः । क्वचित् प्रसिद्धस्यैव अन्यत्र आरोपः संभवति इति बुद्धौ चैतन्यस्य आरोपार्थं चैतन्यरूपः पुरुषः स्वीक्रियते । तेन पुरुषे प्रसिद्धस्य चैतन्यस्य बुद्धौ आरोपः संभवति इति भावः ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

ननु पुरुषस्य इति । पुरुषस्य यदि कर्तृत्वं न स्यात् तर्हि तस्य यागादिविहितनिषिद्धकर्मकर्तृत्वाभावात् तज्जन्ययोः धर्माधर्मयोः पुरुषे उत्पत्यभावात् तदधीनयोः सुखदुःखयोरपि अनुत्पत्तौ दुःखध्वंसरूपः मोक्षः पुरुषस्य न स्यात् । दुःखवत्येव दुःखध्वंससंभवात् इत्याशङ्क्य समाधानम् आह मुक्तावल्याम् – **तत्सत्त्वासत्त्वाभ्याम्** इति । तत्समाधानं स्पष्टीकरोति – **बुद्धिसत्त्वे** इत्यादिना । इन्द्रियद्वारा बहिर्निर्गतायाः बुद्धेः घटादिविषयदेशप्राप्तौ सत्यां घटाद्याकारेण बुद्धेः परिणामो जायते, स एव परिणामः वृत्तिरूपं घटादिज्ञानं, तेन ज्ञानेन संबद्धः घटादिः विषयः पुरुषनिष्ठः सन् पुरुषस्वरूपतिरोधानेन पुरुषस्य संसारं आपादयति ।

घटादिविषयस्य पुरुषनिष्ठत्वं स्वाकारज्ञानपरिणामिबुद्ध्या अगृहीतासंसर्गकत्वसंबन्धेन । स्वं – घटादिविषयः । तदाकारं यत् ज्ञानं वृत्तिरूपं ज्ञानम् । तेन रूपेण परिणामिनी या बुद्धिः तया बुद्ध्या सह पुरुषस्य यः असंसर्गः – भेदः स न गृहीतः यस्य तत्त्वम् । बुद्धिपुरुषयोः विद्यमानोऽपि भेदः बुद्धिसान्निध्यरूपात् दोषात् न गृह्यते । एवं च स्वाकारज्ञानपरिणामिबुद्धिप्रतियोगिकागृहीतभेदकत्वसंबन्धेन विषयः पुरुषनिष्ठः इत्युक्तं भवति । बुद्धेः नाशे तु बुद्धिपरिणामस्य ''अयं घटः'' इत्यादिज्ञानस्य अभावात् तत्संबद्धविषयसंबन्धभानं पुरुषे नास्ति इति पुरुषस्य कैवल्येन – विषयसंबन्धभानं विना अवस्थानरूपः मोक्षः । एवं च दुःखसंबन्धः संसारः तद्ध्वंसरूपः मोक्षश्च न पुरुषस्य । किन्तु बुद्धेरेव इति तेषां मतम् ।

ज्ञानेन संबद्ध इति । स्वाकारकत्वमेव ज्ञानविषययोः संबन्धः । **स्वाकारज्ञानपरिणामि** इति । घटादिविषयाकारं यत् ज्ञानं तद्रूपेण परिणामिनी तत्कारणभूता या बुद्धिः तया अगृहीतासंसर्गत्वम् – अज्ञातभेदवत्त्वम् । **स्वरूपतिरोधानेन** इति । पुरुषस्वरूपस्य अप्रकाशेन इत्यर्थः । **विषयावच्छेदाभावात्** इति । विषयसंबन्धभानाभावात् इत्यर्थः । **कैवल्येन** इति । विषयसंबन्धमानं विना इत्यर्थः । **बुद्धेरेव** इति । बुद्धेः एव कर्तृत्वात् धर्माधर्मयोः बुद्धावेव उत्पत्त्या तत्रैव

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

तदधीनसुखदुःखयोः उत्पत्त्या दुःखसंबन्धरूपः संसारः तदुध्वंसरूपः मोक्षश्च बुद्धावेव उत्पद्यते इत्यर्थः ।

विषयस्य पुरुषे साक्षात्संबन्धाभावम् उपपाद्य परंपरासंबन्धम् उपपादयति – **तथा च** इत्यादिना । निर्लेपे पुरुषे विषयस्य साक्षात्संबन्धः नास्ति । किन्तु बुद्धिविषययोः यः संबन्धः स एव पुरुषविषययोरपि संबन्धः । बुद्धिपुरुषयोः भेदस्य अग्रहात् । तथा च बुद्धिपुरुषयोः भेदाग्रहातिरिक्तः स्वतन्त्रः विषयसंबन्धः पुरुषे नास्ति । प्रमाणाभावात् ।

न च विषयप्रकाशार्थम् इति । यदि विषयस्य पुरुषेण साक्षात्संबन्धः न स्यात् तदा विषयस्य प्रकाशः न स्यात् । तथा च ''विषयः पुरुषसंबद्धः प्रकाशमानत्वात्'' इत्यनुमानं तर्कानुगृहीतं साक्षात्संबन्धे प्रमाणम् इति, न च वाच्यम् । तस्य साक्षात्संबन्धस्य पुरुषस्वरूपप्रयुक्तत्वे पुरुषस्वरूपस्य नित्यत्वेन तदधीनस्य विषयसंबन्धस्य सर्वदा सत्त्वात् मोक्षः न स्यात् । विषयसंबन्धस्य विषयस्वभावाधीनत्वे घटप्रकाशकाले पटादिरूपविषयस्वभावाधीनस्य पटादिरूपस्य चैतन्यसंबन्धस्य सत्त्वात् पटादेरपि प्रकाशः स्यात् । अतः साक्षात्संबन्धानुपपत्त्या विषयेण साकं पुरुषस्य पूर्वोक्तपरंपरासंबन्ध एव स्वीकरणीय इति भावः । एवं च साक्षात्संबन्धः पुरुषस्वभावनिबन्धनो वा विषयस्वभावनिबन्धनो वेति विकल्प्य आद्ये **''तस्य''** इत्यारभ्य **''मोक्षाभावप्रसङ्गात्''** इत्यन्तेन दूषणम् उक्तम् । द्वितीये **''घटप्रकाशकाले''** इत्यारभ्य **''पटादेरपि प्रकाशापत्तेः''** इत्यन्तेन दूषणम् उक्तम् इति विवेको बोध्यः ।

यद्वा बुद्धितो ज्ञानस्य भेदम् आह इति । **''तस्या एव इन्द्रियप्रणालिकया''** इति मुक्तावलीग्रन्थं प्रकारान्तरेण अवतार्य व्याचष्टे । **''स्वाकारज्ञानपरिणामिबुद्ध्या अगृहीतासंसर्गकत्वम्''** इति यः विषयस्य पुरुषेण साकं परंपरासंबन्धः पूर्वम् उक्तः, सः बुद्धेः ज्ञानस्य च भेदे सत्येव संभवति इति उक्तपरंपरासंबन्धोपपादनार्थं

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

बुद्धेः ज्ञानस्य च भेदप्रदर्शनम् । तदाह – **तथा च बुद्धेः** इति । मूले ज्ञानोपलब्ध्योः बुद्ध्यपेक्षया भेदप्रदर्शनं च **काणादमतनिरासाय** । बुद्धितः तयोः अभेदस्य ''बुद्धिरुपलब्धिः ज्ञानं प्रत्ययः इति पर्यायाः'' इति **प्रशस्तपदाचार्योक्तत्वात्** । **बुद्धिपुरुषयोः भेदाग्रहात्** इति । तयोः भेदाग्रहात् बुद्धिगतस्य कर्तृत्वस्य पुरुषे पुरुषगतस्य चैतन्यस्य च बुद्धौ आरोपः इत्यर्थः ।

बुद्धेः पुरुषोपरागः विषयोपरागः व्यापारांशः इति अंशत्रयं **मुक्तावल्याम्** उक्तम् । तत्र पुरुषोपरागांशम् उपपादयति – **पुरुषोपरागः पुरुषसंबन्ध** इत्यादिना । अयम् आशयः – ''मम इदं कर्तव्यम्'' इति यः बुद्धेः महत्तत्त्वस्य अध्यवसायः अस्मिन् अध्यवसाये यत् तावत् महत्तत्त्वेन चेतनापरपर्यायास्मदर्थोल्लेखेन ''मम'' इत्येवं स्वस्वरूपग्रहणम्, तत् स्वस्मिन् चेतनोपरागात् भवति । अयं च चेतनोपरागः चेतनतादात्म्यरूपः चेतनसंबन्धः महत्तत्त्वस्य स्वच्छत्वात् तत्र कृत्स्नस्य चेतनस्य प्रतिबिम्बितत्वात् चेतनतः विवेकाग्रहणात् भवति । एवं च महत्तत्त्वे चेतनस्य प्रतिबिम्ब एव चेतनोपरागः । प्रतिबिम्बश्च अतात्त्विकः । दूरस्थस्य मुखस्य दर्पणे प्रतिबिम्बवत् इति भावः ।

महत्तत्त्वस्य विषयोपरागम् उपपादयति – **इन्द्रियप्रणालिकया** इत्यादिना । अन्तःकरणाख्यस्य महत्तत्वस्य कुल्याद्धारा बहिः प्रसृत्य केदारे जलस्येव इन्द्रियद्वारा बहिः प्रसृत्य घटादौ तत्तदाकारपरिमाणामेन यः संबन्धः स एव विषयोपरागः ''इदम्'' इति प्रतीयमानस्य अंशस्य संबन्धः । अयं विषयसंबन्धः तात्त्विकः । निश्वासाभिहतदर्पणस्य मालिन्यवत् ।

व्यापारांशम् उपपादयति – **पूर्वोक्तपुरुषोपरागविषयोपरागाभ्याम्** इति । तृतीयायाः प्रयोज्यत्वम् अर्थः । तस्य च **अवभासे** अन्वयः । पूर्वोक्तपुरुषोपरागविषयोपरागप्रयोज्यः घटादेरवभासः प्रकाशापरपर्याया अभिव्यक्तिः तार्किकाणां निर्विकल्पकस्थानीया । बुद्धिः यदि घटादि विषयाकारेण परिणमते पुरुषोपरागं च

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्राप्नोति तदैव घटादेरवभासः इति उपरागद्वयप्रयोज्यत्वं अवभासस्य उपपन्नम् । तेन – तादृशावभासेन जनितः ''कर्तव्यम्'' इत्यध्यवसायः कर्तव्यत्वप्रकारकनिश्चयः व्यापारांशः इत्यर्थः । तथा च ''व्यापारांश'' इत्यस्य व्यापारस्य – कृतेः अंशः संबन्धः यस्मिन् अध्यवसाये सः अध्यवसायः इत्यर्थः ।

उपलब्धेः ज्ञानापेक्षया अतिरिक्तत्वं स्पष्टीकरोति – **तथा च ज्ञानेन** इत्यादिना । ज्ञानस्य पुरुषस्य च अतात्त्विकः संबन्धः उपलब्धिः । दर्पणगतमालिन्येन मुखस्य संबन्धः यथा अतात्त्विकः तद्वत् । ''चेतनोऽहं करोमि'' इति बुद्धौ आरोपितस्य चेतनस्य पुरुषस्य ''चेतनोऽहं जानामि'' इति ज्ञानेन सह यः संबन्धः अतात्त्विकः सः उपलब्धिः, न तु बुद्धिरेव उपलब्धिः इत्याशयः । ''अहमिदं जानामि'' इत्याकारकः यः ज्ञानसंबन्धः पुरुषस्य प्रतीयते स एव उपलब्धिः ।

ननु कृतिसामानाधिकरण्येन प्रतीतेः ज्ञानवत् सुखदुःखेच्छाद्वेष-प्रयत्नधर्माधर्माणां बुद्धिवृत्तित्वं मूले यत् प्रतिपादितम् तत् न सङ्गच्छते । अदृष्टापरपर्याययोः धर्माधर्मयोः अतीन्द्रियत्वात् कृतिसामानाधिकरण्येन तयोः प्रत्यक्षात्मकप्रतीत्यसंभवात् इत्याशङ्क्य आह – **अदृष्टस्य** इति । ''धार्मिकोऽहं करोमि'', ''अधार्मिकोऽहं करोमि'' इति मानसप्रत्यक्षे कृत्यंशः मनस्संयुक्तसमवाय-रूपलौकिकसन्निकर्षेण भासते । धर्माधर्मरूपं अदृष्टं तु उपनयमर्यादया – अलौकिकसन्निकर्षेण – अनुमित्यात्मकज्ञानलक्षणप्रत्यासत्त्या भासते । अतः अदृष्टस्य कृतिसामानाधिकरण्येन प्रत्यक्षं संभवति इति भावः ।

मूले परिणामत्वात् इति **दिनकर्यां अनित्यधर्मत्वात्** इति च पाठः साधुः । तथा च ''बुद्धिः न चेतना परिणामत्वात्'' इत्यनुमानं **मूले** विवक्षितम् । ''परिणामत्वात्'' इत्यस्य ''अनित्यधर्मत्वात्'' इति व्याख्यानम् । अनित्यत्वे सति धर्मत्वात् इति तदर्थः । क्षणिकविज्ञानवादिनां मते अनित्यविज्ञाने व्यभिचारवारणाय धर्मत्वात् इति विशेष्यम् ।

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

कृत्यदृष्टभोगानां एकाधिकरणवृत्तित्ववत् चैतन्यस्यापि तैः सह एकाधिकरणवृत्तित्वं प्रतीतिबलात् आवश्यकम् । अतः कृत्याश्रयभिन्नः चैतन्याश्रयः अप्रामाणिक इति **मूलोक्तं** स्पष्टीकरोति – **कृतिः स्वसमानाधिकरणम्** इत्यादिना । कृतिः स्वाधिकरणे एव अदृष्टं जनयति । अदृष्टमपि स्वाधिकरणे एव सुखदुःखानुभवरूपं भोगं जनयति इति प्रतीतिबलात् अङ्गीकरणीयम् । अन्यथा अन्यदीयकृत्या अन्यस्य अदृष्टभोगयोः प्रसङ्गात् । प्रतीतिश्च ''धार्मिकोऽहं करोमि'', ''कर्ताऽहं भोक्ता'' इत्याकारिका । एवमेव ''चेतनोऽहं करोमि'' इति चैतन्याश्रयवृत्तितया कृतेः प्रतीतेः कृत्याश्रयवृत्तित्वं चैतन्यस्य अङ्गीकरणीयम् । तथा च ''बुद्धिः कर्त्री'', ''पुरुषः चेतनः'' इति साङ्ख्यमतम् अयुक्तम् इति भावः ।

पूर्वोक्तदूषणसमुच्चायक इति । ज्ञानाश्रयस्यैव आत्मत्वम्, न तु ज्ञानस्येति विज्ञानात्मवादिमते यद्दूषणम् उक्तम् तस्य समुच्चायकः **''मानाभावाच्च''** इत्यत्र ''च'' कारः । **कर्तृत्वाश्रयः न चेतन** इति । **''कर्तृत्वाश्रयः चेतनभिन्नः, जन्यत्वात् घटवत्''** इत्यनुमानेन कर्तृत्वाश्रयचेतनयोः भेदसिद्धौ कृतिचैतन्ययोः एकाधिकरणवृत्तित्वासंभवात् ''चेतनोऽहं करोमि'' इति कृत्याश्रये चैतन्यावगाहिनी प्रतीतिः भ्रमः । चैतन्याभाववति चैतन्यविषयकत्वात् इति आशङ्का । समाधानं **''कृत्यंशेऽपि किं नेष्यते''** इति ग्रन्थेन उक्तम् । तदुपपादयति – **बुद्धिः कर्तृत्वाभाववती** इति । यत्र यत्र जन्यधर्माश्रयत्वम्, तत्र कर्तृत्वाभावः दृश्यते घटादौ । बुद्धेरपि जन्यधर्माश्रयत्वात् कर्तृत्वाभावे सिद्धे ''अहं करोमि'' इति प्रतीतिः कर्तृत्वांशे भ्रम इत्यपि वक्तुं शक्यतया बुद्धेरपि कर्तृत्वं न सिद्ध्येत् इति भावः । कर्तृचेतनयोः भेदाङ्गीकारे संसारमोक्षयोः अनुपपत्तिः **मूले** उक्ता । ताम् उपपादयति – **कर्तृभिन्नस्य** इत्यादिना । यः कर्ता तस्यैव सुखं दुःखं च इति नियमात् कर्तृभिन्नस्य चेतनस्य स्वीकारे अकर्तरि चेतने सुखदुःखयोरभावात् सुखदुःखानुभवरूपः संसारः सुखदुःखध्वंसरूपः मोक्षश्च न उपपद्येते । तथा च बुद्धिसत्त्वासत्त्वाभ्यां संसारापवर्गौ इति पूर्वोक्तरीत्या बुद्धेरेव संसारापवर्गौ वक्तव्यौ ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

तत्र बुद्धेः नित्यत्वे – अविनाशित्वे – बुद्धिसत्त्वनिमित्तकस्य संसारस्य सर्वदा प्रसक्त्या मोक्ष एव न स्यात् । बुद्धेः अनित्यत्वे –विनाशित्वे – बुद्धेः जन्यत्वम् अवश्यं स्वीकरणीयम् । अजन्यस्य भावस्य विनाशासंभवात् । तथा च बुद्धेः जन्यत्वे सति बुद्ध्युत्पत्तेः पूर्वं बुद्धेरसत्त्वात् बुद्धिसत्त्वनिमित्तकः संसारः न स्यात् । बुद्ध्युत्पत्तेः पूर्वं संसाराभावस्य इष्टत्वे कदापि संसारो न स्यात् इति आह – **वस्तुत** इति । बुद्ध्युत्पत्तेः पूर्वं बुद्ध्याश्रितस्य अदृष्टस्य वा तज्जनकस्य कर्मणो वा अभावात् बुद्धेरेव अनुत्पत्या आश्रयाभावात् पश्चादपि संसारो न स्यात् । तथा च कदापि संसारः न स्यात् इति आपत्तिः दुर्वारा । **बुद्धेरनुत्पत्या** इति । कार्यसामान्यं प्रति अदृष्टस्य कारणतया अदृष्टाभावे बुद्धिरूपं कार्यमपि न उत्पद्येत इति भावः ।

"बुद्धिः अचेतना, अचेतनप्रकृतिकार्यत्वात्" इत्यनुमानेन बुद्धेः अचेतनत्वम् आशङ्क्य **असिद्धेः** इत्यनेन तस्मिन् अनुमाने स्वरूपासिद्धिः उक्ता । स्वरूपासिद्धिमेव स्पष्टयति – **बुद्धौ प्रकृतिकार्यत्वाभावात्** इति । न च – सांख्यमते बुद्धेः प्रकृतिकार्यत्वात् कथं प्रकृतिकार्यत्वाभाव इति – वाच्यम् । **कर्तुः जन्यत्वे** प्रमाणाभावात् कर्तृभूतायाः बुद्धेरपि कार्यत्वं नास्ति इति आशयात् ।

तदुपरि शङ्कते – **ननु कर्तृत्वेन** इति । बुद्धेः कर्तृत्वात् कर्तृत्वेन हेतुना जन्यत्वम् अनुमीयते । "बुद्धिः जन्या कर्तृत्वात्, पुरुषवत्" इति व्यतिरेक्यनुमानेन बुद्धेः जन्यत्वे सिद्धे परिशेषात् बुद्ध्युत्पादककारणान्तरादर्शनात् प्रकृतिजन्यत्वं सिद्ध्यति इत्याशङ्क्य **कर्तुः जन्यत्वे मानाभावात्** इति मुक्तावल्यां समाधानम् उक्तम् । तत् विवृणोति – **कर्तृत्वस्य** इति । बुद्धेः कर्तृत्वमस्तु, जन्यत्वं मास्तु इति व्यभिचारशङ्कायां तन्निवारकस्य अनुकूलतर्कस्य अभावात् कर्तृत्वे जन्यत्वव्याप्यत्वं नास्ति इति कर्तृत्वेन हेतुना बुद्धेः जन्यत्वं साधयितुं न शक्यते इति भावः ।

प्रत्युत इति । जन्यत्ववैपरीत्येन इत्यर्थः । **तस्य अनादित्वमेव** इत्यत्र

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अन्वयः । भवतभिमतजन्यत्ववैपरीत्येन अनादित्वमेव कर्तुः सिद्ध्येत् । तत्र हेतुः **तद्विपरीतानादित्वग्राहकतर्कसत्त्वात्** इति । जन्यत्वविपरीतं यत् अनादित्वं तज्ज्ञापकस्य तर्कस्य सत्त्वात् इत्यर्थः । स च तर्कः **वीतरागजन्मादर्शनात्** इति **न्यायसूत्रोक्तः** । वीतरागस्य इच्छारहितस्य जन्मनः अदर्शनात् । अनेन सरागस्यैव जन्म इत्युक्तं भवति । यदा जायते शिशुः तदा सराग एव भवति । जन्मक्षणे एव स्तन्यपानेच्छादर्शनात् । सा च इच्छा इष्टसाधनताज्ञानाधीना । तच्च ज्ञानं पूर्वजन्मानुभूतेष्टसाधनत्वस्मरणात्मकम् । जन्मकाले अनुभवहेतोः अभावेन इष्टसाधनत्वानुभवासंभवात् । तथा च जन्मान्तरानुभूतम् इष्टसाधनत्वं स्मृत्वा तदधीनरागवशात् जातः शिशुः स्तन्यपाने प्रवर्तते इति वक्तव्यम् । अनेन कर्तुः शिशोः जन्मान्तरेऽपि सत्ता अङ्गीकरणीया । तेन कर्तुः अनादित्वमेव सिद्ध्येत् । न तु जन्यत्वम् । तदेतदभिप्रेत्य आह – **स्तन्यपाने** इत्यादिना ।

बाधात् इति । असंभवात् इत्यर्थः । अनादेः प्रागभावस्य नाशदर्शनात् अनादेः नाशासंभवात् इति अयुक्तम् इति आशङ्क्य **भावस्येति** शेषपूरणेन व्याचष्टे – **अनादेः इत्यस्य** इति । प्रतियोगितासंबन्धेन नाशं प्रति तादात्म्यसंबन्धेन जन्यभावत्वावच्छिन्नस्य हेतुतया अजन्ये भावे प्रतियोगितासंबन्धेन नाशः न संभवति इति पूर्वोक्तरीत्या अनादेः आत्मनः नाशप्रतियोगित्वं नास्ति इति भावः ।

स्वतन्त्रकर्तृत्वाभाव इति । **''अधिष्ठानं तथा कर्ता''** इत्यादि वक्ष्यमाण-**गीतावचनानुसारेण** अधिष्ठानादिसापेक्षमेव आत्मनः कर्तृत्वम् । न तु स्वतन्त्रं कर्तृत्वम् इति **''प्रकृतेः क्रियमाणानि''** इति श्लोकेन प्रतिपाद्यते । न तु कर्तृत्वसामान्याभावः । तथा सति **''तत्रैवं सति कर्तारम् आत्मानम्''** इति श्लोके कर्तृपदेन आत्मनः निर्देशो न स्यात् इति भावः ।

अधिष्ठानम् इति । आधारभूतं शरीरम् इत्यर्थः । **करणम्** इति । इन्द्रियम् इत्यर्थः । **दैवम्** – अदृष्टम् । **संक्षेप** इति ग्रन्थस्य तात्पर्यम् आह – एवं

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

पुरुषस्यैव इत्यादिना । पुरुषस्यैव कर्तृत्वमस्तु, न तु बुद्धेः । न च – कारणत्वाभावात् पुरुषस्य कर्तृत्वाभावः इति – वाच्यम् । पुरुषे कारणत्वाभावस्य असिद्धेः । तत्र यदुक्तं कार्यकारणयोरभेदात् कार्यनाशे सति कार्याभिन्नतया पुरुषस्यापि नाशः स्यात् इति अकारणत्वं पुरुषस्य इति, तदसत् । कार्यकारणयोः अभेदस्यैव असिद्धेः इत्यादीनि दूषणानि मनसि कृत्य **संक्षेप** इति उक्तम् इति भावः ।

कारिकावली

धर्माधर्माश्रयोऽध्यक्षो विशेषगुणयोगतः ।। ४९ ।।

मुक्तावली

धर्माधर्माश्रय इति । ''आत्मा'' इति अनुषज्यते । **शरीरस्य तदाश्रयत्वे** देहान्तरकृतकर्मणां देहान्तरे भोगानुपपत्तेः । **विशेष** इति । योग्यविशेषगुणस्य ज्ञानसुखादेः संबन्धेन आत्मनः प्रत्यक्षत्वं संभवति, न तु **अन्यथा** । ''अहं जाने'', ''अहं करोमि'' इत्यादिप्रतीतेः ।।

दिनकरी

तदाश्रयत्वे – धर्माधर्माश्रयत्वे । **अन्यथा** विशेषगुणसंबन्धात् ऋते । **इत्यादिप्रतीतेः** इति । इत्यादौ ज्ञानादिसंबन्धप्रकारेणैव आत्मनः प्रत्यक्षस्य अनुभवसिद्धत्वात् इत्यर्थः ।।

राजीवोल्लासः

''सुखदुःखहेतुतया सिद्धौ यौ धर्माधर्मौ, तौ द्रव्याश्रितौ, गुणत्वात्'' इत्यनुमानेनापि आत्मसिद्धिः इति भावः । शरीरेण सिद्धसाधनं वारयति मुक्तावल्याम् **शरीरस्य** इत्यादिना । अथ अयमात्मा किम् अनुमेय एव? नेत्याह – **अध्यक्ष** इति, सुबोधिनीकाराः ।।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ परदेहादौ आत्मनि प्रमाणकथनम् ॥

कारिकावली

प्रवृत्त्याद्यनुमेयोऽयं रथगत्येव सारथिः ।

मुक्तावली

प्रवृत्त्या इति । अयम् आत्मा परदेहादौ प्रवृत्त्यादिना अनुमीयते । **प्रवृत्तिः अत्र** चेष्टा । ज्ञानेच्छाप्रयत्नादीनां देहे अभावस्य **उक्तप्रायत्वात्, चेष्टायाश्च** प्रयत्नसाध्यत्वात्, **चेष्टया** प्रयत्नवान् आत्मा अनुमीयते इति भावः । अत्र दृष्टान्तम् आह – **रथ इति । यद्यपि** रथकर्म चेष्टा न भवति, **तथापि** तेन कर्मणा सारथिः यथा अनुमीयते, तथा चेष्टात्मकेन कर्मणा परात्मा अनुमीयते इति भावः ॥

दिनकरी

परकीयप्रवृत्त्यादेः अतीन्द्रियत्वेन हेतुज्ञानासंभवात् स्वरूपासिद्धेश्च आह – **प्रवृत्तिः अत्र** इति । **उक्तप्रायत्वात्** इति । **''शरीरस्य न चैतन्यम्''** इत्यनेन उक्तत्वात् इत्यर्थः । इच्छादीनाम् अभावस्य कण्ठरवेण अनुक्तेः **प्रायःपदम्** । चेष्टायाः प्रवृत्तिज्ञापकत्वे अनुकूलतर्कम् आह – **चेष्टायाश्च** इति । **चेष्टया** इति । **शरीरे समवायेन** चेष्टानुमितस्य अवच्छेदकतया प्रयत्नस्य समवायेन आश्रयः आत्मैव इति भावः । **दृष्टान्तासिद्धिम्** आशङ्क्य निराकरोति – **यद्यपि** इति । **तथापि** इति । तथा च प्राप्तियोग्यक्रियावत्त्वस्यैव हेतुत्वम् इति भावः ॥

राजीवोल्लासः

परकीयप्रवृत्त्यादेः इति । परशरीरे विद्यमानः आत्मा प्रवृत्त्यादिना अनुमीयते इति **मूलोक्तं न संगच्छते** । परकीयकृतिरूपप्रवृत्तेः अतीन्द्रियत्वेन कृतिरूपहेतुज्ञाना-संभवात् । तथा ''परकीयशरीरम् आत्मवत्, प्रवृत्त्यादिमत्त्वात्'' इत्येव अनुमानप्रकारः वक्तव्यः । तत्र हेतोः प्रवृत्त्यादेः परकीयशरीररूपपक्षावृत्तितया स्वरूपासिद्धिश्च

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

इत्याशङ्क्य **प्रवृत्तिः अत्र चेष्टा** इति उक्तम् इति भावः । एवं च ''परशरीरम् आत्मवत्, प्रवृत्तिमत्वात्'' इत्यत्र प्रवृत्तिशब्देन शरीरगता चेष्टा विवक्षिता । शरीरगतचेष्टां प्रति आत्मनिष्ठप्रयत्नस्य हेतुत्वात् । परशरीरे आत्मानं विना तत्प्रयत्नसाध्यचेष्टायाः अनुपपत्तेः चेष्टया प्रयत्नवान् आत्मा अनुमीयत इति तात्पर्यम् ।

शरीरे समवायेन इति । समवायसंबन्धेन चेष्टां प्रति अवच्छेदकतासंबन्धेन प्रयत्नः कारणम् । शरीरावच्छिन्ने आत्मनि प्रयत्नस्य उत्पत्त्या आत्मगतस्य प्रयत्नस्य शरीरम् अवच्छेदकम् । एवञ्च समवायसंबन्धेन प्रयत्नाश्रये आत्मनि सिद्धे प्रयत्नस्य अवच्छेदकं शरीरं भवितुम् अर्हति । अतः चेष्टया प्रयत्नवान् आत्मा अनुमीयत इति भावः ।

दृष्टान्तासिद्धिम् इति । रथगमनेन सारथ्यनुमानं दृष्टान्तः । शरीरचेष्टया आत्मानुमाने रथकर्म कथं दृष्टान्तः? रथे चेष्टारूपकर्मणः अभावात् इति दृष्टान्तासिद्धि-शङ्का । समाधानं तु – ''शरीरं चेतनाधिष्ठितम्, चेष्टावत्त्वात्'' इत्यनुमाने चेष्टाशब्देन चेष्टात्वजातिविशिष्टा क्रिया न विवक्षिता । किन्तु उत्तरदेशसंयोगप्राप्त्यनुकूला क्रिया विवक्षिता । सा च क्रिया रथेऽपि अस्ति इति रथकर्मणः दृष्टान्तत्वं संभवति इति ।।

।। आत्मस्वरूपवर्णनम् ।।

कारिकावली

अहङ्कारस्याश्रयोऽयं मनोमात्रस्य गोचरः ।। ५० ।।
विभुर्बुद्ध्यादिगुणवान्...............

मुक्तावली

अहङ्कारस्य इति । अहङ्कारः ''अहम्'' इति प्रत्ययः, तस्य आश्रयः – विषयः आत्मा, न शरीरादिः इति । **मन** इति । मनोभिन्नेन्द्रियजन्यप्रत्यक्षाविषयः,

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

मानसप्रत्यक्षविषयश्च इत्यर्थः । **रूपाद्यभावेन** इन्द्रियान्तरायोग्यत्वात् । **विभुः** इति । विभुत्वं परममहत्परिमाणवत्त्वम् । **तच्च** पूर्वम् उक्तमपि स्पष्टार्थम् उक्तम् । **बुद्ध्यादिगुणवान्** इति । बुद्धिसुखदुःखेच्छादयः चतुर्दशगुणाः **पूर्वम् उक्ता** वेदितव्याः ।।

दिनकरी

आत्मनः मनोमात्रजन्यज्ञानविषयत्वे हेतुम् आह – **रूपाद्यभावेन** इति ।

''कालखात्मदिशां सर्वगतत्वं परमं महत्'' इत्यनेन आत्मनि परममहत्त्वस्य उक्तेः पौनरुक्त्यम् आशङ्क्य आह – **तच्च** इति । **पूर्वम् उक्ता** इति ।

''बुद्ध्यादिषट्कं संख्यादिपञ्चकं भावना तथा ।
धर्माधर्मौ गुणा एते आत्मनः स्युश्चतुर्दश'' ।।

इत्यनेन साधर्म्यप्रकरणे [32-33] कथिताः इत्यर्थः ।।

।। प्रत्यक्षादिप्रमालक्षणकथनम् ।।

कारिकावली

.... बुद्धिस्तु द्विविधा मता ।
अनुभूतिः स्मृतिश्च स्यात्, अनुभूतिः चतुर्विधा ।। ५० ।।
प्रत्यक्षमप्यनुमितिस्तथोपमितिशब्दजे ।

मुक्तावली

अत्रैव प्रसङ्गात् कतिपयं बुद्धेः प्रपञ्चं दर्शयति – **बुद्धिस्तु** इति । द्वैविध्यं व्युत्पादयति – **अनुभूतिः** इति । चातुर्विध्यम् व्युत्पादयति – **प्रत्यक्षम्** इति ।

दिनकरी

मूले ''**बुद्धिस्तु द्विविधा मता, अनुभूतिः स्मृतिश्च** । तत्र अनुभूतिः प्रत्यक्षात्मिकैव इति चार्वाकाः । अनुमितिरपि इति कणादसुगतौ । उपमितिरपि

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

इति केचित् नैयायिकैकदेशिनः । **अर्थापत्तिरपि** इति प्राभाकराः । **अनुपलब्धिरपि** इति भाट्टाः वेदान्तिनश्च । **संभवैतिह्यरूपे अपि** इति पौराणिकाः । तत्सर्वम् अयुक्तम् इति सूचयितुम् अनुभूतेः चातुर्विध्यम् आह – **अनुभूतिः चतुर्विधा** इति । ''अनुमिनोमि'', ''उपमिनोमि'', ''शाब्दयामि'' इति प्रतीतिसिद्धानाम् अनुमित्यादीनां दुर्वारतया **चार्वाकाद्युदितम्** अयुक्तम् । **अर्थापत्तेश्च** अनुमितौ एव अन्तर्भावः **व्यतिरेकिग्रन्थे** व्यक्तीभविष्यति । अनुपलब्धेस्तु अभाव एव अन्तर्भावः । अन्यासां च यथायथम् अनुमित्यादौ अन्तर्भावः इति भावः ।।

राजीवोल्लासः

अर्थापत्तिरपि इति । अर्थापत्तिरूपः अपि अनुभवः अस्ति इति प्राभाकराः वदन्ति । अर्थापत्तिर्नाम ''पीनो देवदत्तः दिवा न भुङ्क्ते'' इति दिवा अभुञ्जानस्य देवदत्तस्य पीनत्वज्ञानानन्तरं रात्रिभोजनं विना पीनत्वस्य अनुपपत्त्या यत् देवदत्तस्य रात्रिभोजनकल्पनं तत् । **अनुपलब्धिरपि** इति । अनुपलब्धिः नाम प्रतियोग्युपलम्भाभावः । तज्जन्या अभावप्रतीतिः अनुपलब्ध्यात्मिका प्रमितिः । यथा भूतले घटोपलब्ध्यभावात् घटाभावप्रतीतिः इति भाट्टाः वेदान्तिनश्च वदन्ति । अर्थापत्त्यनुपलब्ध्योः प्रमाणं प्रमितिश्च अर्थापत्तिशब्देन अनुपलब्धिशब्देन च व्यवह्रियते । अन्यथानुपपत्तिज्ञानं प्रमाणात्मकार्थापत्तिः । अर्थान्तरकल्पनं प्रमात्मकार्थापत्तिः । प्रतियोग्युपलम्भाभावः प्रमाणरूपानुपलब्धिः । अभावज्ञानं प्रमितिरूपा अनुपलब्धिः ।

सम्भवैतिह्यरूपे अपि इति । ''शतमस्ति'' इति ज्ञानानन्तरं ''शतं पञ्चाशत् घटितम्'' इति ज्ञानात् ''शते पञ्चाशत् अस्ति'' इति यः अनुभवः सः संभव इति उच्यते । ''इह वटे यक्षः तिष्ठति'' इति अज्ञातमूलवक्तृकवाक्यात् जायमानः अनुभवः ऐतिह्यम् ।

चार्वाकाद्युदितम् इति । प्रत्यक्षात्मिका एकैव प्रमितिः इति चार्वाकादिभिः

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

उक्तम् अयुक्तम् । "अनुमिनोमि", "उपमिनोमि", "शाब्दयामि" इति अनुव्यवसायप्रतीतिसिद्धानां अनुमित्युपमितिशाब्दानामपि अनुभवानां सद्भावात् इत्यर्थः । **अर्थापत्तेश्च इति** । अर्थापत्तेः व्यतिरेकव्याप्तियुक्तलिङ्गजन्यतया अनुमितौ अन्तर्भावः इति व्यतिरेकिग्रन्थे स्पष्टीभविष्यति । "देवदत्तः रात्रौ भुङ्क्ते, दिवा अभुञ्जानत्वे सति पीनत्वात्, यः रात्रौ न भुङ्क्ते सः दिवा अभुञ्जानत्वे सति पीनो न भवति, यथा रात्रौ दिवा अभुञ्जानः कृशो महर्षिः, न तथा चायम्, तस्मान्न तथा" इति व्यतिरेक्यनुमानप्रयोगः अत्र विवक्षितः । अभावप्रमात्मिका अनुपलब्धिरपि प्रतियोग्युपलम्भाभावसहितेन्द्रियजन्यतया प्रत्यक्षात्मकानुभवे एव अन्तर्भावात् अनुपलब्धिः न प्रमित्यन्तरम् । सम्भवस्य अनुमितौ अन्तर्भावः । "इदं अधिवेशनं पञ्चाशद्ब्राह्मणवत्, शतब्राह्मणवत्त्वात्, यत् शतसंख्याकवस्तुमत् तत् पञ्चाशत्संख्याकवस्तुमत्, यथा शतघटाधिकरणं भूतलम्" इति सामान्यमुखव्याप्तिविषयकपरामर्शजन्यानुमितिरूपैव संभवात्मिका प्रमितिः । ऐतिह्यस्य शाब्देऽन्तर्भावः ।।

।। प्रत्यक्षलक्षणम् ।।

मुक्तावली

इन्द्रियजन्यं ज्ञानं प्रत्यक्षम् । यद्यपि मनोरूपेन्द्रियजन्यं सर्वमेव ज्ञानम्, तथापि इन्द्रियत्वेन रूपेण इन्द्रियाणां यत्र ज्ञाने करणत्वं तत् प्रत्यक्षम् इति विवक्षितम् ।

ईश्वरप्रत्यक्षं तु न लक्ष्यम् । "इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानम् अव्यपदेश्यम् अव्यभिचारि व्यवसायात्मकं प्रत्यक्षम्" इति सूत्रे तथैव उक्तत्वात् ।

अथवा ज्ञानाकरणकं ज्ञानं प्रत्यक्षम् । अनुमितौ व्याप्तिज्ञानस्य, उपमितौ सादृश्यज्ञानस्य, शाब्दबोधे पदज्ञानस्य, स्मृतावनुभवस्य करणत्वात् तत्र न अतिव्याप्तिः । इदं लक्षणम् ईश्वरप्रत्यक्षसाधारणम् ।।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

दिनकरी

उद्दिष्टासु प्रमासु प्रथमोपस्थितत्वात् प्रत्यक्षं लक्षयति **मुक्तावल्याम्** – **इन्द्रियजन्यम्** इति । इन्द्रियजन्यत्वम् **इन्द्रियरूपादौ** अपि अस्ति, अतः **ज्ञानम्** इति । अनुमित्यादौ अतिव्याप्तिवारणाय **इन्द्रियजन्यम्** इति । इन्द्रियजन्यत्वविशेषणे दत्तेऽपि अनुमित्यादौ अतिव्याप्तिः तदवस्था इति आशङ्कते – **यद्यपि** इति । ननु इन्द्रियजन्यत्वाभावात् ईश्वरप्रत्यक्षे अव्याप्तिः, अत आह – **ईश्वरप्रत्यक्षं तु** इति । तथा च जन्यप्रत्यक्षमेव **लक्ष्यम्** इति भावः । ननु तस्यैव लक्ष्यत्वे किं मानम्, अत आह – **इन्द्रियार्थ** इति । "इन्द्रियार्थसंनिकर्षोत्पन्नम्" इत्यनेन ईश्वरप्रत्यक्षम् अनुमित्यादि च व्यवर्त्यते । **भ्रमवारणाय** आह – **अव्यभिचारि** इति । भ्रमभिन्नम् इत्यर्थः ।

एतावता प्रत्यक्षप्रमाया लक्षणम् उक्तम् । तद्विभागम् आह – **अव्यपदेश्यम्** इति । निर्विकल्पकम् इत्यर्थः । न च – अव्यपदेश्यपदेन कथं निर्विकल्पकलाभः इति – वाच्यम् । व्यपदेशः – पदवाच्यत्वं **तदविषयकम्** इत्यर्थात् विशिष्टज्ञाने तत्तत्पदवाच्यत्वम् उपनीतं भासते इति प्राचीनमतानुसारित्वात् । अत एव कणादं – कणादनामानं मुनिम् इत्यादि तत्र तत्र उक्तं सङ्गच्छते ।

यद्वा व्यपदेशः – शब्दप्रयोगः । स च विशिष्टज्ञानादेव इति अव्यपदेश्यत्वेन व्यपदेशानर्हत्वेन निर्विकल्पकलाभः । **व्यवसायात्मकम्** इति । विशिष्टव्यवसायात्मकम् इत्यर्थः । विशिष्टज्ञानात्मकम् इति यावत् । एवं च सूत्रे "इन्द्रियार्थसन्निकर्षोत्पन्नम् अव्यभिचारि अव्यपदेश्यं व्यवसायात्मकम्" इति योजना बोध्या । **अन्यथा** लक्षणवाक्ये विभागबोधकपदेन व्यवधानात् असङ्गतेः इति । **तथैवोक्तत्वात्** इति । ईश्वरप्रत्यक्षालक्ष्यत्वस्यैव अभिप्रेतत्वात् इत्यर्थः ।

ईश्वरप्रत्यक्षस्यापि लक्ष्यत्वम् अभिप्रेत्य आह – **अथ वा** इति । **ज्ञानाकरणकम्** इति । ज्ञानाजन्यम् इत्युक्तौ च अव्याप्तिः, विशिष्टज्ञानमात्रस्य

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

विशेषणज्ञानजन्यत्वात्, अतः **ज्ञानाकरणकम्** इति । अनुमित्यादौ व्याप्त्यादिज्ञानस्य करणत्वम् अस्त्येव इति न अनुमित्यादौ अतिव्याप्तिः । अकरणकत्वादेव च ईश्वरज्ञानसङ्ग्रहः । **अथ निदिध्यासनद्वारा** मननादिज्ञानकरणके योगिप्रत्यक्षे लक्षणमिदम् अव्यापकम् इति चेत्, न । **ज्ञानाकरणकपदेन** ज्ञानत्वगर्भधर्मावच्छिन्न-करणत्वाभावस्य विवक्षितत्वात् । **न च इदं** योगिप्रत्यक्षाव्यापकम्, **श्रवणादिप्रतिपत्तीनां शाब्दत्वादिनैव** जनकत्वेन **विशिष्टाभावसत्त्वात्** इति ।

अथवा ज्ञानकरणकत्वाव्यभिचारिजातिशून्यज्ञानत्वम् इह विवक्षितम् । तादृशी च जातिः अनुमितित्वादिरेव । **एतेन** अनुमित्यादौ व्याप्तिज्ञानादेः ज्ञानत्वेन करणतानये ज्ञानत्वघटितकरणतावच्छेदकधर्माप्रसिद्ध्या असंभवोऽपि प्रत्युक्तः इति । **"व्याप्तिज्ञानस्य"** इति षष्ठ्यन्तचतुष्टयस्य **करणत्वात्** इत्यनेन अन्वयः । **न च – स्मरणात्मकपरामर्शस्थले** व्याप्तिज्ञानस्य करणत्वासंभव इति – वाच्यम् । तत्र व्याप्तिज्ञानस्य **संस्कारद्वारा** हेतुत्वात् । **न च – ज्ञानपदं** सविषयकपरमेव आस्ताम् । किं व्याप्तिज्ञानस्य संस्कारद्वारा तत्र हेतुत्वकल्पनेन? इति – वाच्यम् । इच्छादितः संस्काराच्च अनुमितेः अनुदयात् सविषयकत्वस्य **अतिप्रसक्तत्वात्** । **सादृश्यज्ञानस्य – सादृश्यप्रकारकज्ञानस्य** । **तत्र** – अनुमित्यादौ ।।

राजीवोल्लासः

इन्द्रियरूपादौ अपि इति । इन्द्रियसमवेतरूपं प्रति इन्द्रियस्य समवायि-कारणत्वात् इन्द्रियरूपे इन्द्रियजन्यत्वसत्त्वात् अत्र प्रत्यक्षलक्षणस्य अतिव्याप्तिः । तद्वारणाय प्रत्यक्षलक्षणे ज्ञानत्वनिवेशः । ज्ञानत्वस्य अनुमित्यादावपि सत्त्वात् तत्र अतिव्याप्तिः । तद्वारणाय इन्द्रियजन्यत्वस्य निवेशः । इन्द्रियजन्यत्वनिवेशेऽपि मनसः ज्ञानसामान्यकारणत्वेन अनुमित्यादिष्वपि मनोरूपेन्द्रियजन्यत्वसत्त्वात् अतिव्याप्तिः इति आशङ्क्य इन्द्रियत्वेन इन्द्रियजन्यत्वम् निवेशनीयम् इति उक्तं मूले । अनुमित्यादौ मनसः मनस्त्वेनैव करणत्वम्, इन्द्रियत्वेन करणत्वं तु प्रत्यक्षे

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

एव । अतः न अतिव्याप्तिः । तथा च इन्द्रियत्वावच्छिन्न-इन्द्रियनिष्ठ-कारणतानिरूपित-कार्यत्वे सति ज्ञानत्वं प्रत्यक्षलक्षणम् । **तथा च जन्यप्रत्यक्षमेव लक्ष्यम्** इति । नित्ये ईश्वरप्रत्यक्षे इन्द्रियजन्यत्वाभावात् ईश्वरप्रत्यक्षे अव्याप्त्यापत्त्या इन्द्रियजन्यज्ञानत्वं न प्रत्यक्षसामान्यलक्षणम् । किन्तु जन्यप्रत्यक्षस्यैव लक्षणम् इति भावः ।

इन्द्रियार्थसन्निकर्षोत्पन्नम् इति । प्रत्यक्षलक्षणप्रतिपादके सूत्रे इन्द्रियार्थसन्निकर्षोत्पन्नं इति यद्विशेषणं तत् ईश्वरप्रत्यक्षस्य च अनुमित्यादेश्च व्यावर्तकम् । तेन ईश्वरप्रत्यक्षम् अलक्ष्यम् इति सूचितम् । **भ्रमवारणाय** इति । भ्रमे प्रत्यक्षलक्षणस्य अतिव्याप्तिवारणाय इत्यर्थः । **तदविषयकम्** इति । पदवाच्यत्वाविषयकम् इत्यर्थः । सविकल्पकात्मके विशिष्टज्ञाने इदमंशे तत्तत्पदवाच्यत्वं उपनयमर्यादया भासते । तथा च ''अयं घटपदवाच्यः'' इत्येव सविकल्पकज्ञानस्य आकारः । निर्विकल्पके तु घटपदवाच्यत्वं न भासते । अतः अव्यपदेश्यपदेन निर्विकल्पकम् उच्यते इति **प्राचीनानां** मतम् ।

यद्वा इति । व्यपदेशमर्हति इति व्यपदेश्यम् । व्यपदेशार्हं – व्यपदेशकारणम् व्यपदेश्यमित्युच्यते । व्यपदेशो नाम शब्दप्रयोगः । सविकल्पकज्ञानादेव ''अयं घटः'' इत्यादि शब्दप्रयोगः भवति । अतः शब्दप्रयोगकारणभूतं सविकल्पकं व्यपदेश्यम् । तद्भिन्नं निर्विकल्पकम् अव्यपदेश्यम् ।

ननु अनुव्यवसायभिन्नं ज्ञानं व्यवसायः । निर्विकल्पकस्यापि अनुव्यवसायभिन्नत्वात् ''व्यवसायात्मकम्'' इत्यनेन तस्यापि ग्रहणं स्यात् इत्याशङ्क्य आह – **विशिष्टव्यवसायात्मकम्** इति । विशिष्टज्ञानात्मकम् इति तदर्थः । निर्विकल्पकस्य तु न विशिष्टज्ञानरूपत्वम् । तथा व्यवसायात्मकशब्देन न तस्य ग्रहणम् । **एवं च सूत्रे** इति । ''इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानम् अव्यभिचारि प्रत्यक्षम्'' इति लक्षणपरं वाक्यम् । ''अव्यपदेश्यं व्यवसायात्मकम्'' इति विभागपरम् इति

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

विवेको बोध्यः । **अन्यथा इति** । पूर्वोक्तरीत्या पदानां योजनायाः अनङ्गीकारे लक्षणप्रतिपादकवाक्ये विभागबोधकेन अव्यपदेश्यपदेन व्यवधानात् लक्षणप्रतिपादकत्वं नास्ति इति असङ्गतिः ।

ननु ईश्वरप्रत्यक्षस्यापि लक्ष्यत्वमभिप्रेत्य **''ज्ञानाकरणकं ज्ञानं प्रत्यक्षम्''** इति लक्षणान्तरम् उक्तं मूले । तत्र ज्ञानाजन्यम् इत्येव अस्तु, किमर्थं ज्ञानाकरणकम् इति उक्तम् इत्याशङ्कायाम् आह – **ज्ञानाजन्यम् इति उक्तौ इति** । ''ज्ञानाजन्यं ज्ञानं प्रत्यक्षम्'' इत्युक्तौ विशिष्टज्ञानरूपस्य सविकल्पकस्य निर्विकल्पकात्मक-विशेषणज्ञानजन्यत्वात् ज्ञानाजन्यत्वं नास्ति इति सविकल्पके अव्याप्तिः । तद्वारणाय ज्ञानाकरणकम् इति उक्तम् । ज्ञानं करणं यस्य न भवति तत् ज्ञानाकरणकम् । निर्विकल्पकज्ञानं सविकल्पकज्ञानस्य यद्यपि कारणम् तथापि न करणं, व्यापारद्वारा कारणस्यैव करणत्वात् । तथा च निर्विकल्पकज्ञानाकरणकत्वं सविकल्पके अस्ति इति न अव्याप्तिः । तथा च ज्ञाननिष्ठव्यापारद्वारककारणतानि-रूपितकार्यता-शून्यत्वं ज्ञानाकरणकत्वम् । अनुमित्यादौ तु व्याप्तिज्ञानादेः परामर्शादिद्वारा कारणत्वात् व्याप्तिज्ञानादिनिष्ठव्यापारद्वारककारणतानिरूपितकार्यत्वमेव अस्ति इति, न तु तच्छून्यत्वरूपं ज्ञानाकरणकत्वम् इति, न अतिव्याप्तिः । ईश्वरप्रत्यक्षे ज्ञानं कारणमेव न भवति सुतरां करणं न भवति इति ज्ञानाकरणकत्वसद्भावात् न अव्याप्तिः इति भावः ।

अथ निदिध्यासनद्वारा इति । योगिनां आत्मतत्त्वज्ञानरूपं यत् प्रत्यक्षं तत्र आत्मश्रवणं आत्ममननं च निदिध्यासनद्वारा करणं भवति । तथा च तस्मिन् प्रत्यक्षे मननादि ज्ञानकरणकत्वस्यैव सत्त्वात् ज्ञानाकरणकत्वं नास्ति इति योगिप्रत्यक्षे इदं लक्षणं अव्याप्तम् इति शङ्का । तत्समाधानम् आह – **ज्ञानाकरणकपदेन इति** । ज्ञाननिष्ठा ज्ञानत्वघटितधर्मावच्छिन्ना या कारणता तन्निरूपितकार्यताशून्यत्वम् ज्ञानाकरणकपदेन विवक्षितम् । मनननिष्ठा या योगिप्रत्यक्षनिरूपिता करणता सा

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

मननत्वावच्छिन्ना । मननत्वं च अनुमितित्वं, परामर्शजन्यज्ञानत्वात्मकम् ज्ञानत्व-घटितम् । तत्र अनुमितिरूपस्य मननस्य योगिप्रत्यक्षं प्रति परामर्शजन्यत्वेनैव करणत्वम्, न तु परामर्शजन्यत्वविशिष्टज्ञानत्वेन । एवं श्रवणस्य वाक्यजन्य-ज्ञानात्मकस्य निदिध्यासनद्वारा प्रत्यक्षं प्रति वाक्यजन्यत्वेनैव करणत्वम्, न तु वाक्यजन्यत्वविशिष्टज्ञानत्वेन । तथा च श्रवणमनननिष्ठायाः करणतायाः वाक्यजन्यत्वपरामर्शजन्यत्वावच्छिन्नायाः ज्ञानत्वघटितधर्मावच्छिन्नत्वाभावात् ज्ञानत्वघटितधर्मावच्छिन्नकरणतानिरूपितकार्यताशून्यत्वम् योगिप्रत्यक्षे अस्ति इति न अव्याप्तिः इति भावः । अव्याप्त्यभावमेव उपपादयति – **न च इदम्** इति । इदं – ज्ञानत्वघटितधर्मावच्छिन्नकरणतानिरूपितकार्यताशून्यत्वरूपं प्रत्यक्षलक्षणं योगिप्रत्यक्षाव्यापकं न भवति, कुतः? इति अत्र आह – **श्रवणादिप्रतिपत्तीनाम्** इति । **शाब्दत्वादिना एव** इति । शब्दजन्यत्वादिनैव इत्यादिना । ''एव'' कारेण ज्ञानत्वव्यवच्छेदः । **विशिष्टाभावसत्त्वात्** इति । पूर्वोक्तकार्यत्वाभावस्य सत्त्वात् इत्यर्थः ।

ननु एवमपि ''भूतलं घटवत्'' इत्याकारके घटत्वविशिष्टघटवैशिष्ट्यावगाहि प्रत्यक्षे अव्याप्तिः । घटत्वनिर्विकल्पकानन्तरं ''अयं घटः'' इति सविकल्पके जाते तदनन्तरं ''भूतलं घटवत्'' इति प्रत्यक्षस्य उत्पत्या तस्मिन् प्रत्यक्षे सविकल्पव्यापारकनिर्विकल्पकज्ञानकरणकत्वस्यैव सत्त्वेन ज्ञानाकरणकत्वविरहात् इति अस्वरसात् आह – **अथ वा** इति । ज्ञानाकरणकत्वाव्यभिचारिणी – ज्ञानकरणकत्वव्याप्या या जातिः तच्छून्यत्वे सति ज्ञानत्वं प्रत्यक्षस्य लक्षणम् । अनुमित्यादिषु नियमेन ज्ञानकरणकत्वसत्त्वात् ज्ञानकरणकत्वव्याप्या जातिः अनुमितित्वादिजातिः, तच्छून्यत्वे सति ज्ञानत्वं सर्वेष्वपि प्रत्यक्षेषु वर्तत इति न अव्याप्तिः । प्रत्यक्षत्वं तु यद्यपि निर्विकल्पककरणके विशिष्टवैशिष्ट्यावगाहिप्रत्यक्षे वर्तते, तथापि प्रत्यक्षत्वं न ज्ञानकरणकत्वव्याप्यम् । ज्ञानकरणकत्वशून्ये निर्विकल्पके ''अयं घटः'' इति सविकल्पके च प्रत्यक्षत्वसत्त्वात् ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

ननु **मणिकारैः** ''विशिष्टवैशिष्ट्यावगाहिप्रत्यक्षे विशेषणतावच्छेदकप्रकारकं ज्ञानमेव कारणम् । न तु तद्वारा निर्विकल्पकमपि'' इत्युक्तत्वात् विशिष्टवैशिष्ट्यावगाहिप्रत्यक्षे अव्याप्त्यप्रसक्त्या तद्वारणफलकद्वितीयकल्पानुसरणं व्यर्थमित्याशङ्क्य आह – **एतेन** इति । ज्ञानत्वघटितधर्मावच्छिन्नकरणतानिरूपकत्वाभावस्य लक्षणत्वे अनुमित्यादौ व्याप्तिज्ञानादेः ज्ञानत्वेनैव करणत्वम् न तु व्याप्तिविषयकज्ञानत्वेन इति मते व्याप्तिज्ञाननिष्ठकरणतायाः ज्ञानत्वावच्छिन्नत्वेऽपि ज्ञानत्वघटितधर्मावच्छिन्नत्वं नास्ति इति ज्ञानत्वघटितधर्मावच्छिन्नकरणत्वाप्रसिद्ध्या तन्निरूपकत्वाभावरूपस्य लक्षणस्य असंभवः प्रसजति । **अथवा** इत्यादिकल्पान्तरे तु ज्ञानत्वेन ज्ञानकरणकत्वव्याप्या जातिः अनुमितित्वादिः । तच्छून्यत्वं प्रत्यक्षे अस्ति इति न असंभवस्य प्रसक्तिः । न च – व्याप्तिज्ञानस्य ज्ञानत्वेन करणत्वे घटज्ञानादेरपि अनुमितिकरणत्वापत्तिः । अतः ज्ञानत्वेन करणत्वम् इति मतमेव अयुक्तम् इति – वाच्यम् । घटज्ञानानन्तरं परामर्शाभावादेव अनुमितेः वारणसंभवात् ।

न च स्मरणात्मकपरामर्शस्थल इति । परामर्शः मानसः प्रत्यक्षः इति कश्चित् पक्षः । सः स्मरणात्मकः इति अन्यः पक्षः । स्मरणात्मक इति पक्षे वन्हिव्याप्यधूमविशिष्टपर्वतविषयकसंस्कार एव परामर्शं प्रति हेतुः । न तु व्याप्तिज्ञानम् इति प्रष्टुः आशयः । **संस्कारद्वारा** इति । तथा च व्याप्तिज्ञानस्य स्वजन्यपरामर्शसंबन्धेन अनुमितौ कारणत्वम् । परामर्शे स्वजन्यत्वं च स्वनिष्ठा या समवाय-स्वजन्यसंस्कारान्यतरसंबन्धावच्छिन्नकारणता-तन्निरूपितकार्यतारूपम् । यत्र व्याप्तिज्ञानानन्तरं मानसप्रत्यक्षरूपः परामर्शः, तदनन्तरं अनुमितिः, तत्र परामर्शस्य व्याप्तिज्ञाननिष्ठसमवायसंबन्धावच्छिन्नकारणतानिरूपितकार्यत्वम् अस्ति । यत्र तु स्मरणात्मकः परामर्शः ततः अनुमितिः तत्र परामर्शात् पूर्वं व्याप्तिज्ञानजन्यसंस्कारस्य सद्भावात् स्वजन्य-संस्कारसंबन्धावच्छिन्नकारणतानिरूपितकार्यतारूपं व्याप्तिज्ञानजन्यत्वं परामर्शे अस्ति । तथा च उभयत्रापि स्वजन्यपरामर्शसंबन्धेन व्याप्तिज्ञानस्य अनुमितौ कारणत्वम् अक्षतम् इति भावः ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

न च ज्ञानपदम् इति । अनुमितौ व्याप्तिज्ञानं करणम् इत्यत्र ज्ञानपदं सविषयकपरम् । तथा च अनुमितौ व्याप्तिविषयकं करणं इत्यर्थः । स्मरणात्मकपरामर्शस्थले स्मरणात्मकपरामर्शस्य व्याप्तिविषयकसंस्कारजन्यतया तत्र व्याप्तिविषयकसंस्कार एव करणम् । मानसप्रत्यक्षात्मकपरामर्शस्थले व्याप्तिविषयकं ज्ञानं करणम् । अतः न अनुपपत्तिः । अन्यथा स्मरणात्मकपरामर्शस्थले परामर्श-तज्जनकसंस्काराभ्यां द्वाभ्यां व्यवहितस्य व्याप्तिज्ञानस्य करणत्वं कल्पनीयं स्यात् इति शङ्काग्रन्थस्य अभिप्रायः । समाधत्ते – **इच्छादितः** इति । व्याप्तिविषयकत्वेन करणत्वे व्याप्तिविषकेच्छाया अपि करणत्वापत्तिः । एवं संस्कारस्यापि करणत्वापत्तिः । व्याप्तिविषयकेच्छातः संस्काराच्च अनुमितेरनुत्पत्त्या तयोः करणत्वे इष्टापत्तिः वक्तुं न शक्यते । **अतिप्रसक्तत्वात्** इति । अनुमितिकारणताशून्यसंस्कारेच्छयोरपि व्याप्तिविषयकत्वस्य सत्त्वात् इत्यर्थः । "उपमितौ सादृश्यज्ञानं करणम्" इत्युक्ते सादृश्यविषयकं ज्ञानं करणम्, सादृश्यविशिष्टगवयादिविषयकज्ञानं व्यापारः इति भ्रमव्युदासाय व्याचष्टे – **सादृश्यज्ञानस्यसादृश्यप्रकारकज्ञानस्य** इति । तथा च गवयविशेष्यकगोसादृश्यप्रकारकज्ञानमेव उपमितौ करणम् । व्यापारस्तु अतिदेशवाक्यार्थस्मरणम् इति भावः ।।

।। अनुमित्यादिलक्षणम् ।।

मुक्तावली

परामर्शजन्यं ज्ञानम् अनुमितिः । यद्यपि परामर्शप्रत्यक्षादिकं परामर्शजन्यम्, तथापि परामर्शजन्यं हेत्वविषयकं ज्ञानम् अनुमितिः । न च – कादाचित्कहेतु-विषयकानुमितौ अव्याप्तिः इति – वाच्यम् । तादृशज्ञानवृत्त्यनुभवत्वव्याप्य-जातिमत्त्वस्य विवक्षितत्वात् ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अथवा व्याप्तिज्ञानकरणकं ज्ञानम् अनुमितिः । एवं सादृश्यज्ञानकरणकं ज्ञानम् उपमितिः । पदज्ञानकरणकं ज्ञानं शाब्दबोधः ।

वस्तुतो यां कांचित् अनुमितिव्यक्तिम् आदाय तद्व्यक्तिवृत्तिप्रत्यक्षावृत्तिजातिमत्त्वम् अनुमितित्वम् । एवं यत्किंचित्प्रत्यक्षादिकम् आदाय तद्व्यक्तिवृत्त्यनुमित्यवृत्तिजातिमत्त्वं प्रत्यक्षत्वादिकं वाच्यम् इति ।।

दिनकरी

अनुमितिं लक्षयति – **परामर्श इति** । **परामर्शत्वं** च व्याप्तिविशिष्टपक्षधर्मताज्ञानत्वम् । तथा च व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यं ज्ञानम् अनुमितिः इति फलितम् । भवति हि ''वह्निव्याप्यधूमवान् पर्वतः'' इति ज्ञानं व्याप्तिविशिष्टपक्षधर्मताज्ञानं तज्जन्यं ''पर्वतो वह्निमान्'' इति ज्ञानम् इति तत्र लक्षणसमन्वयः । **यद्यपि** इत्यादि । **प्रत्यक्षादिकम् इत्यादिना** विशेषणतावच्छेदकप्रकारकनिश्चयविधया परामर्शजन्यस्य विशिष्टवैशिष्ट्यबोधस्य परिग्रहः । **परामर्शजन्यम्** इति । विषयविधया तत्र परामर्शस्य हेतुत्वात् इति भावः । **कादाचित्क** इति । ''**धूमवान् पर्वतो** वह्निमान्'' इत्यनुमितौ पक्षतावच्छेदकविधया धूमस्य भानात् इति भावः । **तादृश** इति । **कथितनिश्चयजन्यहेत्वविषयकेत्यर्थः** । सत्ताम् आदाय अतिव्याप्तिः, अतः **अनुभवत्वव्याप्य** इति । अनुभवत्वन्यूनवृत्तित्वं तदर्थः । तेन न अनुभवत्वजातिम् आदाय प्रत्यक्षादौ अतिव्याप्तिः । जातिमत्त्वं च समवायेन विवक्षितम् । तेन कालिकसंबन्धेन जातिमति काले न अतिव्याप्तिः ।

पक्षधर्मताया अप्रवेशेन लाघवात् लक्षणान्तरम् आह – **अथ वा** इति । अत्रापि साध्यतावच्छेदकधर्म-साध्यतावच्छेदकसंबन्ध-हेतुतावच्छेदकधर्म-हेतुतावच्छेदकसंबन्धानाम् अननुगमात् एकव्याप्त्युपादाने अन्यानुमितौ अव्याप्तेः एकां व्याप्तिम् उपादाय तज्ज्ञानकरणकवृत्त्यनुभवत्वव्याप्यजातिमत्त्वं विवक्षणीयम् । ननु अनुमितिं प्रत्यपि न व्याप्तिज्ञानत्वेन करणत्वम्, किं तु ज्ञानत्वेन मनस्त्वेनैव

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

वा, एवमेव उपमित्यादौ अपि मनस्त्वेनैव करणत्वम् । **न च – कार्यवैजात्यं न स्यात् इति** – वाच्यम् । सामग्रीवैलक्षण्यादेव तदुपपत्तेः । न च प्रमाणविभागानुपपत्तिः, **क्रियाविशेषात्** तदुपपत्तेः, अतः **पूर्वोक्तानुमित्यादिलक्षणानाम्** असंभवः इति, अत आह – **वस्तुत इति । घटे अतिव्याप्तिवारणाय** वृत्त्यन्तम् । वृत्तित्वं समवायेन विवक्षितम् । तेन अनुमितौ कालिकेन घटत्वस्य वृत्तित्वेऽपि न अतिव्याप्तिः । ज्ञानत्वानुभवत्वादिकम् आदाय प्रत्यक्षादौ अतिव्याप्तिवारणाय विशेष्यदलम् ।

ननु मनसः करणतापक्षे ज्ञानाकरणकत्वं प्रत्यक्षलक्षणम् अनुमित्यादौ अतिव्याप्तम्, अतः प्रत्यक्षस्य लक्षणान्तरम् आह – **एवम् इति । प्रत्यक्षत्वादिकम् इति ।** यत्किंचिदुपमितिव्यक्तिवृत्तिप्रत्यक्षासमवेतजातिमत्त्वम् उपमितित्वम् । यत्किंचिच्छाब्दबोधव्यक्तिम् आदाय तद्व्यक्तिवृत्तिप्रत्यक्षासमवेतजातिमत्त्वं निर्वाच्यम् इत्यर्थः । **शब्दभेदेन** अनुमित्यादीनां लक्षणकथनम् **अनुभवत्वजात्यङ्गीकारेण,** तदनङ्गीकारे तद्व्यक्तिसमवेतस्मरणासमवेतधर्मसमवायित्वरूपस्य लक्षणचतुष्टयस्य एकशब्देन वक्तुं शक्यत्वात् इति ध्येयम् ॥

राजीवोल्लासः

परामर्शत्वं च इति । व्याप्तिविशिष्टं व्याप्तिप्रकारकं यत् पक्षधर्मताज्ञानं पक्षविशेष्यक-हेतुतावच्छेदकसंसर्गक – हेतुप्रकारकं ज्ञानं तत् परामर्शः । हेत्वंशे व्याप्तिप्रकारकं पक्षे हेतुप्रकारकं च यत् ज्ञानं तज्जन्यं ज्ञानं अनुमितिः इति पर्यवसितम् ।

परामर्शविषयकप्रत्यक्षस्य ''परामृशामि'' इत्याकारकस्य परामर्शजन्यत्वम् अस्ति । प्रत्यक्षे विषयस्य कारणत्वात् । तथा च परामर्शजन्यज्ञानत्वरूपस्य अनुमितिलक्षणस्य परामर्शविषयकप्रत्यक्षे अतिव्याप्तिः इत्याशङ्क्य परामर्शजन्यं हेत्वविषयकं ज्ञानं अनुमितिः । परामर्शप्रत्यक्षस्य हेतुविषयकत्वात् न तत्र अतिव्याप्तिः इति **मूले** उक्तम् । तत्र ''परामर्शप्रत्यक्षादिकम्'' इति ''आदि'' पदग्राह्यं स्थलं

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्रदर्शयति – **प्रत्यक्षादिकम्** इत्यादिना इति । "वन्हिव्याप्यधूमवत्पर्वतवान् अयं देशः" इत्याकारकं यत् वह्निव्याप्यधूमविशिष्टपर्वतवैशिष्ट्यावगाहि प्रत्यक्षं तत्र "वन्हिव्याप्यधूमवान् पर्वतः" इति परामर्शस्य विशेषणतावच्छेदकप्रकारकनिश्चय-विधया कारणत्वात् । (देशे पर्वतः विशेषणम् । तत्र वन्हिव्याप्यधूमः विशेषणम् इति वन्हिव्याप्यधूमः विशेषणतावच्छेदकः तत्प्रकारकनिश्चयः "वन्हिव्याप्यधूमवान् पर्वतः" इत्याकारकः परामर्शः) । परामर्शजन्यत्वस्य उंक्तविशिष्टवैशिष्ट्यावगाहिप्रत्यये सत्त्वात् अत्र अनुमितिलक्षणस्य अतिव्याप्तिः । परामर्शनिष्ठसमवायसंबन्धावच्छिन्न-कारणतानिरूपित-समवायसंबन्धावच्छिन्न-कार्यत्वम् अनुमितेः लक्षणम् इत्युक्तौ "परामृशामि" इत्याकारके परामर्शप्रत्यक्षे न अतिव्याप्तिः । प्रत्यक्षे विषयस्य तादात्म्यसंबन्धेनैव हेतुत्वात् समवायसंबन्धेन हेतुत्वाभावात् इत्यालोच्य "आदि"पदग्राह्यस्थलान्तरे अतिव्याप्तिकथनम् ।

धूमवान् पर्वतः इत्यादि । यत्र आलोकलिङ्गेन धूमविशिष्टपर्वते वन्हिः साध्यते, तत्र "धूमवान् पर्वतो वन्हिमान्" इत्याकारकानुमितौ पक्षविशेषणतया धूमरूपहेतोः विषयत्वात् हेत्वविषयकत्वम् अनुमितौ नास्ति इति अव्याप्तिः इति भावः । **कथितनिश्चय** इति । परामर्शजन्यहेत्वविषयकज्ञानवृत्तिः अनुभवत्वव्याप्या या जातिः तादृशजातिमत्त्वम् अनुमितेः लक्षणम् । परामर्शजन्यं हेत्वविषयकं ज्ञानं "पर्वतो वन्हिमान्" इति ज्ञानम् । तद्वृत्तिः अनुभवत्वव्याप्यजातिः अनुमितित्वम् । तद्वत्त्वस्य "धूमवान् पर्वतो वन्हिमान्" इति हेतुविषयकानुमितावपि सत्त्वात् न अव्याप्तिः इति भावः ।

अत्रापि इति । व्याप्तिज्ञानकरणकं ज्ञानम् अनुमितिः इत्यस्मिन् लक्षणेऽपि व्याप्तिघटकानां साध्यतावच्छेदकधर्म-साध्यतावच्छेदकसंबन्ध-हेतुतावच्छेदकधर्म-हेतुतावच्छेदकसंबन्धानाम् साध्यहेत्वादिभेदेन भिन्नत्वात् एकव्याप्तिज्ञानकरणकत्वनिवेशे अन्यव्याप्तिकरणकानुमितौ अव्याप्तिः । अतः जातिघटितमेव लक्षणं विवक्षणीयम् ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

तच्च एकतरव्याप्तिज्ञानकरणकज्ञानवृत्तिः अनुभवत्वव्याप्या या जातिः तद्वत्त्वम् । सा च जातिः अनुमितित्वम् । सा च सर्वासु अनुमितिषु वर्तत इति न अव्याप्तिः ।

वस्तुतः इति ग्रन्थम् अवतारयति – **ननु अनुमितिं प्रत्यपि** इति । अनुमितिं प्रत्यपि न व्याप्तिज्ञानत्वेन करणत्वम् । किन्तु ज्ञानत्वेन मनस्त्वेनैव वा करणत्वम् । न च – ज्ञानत्वेन मनस्त्वेन वा करणत्वे यत्किञ्चिद्घटादिज्ञानादपि, एवं केवलमनसः अपि अनुमितिः स्यात् इति – वाच्यम् । कारणान्तरसहकृतस्यैव ज्ञानस्य मनसः वा करणत्वात् घटादिज्ञानकाले परामर्शरूपकारणान्तराभावादेव अनुमितिवारणसंभवात् ।

अत्र च ज्ञानत्वेन करणतापक्षे अनन्तज्ञानव्यक्तीनां करणत्वकल्पनापत्तिः । अपि च परामर्शस्यापि ज्ञानत्वात् तस्य स्वजन्यज्ञानवत्त्वसंबन्धेन करणत्वे मानाभावश्च इत्यालोच्य मनस्त्वेन वा इत्युक्तम् ।

न च कार्यवैजात्यं न स्यात् इति । मनस्त्वेन कारणतापक्षे प्रत्यक्षोपमित्यादावपि मनःकरणकत्वसत्त्वात् प्रत्यक्षादितः अनुमितेः विजातीयत्वं न स्यात् इति – न च वाच्यम् । मनोऽतिरिक्तपरामर्शादिकारणवैलक्षण्यादेव अनुमितौ प्रत्यक्षादिविजातीयत्वोपपत्तेः ।

न च प्रमाणविभागानुपपत्तिः इति । मनस्त्वेन करणत्वे प्रत्यक्षादिषु सर्वास्वपि प्रमितिषु मनसः करणत्वात् करणतावच्छेदकभेदाभावात् इति ''प्रत्यक्षम्'', ''अनुमानम्'' इति प्रमाणविभागो न स्यात् इति – न च वाच्यम् । प्रत्यक्षानुमित्यादिप्रमायाः विजातीयत्वात् प्रमाभेदमादाय प्रमाणानां विभागस्य संभवात् । एवं च प्रत्यक्षप्रमाजनकं मनः प्रत्यक्षप्रमाणम् । अनुमितिकरणं मनः अनुमानप्रमाणम् इति रीत्या विभागे न काचिदनुपपत्तिः ।

क्रियाविशेषात् इति । धात्वर्थप्रमाभेदादित्यर्थः । **पूर्वोक्तलक्षणानाम्** इति । व्याप्तिज्ञानकरणकं ज्ञानमनुमितिः इत्यादिलक्षणानामित्यर्थः । घटे अतिव्याप्तिवारणाय

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

इत्यादि । यां काञ्चिदनुमितिव्यक्तिम् आदाय तद्व्यक्तिवृत्तिः प्रत्यक्षावृत्तिः या जातिः तद्वत्त्वम् अनुमितित्वम् इति वक्तव्यम् । "पर्वतो वन्हिमान्" इत्यनुमितिव्यक्तौ वर्तमाना प्रत्यक्षावृत्तिः जातिः अनुमितित्वम् । तद्वत्त्वम् सर्वास्वनुमितिषु वर्तत इति लक्षणसमन्वयः । "प्रत्यक्षावृत्तिजातिमत्त्वम्" इत्येतावन्मात्रोक्तौ प्रत्यक्षावृत्ति-घटत्वजातिमत्त्वस्य घटे सत्त्वात् तत्र अतिव्याप्तिः । तद्वारणाय "तद्व्यक्तिवृत्ति" इति जातिविशेषणम् । घटत्वं तु अनुमितिव्यक्तिवृत्ति न भवति इति तन्निरासः । तद्व्यक्तिवृत्तित्वं च समवायसंबन्धेन । अन्यथा कालिकसंबन्धेन अनुमितिव्यक्तिवृत्तिः घटत्वमपि । तद्वत्त्वस्य घटे सत्त्वात् अतिव्याप्तिः स्यात् । अनुमितिव्यक्तिवृत्तिः या जातिः ज्ञानत्वानुभवत्वादिः । तद्वत्त्वस्य प्रत्यक्षादौ सत्त्वात् अतिव्याप्तिः । तद्वारणाय प्रत्यक्षावृत्तीति विशेष्यदलम् । ज्ञानत्वादिकं तु प्रत्यक्षवृत्तीति तन्निरासः ।

ननु मनसः करणतापक्षे इति । मनः अनुमित्यादौ करणमिति पक्षे ज्ञानाकरणकत्वम् इति यत् प्रत्यक्षलक्षणं तस्य अनुमित्यादौ अतिव्याप्तिः । अनुमित्यादौ मनः करणकत्वस्यैव सत्त्वेन ज्ञानकरणकत्वविरहात् इत्याशङ्क्य प्रत्यक्षस्यापि लक्षणान्तरं वदति मूले इति भावः ।

शब्दभेदेन इति । प्रत्यक्षलक्षणे अनुमित्यसमवेतेति अनुमित्यादिलक्षणेषु प्रत्यक्षासमवेतेति शब्दविशेषेण इत्यर्थः । **अनुभवत्वजात्यङ्गीकारेण** इति । एवं च सर्वेष्वपि प्रत्यक्षादिलक्षणेषु प्रत्यक्षावृत्यनुमित्यवृत्तीत्यस्य स्थाने स्मृत्यसमवेतेत्युक्तौ अनुभवत्वजातिमादाय अनुमित्यादौ अतिव्याप्तिप्रसक्त्या एकत्रानुमित्यसमवेतत्वस्य अन्यत्र प्रत्यक्षासमवेतत्वस्यैव निवेशनीयतया शब्दभेदेन लक्षणकथनमावश्यकम् । अनुभवत्वजात्यनङ्गीकारे तु प्रत्यक्षादिलक्षणचतुष्टयेऽपि तत्तत्प्रत्यक्षादिव्यक्तिसमवेत-स्मरणासमवेतजातिमत्त्वं इत्येवं स्मरणासमवेतेति एकमेव शब्दमुपादाय तत्तल्लक्षणं वक्तुं शक्यम् ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ प्रत्यक्षविभागनिरूपणम् ॥

कारिकावली

घ्राणजादिप्रभेदेन प्रत्यक्षं षड्विधं मतम् ॥५२ ॥

मुक्तावली

जन्यप्रत्यक्षं विभजते – **घ्राणजादि** इति । घ्राणजं रासनं चाक्षुषं स्पार्शनं श्रौत्रं मानसम् इति षड्विधं प्रत्यक्षम् । न च – ईश्वरप्रत्यक्षस्य अविभजनात् न्यूनत्वम्, जन्यप्रत्यक्षस्यैव निरूपणीयत्वात्, उक्तसूत्रानुसारात् ॥

दिनकरी

उक्तसूत्र इति । ''इन्द्रियार्थसन्निकर्षोत्पन्नम्'' इत्याद्युपदर्शितसूत्रानुसारात् इत्यर्थः ॥

कारिकावली

घ्राणस्य गोचरो गन्धो गन्धत्वादिरपि स्मृतः ।
तथा रसो रसज्ञायाः, तथा शब्दोऽपि च श्रुतेः ॥ ५३ ॥

मुक्तावली

गोचर इति । ग्राह्य इत्यर्थः । **गन्धत्वादिः** इति ''आदि'' पदात् सुरभित्वादिपरिग्रहः । गन्धस्य प्रत्यक्षत्वात् तद्वृत्तिजातिरपि प्रत्यक्षा, गन्धाश्रयग्रहणे तु घ्राणस्य न सामर्थ्यम् इति बोध्यम् । **तथा रस** इति । रसत्वादिसहित इत्यर्थः । तथा शब्दः शब्दत्वादिसहितः । गन्धः रसश्च उद्भूतः बोध्यः ॥

दिनकरी

घ्राणस्य निर्विषयकत्वात् आह – **ग्राह्य** इति । ''**सुरभित्वादि**'' इति ''आदि''ना असुरभित्वपरिग्रहः । **तद्वृत्ति** इति । गन्धवृत्तीत्यर्थः ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

राजीवोल्लासः

ननु घ्राणस्य गोचरो गन्धः इत्यसङ्गतम् । गोचरपदस्य विषयार्थकतया घ्राणस्य विषयः गन्धः इत्यर्थो वक्तव्यः । घ्राणेन्द्रियस्य तु निर्विषयकत्वेन ज्ञानादेरेव सविषयकत्वात् घ्राणनिरूपितविषयत्वं गन्धेऽनुपपन्नम् इत्यालोच्य गोचरशब्दस्य ग्राह्य इत्यर्थः उक्तः । तथा च घ्राणस्य ग्राह्यः गन्धः इत्यर्थः । घ्राणेन्द्रियजन्यप्रत्यक्षविषयः गन्ध इति यावत् । अतः न असङ्गतिः ।।

कारिकावली

उद्भूतरूपं नयनस्य गोचरो द्रव्याणि तद्वन्ति पृथक्त्वसंख्ये ।
विभागसंयोगपरापरत्वस्नेहद्रवत्वं परिमाणयुक्तम् ।। ५४ ।।

क्रियां जातिं योग्यवृत्तिं समवायं च तादृशम् ।
गृह्णाति चक्षुःसंबन्धादालोकोद्भूतरूपयोः ।। ५५ ।।

मुक्तावली

उद्भूतरूपम् इति । ग्रीष्मोष्मादौ अनुद्भूतरूपम् इति न तत्प्रत्यक्षम् । तद्वन्ति – उद्भूतरूपवन्ति । योग्य इति । पृथक्त्वादिकमपि योग्यवृत्ति बोध्यम् । तादृशं – योग्यव्यक्तिवृत्तिम् । चक्षुर्योग्यत्वमेव कथम्? तदाह – गृह्णाति इति । आलोकसंयोगः उद्भूतरूपं च चाक्षुषप्रत्यक्षे कारणम् । तत्र द्रव्यचाक्षुषं प्रति तयोः समवायसंबन्धेन कारणत्वम्, द्रव्यसमवेतरूपादिप्रत्यक्षे स्वाश्रयसमवायसंबन्धेन, द्रव्यसमवेतसमवेतस्य रूपत्वादेः प्रत्यक्षे स्वाश्रयसमवेतसमवायसंबन्धेन इति ।।

दिनकरी

उद्भूतपदस्य कृत्यम् आह – ग्रीष्म इति । ऊष्मादौ इति ''आदि''ना चूर्णप्रविष्टतेजः परिग्रहः । न तत्प्रत्यक्षम् – न ऊष्मादिगतरूपप्रत्यक्षम् । न्यूनतां परिहर्तुम् आह – पृथक्त्वादिकमपि इति । आलोकसंयोग इति । तस्य

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

कारणत्वम् अन्धकारे चाक्षुषापत्तिवारणाय, उद्भूतरूपस्य तु पिशाचादीनां प्रत्यक्षवारणाय इति अवधेयम् । तयोः – उद्भूतरूपालोकसंयोगयोः ।।

कारिकावली

उद्भूतस्पर्शवद्द्रव्यं गोचरः सोऽपि च त्वचः ।
रूपान्यच्चक्षुषो योग्यं रूपमत्रापि कारणम् ।। ५६ ।।
द्रव्याध्यक्षे ....

मुक्तावली

उद्भूत इति । उद्भूतस्पर्शवद्द्रव्यं त्वचः गोचरः । **सोऽपि** – उद्भूतस्पर्शोऽपि स्पर्शत्वादिसहितः । **रूपान्यत्** इति । रूपभिन्नं रूपत्वादिभिन्नं च यत् चक्षुषः योग्यं तत् त्वगिन्द्रियस्यापि ग्राह्यम् । तथा च पृथक्त्वसंख्यादयः ये चक्षुर्ग्राह्याः गुणाः उक्ताः, एवं क्रियाजातयः योग्यवृत्तयः त्वचो ग्राह्याः इत्यर्थः इति । **रूपम् अत्रापि कारणं द्रव्याध्यक्षे** इति ।।

दिनकरी

रूपभिन्नस्य रूपत्वादेः त्वगिन्द्रियेण अग्रहणात् आह – **रूपत्वादिभिन्नम्** इति । ''आदि''ना नीलत्वादिपरिग्रहः । **द्रव्याध्यक्ष** इति पूर्वान्वयी, न तु उत्तरान्वयी इति बोधयितुं **''रूपम् अत्रापि कारणं द्रव्याध्यक्षे''** इत्यन्तप्रतीकधारणम् ।

मुक्तावली

अत्रापि – त्वगिन्द्रियजन्येऽपि । तथा च बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षे रूपं कारणम् इत्यर्थः ।

नवीनास्तु बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षमात्रे न रूपं कारणं, प्रमाणाभावात् । किंतु चाक्षुषप्रत्यक्षे रूपं, स्पर्शनप्रत्यक्षे स्पर्शः कारणम्, अन्वयव्यतिरेकात् ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

बहिरिन्द्रिय-जन्यद्रव्यप्रत्यक्षमात्रे किं कारणम् इति चेत् – न किञ्चित्, आत्मावृत्तिशब्दभिन्नविशेषगुणवत्त्वं वा प्रयोजकम् अस्तु ।।

दिनकरी

शङ्कते – **बहिरिन्द्रिय इति** । ननु **कार्याभावे कारणाभावस्य** प्रयोजकतया गगनादौ बहिरिन्द्रियजन्यप्रत्यक्षाभावे रूपाभावस्पर्शाभावयोः प्रयोजकत्वकल्पने गौरवात् तादृशप्रत्यक्षे रूपत्वेन हेतुतां कल्पयित्वा तदवच्छिन्नाभावत्वेनैव तादृशप्रत्यक्षाभावे प्रयोजकत्वम् उचितम् इति, अत आह – **आत्मावृत्ति इति** । आत्मनः बहिरिन्द्रियजन्यप्रत्यक्षवारणाय **आत्मावृत्ति** इति । आकाशस्य बहिरिन्द्रियजन्यप्रत्यक्षवारणाय **शब्दभिन्न** इति । कालादेस्तद्वारणाय **विशेष** इति ।

राजीवोल्लासः

त्वगिन्द्रियजन्यद्रव्यप्रत्यक्षेऽपि रूपं कारणम् । रूपशून्यस्य वाय्वादेः त्वाचप्रत्यक्षानभ्युपगमात् वायोरपि स्पर्शानुमेयत्वात् । तथा च बहिरिन्द्रियजन्य-द्रव्यप्रत्यक्षे रूपं कारणमिति **प्राचीनाः** । **नवीनास्तु** बहिरिन्द्रियजन्यद्रव्य-प्रत्यक्षसामान्ये न रूपं कारणम् । प्रमाणाभावात् । किन्तु रूपसत्त्वे चाक्षुषप्रत्यक्षम्, रूपाभावे तदभावः; एवं स्पर्शसत्त्वे स्पार्शनप्रत्यक्षम्; तदभावे तदभावः इत्यन्वयव्यतिरेकाभ्यां चाक्षुषप्रत्यक्षे रूपं कारणम्, स्पार्शनप्रत्यक्षे स्पर्शः कारणम् इति विशिष्यैव कार्यकारणभावः । तर्हि **बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षमात्रे किं कारणम् इति चेत्, – न किंचित्** । **आत्मावृत्तिशब्दभिन्नविशेषगुणवत्त्वं वा प्रयोजकम्** इति मुक्तावल्याम् उक्तम् । तत्र **''आत्मावृत्ति''** इति ग्रन्थमवतारयति – **ननु कार्याभावे** इति । कार्याभावे कारणाभावः हेतुः । बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षं प्रति यदि किमपि न कारणम्, तदा आकाशादेः बहिरिन्द्रियजन्यप्रत्यक्षं कुतः न भवति इति शङ्का वारयितुं न शक्यते । अतः बहिरिन्द्रियजन्यप्रत्यक्षे रूपं स्पर्शं च कारणं कल्पयित्वा कारणभूतयोः रूपस्पर्शयोः अभावात् आकाशादेः बहिरिन्द्रियजन्यप्रत्यक्षाभावः इति वक्तव्यम् । तादृशप्रत्यक्षाभावे रूपाभावस्पर्शाभावयोः

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

कारणत्वकल्पने गौरवात् बहिरिन्द्रियजन्यप्रत्यक्षत्वावच्छिन्ने रूपत्वावच्छिन्नं कारणम् इति कल्पयित्वा तादृशप्रत्यक्षत्वावच्छिन्नाभावे रूपत्वावच्छिन्नाभावस्य एकस्य कारणत्वकल्पनं युक्तम्, लाघवात् । रूपाभावादेव आकाशादेः बहिरिन्द्रियजन्य-प्रत्यक्षाभावस्य वक्तुं शक्यत्वात् इत्यतः ''आत्मावृत्ती''ति पक्षान्तरम् अनुसृतम् । तथा च बहिरिन्द्रियजन्यप्रत्यक्षं प्रति आत्मावृत्तिः शब्दभिन्नः यः विशेषगुणः तद्वत्त्वं कारणम् । विशेषगुणवत्त्वमात्रोक्तौ आत्मनोऽपि ज्ञानादिविशेषगुणवत्त्वात् बहिरिन्द्रियजन्यप्रत्यक्षविषयत्वापत्तिः । अतः ''आत्मावृत्ति''इति विशेषगुणस्य विशेषणम् । आत्मावृत्तिः यः शब्दरूपः विशेषगुणः तद्वत्त्वात् आकाशस्य बहिरिन्द्रियजन्यप्रत्यक्षविषयत्ववारणाय ''शब्दभिन्न'' इति । आकाशे तु शब्दभिन्नविशेषगुणः नास्ति । आत्मावृत्तिशब्दभिन्नसंयोगादिगुणवतः कालादेः बहिरिन्द्रियजन्यप्रत्यक्षविषयत्ववारणाय विशेषपदम् ।।

मुक्तावली

रूपस्य कारणत्वे लाघवम् इति चेत्, न । वायोः त्वगिन्द्रियेण अग्रहण-प्रसङ्गात् । इष्टापत्तिः इति चेत् – उद्भूतस्पर्श एव लाघवात् कारणमस्तु । प्रभाया अप्रत्यक्षे तु इष्टापत्तिः इत्येव किं न स्यात्? तस्मात् ''प्रभां पश्यामि'' इतिवत् ''वायुं स्पृशामि'' इति प्रत्ययसत्त्वात् वायोरपि प्रत्यक्षत्वं सम्भवत्येव, बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षमात्रे न रूपस्य न वा स्पर्शस्य हेतुत्वम् ।।

दिनकरी

शङ्कते – रूपस्य इति । पुनः शङ्कते – इष्ट इति । प्रतिबन्द्या उत्तरयति – उद्भूत इति । उपसंहरति – तस्मात् इति ।

राजीवोल्लासः

शङ्कते रूपस्य इति इति । आत्मावृत्तिविशेषगुणत्वावच्छिन्नस्य हेतुत्वकल्पनापेक्षया लाघवात् रूपत्वावच्छिन्नस्यैव बहिरिन्द्रियजन्यप्रत्यक्षे

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्रयोजकत्वमस्तु इति शङ्कते मुक्तावल्याम् – रूपस्य कारणत्वे लाघवम् इति । समाधत्ते – वायोः इति । नवीनानां मते वायोः त्वगिन्द्रियजन्यप्रत्यक्षविषयत्वम् इष्यते । बहिरिन्द्रियजन्यप्रत्यक्षं प्रति रूपस्य कारणत्वे वायौ रूपाभावात् तस्य त्वगिन्द्रियजन्यप्रत्यक्षविषयत्वं न स्यात् । आत्मावृत्तिशब्दभिन्नविशेषगुणस्य कारणत्वे तु वायौ तादृशस्य स्पर्शविशेषगुणस्य सत्त्वात् त्वगिन्द्रियजन्यप्रत्यक्षविषयत्वम् उपपद्यत इति भावः ।

पुनः शङ्कते इति । वायोः त्वगिन्द्रियेण अग्रहणम् इष्टमेव इति आशङ्क्य उद्भूतस्पर्श एव लाघवात् कारणमस्तु इति प्रतिबन्द्या उत्तरमुक्तम् । तस्य अयम् आशयः – बहिरिन्द्रियजन्यप्रत्यक्षे रूपस्य कारणत्वं कल्पयित्वा रूपाभावात् वायोः त्वगिन्द्रियजन्यप्रत्यक्षविषयत्वं नास्ति इत्युच्यते चेत्, बहिरिन्द्रियजन्यप्रत्यक्षे स्पर्शस्य कारणत्वं कल्पयित्वा वायोः प्रत्यक्षविषयत्वं स्वीक्रियताम् । तथा सति प्रभायाः चाक्षुषप्रत्यक्षविषयत्वं न स्यात् उद्भूतस्पर्शाभावात् इत्याशङ्कायां प्रभायाः चाक्षुषप्रत्यक्षविषयत्वाभावे इष्टापत्तिः कुतः न वक्तुं शक्यते । यदि तु ''प्रभां पश्यामि'' इति अनुभववशात् प्रभायाः चाक्षुषप्रत्यक्षत्वम् अवगम्यते, अतः तदभावे इष्टापत्तिः न वक्तुं शक्यते इति उच्यते, तर्हि ''वायुं स्पृशामि'' इति अनुभवात् वायोरपि त्वाचप्रत्यक्षविषयत्वसंभवात् तदभावे इष्टापत्तिः न वक्तुं शक्यते इति तुल्यम् । तथा च बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षसामान्ये न रूपं न वा स्पर्शः कारणम् । किन्तु आत्मावृत्तिशब्दभिन्नविशेषगुणवत्त्वमेव इति भावः ।।

मुक्तावली

वायुप्रभयोः एकत्वं गृह्यते एव, क्वचित् द्वित्वादिकमपि, क्वचित् संख्यापरिमाणाग्रहः दोषात् इति आहुः ।।

दिनकरी

ननु त्रुटेः स्पार्शनानङ्गीकारात् तत्स्पार्शनवारणाय स्पर्शान्यद्रव्यसमवेतस्पार्शनं प्रति त्वक्संयुक्तस्पार्शनवद्द्रव्यसमवायत्वेन हेतुत्वस्य वाच्यतया वायोः स्पार्शनाङ्गीकारः

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

न उचितः । अन्यथा वायुगतसंख्यापरिमाणयोः त्वचा ग्रहणप्रसङ्गात् इति, अत आह – वायुप्रभयोः इति । प्रभोपादानं दृष्टान्तार्थम् । गृह्यत एव इति । तथा च वायुगतसंख्यादिग्रहे इष्टापत्त्या वायोः स्पार्शनाङ्गीकारे बाधकाभाव इति भावः । क्वचित् इति । सजातीयसंवलनाभाव इत्यर्थः । "आदि" पदात् परिमाणपरिग्रहः, तद्ग्रहश्च भूयोवयवावच्छेदेन त्वगिन्द्रियसन्निकर्षस्थले बोध्यः ।

ननु सजातीयसंवलनदशायां भूयोऽवयवावच्छेदेन त्वगिन्द्रियसन्निकर्षाभावे च कथं न वायुगतद्वित्वपरिमाणयोः ग्रहः, इति, अत आह – क्वचित् संख्यापरिमाण इति । दोषात् इति । सजातीयसंवलनादिरूपदोषात् इत्यर्थः ।

आहुः इत्यनेन अस्वरसः । तद्बीजं तु – वायोः प्रत्यक्षतासन्देहेन लाघवात् मूर्तप्रत्यक्षत्वावच्छिन्नं प्रति रूपत्वेनैव कारणत्वम् उचितम् । न च – वायुप्रत्यक्षतासन्देहाधीनव्यभिचारसन्देहस्य प्रतिबन्धकस्य सत्त्वात् कथं कारणताग्रहः? इति – वाच्यम् । लाघवतर्काभावविशिष्टस्यैव व्यभिचारसन्देहस्य प्रतिबन्धकतया, प्रकृते पूर्वोक्तलाघवतर्कस्य सत्त्वेन तदभावविशिष्टव्यभिचार-सन्देहाभावस्य सत्त्वात् ।

यच्चोक्तं प्रभाया अप्रत्यक्षे तु इष्टापत्तिः इत्येव किं न स्यात् इति, तदपि न । "उपरिदेशे विहङ्गमः" इत्यत्र प्रभामण्डलस्यैव उपरिदेशतया तत्प्रत्यक्षं विना "उपरिदेशे विहङ्गमः" इति प्रत्यक्षानुपपत्तेः इत्यादिकम् इति ।।

राजीवोल्लासः

ननु त्रुटेः इत्यादि । बहिरिन्द्रियजन्यप्रत्यक्षे आत्मावृत्तिशब्दभिन्न-विशेषगुणवत्त्वस्य प्रयोजकत्वेऽपि त्र्यणुकस्य स्पार्शनप्रत्यक्षविषयत्वापत्तिः वारयितुं न शक्यते । त्र्यणुके आत्मावृत्तेः शब्दभिन्नस्य स्पर्शस्य रूपस्य वा सद्भावात् । अतः त्र्यणुकस्य त्वाचप्रत्यक्षविषयत्ववारणाय स्पर्शान्यत् यत् द्रव्यसमवेतं तद्विषयकत्वाचप्रत्यक्षं प्रति त्वक्संयुक्तं स्पार्शनप्रत्यक्षविषयभूतं यत् द्रव्यं तत्समवायः

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

कारणम् इति कार्यकारणभावः कल्पनीयः । स्पर्शान्यत् कपालादिरूपद्रव्यसमवेतं च घटादिकम् । तद्विषयकत्वाचप्रत्यक्षे त्वगिन्द्रियसंयुक्तं यत् स्पार्शनवत् द्रव्यं कपालादिकम्, घटे तत्समवायः हेतुः । त्र्यणुके तु द्व्यणुकसमवायः वर्तते । द्व्यणुकं तु त्वक्संयुक्तस्पार्शनवद्द्रव्यं न भवति । अतः त्र्यणुके स्पार्शनवद्द्रव्यसमवाय-रूपहेत्वभावात् त्र्यणुकस्य त्वाचप्रत्यक्षविषयत्वरूपं कार्यं न भवति । अत्र कार्यतावच्छेदककोटौ स्पर्शान्यत्वानिवेशे वायुरूपद्रव्यसमवेतस्य वायवीयस्पर्शस्य त्वाचप्रत्यक्षं न स्यात् । वायोः स्पार्शनविषयत्वाभावेन स्पार्शनवद्द्रव्यसमवायस्य वायवीयस्पर्शे अभावात् । स्पर्शान्यत्वविशेषणे दत्ते तु स्पर्शान्यविषयकत्वाचप्रत्यक्षे एव स्पार्शनवद्द्रव्यसमवायो हेतुः, न तु स्पर्शविषयकत्वाचप्रत्यक्षे इति लाभात् न वायवीयस्पर्शस्य त्वाचप्रत्यक्षविषयत्वानुपपत्तिः । इत्थं च वायोः स्पार्शनविषय-त्वाङ्गीकारः न उचितः । चतुरणुकादिवायोः स्पर्शान्यत्वात् त्र्यणुकादिद्रव्यसमवेतत्वाच्च तद्विषयकप्रत्यक्षे त्वक्संयुक्तस्पार्शनवद्द्रव्यसमवायरूपहेत्वभावात् । वायुत्र्यणुकस्य स्पार्शनाविषयत्वात् इति भावः ।

अन्यथा इति । उक्तकार्यकारणभावानादरेण यदि वायोः त्वाचप्रत्यक्षविषयत्वम् अङ्गीक्रियते, तर्हि वायुगतस्पर्शवत् वायुगतसंख्यापरिमाणयोः अपि त्वचा ग्रहणप्रसङ्गात् इति आशङ्क्य तत्र इष्टापत्तिः इति समाधानम् उक्तम् मूले । एवं च वायोः स्पार्शनाङ्गीकारे बाधकाभाव इति पर्यवस्यति । वायुत्र्यणुकस्य स्पार्शनाभावेऽपि चतुरणुकादिवायोः स्पार्शनम् इष्यते एव ।

न च – पूर्वोक्तत्वक्संयुक्तस्पार्शनवद्द्रव्यसमवायरूपहेत्वभावात् कथं चतुरणुकादिवायोः स्पार्शनम् इति – वाच्यम् । पूर्वोक्तकार्यकारणभावे कार्यतावच्छेदक-कोटौ ''स्पर्शान्यत्र्यणुकातिरिक्तद्रव्यसमेवत'' इति विशेषणं दीयते । तेन त्र्यणुकातिरिक्तचतुरणुकादिद्रव्यसमवेतं यत् पञ्चाणुकादिकं तत्स्पार्शनं प्रत्येव स्पार्शनवद्द्रव्यसमवायो हेतुः । चतुरणुकवायुस्पार्शने तु सः न हेतुः, अपितु चतुरणुकगतः

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

महत्त्वसहितः स्पर्श एव हेतुः इति न अनुपपत्तिः इति तात्पर्यम् । त्रुटेः स्पार्शनवारणप्रकारस्तु – त्रुटिभिन्नं यद्द्रव्यं द्व्यणुकं तत्समवेतं त्र्यणुकं तत्स्पार्शनं प्रति स्पार्शनवद्द्रव्यसमवायस्य अपेक्षिततया त्र्यणुके स्पार्शनवद्द्रव्यसमवायविरहात् न स्पार्शनम् इति ।

सजातीयसंवलनाभाव इति । विलक्षणसंयोगाभावस्थले इत्यर्थः । तथा च प्रभयोः वाय्वोश्च विलक्षणसंयोगाभावस्थले ''अस्मिन् गृहे एका प्रभा'', ''अन्यस्मिन् गृहे एका प्रभा'' ''अयम् एको वायुः'', ''अयम् एको वायुः'' इत्याकारकापेक्षाबुद्धिसंभवात् तेन द्वित्वोत्पत्या द्वित्वप्रत्यक्षमपि संभवति । तादृशविलक्षणसंयोगसत्त्वे तु तादृशसंबन्धरूपदोषवशात् ''अयमेकः'', ''अयमेकः'' इति विविच्य अपेक्षाबुद्ध्यसंभवात् द्वित्वानुत्पत्या तत्प्रत्यक्षासंभवात् इति समुदितग्रन्थतात्पर्यार्थः ।

''सजातीयसंवलनदशायाम्'' इत्यस्य **''कथं न वायुगतद्वित्वपरिमाणयोः ग्रह''** इत्यत्र अन्वयः । **''सजातीयसंवलनादिरूपदोषात्''** इति – ''आदि''पदेन भूयोऽवयवावच्छेदेन त्वगिन्द्रियसंनिकर्षाभावः गृह्यते ।

वायोः त्वाचप्रत्यक्षविषयत्ववादिनां नवीनानां मते अस्वारस्यं विशदयति – **आहुः इत्यनेन अस्वरसः** इत्यनेन । वायुः प्रत्यक्षो वा न वा इति सन्देहात् मूर्तविषयकप्रत्यक्षत्वावच्छिन्नं प्रति रूपत्वावच्छिन्नं कारणम् इति कल्पनमेव उचितम् । रूपस्पर्शयोः द्वयोः कारणत्वे मूर्तविषयकप्रत्यक्षरूपकार्याभावं प्रति रूपाभावस्पर्शाभावयोः द्वयोः प्रयोजकत्वकल्पनम् अपेक्ष्य एकस्य रूपाभावस्य प्रयोजकत्वकल्पने लाघवात् । तथा च रूपशून्यस्य मूर्तस्य वायोः प्रत्यक्षविषयत्वाङ्गीकरणं न युक्तम् । यदि तु वायोः प्रत्यक्षत्वं निश्चितं स्यात् तदा रूपाभावेऽपि वायुप्रत्यक्षोत्पत्या व्यतिरेकव्यभिचारात् मूर्तप्रत्यक्षत्वावच्छिन्नं प्रति रूपत्वावच्छिन्नस्य कारणत्वम् अनुचितं स्यात् । अतः **वायोः प्रत्यक्षतासन्देहेन** इत्युक्तम् । **न च वायुप्रत्यक्षता** इति । वायोः प्रत्यक्षविषयत्वसन्देहात् व्यतिरेकव्यभिचारसन्देहः

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

भवति । वायोः प्रत्यक्षत्वकल्पे व्यतिरेकव्यभिचारः । प्रत्यक्षत्वाभावकल्पे व्यतिरेकव्यभिचाराभावः इत्येवं प्रत्यक्षत्वतदभावरूपकोटिद्वयसन्देहात् व्यतिरेकव्यभिचारतदभावरूपकोटिद्वयविषयकः सन्देहः अवर्जनीयः । व्यतिरेकव्यभिचारसंशयोऽपि कारणत्वनिश्चयस्य प्रतिबन्धकः । तथा च प्रतिबन्धकसत्त्वात् कथं मूर्तप्रत्यक्षं प्रति रूपस्य कारणत्वनिश्चयः इति आक्षेपः । तत्र समाधानम् आह – **लाघवतर्काभाव** इति । लाघवरूपः यः तर्कः तदभावविशिष्टः व्यभिचारसन्देह एव कारणत्वनिश्चयस्य प्रतिबन्धकः । प्रकृते तु पूर्वोक्तलाघवरूपतर्कस्य विद्यमानत्वात् लाघवतर्काभावविशिष्टव्यभिचारसन्देहरूपस्य प्रतिबन्धकस्य अभावात् कारणताग्रहः भवत्येव । तथा च रूपशून्यस्य वायोः न प्रत्यक्षता ।

यच्चोक्तम् इत्यादि । वायोरिव प्रभाया अपि अप्रत्यक्षत्वम् इष्टम् इति यदुक्तम् तन्न । ''उपरिदेशे विहङ्गमः'' इत्याकारकप्रत्यक्षे उपरिदेशत्वेन रूपेण प्रभामण्डलस्यैव विषयतया प्रभामण्डलस्य प्रत्यक्षत्वं विना ''उपरिदेशे विहङ्गम'' इति प्रत्यक्षस्य अनुपपत्तेः । अतः प्रभायाः प्रत्यक्षविषयत्वम् आवश्यकम् । वायोः अप्रत्यक्षत्वे तु न काचित् अनुपपत्तिः अस्ति इति वैलक्षण्यम् इति भावः ।।

।। त्वङ्मनस्संयोगस्य ज्ञानकारणत्वविचारः ।।

कारिकावली

...........त्वचः योगः मनसा ज्ञानकारणम् ।

मुक्तावली

त्वचः योग इति । त्वङ्मनःसंयोगः ज्ञानसामान्ये कारणम् इत्यर्थः । किं तत्र प्रमाणम्? सुषुप्तिकाले त्वचं त्यक्त्वा पुरीतति वर्तमानेन मनसा ज्ञानाजननम् इति ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

ननु सुषुप्तिकाले किं ज्ञानं भविष्यति? अनुभवरूपं स्मरणरूपं वा? नाद्यः, अनुभवसामग्र्यभावात् । तथाहि – प्रत्यक्षे चक्षुरादिना मनःसंयोगस्य हेतुत्वात् तदभावादेव न चाक्षुषादिप्रत्यक्षम् । ज्ञानादेः अभावादेव न मानसं प्रत्यक्षम्, ज्ञानाद्यभावे च आत्मनोऽपि न प्रत्यक्षम् इति । व्याप्तिज्ञानाभावादेव न अनुमितिः, सादृश्यज्ञानाभावात् न उपमितिः, पदज्ञानाभावात् न शाब्दबोधः, इत्यनुभवसामग्र्यभावात् न अनुभवः । उद्बोधकाभावाच्च न स्मरणम् ।

मैवम् । सुषुप्तिप्राक्कालोत्पन्नेच्छादिव्यक्तेः तत्संबन्धेन आत्मनश्च प्रत्यक्षत्वप्रसङ्गात् । तदतीन्द्रियत्वे मानाभावात् । सुषुप्तिप्राक्काले निर्विकल्पकमेव नियमेन जायते इत्यत्रापि प्रमाणाभावात् ।

अथ ज्ञानमात्रे त्वङ्मनःसंयोगस्य यदि कारणत्वम्, तदा रासनादिप्रत्यक्षकाले त्वाचप्रत्यक्षं स्यात् । विषयत्वक्संयोगस्य त्वङ्मनःसंयोगस्य च सत्त्वात् । परस्परप्रतिबन्धात् एकमपि वा न स्यात् इति ।

अत्र केचित् – पूर्वोक्तयुक्त्या त्वङ्मनःसंयोगस्य हेतुत्वे सिद्धे चाक्षुषादिसामग्र्याः स्पार्शनप्रतिबन्धकत्वम् अनुभवानुरोधात् कल्प्यते इति ।

अन्ये तु – सुषुप्त्यनुरोधेन चर्ममनःसंयोगस्य ज्ञानहेतुत्वं कल्प्यते । चाक्षुषादिप्रत्यक्षकाले त्वङ्मनःसंयोगाभावात् न त्वाचप्रत्यक्षम् इति वदन्ति ।।

दिनकरी

ज्ञानसामान्ये – जन्यज्ञानसामान्ये । ज्ञानाजननम् इति । प्रमाणम् इति अनुषज्यते ।

चक्षुरादिना इति "आदि"ना त्वगादिपरिग्रहः । तदभावादेव – चक्षुरादिना मनोयोगाभावादेव । ज्ञानादेः अभावादेव न मानसम् इति । अत्र ज्ञानादेः न मानसम् इत्यन्वयः । "अभावात्" इत्यत्रापि "ज्ञानादेः" इत्यस्य अन्वयो बोध्यः । न प्रत्यक्षम् इति । योग्यगुणसंबन्धेनैव आत्मनः मानसप्रत्यक्षस्वीकारात्

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

योग्यविशेषगुणप्रत्यक्षसामग्र्यन्तर्गतस्य ज्ञानादेः अभावादेव न आत्मप्रत्यक्षम् इत्यर्थः। **उद्बोधकाभावात्** इति। उद्बोधकस्य फलबलकल्प्यत्वात् इति भावः। **इच्छादिव्यक्तेः** इति। इच्छाया आदिः इति व्युत्पत्त्या ज्ञानमात्रं विवक्षितम्। **तदतीन्द्रियत्वे** – ज्ञानातीन्द्रियत्वे। ननु सुषुप्तिप्राक्कालीनज्ञानस्य निर्विकल्पकरूपत्वात् तदतीन्द्रियत्वम् उभयवादिसिद्धमेव इति, अत आह – **सुषुप्तिप्राक्काले** इति। **त्वङ्मनःसंयोगस्य च** इति। तदस्वीकारे चाक्षुषादिकमपि न स्यात् इति भावः। ननु चाक्षुषादिसामग्र्याः स्पार्शनप्रतिबन्धकत्वादेव न स्पार्शनं तत्र इति, अत आह – **परस्पर** इति। **अनुभवानुरोधात्** इति। अनुभवस्य त्वयापि स्वहस्तितत्वात्, अन्यथा इष्टापत्त्यादिना त्वदुक्तापत्तेः असङ्गतत्वापातात् इति भावः।

मिश्रमतम् आह – **अन्ये तु** इत्यादिना। **सुषुप्त्यनुरोधेन** – सुषुप्तौ ज्ञानानुत्पादानुरोधेन। इत्थं च चाक्षुषादिकाले पूर्वोक्तस्पार्शनापत्तिः न संभवति इत्याह – **चाक्षुषादि** इति।

राजीवोल्लासः

ननु ज्ञानसामान्ये त्वङ्मनस्संयोगस्य कारणत्वं मूले उक्तम् असङ्गतम्। नित्ये ईश्वरीयज्ञाने तस्य अकारणत्वात्। अतः व्याचष्टे – **जन्यज्ञानसामान्ये** इति। **प्रमाणम्** इत्यनुषज्यते इति। इदम् उपलक्षणम्। **तत्र** इत्यस्यापि अनुषङ्गो बोध्यः। तथा च सुषुप्तिकाले त्वचं त्यक्त्वा पुरीतति वर्तमानेन मनसा ज्ञानाजननं तत्र प्रमाणम् – त्वङ्मनस्संयोगस्य ज्ञानसामान्यकारणत्वे प्रमाणम् इति वाक्यार्थः। अत्र अयम् अनुमानप्रयोगः विवक्षितः – ''सुषुप्तौ ज्ञानाभावः किञ्चित्कारणाभावप्रयोज्यः, कार्याभावत्वात्, घटाभाववत्'' इति। इत्थं च ''ज्ञानाजननम्'' इत्यस्य ज्ञानाभावपक्षकम् अनुमानम् इत्यर्थः। **त्वगादिपरिग्रह** इति। तथा च सुषुप्तिकाले पुरीतति प्रविष्टेन मनसा चक्षुरादिसंयोगाभावात् चक्षुरादिमनस्संयोगरूपकारणाभावादेव सुषुप्तौ न चाक्षुषादिप्रत्यक्षम्। पुरीतति त्वगिन्द्रियाभावेन तत्र स्थितमनसः त्वक्संयोगोऽपि नास्ति इति भावः। अन्वयः

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

बोध्य इति । सुषुप्तौ ज्ञानादेः अभावात् ज्ञानादेः मानसप्रत्यक्षं न संभवति । प्रत्यक्षे विषयस्य कारणत्वात् । ज्ञानादेः अभावादेव आत्मनोऽपि मानसप्रत्यक्षं न संभवति । योग्यज्ञानादिगुणविशिष्टतयैव आत्मनः मानसप्रत्यक्षविषयत्वस्वीकारात् । योग्यगुणविषयकप्रत्यक्षं प्रति विषयविधया कारणस्य ज्ञानादेः अभावात् ज्ञानादिविशिष्टात्मविषयकमानसप्रत्यक्षं सुषुप्तौ न संभवति इति भावः । **योग्यगुणः** इति । मानसप्रत्यक्षयोग्यगुणः इत्यर्थः । **''धर्माधर्माश्रयोऽध्यक्षः विशेषगुणयोगतः''** इति कारिकायां योग्यगुणसंबन्धेनैव आत्मनः मानसप्रत्यक्षविषयत्वस्य उक्तत्वात् इति भावः ।

ननु सुषुप्तौ उद्बोधकाभावात् न स्मरणम् इति यदुक्तं तत् न युक्तम् । जातस्य शिशोः प्राथमिकेष्टसाधनतास्मरणे जीवादृष्टस्य संस्कारोद्बोधकस्य कल्पनवत् सुषुप्तावपि अदृष्टविशेषस्य उद्बोधकत्वसंभवात् स्मरणं संभवति इति आशङ्क्य आह – **उद्बोधकस्य** इति । स्मरणरूपफलबलेनैव उद्बोधकस्य कल्पनीयत्वात्, सुषुप्तौ स्मरणस्य अनुभवसिद्धत्वाभावात् न उद्बोधकस्य कल्पनम् । जातस्य शिशोस्तु स्मरणरूपं फलं प्रमाणसिद्धम् इति तदनुरोधेन अदृष्टरूपं उद्बोधकं कल्प्यते इति विशेषः ।

ननु सुषुप्तिकाले किमपि ज्ञानं न संभवति इति पूर्वपक्षस्य समाधानारम्भे **सुषुप्तिप्राक्कालोत्पन्नेच्छादिव्यक्तेः तत्संबन्धेन आत्मनश्च मानसप्रत्यक्षं संभवति** इति उक्तम् । तत्र गुणेषु प्रथमोपस्थितं ज्ञानम् उपेक्ष्य इच्छादिव्यक्तेः उपादानम् असङ्गतम् इत्याशङ्क्य इच्छादिपदं ज्ञानपरतया व्याचष्टे – **इच्छाया आदिः** इति । इच्छायाः आदिः कारणम् इच्छादिः ज्ञानम् इत्यर्थः । तथा च सुषुप्तिप्राक्क्षणे उत्पन्नस्य ज्ञानस्य द्विक्षणावस्थायितया सुषुप्तिप्रथमक्षणे सत्त्वात् तस्मिन् क्षणे ज्ञानस्य ज्ञानवतः आत्मनश्च मानसप्रत्यक्षं प्रसजति । तद्वारणाय त्वङ्मनस्संयोगः ज्ञानसामान्यकारणत्वेन स्वीकरणीय इति भावः । **ज्ञानातीन्द्रियत्वे** इति । सुषुप्तिप्राक्क्षणोत्पन्नं ज्ञानं यदि अतीन्द्रियं स्यात् तदा तस्य मानसप्रत्यक्षं न संभवति इति वक्तुं शक्यते । परन्तु तस्य ज्ञानस्य अतीन्द्रियत्वे प्रमाणाभाव इत्यर्थः ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

ननु सुषुप्तिप्राक्कालोत्पन्नज्ञानव्यक्तीनां अतीन्द्रियत्वे मानाभाव इति मूले उक्तम् असङ्गतम् । तदानीं निर्विकल्पकस्यैव उत्पत्या निर्विकल्पकातीन्द्रियत्वस्य सर्ववादिसिद्धत्वात् इति आशङ्क्य उत्तरग्रन्थम् अवतारयति – **ननु सुषुप्ति** इति । **तदतीन्द्रियत्वम्** इति । निर्विकल्पकस्य अतीन्द्रियत्वम् इत्यर्थः ।

मूले विषयत्वक्संयोगस्य इति । भुज्यमानद्रव्यवाय्वादिना त्वक्संयोगस्य इत्यर्थः । **तदस्वीकारे** इति । त्वङ्मनस्संयोगास्वीकारे इत्यर्थः । **चाक्षुषमपि न स्यात्** इति । ज्ञानसामान्ये त्वङ्मनस्संयोगस्य त्वया हेतुत्वाङ्गीकारात् इति भावः । तथा च यदा अन्नादिकं भुज्यते, तदा अन्नस्य चाक्षुषप्रत्यक्षं अन्नरसस्य रासनं प्रत्यक्षं च यस्मिन् क्षणे भवति तदा विषयभूतान्नेन सह त्वक्संयोगस्य त्वाचप्रत्यक्षहेतोः सत्त्वात् त्वाचप्रत्यक्षमपि स्यात् इति आपत्तिः । उक्तापत्तिवारणाय चाक्षुषादिप्रत्यक्षसामग्र्याः त्वाचप्रत्यक्षप्रतिबन्धकत्वाङ्गीकारे तदानीं परस्परप्रतिबन्धात् एकमपि प्रत्यक्षं न स्यात् । चाक्षुषादिसामग्रीणां परस्परप्रतिबन्धिकानां सद्भावात् इति आशयेन उत्तरग्रन्थम् अवतार्य व्याचष्टे – **ननु चाक्षुषादिसामग्र्या** इति । **स्वहस्तिततत्वात्** इति । स्वीकृतत्वात् इत्यर्थः । **इष्टापत्त्यादिना** इति । चाक्षुषादिकालेऽपि त्वाचप्रत्यक्षं भवत्येव इति इष्टापत्तेः इत्यर्थः । ''आदि''ना चाक्षुषादिकं कदापि न उत्पद्यत एव इति अपलापस्य परिग्रहः ।

ननु पुरीतति मनःप्रवेशस्यैव सुषुप्तिपदार्थतया त्वङ्मनस्संयोगस्य ज्ञानाकारणत्वेऽपि तदनुपपत्त्यभावात् **सुषुप्त्यनुरोधेन** इति असङ्गतम् । अतः व्याचष्टे – **सुषुप्तौ ज्ञानानुत्पादानुरोधेन** इति । तथा च त्वङ्मनस्संयोगस्य ज्ञानाकारणत्वे सुषुप्तौ ज्ञानानुत्पादो न स्यात् । अतः सुषुप्तौ ज्ञानानुत्पादः त्वङ्मनस्संयोगरूपकारणाभावप्रयुक्त इति त्वङ्मनस्संयोगस्य ज्ञानकारणत्वम् आवश्यकम् इति भावः ।

मिश्राणाम् अयम् आशयः – ज्ञानसामान्यं प्रति न त्वगिन्द्रियमनस्संयोगः कारणम् । किन्तु चर्ममनस्संयोगः कारणम् । सुषुप्तौ पुरीतति प्रविष्टस्य

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

मनसः शरीरचर्मणा संयोगो नास्ति इति न ज्ञानम् उत्पद्यते । त्वगिन्द्रियमनःसंयोगस्तु त्वाचप्रत्यक्षं प्रति कारणम् । भुज्यमानद्रव्यस्य चाक्षुषादिप्रत्यक्षकाले चर्ममनस्संयोगस्य सत्त्वेऽपि त्वाचप्रत्यक्षहेतोः त्वगिन्द्रियमनस्संयोगस्य अभावात् न त्वाचप्रत्यक्षम् इति ।।

दिनकरी

अत्र नव्याः – सुषुप्त्यव्यवहितप्राक्काले ज्ञानोत्पत्तिः यदि स्यात्, स्यादपि तदा तत्प्रत्यक्षापत्तिभिया त्वङ्मनःसंयोगस्य चर्ममनःसंयोगस्य वा हेतुत्वं, सैव तु न युक्तिसिद्धा । तथाहि – सुषुप्त्यनुकूलमनःक्रियया मनसा आत्मनः विभागः, ततः आत्ममनःसंयोगनाशः, ततः पुरीततिरूपोत्तरदेशेन मनःसंयोगरूपा सुषुप्तिः उत्पद्यते । एवं च सुषुप्त्यव्यवहितपूर्वक्षणे आत्ममनःसंयोगरूपासमवायिकारणनाशात् तत्क्षणे ज्ञानोत्पत्तेः अभावात्, असमवायिकारणस्य कार्यसहभावेन हेतुत्वात् । यदि च कार्यनाशजनकनाशप्रतियोगिन एव असमवायिकारणस्य कार्यसहभावेन हेतुत्वम् इति मन्यते, तथापि न सुषुप्त्यव्यवहितप्राक्कालोत्पन्नज्ञानव्यक्तेः सुषुप्तिकाले प्रत्यक्षापत्तिभिया त्वङ्मनःसंयोगादेः हेतुत्वम् । विजातीयात्ममनःसंयोगस्य हेतुत्वेनैव तत्प्रत्यक्षवारणात् । न च वैजात्येन आत्ममनःसंयोगस्य त्वङ्मनःसंयोगस्य वा हेतुत्वम् इत्यत्र विनिगमकाभावः, त्वङ्मनःसंयोगादेः अवच्छेदकतासंबन्धेन हेतुत्वापेक्षया समवायेन आत्ममनःसंयोगस्य हेतुत्वे लाघवात् । त्वङ्मनःसंयोगस्य हेतुत्वे चाक्षुषादिसामग्र्याः स्पार्शनप्रतिबन्धकत्वकल्पनागौरवाच्च ।

एतेन – यत्र मनःक्रियया न पुरीततिसंयोगरूपा सुषुप्तिः, किंतु पुरीततिक्रिययैव आत्मसंयुक्तेन मनसा पुरीततिसंयोगरूपा सुषुप्तिः, तत्र पूर्वोक्तापत्तिवारणाय त्वङ्मनःसंयोगादेः हेतुत्वम् इति – अपास्तम् । पुरीततिक्रियाजन्यमनःपुरीततिसंयोगस्य सुषुप्तित्वाभावाच्च । अत एव "यदा त्वचं त्यक्त्वा मनः पुरीततिम् अनुविशति" इति ग्रन्थकाराणां लेखः सङ्गच्छत इति – वदन्ति ।।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

राजीवोल्लासः

त्वङ्मनस्संयोगस्य चर्ममनस्संयोगस्य वा ज्ञानसामान्यहेतुत्वं निर्युक्तिकम् इति मन्यमानानां **नव्यानां मतम्** उपन्यस्यति । **अत्र नव्याः** इत्यादिना । **तत्क्षणे** इति । सुषुप्त्यव्यवहितप्राक्क्षणे इत्यर्थः । **अभावात्** इति । ननु कारणस्य कार्योत्पादपूर्वक्षण एव सत्त्वम् अपेक्षितम्, न तु कार्योत्पत्तिकालेऽपि । तथा च ज्ञानोत्पत्तिपूर्वक्षणे विभागकालेऽपि आत्ममनःसंयोगः अस्त्येव, ज्ञानोत्पत्तिकाल एव पूर्वोत्पन्नविभागेन तस्य नाशात् । अतः सुषुप्त्यव्यवहितपूर्वक्षणेऽपि ज्ञानोत्पत्तौ न बाधकम्, अत आह – **असमवायिकारणस्य** इति । **कार्यसहभावेन** इति । कार्यकालवृत्तित्ववैशिष्ट्येन इत्यर्थः । **यदि च** इति । असमवायिकारणनाशस्य द्रव्यरूपकार्यनाशं प्रत्येव हेतुता, न तु गुणादिरूपकार्यनाशं प्रत्यपि इति द्रव्यं प्रत्येव असमवायिकारणस्य कार्यकालवृत्तित्वेन कारणता, न तु गुणादिकं प्रत्यपि इति भावः । **तत्प्रत्यक्षवारणात्** –सुषुप्त्यव्यवहितपूर्वक्षणोत्पन्नज्ञानप्रत्यक्षवारणात् । पुरीतदवच्छेदेन आत्ममनःसंयोगे वैजात्यानङ्गीकारात् इति भावः । **वैजात्येन** इति । यद्यपि आत्ममनःसंयोगस्य कारणता क्लृप्तैव, वैजात्यस्य तदवच्छेदकत्वमेव कल्पनीयम्, त्वङ्मनस्संयोगस्य तु कारणतैव न क्लृप्ता इति वैषम्यात् न विनिगमनाविरहावकाशः, तथापि वैजात्यस्य अक्लृप्तस्य कल्पनीयतया क्लृप्तत्वङ्मनस्संयोगे कारणतैव किं न कल्प्यते, कल्पनीयस्य उभयत्र तुल्यत्वात् इति भावः । **त्वङ्मनस्संयोगादेः** इत्यादिना चर्ममनःसंयोगपरिग्रहः ।

अवच्छेदकतासंबन्धेन इति । समवायसंबन्धेन ज्ञानं प्रति समवायसंबन्धेन त्वङ्मनस्संयोगः कारणम् इति कार्यकारणभावः न संभवति । त्वङ्मनस्संयोगस्य समवायसंबन्धेन त्वङ्मनसोरेव सत्त्वेन आत्मन्यभावात् । अतः अवच्छेदकतासंबन्धेन ज्ञानं प्रति अवच्छेदकतासंबन्धेन त्वङ्मनस्संयोगः कारणम् इत्येव कार्यकारणभावो वक्तव्यः । अवच्छेदकतासंबन्धेन ज्ञानं पुरीतद्व्यतिरिक्तशरीरावयवे जायते । तत्र अवच्छेदकतासंबन्धेन त्वङ्मनस्संयोगः अस्ति इति कार्यकारणयोः सामानाधिकरण्यम् ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

लाघवात् इति । तथा च त्वङ्मनस्संयोगस्य अवच्छेदकतासंबन्धेन कारणतायाः वक्तव्यतया अवच्छेदकतायाश्च अवच्छेदकस्वरूपत्वात् अनेकेषु अवच्छेदकस्वरूपेषु कारणतावच्छेदकसंबन्धत्वं कल्पनीयम् इति गौरवम् । आत्ममनस्संयोगस्य तु समवायसंबन्धेनैव ज्ञानहेतुतया एकस्य समवायस्य कारणतावच्छेदकसंबन्धत्वं कल्पनीयम् इति लाघवम् । अतः लाघवरूपविनिगमकसत्त्वात् वैजात्यविशिष्टात्म-मनस्संयोग एव ज्ञानकारणम्, न तु त्वङ्मनस्संयोगः इति भावः ।

त्वङ्मनस्संयोगस्य ज्ञानकारणतापक्षे अन्यदपि गौरवम् आह – **चाक्षुषादि** इति । **एतेन** इति – वक्ष्यमाणदूषणेन इत्यर्थः । यत्र मनःक्रियया मनसः पुरीतत्संयो-गरूपा सुषुप्तिः, तत्रैव मनःक्रियया आत्ममनसोः विभागात् आत्ममनस्संयोगस्य नाशात् कथं ज्ञानोत्पत्तिः इति शङ्कायाः अवकाशः । तन्निवारणार्थं च पूर्वोक्तरीत्या आत्ममनस्संयोगस्य कार्यकालावृत्तितया कारणत्वं इत्यादिकं च क्लेशेन कल्पनीयम् । यत्र तु पुरीतत्क्रियया पुरीतन्मनस्संयोगरूपा सुषुप्तिः तत्र आत्मनसोः विभागाभावात् आत्मसंयुक्तमेव मनः इति आत्ममनस्संयोगरूपकारणवशात् ज्ञानस्योत्पत्तिः, उत्पन्नस्य ज्ञानस्य सुषुप्तिप्रथमक्षणे प्रत्यक्षापत्तिश्च भवति । तद्वारणाय त्वङ्मनस्संयोगस्य ज्ञानहेतुत्वं कल्पनीयम् । सुषुप्तिक्षणे तु त्वङ्मनस्संयोगविरहात् न ज्ञानोत्पत्तिः इति कैश्चित् उक्तमपि अपास्तम् । मनःक्रियाजन्यमनःपुरीतत्संयोगस्यैव सुषुप्तिपदार्थत्वात् । पुरीतत्क्रियाजन्यमनःपुरीतत्संयोगस्य सुषुप्तित्वाभावात् ।

अत एव इति । मनःक्रियाजन्यमनःपुरीतत्संयोगस्यैव सुषुप्तित्वादेव इत्यर्थः ।।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

।। मनोग्राह्यविषयनिरूपणम् ।।

कारिकावली

मनोग्राह्यं सुखं दुःखमिच्छा द्वेषो मतिः कृतिः ।

मुक्तावली

मनोग्राह्यम् इति । **मनोजन्यप्रत्यक्षविषय** इत्यर्थः । **मतिः** – **ज्ञानम्** । **कृतिः** – **यत्नः** । **एवं** सुखत्वदुःखत्वादिकमपि मनोग्राह्यम् । एवम् आत्मापि मनोग्राह्यः, किंतु ''मनोमात्रस्य गोचरः'' इत्यनेन पूर्वमुक्तत्वात् अत्र नोक्तः ।।

दिनकरी

मनोग्राह्यत्वस्य सार्वत्रिकत्वात् आह – **मनोजन्य** इति । **मनोमात्रजन्य** इत्यर्थः । न्यूनतां परिहरति – **एवं** इति ।

राजीवोल्लासः

सुखदुःखादीनां मनोजन्यप्रत्यक्षविषयत्वं लक्षणम् उक्तम् मूले । चाक्षुषादि-प्रत्यक्षस्यापि मनोजन्यतया तद्विषये घटादौ अतिव्याप्तिः इति आशङ्क्य आह – **मनोमात्रजन्य** इति । चाक्षुषादिप्रत्यक्षस्य मनोमात्रजन्यत्वाभावात् न घटादौ अतिव्याप्तिः । मूले मतिः ज्ञानम् इति ''स्मृतिस्तु अतीतविषया मतिः आगामिगोचरा'' इति अभियुक्तवचनात् मतिशब्दस्य ज्ञानविशेषबोधकत्वसंभवात् प्रकृते तत्परत्वभ्रमं व्यावर्तयितुम् इयं व्याख्या । एवं ''कालिदासस्य कृतिः'' इत्यादौ कृतिकर्मणि प्रयोगात् आह – कृतिः यत्न इति – इति सुबोधिनीकाराः । **न्यूनताम्** इति । सुखत्वदुःखत्वादीनामपि मनोमात्रग्राह्यतया तेषां मूले अनिर्देशात् न्यूनता भवति । तत्परिहारार्थं सुखत्वदुःखत्वादिकमपि इति उक्तम् ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

।। निर्विकल्पकप्रत्यक्षनिरूपणम् ।।

कारिकावली

ज्ञानं यन्निर्विकल्पाख्यं तदतीन्द्रियमिष्यते ।

मुक्तावली

निर्विकल्पाख्यम् इति । **चक्षुःसंयोगाद्यनन्तरं** ''घटः'' इत्याकारकं घटत्वादिविशिष्टविषयकं ज्ञानं न संभवति । पूर्वं विशेषणस्य घटत्वादेः ज्ञानाभावात् । **विशिष्टबुद्धौ विशेषणज्ञानस्य कारणत्वात्** । तथा च प्रथमतः घटघटत्वयोः **वैशिष्ट्यानवगाह्येव** ज्ञानं जायते । **तदेव निर्विकल्पकम्** । तच्च न प्रत्यक्षम् ।

दिनकरी

निर्विकल्पके प्रमाणं दर्शयति – चक्षुःसंयोगादि इति । **विशेषणज्ञानस्य कारणत्वात्** इति । **कदाचित्** ''घटः'' इत्याकारकं स्वरूपतः घटत्वप्रकारकं, कदाचित् ''जातिमान्'' इति जातित्वेन घटत्वप्रकारकं ज्ञानं जायते इत्यनुभवसाक्षिकम् । तन्निर्वाहाय घटत्वांशे अन्याप्रकारकघटत्वप्रकारकबुद्धौ तादृशघटत्वज्ञानत्वेन घटत्वांशे जातित्वप्रकारकघटत्वविशिष्टबुद्धौ च तादृशघटत्वज्ञानत्वेन हेतुत्वस्य आवश्यकत्वात् इति भावः । **वैशिष्ट्यानवगाह्येव** इति । **वैशिष्ट्यनिष्ठसांसर्गिकविषयताशून्यमेवेत्यर्थः** । वैशिष्ट्यनिष्ठसांसर्गिकविषयताशून्यत्वाभिधानेन घटघटत्वयोः विशेष्यताप्रकारताशून्यत्वं लब्धम् । तयोः वैशिष्ट्यनिष्ठसांसर्गिकविषयतानियतत्वात् । **नचैवं** निर्विकल्पकस्य निर्विषयकत्वापत्तिः, तुरीयविषयताया एव तत्र स्वीकारात् ।

एतेन – निर्विकल्पकस्य घटघटत्वावगाहित्ववत् वैशिष्ट्यावगाहित्वमपि दुर्वारम् । घटेन्द्रियसन्निकर्षकाले इन्द्रियसंबद्धविशेषणतायाः तद्वैशिष्ट्ये सत्त्वात् इति वैशिष्ट्यानवगाहित्वोक्तिः असङ्गता इति – अपास्तम् । **वैशिष्ट्यानवगाह्येव**

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

इति "एव" कारेण कल्पनीयविशेषणज्ञानस्य वैशिष्ट्यावगाहित्वे, तस्यापि विशिष्टबुद्धितया विशेषणज्ञानान्तरसापेक्षता स्यात्, एवं तस्यापि वैशिष्ट्यावगाहित्वम् इति अनवस्थाभिया प्रथमं विशेषणज्ञानं वैशिष्ट्यानवगाह्येव स्वीकार्यम् इति सूचितम् ।

तदेव – तादृशविषयतात्रयशून्यमेव । **निर्विकल्पकम्** निर्विकल्पकस्वरूपम् । लक्षणं तु प्रकारताशून्यत्वादिकं प्रत्येकमेव इति ध्येयम् ।।

राजीवोल्लासः

निर्विकल्पके प्रमाणं दर्शयति इति । घटचक्षुस्संयोगानन्तरं "अयं घटः" इत्याकारकं घटत्वविशिष्टविषयकज्ञानं न संभवति । विशिष्टबुद्धौ विशेषणज्ञानस्य कारणत्वात् । ततः पूर्वं विशेषणस्य घटत्वादेः ज्ञानाभावात् । अतः प्रथमतः घटघटत्वयोः वैशिष्ट्यानवगाहि ज्ञानं जायते । तदेव निर्विकल्पकम् । तदनन्तरमेव विशिष्टज्ञानं जायते । एवं च विशिष्टबुद्धौ विशेषणज्ञानं कारणम् इति कार्यकारणभाव एव निर्विकल्पकसद्भावे प्रमाणम् इति उक्तम् भवति ।

ननु विशिष्टबुद्धौ विशेषणज्ञानस्य कारणत्वे प्रमाणाभावः । घटचक्षुस्संयोगद्वितीयक्षणे एव "अयं घटः" इति विशिष्टप्रत्यक्षोपगमे बाधकाभावात् । न हि तृतीयक्षणे एव तादृशप्रत्यक्षम् इति लोकानाम् अनुभवः । "रक्तो दण्डः" इति रक्तत्वप्रकारकनिश्चयं विना "रक्तदण्डवान्" इति रक्तत्वविशिष्टदण्डवैशिष्ट्यावगाहिनिश्चयस्य अनुदयेन अन्वयव्यतिरेकाभ्यां विशिष्टवैशिष्ट्यप्रत्यक्षे विशेषणतावच्छेदप्रकारकनिश्चयस्य कारणत्वमस्तु नाम । विशिष्टबुद्धौ निर्विकल्पकस्य विशेषणज्ञानस्य कारणत्वं तु अन्वयव्यतिरेकाभ्यां न निश्चेतुं शक्यते । निर्विकल्पकस्य अतीन्द्रियत्वेन निर्विकल्पकसत्त्वे विशिष्टज्ञानम्, तदभावे तदभाव इति अन्वयव्यतिरेकप्रत्यक्षासंभवात् । तथा च विशेषणज्ञानहेतुत्वं न निर्विकल्पकसाधकम् इति आशङ्क्य विशेषणज्ञानस्य विशिष्टबुद्धिहेतुत्वे युक्तिम् आह – **कदाचित्** इत्यादिना । कदाचित् "घटः" इत्याकारकं स्वरूपतः घटत्वप्रकारकं ज्ञानं जायते । कदाचित् "जातिमान्"

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

इत्याकारकं जातित्वेन रूपेण घटत्वप्रकारकं ज्ञानं जायते इति अनुभवसाक्षिकम् । तादृशानुभवनिर्वाहाय घटत्वांशे अन्याप्रकारकघटत्वप्रकारकबुद्धौ घटत्वांशे अन्याप्रकारकघटत्वज्ञानं कारणम् । घटत्वांशे जातित्वप्रकारकघटत्वविशिष्टबुद्धौ घटत्वांशे जातित्वप्रकारकघटत्वज्ञानं हेतुः इति कार्यकारणभावद्वयं कल्पनीयम् । उक्तकार्यकारणभावद्वयान्तर्गतेन प्रथमकार्यकारणभावेन निर्विकल्पकं सिद्ध्यति । तथा च विशिष्टबुद्धौ विशेषणज्ञानस्य हेतुत्वे ज्ञानद्वयानुभव एव प्रमाणम् इति उक्तं भवति । अनुभवान्यथानुपपत्तिरूपार्थापत्तिर्वा तत्स्थानीयकेवलव्यतिरेक्यनुमानं वा प्रमाणं इति पर्यवस्यति ।

ननु निर्विकल्पकस्य वैशिष्ट्यानवगाहित्वम् असिद्धम् । चक्षुस्संयुक्तविशेषणतारूपसन्निकर्षेण समवायरूपवैशिष्ट्यस्यापि निर्विकल्पके भानसंभवात् इति, अत आह – **वैशिष्ट्यनिष्ठसांसर्गिकविषयताशून्यम्** इति । तथा च निर्विकल्पके समवायरूपस्य वैशिष्ट्यस्य भानेऽपि तत्र सांसर्गिकविषयता न अङ्गीक्रियते । एवं घटघटत्वयोः भानेऽपि तयोः विशेष्यता प्रकारता च न अङ्गीक्रियते । सांसर्गिकविषयतासत्त्वे एव विशेष्यताप्रकारतयोः सत्त्वाभ्युपगमात् । तथा च विशेष्यताशून्यत्वे सति प्रकारताशून्यत्वे सति संसर्गताशून्यत्वम् निर्विकल्पकस्य लक्षणम् इति उक्तं भवति ।

न च एवम् इति । निर्विकल्पके निरूपकतासंबन्धेन विशेष्यतादिविषयतात्रयशून्यत्वे निर्विकल्पकस्य निर्विषयकत्वं स्यात् इति – न च वाच्यम् । निर्विकल्पके चतुर्थविषयतायाः प्रकारतादित्रितयभिन्नतायाः स्वीकारात् ।।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

।। निर्विकल्पकस्य अतीन्द्रियत्वनिरूपणम् ।।

मुक्तावली

तथाहि – विषयानवगाहि ज्ञानस्य प्रत्यक्षं न भवति । ''घटमहं जानामि'' इति प्रत्ययात् । तत्र आत्मनि ज्ञानं प्रकारीभूय भासते, ज्ञाने घटः, तत्र घटत्वम् । यः प्रकारः स एव विशेषणम् इति उच्यते । विशेषणे यद्विशेषणं तत् विशेषणतावच्छेदकम् इति उच्यते । विशेषणतावच्छेदकप्रकारकं ज्ञानं विशिष्टवैशिष्ट्यज्ञाने कारणम् । निर्विकल्पके च घटत्वादिकं न प्रकारः, तेन **घटत्वादिविशिष्टघटादिवैशिष्ट्यभानं ज्ञाने न संभवति** । घटत्वाद्यप्रकारकं च घटादिविशिष्टज्ञानं न संभवति, जात्यखण्डोपाध्यतिरिक्तपदार्थज्ञानस्य किंचिद्धर्मप्रकारकत्वनियमात् ।।

दिनकरी

निर्विकल्पके मूलोक्तम् अतीन्द्रियत्वं साधयति – **तथा हि** इत्यादिना । **ज्ञानस्य प्रत्यक्षं विषयानवगाहि न भवति** इत्यन्वयः । **इति प्रत्ययात्** इति । घटाद्यवगाहित्वेनैव ज्ञानप्रत्यक्षस्य अनुभवसिद्धत्वात् इत्यर्थः । **तत्र** – ''घटमहं जानामि'' इति प्रत्यये । **घटत्वादिविशिष्टघटादिवैशिष्ट्यभानं ज्ञाने न संभवति** इति । **न च – विशेष्ये विशेषणमिति** रीत्यैव निर्विकल्पकानुव्यवसायः अस्तु इति – वाच्यम् । ''रक्तः पटः, घटः द्रव्यम्'' इति समूहालम्बनानन्तरं ''रक्तं घटं जानामि'' इति प्रतीत्यापत्त्या विशिष्टवैशिष्ट्यविषयताशून्यज्ञानानुव्यवसायानभ्युपगमात् इति ।।

राजीवोल्लासः

मूले निर्विकल्पकस्य अतीन्द्रियत्वं यदुक्तं तत्स्थापयति **मुक्तावल्याम् – तथा हि** इत्यादिना । निर्विकल्पकस्य प्रत्यक्षविषयत्वे अनुव्यवसायात्मकमानसप्रत्यक्षविषयत्वमेव वक्तव्यम् । तत्तु न संभवति – अनुव्यवसायात्मकमानस-

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्रत्यक्षविषयत्वस्य वैशिष्ट्यावगाहिज्ञाने एव संभवात् । ''घटमहं जानामि'' इत्याकारकः हि अनुव्यवसायः । अस्मिन् अनुव्यवसाये आत्मनि ज्ञानं प्रकारतया भासते । ज्ञाने घटः । घटे घटत्वं प्रकारतया भासते । अतः अयम् अनुव्यवसायः ज्ञानांशे घटत्वविशिष्टघटवैशिष्ट्यावगाही भवति । विशिष्टवैशिष्ट्यावगाहिप्रत्यक्षे च विशेषणतावच्छेदकप्रकारकनिश्चयः कारणम् । विशेषणे यद्विशेषणं तत् विशेषण-तावच्छेदकम् इति उच्यते । तथा च घटत्वं विशेषणतावच्छेदकम् । तत्प्रकारकं ज्ञानं ''अयं घटः'' इत्याकारकम् सविकल्पकज्ञानम् ''घटमहं जानामि'' इति अनुव्यवसाये कारणम् इति फलति । तथा च उक्तानुव्यवसायेन सविकल्पक-ज्ञानस्य ग्रहणसंभवेऽपि निर्विकल्पकज्ञानस्य ग्रहणं न संभवति । तस्य विशेषण-तावच्छेदकघटत्वप्रकारकत्वविरहात् । तथा च घटत्वविशिष्टघटविषयकत्वेन ज्ञानं विषयीकुर्वन् अनुव्यवसायः निर्विकल्पकं विषयीकर्तुं न शक्नोति । तस्य घटत्ववि-शिष्टघटविषयकत्वविरहात् । अतः निर्विकल्पकं न मानसप्रत्यक्षविषय इति सिद्धम् ।

न च विशिष्ये विशेषणम् इति । घटत्वविशिष्टघटवैशिष्ट्यावगाही अनुव्यवसायः इति यदि नियमः स्यात्, तदैव निर्विकल्पकं अनुव्यवसायविषयो न स्यात् । विशेष्ये विशेषणं तत्र च विशेषणान्तरम् इति रीत्या अनुव्यवसायस्वीकारे निर्विकल्पकज्ञानविषयकोऽपि अनुव्यवसायः भवितुम् अर्हति इति शङ्का । **समाधानं** तु – ''रक्तः पटः, घटो द्रव्यम्'' इति समूहालम्बनानन्तरं ''रक्तं घटं जानामि'' इति अनुव्यवसायापत्त्या विशिष्टवैशिष्ट्यविषयताशून्यस्य ज्ञानानुव्यवसायस्य अनङ्गीकारात् इति । अयमाशयः – विशेष्ये विशेषणं इति रीत्या अनुव्यवसायोपगमे रक्तत्वघटयोः पूर्वमुपस्थित्या तद्बलात् ''रक्तं घटं जानामि'' इति अनुव्यवसायः प्रसजति । अनुव्यवसायस्य विशिष्टवैशिष्ट्यावगाहित्वे तु ततः पूर्वं विशेषणता-वच्छेदकप्रकारकनिर्णयस्य ''रक्तो घटः'' इति आकारकस्य अपेक्षिततया तद्विरहात् ''रक्तं घटं जानामि'' इति अनुव्यवसायस्य नापत्तिः इति ।।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

।। महत्त्वस्य प्रत्यक्षहेतुत्वनिरूपणम् ।।

कारिकावली

महत्त्वं षड्विधे हेतुः...................।

मुक्तावली

महत्त्वं षड्विधे हेतुः इति । द्रव्यप्रत्यक्षे महत्त्वं समवायसंबन्धेन कारणम् । द्रव्यसमवेतानां गुणकर्मसामान्यानां प्रत्यक्षे स्वाश्रयसमवायसंबन्धेन, द्रव्यसमवेतसमवेतानां गुणत्वकर्मत्वादीनां प्रत्यक्षे स्वाश्रयसमवेतसमवायसंबन्धेन कारणमिति ।।

दिनकरी

महत्त्वं षड्विध इति । **यद्यपि** श्रावणादौ महत्त्वस्य हेतुत्वे प्रयोजनाभावः, **तथापि** द्रव्यसमवेतप्रत्यक्षत्वादेः तज्जन्यतावच्छेदकस्य श्रावणादिसाधारण्यात् श्रावणाद्यन्यत्वनिवेशे गौरवात् प्रयोजनाभावाच्च षड्विध इत्युक्तम् इति ध्येयम् ।।

राजीवोल्लासः

यद्यपि इति । चाक्षुषादिषड्विधप्रत्यक्षे **महत्त्वं कारणम्** इति मूलोक्तं न युक्तम् । श्रावणादिप्रत्यक्षे महत्त्वस्य हेतुत्वे प्रयोजनाभावात् । चाक्षुषादिप्रत्यक्षे तु महत्त्वस्य हेतुत्वे द्व्यणुकादेः चाक्षुषत्ववारणमेव प्रयोजनम् । श्रावणप्रत्यक्षे मानसप्रत्यक्षे च विषयभूतयोः शब्दज्ञानादिकयोः आश्रयस्य आकाशस्य आत्मनः च महत्त्वनियमात् इति शङ्का । समाधत्ते – **तथापि** इति । द्रव्यसमवेतविषयकप्रत्यक्षत्वावच्छिन्नं प्रति महत्त्वं कारणम् इति कार्यकारणभावः । तत्र कार्यतावच्छेदकस्य श्रावणादिसाधारण्यात् षड्विधे इति मूले उक्तम् । तथा च षड्विधसाधारणप्रत्यक्षत्वावच्छिन्ने महत्त्वं कारणम् इत्यर्थः । तत्र कार्यतावच्छेदकोटौ श्रावणाद्यन्यत्वनिवेशे प्रयोजनाभावात् गौरवाच्च तन्न निवेश्यते । तावता श्रावणत्वावच्छिन्ने महत्त्वस्य कारणत्वं न मूलाभिप्रेतम् । अतः न अनुपपत्तिः ।।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ इन्द्रियनिरूपणम् ॥

कारिकावली

................इन्द्रियं करणं मतम् ॥ ५९ ॥

मुक्तावली

इन्द्रियम् इति । अत्रापि षड्विधे इति अनुषज्यते । इन्द्रियत्वं न जातिः, पृथिवीत्वादिना सांकर्यात् । किंतु शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्वम् इन्द्रियत्वम् । **आत्मादिवारणाय सत्यन्तम्** । उद्भूतविशेषगुणस्य **श्रोत्रे सत्त्वात्** ''शब्देतर'' इति । विशेषगुणस्य रूपादेः चक्षुरादौ अपि सत्त्वात् ''उद्भूत''इति ।

उद्भूतत्वं न जातिः, शुक्लत्वादिना साङ्कर्यात् । न च – शुक्लत्वादिव्याप्यं नानैव उद्भूतत्वम् इति – वाच्यम् । उद्भूतरूपत्वादिना चाक्षुषादौ जनकत्वानुपपत्तेः । किंतु शुक्लत्वादिव्याप्यं नानैव अनुद्भूतत्वम्, तदभावकूटश्च उद्भूतत्वम् । तच्च संयोगादौ अपि अस्ति । तथा च शब्देतरोद्भूतगुणः संयोगादिः चक्षुरादौ अपि अस्ति, अतः ''विशेष'' इति । कालादिवारणाय विशेष्यदलम् । इन्द्रियावयव-विषयसंयोगस्यापि **प्राचां मते** प्रत्यक्षजनकत्वात् इन्द्रियावयववारणाय, नवीनमते **कालादौ** रूपाभावप्रत्यक्षे सन्निकर्षघटकतया कारणीभूतचक्षुःसंयोगाश्रयस्य कालादेः वारणाय वा **मनःपदम्** । **ज्ञानकारणम्** इत्यपि तद्वारणायैव । **करणम्** इति । असाधारणं कारणं करणम् । असाधारणत्वं व्यापारवत्त्वम् ॥

दिनकरी

आत्मादिवारणाय इति । आत्मादौ योऽतिव्याप्तिरूपः दोषः तद्वारणाय इत्यर्थः । सत्यन्तदाने च शब्दात् इतरे ये उद्भूतविशेषगुणाः सुखादयः तदाश्रयत्वस्यैव आत्मनि सत्त्वात् न अतिव्याप्तिः इति भावः । **श्रोत्रे सत्त्वात्** इति । तथा च तत्र अव्याप्तिः इति भावः ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

''विशेष''पदस्य प्रयोजनं वक्तुं भूमिकाम् आह – **उद्भूतत्वम्** इति । **जनकत्वानुपपत्तेः** इति । **एकैकस्य** कारणतावच्छेदकत्वे व्यभिचारात् कूटस्य एकत्रावृत्तितया करणतानवच्छेदकत्वात् इति भावः । **तदभावकूटश्च उद्भूतत्वम्** इति । तथा च **तादृशकूटस्य** कारणतावच्छेदकत्वम् इति न उक्तदोषः इति भावः । **''इन्द्रियावयववारणाय''** इति **मनःपदम्** इत्यनेन अन्वितम् । **नवीनमते** मनःपदप्रयोजनम् आह – **कालादौ** इति । समवायेन घटाभावादीनां काले सत्त्वेऽपि न तत्प्रत्यक्षम्, **योग्यानुपलब्धेः** अभावात्, **अतः रूपाभावपर्यन्तानुधावनम्** । **तद्वारणाय** इति । कालादेः वारणाय इत्यर्थः ।।

राजीवोल्लासः

एकैकस्य इति । शुक्लत्वादिव्याप्यम् उद्भूतत्वं यदि नाना स्यात् तदा एकैकस्य शुक्लत्वादिव्याप्यस्य उद्भूतत्वस्य कारणतावच्छेदकत्वे व्यतिरेकव्यभिचारः । तथा हि – शुक्लत्वव्याप्योद्भूतत्वविशिष्टरूपं चाक्षुषप्रत्यक्षे कारणम् इत्युक्तौ तादृशरूपं विनापि नीलत्वव्याप्योद्भूतत्वविशिष्टरूपात् प्रत्यक्षोत्पत्या व्यतिरेकव्यभिचारः । एवं नीलत्वव्याप्योद्भूतत्वविशिष्टरूपस्य चाक्षुषप्रत्यक्षकारणत्वे तादृशरूपं विनापि उद्भूतशुक्लात् चाक्षुषप्रत्यक्षोत्पत्या व्यतिरेकव्यभिचार इति । यदि तु शुक्लत्वादिसप्तव्याप्यानि यानि सप्त उद्भूतत्वानि तत्कूटविशिष्टरूपं चाक्षुषप्रत्यक्षे कारणम् इत्युच्यते, तदा उद्भूतत्वादि सप्तकूटस्य एकस्मिन् रूपे अवृत्तितया तद्विशिष्टरूपाप्रसिद्ध्या कूटस्य कारणतावच्छेदकत्वं न संभवति इति भावः ।

तादृशकूटस्य इति । अनुद्भूतत्वाभावकूटविशिष्टस्य रूपस्य कारणतया अनुद्भूतत्वाभावकूटस्य कारणतावच्छेदकत्वम् इति नोक्तदोषः । एकत्र अवृत्तित्वप्रयुक्तकारणत्वानुपपत्तिरूपः दोषः नास्ति । उद्भूतत्वसमुदायस्य एकत्र अवृत्तित्वेऽपि अनुद्भूतत्वाभावसमुदायस्य एकत्र उद्भूतशुक्ले वृत्तित्त्वात् इति तात्पर्यम् ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

योग्यानुपलब्धेः इति । काले समवायसंबन्धावच्छिन्नघटाभावः यद्यपि वर्तते, तथापि कालविशेष्यकसमवायसंबन्धावच्छिन्नघटाभावप्रत्यक्षं न संभवति, योग्यानुपलब्धेः असंभवात् । ''यदि काले घटः स्यात्, तदा घटवत्तया उपलभ्येत'' इति आकारकापत्तेः कालस्य अयोग्यत्वेन असंभवात् । तथा च प्रतियोगिसत्त्वप्रसञ्जनप्रसञ्जितप्रतियोगिकत्वरूपयोग्यताविशिष्टानुपलब्धेः अभावात् इति पर्यवसितः अर्थः । अतः रूपाभावपर्यन्तानुधावनम् इति । ''काले यदि रूपं स्यात् तदा उपलभ्येत'' इति आपत्तिस्तु संभवति । नीरूपत्वेनैव कालस्य अयोग्यतायाः संपादनीयतया रूपसत्त्वे कालस्य अयोग्यताविरहात् । अतः प्रतियोगिसत्त्वप्रसञ्जनप्रसञ्जितप्रतियोगिकत्वरूपयोग्यताविशिष्टानुपलब्धेः सद्भावात् काले रूपाभावप्रत्यक्षं संभवति इति भावः ।।

।। लौकिकसन्निकर्षनिरूपणम् ।।

कारिकावली

विषयेन्द्रियसंबन्धो व्यापारः, सोऽपि षड्विधः ।
द्रव्यग्रहस्तु संयोगात्, संयुक्तसमवायतः ।। ५९ ।।

द्रव्येषु समवेतानां, तथा तत्समवायतः ।
तत्रापि समवेतानां, शब्दस्य समवायतः ।। ६० ।।

तद्वृतीनां समवेतसमवायेन तु ग्रहः ।
प्रत्यक्षं समवायस्य विशेषणतया भवेत् ।। ६१ ।।

विशेषणतया तद्वदभावानां ग्रहो भवेत् ।।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

मुक्तावली

विषयेन्द्रियसंबन्धः व्यापारः सोऽपि षड्विध इति । व्यापारः संनिकर्षः । षड्विधं संनिकर्षम् उदाहणद्वारा प्रदर्शयति – **द्रव्यग्रह इति । द्रव्यप्रत्यक्षम्** इन्द्रियसंयोगजन्यम् । **द्रव्यसमवेतप्रत्यक्षम्** इन्द्रियसंयुक्तसमवायजन्यम् । **एवम् अग्रेऽपि ।**

दिनकरी

जन्यत्वघटितस्य व्यापारत्वस्य श्रोत्रशब्दसंबन्धे समवायरूपे अभावात् आह – **व्यापारः सन्निकर्ष इति । द्रव्यप्रत्यक्षम् इति । द्रव्यवृत्ति-लौकिकविषयतासंबन्धेन** प्रत्यक्षम् इत्यर्थः । **द्रव्यसमवेत इति ।** द्रव्यसमवेतवृत्ति-लौकिकविषयतासंबन्धेन प्रत्यक्षम् इत्यर्थः । **एवम् अग्रेऽपि इति ।** द्रव्यसमवेतसमवेत-वृत्तिलौकिकविषयतासंबन्धेन प्रत्यक्षम् इन्द्रियसंयुक्तसमवेतसमवायजन्यम् इत्यर्थः ॥

राजीवोल्लासः

ननु **विषयेन्द्रियसंबन्धो व्यापारः** इति मूलम् असङ्गतम् । शब्दश्रोत्रसंबन्धस्य समवायस्य नित्यतया तज्जन्यत्वे सति तज्जन्यजनकत्वरूपव्यापारत्वस्य असंभवात् । अतः व्यापारपदं सन्निकर्षार्थकतया व्याख्यातम् **मुक्तावल्याम्** इति आह – **जन्यत्वघटितस्य** इति ।

ननु द्रव्यप्रत्यक्षे इन्द्रियसंयोगस्य केन संबन्धेन कारणत्वम् । न तावत् समवायसंबन्धेन । द्रव्यप्रत्यक्षस्य आत्मनि वर्तमानतया इन्द्रियसंयोगस्य च समवायसंबन्धेन विषयनिष्ठस्य आत्मन्यवृत्तेः । न च – कार्यतावच्छेदकसंबन्धः विषयतासंबन्धः । तथा च विषयतासंबन्धेन द्रव्यप्रत्यक्षं प्रति समवायसंबन्धेन इन्द्रियसंयोगः कारणम् इति कार्यकारणभावात् न अनुपपत्तिः इति – वाच्यम् । घटरूपद्रव्यविषयकस्य ''अयं घटः'' इत्याकारकस्य प्रत्यक्षस्य विषयतासंबन्धेन घटत्वेऽपि उत्पत्त्या तत्र समवायसंबन्धेन इन्द्रियसंयोगाभावेन व्यतिरेकव्यभिचारात् ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अतः **द्रव्यप्रत्यक्षम्** इत्यस्य अर्थम् आह – **द्रव्यवृत्तिलौकिकविषतासंबन्धेन** इति । तथा च प्रत्यक्षत्वं न इन्द्रियसंयोगजन्यतावच्छेदकम् । द्रव्यवृत्ति-लौकिकविषयतासंबन्धः कार्यतावच्छेदकसंबन्धः । तेन संबन्धेन प्रत्यक्षं घटत्वादौ नास्ति इति तत्र इन्द्रियसंयोगाभावेऽपि न व्यतिरेकव्यभिचारः इति भावः ।।

मुक्तावली

वस्तुतस्तु द्रव्यचाक्षुषं प्रति चक्षुःसंयोगः कारणम्, द्रव्यसमवेतचाक्षुषं प्रति चक्षुःसंयुक्तसमवायः, द्रव्यसमवेतसमवेतचाक्षुषं प्रति चक्षुःसंयुक्तसमवेतसमवायः इति विशिष्यैव कार्यकारणभावः ।।

दिनकरी

ननु **द्रव्यप्रत्यक्षे इन्द्रियसन्निकर्षत्वेन** हेतुत्वे त्वक्प्रभासंयोगात् **चाक्षुषापत्तिः**, एवम् अन्धकारे घटचक्षुःसंयोगात् स्पार्शनापत्तिश्च इति, आह – **वस्तुतस्तु** इति ।।

राजीवोल्लासः

द्रव्यप्रत्यक्षे इति । द्रव्यवृत्तिलौकिकविषयतासंबन्धेन प्रत्यक्षे इत्यर्थः । **इन्द्रियसन्निकर्षत्वेन** इति । इन्द्रियसंयोगत्वेन इत्यर्थः । **चाक्षुषापत्तिः** इति । त्वगिन्द्रियप्रभासंयोगस्यापि इन्द्रियसंयोगत्वात् तद्बलात् प्रभायाः चाक्षुषप्रत्यक्षापत्तिः । एवं अन्धकारे घटचक्षुस्संयोगात् घटस्य स्पार्शनापत्तिः । आपादकापाद्ययोः कारणतावच्छेदककार्यतावच्छेदकरूपाक्रान्तत्वात् इत्यतः सामान्यरूपेण कार्यकारण-भावं परित्यज्य विशेषरूपेण कार्यकारणभावं प्रदर्शयति । तथा च द्रव्यप्रत्यक्ष-त्वावच्छिन्नं प्रति इन्द्रियसंयोगत्वावच्छिन्नं कारणम् इति न कार्यकारणभावः । किन्तु द्रव्यचाक्षुषत्वावच्छिन्नं प्रति चक्षुस्संयोगत्वावच्छिन्नं कारणम् इति रीत्या विशिष्यैव कार्यकारणभावः । प्रभाविषयकचाक्षुषं प्रति प्रभाचक्षुस्संयोगस्यैव कारणत्वात् न त्वक्प्रभासंयोगात् प्रभाचाक्षुषापत्तिः । एवम् अन्धकारे घटस्पार्शनं प्रति घटत्वक्संयोगस्यैव कारणत्वात् न घटचक्षुस्संयोगात् घटस्य स्पार्शनापत्तिः ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

यद्यपि चाक्षुषत्वस्य इन्द्रियसंयोगजन्यतानवच्छेदकत्वेन इन्द्रियसंयोग-कारणबलात् चाक्षुषापत्तिः अयुक्ता तद्बलेन प्रत्यक्षत्वावच्छिन्नस्यैव आपादनसंभवात्, तथापि जायमानं प्रत्यक्षं चाक्षुषमेव अङ्गीकार्यं न स्पार्शनम् । तत्र उद्भूतस्पर्शाभावात्, स्पार्शने तस्य हेतुत्वात् । इन्द्रियान्तरं च द्रव्यग्राहकमेव न इत्यभिप्रायेण चाक्षुषापादनात् न असङ्गतिः । एवम् उत्तरत्रापि । चाक्षुषे आलोकसंयोगस्य हेतुतया तदभावात् न अन्धकारे चाक्षुषापत्तिः, अतः स्पार्शनापादनम् इति बोध्यम् इति **तरङ्गिणीकाराः** ।।

मुक्तावली

परं तु पृथिवीपरमाणुनीले नीलत्वम्, पृथिवीपरमाणौ पृथिवीत्वं च चक्षुषा कथं न गृह्यते? तत्र परम्परया उद्भूतरूपसंबन्धस्य महत्त्वसंबन्धस्य च सत्त्वात् । तथाहि – नीले नीलत्वजातिः एकैव घटनीले परमाणुनीले च वर्तते । तथा च महत्त्वसंबन्धः घटनीलम् आदाय वर्तते, उद्भूतरूपसंबन्धस्तु उभयम् आदायैव वर्तते । एवं पृथिवीत्वेऽपि घटादिकम् आदाय महत्त्वसंबन्धः बोध्यः । एवं वायौ तदीयस्पर्शादौ च सत्तायाः चाक्षुषप्रत्यक्षं स्यात् । तस्मात् **उद्भूतरूपावच्छिन्न-महत्त्वावच्छिन्नचक्षुःसंयुक्तसमवेतसमवायस्य द्रव्यसमवेतसमवेतप्रत्यक्षे तादृशचक्षुःसंयुक्तसमवायस्य द्रव्यसमवेतप्रत्यक्षे कारणत्वं वाच्यम्** । इत्थं च परमाणु-नीलादौ न नीलत्वादिग्रहः । परमाणौ चक्षुःसंयोगस्य महत्त्वावच्छिन्नत्वाभावात् । एवं वाय्वादौ न सत्तादिचाक्षुषम्, तत्र चक्षुःसंयोगस्य रूपावच्छिन्न-त्वाभावात् । एवं यत्र घटस्य पृष्ठावच्छेदेन आलोकसंयोगः, चक्षुःसंयोगस्तु अग्रावच्छेदेन, तत्र घटप्रत्यक्षाभावात् आलोकसंयोगा-वच्छिन्नत्वं चक्षुःसंयोगे विशेषणं देयम् ।।

दिनकरी

ननु एवम् आत्मप्रत्यक्षानुरोधेन मनःसंयोगस्य, ज्ञानादिप्रत्यक्षानुरोधेन मनःसंयुक्त-समवायस्य प्रत्यासत्तित्वेऽपि चक्षुरादिसंयोगतत्संयुक्तसमवाययोः प्रमाणाभावः । चक्षुरादिसंयुक्त-समवेतसमवायेनैव त्र्यणुकादेः चाक्षुषाद्युपपत्तेः, अत आह – **परं**

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

तु इति । परम्परया – स्वाश्रयसमवेतसमवेतत्वादिसंबन्धेन । उद्भूतरूपावच्छिन्न-महत्त्वावच्छिन्नचक्षुःसंयुक्तसमवेतसमवायस्य इति । अत्र चक्षुर्घटितचक्षुःसन्नि-कर्षात् चक्षुष्ट्वादीनां प्रत्यक्षवारणाय ''उद्भूत'' इति । ''उद्भूतरूपावच्छिन्न''इति ''महत्त्वावच्छिन्न'' इति चक्षुःसंयुक्तपदार्थैकदेशसंयोगेन अन्वेति । तथाच महत्त्वावच्छिन्नचक्षुःसंयुक्तसमवेतसमवायस्य त्रसरेणौ अभावात् तच्चाक्षुषाद्यनुपपत्तिः, अतः संयोगस्य प्रत्यासत्तित्वम् आवश्यकम् इति भावः । संयुक्तसमवेतसमवायेन संयुक्तसमवायस्य नान्यथासिद्धिः इत्याह – तादृश इति । महत्त्वावच्छिन्न इत्यर्थः । तथा च महत्त्वावच्छिन्नचक्षुःसंयुक्तसमवेतसमवायस्य त्रसरेणुरूपे अभावात् चाक्षुषानुपपत्त्या संयुक्तसमवायस्य प्रत्यासत्तित्वम् इति भावः । एतत्प्रसङ्गेन पूर्वं ''रूपावच्छिन्नत्वम्'' अग्रे च ''आलोकसंयोगावच्छिन्नत्वम्'' चक्षुःसंयोगे तत्प्रयोजनं च अभिहितम् इति बोध्यम् ।।

राजीवोल्लासः

ननु एवम् इति । विशिष्यैव कार्यकारणभावस्वीकारे इत्यर्थः । चाक्षुषप्रत्यक्षं प्रति चक्षुस्संयुक्तसमवेतसमवायः कारणम् इति एक एव कार्यकारणभावः । अनेनैव द्रव्यचाक्षुषं तत्समवेतचाक्षुषं, तत्समवेतसमवेतचाक्षुषं च भवितुम् अर्हति । तथा हि – घटचाक्षुषं प्रति चक्षुस्संयुक्तसमवेतसमवायः कारणम्, न तु चक्षुस्संयोगः । चक्षुस्संयुक्ता कपालिका तत्समवेतः कपालः तत्समवायः घटे वर्तते । एवं चक्षुस्संयुक्तकपालसमवेतघटसमवायस्य घटरूपे सत्त्वात् चक्षुस्संयुक्तसमवेतसमवायेनैव घटरूपस्य प्रत्यक्षं निर्वहति । एवं चक्षुस्संयुक्तघटसमवेतरूपसमवायस्य रूपत्वजातौ सत्त्वात् तत्प्रत्यक्षमपि चक्षुस्संयुक्तसमवेतसमवायेनैव निर्वहति इति चक्षुस्संयोग-चक्षुस्संयुक्तसमवाययोः सन्निकर्षत्वं मास्तु । आत्मनः निरवयवत्वात् आत्मतत्समवेत-ज्ञानादितत्समवेतज्ञानत्वादित्रितयप्रत्यक्षं एकेन मनसंयुक्तसमवेतसमवायेन न निर्वहतीति तत्र मनस्संयोगमनस्संयुक्तसमवाययोरपि सन्निकर्षत्वं आवश्यकम् इति आक्षेपः ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

समाधानं तु परन्तु इत्यादिना मुक्तावल्यां स्पष्टम् उक्तम् । चक्षुस्संयुक्तसमवेत-समवायस्य चाक्षुषप्रत्यक्षं प्रति कारणत्वे पृथिवीपरमाणुनीलवृत्तिनीलत्वस्य चाक्षुषप्रत्यक्षापत्तिः । चक्षुस्संयुक्तपृथिवीपरमाणुसमवेतनीलसमवायस्य नीलत्वे सत्त्वात् । न च – गुणगतजातिप्रत्यक्षं प्रति स्वाश्रयसमवेतसमवायसंबन्धेन महत्त्वस्य कारणत्वात् परमाणौ महत्त्वाभावेन उक्तसंबन्धेन नीलत्वे महत्त्वविरहात् कथं प्रत्यक्षापत्तिः इति – वाच्यम् । परमाणुनीलघटनीलयोः एकस्या एव नीलत्वजातेः सत्त्वात् घटनीलमादाय महत्त्वसंबन्धः नीलत्वे वक्तुं शक्यते । स्वं महत्त्वं, स्वाश्रयः घटः, तत्समवेतं घटनीलं, तत्समवायः नीलत्वे इति । एवं पृथिवीपरमाणौ पृथिवीत्वस्य चाक्षुषापत्तिः । परमाणौ घटे च पृथिवीत्वस्य एकस्यैव सत्त्वात् घटं तदवयवं च आदाय पृथिवीत्वे चक्षुस्संयुक्तसमवेतसमवायस्य सद्भावात् । अतः उद्भूतरूपमहत्त्वद्वयविशिष्टचक्षुस्संयोगाश्रयसमवेतसमवायः गुणगतजातिप्रत्यक्षं प्रति कारणम् इति वक्तव्यम् । वैशिष्ट्यं च सामानाधिकरण्यसंबन्धेन । एवं सति परमाणुनीले नीलत्वप्रत्यक्षं न आपादयितुं शक्यते । परमाणौ विद्यमानस्य चक्षुस्संयोगस्य महत्त्वविशिष्टत्वाभावात् महत्त्वविशिष्टः यः चक्षुस्संयोगः तदाश्रयसमवेतसमवायस्य नीलत्वे अभावात् । इत्थं च त्र्यणुकस्य चाक्षुषत्वानुपपत्तिः । चक्षुस्संयुक्तपरमाणु-समवेतद्व्युणुकसमवायेनैव त्र्यणुकस्य प्रत्यक्षम् इति उपपादनीयम् । परन्तु परमाणुगतचक्षुस्संयोगे महत्त्वविशिष्टत्वाभावात् महत्त्वावच्छिन्नचक्षुस्संयुक्तसमवेत-समवायस्य त्र्यणुके अभावात् । अतः त्र्यणुकस्य चाक्षुषनिर्वाहाय चक्षुस्संयोगस्य सन्निकर्षत्वम् आवश्यकम् । एवं त्र्यणुकगतरूपप्रत्यक्षनिर्वाहाय चक्षुस्संयुक्तसमवायस्य सन्निकर्षत्वम् आवश्यकम् । अन्यथा द्व्यणुके विद्यमानस्य चक्षुस्संयोगस्य महत्त्वावच्छिन्नत्वविरहात् महत्त्वावच्छिन्नचक्षुस्संयुक्तसमवेतसमवायस्य त्र्यणुकरूपे दुर्घटत्वात् । चक्षुस्संयुक्तसमवायस्य सन्निकर्षत्वे तु महत्त्वावच्छिन्नचक्षुस्संयोगाश्रयः त्र्यणुकम् । तत्समवायः त्र्यणुकरूपे वर्तत इति तस्य प्रत्यक्षं निर्वहति ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

चक्षुर्घटित इति । परकीयचक्षुर्घटितेत्यर्थः । स्वस्मिन् स्वप्रतियोगिकसंयोगानुयोगित्वासंभवात् । **संयुक्तपदार्थैकदेश** इति । यद्यपि सामानाधिकरण्यसंबन्धेन संयोगे रूपावच्छिन्नत्वनिवेशापेक्षया संयुक्त एव समवायेन रूपावच्छिन्नत्वनिवेश एव लाघवम्, तथापि विभिन्नावच्छेदेन आलोकचक्षुःसंयोगाभ्यां दण्डादिप्रत्यक्षवारणाय अग्रे चक्षुःसंयोगे आलोकसंयोगनिष्ठावच्छेदकतानिरूपकत्वस्य विवक्षणीयतया तत्रैव महत्त्वोद्भूतवैशिष्ट्यं निवेशितम् । एकत्र एकं विशेषणं अपरत्र विशेषणद्वयम् इति स्वीकारे अर्धजरतीयन्यायापत्तेः इति भावः । वस्तुतः उक्तलाघवानुरोधेन चक्षुःसंयुक्त एव विशेषणद्वयम् उचितम् । एकत्र विशेषणत्रयोपगमे परस्परविशेषणविशेष्यभावे विनिगमनाविरहेण कार्यकारणभावाधिक्यप्रसङ्गात् इति अवधेयम् । ननु उक्तग्रन्थस्य संयुक्तसमवेतसमवायेनैव उपपत्तौ संयोगसंयुक्तसमवाययोः वैय्यर्थ्यम् इति आशङ्कयैव अवतारिततया संयोगे महत्त्वावच्छिन्नत्वनिवेशेनैव तादृशशङ्कानिरासात् उद्भूतरूपावच्छिन्नत्वविशेषणप्रदर्शनं मूले विफलम् इति आशङ्कां परिहरति – एतत् इति । तथा च स्मृतस्य उपेक्षानर्हत्वादेव तत्र विशेषणद्वयम् अभिहितम् इति न दोष इति भावः । अत्र च **अग्रे च** इत्यादिकं यथा आलोकसंयोगावच्छिन्नत्वोपादानं प्रयोजनान्तरार्थमेव, न तु संयोगसंयुक्तसमवाययोः सन्निकर्षत्वोपपत्त्यर्थम्, तथा उद्भूतरूपावच्छिन्नत्वनिवेशनमपि चक्षुष्ट्वादेः चाक्षुषनिरसनायैव इति दृष्टान्तविधयैव उक्तम् । तेन वक्ष्यमाणग्रन्थस्य उक्ताशङ्कया अनवतारितत्वेऽपि न क्षतिः इति तरङ्गिणीकाराः ।।

मुक्तावली

एवं द्रव्यस्पार्शनप्रत्यक्षे त्वक्संयोगः कारणम् । द्रव्यसमवेतस्पार्शनप्रत्यक्षे त्वक्संयुक्तसमवायः । द्रव्यसमवेतसमवेतस्पार्शनप्रत्यक्षे त्वक्संयुक्तसमवेतसमवायः । अत्रापि महत्त्वावच्छिन्नत्वम् उद्भूतस्पर्शावच्छिन्नत्वं च पूर्ववदेव बोध्यम् । एवं गन्धप्रत्यक्षे घ्राणसंयुक्तसमवायः, गन्धसमवेतस्य घ्राणजप्रत्यक्षे घ्राणसंयुक्तसमवेतसमवायः; रसप्रत्यक्षे रसनासंयुक्तसमवायः, रससमवेतस्य रासनप्रत्यक्षे

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

रसनासंयुक्तसमवेतसमवायः कारणम् । शब्दप्रत्यक्षे श्रोत्रावच्छिन्नसमवायः, शब्दसमवेतश्रावणप्रत्यक्षे श्रोत्रावच्छिन्नसमवेतसमवायः कारणम् ।

अत्र सर्वं प्रत्यक्षं लौकिकं बोध्यम् । वक्ष्यमाणम् अलौकिकप्रत्यक्षम् इन्द्रियसंयोगादिकं विनापि संभवति ।

एवम् आत्मप्रत्यक्षे मनःसंयोगः, आत्मसमवेतमानसप्रत्यक्षे मनःसंयुक्तसमवायः, आत्मसमवेतसमवेतमानसप्रत्यक्षे मनःसंयुक्तसमवेतसमवायः कारणम् ।।

दिनकरी

स्पार्शनप्रत्यक्षे त्वक्संनिकर्षस्य कारणत्वं प्रपञ्चयति – **एवम्** इत्यादिना । **पूर्ववदेव** इति । **परमाणुघटितत्वक्संनिकर्षेण** स्पर्शत्वस्पार्शनवारणाय महत्त्वावच्छिन्नत्वं, प्रभाघटितसंनिकर्षात् सत्तादिस्पार्शनवारणाय उद्भूतस्पर्शावच्छिन्नत्वम् विशेषणं बोध्यम् इत्यर्थः । **श्रोत्रावच्छिन्न** इति । **सकलपुरुषाणां** सर्वशब्दप्रत्यक्षापत्तिः अतः "**श्रोत्रावच्छिन्न**" इति ।।

राजीवोल्लासः

परमाणुघटितत्वक्सन्निकर्षेण इति । त्वक्संयुक्तपरमाणुसमवेतसमवायसंबन्धेन इत्यर्थः । परमाणुगतस्पर्शे स्पर्शत्वस्य स्पार्शनप्रत्यक्षवारणाय महत्त्वावच्छिन्नत्वक्संयुक्तसमवेतसमवायस्य स्पर्शत्वस्पार्शनं प्रति कारणत्वं वक्तव्यम् । त्वक्संयुक्तप्रभासमवेतस्पर्शे स्पर्शत्वस्य स्पार्शनप्रत्यक्षवारणाय स्पर्शत्वविषयकस्पार्शनं प्रति उद्भूतस्पर्शावच्छिन्नत्वक्संयुक्तसमवेतसमवायोऽपि कारणम् इति वक्तव्यम् ।

श्रोत्रावच्छिन्नत्वस्य समवायविशेषणस्य फलम् आह – **सकलपुरुषाणाम्** इति । शब्दप्रत्यक्षे समवायः कारणम् इत्युक्तौ समवायस्यैकत्वात् सकलपुरुषाणां सर्वशब्दप्रत्यक्षापत्तिः । तद्वारणाय शब्दप्रत्यक्षे श्रोत्रावच्छिन्नसमवायः कारणं इति कल्प्यते । तेन तत्पुरुषीयश्रोत्रावच्छेदेन आकाशसमवायः यस्य शब्दस्य वर्तते तस्यैव शब्दस्य तेन पुरुषेण ग्रहणम् । अतः नोक्तापत्तिः ।।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

मुक्तावली

समवायप्रत्यक्षे अभावप्रत्यक्षे च इन्द्रियसंबद्धविशेषणता हेतुः । **वैशेषिकमते तु समवायो न प्रत्यक्षः ।**

अत्र यद्यपि विशेषणता नानाविधा, तथा हि – भूतलादौ घटाद्यभावः संयुक्तविशेषणतया गृह्यते; संख्यादौ रूपाद्यभावः संयुक्तसमवेतविशेषणतया, संख्यात्वादौ रूपाद्यभावः संयुक्तसमवेतसमवेतविशेषणतया, शब्दाभावः केवल-श्रोत्रावच्छिन्नविशेषणतया, कादौ खत्वाद्यभावः श्रोत्रावच्छिन्नसमवेतविशेषणतया, तथापि विशेषणतात्वेन एकैव सा गण्यते । अन्यथा षोढा सन्निकर्षः इति प्राचां प्रवादः व्याहन्यते इति ।।

दिनकरी

इन्द्रियसंबद्ध इति । यद्यपि इन्द्रियसंयुक्तविशेषणता इन्द्रियसंयुक्तसमवेत-विशेषणता इत्यादिक्रमेण बाहुल्यमेव, तथापि विशेषणतात्वेनैव रूपेण विभागः । न च एवं समवायत्वेन चतुर्णाम् अनुगमप्रसङ्गः, परिभाषाया अपर्यनुयोज्यत्वात् । **समवायः न प्रत्यक्ष इति । संबन्धप्रत्यक्षे** यावदाश्रयप्रत्यक्षस्य हेतुत्वात् इति भावः ।।

राजीवोल्लासः

यद्यपि इति । यद्यपि इयम् आशङ्का अग्रे मूलकृतैव क्रियते समाधीयते च उक्तसमाधानेनैव इति व्याख्याने एतदाशङ्कायाः तत्समाधानस्य च वैफल्यमेव, तथापि विशेषणतानां विशेषणतात्वेन विभागे संयुक्तसमवायादीनां चतुर्णां केवलसमवायविभाजकसमवायत्वेन अनुगमसंभवेन संयोगसमवायविशेषणताः त्रयः सन्निकर्षा इत्येव कुतः न उक्तम् इत्याक्षेपस्य मूलकृता तादृशसमाधानोपर्यनिराकृततया तन्निरासाय एव मूलोक्तार्थस्य अनुवाद इति विभावनीयम् ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

मूले वैशेषिकमते समवायः न प्रत्यक्ष इति उक्तम् । तत्र युक्तेः अनुक्तत्वात् तत्र युक्तिम् आह – संबन्धप्रत्यक्ष इति । समवायस्य एकतया एकदा भाविभूतसकलाश्रयव्यक्तीनां ज्ञानासंभवात् इति भावः । न्यायमते तु संबन्धप्रत्यक्षत्वं न कार्यतावच्छेदकम्, संबन्धत्वस्य अनुगतस्य निर्वक्तुम् अशक्यत्वात् । सांसर्गिकविषयतावत्त्वस्य कथंचित्सुवचत्वेऽपि तादृशसंबन्धत्वस्य घटत्वादिसाधारणतया तत्प्रत्यक्षे व्यभिचारापत्तेः । अपि तु संयोगप्रत्यक्षत्वमेव कार्यतावच्छेदकम् । अतः समवायस्य तन्मते न प्रत्यक्षत्वानुपपत्तिः इति भावः इति तरङ्गिणीकाराः ॥

॥ अनुपलब्धिनिरूपणम् ॥

कारिकावली

"यदि स्यादुपलभ्येत" इत्येवं यत्र प्रसज्यते ॥ ६१ ॥

मुक्तावली

अत्र अभावप्रत्यक्षे योग्यानुपलब्धिः कारणम् । तथा हि – भूतलादौ घटादिज्ञाने जाते घटाभावादिकं न ज्ञायते । तेन अभावोपलम्भे प्रतियोग्युपलम्भाभावः कारणम् । तत्र योग्यतापि अपेक्षिता । सा च प्रतियोगिसत्त्वप्रसंजनप्रसंजितप्रतियोगिकत्वरूपा । तदर्थश्च – प्रतियोगिनः घटादेः सत्त्वप्रसक्त्या प्रसंजितः उपलम्भरूपः प्रतियोगी यस्य सः अभावप्रत्यक्षे हेतुः । तथा हि – यत्र आलोकसंयोगादिकं वर्तते, तत्र "यदि अत्र घटः स्यात् तर्हि उपलभ्येत" इत्यापादयितुं शक्यते । तत्र घटाभावादेः प्रत्यक्षं भवति । अन्धकारे तु न आपादयितुं शक्यते । तेन घटाभावादेः अन्धकारे न चाक्षुषप्रत्यक्षम् । स्पार्शनप्रत्यक्षं तु भवत्येव, आलोकसंयोगं विना स्पार्शनप्रत्यक्षस्य आपादयितुं शक्यत्वात् ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

दिनकरी

ननु "विशेषणतया तद्वत्" इत्याद्यसङ्गतम्, विशेषणताप्रत्यासत्तेः अभावात् । नच – तत्प्रत्यासत्तेः अनभ्युपगमे अभावप्रत्यक्षानुपपत्तिः इति – वाच्यम् । इष्टापत्तेः । **अनुपलम्भस्यैव तत्प्रत्ययस्य** उपगमात् । न च समवायप्रत्यक्षानुरोधात् विशेषणताप्रत्यासत्तिस्वीकारः, तस्य अनुपगमात् । अत एव अभावप्रत्यये इन्द्रियं न करणम्, किंतु योग्यानुपलब्धिरेव इति भाट्टानाम् आक्षेपं दूषयितुं **मूले यदि स्यात्** इति । **तथा च** इन्द्रियाणाम् अभावप्रत्यये जननीये योग्यानुपलब्धेः सहकारितामात्रेण निर्वाहे अतिरिक्तप्रमाणकल्पनम् अनुचितम् इति भावः ।

तत्र योग्यानुपलब्धेः अभावप्रत्यक्षे हेतुत्वे युक्तिम् आह – **तथा हि** इति । **घटादिज्ञाने** – घटादिभ्रमे । न च – घटादिभ्रमहेतुदोष एव तत्प्रतिबन्धकः, अन्यथा भ्रमोत्पत्तिकाले तदभावप्रत्यक्षापत्तिः इति – वाच्यम् । विनश्यदवस्थदोषात् यत्र भ्रमः तत्र भ्रमोत्पत्तिकाले प्रतिबन्धकीभूतदोषाभावस्य सत्त्वात् अभावप्रत्यक्षापत्तेः । **अभावोपलम्भे** – तदिन्द्रियजन्यतत्संबन्धावच्छिन्नतदभावलौकिकप्रत्यक्षे । **प्रतियोग्युपलम्भाभाव** इति । तदिन्द्रियजन्यानाहार्यतत्संसर्गकतत्प्रकारकोपलम्भाभाव इत्यर्थः । इन्द्रियान्तरजन्ये आनुमानिके च तदुपलम्भे सत्यपि तदभावप्रत्यक्षात् "तदिन्द्रियजन्य" इति । अभावप्रत्यक्षहेतुप्रतियोग्यारोपसत्त्वेऽपि अभावप्रत्यक्षात् "अनाहार्य" इति । **तत्र** – प्रतियोग्युपलम्भाभावे । **अपेक्षिता** इति । **तेन न जलपरमाण्वादौ पृथिवीत्वाभावादेः प्रत्यक्षम्** इति भावः ।

मणिकृन्मतानुसारेण योग्यतां निर्वक्ति – **सा च** इति । **प्रसंजितः** आपादितः । **सः** – उपलम्भाभावः । **अभावप्रत्यक्षे हेतुः** इति । अत्र तदधिकरणविषयकाभावप्रत्यक्षे तदधिकरणकतदापादककापत्तियोग्यतदुपलम्भस्य विषयतासंबन्धा-

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

वच्छिन्नप्रतियोगिताकः अभावः हेतुः इत्यर्थः । **उपलम्भे** तदधिकरणकतदापादककापत्तियोग्यत्वं च तत्प्रतियोगिसत्त्वनिष्ठव्याप्तिनिरूपकत्वम् । अत्र च तदापादककापत्तिः यत्र नोत्पन्ना तत्र तदभावप्रत्यक्षानुपपत्तिः इति योग्यत्वनिवेशः ।

न च – प्रतियोगिसत्त्वस्य उपलम्भव्याप्यत्वं न निर्विशेषितस्य, उपलम्भकसामग्र्यन्तरविरहे प्रतियोगिसत्त्वेऽपि उपलम्भाभावात् । किं तु महत्त्वोद्भूतरूपाद्यवच्छिन्नस्यैव । एवं च महत्त्वादिविशिष्टपृथिवीत्वस्य उपलम्भव्याप्यत्वात् जलपरमाणौ पृथिवीत्वाभावप्रत्यक्षापत्तिः इति – वाच्यम् । **तदधिकरणावृत्ति**धर्मानवच्छिन्नत्वस्य योग्यताघटकीभूतव्याप्त्यंशे निवेशात्, महत्त्वस्य जलपरमाण्ववृत्तित्वेन तादृशव्याप्तौ तादृशधर्मानवच्छिन्नत्वाभावात् ।

न च – गन्धवदणुभिन्नत्वविशिष्टस्यापि पृथिवीत्वस्य तदुपलम्भव्याप्यत्वात् गन्धवदणुभिन्नत्वस्य जलपरमाणुवृत्तित्वाच्च **तद्दोषतादवस्थ्यम्** इति – वाच्यम् । **योग्यताघटकव्याप्तौ** प्रतियोगिग्राहकातिरिक्तधर्मानवच्छिन्नत्वस्यापि निवेशात्, गन्धवदणुभिन्नत्वादेश्च प्रतियोगिग्राहकातिरिक्तत्वेन तादृशधर्मानवच्छिन्नत्वस्य उक्तव्याप्तौ अभावात् ।

न च – प्रतियोगिग्राहकत्वं प्रतियोगिग्रहजनकत्वम्, तच्च गन्धवदणुभिन्नत्वपृथिवीत्वोभयसमूहालम्बनात्मकलौकिकप्रत्यक्षे विषयविधया हेतुत्वात् गन्धवदणुभिन्नत्वस्यापि अक्षतम् इति – वाच्यम् । **प्रतियोगिप्रकारतानिरूपित**लौकिकविशेष्यताविरहप्रयोजकीभूताभावप्रतियोगित्वस्यैव प्रतियोगिग्राहकत्वपदार्थत्वात् ।।

राजीवोल्लासः

"**यदि स्यात् उपलभ्येत**" इति मूलग्रन्थम् अवतारयति – **ननु विशेषणतया तद्वत्** इति । "**विशेषणतया तद्वत् अभावानां ग्रहः भवेत्**" – इति मूलम् । "**तद्वत्**" इत्यस्य समवायवत् इत्यर्थः । तथा च यथा समवायस्य विशेषणतासन्निकर्षेण

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्रत्यक्षं भवति तथा अभावस्यापि विशेषणतासन्निकर्षेण प्रत्यक्षं भवति इति तदर्थः । **वैशेषिकमते** समवायस्य अप्रत्यक्षत्वात् विशेषणताख्यसन्निकर्षस्यैव अभावात् समवायदृष्टान्तेन अभावप्रत्यक्षोक्तिः न संगच्छते । न च – समवायस्य अप्रत्यक्षत्वेऽपि अभावप्रत्यक्षार्थमेव विशेषणतासन्निकर्षः स्वीकरणीय इति – वाच्यम् । अभावस्य अनुपलब्धिप्रमाणगम्यत्वेन प्रत्यक्षविषयत्वस्यैव अभावेऽनङ्गीकारात् इति **भाट्टानां मतं** निरसितुं **"यदि स्यात्"** इति मूलं प्रवृत्तम् । तेन योग्यानुपलब्धिसहकृतेन्द्रियेणैव अभावप्रत्यक्षनिर्वाहे अनुपलब्ध्याख्यप्रमाणान्तरकल्पनम् अनुचितम्, गौरवात् । एवञ्च अभावग्रहस्य सन्निकर्षं विना ऐन्द्रियकत्वानिर्वाहात् विशेषणताख्यसन्निकर्षोऽपि स्वीकरणीय इति भावः ।

अनुपलम्भस्यैव तत्प्रत्ययस्य इति । **"अनुपलम्भः"** इत्यनेन अनुपलब्धिप्रमाणजन्या प्रमा उच्यते । **"तत्प्रत्ययस्य"** इत्यस्य अभावप्रतीतेः इत्यर्थः । तथा च "घटो नास्ति" इति या अभावप्रतीतिः सा षष्ठप्रमाणजन्यप्रमितिरूपा, न तु प्रत्यक्षरूपा । "घटो नास्ति" इति प्रतीत्यनन्तरं "घटाभावं पश्यामि" इति न अनुव्यवसायः । किन्तु "घटं न उपलभे" इत्येव इत्याशयः । अथापि इन्द्रियकरणकत्वात्प्रत्यक्षत्वं इति अत आह – **अत एव** इति । अभावप्रत्ययस्य अनुपलम्भरूपत्वादेव इत्यर्थः ।

तथा च इति । **निर्वाह** इति । विशेषणतासन्निकर्षेण अभावप्रत्यक्षोपगमे तया पिशाचादीनामपि अभावप्रत्यक्षापत्तिः इति अनिर्वाहः । योग्यानुपलब्धेः अभावग्राहकत्वे तु पिशाचस्य अयोग्यतया योग्यप्रतियोग्युपलम्भाभावरूपकारणाभावेन न तत्प्रत्यक्षापत्तिः इति भावः । इदानीं तु अभावग्राहकसन्निकर्षसत्त्वेऽपि सहकारिणः योग्यानुपलम्भस्य अभावादेव न पिशाचाभावादिप्रत्यक्षापत्तिः इति भावः ।

अनुचितम् इति । यद्यपि अनुपलब्धेः कारणत्वकल्पनं विशेषणतासन्निकर्षकल्पनं च अपेक्ष्य अनुपलब्धौ प्रमाणत्वकल्पनमेव उचितम्, तथापि अनुपलब्धेः

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

व्यापाराभावेन व्यापारवत्कारणत्वघटितप्रमाणत्वासंभवात् अभावज्ञानस्य अधिकरणाविषयकस्य अननुभवेन अनुपलब्धिजन्याभावज्ञाने अधिकरणभानानुपपत्तेः च अभावज्ञानस्य प्रत्यक्षरूपताया एव स्वीकरणीयत्वात् । तथा सति च अभावस्य विशेषणतया अधिकरणस्य च संयोगादिना एकस्मिन्नेव ज्ञाने भानसंभवात् न अनुपपत्तिः इति भावः इति **तरङ्गिणीकाराः** ।

ननु **तथा हि** इत्यादिना **मुक्तावल्यां** योग्यानुपलब्धेः अभावप्रत्यक्षहेतुत्वे युक्तिः उक्ता । सा च एवम् – भूतलादौ घटादिज्ञाने जाते सति घटाभावादिकं न ज्ञायते । अभावप्रत्यक्षं प्रति योग्यानुपलब्धेः अकारणत्वे प्रतियोगिनः घटादेः ज्ञानकालेऽपि घटाभावप्रत्यक्षं स्यात् । तद्वारणाय प्रतियोग्युपलम्भाभावरूपा अनुपलब्धिः अभावप्रत्यक्षे कारणम् इति ।

तत्र इयम् आशङ्का भवति – प्रतियोगिनः घटस्य प्रमारूपज्ञानदशायां घटाभावप्रत्यक्षमेव न संभवति । घटसत्त्वकाले एव घटप्रमायाः संभवेन घटप्रमासत्त्वे घटसत्तायाः आवश्यकत्वात्, घटाभावे संयुक्तविशेषणतारूपसन्निकर्षविरहात् । अतः ज्ञानपदं भ्रमात्मकतया व्याचष्टे – **घटादिज्ञाने** – **घटादिभ्रमे** इति । तथा च घटभ्रमकालेऽपि घटाभावप्रत्यक्षं न जायते । तदनुसारेण अभावप्रत्यक्षे भ्रमप्रमासाधारणप्रतियोग्युपलम्भाभावः कारणम् ।

ननु घटभ्रमकाले घटाभावप्रत्यक्षवारणाय प्रतियोग्यनुपलब्धेः कारणत्वं मास्तु । प्रतियोगिभ्रमजनकः यः दोषः तदभावस्यैव कारणत्वमस्तु । घटभ्रमकाले तज्जनकदोषस्य सत्त्वात् तदभावरूपकारणविरहादेव अभावप्रत्यक्षस्य वारणसंभवात् । अन्यथा प्रतियोग्युपलम्भाभावस्य कारणत्वेऽपि प्रतियोगिभ्रमोत्पत्तिकाले अभावप्रत्यक्षस्य वारयितुम् अशक्यत्वात् । दोषाभावस्य कारणत्वे तु भ्रमोत्पत्तेः पूर्वकाले दोषस्य सत्त्वात् नापत्तिः इति आशङ्कते – **न च घटादिभ्रम** इति । **तत्प्रतिबन्धक** इति । घटाभावप्रत्यक्षप्रतिबन्धक इत्यर्थः । **अन्यथा** इति । प्रतियोग्युपलम्भाभावस्य

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अभावप्रत्यक्षहेतुत्वे, अथ वा प्रतियोग्युपलम्भस्य अभावप्रत्यक्ष-प्रतिबन्धकत्वे इत्यर्थः । **तदभावप्रत्यक्षापत्तिः इति** । घटाभावप्रत्यक्षप्रसङ्गः इत्यर्थः । तत्पूर्वक्षणे प्रतियोग्युपलम्भाभावस्य सत्त्वात् इति भावः ।

दोषाभावस्य अभावप्रत्यक्षकारणत्वेऽपि यत्र विनश्यदवस्थात् दोषात् – भ्रमोत्पत्तिकाले विनश्यतः दोषात् – घटादिभ्रमः तत्र भ्रमोत्पत्तिद्वितीयक्षणे अभावप्रत्यक्षापत्तिः । भ्रमोत्पत्तिकाले दोषाभावस्य सत्त्वात् । तद्वारणाय प्रतियोग्युपलम्भाभावस्यापि अभावप्रत्यक्षकारणत्वम् अङ्गीकरणीयम् । तथा सति घटादिभ्रमोत्पत्तिक्षणे भ्रमरूपस्य प्रतियोग्युपलम्भस्य सत्त्वात् तदभावरूपकारणविरहात् न द्वितीयक्षणे अभावप्रत्यक्षापत्तिः ।

वस्तुतः प्रतिबन्धकाभावस्य कार्यकालवृत्तित्वेन कारणतया प्रतियोग्युपलम्भस्य अभावप्रत्यक्षप्रतिबन्धकतया कारणीभूताभावप्रतियोगित्वेन प्रतिबन्धकतायाः दुरपह्नवतया च अभावप्रत्यक्षोत्पत्तिकालेऽपि प्रतियोग्युपलंम्भाभावस्य अपेक्षिततया दोषप्रतिबन्धकतां विनैव उपपत्तिः इति अवधातव्यम् इति **तरङ्गिणीकाराः** ।

ननु सामान्यतः अभावप्रत्यक्षं प्रति प्रतियोग्युपलम्भाभावः कारणम् इति कार्यकारणभावः न संभवति । इन्द्रियान्तरजन्ये आनुमानिके च प्रतियोग्युपलम्भे सत्यपि इन्द्रियान्तरजन्याभावप्रत्यक्षोत्पत्या व्यतिरेकव्यभिचारात् । एवं संबन्धान्तरेण प्रतियोगिप्रकारकोपलम्भे सत्यपि संबन्धान्तरावच्छिन्नप्रतियोगिताकाभावप्रत्यक्षोत्पत्या व्यतिरेकव्यभिचाराच्च इति आशङ्क्य व्याचष्टे – **अभावोपलम्भे इत्यादिना** । तथा च तदिन्द्रिजन्य – तत्संबन्धावच्छिन्न – तदभावविषयकलौकिकप्रत्यक्षं प्रति तदिन्द्रियजन्य – अनाहार्य – तत्संसर्गक – तत्प्रकारक – ज्ञानाभावः कारणम् । चक्षुरिन्द्रियजन्य – संयोगसंबन्धावच्छिन्न – घटाभावविषयकलौकिक- प्रत्यक्षं प्रति चक्षुरिन्द्रियजन्य – संयोग – संसर्गक – घटप्रकारक – अनाहार्यज्ञानाभावः कारणम् । अनाहार्यपदस्य प्रयोजनम् आह – **अभावप्रत्यक्षहेतु इति** । अभावप्रत्यक्षं

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्रति "यदि अत्र घटः स्यात्" इत्याकारकः प्रतियोग्यारोपः कारणम् । तस्य आरोपस्यापि चक्षुरिन्द्रियजन्यत्वात् संयोगसंसर्गकघटप्रकारकत्वात् चक्षुरिन्द्रियजन्यतत्संसर्गकतत्प्रकारकज्ञानाभावस्य प्रतियोग्यारोपकाले असंभवात् अभावप्रत्यक्षानुपपत्तिः । प्रतियोग्युपलम्भाभावं विनापि प्रतियोग्यारोपकाले अभावप्रत्यक्षोत्पत्त्या व्यतिरेकव्यभिचारात् उक्तप्रतियोग्युपलम्भाभावस्य कारणत्वं न स्यात् इति यावत् । तद्वारणाय प्रतियोग्युपलम्भे "अनाहार्य" इति विशेषणम् । आहार्यत्वं च बाधकालीनेच्छाजन्यत्वम् । तदभावः अनाहार्यत्वम् । प्रतियोग्यारोपस्तु प्रतियोग्यभावरूपबाधनिश्चये सत्यपि इच्छावशात् भवति । अतः अयं प्रतियोग्यारोपः आहार्यः । तद्व्यतिरिक्तप्रतियोग्युपलम्भाभावः अभावप्रत्यक्षे कारणम् इति न पूर्वोक्तदोषः ।

एवं च तदिन्द्रियजन्यतत्संबन्धावच्छिन्नतद्धर्मावच्छिन्नप्रतियोगिताकाभावप्रत्यक्षं प्रति तत्संबन्धावच्छिन्नतद्धर्मावच्छिन्नप्रतियोगिनिष्ठप्रकारतानिरूपिततदधिकरणनिष्ठविशेष्यताशाल्यनाहार्योपलम्भाभावः कारणम् इति फलितम् । तत्र उपलम्भाभावे योग्यतापि मुक्तावल्यां निवेशिता । तत्र योग्यतारूपविशेषणस्य प्रयोजनं मुक्तावल्यां न उक्तम् इति तत्प्रदर्शयति – **तेन न जलपरमाण्वादौ** इति । जलपरमाणौ पृथिवीत्वाभावस्य सत्त्वेऽपि तत्प्रत्यक्षं न संभवति । यदि तु तदधिकरणकाभावप्रत्यक्षे तदधिकरणविशेष्यकप्रतियोग्युपलम्भाभावः कारणं, तदा जलपरमाणुविशेष्यकपृथिवीत्वोपलम्भाभावस्य सत्त्वात् जलपरमाणुविशेष्यकपृथिवीत्वाभावप्रत्यक्षापत्तिः । अतः योग्यताविशिष्टः उपलम्भाभावः कारणम् । योग्यता च प्रतियोगिसत्त्वप्रसञ्जितप्रसञ्जनप्रतियोगिकत्वरूपा उपरिष्टात् वक्ष्यते । प्रकृते "जलपरमाणौ यदि पृथिवीत्वं स्यात् तर्हि उपलभ्येत" इत्येवंरूपं प्रसञ्जनमेव योग्यता । जलपरमाणौ महत्त्वविरहेण पृथिवीत्वसत्त्वेऽपि तदुपलम्भस्य अशक्यतया पृथिवीत्वोपलब्धिप्रसञ्जनं न संभवति इति प्रतियोगिसत्त्वप्रसञ्जितप्रसञ्जनप्रतियोगिकत्वरूपा योग्यता पृथिवीत्वोपलम्भाभावे नास्ति इति योग्यताविशिष्टोपलम्भाभावरूपकारणविरहात् जलपरमाण्वादौ पृथिवीत्वाभावादेः प्रत्यक्षापत्तिः न भवति इति भावः ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

मणिकृन्मत इति । अनेन च योग्यप्रतियोगिप्रकारकयोग्याधिकरणविशेष्यकोपलम्भप्रतियोगिकत्वरूपयोग्यतानिर्वचनमपि संभवति इति सूचितम्, एवमपि स्तम्भादिविशेष्यकपिशाचोपलम्भस्य जलपरमाण्वादौ पृथिवीत्वोपलम्भस्य च योग्यप्रतियोगिप्रकारकत्व-योग्यविशेष्यकत्वविरहेणैव स्तम्भे पिशाचाभावस्य जलपरमाण्वादौ पृथिवीत्वाभावस्य च अप्रत्यक्षत्वोपपादनसम्भवात् इति भावः इति **तरङ्गिणीकाराः** ।

मूले प्रतियोगिसत्त्व इति । प्रतियोगिसत्त्वस्य प्रत्यक्षविषयः यः अभावः तस्य यत् प्रतियोगी तत्सत्त्वस्य – प्रत्यक्षविषय-घटाभाव-प्रतियोगिघटसत्त्वस्य – प्रसञ्जनेन – आहार्यारोपेण "यदि अत्र घटः स्यात्" इत्याकारकेण इत्यर्थः । आपत्तौ आपाद्यव्याप्यापादकवत्ताज्ञानस्य हेतुतया निर्घटदेशादौ प्रतियोगिसत्त्वज्ञानस्य आहार्यत्वात् इति भावः । "यदि अत्र घटः स्यात् तर्हि उपलभ्येत" इत्याकारिका आपत्तिः । तत्र आपाद्यः उपलम्भः । आपादकः घटः । तद्वत्ताज्ञानं वस्तुतः घटशून्ये प्रदेशे जायमानं आहार्यारोपरूपमेव भवितुम् अर्हति इति आशयः । प्रसञ्जितः इत्यस्य अर्थम् आह – आपादित इति । **अत्र तदधिकरणे इत्यादि** । यस्मिन्नधिकरणे अभावप्रत्यक्षं जायते, तदधिकरणविशेष्यकाभावप्रकारकप्रत्यक्षे इत्यर्थः । तदधिकरणनिष्ठलौकिकविषयतासंबन्धेन तदभावप्रकारकप्रत्यक्षं प्रति तदधिकरणिका तदापादकिका या आपत्तिः तद्योग्यः यः तदुपलम्भः तस्य विषयतासंबन्धावच्छिन्नप्रतियोगिताकः अभावः हेतुः इति कार्यकारणभावः । तदधिकरणं भूतलम् । तन्निष्ठविषयतासंबन्धेन घटाभावप्रकारकं प्रत्यक्षं "भूतलं घटाभाववत्" इत्याकारकं भूतले वर्तते । तत्र घटोपलम्भाभावोऽपि वर्तते । कारणकोटौ "तदधिकरणिक" इत्यस्य भूतलाधिकरणकेत्यर्थः । अस्य आपत्तौ अन्वयः । "तदापादकक" इत्यस्य घटसत्त्वापादककेत्यर्थः । भूतलाधिकरणकं घटसत्त्वं घटोपलम्भस्य आपादकं भवति । भूतले घटसत्त्वेनैव घटोपलम्भस्य आपाद्यमानत्वात् । तथा च भूतलाधिकरणक-घटसत्त्वापादककत्वं घटोपलम्भापत्तौ वर्तते ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

तादृशापत्तियोग्यः यः घटोपलम्भः "भूतलं घटवत्" इत्याकारकः, तस्य विषयतासंबन्धेन अभावः घटाभावप्रत्यक्षात् पूर्वं भूतले अस्ति इति कार्यकारणयोः एकाधिकरणवृत्तित्वम् ।

उपलम्भे इति । उपलम्भे यद्विशेषणं तदधिकरणकतदापादककापत्तियोग्यत्वं तत्प्रतियोगिसत्त्वनिष्ठव्याप्तिनिरूपकत्वम् । यत्प्रतियोगिकाभावप्रत्यक्षं जननीयम्, तत्प्रतियोगिसत्त्वनिष्ठा या व्याप्तिः तन्निरूपकत्वम् इत्यर्थः । आपत्तिस्थले आपाद्यापादकयोः व्याप्यव्यापकभावनियमात् आपाद्यनिरूपिता व्याप्तिः – व्याप्यत्वं आपादकनिष्ठा भवति । आपादकनिष्ठव्याप्तिनिरूपकत्वं आपाद्यनिष्ठं भवति । प्रकृते "यदि अत्र घटः स्यात् तर्हि उपलभ्येत" इति आपत्तिः । अत्र घटोपलम्भः आपाद्यः । घटसत्त्वं आपादकम् । घटसत्त्वनिष्ठं यत् घटोपलम्भनिरूपितं व्याप्यत्वं तन्निरूपकत्वं घटोपलम्भे अस्ति इति समन्वयः ।

ननु मूले **आपादितः** इत्युक्त्या आपादनमेव अपेक्षितम् इति लभ्यते । तत्कथम् आपत्तियोग्यता विवक्षिता? इति अत आह – **अत्र च** इति । यत्र भूतलादौ चक्षुस्संयोगानन्तरं "यदि अत्र घटः स्यात्" इत्याद्यापादनं विनापि "घटो नास्ति" इति प्रतीतिः, तत्र प्रतियोगिसत्त्वापादनापादितत्वं प्रतियोग्युपलम्भे नास्ति इति योग्यानुपलब्धिः दुर्घटा । तन्निर्वाहाय आपत्तियोग्यतायाः निवेशः । आपत्तियोग्यता च तत्प्रतियोगिसत्त्वनिष्ठव्याप्तिनिरूपकता । आपादकनिष्ठव्याप्तिनिरूपकत्वम् आपाद्येऽस्ति चेदेव आपत्तिर्भवति । अत उक्तव्याप्तिनिरूपकत्वस्य आपत्तियोग्यतारूपत्वम् । परिष्कृतरीत्या तु तदधिकरणकापत्तिविषयीभूतं यत् तत्प्रतियोगिसत्त्वं तन्निष्ठव्याप्तिनिरूपकः यः प्रतियोग्युपलभ्यः तदभावः कारणम् इति ।

ननु घटादिरूपप्रतियोगिसत्त्वेऽपि चक्षुस्संयोगाद्यभावे घटोपलम्भानुदयात् प्रतियोगिसत्त्वव्यापकत्वं घटोपलम्भे नास्ति इति कुत्रापि अभावप्रत्यक्षं न स्यात् । उपलम्भरूपप्रतियोग्यप्रसिद्ध्या वास्तविकव्यापकताघटितोपलम्भाभावस्य असंभवात् ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

यदि तु प्रतियोगिसत्त्वातिरिक्तानि यानि प्रतियोग्युपलम्भकारणानि तत्समुदायविशिष्टप्रतियोगिसत्त्वनिष्ठव्याप्यतानिरूपकत्वम् – प्रतियोगिसत्त्वव्यापकत्वम् – उपलम्भे विवक्ष्यते, तदा उक्तदोषवारणेऽपि, परमाणौ पृथिवीत्वाभावप्रत्यक्षवारणम् अशक्यम् । महत्त्वोद्भूतरूपादिविशिष्टपृथिवीत्वरूपप्रतियोगिसत्त्वं यत्र घटादौ, तत्र पृथिवीत्वोपलम्भः इति व्याप्तेः प्रतियोगिसत्त्वातिरिक्तप्रतियोग्युपलम्भकारणमहत्त्वोद्भूतरूपादिकारणकूटविशिष्टपृथिवीत्वसत्त्वव्यापकत्वं पृथिवीत्वोपलम्भे अस्तीति, व्यापकतादृशोपलम्भस्य विषयतासंवन्धावच्छिन्नाभावः जलपरमाणौ अस्ति इति जलपरमाणौ पृथिवीत्वाभावप्रत्यक्षापत्तेः दुर्वारत्वात् इति आशयेन शङ्कते – न च प्रतियोगिसंत्त्वस्य इति ।

समाधत्ते – तदधिकरणावृत्ति इति । यदधिकरणविशेष्यकाभावप्रत्यक्षं जननीयम् तदधिकरणावृत्तिः यो धर्मः तदनवच्छिन्नत्वं योग्यताघटकीभूतप्रतियोगिसत्त्वनिष्ठव्याप्यतायां निवेशनीयम् । तथा च तदधिकरणावृत्तिधर्मानवच्छिन्नप्रतियोगिसत्त्वनिष्ठव्याप्यतानिरूपकोपलम्भाभावः अभावप्रत्यक्षे कारणम् इत्युक्तं भवति । जलपरमाणौ पृथिवीत्वाभावप्रत्यक्षे जननीये प्रतियोगिसत्त्वनिष्ठव्याप्यतायां जलपरमाण्ववृत्तिधर्मानवच्छिन्नत्वं अपेक्षितम् । प्रकृते पृथिवीत्वरूपप्रतियोगिसत्त्वस्य महत्त्वोद्भूतरूपविशिष्टस्यैव पृथिवीत्वोपलम्भव्याप्यत्वात् पृथिवीत्वसत्त्वनिष्ठा व्याप्यता महत्त्वोद्भूतरूपावच्छिन्ना भवति । तत्र महत्त्वं जलपरमाण्ववृत्ति इति जलपरमाण्ववृत्तिमहत्त्वावच्छिन्नत्वमेव व्याप्यतायां अस्ति । न तु तदनवच्छिन्नत्वम् इति जलपरमाणौ न पृथिवीत्वाभावप्रत्यक्षापत्तिः ।

जलत्र्यणुकादौ पृथिवीत्वाभावप्रत्यक्षं तु भवत्येव । अधिकरणीभूतजलत्र्यणुकादिवृत्तिमहत्त्वावच्छिन्नत्वात् पृथिवीत्वसत्त्वनिष्ठव्याप्यतायाः तदवृत्तिधर्मानवच्छिन्नत्वानपायात् । तथा च तदधिकरणपदेन जलपरमाणूपादाने प्रतियोगिसत्त्वनिष्ठपरमाण्ववृत्तिधर्मानवच्छिन्नव्याप्यतानिरूपकोपलम्भाप्रसिद्ध्या

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

तदभावरूपकारणविरहादेव न जलपरमाणुविशेष्यकपृथिवीत्वाभावप्रत्यक्षम् इति भावः ।

न च – प्रतियोगिसत्त्वनिष्ठव्याप्यतायां तदधिकरणवृत्तिधर्मावच्छिन्नत्वस्यैव निवेशयितुं शक्यत्वात् ''तदधिकरणावृत्तिधर्मानवच्छिन्ना'' इति नञ्द्वयनिवेशः किमर्थम् इति – वाच्यम् । महत्त्वोद्भूतरूपावच्छिन्नायाः प्रतियोगिसत्त्वनिष्ठव्याप्यतायाः जलपरमाणुवृत्युद्भूतरूपावच्छिन्नतया जलपरमाणौ पृथिवीत्वाभावप्रत्यक्षस्य वारयितुम् अशक्यत्वात् । नञ्द्वयनिवेशे तु व्याप्यतायां जलपरमाण्ववृत्तिमहत्त्वावच्छिन्नत्वसत्त्वेन तदनवच्छिन्नत्वविरहात् तदनवच्छिन्नव्याप्यतानिरूपकोपलम्भाप्रसिद्ध्या तदभावरूपकारणविरहात् न उक्तप्रत्यक्षापत्तिः ।

ननु महत्त्वस्थाने गन्धवदणुभिन्नत्वं निवेश्य गन्धवदणुभिन्नत्वे सति इन्द्रियसंयोगादिविशिष्टपृथिवीत्वसत्त्वस्य व्याप्यतया तादृशव्याप्यतानिरूपकोपलम्भाभावस्य पृथिवीत्वाभावप्रत्यक्षहेतुत्वं स्वीक्रियते । एवं च जलपरमाणौ गन्धवदणुभिन्नत्वस्य सत्त्वेन पृथिवीत्वसत्त्वनिष्ठव्याप्यतायां जलपरमाणुवृत्तिगन्धवदणुभिन्नत्वावच्छिन्नत्वमेव अस्ति, न तु तदवृत्तिधर्मावच्छिन्नत्वम् इति तदवृत्तिधर्मानवच्छिन्नप्रतियोगिसत्त्वनिष्ठव्याप्यतानिरूपकोपलम्भस्य प्रसिद्ध्या विषयतासंबन्धावच्छिन्नतदभावरूपस्य कारणस्य जलपरणाणौ सत्त्वात् जलपरमाणुविशेष्यकपृथिवीत्वाभावप्रत्यक्षापत्तिः इति आशयेन शङ्कते – **न च गन्धवदणुभिन्नत्व** इति । **तद्दोषतादवस्थ्यम्** इति । जलपरमाणुविशेष्यकपृथिवीत्वाभावप्रत्यक्षापत्तिरूपदोषस्य दुर्वारत्वम् इत्यर्थः ।

समाधत्ते – **योग्यताघटकव्याप्तौ** इति । **प्रतियोगिग्राहक** इति । प्रतियोगिविषयक-प्रत्यक्षजनकेत्यर्थः । तथा च प्रतियोगिविषयकप्रत्यक्षाजनकः यः धर्मः तदनवच्छिन्ना या प्रतियोग्युपलम्भकारणकूटविशिष्टप्रतियोगिसत्त्वनिष्ठव्याप्यता तन्निरूपकोपलम्भाभावः अभावप्रत्यक्षे कारणम् । पृथिवीत्वादिजातिविषयकप्रत्यक्षं

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्रति महत्त्वमेव कारणम्, न तु गन्धवदणुभिन्नत्वम् । तथा सति जलपरमाणौ जलत्वादिजातिप्रत्यक्षापत्तेः । पृथिवीत्वसत्त्वनिष्ठव्याप्यतायां प्रतियोगिग्राहकातिरिक्तो यो धर्मः गन्धवदणुभिन्नत्वं, तदवच्छिन्नत्वमेव अस्ति, न तु तदनवच्छिन्नत्वम् इति तदनवच्छिन्नव्याप्यतानिरूपकोपलम्भाप्रसिद्ध्या तदभावरूपकारणविरहात् महत्त्वस्थाने गन्धवदणुभिन्नत्वनिवेशेऽपि जलपरमाणौ पृथिवीत्वाभावप्रत्यक्षापत्तिः न संभवति इति आशयः ।

ननु प्रतियोगिग्राहकत्वं नाम प्रतियोगिविषयकप्रत्यक्षजनकत्वम् । तत् गन्धवदणुभिन्नत्वेऽपि अक्षतम् । प्रतियोगिपृथिवीत्वविषयकं यत् गन्धवदणुभिन्नत्वपृथिवीत्वोभयविषयकं समूहालम्बनात्मकं प्रत्यक्षं तत्र विषयविधया गन्धवदणुभिन्नत्वस्यापि कारणत्वात् । तथा च प्रतियोगिविषयकप्रत्यक्षजनकातिरिक्तधर्मः न गन्धवदणुभिन्नत्वम् । अपि तु अन्यदेव घटत्वादिकम् । तदनवच्छिन्नव्याप्यतानिरूपकोपलम्भाभावस्य जलपरमाणौ सत्त्वात् तत्र पृथिवीत्वाभावप्रत्यक्षापत्तिः दुर्वारा इति आशङ्कते – **न च प्रतियोगिग्राहकत्वम्** इति । समाधत्ते – **प्रतियोगिप्रकारता** इति । प्रतियोगिनिष्ठप्रकारतानिरूपितलौकिकविशेष्यताविरहप्रयोजकीभूतः यः अभावः तत्प्रतियोगित्वं प्रकृते प्रतियोगिग्राहकत्वम् । कार्याभावस्य कारणाभावः प्रयोजकः । लौकिकविशेष्यतासंबन्धेन प्रतियोगिप्रकारकप्रत्यक्षं प्रति महत्त्वस्य कारणत्वात् महत्त्वाभावः लौकिकविशेष्यतासंबन्धेन प्रतियोगिप्रकारकप्रत्यक्षाभावस्य प्रयोजकः । यत्र यत्र प्रतियोगिनिष्ठप्रकारतानिरूपितलौकिकविशेष्यत्वं तत्र लौकिकविशेष्यतासंबन्धेन प्रतयोगिप्रकारकप्रत्यक्षं इति नियमः । व्यापकाभावे यत् प्रयोजकं तत् व्याप्याभावेऽपि प्रयोजकम् । तथा च व्यापकस्य – लौकिकविशेष्यतासंबन्धेन प्रतियोगिप्रकारकप्रत्यक्षस्य–अभावे प्रयोजकः महत्त्वाभावः व्याप्यस्य – प्रतियोगिनिष्ठप्रकारतानिरूपितलौकिकविशेष्यत्वस्य –अभावे प्रयोजकः । तथा च प्रतियोगिनिष्ठप्रकारतानिरूपितलौकिकविशेष्यताविरहप्रयोजकीभूताभावप्रतियोगित्वं महत्त्वे एव अस्ति, न तु गन्धवदणुभिन्नत्वे इति

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

गन्धवदणुभिन्नत्वं प्रतियोगिग्राहकातिरिक्तमेव । तदनवच्छिन्नत्वं व्याप्यतायां नास्ति इति तदनवच्छिन्नव्याप्यतानिरूपकोपलम्भाप्रसिद्ध्या न जलपरमाणौ पृथिवीत्वाभाव-प्रत्यक्षापत्तिः इति भावः ॥

दिनकरी

अथ एवं पिशाचत्वप्रकारतानिरूपितलौकिकविशेष्यत्वाप्रसिद्ध्या तद्घटित-निरुक्तयोग्यानुपलम्भविरहात् तदभावप्रत्यक्षं न स्यात् इति चेत्, न । नहि वयं सर्वत्र अभावप्रत्यक्षे निरुक्तयोग्यानुपलम्भस्य हेतुत्वं ब्रूमः, किंतु योग्यस्य अभावप्रत्यक्षे । अयोग्यपिशाचत्वाद्यभावप्रत्यक्षे तु तदधिकरणीयत्वप्रसंजनप्रसंजितप्रतियोगिकः तदधिकरणीयत्वोपलम्भस्य विषयतासंबन्धावच्छिन्नाभाव एव प्रतियोगिनिष्ठः हेतुः । अत्रापि आपादनस्य सर्वत्रासंभवेन तदधिकरणीयत्वप्रसंजनप्रसंजितत्वं तदधिकरणीय-त्वनिष्ठव्याप्तिनिरूपकत्वम्, जातित्वादिविशिष्टस्य स्तम्भवृत्तित्वस्य उपलम्भव्याप्यत्वात् स्तम्भे पिशाचत्वाभावप्रत्यक्षम्, जातित्वादिविशिष्टस्य पिशाचवृत्तित्वस्य उपलम्भाव्याप्यत्वात् न पिशाचे स्तम्भत्वाभावप्रत्यक्षम् ।

एवं तादात्म्येन स्तम्भवृत्तित्वपिशाचवृत्तित्वयोः उपलम्भव्याप्यत्वाव्याप्य-त्वाभ्यां स्तम्भपिशाचयोः पिशाचभेदस्तम्भभेदयोः प्रत्यक्षत्वाप्रत्यक्षत्वे अपि उपपादनीये इति । **न चाक्षुषप्रत्यक्षम्** इति । **अनुपलम्भे विद्यमानेऽपि** निरुक्तयोग्यता-विशिष्टस्य तस्य तत्र अभावात् इति भावः । **आपादयितुं शक्यत्वात्** इति । तथा च समानेन्द्रियजन्योपलम्भव्याप्यत्वस्य योग्यताघटकत्वात् न तत्र चाक्षुषम् इति भावः ॥

राजीवोल्लासः

अथ एवम् इति । प्रतियोगिग्राहकातिरिक्तधर्मानवच्छिन्नत्वस्य योग्यता-घटकव्याप्यतायां निवेशेऽपि स्तम्भे पिशाचत्वाभावप्रत्यक्षं न स्यात्, प्रतियोगि-भूतपिशाचत्वनिष्ठप्रकारतानिरूपितलौकिकविशेष्यताया अप्रसिद्ध्या

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

तद्घटितयोग्यताविशिष्टानुपलम्भविरहात् इति चेत्, न । अभावप्रत्यक्षे सर्वत्र प्रतियोगिनिष्ठप्रकारतानिरूपितलौकिकविशेष्यताघटितयोग्यानुपलम्भस्य कारणत्वं न वयं अङ्गीकुर्मः, किन्तु योग्यप्रतियोगिकाभावप्रत्यक्षे एव । अयोग्यपिशाचत्व-प्रतियोगिकाभावप्रत्यक्षे तु तदधिकरणकत्वापादानापादितप्रतियोगिकः तदधिकरणकत्वोपलम्भस्य विषयतासंबन्धावच्छिन्नाभावः हेतुः । तदधिकरणीयत्वं – तदधिकरणकत्वं तदधिकरण-वृत्तित्वम् इति यावत् । ''पिशाचत्वं यदि स्तम्भवृत्तिः स्यात् तदा स्तम्भवृत्तित्वेन उपलभ्येत'' इत्येवंरूपः उपलम्भः स्तम्भवृत्तित्वप्रसञ्जन-प्रसञ्जितः भवति । तस्य उपलम्भस्य विषयतासंबन्धेन अभावः पिशाचत्वरूप-प्रतियोगिनिष्ठः । स च पिशाचत्वाभावप्रत्यक्षे हेतुः । कार्यतावच्छेदकसंबन्धश्च तदधिकरणनिष्ठ लौकिकविशेष्यतानिरूपिताभावनिष्ठप्रकारतानिरूपितप्रतियोगित्वा-वच्छिन्नप्रकारतासंबन्धः । ''स्तम्भः पिशाचत्वाभाववान्'' इत्याकारकं प्रत्यक्षं उक्तसंबन्धेन पिशाचत्वे वर्तते । तत्रैव स्तम्भवृत्तित्वप्रसञ्जनप्रसञ्जितप्रतियोगिकः विषयतासंबन्धावच्छिन्नस्तम्भवृत्तित्वोपलम्भनिष्ठप्रतियोगिताकाभावोऽपि वर्तते । यत्र स्तम्भवृत्तित्वप्रसञ्जनाधीनोपलम्भप्रसञ्जनं विनापि स्तम्भे पिशाचत्वाभावप्रत्यक्षं, तत्र तदधिकरणीयत्वप्रसञ्जनप्रसञ्जितप्रतियोगिकत्वं नास्ति इति व्यतिरेव्यभिचारवारणाय तदधिकरणीयत्वप्रसञ्जनप्रसञ्जितत्वं प्रसञ्जनयोग्यत्वरूपम् । तच्च तदधिकरणीय-त्वनिष्ठव्याप्तिनिरूपकत्वम् । पिशाचत्वनिष्ठस्तम्भवृत्तित्वम् आपादकम् । तन्निष्ठा या व्याप्तिः तन्निरूपकत्वं स्तम्भवृत्तित्वोपलम्भे वर्तते इति लक्षणसमन्वयः ।

ननु स्तम्भवृत्तित्वं न उपलम्भव्याप्यम् । पिशाचे स्तम्भवृत्तित्वसत्त्वेऽपि स्तम्भवृत्तित्वप्रकारकोपलम्भस्य विषयतासंबन्धेन पिशाचे अभावात् इति, अत आह – जातित्वादिविशिष्टस्य इति । तथा च जातित्वविशिष्टस्तम्भवृत्तित्वं यत्र यत्र तत्र स्तम्भवृत्तित्वप्रकारकोपलम्भः इति नियमः । स्तम्भत्वे जातित्वविशिष्टं – जातित्वसमानाधिकरणम् – स्तम्भवृत्तित्वं वर्तते । तत्र ''स्तम्भत्वं स्तम्भवृत्तिः'' इत्याकारकः स्तम्भवृत्तित्वप्रकारकः उपलम्भः विषयतासंबन्धेन वर्तते इति

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

आपादकापाद्ययोः व्याप्यव्यापकभावः । जातित्वविशिष्टस्तम्भवृत्तित्वम् आपादकम् स्तम्भवृत्तित्वोपलम्भः आपाद्यः । यदि पिशाचत्वं स्तम्भवृत्ति स्यात् तदा जातित्व-विशिष्टस्य स्तम्भवृत्तित्वस्य पिशाचत्वे सत्त्वेन पिशाचत्वे विषयतासंबन्धेन स्तम्भवृत्तित्वोपलम्भोऽपि स्यात् । यतः सः उपलम्भः नास्ति, अतः उपलम्भाभाव-रूपकारणवशात् ''पिशाचत्वाभाववान् स्तम्भः'' इति प्रत्यक्षं जायते । पिशाचे तु जातित्वविरहात् जातित्वविशिष्टस्तम्भवृत्तित्वरूपस्य व्याप्यस्य अभावात् स्तम्भवृत्तित्वोपलम्भोऽपि नास्ति इति न व्याप्तिभङ्गः । व्याप्यसत्त्वे व्यापकासत्त्वे एव व्याप्तिभङ्गात् ।

उक्तरीत्या पिशाचे स्तम्भत्वाभावप्रत्यक्षापत्तिं निरस्यति – **जातित्वादिविशिष्टस्य पिशाचादिवृत्तित्वस्य** इति । तथा च पिशाचे स्तम्भत्वाभावप्रत्यक्षं प्रति जातित्वविशिष्टपिशाचवृत्तित्वव्यापकोपलम्भाभावस्यैव हेतुतया जातित्वविशिष्टस्य पिशाचवृत्तित्वस्य उपलम्भाव्याप्यत्वात् जातित्वविशिष्टपिशाचवृत्तित्वव्यापकत्वं उपलम्भे नास्ति इति व्यापको-पलम्भाभावरूपकारणविरहात् पिशाचे स्तम्भत्वाभावप्रत्यक्षं न भवति । जातित्वविशिष्टं पिशाचवृत्तित्वं कुतः उपलम्भव्याप्यं न भवति इति – न च वाच्यम् । जातित्वविशिष्टस्य पिशाचवृत्तित्वस्य पिशाचत्वे सत्त्वेन तत्र पिशाचवृत्तित्वोपलम्भविरहात् ।

एवम् इत्यादि । ''स्तम्भः पिशाचो न'' इत्याकारकं स्तम्भविशेष्यकपिशाच-भेदप्रकारकं प्रत्यक्षं भवति । ''पिशाचः स्तम्भो न'' इत्याकारकं तु पिशाचविशेष्यक-स्तम्भभेदप्रकारकप्रत्यक्षं न जायते । तदनुसारेण तादात्म्यसंबन्धेन स्तम्भवृत्ति-त्वनिष्ठव्याप्तिनिरूपकोपलम्भस्य विषयतासंबन्धेन अभावः स्तम्भे पिशाचभेदप्रत्यक्षं प्रति कारणम् । तादात्म्यसंबन्धेन स्तम्भवृत्तित्वं स्तम्भे वर्तते । तत्र तादात्म्यसंबन्धेन स्तम्भोपलम्भः अस्ति इति आपाद्यापादकयोः व्याप्तिः । यदि पिशाचः तादात्म्यसंबन्धेन स्तम्भवृत्तिः स्यात् तर्हि स्तम्भतादात्म्येन उपलभ्येत । तदा उपलम्भस्य अभावात्

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

स्तम्भे पिशाचभेदप्रत्यक्षं जायते । पिशाचे स्तम्भभेदप्रत्यक्षं प्रति तादात्म्येन पिशाचवृत्तित्वव्यापकपिशाचतादात्म्योपलम्भाभावः कारणम् इति वक्तव्यम् । परन्तु तादात्म्येन पिशाचवृत्तित्वस्य पिशाचतादात्म्योपलम्भव्याप्यत्वं नास्ति । तादात्म्येन पिशाचवृत्तेः पिशाचस्य पिशाचतादात्म्येन उपलम्भविरहात् ।

अनुपलम्भे विद्यमानेऽपि इति । योग्यस्य प्रतियोगिनः अनुपलम्भः योग्यानुपलब्धिः । सा अभावप्रत्यक्षकारणम् इति **प्राचीनमतम्** उपेक्ष्य ''प्रतियो-गिसत्त्वप्रसञ्जनप्रसञ्जित'' इत्यादियोग्यताविशिष्टानुलम्भस्य अभावप्रत्यक्षकारणत्वं कुतः स्वीकृतम् इति आशङ्कायां **मुक्तावल्यां ''तथा हि यत्र आलोकसंयोगादिकं वर्तते''** इत्यादिना तत्र कारणम् उक्तम् । अन्धकारे चक्षुर्योग्यस्य घटस्य अनुपलम्भात् घटाभावविषयकचाक्षुषप्रत्यक्षं प्रसज्यते । अतः ''प्रतियोगिसत्त्वप्रसञ्जनप्रसञ्जित'' इत्यादि योग्यतायाः अनुपलब्धिविशेषणत्वं आवश्यकम् । अन्धकारे तु ''यदि अत्र घटः स्यात् तर्हि उपलभ्येत'' इति प्रसञ्जनं वक्तुं न शक्यते । घटसत्त्वेऽपि आलोकसंयोगिविरहेण घटोपलब्ध्यसंभवात् । अतः प्रतियोगिसत्त्वप्रसञ्जन-प्रसञ्जितप्रतियोगिकत्वविशिष्टस्य अनुपलम्भस्य अन्धकारे विरहात् न घटाभावविषयकं चाक्षुषप्रत्यक्षम् इत्याह – **अनुपलम्भे विद्यमानेऽपि** इत्यादिना । **निरुक्तयोग्यतावि-शिष्टस्य** इति । ''प्रतियोगिसत्त्वप्रसञ्जन'' इत्यादियोग्यताविशिष्टस्य इत्यर्थः । **तस्य** – अनुपलम्भस्य । **तत्र** – अन्धकारे ।

ननु आलोकसंयोगं विनापि स्पार्शनप्रत्यक्षस्य आपादयितुं शक्यत्वात् अन्धकारे घटाभावस्य स्पार्शनप्रत्यक्षं भवत्येव इति **मूले** उक्तम् । ''यदि अत्र घटः स्यात् तर्हि घटस्य स्पार्शनं स्यात् । यतः घटस्य स्पार्शनं न भवति, अतः 'भूतलं घटाभाववत्' '' इत्याकारकं स्पार्शनप्रत्यक्षं अन्धकारे जायते इति वक्तव्यम् । तथा च घटाभावस्पार्शनप्रत्यक्षानुरोधेन प्रतियोगिसत्त्वप्रसञ्जनप्रसञ्जित-प्रतियोगिकत्वरूपयोग्यताविशिष्टस्य अनुपलम्भस्य अन्धकारे सत्त्वात् तादृशानुपलम्भबलात् घटाभावविषयकं चाक्षुषं प्रत्यक्षं कुतः न जायते? – इति,

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अत आह – **तथा च समानेन्द्रिय** इति । एवं च तदभावविषयकचक्षुरिन्द्रियजन्य-प्रत्यक्षत्वावच्छिन्नं प्रति तत्प्रतियोगिसत्त्वनिष्ठव्याप्तिनिरूपकचक्षुरिन्द्रियजन्योपलम्भा-भावः कारणम् इति विशिष्य इन्द्रियभेदेन प्रत्यक्षानुपलब्ध्योः कार्यकारणभावभेदः स्वीकरणीयः । घटाभावविषयकस्पार्शनप्रत्यक्षस्थले त्वगिन्द्रियजन्यप्रतियोग्युपलम्भा-भावस्य सत्त्वेन तस्य त्वाचघटाभावप्रत्यक्षत्वावच्छिन्नं प्रत्येव हेतुतया तद्बलात् चाक्षुषस्य घटाभावप्रत्यक्षस्य आपत्तिः । चाक्षुषोपलम्भाभावादेव चाक्षुषप्रत्यक्षस्य संभवात् इति भावः ।।

मुक्तावली

गुरुत्वादिकं यदयोग्यं तदभावस्तु न योग्यः, तत्र गुरुत्वादिप्रत्यक्षस्य आपादयितुम् **अशक्यत्वात्** । **वायौ उद्भूतरूपाभावः**, पाषाणे सौरभाभावः, गुडे तिक्ताभावः, वह्नौ अनुष्णत्वाभावः, श्रोत्रे शब्दाभावः, आत्मनि सुखाद्यभावः, **एवमादयः** तत्तदिन्द्रियैः गृह्यन्ते, तत्तत्प्रत्यक्षस्य आपादयितुं शक्यत्वात् ।।

दिनकरी

ननु जातित्वादिविशिष्टस्य तेजोवृत्तित्वस्य उपलम्भव्याप्यत्वात् तेजसि गुरुत्वाभावप्रत्यक्षापत्तिः, एवं स्तम्भे पिशाचत्वाभावस्यापि प्रत्यक्षापत्तिः, अत आह – **गुरुत्वादिकम्** इति । "आदि"पदेन पिशाचादिपरिग्रहः । अयोग्यस्य पिशाचत्वादिजातेः अभावस्य प्रत्यक्षत्वाद् गुरुत्वादिकम् इत्युक्तम् । **न योग्यः** – न प्रत्यक्षविषयः । **अशक्यत्वात्** इति । **निरुक्तयोग्यताघटकव्याप्तौ** प्रतियोग्यवृत्तिधर्मानवच्छिन्नत्वस्य निवेशात् प्रकृते च जातित्वविशिष्टतेजोवृत्तित्वस्य उपलम्भव्याप्यत्वेऽपि जातित्वस्य गुरुत्वावृत्तित्वेन तादृशव्याप्यत्वे प्रतियोग्यवृत्ति-धर्मानवच्छिन्नत्वाभावात् इति भावः ।

न च – तदधिकरणीयत्वप्रसञ्जनप्रसञ्जितप्रतियोगिकः तदधिकरणीयत्वो-पलम्भस्याभावः ऐन्द्रियकघटाभावादिप्रत्यक्षे हेतुः आस्ताम्, किं

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

पूर्वोक्तयोग्यानुपलम्भहेतुतया इति – वाच्यम् । तथा सति **परमाण्वादौ** महत्त्वाभावप्रत्यक्षानुपपत्तेः इति । **वायौ उद्भूतरूपाभाव** इति । रूपत्वावच्छिन्नाभावस्य अतीन्द्रियानुद्भूतरूपप्रतियोगिकत्वेन प्रत्यक्षासंभवात् **उद्भूत** इति । ''**एवमादायः**'' इति ''आदि''ना प्रभायाः उद्भूतस्पर्शाभावपरिग्रहः ।।

राजीवोल्लासः

ननु जातित्वादिविशिष्टस्य इति । सामानाधिकरण्यसंबन्धेन जातित्वविशिष्टं तेजोवृत्तित्वं तेजोवृत्तित्वोपलम्भव्याप्यम् । तेजस्त्वे जातित्वविशिष्टस्य तेजोवृत्तित्वस्य सत्त्वेन तत्र तेजोवृत्तित्वोपलम्भात् । एवम् च जातित्वविशिष्टतेजोवृत्तित्वनिष्ठव्याप्यतानिरूपकः तेजोवृत्तित्वोपलम्भः विषयतासंबन्धेन गुरुत्वे नास्ति इति तादृशोपलम्भाभावबलात् तेजसि गुरुत्वाभावस्य प्रत्यक्षापत्तिः । एवं जातित्वविशिष्टस्य स्तम्भवृत्तित्वस्य उपलम्भव्याप्यत्वात् स्तम्भे पिशाचत्वाभावप्रत्यक्षापत्तिः इति आशङ्क्य **गुरुत्वादिकं यत् अयोग्यम्** इत्यादिना समाधत्ते मुक्तावल्याम् इत्यर्थः ।

ननु गुरुत्वादिप्रत्यक्षस्य आपादयितुम् अशक्यत्वेऽपि जातित्वविशिष्टतेजोवृत्तित्वनिष्ठव्याप्यतानिरूपकोपलम्भाभावरूपस्य योग्यानुपलम्भस्य गुरुत्वे सत्त्वात् कुतः तेजसि गुरुत्वाभावप्रत्यक्षं न संभवति इति आशङ्क्य आह – **निरुक्तयोग्यताघटकव्याप्तौ** इति । जातित्वविशिष्टतेजोवृत्तित्वनिष्ठव्याप्यतायां प्रतियोग्यवृत्तिधर्मानवच्छिन्नत्वं निवेश्यते । प्रतियोगिपदेन प्रत्यक्षविषयस्य अभावस्य प्रतियोगी ग्राह्यः । तथा च जातित्वविशिष्टतेजोवृत्तित्वनिष्ठा या प्रतियोग्यवृत्तिधर्मानवच्छिन्ना व्याप्यता तन्निरूपकः यः उपलम्भः तदभावः तेजोविशेष्यकाभावप्रत्यक्षे कारणम् । यथा ''तेजः जलत्वाभाववत्'' इति प्रत्यक्षे तादृशोपलम्भाभावरूपं कारणम् अस्ति । जातित्वविशिष्टतेजोवृत्तित्वनिष्ठा व्याप्यता जातित्वावच्छिन्ना । जातित्वं च जलत्वरूपप्रतियोगिवृत्ति । अतः प्रतियोग्यवृत्तिधर्मानवच्छिन्ना व्याप्यता भवति । तन्निरूपकस्य तेजोवृत्तित्त्वोपलम्भस्य जलत्वे अभावात् जलत्वाभावप्रत्यक्षं तेजसि जायते ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

तेजसि गुरुत्वाभावप्रत्यक्षे जननीये तु तेजोवृत्तित्वनिष्ठव्याप्यतायाः गुरुत्वरूपप्रतियोग्यवृत्तिजातित्वावच्छिन्नतया व्याप्यतायां प्रतियोग्यवृत्तिधर्मानवच्छिन्नत्वं नास्ति इति अनवच्छिन्नव्याप्यतानिरूपकोपलम्भाप्रसिद्ध्या तदभावरूपकारणविरहात् न तेजसि गुरुत्वाभावप्रत्यक्षम् इति भावः । स्तम्भे पिशाचत्वाभावप्रत्यक्षं तु इष्यते एव । जातित्वस्य पिशाचत्वरूपप्रतियोगिवृत्तितया तेजोवृत्तित्वनिष्ठव्याप्यतायाः प्रतियोग्यवृत्तिधर्मानवच्छिन्नत्वात् इति अवधेयम् ।

ऐन्द्रियक इति । इन्द्रियग्राह्यं यत् घटादि तदभावप्रत्यक्षेऽपि इत्यर्थः । **पूर्वोक्तयोग्यानुपलम्भहेतुतया** इति । प्रतियोगिग्राहकातिरिक्तधर्मानवच्छिन्नव्याप्यताघटितयोग्यानुपलम्भस्य हेतुतया इत्यर्थः । **परमाण्वादौ** इति । सर्वत्र तदधिकरणवृत्तित्वप्रसञ्जनप्रसञ्जितप्रतियोगिकः तदधिकरणवृत्तित्वोपलम्भस्य अभावः अभावप्रत्यक्षे कारणम् इति स्वीकारे परमाणौ महत्त्वसत्त्वे तद्वृत्तित्वेन महत्त्वोपलम्भापादनस्य कर्तुं शक्यतया परमाणौ महत्त्वाभावस्य प्रत्यक्षत्वोपगमात् तत्प्रत्यक्षस्य अनुपपत्तिः । परमाणोः अयोग्यतया तद्वृत्तित्वस्य उपलम्भं प्रति अव्याप्यत्वात् । तथा च परमाणौ महत्त्वाभावप्रत्यक्षस्य इष्टतया तादृशप्रत्यक्षं प्रति परमाणुवृत्तित्वनिष्ठव्याप्यतानिरूपितव्यापकताश्रयोपलम्भाभावस्यैव हेतुत्वं वक्तव्यम् । तत्र परमाणुवृत्तित्वे उपलम्भव्याप्यत्वविरहात् तद्घटितहेत्वप्रसिद्धिः । अतः पूर्वोक्तयोग्यानुपलम्भस्यापि कारणत्वं वक्तव्यम् इति भावः ।।

मुक्तावली

संसर्गाभावप्रत्यक्षे प्रतियोगिनः योग्यता, अन्योन्याभावप्रत्यक्षे अधिकरणयोग्यता अपेक्षिता । अतः स्तम्भादौ पिशाचादिभेदोऽपि चक्षुषा गृह्यते एव ।।

दिनकरी

प्रत्यक्षे विषयत्वेन कारणत्वस्य क्लृप्तत्वात् **तेनैव** गुरुत्वाद्यतीन्द्रियाभावप्रत्यक्षवारणे **तदनुरोधेन** ''तदधिकरणीयत्व'' इत्यादिद्वितीययोग्यानुपलम्भस्य

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

हेतुता न स्वीकार्या इत्यभिप्रायवान् संसर्गाभावे योग्यत्वम् आह – **संसर्ग** इति । **प्रतियोगिनः योग्यता** इति । **योग्यमात्रप्रतियोगिकत्वे सति योग्यधर्ममात्रावच्छिन्न-प्रतियोगिताकत्वम्** इत्यर्थः । **अत्र** द्रव्यसामान्याभाववारणाय ''मात्र'' इति । **गुरुत्ववद्धटात्यन्ताभाववारणाय** विशेष्यदलम् । **रूपगुरुत्वान्यतरावच्छिन्नाभाव**-वारणाय विशेष्यदले ''मात्र'' इति । **अधिकरणयोग्यता** इति । योग्याधिकरणवृत्तित्वम् इत्यर्थः । इदं च अभावग्राहक**योग्यसन्निकर्षप्रदर्शनार्थम्, तेन** स्तम्भ इव वाय्वादौ न पिशाचान्योन्याभावप्रत्यक्षम् इति भावः । **अन्योन्याभावे योग्यता** तु जात्यवच्छिन्नप्रतियोगिताकत्वजात्यतिरिक्तयोग्यधर्मावच्छिन्नप्रतियोगिता-कत्वान्यतरदेव । तेन स्तम्भे पिशाचान्योन्याभावपिशाचवदन्योन्याभावयोः प्रत्यक्षत्वाप्रत्यक्षत्वोपपत्तिः इति अन्यत्र विस्तरः ।।

राजीवोल्लासः

प्रत्यक्षे इति । विषयतासंबन्धेन लौकिकप्रत्यक्षं प्रति इत्यर्थः । **विषयत्वेन** इति । लौकिकप्रत्यक्षविषयत्वाश्रयत्वेन इत्यर्थः । **क्लृप्तत्वात्** इति । विषयतासत्त्वदशायां तद्विषयकलौकिकप्रत्यक्षवारणाय तत्तद्विषयकलौकिकप्रत्यक्षविषयं प्रति विषयस्य तत्तद्व्यक्तित्वेन तादात्म्यसंबन्धेन कारणत्वस्य आवश्यकतया यद्विशेषयोः कार्यकारणभावः सः तत्सामान्ययोरपि इति न्यायेन लौकिकप्रत्यक्षसामान्यं प्रति विषयस्य कारणत्वात् इति भावः । **तेनैव** इति । गुरुत्वाद्यतीन्द्रियप्रतियोगिकाभावस्य लौकिकप्रत्यक्षविषयत्वाश्रयत्वाभावेनैव तत्र लौकिकविषयतासंबन्धेन प्रत्यक्षापत्तेः अयोगात् इति भावः । **तदनुरोधेन** इति । गुरुत्वाभावादेः प्रत्यक्षापत्तिवारणानुरोधेन इत्यर्थः ।

ननु प्रतियोगिनिष्ठयोग्यतायाः प्रतियोगिन्येव सत्त्वात् संसर्गाभावे असत्त्वात् कथं तस्याः संसर्गाभावयोग्यतात्वम् इति आशङ्क्य आह – **योग्यमात्र** इति । मात्रपदस्य प्रयोजनम् आह – **अत्र** इति । द्रव्यसामान्याभावस्यापि योग्यघटादिप्रतियोगि-कत्वात् द्रव्यसामान्याभावस्य प्रत्यक्षापत्तिः । तद्वारणाय सत्यन्ते ''मात्र''पदम् ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

द्रव्यसामान्याभावस्य अयोग्याकाशादिप्रतियोगिकत्वेन योग्यमात्रप्रतियोगिकत्वविरहात् न तस्य प्रत्यक्षम् । विशेष्यदलस्य प्रयोजनम् आह – **गुरुत्ववद्धटात्यन्ताभाव** इति । गुरुत्वावच्छिन्नघटनिष्ठप्रतियोगिताकात्यन्ताभावस्य योग्यमात्रप्रतियोगिकत्वात् प्रत्यक्षापत्तिः । तद्वारणाय **योग्यधर्ममात्रावच्छिन्नप्रतियोगिताकत्वम्** इति विशेष्यदलम् । उक्तघटात्यन्ताभावस्य अयोग्यगुरुत्वावच्छिन्नप्रतियोगिताकतया तद्व्युदासः । विशेष्ये ''मात्र''पदस्य प्रयोजनम् आह – **रूपगुरुत्व** इति । रूपगुरुत्वान्यतरावच्छिन्नघटनिष्ठप्रतियोगिताकाभावस्य योग्यमात्रप्रतियोगिकत्वात् योग्यरूपावच्छिन्नप्रतियोगिताकत्वाच्च तस्य प्रत्यक्षवारणाय योग्यधर्ममात्रावच्छिन्नेति ''मात्र''पदम् । अयोग्यधर्मानवच्छिन्नत्वे सति योग्यधर्मावच्छिन्नत्वं तदर्थः । उक्तान्यतरावच्छिन्नप्रतियोगितायाः अयोग्यगुरुत्वावच्छिन्नतया योग्यधर्ममात्रावच्छिन्न-प्रतियोगिताकत्वं नास्ति इति न तस्य प्रत्यक्षम् ।

अथ एवमपि पिशाचत्वादीनां अत्यन्ताभावस्य प्रत्यक्षानुपपत्तिः । प्रतियोगिपिशाचत्वादीनां योग्यताविरहात् । संसर्गाभावप्रत्यक्षे प्रतियोगियोग्यतायाः कारणत्वात् इति चेत्, न । पिशाचत्वात्यन्ताभावस्य पिशाचान्योन्याभावसमनियतस्य पिशाचान्योन्याभावरूपतया अन्योन्याभावभिन्नत्वरूपस्य संसर्गाभावत्वस्य पिशाचत्वाभावेऽभावेन तत्प्रत्यक्षे प्रतियोगियोग्यतायाः अनपेक्षितत्वात् । अधिकरणयोग्यतामात्रेण पिशाचभेदरूपस्य पिशाचत्वात्यन्ताभावस्य प्रत्यक्षसंभवात् इति आशयः । अधिकरणयोग्यतायाः अधिकरणे एव सत्त्वेन अभाववृत्तित्वसंपादनाय ''अधिकरणयोग्यता'' इत्यस्य ''योग्याधिकरणवृत्तित्वम्'' इति व्याख्यानं कृतम् । **योग्यसन्निकर्ष** इति । इन्द्रियसंयुक्तयोग्यवस्तुविशेषणतारूपः यः अभाव-ग्राहकसन्निकर्षः तत्प्रदर्शनपरम् इदं, न तु अन्योन्याभावयोग्यताप्रदर्शनपरम् इत्यर्थः ।

तेन इति । एतादृशसन्निकर्षस्य अभावग्राहकत्वेन इत्यर्थः । वाय्वादिनिष्ठस्य पिशाचभेदस्य इन्द्रियसंयुक्तयोग्यविशेषणतारूपसन्निकर्षः नास्ति, इन्द्रियसंयुक्तस्य वायोः योग्यताविरहात् । अतः वाय्वादौ न पिशाचभेदप्रत्यक्षम् इति भावः ।

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

अन्योन्याभावप्रत्यक्षे अधिकरणयोग्यता अपेक्षिता इति मूलस्थस्य अधिकरणयोग्यतापदस्य सन्निकर्षप्रदर्शनपरतया व्याख्याततत्वात् अन्योन्या-भावयोग्यतायाः मूलानुक्तत्वात् ताम् आह – **अन्योन्याभावे योग्यता इति** । घटे पटान्योन्याभावप्रत्यक्षं प्रति पटान्योन्याभावनिष्ठा जात्यवच्छिन्नप्रतियोगिताकत्वरूपा योग्यता प्रयोजिका । भूतलादौ घटवदन्योन्याभावप्रत्यक्षं प्रति अन्योन्याभावनिष्ठा जात्यतिरिक्तयोग्यधर्मावच्छिन्नप्रतियोगिताकत्वरूपा योग्यता प्रतियोजिका । जात्यतिरिक्तयोग्यधर्मः घटवत्वादिः । तेन स्तम्भे पिशाचान्योन्याभावस्य प्रत्यक्षं उपपद्यते । पिशाचान्योन्याभावे पिशाचत्वरूपजात्यवच्छिन्नप्रतियोगिताकत्व-रूपयोग्यतायाः सत्त्वात् । स्तम्भे पिशाचवदन्योन्याभावप्रत्यक्षं तु न भवति । पिशाचवदन्योन्याभावे योग्यधर्मावच्छिन्नप्रतियोगिताकत्वविरहात् । पिशाचवत्त्वस्य अयोग्यत्वात् । एतेन इदं फलितम् – जात्यवच्छिन्नप्रतियोगिताकस्य वा जात्यतिरिक्तयोग्यधर्मावच्छिन्नप्रतियोगिताकस्य वा अन्योन्याभावस्य प्रत्यक्षं भवति ।।

।। अलौकिकसन्निकर्षनिरूपणम् ।।

कारिकावली

अलौकिकस्तु व्यापारस्त्रिविधः परिकीर्तितः ।
सामान्यलक्षणो ज्ञानलक्षणो योगजस्तथा ।। ६३ ।।

मुक्तावली

प्रत्यक्षं लौकिकालौकिकभेदेन द्विविधम् । तत्र लौकिकप्रत्यक्षे षोढासंनिकर्षः वर्णितः । अलौकिकसंनिकर्षस्तु इदानीम् उच्यते – **अलौकिकस्तु** इति । **व्यापारः** – **सन्निकर्षः** । **सामान्यलक्षण** इति । सामान्यं लक्षणं यस्य इत्यर्थः । तत्र लक्षणपदेन यदि स्वरूपम् उच्यते, तदा सामान्यस्वरूपा प्रत्यासत्तिः इत्यर्थः लभ्यते । तच्च इन्द्रियसंबद्धविशेष्यकज्ञानप्रकारीभूतं बोध्यम् । तथा हि – यत्र

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

इन्द्रियसंयुक्तः धूमादिः, तद्विशेष्यकं धूम इति ज्ञानं यत्र जातं, तत्र ज्ञाने धूमत्वं प्रकारः, तत्र धूमत्वेन सन्निकर्षेण धूमा इत्येवं रूपं सकलधूमविषयकं ज्ञानं जायते । **अत्र यदि** इन्द्रियसंबद्धप्रकारीभूतम् इत्येव उच्यते, तदा धूलीपटले धूमत्वभ्रमानन्तरं सकलधूमविषयकं ज्ञानं न स्यात्, तत्र धूमत्वेन सह इन्द्रियसंबन्धाभावात् । **मन्मते** तु इन्द्रियसंबद्धं धूलीपटलम्, तद्विशेष्यकं धूम इति ज्ञानं, तत्र प्रकारीभूतं धूमत्वं प्रत्यासत्तिः । इन्द्रियसंबन्धश्च **लौकिकः ग्राह्यः । इदं च बहिरिन्द्रियस्थले,** मानसस्थले तु ज्ञानप्रकारीभूतं सामान्यं प्रत्यासत्तिः ।।

दिनकरी

धूमत्वादिसामान्यलक्षणाया इन्द्रियजन्यत्वाभावात् व्यापारत्वकथनम् असङ्गतम्, अत आह – **व्यापारः सन्निकर्ष इति । यद्यपि** धूमत्वादेः इन्द्रियप्रतियोगिकत्वाभावात् सन्निकर्षत्वम् अयुक्तम्, तथापि संयोगस्य इन्द्रियप्रतियोगिकत्वात् तद्घटितस्य इन्द्रियसंयुक्तविशेष्यकज्ञानप्रकारीभूतधूमत्वादेः प्रत्यासत्तितानिर्वाहः । **तच्च** – सामान्यस्वरूपं च । **अत्र यदि** इति । इन्द्रियसंबद्धं सामान्यं प्रत्यासत्तिः इति उच्यते तदा इत्यर्थः । **ननु यत्र चक्षुःसन्निकर्षेण** धूम इति ज्ञानं जनितं, तत्र चक्षुःसंयोगं विनापि तादृशज्ञानम् आदाय इन्द्रियसंबद्धविशेष्यकज्ञानप्रकारस्य धूमत्वादेः धूमान्तरे सत्त्वात् सामान्यलक्षणया ज्ञानापत्तिः । न च तदा धूमः न इन्द्रियसंबद्धः, ज्ञानलक्षणात्मकसन्निकर्षस्य धूमे सत्त्वात् । न च – **तत्र एकक्षणे** सामान्यलक्षणाजन्यज्ञानस्वीकारे क्षतिविरह इति – वाच्यम् । तन्मूलकज्ञानधारापत्तेः दुर्वारत्वात् इति, अत आह – **लौकिकः ग्राह्य** इति । **अत्र लौकिकसन्निकर्षस्य** विशेषणविधया घटकत्वं बोध्यम् । अन्यथा तत्र धूमे पूर्वकालीनचक्षुःसंयोगम् आदाय तद्दोषतादवस्थ्यम् इति ध्येयम् । **इदम् उपलक्षणम्** । यत्र चक्षुःसंयोगे विद्यमानेऽपि दोषवशात् न धूमचाक्षुषं, किंतु धूमत्वप्रकारकं स्मरणं, तत्र धूमत्वसामान्यलक्षणाजन्यज्ञानापत्तिवारणाय सामान्यलक्षणाघटकज्ञाने तदिन्द्रियजन्यत्वस्य वाच्यत्वात् । ननु **"इन्द्रियसंबद्ध"** इत्यत्र लौकिकसंबन्धः **"ज्ञानप्रकार"** इत्यत्र

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

ज्ञानस्य तदिन्द्रियजन्यत्वं चेत् विवक्षितं, तदा अणुत्वेन यत्किंचिदणूपस्थितौ अणुत्वसामान्यलक्षणया सकलाणुगोचरः मानसः बोधः न स्यात्, तदा अणौ मनसः लौकिकसंबन्धस्य ज्ञाने मनोजन्यत्वस्य च अभावात्, अत आह – इदं च इति । तदा च बहिरिन्द्रियेण सामान्यलक्षणया ज्ञाने जननीये तद्विवक्षितम्, न तु मानससामान्यलक्षणाजन्यज्ञाने इति न उक्तदोष इति भावः ।।

राजीवोल्लासः

इन्द्रियजन्यत्वाभावात् इति । धूमत्वादिरूपस्य सामान्यस्य नित्यत्वात् इन्द्रियजन्यत्वाभावात् इन्द्रियजन्यत्वे सति इन्द्रियजन्यजनकत्वरूपं व्यापारत्वं न संभवति इत्यर्थः । **सन्निकर्ष इति** इति । ननु **व्यापारः सन्निकर्षः** इति व्याख्यानेऽपि इन्द्रियसन्निकर्षत्वं इन्द्रियसंबन्धत्वम् एव । तच्च इन्द्रियप्रतियोगिकसंबन्धत्वम् । तदपि धूमत्वादिसामान्यस्य इन्द्रियप्रतियोगिकत्वाभावेन दुर्घटम् इति आशङ्क्य समाधत्ते – **यद्यपि** इति । इन्द्रियसंयुक्तविशेष्यकज्ञानप्रकारीभूतधूमत्वादिसामान्यस्यैव सन्निकर्षत्वात् तद्घटकस्य संयोगस्य इन्द्रियप्रतियोगिकत्वात् संयोगघटितस्य सामान्यस्य परम्परया इन्द्रियप्रतियोगिकसन्निकर्षत्वम् इति भावः । **प्रत्यासत्तितानिर्वाह** इति । यद्यपि एवमपि ज्ञानलक्षणयोगजधर्मयोः इन्द्रियप्रतियोगिकत्वानुपपत्तिः तदवस्थैव, तथापि कालिकेन स्वाश्रयत्वविशिष्टयोः तयोः सन्निकर्षत्वाभ्युपगमात् आश्रयत्वस्य स्वप्रतियोगिकत्वादेव इन्द्रियप्रतियोगिकत्वस्य ज्ञानस्य विषयतया विषयवृत्तितया, धर्मस्य स्वजन्यज्ञानविषयतावच्छेदकत्वोपलक्षितधर्मसंबन्धेन विषयवृत्तितया च तदनुयोगिकत्वस्यापि उपपत्त्या न अनुपपत्तिः ।

ननु शब्दप्रत्यक्षकारणसन्निकर्षस्य समवायस्य कथम् इन्द्रियप्रतियोगिकत्वम् इति चेत् न – शब्दनिष्ठस्य समवायावच्छिन्नवृत्तित्वस्यैव सन्निकर्षत्वाङ्गीकारात् । तस्य च श्रोत्ररूपेन्द्रियप्रतियोगिकत्वात् । यद्वा सन्निकर्षे इन्द्रियप्रतियोगिकत्व–तदनुयोगिकत्वान्यतरदेव आवश्यकम् । शब्दप्रत्यक्षे च समवाय एव सन्निकर्षः । तस्य इन्द्रियानुयोगिकत्वात् । तथा च सामान्यलक्षणाघटकं इन्द्रियसंबद्धत्वम्

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

इन्द्रियप्रयोगिकत्व – तदनुयोगिकत्वान्यतर – विशिष्टसंबन्धानुयोगित्वप्रतियोगित्वान्यतरविशिष्टत्वम् । एवं च आदौ इन्द्रियसंयुक्तस्य धूमस्य "धूम"इत्याकारकं ज्ञानं भवति । तत्र ज्ञाने धूमत्वं प्रकारः । तस्य धूमत्वस्य सर्वेष्वपि धूमेषु सत्त्वात् धूमत्वाख्येन सन्निकर्षेण सकलधूमविषयकं "धूमाः" इत्याकारकं ज्ञानं जायते । तदेव सामान्यलक्षणाप्रत्यासत्तिजन्यं प्रत्यक्षम् इति उच्यते ।

इन्द्रियसंबन्धश्च लौकिको ग्राह्यः इति ग्रन्थं अवतारयति – **ननु यत्र चक्षुस्सन्निकर्षेण** इति । इन्द्रियसंबद्धविशेष्यकज्ञानप्रकारीभूतं सामान्यं सन्निकर्षः इति स्वीकारे यत्र विनश्यदवस्थचक्षुस्संयोगेन "धूमः" इति ज्ञानं उत्पन्नम्, तत्र चक्षुस्संयोगं विनापि तादृशज्ञानप्रकारीभूतस्य धूमत्वसामान्यस्य धूमान्तरे सत्त्वात् धूमान्तराणां सामान्यलक्षणया प्रत्यक्षापत्तिः । न च – विनश्यदवस्थचक्षुस्संयोगजन्यस्य धूमज्ञानस्य इन्द्रियसंबद्धविशेष्यकत्वं नास्ति । ज्ञानकाले इन्द्रियसंयोगस्य नष्टत्वात् । तथा च इन्द्रियसम्बद्धविशेष्यकज्ञानप्रकारीभूतं सामान्यं न भवति इति कथं तद्बलात् धूमान्तराणां प्रत्यक्षापत्तिः इति – वाच्यम् । धूमज्ञानस्यैव अलौकिकस्य इन्द्रियसंबन्धरूपतया विषयतासंबन्धेन तादृशज्ञानरूपेन्द्रियसंबन्धविशिष्टः यः धूमः तद्विशेष्यकत्वस्य तस्मिन् ज्ञाने अनपायात् । चाक्षुषप्रत्यक्षविषयस्य धूमस्य द्वितीयक्षणे चाक्षुषज्ञानात्मकप्रत्यासत्त्या अलौकिकप्रत्यक्षनिर्वाहात् धूमान्तराणां सामान्यलक्षणारूपालौकिकप्रत्यासत्त्या प्रत्यक्षापादनम् । धूमान्तराणां तु विनश्यदवस्थचक्षुस्संयोगजन्यप्रत्यक्षाविषयतया तादृशप्रत्यक्षात्मकज्ञानलक्षणया प्रत्यासत्त्या अलौकिकप्रत्यक्षं न निर्वहति । किन्तु एतद्धूमविषयकज्ञानप्रकारीभूतधूमत्वसामान्यलक्षणयैव प्रत्यक्षोपपत्तिः इत्याशयेन धूमान्तराणाम् सामान्यलक्षणया प्रत्यक्षापत्तिः इत्युक्तम् ।

न च – सामान्यलक्षणया अत्र धूमान्तरज्ञानम् इष्टमेव इति वाच्यम् । आपाद्यमानप्रत्यक्षात्मकज्ञानव्यक्तिमूलकज्ञानधारापत्तेः दुर्वारत्वात् इति आशङ्क्य इन्द्रियसंबद्धविशेष्यक-ज्ञानप्रकारीभूतं सामान्यम् इत्यत्र इन्द्रियसंबन्धः

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

इन्द्रियप्रतियोगिकलौकिकसन्निकर्षः विवक्षितः । तथा च विनश्यदवस्थचक्षुस्संयोगजन्यं धूमज्ञानं इन्द्रियप्रतियोगिकलौकिकसन्निकर्षवद्विशेष्यकं न भवति । तस्मिन् क्षणे चक्षुस्संयोगात्मकस्य लौकिकसन्निकर्षस्य नाशात् । अतः तत्प्रकारीभूतस्य सामान्यस्य प्रत्यासत्तित्वविरहात् तद्बलात् धूमान्तराणां प्रत्यक्षापत्तिः न भवति । एतेन इदं फलितम् – अविनश्यवदवस्थचक्षुस्सन्निकर्षजन्यज्ञानप्रकारीभूतसामान्यमेव सामान्यलक्षणाप्रत्यासत्तिः इति ।

एकक्षणे इति । पूर्वं चक्षुस्संयोगजन्यज्ञानसत्त्वेन सामान्यलक्षणया ज्ञानोत्पत्यापत्तेः सम्भवात् तज्ज्ञानानन्तरं च ज्ञानप्रकारत्वविरहादेव आपत्यसंभवात् इति भावः । न च – एवमपि क्षणद्वयेऽपि तादृशज्ञानस्य सत्त्वात् ज्ञानोत्पत्तिद्वितीय-तृतीयक्षणयोः सामान्यलक्षणया ज्ञानोत्पत्त्यापत्तिसंभवात् ''एकक्षणे'' इति असङ्गतम् इति – वाच्यम् । यत्र प्रथमक्षणे धूमत्वप्रकारकज्ञानं तत्र तज्ज्ञानद्वितीयक्षणे जायमानस्य ज्ञानस्य सामान्यलक्षणया सकलधूमविषयकतायाः सर्ववादिसिद्धतया तृतीयक्षणे एव तदापत्तिः कर्तव्या इति अभिप्रायेण एकक्षणाभिधानात् ।

ननु **इन्द्रियसंबन्धः लौकिको ग्राह्य** इति उक्तावपि विनश्यदवस्थचक्षुस्संयोग-जन्यस्य धूमज्ञानस्यापि पूर्वक्षणे चक्षुस्संयोगाश्रयः यः धूमः तद्विशेष्यकत्वात् तत्प्रकारीभूतं सामान्यम् आदाय पूर्वोक्तापत्तिः दुर्वारा इति आशङ्क्य आह – **अत्र लौकिकसन्निकर्षस्य** इति । इन्द्रियसंबद्धेत्यत्र इन्द्रियप्रतियोगिकलौकिकसन्निकर्षः विशेषणविधया प्रविष्टः । तथा च इन्द्रियप्रतियोगिकलौकिकसन्निकर्षविशिष्टविशेष्य-कज्ञानप्रकारीभूतं सामान्यं प्रत्यासत्तिः । उक्तस्थले ज्ञानस्य चक्षुस्संयोगविशिष्ट-विशेष्यकत्वं नास्ति । तत्क्षणे चक्षुस्संयोगस्य नाशात् । अतः न दोषः इति भावः ।

इदम् उपलक्षणम् इति । सामान्यलक्षणाघटकेन्द्रियसंबन्धस्य लौकिकत्वकथनं तद्घटकज्ञाने तदिन्द्रियजन्यत्वनिवेशस्यापि प्रदर्शकम् । यत्र धूमस्य चक्षुस्संयोगे सत्यपि दोषवशात् न चाक्षुषं ज्ञानम्, किन्तु धूमत्वप्रकारकं धूमविशेष्यकं स्मरणं

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

तत्र चक्षुस्संयुक्तविशेष्यकस्मरणप्रकारीभूतधूमत्वसामान्यलक्षणया सकलधूमविषयक-प्रत्यक्षापत्तेः वारणाय सामान्यलक्षणघटकज्ञाने तदिन्द्रियजन्यत्वमपि निवेशनीयम् । तथा च तदिन्द्रियप्रतियोगिक-लौकिकसन्निकर्षवद्विशेष्यक – तदिन्द्रियजन्यज्ञान-प्रकारीभूतं सामान्यं सन्निकर्ष इत्युक्तं भवति । धूमत्वप्रकारकस्मरणस्य चक्षुरिन्द्रिय-जन्यत्वाभावात् तत्प्रकारीभूतधूमत्वसामान्यात् सकलधूमप्रत्यक्षापत्तिः न संभवति इति भावः ।

इदं च बहिरिन्द्रियस्थले इति मूलम् अवतारयति – **ननु इन्द्रियसंबद्ध इत्यत्र इति** । **इदं च** – इन्द्रियसंबद्धविशेष्यकज्ञानप्रकारीभूतस्य सामान्यस्य प्रत्यासत्तित्वं च । **बहिरिन्द्रियस्थले** – बहिरिन्द्रियेण सामान्यलक्षणया ज्ञानजनन-स्थले । न तु मानससामान्यलक्षणा जन्यज्ञानस्थले इति मूलार्थः । तदवतरणिकाग्रन्थस्य अयम् आशयः – इन्द्रियसंबद्धेत्यत्र संबन्धपदेन लौकिकसन्निकर्षम्, ज्ञानप्रकारेत्यत्र ज्ञानस्य तदिन्द्रियजन्यत्वं च विवक्षित्वा तदिन्द्रियप्रतियोगिकलौकिकसन्नि-कर्षवद्विशेष्यक – तदिन्द्रियजन्यज्ञानप्रकारीभूतं सामान्यं प्रत्यासत्तिः इति अङ्गीकारे अणुत्वेन रूपेण किञ्चिदणुपरिमाणोपस्थितौ तत्प्रकारीभूताणुपरिमाणत्वत्वसामान्य-लक्षणया सकलाणुपरिमाणविषयकमानसप्रत्यक्षं न स्यात् । अणौ – परमाणुपरिमाणे द्व्यणुकपरिमाणे च मनसः लौकिकसन्निकर्षस्य, अणुपरिमाणविषयकज्ञाने मनोजन्यत्वस्य च अभावात् । न च – ज्ञानसामान्यस्यैव मनोजन्यतया अणुपरिमाण-विषयकोपस्थितौ मनोजन्यत्वम् अस्त्येव इति – वाच्यम् । स्मरणस्यापि कालोपाधिविधया मनोजन्यत्वेन तद्वारणाय तदिन्द्रियनिष्ठजनकतानिरूपित-तत्प्रत्यक्षविभाजकोपाध्यवच्छिन्नजन्यताया एव विवक्षणीयतया तादृशमनोजन्यतायाः सुखादिप्रत्यक्षे एव सत्त्वेन अणुपरिमाणोपस्थितौ तदभावात् । मनः मनोजन्यप्रत्यक्षत्वावच्छिन्नं प्रत्यपि कारणम् । ज्ञानत्वावच्छिन्नं प्रत्यपि कारणम् । तत्र ज्ञानत्वं प्रत्यक्षविभाजकोपाधिः न भवति । मानसप्रत्यक्षत्वं तु प्रत्यक्षविभाजको-पाधिः । प्रत्यक्षस्य बाह्यम् आन्तरं च इति द्वेधा विभजनात् । तथा च

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

मनःप्रतियोगिकलौकिकसन्निकर्षवद्विशेष्यकं मनोनिष्ठजनकतानिरूपितप्रत्यक्ष-विभाजकोपाध्यवच्छिन्नजन्यताशालि च ज्ञानं अणुपरिमाणोपस्थितिरूपं ज्ञानं न भवति । तस्य ज्ञानत्वेनैव मनोजन्यतया तन्निष्ठजन्यतायाः ज्ञानत्वावच्छिन्नत्वेन प्रत्यक्षविभाजकमानसत्वावच्छिन्नत्वाभावात् । अतः तादृशोपस्थितिविषयाणुत्व-सामान्यलक्षणया सकलाणुविषयकमानसबोधः इष्टः न स्यात् इति शङ्का ।

समाधानं तु – मानसप्रत्यक्षस्थले ज्ञानप्रकारीभूतं सामान्यमेव सन्निकर्षः । ज्ञाने तदिन्द्रियजन्यत्वादिकं न विवक्षितम् । तथा च अणुत्वेन रूपेण यत्किञ्चिदणूपस्थितिं ज्ञानपदेन गृहीत्वा तत्प्रकारीभूताणुत्वसामान्यलक्षणया सकलाणुगोचरमानसप्रत्यक्षं संभवत्येव इति भावः ।

मानससामान्यलक्षणाजन्यज्ञाने इति । मानसं यत् सामान्यलक्षणाजन्यं ज्ञानं तस्मिन् इत्यर्थः ।।

कारिकावली

आसत्तिराश्रयाणां तु सामान्यज्ञानमिष्यते ।
तदिन्द्रियजतद्धर्मबोधसामग्र्यपेक्षते ।। ६४ ।।

मुक्तावली

परन्तु समानानां भावः सामान्यम् । तच्च क्वचित् नित्यं धूमत्वादि, क्वचिच्च अनित्यं घटादि । यत्र एकः घटः संयोगेन भूतले, समवायेन कपाले वा ज्ञातः, तदनन्तरं सर्वेषामेव **तद्घटवतां** भूतलादीनां कपालानां वा ज्ञानं भवति, तत्र इदं बोध्यम् ।

परन्तु सामान्यं येन संबन्धेन ज्ञायते, तेन संबन्धेन अधिकरणानां प्रत्यासत्तिः । किंतु यत्र तद्घटनाशानन्तरं तद्घटवतः स्मरणं जातम्, तत्र सामान्यलक्षणया सर्वेषां तद्घटवतां भानं न स्यात्, सामान्यस्य तदानीम् अभावात् । किञ्च इन्द्रियसंबद्धविशेष्यकं

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

''घटः'' इति ज्ञानं यत्र जातम्, तत्र परदिने इन्द्रियसंबन्धं विनापि तादृशज्ञानप्रकारीभूतसामान्यस्य सत्त्वात् तादृशज्ञानं कुतो न जन्यते? तस्मात् सामान्यविषयकं ज्ञानं प्रत्यासत्तिः, न तु सामान्यम् इत्याह – **आसत्तिः** इति । **आसत्तिः** – प्रत्यासत्तिः इत्यर्थः । तथा च सामान्यलक्षणम् इत्यत्र लक्षणशब्दस्य विषयःअर्थः । तेन **सामान्यविषयकं ज्ञानं प्रत्यासत्तिः** इत्यर्थो लभ्यते ।

ननु चक्षुःसंयोगादिकं विनापि सामान्यज्ञानं यत्र वर्तते, तत्र सकलघटादीनां चाक्षुषप्रत्यक्षं स्यात्, अत आह – **तदिन्द्रियज** इति । अस्यार्थः – यदा बहिरिन्द्रियेण सामान्यलक्षणया ज्ञानं जननीयम्, तदा यत्किञ्चिद्धर्मिणि तत्सामान्यस्य तदिन्द्रियजन्यज्ञानस्य सामग्र्यपेक्षिता । सा च सामग्री चक्षुःसंयोगालोकसंयोगादिकम् । तेन अन्धकारादौ चक्षुरादिना तादृशं ज्ञानं न जन्यते ।।

दिनकरी

''आसत्तिः आश्रयाणां तु'' इत्यादिमूलम् अवतारयितुं भूमिकां रचयति – **परन्तु** इत्यादिना । ''भूतले'' इत्यस्य ''ज्ञात'' इत्यनेन अन्वयः । ''भूतलादीनाम्'' इति ''आदि''ना संयोगेन तद्घटाधिकरणद्रव्यान्तरपरिग्रहः । **तत्र इदं बोध्यम्** इति । ज्ञायमानम् अनित्यं सामान्यं तत्र प्रत्यासत्तिः इति बोध्यम् इत्यर्थः ।

परम्परया प्रत्यासन्नस्य घटत्वादेरेव प्रत्यासत्तित्वसंभवात् **''किंतु''** इत्यादिना वक्ष्यमाणदोषासङ्गतिः, अत आह – **परन्तु** इति । तथा च घटत्वस्य परम्परया कपालादौ अज्ञानात् वक्ष्यमाणदोषसङ्गतिः । **तेन संबन्धेन** इति । अन्यथा समवायेन ज्ञानप्रकारीभूतघटत्वादिसामान्यप्रत्यासत्त्या **कालादिज्ञानापत्तेः** इति भावः । **किंतु** इति । एवं च इत्यर्थः । **किञ्च** इति । **कुतो न जन्यत** इति । इदम् आपाततः – सामान्यलक्षणाघटकीभूतलौकिकसन्निकर्षस्य विशेषणत्वविवक्षणेन कालान्तरीयसंयोगम् आदाय उक्तातिप्रसङ्गस्य अभावात् इति । तस्मात् **पूर्वोक्तदोष एव अत्र कल्पे बोध्यः** ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

न च तत्र – स्वसमवायिसमवायादिसंबन्धेन घटत्वादेरेव **प्रत्यासत्तितया** पूर्वोक्तदोषोऽपि न संभवति इति – वाच्यम् । स्वसमवायिसमवायादिना घटत्वं कपालादौ यदा न ज्ञातम्, किंतु तदा तद्धट एव समवायादिना ज्ञातः, तदुत्तरमपि तद्धटाश्रयकपालानां ज्ञानस्य सर्वानुभवसिद्धस्य घटत्वप्रत्यासत्त्या उपपादनासंभवात् । एवं ज्ञायमानस्य प्रत्यासत्तित्वे चैत्रीयज्ञानविषयसामान्यप्रत्यासत्त्या मैत्रस्य तदाश्रयप्रत्यक्षापत्तिभिया तत्पुरुषीयत्वनिवेशस्य आवश्यकतया गौरवम्, ज्ञानस्य प्रत्यासत्तित्वे तु पुरुषनिष्ठप्रत्यासत्त्या हेतुत्वात् न तत्पुरुषीयत्वनिवेश इति लाघवम् इत्यपि बोध्यम् ।

तेन सामान्यविषयकं ज्ञानम् इति । इन्द्रियसंबद्धविशेष्यकं सामान्यप्रकारकं ज्ञानम् इत्यर्थः । यद्वा सामान्यविषयकं ज्ञानमात्रम् इत्यर्थः । सामान्यविषयकज्ञानत्वं प्रत्यासत्तितावच्छेदकम् इति यावत् । **तथा च अत्र कल्पे** इन्द्रियसंबद्धविशेष्यकत्वप्रकारकत्वतदिन्द्रियजन्यत्वानि ज्ञानस्य विशेषणानि न उपादेयानि इति । **पूर्वमते** तु तदिन्द्रियजन्यत्वादेः निवेशेन इन्द्रियभेदेन कार्यकारणभावभेदकल्पनेन च गौरवम् इति भावः ।

एतन्मते च निर्विकल्पकसाधारणं स्मरणसाधारणं च सामान्यज्ञानमात्रं प्रत्यासत्तिः । तथा च घटत्वप्रकारकप्रत्यक्षत्वं कार्यतावच्छेदकम्, घटत्वज्ञानत्वं च कारणतावच्छेदकम्, **स्वप्रकारीभूतघटत्वाश्रयत्वं च कार्यतावच्छेदकः संबन्धः,** स्वविषयघटत्वाश्रयत्वं कारणतावच्छेदकः संबन्धः । **चक्षुःसंयोगादिशून्यकाले** पूर्वोक्तातिप्रसङ्गस्य **वक्ष्यमाण** ''तदिन्द्रियज'' इत्यादिनैव वारणात् इति ध्येयम् ।

अणुत्वज्ञानमात्रेणैव सकलाणुगोचरमानसबोधोदयात् आह – **बहिः** इति । **''आलोकसंयोगादिकम्''** इति ''आदि''ना दोषाभावपरिग्रहः । **न जन्यत** इति । **अयम् आशयः** – यदा घटचक्षुःसंनिकर्षादिघटिता चाक्षुषादिसामग्री तदुत्तरक्षणे ''घट'' इति चाक्षुषम्, सैव सामान्यलक्षणा । तया उत्तरक्षणे सकलघटविषयकं

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

ज्ञानं जन्यत इति **प्राचीनमते** क्षणैकविलम्बः कल्प्यते । तत्र च मानाभावः । यदैव "घट" इति चाक्षुषम् उत्पद्यते, तदैव सन्निकृष्टघटांशे **लौकिकम् अन्यघटांशे अलौकिकम् इत्यभ्युपगमात्** । तथा च सामान्यलक्षणाजन्यघटत्वप्रकारक-चाक्षुषत्वस्य व्यापकं घटत्वप्रकारकलौकिकचाक्षुषत्वम् इति फलितम् । तथा च चक्षुःसंनिकर्षादिशून्यकाले व्यापकधर्मावच्छिन्नजनकसामग्र्याः सहकारिण्या विरहादेव न चाक्षुषं सामान्यलक्षणया ज्ञानम् इति ।।

राजीवोल्लासः

भूमिकाम् इति । अवतारणानुकूला युक्तिरेव भूमिका । इन्द्रियसंबद्ध-विशेष्यकज्ञानप्रकारीभूतं सामान्यं सन्निकर्षः इति एतावता उक्तम् । **आसत्तिराश्रयाणां तु** इति **कारिकायां** सामान्यज्ञानं सन्निकर्षः इति उच्यते । तदवतरणिकायां सामान्यस्य सन्निकर्षत्वे दोषद्वयं प्रदर्शनीयम् । तदुपयोगितया सामान्यस्य द्वेधा विभागः क्रियते । तथा च सामान्यस्य द्वेधाविभजनं अवतारणानुकूलयुक्तिरूपतया भूमिका भवति इति भावः ।

तद्घटवताम् इति । संयोगेन तद्घटवतां समवायेन तद्घटवताम् इत्यर्थः । **भूतलादीनाम्** इति "आदि" ना संयोगेन तद्घटाधिकरणस्य द्रव्यान्तरस्य, समवायेन तद्घटाधिकरणकपालानां च परिग्रहः । **"कालादि"** इति "आदि"ना विषयितया धूमत्वादिमतां ज्ञानादीनां परिग्रहः । अव्यवहितपूर्वोक्तयुक्त्यैव उत्तरत्र आपादनीयतया, **किन्तु** इति असङ्गतम्, अतः अस्य एवं च इत्यर्थकताम् आह – **एवम् च इत्यर्थ** इति । **विशेषणत्वविवक्षणेन** इति । विशेष्यतासमानकालीनतद्विशेष्यताव्यावर्तकत्वेन इत्यर्थः । **पूर्वोक्तदोष एव** इति – **किन्तु यत्र तद्घटनाशानन्तरं तद्घटवतः स्मरणं जातम्** इत्यादिना उक्तः दोषः इत्यर्थः ।

न च तत्र इति । यत्र तद्घटनाशानन्तरं तद्घटवतः स्मरणं जातम्, तत्र तद्घटरूपस्य सामान्यस्य अभावात् तस्य प्रत्यासत्तित्वं मास्तु । तत्रापि घटत्वमेव

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्रत्यासत्तिः स्वसमवायिसमवायसंबन्धेन । स्वं – घटत्वम् – समवायी घटः तत्समवायः कपाले । "आदि" शब्देन स्वसमवायिसंयोगः गृह्यते । तथा च तादृशतद्घटवत्कपालादिस्मरणे स्वसमवायिसमवायादिसंबन्धेन प्रकारीभूतस्य घटत्वस्य तद्घटनाशानन्तरमपि सत्त्वात् घटत्वरूपसामान्यलक्षणया तद्घटवतां प्रत्यक्षं संभवति इति – न च वाच्यम् । यदा स्वसमवायिसमवायादिसंबन्धेन घटत्वं कपालादौ न ज्ञातम्, किन्तु तद्घट एव समवायसंयोगादिना कपालादौ ज्ञातः, तदुत्तरमपि तद्घटाश्रय-कपालादीनां ज्ञानस्य – प्रत्यक्षस्य सर्वानुभवसिद्धतया तस्य घटत्वप्रत्यासत्या उपपादनासंभवात् तद्घटस्यैव प्रत्यासत्तित्वं वक्तव्यम् । तत्तु न संभवति । तस्य नष्टत्वात् ।

ननु "तद्घटवान्, तद्व्यक्तिमान् वा कपालः" इति ज्ञानस्य कपालांशे घटत्वप्रकारकत्वस्य प्रत्यक्षासिद्धत्वेऽपि उत्तरकालीनकार्यानुरोधेन तत्र तदनुमेयम् इति अस्वरसात् सामान्यप्रत्यासत्तित्वपक्षे तत्पुरुषीयत्वनिवेशप्रयुक्तगौरवम् आह – **एवम्** इति । **तदाश्रयप्रत्याक्षापत्तिभिया** – सामान्याश्रयविषयकप्रत्यक्षापत्तिभिया ।

ननु सामान्यज्ञानं प्रत्यासत्तिः इति कल्पे इन्द्रियसंबद्धविशेष्यकं सामान्यप्रकारकं ज्ञानं प्रत्यासत्तिः इति मास्तु । सामान्यज्ञानमात्रं प्रत्यासत्तिः अस्तु । इन्द्रियसंबन्धाभावदशायां सामान्यप्रत्यासत्या ज्ञानोत्पत्तेः उपरि प्रकारान्तरेण मूलकारेण वारयिष्यमाणत्वात् इत्यभिप्रायेण आह – **यद्वा सामान्यविषयकम्** इति । एतत्कल्पे अन्यदपि लाघवं प्रदर्शयति – **तथा च अत्र कल्पे** इति । "सामान्यज्ञानं प्रत्यासत्तिः" इति कल्पे इन्द्रियसंबद्धविशेष्यकत्वं प्रकारकत्वं तदिन्द्रियजन्यत्वं च ज्ञानस्य विशेषणानि न उपादेयानि । प्रकारकत्वस्थाने सामान्यविषयकत्वमात्रं ज्ञानस्य विशेषणम् । ज्ञानप्रकारीभूतं सामान्यं प्रत्यासत्तिः इति पूर्वमते तु तदिन्द्रियजन्यत्वादेः निवेशेन इन्द्रियभेदेन पुरुषभेदेन च कार्यकारणभावनानात्वकल्पने गौरवम् ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

एतन्मते च इति । "सामान्यविषयकं ज्ञानं प्रत्यासत्तिः" इति मते च सामान्यविषयकज्ञानत्वस्य निर्विकल्पके स्मरणे च विद्यमानतया सामान्यविषयकं सविकल्पकं निर्विकल्पकं स्मरणं च प्रत्यासत्तिः । स्वप्रकारीभूतघटत्वाश्रयसंबन्धेन घटत्वप्रकारकप्रत्यक्षत्वावच्छिन्नं प्रति स्वविषयघटत्वाश्रयत्वसंबन्धेन घटत्वविषयकज्ञानत्वावच्छिन्नं कारणम् इति कार्यकारणभावः । घटत्वप्रकारकप्रत्यक्षत्वं कार्यतावच्छेदकम् । स्वप्रकारीभूतघटत्वाश्रयत्वं कार्यतावच्छेदकसंबन्धः । घटत्वविषयकज्ञानत्वं कारणतावच्छेदकम् । स्वविषयघटत्वाश्रयत्वं कारणतावच्छेदकसंबन्धः । स्वं – घटत्वप्रकारकप्रत्यक्षम् । तत्प्रकारीभूतं – घटत्वं – तदाश्रयत्वं – घटेषु । तेषु घटत्वविषयकज्ञानं स्वविषयघटत्वाश्रयत्वसंबन्धेन वर्तत इति कार्यकारणयोः सामानाधिकरण्यम् ।

ननु चक्षुस्संयोगादिशून्यकाले घटत्वविषयकस्मरणात् निखिलघटविषयकप्रत्यक्षापत्तिः इत्याशङ्क्य आह – **चक्षुस्संयोगादिशून्यकाले इति** । **वक्ष्यमाण इति** । **"सामान्यविषयकतदिन्द्रियजन्यज्ञानस्य सामग्री अपेक्षिता । सा च सामग्री चक्षुस्संयोगालोकसंयोगादिकम्"** इत्यादिना वक्ष्यमाणेत्यर्थः ।

ननु सामान्यज्ञानस्य प्रत्यासत्तित्वनये पूर्वोक्तरीत्या कार्यकारणभावे लाघवसत्त्वेऽपि सामान्यलक्षणप्रत्यासत्त्या तदिन्द्रियजन्यप्रत्यक्षं प्रति तदिन्द्रियजन्यतद्धर्मप्रकारकलौकिकप्रत्यक्षस्य नानाकारणघटितगुरुभूतसामग्र्याः तत्सहकारित्वं कल्पनीयम् इति इन्द्रियभेदेन सामान्यप्रत्यासत्तिजन्यप्रत्यक्षे गुरुतरसामग्रीकारणताकल्पनस्य आवश्यकतया न एतन्मते लाघववार्तापि । न च – **प्राचीनमते पुरुषभेदेन अनन्तकार्यकारणभावः कल्पनीयः, नवीनमते तदभावात् लाघवम् इति** – वाच्यम् । एतन्मतेऽपि सामग्र्याः तत्पुरुषीयचक्षुस्संयोगादिघटितत्वेन लौकिकसंबन्धेन तत्पुरुषीयचाक्षुषं प्रति तेन संबन्धेन तत्पुरुषीयचक्षुस्संयोगादिघटितसामग्र्याः कारणताकल्पनस्य आवश्यकतया तादृशलाघवस्यापि अभावात् । अन्यथा पुरुषान्तरीयचक्षुःसंयोगादिघटितसामग्रीतः पुरुषान्तरस्य निमीलितनयनस्यापि

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

सामान्यज्ञानवतः सामान्यप्रत्यासत्तिजन्यचाक्षुषापत्तिः इति आशङ्काम् आशयवर्णनेन निराकरोति – **अयम् आशय इति** – इति **तरङ्गिणीकाराः** ।

ज्ञायमानं सामान्यं प्रत्यासत्तिः इति **प्राचीनानां मते** यदा घटचक्षुस्संन्निकर्षालोकसंयोगादिघटिता चाक्षुषप्रत्यक्षसामग्री, तदुत्तरक्षणे ''घटः'' इति चक्षुस्सन्निकृष्टघटविषयकं चाक्षुषं भवति, तत्प्रकारीभूतघटत्वसामान्यलक्षणया तदुत्तरक्षणे ''घटाः'' इत्याकारकं सकलघटविषयकं ज्ञानं जन्यते । तथा च सामान्यलक्षणाजन्यज्ञानं एकक्षणविलम्बेन भवति । एकक्षणविलम्बे च प्रमाणाभावः । ''सामान्यविषयकं ज्ञानं प्रत्यासत्तिः'' इति **नवीनानां मते** चक्षुस्संयोगादिसामग्र्या यस्मिन् क्षणे ''घट'' इति चाक्षुषं उत्पद्यते, **प्राचीनमते** तस्मिन्नेव क्षणे चक्षुस्संयुक्तघटांशे लौकिकम्, अन्यघटांशे आलौकिकं च ''घटाः'' इत्याकारकं प्रत्यक्षम् उत्पद्यत इति स्वीक्रियते । **प्राचीनमतेऽपि** प्रथमम् उत्पद्यमानस्य ''घटः'' इति ज्ञानस्य घटत्वप्रकारकतया सविकल्पकत्वाभ्युपगमात् ततः पूर्वं नियमेन घटत्वनिर्विकल्पकम् अस्ति इति वक्तव्यम् । **नव्यमते** घटत्वनिर्विकल्पकं घटत्वविषयकज्ञानरूपतया सामान्यलक्षणाप्रत्यासत्तिः भवति । तथा च घटत्वनिर्विकल्पकाख्यसामान्यलक्षणया चक्षुस्संयोगरहितघटविषयकं चक्षुस्संयोगरूपलौकिकसन्निकर्षेण चक्षुस्संयुक्तघटविषयकं च लौकिकालौकिकात्मकं निखिलघटप्रत्यक्षं जायते । तेन यत्र यत्र सामान्यलक्षणाजन्यघटत्वप्रकारकचाक्षुषत्वं तत्र घटत्वनिष्ठप्रकारतानिरूपितपुरोवर्तिघटनिष्ठलौकिकविषयताशालिचाक्षुषत्वम् इति व्याप्तिः लभ्यते । व्याप्यधर्मावच्छिन्ने जननीये व्यापकधर्मावच्छिन्नजनकसामग्र्याः अपेक्षिततत्वात् व्याप्यं यत् सामान्यलक्षणाजन्यघटत्वप्रकारकचाक्षुषत्वं तदवच्छिन्ने जननीये व्यापकं यत् घटत्वनिष्ठप्रकारतानिरूपितपुरोवर्तिघटनिष्ठलौकिकविषयताशालिचाक्षुषत्वं तदवच्छिन्नजनकसामग्र्यन्तर्गतचक्षुस्संयोगादेः अपेक्षिततया चक्षुस्संयोगादिकं विना न सामान्यलक्षणाजन्यप्रत्यक्षम् । एवं च यत्किञ्चिद्घटव्यक्तौ चक्षुस्सन्निकर्षः एतेषां मतेऽपि अपेक्षित एव । परन्तु तस्य पृथक् कारणत्वं न कल्प्यते । व्याप्यधर्मावच्छिन्नस्य व्यापकधर्मावच्छिन्नसामग्री

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

कारणं इति क्लृप्तकार्यकारणभावेनैव निर्वाहात् इति भावः ।

अन्यघटांशे अलौकिकम् इति अभ्युपगमात् इति । ''घटः'' इति चाक्षुषोत्पत्तेः पूर्वं घटत्वनिर्विकल्पकात्मकस्य अलौकिकसन्निकर्षस्य सामान्यलक्षणात्मकस्य सद्भावात् इति भावः ।।

कारिकावली

विषयी यस्य तस्यैव व्यापारो ज्ञानलक्षणः ।

मुक्तावली

ननु ज्ञानलक्षणाप्रत्यासत्तिः यदि ज्ञानरूपा, सामान्यलक्षणापि ज्ञानरूपा, तदा तयोः भेदः न स्यात्, अत आह – विषयी इति । सामान्यलक्षणाप्रत्यासत्तिर्हि तदाश्रयस्य ज्ञानं जनयति । ज्ञानलक्षणाप्रत्यासत्तिस्तु यद्विषयकं ज्ञानं तस्यैव प्रत्यासत्तिः ।

अत्र अयमर्थः – प्रत्यक्षे सन्निकर्षं विना भानं न संभवति । तथा च सामान्यलक्षणां विना धूमत्वेन सकलधूमानां वह्नित्वेन सकलवह्नीनां च भानं कथं भवेत्? तदर्थं सामान्यलक्षणा स्वीक्रियते ।

न च – सकलवह्निधूमभानाभावे का क्षतिः इति – वाच्यम् । प्रत्यक्षधूमे वह्निसंबन्धस्य गृहीतत्वात्, अन्यधूमस्य च अनुपस्थितत्वात् ''धूमः वह्निव्याप्यः न वा'' इति संशयानुपपत्तेः । मन्मते तु सामान्यलक्षणया सकलधूमोपस्थितौ कालान्तरीयदेशान्तरीयधूमे वह्निव्याप्यत्वसंदेहः संभवति ।

न च – सामान्यलक्षणास्वीकारे प्रमेयत्वेन सकलप्रमेयज्ञाने जाते सार्वज्ञ्यापत्तिः इति – वाच्यम् । प्रमेयत्वेन सकलप्रमेयज्ञाने जातेऽपि विशिष्य सकलपदार्थानाम् अज्ञातत्वेन सार्वज्ञ्याभावात् ।।

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

दिनकरी

यदि ज्ञानरूपा इति । अत्रत्यः ''यदि''शब्दः ''सामान्यलक्षणापि'' इत्युत्तरं योज्यः । सामान्यलक्षणास्वीकारे बीजम् आह – **अत्र** इति ।

अयमर्थः – अयमभिप्रायः । **भानं** विषयता । **न संभवति** इति । प्रत्यक्षविषयतायाः सन्निकर्षाश्रयत्वव्याप्यत्वात् इति भावः । **बह्निसंबन्धस्य गृहीतत्वात्** इति । तथा च प्रत्यक्षधूमे व्याप्तेः निर्णयात् न तद्विशेष्यकः व्याप्यत्वसंशयः संभवति इति भावः । **अनुपस्थितत्वात्** इति । तथा च धर्मिज्ञानाभावात् न तद्विशेष्यकोऽपि व्याप्यत्वसंशयः संभवति इति भावः ।।

मुक्तावली

एवं ज्ञालक्षणाया अस्वीकारे ''सुरभि चन्दनम्'' इति ज्ञाने सौरभस्य ज्ञानं कथं स्यात्? यद्यपि सामान्यलक्षणयापि सौरभस्य भानं संभवति, तथापि सौरभत्वस्य भानं ज्ञानलक्षणया । एवं यत्र धूमत्वेन धूलीपटलं ज्ञातं, तत्र धूलीपटलस्य अनुव्यवसाये भानं ज्ञानलक्षणया ।।

दिनकरी

ज्ञानलक्षणास्वीकारे बीजम् आह – **एवम्** इत्यादिना । **कथं स्यात्** इति । चन्दनखण्डस्य चाक्षुषे जायमाने उपस्थितसौरभभानं न स्यात्, सौरभांशे चक्षुःसन्निकर्षाभावात् इत्यर्थः । सौरभत्वप्रकारकलौकिकप्रत्यक्षसामग्र्याः सहकारिण्या विरहेण सौरभत्वसामान्यलक्षणयापि सौरभभानं न संभवति इति भावः । ''सुरभि चन्दनम्'' इत्यादौ सौरभादेः भानं सौरभत्वादिसामान्यलक्षणयैव संभवति, सौरभत्वप्रकारकलौकिकप्रत्यक्षसौरभत्वावच्छिन्नप्रकारकप्रत्यक्षान्यतरसामग्री-सहकारेणैव तस्याः फलजनकत्वाङ्गीकारात् । प्रकृते च द्वितीयसामग्र्याः सहकारिण्याः सत्त्वात् इत्यभिप्रायेण आह – **यद्यपि** इति । **सौरभत्वस्य भानम्** इति । स्वरूपतः सौरभत्वस्य भानम् इत्यर्थः । **ज्ञानलक्षणया** – ज्ञानलक्षणयैव । तदानीं

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

सौरभत्वांशे धर्मान्तरस्य अगृहीततया सामान्यलक्षणया तद्भानानिर्वाहात् इति भावः ।

ननु धर्मान्तरस्य सौरभत्वांशेऽग्रहेऽपि सौरभत्वसामान्यलक्षणयैव सौरभत्वादेः भानम् अस्तु, सौरभत्वप्रकारकसौरभविशेष्यकत्वस्यैव तत्कार्यतावच्छेदकत्वात् इति चेत्, न । सौरभत्वादिविषयताप्रयोजिकायाः सामान्यलक्षणायाः स्वविषयसौरभत्वादिमत्त्वरूपसंबन्धस्य सौरभत्वे अभावेन सामान्यलक्षणया तद्भानानिर्वाहात् । **सौरभत्वसामान्यलक्षणायाः** कार्यतावच्छेदके सौरभत्वप्रकारकत्वनिवेशे प्रयोजनाभावाच्च ।

नच – ज्ञानलक्षणायाः कारणत्वान्तरकल्पने गौरवभियैव सामान्यप्रकारकत्वस्य कार्यतावच्छेदके निवेश इति – वाच्यम् । **विशेषणज्ञानहेतुतयैव** निर्वाहे ज्ञानलक्षणायाः कारणत्वान्तरकल्पनाविरहात् इति ।

ननु विशेषणज्ञानजन्यतावच्छेदकं विशिष्टबुद्धित्वम्, ज्ञानलक्षणायास्तु विशिष्टप्रत्यक्षत्वम् इति न क्लृप्तेन निर्वाहः । एवं यत्र ज्ञानलक्षणया स्वविषयमुख्यविशेष्यकं मानसम्, तत्र विशेषणज्ञानकारणतया न निर्वाह इति, अत आह – **एवम्** इति । **ज्ञानलक्षणया** – ज्ञानलक्षणयैव । तत्र धूमत्वज्ञानरूपसामान्यलक्षणायाः स्वविषयधूमत्वाश्रयत्वसंबन्धेन धूलीपटलेऽभावेन सामान्यलक्षणया अनुव्यवसाये धूलीपटलभानासंभवात् इति भावः ।।

राजीवोल्लासः

सौरभत्वप्रकारकलौकिकप्रत्यक्षसामग्र्याः इति । घ्राणेन्द्रियसंयुक्तसमवायरूपसन्निकर्षस्य इत्यर्थः ।

यद्यपि इति ग्रन्थं अवतारयति **सुरभिचन्दनम् इत्यादौ** इति । ''सुरभि चन्दनम्'' इत्याकारकं यत् प्रत्यक्षं तत्र सुरभिगन्धस्य सुरभित्वरूपसामान्यलक्षणाप्रत्यासत्यैव ज्ञानं भवितुम् अर्हति । न च – सामान्यलक्षणाजन्यप्रत्यक्षे सामान्याश्रयभानप्रयोजकलौकिकसन्निकर्षस्य सहकारित्वेन अपेक्षितत्वात् सुरभित्वाश्रयसुरभिभानप्रयोजक घ्राणसंयुक्तसमवायरूपसन्निकर्षविरहात् कथं सुरभित्वसामान्यलक्षणया

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्रत्यक्षम् इति – वाच्यम् । प्रकृते सुरभित्वसामान्यलक्षणाजन्यप्रत्यक्षं प्रति सुरभित्वप्रकारकलौकिकप्रत्यक्षसुरभिप्रकारक-लौकिकप्रत्यक्षान्यतरसामग्र्याः सहकारित्वस्वीकारात् । सुरभिप्रकारकं यत् चन्दनप्रत्यक्षं तत्सामग्र्यन्तर्गतस्य चक्षुस्संयोगस्य सत्त्वेन तत्सहकारेण सुरभित्वसामान्यलक्षणाजन्यसुरभिप्रत्यक्षसंभवात् – इत्याशयेन शङ्का ।

समाधानं तु – "सुरभि चन्दनम्" इति प्रत्यक्षे चन्दनांशे सुरभिगन्धः प्रकारः । सुरभ्यंशे सुरभित्वं प्रकारतया भासते । तत्र सुरभिज्ञानस्य सुरभित्व-सामान्यलक्षणया उपपादनेऽपि सुरभित्वभानं सामान्यलक्षणया न उपपादयितुं शक्यते । सुरभित्वस्य स्वरूपतो भानेन तदंशे धर्मान्तरस्य अभानात् । तथा च सुरभित्वज्ञानरूप सन्निकर्षेणैव – ज्ञानलक्षणाप्रत्यासत्त्यैव – सुरभित्वज्ञानं भवति इति वक्तव्यम् इति ज्ञानलक्षणाप्रत्यासत्तिः अवश्यं स्वीकरणीया इति ।

ननु धर्मान्तरस्य इत्यादि । "सुरभि चन्दनम्" इति प्रत्यक्षे सोरभत्वांशे धर्मान्तरस्य अभानेऽपि सौरभत्वसामान्यलक्षणयैव सौरभत्वस्य भानम् भविष्यति । सौरभत्वसामान्यलक्षणा नाम सौरभत्वविषयकज्ञानम् । तस्य कार्यतावच्छेदकं सौरभत्वप्रकारकसौरभविशेष्यकत्वम् । एवं च सौरभत्वप्रकारकसौरभविशेष्यकज्ञानं प्रति सौरभत्वविषयकज्ञानं स्मरणरूपं कारणम् इति स्वीकारात् सौरभत्वज्ञानात् जायमाने प्रत्यक्षे सौरभत्वस्य सौरभस्य च उभयोः भानं भविष्यतीति सौरभत्वभानार्थं सौरभत्वज्ञानलक्षणाख्यसन्निकर्षस्य पृथक्कारणत्वं मास्तु इति शङ्का ।

समाधानं तु – सामान्यलक्षणाप्रत्यासत्तेः कारणतावच्छेदकसंबन्धः स्वविषयसामान्याश्रयत्वम् इति पूर्वम् उक्तत्वात् सौरभत्वज्ञाने विषयः सौरभत्वम् । तदाश्रयत्वं सौरभे वर्तते, न तु सौरभत्वे इति सौरभत्वे कारणतावच्छेदकसंबन्ध-विरहात् तेन संबन्धेन सामान्यलक्षणाप्रत्यासत्तेः सौरभत्वे विरहेण तत्र प्रत्यक्ष-रूपकार्यासंभवात् । अतः सौरभत्वज्ञानं सामान्यलक्षणातिरिक्तः ज्ञानलक्षणाख्यः

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

सन्निकर्षः । तेन सन्निकर्षेण सौरभत्वस्य "सुरभि चन्दनम्" इति ज्ञाने भानम् इत्येव युक्तम् ।

एवं च सौरभत्वसामान्यलक्षणायाः कार्यतावच्छेदके सौरभत्वप्रकारकत्वं न निवेश्यते, प्रयोजनाभावात् । तन्निविशेऽपि सौरभत्वभानार्थं ज्ञानलक्षणायाः स्वीकरणीयत्वात् ।

ननु ज्ञानलक्षणायाः पृथक्कारणत्वकल्पने गौरवात् सामान्यप्रकारकत्वं कार्यतावच्छेदके निवेशनीयम् । तस्य प्रयोजनं तु सौरभत्वभानमेव इति आशङ्क्य, तथा निवेशेऽपि कारणतावच्छेदकसंबन्धविरहेण सामान्यलक्षणया सौरभत्वभानं न संभवति इति दोषे सत्येव दोषान्तरम् आह – **विशेषणज्ञानहेतुतया एव** इति । ज्ञानलक्षणाप्रत्यासत्तेः ज्ञानलक्षणात्वेन न पृथक्कारणत्वं, किन्तु विशिष्ट-बुद्धौ विशेषणज्ञानं कारणम् इति कार्यकारणभावसत्त्वात् विशेषणज्ञानविधयैव कारणत्वम् इति ।

ननु विशेषणज्ञानजन्यतावच्छेदकम् इति । विशिष्टबुद्धित्वावच्छिन्नं प्रति विशेषणज्ञानं कारणम् । अतः विशेषणज्ञानस्य विशिष्टबुद्धित्वं जन्यतावच्छेदकम्, ज्ञानलक्षणायास्तु विशिष्टप्रत्यक्षत्वम् । अतः विशिष्टबुद्धौ विशेषणज्ञानहेतुतया ज्ञानलक्षणायाः कारणत्वं न निर्वहिति इति कारणत्वान्तरं कल्पनीयमेव । किञ्च यत्र सौरभत्वज्ञानलक्षणया सौरभत्वविशिष्टज्ञानं भवति तत्र विशेषणज्ञानहेतुतया निर्वाहेऽपि, यत्र ज्ञानलक्षणया ज्ञानविषयमुख्यविशेष्यकं मानसप्रत्यक्षं भवति तत्र ज्ञानविषयविशिष्टबुद्धेः अनुदयात् विशिष्टबुद्धौ विशेषणज्ञानं कारणम् इति कार्यकारणभावेन निर्वाहासंभवात् ज्ञानलक्षणाप्रत्यासत्तिः पृथक्कारणम् इति वक्तव्यम् । तथा पृथक्कारणत्वकल्पने गौरवभियैव सामान्यप्रकारकत्वं कार्यतावच्छेदके निवेश्य सौरभत्वसामान्यलक्षणयैव सौरभभाननिर्वाहसंभवात् ज्ञानलक्षणाप्रत्यासत्तिः मास्तु इति आशङ्क्य एवं यत्र धूमत्वेन इत्यादिना मूले ज्ञानलक्षणास्वीकारस्य आवश्यकता

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्रदर्शिता । तथा हि – यत्र धूमत्वेन रूपेण धूलीपटलविषयकं "धूमः" इत्याकारकं भ्रमात्मकं ज्ञानं जातम्, तत्र "धूमज्ञानवानहम्" इत्याकारकः अनुव्यवसायो भवति । तस्मिन् अनुव्यवसाये अहमर्थः विशेष्यः, धूमज्ञानं प्रकारः । धूमज्ञानमपि धूमत्वप्रकारकधूलीपटलविशेष्यकज्ञानमेव । एवं च धूलीपटलस्यापि अनुव्यवसाये भानमस्ति, तस्य भानं धूमत्वज्ञानरूपसामान्यलक्षणया न संभवति । सामान्यलक्षणायाः स्वविषयधूमत्वाश्रयत्वसंबन्धेन धूलिपटले अभावात् । धूलीपटलेन सह मनसः लौकिकसन्निकर्षाभावाच्च । अतः ज्ञानलक्षणाप्रत्यासत्त्यैव धूलीपटलस्य अनुव्यवसाये भानं भवति । तथा च धूमत्वज्ञानं धूमत्वप्रकारकधूलीपटलविशेष्यकज्ञानं प्रति कारणम् इति पृथक्कारणत्वं स्वीकृत्यैव धूलीपटलस्य अनुव्यवसाये भानं वक्तव्यम् इति ज्ञानलक्षणायाः पृथक् प्रत्यासत्तित्वं अङ्गीकरणीयम् ।।

कारिकावली

योगजो द्विविधः प्रोक्तो युक्तयुञ्जानभेदतः ।। ६५ ।।
युक्तस्य सर्वदा भानं चिन्तासहकृतोऽपरः ।

मुक्तावली

योगज इति । योगाभ्यासजनितः धर्मविशेषः श्रुतिस्मृतिपुराणादिप्रतिपाद्य इत्यर्थः । युक्तयुञ्जानरूपयोगिद्वैविध्यात् धर्मस्यापि द्वैविध्यमिति भावः ।।

युक्तस्य इति । युक्तस्य तावत् योगजधर्मसहायेन मनसा आकाशपरमाण्वादि-निखिलपदार्थगोचरं ज्ञानं सर्वदैव भवितुमर्हति । द्वितीयस्य चिन्ताविशेषोऽपि सहकारी इति ।।

इति श्रीविश्वनाथपञ्चाननभट्टाचार्यविरचितायां
सिद्धान्तमुक्तावल्यां प्रत्यक्षखण्डः ।।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

दिनकरी

सर्वदैवेति । ध्यानाद्यभावेऽपीत्यर्थः ।।

इति श्रीभारद्वाजकुलाम्बुधिपूर्णचन्द्रभट्टबालकृष्णात्मजमहादेवभट्टविरचिते मुक्तावलीप्रकाशे प्रत्यक्षखण्डः ।।

राजीवोल्लासः

मूले चिन्तासहकृत इति । चिन्ता नाम विषयविशेषबुभुत्सया स्थिरीकृतेन मनसा तस्यैव ज्ञानधारा । युक्तयुञ्जानयोः क्रमेण वियुक्तयुक्तसंज्ञा भाष्ये दृश्यते । तत्र युक्तस्य चिन्तासहकृतं मानसमेव आकाशादिप्रत्यक्षम् । वियुक्तस्य तु आत्मादिचतुष्टयसंयोगात् चाक्षुषादिकमपि सूक्ष्मव्यवहितादिविषयकं प्रत्यक्षं संभवति इत्यादिकं भाष्यादित एव अवगन्तव्यम् ।

इदं तु चिन्तनीयम् – यदि चाक्षुषादिकमपि युक्तस्य ज्ञानम् अङ्गीक्रियते, तदा चाक्षुषत्वस्पार्शनत्वादीनां जातीनां सङ्करप्रसङ्गः । न च – साङ्कर्यं न जातित्वबाधकम् इति – वाच्यम् । भाष्यविवरणकारैः उदयनाचार्यप्रभृतिभिः तस्य तथात्वस्य स्पष्टम् अभिधानात् । अतः मानसमेव युक्तस्यापि प्रत्यक्षं स्वाभिमतम् इति बोधयितुं उक्तम् – **योगजधर्मसहायेन मनसा इति** इति । परमते चाक्षुषादिकाले रसनादिवारणं चाक्षुषदिसामग्र्याः अनुभवबलात् इतरप्रतिबन्धकत्वं स्वीकृत्य कर्तव्यम् इति बोध्यम् इति सुबोधिनीकाराः ।।

दिनकर्याख्यटीकायाः प्रत्यक्षं भागमाश्रिता ।
राजीवोल्लासनाम्नीयं व्याख्या संपूर्णतामगात् ।।

अनुमानादिभागेऽपि व्याख्येयं पूर्तिमेष्यति ।
क्रमेणेशस्य कृपया गुरूणां चेति मन्महे ।।

इति श्रीरामानुजताताचार्यविरचिते दिनकरीव्याख्याने राजीवोल्लासे प्रत्यक्षखण्डः ।।

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

।। अथ अनुमानखण्डः ।।

।। अनुमितिकारणनिरूपणम् ।।

कारिकावली

व्यापारस्तु परामर्शः, करणं व्याप्तिधीः भवेत् ।। ६६ ।।

अनुमायाम्, ज्ञायमानं लिङ्गं तु करणं न हि ।
अनागतादिलिङ्गेन न स्यात् अनुमितिस्तदा ।। ६७ ।।

मुक्तावली

अनुमितिं व्युत्पादयति – व्यापारस्तु इति । अनुमायाम् – अनुमितौ व्याप्तिज्ञानं करणम्, परामर्शः व्यापारः । तथा हि – येन पुरुषेण महानसादौ धूमे वह्निव्याप्तिः गृहीता, पश्चात् स एव पुरुषः क्वचित् पर्वतादौ अविच्छिन्नमूलां धूमरेखां पश्यति, तदनन्तरं "धूमः वन्हिव्याप्यः" इति एवंरूपं व्याप्तिस्मरणं तस्य भवति, पश्चात् च "वन्हिव्याप्यधूमवान् अयम्" इति ज्ञानं भवति । स एव परामर्शः इति उच्यते । तदनन्तरं "पर्वतः वन्हिमान्" इति अनुमितिः जायते ।

अत्र प्राचीनास्तु – व्याप्यत्वेन ज्ञायमानं लिङ्गम् अनुमितिकरणम् इति वदन्ति । तत् दूषयति– ज्ञायमानम् इति । लिङ्गस्य अनुमित्यकरणत्वे युक्तिम् आह – अनागतादि इति । यदि अनुमितौ लिङ्गं करणं स्यात्, तदा अनागतेन लिङ्गेन विनष्टेन च अनुमितिः न स्यात्, अनुमितिकरणस्य लिङ्गस्य तदानीम् अभावात् ।।

दिनकरी

अनुमितिम् इति । सङ्गतिश्च अत्र प्रत्यक्षेण उपजीव्योपजीवकभावः बोध्यः । करणे निर्दिष्टे एव व्यापारे जिज्ञासोदयात् मूले पश्चात् निर्दिष्टमपि करणं

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्रथमं दर्शयति – **व्याप्तिज्ञानम्** इति । **परामर्शः व्यापारः** इति । ननु व्यापारत्वं तज्जन्यत्वे सति तज्जन्यजनकत्वम्, तच्च परामर्शे न संभवति । ''वन्हिव्याप्यधूमवान् पर्वतः'' इति परामर्शे व्याप्तिज्ञानजन्यत्वस्य अभावात्, **महानसीयवन्हिव्याप्ति-ज्ञानस्य तदानीम् अभावेन व्यभिचारात्** । अतः तत् उपपादयति – **तथा हि** इत्यादिना । **पश्यति** इति धूमदर्शनस्य व्याप्तिस्मरणे उद्बोधकविधया हेतुत्वसंपत्त्यर्थम् । ''यादृशविशेषणविशिष्टस्य धूमस्य **व्याप्तिसंबन्धितया ज्ञानम्**, तादृशधूमदर्शनस्यैव व्याप्तिस्मृतौ उद्बोधकत्वम्'' इति अभिप्रायेण अविच्छिन्नत्वम् उक्तम् । **एवंरूपं व्याप्तिस्मरणम्** इति । **उद्बुद्धसंस्कारस्य** पूर्वं सत्त्वात् इति भावः । **स एव परामर्श** इति । **तथा च** स्मरणात्मकव्याप्तिज्ञानस्य पूर्वं सत्त्वात् न व्यभिचार इति भावः ।

न च – तथापि यत्र व्याप्तिघटकानां पदार्थानां **विभृङ्खलोपस्थितिमूलकः** ''विशेष्ये विशेषणं तत्रापि विशेषणम्'' इति रीत्या परामर्शः, तत्र **विशिष्टव्याप्तिज्ञानस्य** व्यभिचारः दुरुद्धर एव इति – वाच्यम् । **व्याप्त्यंशे** निश्चयत्वानिवेशप्रयुक्तलाघवेन ''विशिष्टस्य वैशिष्ट्यम्'' इति रीत्या परामर्शस्यैव अनुमितिहेतुत्वात् इति अभिप्रायात् । स्मरणात्मकपरामर्शे व्याप्तिज्ञानस्य व्यभिचारः इत्यपि न । संस्कारसंबन्धेन पूर्वं व्याप्तिज्ञानस्य सत्त्वात् ।

अत्र नव्याः – व्याप्तिज्ञानत्वस्य परामर्शव्यापकतया अनुमितिं प्रति कारणत्वमेव नास्ति, कुतः करणत्वम्? अन्यथा कपालादेः घटं प्रति द्रव्यत्वेन हेतुतापत्तिः । तस्मात् अनुमितिं प्रति मनस्त्वेनैव कारणत्वम् इति आहुः ।

लिङ्गम् अनुमितिकरणम् इति । अनुमितौ **परामर्शमात्रं** न हेतुः, **अपि तु** लिङ्गपरामर्शः । तथा च विशिष्टस्य कारणताग्रहे विशेषणस्यापि कारणताग्रहात् परामृश्य-मानलिङ्गस्य लिङ्गपरामर्शस्य वा हेतुता इत्यत्र विनिगमनाविरहात् उभयोः हेतुतासिद्धौ तत्र च व्यापाराभावात् न परामर्शस्य करणता, **किन्तु लिङ्गस्यैव** इति आशयः ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

लिङ्गस्य तदानीम् अभावात् इति । न च – परामर्शरूपव्यापारसंबन्धेन तदानीं लिङ्गम् अस्त्येव इति – वाच्यम् । अतीतादिलिङ्गस्य परामर्शाजनकतया परामर्शस्य तद्व्यापारत्वासंभवात् ।

इदम् उपलक्षणम् – लिङ्गस्य हेतुत्वे चैत्रीयपरामर्शविषयात् लिङ्गात् मैत्रस्य अनुमितिप्रसङ्गः । तत्तत्पुरुषीयत्वनिवेशे गौरवम् । अस्मन्मते सामानाधिकरण्य-प्रत्यासत्त्या हेतुहेतुमद्भावेनैव अतिव्याप्तिप्रसङ्गाभावात् न तत्पुरुषीयत्वनिवेशः इति लाघवम् इत्यपि बोध्यम् ॥

राजीवोल्लासः

॥ अथ अनुमानखण्डप्रारम्भः ॥

योगेन यागनिवहैरपि नाथवंश्याः
त्यागेन चाभिमुखयन्ति यमेव नित्यम् ।
कम्बूपमानगलमम्बुजवक्त्रनेत्रं
जम्बूपुरालयमुपैमि रमानिवासम् ॥

श्रीकृष्णताततनयः रामानुज इति श्रुतः ।
शास्त्रेषु नैकग्रन्थानां व्याख्याता विदुषां वशः ॥

दिनकर्यनुमानाख्यखण्डस्य तनुते मुदा ।
व्याख्यानं सरलं हृद्यं राजीवोल्लासनामकम् ॥

प्रसन्नः श्रीपतिर्भूयात् प्रसन्ना गुरवो मम ।
चिकीर्षिता हि व्याख्येयं पूर्णा स्यात् तत्कृपाबलात् ॥

सङ्गतिश्च अत्र इति । अत्र प्रत्यक्षनिरूपणानन्तरम् अनुमाननिरूपणे सङ्गतिश्च उपजीव्योपजीवकभावः । प्रत्यक्षम् उपजीव्यम् । अनुमानम् उपजीवकम् ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

इन्द्रियेण महानसादौ व्याप्तिप्रत्यक्षादेव अनुमानं भवति । अनुमानं नाम अनुमितिकरणं व्याप्तिस्मरणात्मकं ज्ञानमेव । व्याप्तिस्मरणरूपानुमानं प्रति व्याप्तिप्रत्यक्षस्य अनुभवविधया कारणत्वात् प्रत्यक्षकार्यत्वम् अनुमानस्य । तथा च कार्यकारणभावरूपसङ्गत्या प्रत्यक्षानन्तरम् अनुमाननिरूपणम् इति भावः । अनेन प्रमाणयोः कार्यकारणभावः उक्तः । अनुमित्यात्मकप्रमितेः परामर्शात्मकमानस-प्रत्यक्षकार्यत्वात् प्रमित्योः कार्यकारणभावः ।

ननु मूले व्यापारं प्रथमं निर्दिश्य पश्चादेव करणं निर्दिष्टम् । **मुक्तावल्यां** तु करणं प्रथमं निर्दिश्य पश्चाद् व्यापारः निर्दिष्टः । तत्र किं कारणम् इति शङ्कायाम् आह – **करणे निर्दिष्टे एव** इति । व्यापारवत् कारणरूपे करणे निर्दिष्टे सत्येव व्यापारः कः इति जिज्ञासायां व्यापारः निर्देष्टुं शक्यते । अतः प्रथमतः करणस्य निर्देश एव उचितः । मूलस्य श्लोकरूपत्वात् तत्र क्रमस्य विवक्षाविरहात् मूले व्यापारस्य आदौ निर्देशेऽपि व्याख्यायां उचितक्रमेण निर्देशः कृतः इत्याशयः ।

महानसीयवन्हिव्याप्तिज्ञानस्य इति । महानसे उत्पन्नस्य वन्हिनिरूपित-व्याप्तिविषयकप्रत्यक्षात्मकज्ञानस्य इत्यर्थः । **तदानीम् अभावेन** इति । परामर्शपूर्वक्षणे अभावेन इत्यर्थः । **व्यभिचारात्** इति । व्याप्तिज्ञानं विनापि परामर्शोत्पत्या व्यतिरेकव्यभिचारात् इत्यर्थः । **तत् उपपादयति** इति । परामर्शस्य व्याप्तिज्ञानजन्यत्वम् उपपादयति इत्यर्थः । **व्याप्तिसंबन्धितया ज्ञानम्** इति । साहचर्यरूपव्याप्त्याख्यसंबन्धवत्तया ज्ञानम् इत्यर्थः । **उद्बुद्धसंस्कारस्य** इति । धूमदर्शनेन उद्बुद्धस्य व्याप्तिविषयकसंस्कारस्य इत्यर्थः । **तथा च** इति । पर्वते धूमदर्शनानन्तरं यः परामर्शः भवति, तत्पूर्वक्षणे महानसे उत्पन्नस्य व्याप्तिप्रत्य-क्षात्मकज्ञानस्य अभावेऽपि धूमदर्शनोद्बुद्धसंस्कारजन्यव्याप्तिस्मरणात्मकज्ञानस्य सत्त्वात् व्याप्तिज्ञानं विना परामर्शोत्पत्तिरूपः व्यतिरेकव्यभिचारः नास्ति इति भावः ।

विशृङ्खलोपस्थितिमूलक इति । परस्परविशेष्यविशेषणभावं विना पृथक्

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

पृथक् उपस्थितिमूलक इत्यर्थः । **विशिष्टव्याप्तिज्ञानस्य** – ''वन्हिव्याप्यः धूमः'' इत्याकारकव्याप्तिज्ञानस्य इत्यर्थः । **व्याप्त्यंशे इति** । वन्हिव्याप्तिविशिष्टधूम-वैशिष्ट्यावगाहिपरामर्शस्य कारणत्वं वक्तव्यम्, न तु विशेष्ये विशेषणम् इति रीत्या जायमानस्य परामर्शस्य । ''व्याप्तितदभाववद्धूमवान् पर्वतः'' इति व्याप्त्यंशे संशयाकारात् परामर्शात् अनुमित्यापत्या तद्वारणाय धूमांशे इव व्याप्त्यंशेऽपि निश्चयत्वं निवेशनीयम् इति गौरवात् । विशिष्टवैशिष्ट्यावगाहिज्ञानस्य कारणत्वे तु तत्र विशेषणतावच्छेदकप्रकारकनिश्चयस्य हेतुतया विशेषणतावच्छेदकीभूतव्याप्ति-प्रकारकनिश्चयेन प्रतिबन्धादेव व्याप्त्यंशे संशयासंभवेन तदंशे निश्चयत्वनिवेशस्य अनावश्यकत्वात् ।

ननु यत्र मानसप्रत्यक्षरूपः परामर्शः न जायते, अपि तु धूमदर्शनानन्तरं स्मरणात्मकः परामर्शः जायते, तत्र परामर्शात् पूर्वं व्याप्तिज्ञानविरहात् व्यतिरेकव्यभिचारः इति न च वाच्यम् । महानसे उत्पन्नस्य व्याप्तिज्ञानस्य स्वजन्यसंस्कारसंबन्धेन परामर्शात् पूर्वं विद्यमानतया व्यतिरेकव्यभिचाराभावात् ।

अत्र नव्याः इति । अनुमितिं प्रति व्याप्तिज्ञानत्वावच्छिन्नं न कारणम् । अपि तु परामर्शत्वावच्छिन्नमेव कारणम् । व्याप्तिविषयकपरामर्शस्य व्याप्तिज्ञानत्वेन न कारणत्वम्, अपि तु परामर्शत्वेनैव कारणत्वम् इति यावत् । नियतपूर्ववर्तिताव-च्छेदकस्य व्याप्यस्य धर्मस्य सत्त्वे तेनैव रूपेण कारणत्वम्, न तु व्यापकरूपेण कारणत्वम्, अन्यथासिद्धत्वात् । यथा घटं प्रति कपालादेः घटनियतपूर्ववर्तितावच्छेद-ककपालत्वादिरूपेण व्याप्यधर्मेणैव कारणत्वम्, न तु व्यापकेन द्रव्यत्वेन । प्रकृते च यत्र यत्र परामर्शत्वम्, तत्र व्याप्तिज्ञानत्वम् इति व्याप्तिज्ञानत्वं परामर्शत्व-व्यापकम् । परामर्शत्वं व्याप्यम् । अतः व्याप्यपरामर्शत्वावच्छिन्नमेव अनुमितिं प्रति कारणम्, न तु व्यापकव्याप्तिज्ञानत्वावच्छिन्नम् इति व्याप्तिज्ञानत्वावच्छिन्नस्य कारणत्वाभावात् कारणत्वघटितं करणत्वं नास्ति इति व्याप्तिज्ञानं विना

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

परामर्शोत्पत्तावपि न व्यतिरेकव्यभिचारः । कारणतावच्छेदकावच्छिन्नं विना कार्योत्पत्तौ एव व्यतिरेकव्यभिचारात् । तस्मात् अनुमितिं प्रति मनस्त्वावच्छिन्नमेव करणम् इति नव्यानाम् आशयः ।।

परामर्शमात्रम् इति । लिङ्गरूपविशेषणाविशेषितपरामर्शः न हेतुः, अपि तु विषयितासंबन्धेन लिङ्गविशिष्टः परामर्शः हेतुः । "मात्र" शब्देन विषयितासंबन्धेन लिङ्गवैशिष्ट्यव्यवच्छेदः । तदेव स्पष्टीकृतम् "अपि तु" इत्यनेन । लिङ्गं नाम व्याप्तिविशिष्टपक्षताधर्मताविशिष्टहेतुः । विषयितासंबन्धेन तद्विशिष्टं ज्ञानम् अनुमितिहेतुः इति फलितम् । एवं च विषयितासंबन्धेन लिङ्गविशिष्टस्य परामर्शस्य कारणत्वे गृह्यमाणे विशेषणस्य लिङ्गस्यापि कारणत्वग्रहात् परामर्शविषयस्य लिङ्गस्य लिङ्गविषयकपरामर्शस्य वा एकस्यैव कारणत्वम् इत्यत्र विनिगमनाविरहात् उभयोरपि कारणत्वे सिद्धे लिङ्गस्यैव करणत्वं युक्तम्, परामर्शरूपव्यापारसत्त्वात्, न तु परामर्शस्य, तस्य व्यापाराभावात्, इति लिङ्गस्य अनुमितिकरणतावादिनां **प्राचीनानाम्** आशयः । **किन्तु लिङ्गस्यैव** इति । परामर्शं प्रति लिङ्गस्य विषयविधया हेतुत्वात् परामर्शस्य लिङ्गजन्यत्वात् लिङ्गजन्यत्वघटितं व्यापारत्वं परामर्शस्य संभवति इति भावः ।

लिङ्गस्य तदानीम् अभावात् इति इति । व्याप्तिपक्षधर्मताविशिष्टः हेतुः स्वविषयकपरामर्शद्वारा अनुमितिकरणम् इति **प्राचीनमतं** न युज्यते । कार्याव्यवहितपूर्ववर्तिन एव कारणत्वात् करणत्वाच्च । यत्र अनागतेन लिङ्गेन विनष्टेन च लिङ्गेन च अनुमितिः भवति, तत्र अनुमितेः पूर्वं लिङ्गस्य अभावात् इति भावः ।

तत्र शङ्कते – **न च परामर्शरूप** इति । अनुमितेः पूर्वम् अतीतानागतलिङ्गयोः अभावेऽपि तद्विषयकपरामर्शरूपस्य व्यापारस्य सत्त्वेन स्वजन्यव्यापारसंबन्धेन लिङ्गसत्त्वम् अक्षतम् इति आशङ्का । समाधानं तु – परामर्शस्य

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अतीतादिलिङ्गव्यापारत्वं न संभवति, शाब्दादिपरामर्शस्य अतीतादिलिङ्गाजन्यतया लिङ्गजन्यत्वघटितव्यापारत्वासंभवात् इति ।

व्यापाराभावादिव विनिगमनाविरहासंभवादपि न लिङ्गस्य कारणत्वसंभवः इति दर्शयति – **इदम् उपलक्षणम्** इति । **अनुमितिप्रसङ्ग** इति । पक्षनिष्ठस्य लिङ्गस्य समवायेन अनुमितिं प्रति हेतुत्वासंभवेन उद्देश्यतासंबन्धेन अनुमितिं प्रति हेतुतावच्छेदकसंबन्धेन लिङ्गं कारणम् इति विषयनिष्ठप्रत्यासत्त्या कार्यकारणभावः वक्तव्यः । उद्देश्यतासंबन्धेन अनुमितिः पर्वते जायते । तत्र संयोगसंबन्धेन धूमः अस्ति इति कार्यकारणयोः सामानाधिकरण्यम् । एवं च चैत्रीयपरामर्शीयविषयात् लिङ्गात् मैत्रस्य अनुमितिप्रसङ्गः । तद्वारणाय उद्देश्यतासंबन्धेन तत्पुरुषीयानुमितिं प्रति तत्पुरुषीयपरामर्शविषयभूतं लिङ्गं हेतुतावच्छेदकसंबन्धेन कारणम् इति पुरुषभेदेन अनन्तकार्यकारणभावः कल्पनीयः इति गौरवम् । परामर्शस्य अनुमितिहेतुत्वे तु समवायसंबन्धेन अनुमितिं प्रति समवायसंबन्धेन परामर्शः कारणम् इति आत्मनिष्ठप्रत्यासत्त्या कार्यकारणभावस्वीकारात् एकपुरुषीयपरामर्शस्य समवायसंबन्धेन अन्यस्मिन् पुरुषे अभावात् एकपुरुषीयपरामर्शात् अन्यपुरुषस्य अनुमित्यापत्तिः न भवति इति कार्यकारणयोः तत्पुरुषीयानिवेशात् लाघवम् इति भावः ॥

॥ परामर्शनिरूपणम् ॥

कारिकावली

व्याप्यस्य पक्षवृत्तित्वधीः परामर्श उच्यते ॥

मुक्तावली

व्याप्यस्य इति । व्याप्तिविशिष्टस्य पक्षेण सह वैशिष्ट्यावगाहिज्ञानम् अनुमितौ जनकम् । तच्च ''पक्षे व्याप्यः'' इति ज्ञानम्, ''पक्षः व्याप्यवान्'' इति ज्ञानं

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

वा । **अनुमितिस्तु** ''पक्षे व्याप्यः'' इति ज्ञानात् ''पक्षे साध्यम्'' इत्याकारिका । ''पक्षः व्याप्यवान्'' इति ज्ञानात् ''पक्षः साध्यवान्'' इत्याकारिका । **द्विविधात् अपि परामर्शात्** ''पक्षः साध्यवान्'' इत्येव अनुमितिः इति **अन्ये** ॥

दिनकरी

तच्च – व्याप्यस्य पक्षेण सह वैशिष्ट्यावगाहिज्ञानं च । ननु परस्परं व्यभिचारः इति, अत आह – **अनुमितिस्तु** इति । कार्यतावच्छेदकस्य **परस्परानुमितिव्यावृत्तत्वात्** न व्यभिचारः इति भावः । पक्षविशेष्यकत्वमेव **सर्वत्र अनुमितौ** नियतम् इति नवीनमतम् आह – **द्विविधात् अपि** इति । पक्षविशेष्यक – व्याप्यविशेष्यकोभय-परामर्शात् अपि इत्यर्थः । **कारणतावच्छेदकं** च परामर्शद्वयसाधारणं व्याप्यपक्षोभयवैशिष्ट्यावगाहिनिश्चयत्वम्, अतः न व्यभिचारः इति भावः ।

द्विविधयोरपि परामर्शयोः स्वस्वाव्यवहितोत्तरानुमितिं प्रति **ताद्रूप्येण** हेतुत्वम् इत्यपि **केचित्** ।

वस्तुतस्तु अनुभवानुरोधात् पक्षविशेष्यकपरामर्शस्यैव हेतुत्वम्; अत एव ''वन्हिव्याप्यधूमवान् च अयम्'' इत्याकारकः पक्षविशेष्यकः एव उपनयः सर्वसंमतः इति ध्येयम् ॥

राजीवोल्लासः

परस्परानुमितिव्यावृत्तत्वात् इति । कार्यतावच्छेदकशरीरे अव्यवहितोत्तरत्वं निवेश्य पक्षविशेष्यकपरामर्शाव्यवहितोत्तरानुमितिं प्रति पक्षविशेष्यकपरामर्शस्य हेतुत्वम्, व्याप्यविशेष्यकपरामर्शाव्यवहितोत्तरानुमितिं प्रति व्याप्यविशेष्यकपरामर्शस्य हेतुत्वम् इति स्वीकारात् पक्षविशेष्यकपरामर्शोत्तरानुमितौ व्याप्यविशेष्यकपरामर्शस्य, व्याप्यविशेष्यकपरामर्शोत्तरानुमितौ पक्षविशेष्यकपरामर्शस्य च न व्यतिरेकव्यभिचारः इति भावः ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

सर्वत्र अनुमितौ इति । प्रसिद्धसाध्यकसकलानुमितौ इत्यर्थः । अप्रसिद्धसाध्यकस्थले ''पृथिवीतरत्वव्यापकाभावप्रतियोगिगन्धवती पृथिवी'' इत्याकारकव्यतिरेकपरामर्शात् ''पृथिव्याम् इतरभेदः'' इत्याकारकसाध्यविशेष्यकानुमितेः एव नवीनमतेऽपि अङ्गीकारात् । विशिष्टबुद्धौ विशेषणज्ञानस्य कारणतया अप्रसिद्धसाध्यकस्थले साध्यरूपविशेषणज्ञानविरहात् ''साध्यवान् पक्षः'' इत्याकारकपक्षविशेष्यकानुमितिः न भवितुम् अर्हति ।

ननु पक्षविशेष्यकव्याप्यविशेष्यकोभयपरामर्शादपि ''पक्षः साध्यवान्'' इत्याकारकएकविधानुमितेः स्वीकारे एकविधपरामर्शजन्यानुमितौ परामर्शान्तरं विनापि जायमानायां व्यतिरेकव्यभिचारः दुर्वारः इति आशङ्क्य आह – **कारणतावच्छेदकं च** इति । तथा च ''पक्षः साध्यवान्'' इत्याकारकानुमितिं प्रति व्याप्यपक्षोभयवैशिष्ट्यावगाहिनिश्चयत्वेन कारणत्वम् । तादृशनिश्चयत्वं च ''पक्षः साध्यव्याप्यः'', ''साध्यव्याप्यवान् पक्षः'' इत्याकारकपरामर्शद्वयसाधारणम् । तथा च व्याप्यपक्षोभयवैशिष्ट्यावगाहिनिश्चयं विना अनुमितेः अनुत्पत्या न व्यतिरेकव्यभिचारः इति भावः । **ताद्रूप्येण** इति । पक्षविशेष्यकत्वेन व्याप्यविशेष्यकत्वेन च इत्यर्थः । **अनुभवानुरोधात्** इति । पक्षविशेष्यकादेव परामर्शात् अनुमितिः, न व्याप्यविशेष्यकात् अनुमितिः इति अनुभवानुरोधात् इत्यर्थः । अत्र **प्राचीनानां** संमतिम् आह – **अत एव** इति ।

मुक्तावली

ननु ''वन्हिव्याप्यधूमवान् पर्वतः'' इति ज्ञानं विनापि यत्र पर्वते ''धूमवान्'' इति प्रत्यक्षम्, ततः ''वन्हिव्याप्यः धूमः'' इति स्मरणम्, तत्र ज्ञानद्वयादेव अनुमितेः दर्शनात् व्याप्तिविशिष्टवैशिष्ट्यावगाहिज्ञानं सर्वत्र न कारणम् । किन्तु व्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानत्वेन कारणत्वम्, आवश्यकत्वात्, तत्र विशिष्टवैशिष्ट्यज्ञानकल्पने गौरवाच्च इति चेत् –

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

न । व्याप्यतावच्छेदकाज्ञानेऽपि ''वन्हिव्याप्यवान्'' इति ज्ञानात् अनुमित्युत्पत्तेः, लाघवात् च व्याप्तिप्रकारकपक्षधर्मताज्ञानत्वेनैव कारणत्वम् ।

किञ्च, ''धूमवान् पर्वतः'' इति ज्ञानात् अनुमित्यापत्तिः, व्याप्यताव-च्छेदकीभूतधूमत्वप्रकारकस्य पक्षधर्मताज्ञानस्य सत्त्वात् ।

न च – गृह्यमाणव्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानस्य हेतुत्वम् इति – वाच्यम् । चैत्रस्य व्याप्तिग्रहे मैत्रस्य पक्षधर्मताज्ञानात् अनुमित्यापत्तेः ।

यदि तत्पुरुषीयगृह्यमाणव्याप्यतावच्छेदकप्रकारकं तत्पुरुषीयपक्षधर्मताज्ञानं तत्पुरुषीयानुमितौ हेतुः इति उच्यते, तदा अनन्तकार्यकारणभावः । मन्मते तु समवायसंबन्धेन व्याप्तिप्रकारकपक्षधर्मताज्ञानं समवायसंबन्धेन अनुमितिं जनयति इति न अनन्तकार्यकारणभावः ।

यदि तु व्याप्तिप्रकारकं ज्ञानं पक्षधर्मताज्ञानं च स्वतन्त्रं कारणम् इति उच्यते, तदा कार्यकारणभावद्वयम्; ''वन्हिव्याप्यः धूमः, आलोकवान् पर्वतः'' इति ज्ञानादपि अनुमितिः स्यात् ।

इत्थं च यत्र ज्ञानद्वयं, तत्रापि विशिष्टज्ञानं कल्पनीयम्, फलमुखगौरवस्य अदोषत्वात् इति ॥

दिनकरी

मीमांसकः शङ्कते – ननु इति । ''ज्ञानं विनापि'' इत्यस्य ''अनुमितेः दर्शनात्'' इत्यनेन अन्वयः । ज्ञानद्वयादेव – ज्ञानद्वयादपि । विशिष्टवैशिष्ट्याव-गाहिज्ञानम् इति । भावप्रधानः निर्देशः । सर्वत्र न कारणम् इति । अनुमिति-त्वावच्छिन्नं प्रति न कारणतावच्छेदकम् इत्यर्थः । आवश्यकत्वात् इति । व्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानत्वस्य उभयमतसिद्धनियतपूर्ववृत्तिताव-च्छेदकत्वात् इत्यर्थः ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

ननु ज्ञानद्वयस्थलेऽपि विशिष्टज्ञानं कल्पनीयम्, अतः न व्यभिचारः इति, अत आह – **विशिष्टवैशिष्ट्यज्ञान** इति । **व्याप्यतावच्छेदक** इति । "अयम् आलोकः धूमः वा" इति सन्देहदशायां व्याप्यतावच्छेदकप्रकारकनिर्णयाभावेऽपि इत्यर्थः । **वन्हिव्याप्यवान्** इति । **वन्ह्यभाववदवृत्तिमान्** इत्यर्थः । न तु "धूमसमानाधिकरण" इत्यादिरूपव्याप्ति विशिष्टवान् इत्यर्थः । अत्र हेतुतावच्छेदकभाननैयत्यात् । **अनुमित्युत्पत्तेः** इति । **तथा** च व्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानस्य तत्र व्यभिचारात् न **तेन रुपेण** हेतुत्वम् इति भावः । **ननु** तत्र फलबलात् व्याप्यतावच्छेदकप्रकारकं ज्ञानं कल्पनीयम्, अतः न व्यभिचारः इति, अत आह – **लाघवात् च** इति । व्याप्यतावच्छेदकप्रकारकत्वापेक्षया व्याप्तिप्रकारकत्वस्य लघुत्वात् इत्यर्थः ।

ननु अस्तु तव अवच्छेदकलाघवम्, तथापि **पूर्वोक्तकल्पनालाघवम्** एव मीमांसकानां **मूलयुक्तिः** भविष्यति इति, अत आह – **किञ्च** इति । **न च गृह्यमाण** इति । **अत्र शानचा** ग्रहस्य वर्तमानतया अभिधानात् न कालान्तरीयतादृशग्रहमादाय दोषः । **"व्याप्तिप्रकारकं ज्ञानम्"** इति **"स्वतन्त्रं कारणम्"** इत्यनेन अन्वयि । **इत्युच्यते** इति । इत्थं च न तत्पुरुषीयत्वं निवेश्यते, चैत्रस्य व्याप्तिग्रहकाले तच्छून्यस्य मैत्रस्य अनुमित्यापत्तेः अभावात्, मैत्रात्मनि स्वतन्त्रहेतुभूतव्याप्तिज्ञानाभावात् इति न गौरवम् इति भावः ।

ननु व्याप्तिप्रकारकपक्षधर्मताज्ञानत्वेन पक्षधर्मताविषयकव्याप्तिप्रकारकज्ञानत्वेन वा हेतुता इत्यत्र विनिगमनाविरहेण हेतुताद्वयं तवापि इति, अत आह – **वन्हिव्याप्य** इति । **अनुमितिः स्यात्** इति । न्यायनये तु **व्याप्तिप्रकारतानिरूपित**-हेतुप्रकारतानिरूपित-पक्षविशेष्यताशालिज्ञानत्वेन हेतुत्वस्य विवक्षितत्वात्, न तादृशज्ञानात्, न वा "धूमः वन्हिव्याप्यः धूमवान् पर्वतः" इति ज्ञानात् अनुमित्यापत्तिः; तत्र **व्याप्तिप्रकारतानिरूपित**- धूमविशेष्यतायाः पर्वतविशेष्यता-निरूपितप्रकारतानात्मकत्वात् इति भावः ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

ननु ज्ञानद्वयस्थले विशिष्टज्ञानकल्पनागौरवं न्यायमते दूषणं भविष्यति इति, अत आह – **इत्थं च** इति । **फलमुखगौरवस्य अदोषत्वात्** इति । फलं – कार्यकारणभावग्रहः, तन्मुखं – तदधीनं **गौरवं** – **गौरवज्ञानम्** इत्यर्थः । **विशिष्टज्ञानत्वावच्छेदेन** कारणत्वग्रहे विशिष्टज्ञानत्वधर्मिकगौरवनिश्चयः विरोधी वाच्यः । तच्च गौरवं प्रमाणान्तरासिद्ध-तत्तदनुमित्यव्यवहितपूर्ववर्ति-स्वाश्रयकत्वमेव, तादृशगौरवनिश्चयः विशिष्टज्ञानत्वेन कारणत्वनिश्चयाधीन-स्वघटकीभूत-तत्तदनुमित्यव्यवहितपूर्ववर्ति-स्वाश्रयनिर्णयं विना न संभवति इति कार्यकारण-भावनिर्णयात् पूर्वं गौरवनिर्णयाभावात् न तादृशगौरवं दोष इति भावः ॥

राजीवोल्लासः

ननु "वन्हिव्याप्यधूमवान् पर्वतः" इति शाब्दपरामर्शस्थले "धूमः वन्हिव्याप्यः", "पर्वतो धूमवान्" इति ज्ञानद्वयं विनापि अनुमितेः मीमांसकैः स्वीकारात् ज्ञानद्वयात् एव अनुमितिः इति "एव"कारासंगतिः इति, अतः "एव"-कारस्य अप्यर्थकताम् आह – **ज्ञानद्वयात् अपि** इति । **भावप्रधानः निर्देश** इति । तथा च "**विशिष्टवैशिष्ट्यावगाहिज्ञानम्**" इत्यस्य विशिष्टवैशिष्ट्याव-गाहिज्ञानत्वम् इत्यर्थः; "**न कारणम्**" इत्यस्य न कारणतावच्छेदकम् इत्यर्थः । एवं व्याख्याने बीजं तु – मुक्तावल्यां "**किन्तु व्याप्यतावच्छेदकप्रकारक-पक्षधर्मताज्ञानत्वेन कारणत्वम्, आवश्यकत्वात्**" इति अग्रे "व्याप्यतावच्छेदक-प्रकारकपक्षधर्मताज्ञानत्वं कारणतावच्छेदकम्" इति वक्ष्यमाणतया तदनुसारेण ततः पूर्वतनग्रन्थस्य व्याप्तिविशिष्टवैशिष्ट्यावगाहिज्ञानत्वे कारणतावच्छेदक-त्वनिरासपरत्वम् आवश्यकम् इति ।

व्याप्यतावच्छेदक इति । व्याप्यतावच्छेदकधूमत्वप्रकारकपक्षधर्मताज्ञानत्वं "वन्हिव्याप्यः धूमः" इति स्मरणसहित"पर्वतः धूमवान्" इति प्रत्यक्षे वर्तते । एवं "वह्निव्याप्यधूमवान् पर्वतः" इति विशिष्टपरामर्शेऽपि वर्तते । तथा च

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

व्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानत्वस्य अनुमितिनियतपूर्ववृत्तितावच्छेदकत्वम् उभयमतसिद्धम् इति तेनैव रूपेण अनुमितिकारणत्वम् इति भावः ।

ननु व्याप्यतावच्छेदकधर्मस्य अनिश्चये ''वन्हिव्याप्यवान्'' इति शाब्दपरामर्शोऽपि न संभवति । ''वन्हिव्याप्यवान्'' इत्यस्य वन्हिनिरूपितव्याप्तिमद्विशिष्टः इत्यर्थः । वन्हिनिरूपितव्याप्तिश्च धूमव्यापकवन्हिसमानाधिकरणवृत्तिधूमत्वादिरेव । तथा च ''धूमव्यापकवन्हिसमानाधिकरणवृत्तिधूमत्ववद्वान्'' इत्याकारक एव शाब्दपरामर्शोऽपि । स च धूमत्वानिर्णये न संभवत्येव इति आशङ्क्य आह – **वन्ह्यभाववदवृत्तिमान् इत्यर्थ** इति । सिद्धान्तव्याप्तिविषयकस्य ''वन्हिव्याप्यवान्'' इति शब्दजन्यस्य ज्ञानस्य धूमत्वप्रकारकनिर्णयभावासंभवेऽपि, पूर्वपक्षव्याप्तिघटितस्य ''वन्ह्यभाववदवृत्तिमान्''इत्याकारकशाब्दपरामर्शस्य धूमत्वाविषयकस्य संभवात् तस्य धूमत्वनिर्णयं विनापि संभवात् इत्यर्थः । तथा च व्याप्यतावच्छेदकप्रकारकज्ञानं विनापि पूर्वपक्षव्याप्तिघटितशाब्दपरामर्शात् ''वन्हिव्याप्यवान् पर्वतः'' इत्याकारात् अनुमितेः उत्पत्त्या व्यतिरेकव्यभिचारात् व्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानत्वावच्छिन्नस्य न अनुमितिकारणत्वम् इत्याह – **तथा च** इति । **तेन रूपेण** इति । व्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानत्वेन इत्यर्थः ।

ननु तत्र इति । शाब्दपरामर्शात् अनुमित्युत्पत्तिस्थलेऽपि कारणतावच्छेदकावच्छिन्नं विना कार्योत्पत्तेः अयोगात् अनुमितिरूपकार्यानुसारेण व्याप्यतावच्छेदकप्रकारकज्ञानत्वावच्छिन्नं कल्पनीयम्, तादृशज्ञानोत्पत्तिपूर्वकमेव तत्र अनुमितिः भवति इति न व्यतिरेकव्यभिचारः इति आशङ्क्य **लाघवाच्च** इति उक्तम् इति भावः । विशिष्टवैशिष्ट्यावगाहिपरामर्शस्य हेतुत्वमते व्याप्तिप्रकारकपक्षधर्मताज्ञानत्वेन हेतुत्वम् अङ्गीक्रियते । ज्ञानद्वयस्य अनुमितिहेतुत्वमते व्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानत्वेन हेतुत्वं अङ्गीक्रियते । तत्र च

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

व्याप्यतावच्छेदकप्रकारकत्वापेक्षया व्याप्तिप्रकारकत्वस्य लघुत्वात् तद्घटितधर्मस्यैव कारणतावच्छेदकत्वं युक्तम् । मतद्वयेऽपि व्यतिरेकव्यभिचारस्य तत्परिहारमार्गस्य च समानत्वात् इति भावः ।

पूर्वोक्तकल्पनालाघवम् इति । ज्ञानद्वयात् अनुमितिस्थले विशिष्टज्ञाना-कल्पनप्रयुक्तलाघवम् इत्यर्थः । **मूलयुक्तिः** इति । साधकयुक्तिः इत्यर्थः । व्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानस्य अनुमितिहेतुतासाधकयुक्तिः इत्यर्थः ।

''गृह्यमाणव्याप्यतावच्छेदक'' इति मूलग्रन्थस्य वर्तमानकालिकग्रहविषयभूता या व्याप्यता तदवच्छेदकप्रकारकस्य पक्षधर्मताज्ञानस्य अनुमितिहेतुत्वम् इत्यर्थः । तेन ''धूमः वह्निव्याप्यः'' इत्याकारकव्याप्तिज्ञानाभावकाले ''धूमवान् पर्वतः'' इति ज्ञानमात्रात् न अनुमित्यापत्तिः । तत्र ज्ञाने वर्तमानकालिकत्वस्य लाभप्रकारं तन्निवेशस्य प्रयोजनं च दर्शयति – **अत्र शानचा** इति । ''लटः शतृशानचौ'' इति सूत्रेण वर्तमानार्थकस्य लटः स्थाने शानचः विधानात् शानच्-प्रत्ययेन वर्तमानकालिकत्वं धात्वर्थे ज्ञाने बोध्यते । अतः कालान्तरीयव्याप्तिग्रहम् आदाय ''धूमवान् पर्वतः'' इति ज्ञानात् न अनुमित्यापत्तिरूपः दोषः ।

तादृशज्ञानात् इति । ''वन्हिव्याप्यः धूमः'', ''आलोकवान् पर्वतः'' इति ज्ञानद्वयात् इत्यर्थः । **व्याप्तिप्रकारतानिरूपित** इत्यादि । इदं च अन्तराभासमानपदार्थनिष्ठप्रकारताविशेष्यतयोः अभेदवादिमताभिप्रायेण । तयोः भेदः इति मते तु व्याप्तिनिष्ठप्रकारता निरूपितविशेष्यत्वावच्छिन्नधूमनिष्ठप्रकारता-निरूपितपक्षनिष्ठविशेष्यताशालिज्ञानत्वेन हेतुत्वं वक्तव्यम् । एकनिष्ठयोः प्रकारताविशेष्यतयोः अवच्छेद्यावच्छेदकभावस्य स्वीकारात् ।

प्रकारताविशेष्यतयोः भेदवादिमतम् एव युक्तम् । तयोः अभेदस्वीकारे ''रक्तदण्डवान् पुरुषः'' इति बुद्धेः रक्तरूपविशेष्यकदण्डाभावनिश्चयप्रतिबध्यत्वापत्तेः । तथा हि – दण्डनिष्ठप्रकारतानिरूपितरक्तरूपनिष्ठविशेष्यताशालिबुद्धिं प्रति

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

रक्तरूपविशेष्यकदण्डाभावप्रकारकनिश्चयः प्रतिबन्धकः । प्रतिबध्यतावच्छेदकं दण्डनिष्ठप्रकारतानिरूपित- रक्तरूपनिष्ठ-विशेष्यताशालिबुद्धित्वं ''रक्तदण्डवान्'' इति बुद्धौ अपि अस्ति । अस्यां बुद्धौ पुरुषे दण्डः प्रकारः, दण्डे रक्तरूपं प्रकारः, रक्तरूपे रक्तत्वं प्रकारः । रक्तरूपनिष्ठा रक्तत्वनिष्ठप्रकारतानिरूपिता विशेष्यता, एवं दण्डनिष्ठविशेष्यतानिरूपिता रक्तरूपनिष्ठा प्रकारता भवति । तथा पुरुषनिष्ठविशेष्यतानिरूपिता दण्डनिष्ठा प्रकारता भवति । प्रकारताविशेष्यतयोः ऐक्याङ्गीकारे पुरुषनिष्ठविशेष्यतानिरूपितदण्डनिष्ठप्रकारतायाः रक्तरूपनिष्ठप्रकारता-निरूपितदण्डनिष्ठविशेष्यतायाश्च एकत्वात्; एवं रक्तरूपनिष्ठायाः दण्डनिष्ठविशेष्यता-निरूपितप्रकारतायाः रक्तत्वनिष्ठप्रकारतानिरूपितविशेष्यतायाश्च एकत्वात् दण्डनिष्ठविशेष्यतात्मकप्रकारतानिरूपितरक्तरूपनिष्ठप्रकारात्मकविशेष्यताशालित्वात् ''रक्तदण्डवान्'' इति बुद्धेः प्रतिबध्यतावच्छेदकरूपाक्रान्ततया ''रक्तरूपं दण्डाभाववत्'' इत्याकारकनिश्चयप्रतिबध्यत्वापत्तिः । विशेष्यताप्रकारतयोः भेदस्वीकारे तु ''रक्तदण्डवान् पुरुषः'' इति बुद्धेः दण्डनिष्ठविशेष्यतानिरूपितरक्तरूपनिष्ठप्रकारता-शालित्वेऽपि दण्डनिष्ठप्रकारतानिरूपितरक्तरूपनिष्ठविशेष्यताशालित्वरूपप्रतिबध्यता-वच्छेदकानाक्रान्ततया न प्रतिबध्यत्वम् इति ।

वक्ष्यमाणगौरवस्य कारणतानिश्चयानधीनत्वात् आह – **गौरवम्-गौरवज्ञानम्** इति । तथा च कारणतानिश्चयाधीनं गौरवज्ञानं न दोषः इत्युक्तं भवति । तदुपपादयति – **विशिष्टज्ञानत्वावच्छेदेन** इति । व्याप्तिविशिष्टवैशिष्ट्यावगाहिज्ञानत्वावच्छेदेन अनुमितिकारणत्वग्रहं प्रति ''विशिष्टवैशिष्ट्यावगाहिज्ञानत्वं गुरु'' इत्याकारकनिश्चयः प्रतिबन्धकः इति वक्तव्यम् । विशिष्टज्ञानत्वनिष्ठं गुरुत्वं च प्रमाणान्तरासिद्ध-तत्तदनुमित्यव्यवहितपूर्ववर्तिस्वाश्रयकत्वम् । प्रमाणान्तरेण – कार्यलिङ्गकानुमाना-तिरिक्तप्रमाणेन असिद्धः – अज्ञातः यः तत्तदनुमित्यव्यवहितपूर्ववर्त्ती स्वाश्रयः – गुरुत्वाश्रयः तत्कत्वम् - तद्वृत्तित्वम् । तादृशगौरवनिश्चयः विशिष्टज्ञानत्वावच्छिन्नम् अनुमितिकारणम् इति निश्चयजन्यः । पूर्वोक्तगौरवघटकीभूतः यः

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

तत्तदनुमित्यव्यवहितपूर्ववर्तिस्वाश्रयः तन्निर्णयं विना तद्घटितगौरवनिश्चयस्य असंभवात्। अनुमित्यव्यवहितपूर्ववर्तित्वमेव अनुमितिकारणत्वम् । तथा च कारणताघटित-गौरवनिश्चयः कारणत्वनिश्चयाधीनः इति कारणतानिश्चयात् पूर्वं गौरवनिश्चयस्य प्रतिबन्धकस्य अभावात् । एतादृशगौरवं कारणतानिश्चयप्रतिबन्धकज्ञानविषयः न भवति इति न दोषः इति आशयः ।

एवं च यत्र कारणतानिश्चयात् पूर्वं गौरवज्ञानं तत्रैव गौरवं दोषः । यत्र कारणतानिश्चयात् अनन्तरं गौरवज्ञानं भवति तत्र गौरवं न दोषः इत्युक्तं भवति । एवं च अनुमितिसामान्यं प्रति व्याप्तिविशिष्टवैशिष्ट्यावगाहिज्ञानं कारणम् इत्येवं-रूपेण परामर्शात्मकविशिष्टज्ञानस्य अनुमित्यव्यवहितपूर्ववर्तित्वरूपकारणत्वनिश्चये सत्येव कार्यलिङ्गेन तत्तदनुमित्यव्यवहितपूर्ववृत्तिताकगौरवाश्रयविशिष्टज्ञानरूप-परामर्शनिश्चयः, तदनन्तरं ''विशिष्टज्ञानं तत्तदनुमित्यव्यवहितपूर्ववर्तिताकस्वाश्रयवृत्ति'' इत्याकारकगौरवप्रकारकनिश्चयः । तदनन्तरं कारणताग्रहप्रतिबन्धः इत्येवंक्रमेण प्रतिबध्यप्रतिबन्धकभावः भवेत् । प्रकृते तु न तथा वक्तुं शक्यते । कारणतानिश्चयात् पूर्वं गौरवज्ञानाभावात् कारणतानिश्चयोत्तरम् उत्पन्नस्य गौरवज्ञानस्य पूर्वोत्पन्न-कारणतानिश्चयप्रतिबन्धकत्वायोगात् इति भावः ॥

॥ पूर्वपक्षव्याप्तिनिरूपणम् ॥

कारिकावली

व्याप्तिः साध्यवदन्यस्मिन्नसंबन्ध उदाहृतः ॥ ६८ ॥

मुक्तावली

व्याप्यो नाम व्याप्त्याश्रयः । तत्र व्याप्तिः का? इति अत आह – व्याप्तिः इति । ''वह्निमान् धूमात्'' इत्यादौ साध्यं वह्निः, साध्यवान् महानसादिः, तदन्यः

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

जलह्रदादिः तदवृत्तित्वं धूमस्य इति लक्षणसमन्वयः । ''धूमवान् वह्नेः'' इत्यादौ साध्यवदन्यस्मिन् तप्तायःपिण्डादौ वह्नेः सत्त्वात् न अतिव्याप्तिः ।

अत्र येन संबन्धेन साध्यं तेन संबन्धेन साध्यवान् बोध्यः । अन्यथा समवायसंबन्धेन वह्निमान् वह्नेरवयवः तदन्यः महानसादिः तत्र धूमस्य विद्यमानत्वात् अव्याप्तिप्रसङ्गात् ।

साध्यवदन्यश्च साध्यवत्त्वावच्छिन्नप्रतियोगिताकभेदवान् बोध्यः । तेन यत्किञ्चिद्वह्निमतः महानसादेः भिन्ने पर्वतादौ धूमसत्त्वेऽपि न क्षतिः ।

येन संबन्धेन हेतुता तेनैव संबन्धेन साध्यवदन्यावृत्तित्वं बोध्यम् । तेन साध्यवदन्यस्मिन् धूमावयवे धूमस्य समवायसंबन्धेन सत्त्वेऽपि न क्षतिः ।

साध्यवदन्यावृत्तित्वं च साध्यवदन्यवृत्तित्वत्वावच्छिन्नप्रतियोगिताकाभावः । तेन ''धूमवान् वह्नेः'' इत्यत्र साध्यवदन्यजलह्रदादिवृत्तित्वाभावेऽपि न अतिव्याप्तिः ।

अत्र यद्यपि ''द्रव्यं गुणकर्मान्यत्वविशिष्टसत्त्वात्'' इत्यादौ विशिष्टसत्तायाः शुद्धसत्तायाश्च ऐक्यात् साध्यवदन्यस्मिन् गुणादौ अवृत्तित्वं नास्ति, तथापि हेतुतावच्छेदकरूपेण अवृत्तित्वं वाच्यम् । हेतुतावच्छेदकं वृत्तितानवच्छेदकम् इति **फलितोऽर्थः** ।।

दिनकरी

मूले परामर्शलक्षणानन्तरं व्याप्तिनिरूपणे सङ्गतिम् उपोद्घातं निरूपयति – **व्याप्यो नाम** इति । **तत्र** इति । घटकत्वं सप्तम्यर्थः ।

अव्याप्तिप्रसङ्गात् इति । अव्याप्त्यभिधानमिदं येन केनचित्संबन्धेन साध्यवत्त्व-विवक्षणाभिप्रायेण । यदि च संबन्धसामान्येन साध्यवत्त्वं विवक्ष्यते, तदा ''धूमवान् वह्नेः'' इत्यादौ अतिव्याप्तिः बोध्या । **अवृत्तित्वं नास्ति** इति । विशिष्टाधेयताया अनतिरिक्तत्वात् इति भावः । **फलितोऽर्थ** इति । तथा च तन्निष्ठाधिकरणतानिरूपकता-

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

वच्छेदकस्यैव तन्निरूपिताधेयतावच्छेदकत्वनियमेन विशिष्टसत्तात्वस्य गुणाधेयता-नवच्छेदकत्वात् न अव्याप्तिरिति भावः ॥

राजीवोल्लासः

उपोद्घातम् इति । व्याप्यपक्षोभयवैशिष्ट्यावगाहिज्ञानस्य व्याप्तिज्ञानसाध्यत्वेन उपोद्घातसङ्गत्या परामर्शनिरूपणानन्तरं व्याप्तिनिरूपणम् इति भावः । "चिन्तां प्रकृतसिद्ध्यर्थां उपोद्घातं प्रचक्षते" इत्युक्तत्वात् प्रकृतसिद्धिप्रयोजकविचारविषयत्वं उपोद्घातपदार्थः । परामर्शनिर्णयः प्रकृतः । तत्प्रयोजकः विचारः व्याप्तिविचारः । तद्विषयत्वम् व्याप्तौ वर्तते । अनेन व्याप्तिज्ञाने सत्येव व्याप्तिविशिष्टवैशिष्ट्याव-गाहिपरामर्शविषयकनिर्णयो भवितुम् अर्हति इति भावः ।

साध्यवदन्यावृत्तित्वलक्षणे साध्यतावच्छेदकसंबन्धेन साध्यवत्त्वाविवक्षणे "वन्हिमान् धूमात्" इत्यादौ समवायसंबन्धम् आदाय मूलोक्ता अव्याप्तिः न सङ्गच्छते । संयोगसंबन्धेन साध्यवति पर्वतादौ साध्यवत्त्वावच्छिन्नभेदस्य असंभवात् इत्यतः अव्याप्तिप्रतिपादकग्रन्थस्य तात्पर्यम् आह – **येन केनचित्** इति । यत्किंचित्संबन्धेन इति तदर्थः । तथा च यत्किंचित्संबन्धेन साध्यवत्त्वावच्छिन्न-प्रतियोगिताकभेदविवक्षायां समवायसंबन्धेन वन्हिमत्त्वावच्छिन्नभेदस्य पर्वतादौ सत्त्वात् तदवृत्तित्वं धूमे नास्ति इति अव्याप्तिः । साध्यतावच्छेदकसंबन्धेन इत्युक्तौ तु संयोगसंबन्धेन वह्निमत्त्वावच्छिन्नभेदस्यैव ग्राह्यतया तस्य पर्वतादौ असत्त्वात् ह्रदादिरेव तादृशभेदवान्, तदवृत्तित्वं धूमेऽस्तीति न अव्याप्तिः ।

ननु संबन्धसामान्येन साध्यवत्त्वविवक्षायां न अव्याप्तिः । पर्वतादौ संयोगंबन्धेन वन्हिमत्त्वसत्त्वेन संबन्धसामान्येन वन्हिमत्त्वावच्छिन्नप्रतियोगिताकभेदस्य नित्यपदार्थेष्वेव सत्त्वेन तदवृत्तित्वस्य धूमे सत्त्वात् इति, अत आह – **यदि च** इति । **अतिव्याप्तिः** इति । "धूमवान् वन्हेः" इत्यादौ संयोगेन धूमशून्यस्य अयोगोलकादेरपि संबन्धसामान्यान्तर्गतकालिकसंबन्धेन धूमवत्त्वात्

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

धूमासमानकालीनपदार्थस्यैव संबन्धसामान्येन धूमवदन्यत्वात् तदवृत्तित्वस्य वन्हौ सत्त्वात् अतिव्याप्तिः । **मूले साध्यवदन्यश्च** इत्यादि । साध्यवदन्यपदेन साध्यवत्त्वावच्छिन्नप्रतियोगिताकभेदवान् विवक्षितः, न तु साध्यवन्निष्ठप्रतियोगिताकभेदवान् । तथा सति "पर्वतः वन्हिमान् धूमात्" इत्यादौ साध्यवान् – वन्हिमान् महानसादिः तन्निष्ठप्रतियोगिताकभेदवान् पर्वतः तद्वृत्तित्वमेव धूमेऽस्तीति अव्याप्तिः । उक्तविवक्षायां तु वन्हिमत्त्वावच्छिन्नप्रतियोगिताकभेदः "वन्हिमान् न" इति प्रतीतिसिद्ध भेदः । तद्वान् ह्रदादिरेव । तदवृत्तित्वं धूमेऽस्ति इति न अव्याप्तिः ।

न च – साध्यवत्त्वावच्छिन्नप्रतियोगिताकभेदविवक्षायामपि साध्यपदेन महानसवन्हिं गृहीत्वा महानसीयवन्हिमत्त्वावच्छिन्नप्रतियोगिताकभेदं गृहीत्वा तद्वत्पर्वतवृत्तित्वस्यैव धूमे सत्त्वात् अव्याप्तिः इति – वाच्यम् । साध्यतावच्छेदकावच्छिन्नसाध्यनिष्ठावच्छेदकताक-प्रतियोगिताकभेदवान् इत्यर्थस्य साध्यवदन्यपदेन विवक्षितत्वात् । साध्यतावच्छेदकं – वन्हित्वं – तदवच्छिन्ना या वन्हिनिष्ठा अवच्छेदकता – तन्निरूपकप्रतियोगिताकभेदः "वन्हिमान् न" इति प्रतीतिसिद्धः भेदः, तद्वान् पर्वतः न भवति, किन्तु ह्रदादिरेव इति न अव्याप्तिः ।

न च – एवमपि "महानसीयवन्हिमान् न" इति प्रतीतिसिद्धभेदोऽपि वन्हित्वावच्छिन्नवन्हिनिष्ठावच्छेदकताकप्रतियोगिताकः भवति । महानसीयत्व-सहितवन्हित्वावच्छिन्नमहानसीयवन्हिनिष्ठावच्छेदकताकप्रतियोगिताकस्य महानसीयवन्हिमद्भेदस्य "अधिकं तु प्रविष्टं चेत् न तत् हानिकरम्" इति न्यायेन वन्हित्वावच्छिन्नवन्हिनिष्ठावच्छेदकताकप्रतियोगिताकत्वानपायात् । तथा च महानसीयवन्हिमद्भेदमादाय तद्वत्पर्वतवृत्तित्वस्यैव धूमे सत्त्वात् अव्याप्तिर्दुर्वारा इति – वाच्यम् ।

साध्यतावच्छेदकेतरधर्मानवच्छिन्न-साध्यतावच्छेदकावच्छिन्न-साध्यनिष्ठावच्छेदकताक-प्रतियोगिताकभेदस्य विवक्षितत्वात् । महानसीयवन्हिमद्भेदस्य

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

वन्हित्वेतरमहानसीयत्वावच्छिन्नावच्छेदकताकप्रतियोगिताकत्वात् न तम् आदाय दोषः ।

एवं साध्यवदन्यावृत्तित्वम् इत्यत्र साध्यवदन्यनिरूपितवृत्तित्वे हेतुतावच्छेदकसंबन्धावच्छिन्नत्वं निवेशनीयम् । अन्यथा ''वन्हिमान् धूमात्'' इत्यादौ वन्हिमदन्यस्मिन् धूमावयवे धूमस्य समवायसंबन्धेन वृत्तित्वात् अव्याप्तिः स्यात् । एवं साध्यवदन्यावृत्तित्वं नाम न साध्यवदन्यवृत्तित्वप्रयोगिताकाभावमात्रम् । अपि तु साध्यवदन्यवृत्तित्वत्वावच्छिन्नप्रतियोगिताकाभावः । अन्यथा ''धूमवान् वन्हेः'' इत्यत्र ''धूमवदन्यवृत्तित्वप्रतियोगिकाभावः'' इत्यनेन धूमवदन्यजलह्रदादिवृत्तित्वाभावस्य ग्रहणसंभवात् तस्य च वन्हौ सत्त्वात् अतिव्याप्तिः । उक्तविवक्षायां तु वन्हौ ''धूमवदन्यवृत्तित्वं नास्ति'' इति प्रतीतिसिद्धः धूमवदन्यवृत्तित्वत्वावच्छिन्नप्रतियोगिताकाभावः नास्ति, धूमवदन्यायोगोलकवृत्तित्वस्यैव सत्त्वात् । अतः न अतिव्याप्तिः ।

मूले अत्र यद्यपि इति । पूर्वोक्तनिष्कृष्टलक्षणेऽपि ''इदं द्रव्यम्, गुणकर्मान्यत्वविशिष्टसत्त्वात्'' इत्यादौ सद्धेतौ अव्याप्तिः । अत्र साध्यं द्रव्यत्वम् । साध्यवत्त्वावच्छिन्नप्रतियोगिताकभेदः ''द्रव्यत्ववान् न'' इति भेदः । तद्वान् गुणादिः । तदवृत्तित्वं हेतौ विशिष्टसत्तायां नास्ति । विशिष्टं शुद्धात् नातिरिच्यते इति सिद्धान्तात् । शुद्धसत्तायां गुणवृत्तित्वसत्त्वेन तदभिन्नविशिष्टसत्तायामपि गुणवृत्तित्वात् तदवृत्तित्वविरहात् इत्याशङ्का ।

तत्समाधानं तु – तथापि इत्यादिना उक्तम् । तस्य अयम् अर्थः – साध्यवदन्यनिरूपित-हेतुतावच्छेदकावच्छिन्नवृत्तित्वाभावः विवक्षितः । उक्तस्थले विशिष्टसत्तारूपहेतुनिष्ठस्य साध्यवदन्यगुणनिरूपितवृत्तित्वस्य सत्तात्त्वावच्छिन्नत्वात् विशिष्टसत्तात्वावच्छिन्नवृत्तित्वस्य अभावः हेतौ अस्ति इति न अव्याप्तिः । अनेन हेतुतावच्छेदकं साध्यवदन्यनिरूपितवृत्तितानवच्छेदकम् इति फलति । साध्यवदन्यनिरूपितवृत्तितानवच्छेदकहेतुतावच्छेदकवत्त्वम् व्याप्तिः इति पर्यवस्यति ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

ननु विशिष्टस्य शुद्धात् अनतिरिक्तत्वेऽपि विशिष्टनिष्ठाधेयतायाः शुद्धनिष्ठाधेयतापेक्षया अतिरिक्तत्वेन शुद्धसत्तानिष्ठाधेयतायाः साध्यवदन्यगुणादिनिरूपितत्वेऽपि विशिष्टसत्तापर्याप्ताधेयतायाः गुणादिनिरूपितत्वं नास्ति इति गुणादिनिरूपिताधेयत्वाभावस्य विशिष्टसत्तायां सत्त्वात् न अव्याप्तिः इति आशङ्क्य आह **दिनकर्यां – विशिष्टाधेयतायाः अनतिरिक्तत्वात्** इति । विशिष्टशुद्धयोः ऐक्यवादिभिः विशिष्टनिष्ठाधेयतायाः शुद्धनिष्ठाधेयतायाश्च ऐक्यम् अङ्गीक्रियते । तथा च शुद्धसत्तानिष्ठाधेयतायाः गुणादिनिरूपितत्वे विशिष्टसत्तानिष्ठाधेयताया अपि गुणादिनिरूपितत्वम् आवश्यकम् इति गुणादिनिरूपितवृत्तित्वाभावस्य विशिष्टसत्तायां अभावात् अव्याप्तिः इति भावः ।

वृत्तितानवच्छेदकहेतुतावच्छेदकविवक्षानन्तरं अव्याप्तिवारणप्रकारं दर्शयति **– तथा च तन्निष्ठाधिकरणेत्यादिना** । तन्निष्ठाधिकरणतानिरूपकतावच्छेदकस्यैव तन्निरूपितवृत्तितावच्छेदकत्वम् इति नियमः । यथा भूतलनिष्ठाधिकरणतानिरूपकः आधेयः घटः । निरूपकतावच्छेदकं घटत्वम् । तत् भूतलनिरूपितवृत्तितावच्छेदकं भवति । गुणकर्मान्यत्वविशिष्टसत्तात्वं गुणनिष्ठाधिकरणतानिरूपकतावच्छेदकं न भवति । गुणः गुणकर्मान्यत्वविशिष्टसत्तावान् इति प्रतीत्यभावात् । तथा च गुणनिष्ठाधिकरणतानिरूपकतानवच्छेदकस्य गुणनिरूपिताधेयतावच्छेदकत्वं नास्ति इति गुणनिरूपिताधेयतानवच्छेदकमेव हेतुतावच्छेदकम् विशिष्टसत्तात्वमिति न अव्याप्तिः इति भावः ।

एवं च साध्यतावच्छेदकसंबन्धावच्छिन्न-साध्यतावच्छेदक-इतरधर्मानवच्छिन्न – साध्यतावच्छेदकावच्छिन्न – साध्यनिष्ठ – अवच्छेदकताक – प्रतियोगिताक-भेदवन्निरूपित-हेतुतावच्छेदकसंबन्धावच्छिन्न – वृत्तितानवच्छेदकहेतुतावच्छेदकवत्त्वं व्याप्तिः इति फलितम् ।।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

।। सिद्धान्तव्याप्तिनिरूपणम् ।।

कारिकावली

अथ वा हेतुमन्निष्ठविरहाप्रतियोगिना ।
साध्येन हेतोरैकाधिकरण्यं व्याप्तिरुच्यते ।। ६९ ।।

मुक्तावली

ननु केवलान्वयिनि ज्ञेयत्वादौ साध्ये साध्यवदन्यस्य अप्रसिद्धत्वात् अव्याप्तिः । किंच "सत्तावान् जातेः" इत्यादौ साध्यवदन्यस्मिन् सामान्यादौ हेतुतावच्छेदकसंबन्धेन समवायेन वृत्तेः अप्रसिद्धत्वात् अव्याप्तिः इति, अत आह – **अथ वा** इति । हेतुमति निष्ठा – वृत्तिः यस्य स तथा, विरहः - अभावः । तथा च हेत्वधिकरणवृत्तिः यः अभावः तदप्रतियोगिना साध्येन सह हेतोः सामानाधिकरण्यं व्याप्तिः ।

अत्र यद्यपि "वह्निमान् धूमात्" इत्यादौ हेत्वधिकरणपर्वतादिवृत्त्यभाव-प्रतियोगित्वं तत्तद्वह्न्यादेः अस्ति इति अव्याप्तिः । न च – समानाधिकरणवह्नि-धूमयोरेव व्याप्तिः – इति वाच्यम् । तत्तद्वह्न्यादेरपि उभयाभावसत्त्वात् एकसत्त्वेऽपि द्वयं नास्ति इति प्रतीतेः, "गुणवान् द्रव्यत्वात्" इत्यादौ अव्याप्तिश्च । तथापि प्रतियोगिता-नवच्छेदकं यत् साध्यतावच्छेदकं तदवच्छिन्नसामानाधिकरण्यं व्याप्तिः इति वाच्यम् ।

ननु "रूपत्वव्याप्यजातिमद्वान्, पृथिवीत्वात्" इत्यादौ साध्यतावच्छेदिका रूपत्वव्याप्यजातयः तासां च शुक्लत्वादिजातीनां नीलघटादिवृत्त्यभावप्रतियोगिता-वच्छेदकत्वम् अस्ति इति अव्याप्तिः इति चेत्, न –

तत्र **परम्परया** रूपत्वव्याप्यजातित्वस्यैव साध्यतावच्छेदकत्वात् । नहि तादृशधर्मावच्छिन्नाभावः क्वापि पृथिव्याम् अस्ति, "रूपत्वव्याप्यजातिमान् नास्ति" इति बुद्ध्यापत्तेः ।

साध्यादिभेदेन व्याप्तेर्भेदात् तादृशस्थले साध्यतावच्छेदकतावच्छेदकं प्रतियोगिता-वच्छेदकतानवच्छेदकमित्येव लक्षणघटकम् इत्यपि वदन्ति ।।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

दिनकरी

अथ वा इत्यादिलक्षणम् अवतारयितुम् अत्र लक्षणे दोषम् आह – **ननु** इति । **ननु केवलान्वयित्वज्ञानकाले** पक्षताघटकसंशयाभावात् न अनुमितिः । तच्छून्यकाले तु **भ्रमात्मकव्याप्तिज्ञानात्** अनुमितिः भवत्येव इति, अत आह – **किंच** इति । "**इत्यादौ**" इति "आदि"ना **संयोगेन हेतुतायां** "गुणवान् घटात्" इत्यादेः संग्रहः ।

ननु स्वाधिकरणावृत्तिसाध्यवदन्योन्याभावकत्वं लक्षणार्थः, तथाच नेयम् अव्याप्तिः इति चेत्, न । "**वह्निमान् धूमात्**" इत्यादौ धूमाधिकरणे वह्निमदन्योन्याभावस्य कालिकसंबन्धेन वृत्तेः अव्याप्त्यापत्तेः साध्यवत्ताग्रहविरोधितानियामकसंबन्धेन अवृत्तित्वस्य अवश्यं विवक्षणीयतया "सत्ताभाववान् जात्यभावात्" इत्यादौ अव्याप्तेः, जात्यभावाधिकरणे साध्यवत्ताग्रहविरोधितानियामकसंबन्धेन समवायेन वृत्तेः अप्रसिद्धेः ।

न च – "**सत्तावान्** जातेः" इत्यादौ "स्वाधिकरण" इत्यादिव्याप्तिज्ञानं कारणम्, "सत्ताभाववान् जात्यभावात्" इत्यादौ तु "साध्यवदन्य" इत्यादिव्याप्तिज्ञानं कारणम् इति – वाच्यम् । **तथापि** संयोगसंबन्धावच्छिन्नघटाभावे साध्ये विषयितया हेतौ घटे लक्षणद्वयस्यापि अव्याप्तिः । तत्र विषयितया हेत्वधिकरणज्ञाने साध्यवत्ताग्रहविरोधितानियामकसंयोगेन, तथा भूतले संयोगेन घटाधिकरणे हेतुतावच्छेदकविषयितया च **वृत्तेः अप्रसिद्धेः** ।

ननु अतिरिक्तोभयाभावे मानाभाव इति, अत आह – **एकसत्त्वेऽपि** इति । **इदमुपलक्षणम्** । विशिष्टाभावम् आदाय अव्याप्तिः इत्यपि बोध्यम् ।

ननु वैशिष्ट्यव्यासज्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताकत्वेन अभावविशेषणात् न अव्याप्तिः, अत आह – **गुणवान्** इति । **अत्र हेतोः** एकव्यक्तितया समानाधिकरणयोः

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

एव व्याप्तिः इति उक्तावपि न निस्तार इति भावः । ''एतद्रूपवान् एतद्रसात्'' इत्यादौ लक्षणसत्त्वात् असंभवाभावात् आह – **अव्याप्तिश्च इति** । **इति वाच्यम्** इति । **गुणत्वस्य** द्रव्यत्वसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वात् न अतिव्याप्तिः इति भावः ।

परम्परया – स्वाश्रयसमवायेन । तथा च उक्तपरम्परया यदवच्छेदकं तदन्यत्वस्य जातित्वे सत्त्वात् न अव्याप्तिः इति भावः । **तादृशधर्मावच्छिन्नाभावः** – उक्तपरम्परया रूपत्वव्याप्यजातित्वावच्छिन्नस्य समवायेन अभावः । ''**नास्ति**'' इत्यत्र ''पृथिव्याम्'' इति अनुषज्यते ।

मतान्तरम् आह – **साध्यादि** इति । ''आदि''ना साधनादिपरिग्रहः । **व्याप्तेः** भेदात् इति । व्याप्तिज्ञानस्य कारणताभेदात् इत्यर्थः । पूर्वोक्तरीत्या निर्वाहे तत्र साध्यतावच्छेदकतावच्छेदकधर्मिकप्रतियोगितावच्छेदकतानवच्छेदकत्वप्रकारक-ज्ञानस्य हेतुत्वं न उचितम्, कारणतावच्छेदकगौरवात् । नच – पूर्वोक्तरीत्या ''**जातिमान्**'' इत्येव अनुमितिः स्यात्, न तु ''**जातिमद्वान्**'' इत्याकारिका इति – वाच्यम् । **पृथिवीत्वादिहेतुके** ''जातिमान्'' इत्येव अनुमित्याकारः । ''जातिमद्वान्'' इत्याकारस्तु **तद्व्यक्तित्वहेतुके** इत्यदोषात् । ''**इत्यपि वदन्ति**'' इत्यनेन अस्वरसः सूचितः ।

राजीवोल्लासः

ननु केवलान्वयित्वज्ञानकाले इति । भेदप्रतियोगितानवच्छेदकत्वं केवलान्वयित्वम् । वाच्यत्ववद्भेदस्य अप्रसिद्ध्या वाच्यत्वं भेदप्रतियोगितानवच्छेदकम् । अतः केवलान्वयि । ''वाच्यत्वं भेदप्रतियोगितानवच्छेदकम्'' इत्याकारकज्ञानकाले ''इदं वाच्यत्ववत् न वा'' इत्याकारकसंशयरूपपक्षता न संभवति । अत एव अनुमितिः न जायते । केवलान्वयित्व ज्ञानशून्यकाले तु भ्रमात्मकव्याप्तिज्ञानात् अनुमितिः भवत्येव इत्याशङ्क्य दोषान्तरम् आह – **भ्रमात्मकव्याप्तिज्ञानात्**

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

इति । भ्रमं विनैव अनुमितिजनकत्वं हि सद्धेतूनां स्वभावः । तत् केवलान्वयिहेतौ न संभवति इति तस्य अलक्ष्यत्वमेव युक्तम् इति भावः ।

संयोगेन हेतुतायाम् इति । ''अयं गुणवान्, संयोगेन घटात्'' । संयोगेन घटवति भूतले गुणवत्त्वसत्त्वात् अयं सद्धेतुः । अत्र साध्यः गुणः, साध्यवद्भिन्नः गुणवद्भिन्नः गुणादिः । तत्र हेतुतावच्छेदकसंयोगसंबन्धेन वृत्तित्वम् अप्रसिद्धम् । गुणादौ संयोगसंबन्धेन कस्यापि पदार्थस्य अभावात् । तथा च साध्यवदन्यनिरूपित-हेतुतावच्छेदकसंबन्धावच्छिन्नवृत्तित्वाप्रसिद्ध्या अव्याप्तिः ।

उक्तस्थलयोः अव्याप्तिवारणार्थं लक्षणं परिष्कृत्य शङ्कते – ननु स्वाधिकरण इत्यादिना । साध्यवदन्यावृत्तित्वं इति लक्षणस्य स्वाधिकरणावृत्तिसाध्यवदन्योन्याभाव-कत्वमिति परिष्कृतोऽर्थः । स्वपदेन हेतुः ग्राह्यः । स्वाधिकरणावृत्तिः यः साध्यवद्भेदः तत्कत्वम् – तत्समानकालीनत्वादिकम् – व्याप्तिः । यदधिकरणावृत्तिः साध्यवद्भेदः तत्त्वं व्याप्तिः । ''वन्हिमान् धूमात्'' इत्यादौ यदधिकरणं धूमाधिकरणं पर्वतादिकम् । तदवृत्तिः वन्हिमद्भेदः तत्त्वं धूमे अस्ति इति समन्वयः । ''धूमवान् वन्हेः'' इत्यादौ यदधिकरणं वन्ह्यधिकरणं अयोगोलकम् । तद्वृत्तिरेव धूमवद्भेदः इति न अतिव्याप्तिः ।

''सत्तावान् जातेः'' इत्यादौ यदधिकरणं – जात्यधिकरणं द्रव्यादित्रिकम् । तदवृत्तिः साध्यवद्भेदः सत्तावद्भेदः तत्त्वस्य जातौ सत्त्वात् न अव्याप्तिः ।

''गुणवान्, संयोगेन घटात्'' इत्यत्र यदधिकरणं भूतलं तदवृत्तिः साध्यवद्भेदः गुणवद्भेदःइति न अव्याप्तिः ।

समाधत्ते – ''वन्हिमान् धूमात्'' इत्यादौ इत्यादिना । ''वन्हिमान् धूमात्'' इत्यादौ स्वाधिकरणे – धूमाधिकरणे पर्वतादौ वन्हिमद्भेदस्य स्वरूपसंबन्धेन असत्त्वेन कालिकसंबन्धेन सत्त्वात् साध्यवद्भेदः स्वाधिकरणवृत्तिरेव इति अव्याप्तिः प्रसज्यते । तद्वारणाय ''स्वाधिकरणवृत्तिः'' इत्यत्र स्वाधिकरणनिरूपितवृत्तित्वे

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

साध्यवत्ताग्रहविरोधितानियामकसंबन्धावच्छिन्नत्वं निवेशनीयम् । येन संबन्धेन साध्यवत्ताग्रहं प्रति येन संबन्धेन साध्याभावग्रहः प्रतिबन्धको भवति स संबन्धः साध्यवत्ताग्रहविरोधितानियामकसंबन्धः । "पर्वतो वन्हिमान्" इति ग्रहं प्रति "पर्वतः स्वरूपसंबन्धेन वन्ह्यभाववान्" इत्याकारकस्य स्वरूपसंबन्धावच्छिन्नवन्ह्य-भावनिष्ठप्रकारतानिरूपकस्य प्रतिबन्धकत्वात् स्वरूपसंबन्धः साध्यवत्ताग्रहविरोधि-तानियामकसंबन्धः । तेन संबन्धेन वन्हिमद्भेदः धूमाधिकरणे पर्वतादौ नास्ति । कालिकसंबन्धेनैव वन्हिमद्भेदस्य तत्र सत्त्वात् । तथा च उक्तसंबन्धेन स्वाधिकरणावृत्तित्वम् साध्यवद्भेदे अस्तीति न "वन्हिमान् धूमात्" इत्यादौ अव्याप्तिः । कालिकसंबन्धस्तु साध्यवत्ताग्रहविरोधितानियामको न भवति । "पर्वतः कालिकसंबन्धेन वन्ह्यभाववान्" इति ज्ञाने सत्यपि "पर्वतो वन्हिमान्" इति ग्रहस्य उत्पत्तेः । तथा च स्वाधिकरणनिरूपितसाध्यवत्ताग्रहविरोधितानियामकसंबन्धाव-च्छिन्नवृत्तित्वाभाववत् साध्यवदन्योन्याभावकत्वम् व्याप्तिरिति पर्यवसितम् । एवं च स्वाधिकरणावृत्तित्वे उक्तसंबन्धस्य "वन्हिमान् धूमात्" इत्यादौ अव्याप्तिवारणाय निवेशनीयत्वे सति "सत्ताभाववान् जात्यभावात्" इत्यत्र सद्धेतौ लक्षणस्य अव्याप्तिः । तथा हि – तत्र साध्यः सत्ताभावः । साध्यवत्ताग्रहः "सामान्यादिः सत्ताभाववान्" इति ग्रहः । तादृशग्रहं प्रति "सामान्यादिः समवायसंबन्धेन सत्ताभावाभाववान्" इत्याकारकः साध्याभाववत्ताग्रहः विरोधी इति समवायसंबन्धः तत्रसाध्यवत्ताग्रहविरो-धितानियामकसंबन्धः । तेन संबन्धेन हेत्वधिकरणनिरूपितवृत्तित्वम् अप्रसिद्धम् । हेतुः जात्यभावः तदधिकरणं सामान्यादिकम् । तत्र समवायसंबन्धेन कस्यापि अवृत्तेः इति अव्याप्तिः ।

शङ्कते – न च सत्तावान् इति । साध्यसाधनभेदेन व्याप्तिभेदस्य आवश्यकत्वात् "सत्तावान् जातेः" इत्यादौ साध्यवदन्यनिरूपितहेतुतावच्छेदकसंबन्धावच्छिन्न-वृत्तित्वाप्रसिद्ध्या न साध्यवदन्यावृत्तित्वरूपव्याप्तिज्ञानं अनुमितिकारणम् । अपि तु स्वाधिकरणावृत्ति- साध्यवदन्योन्याभावकत्वरूपव्याप्तिज्ञानं कारणम् ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

''सत्ताभाववान् जात्यभावात्'' इत्यादौ हेत्वधिकरणनिरूपितसाध्यवत्ताग्रहविरोधितानियामकसमवायसंबन्धावच्छिन्नवृत्तित्वाप्रसिद्ध्या न स्वाधिकरणावृत्तीत्यादिव्याप्तिज्ञानं कारणम् । अपि तु साध्यवदन्यावृत्तित्वरूपव्याप्तिज्ञानं कारणम् इति भावः ।

समाधत्ते – तथापि इति । उभयविधव्याप्त्योरपि ''संयोगसंबन्धावच्छिन्नघटाभाववान् विषयितासंबन्धेन घटात्'' इत्यत्र सद्धेतौ अव्याप्तिः । विषयितासंबन्धेन घटः ज्ञानादौ वर्तते । तत्र संयोगसंबन्धावच्छिन्नघटाभावोऽस्तीति अयं सद्धेतुः । अत्र ज्ञानादिकं पक्षः । हेतुतावच्छेदकसंबन्धः विषयितासंबन्धः । संयोगसंबन्धावच्छिन्नघटाभावः साध्यः । साध्यवान् ज्ञानादिः । साध्यावदन्यः संयोगेन घटवान् भूतलादिः । तन्निरूपितहेतुतावच्छेदकविषयितासंबन्धावच्छिन्नवृत्तित्वाप्रसिद्ध्या साध्यवदन्येत्यादि व्याप्तिलक्षणस्य अव्याप्तिः । हेतोः घटस्य विषयितासंबन्धेन अधिकरणं ज्ञानादिकम् । तन्निरूपितसाध्यवत्ताग्रहविरोधितानियामकसंयोगसंबन्धावच्छिन्नवृत्तित्वाप्रसिद्ध्या स्वाधिकरणेत्यादिव्याप्तिलक्षणस्य अव्याप्तिः । साध्यवत्ताबुद्धौ संयोगसंबन्धावच्छिन्नघटाभाववत्ता-बुद्धौ संयोगसंबन्धेन घटवत्ताज्ञानस्य प्रतिबन्धकतया तत्र संयोगसंबन्धः साध्यवत्ताग्रहविरोधितानियामकसंबन्धः ।

वृत्तेः अप्रसिद्धेः इति । यद्यपि साध्यवदन्यनिरूपितवृत्तितासामान्ये हेतुतावच्छेदकसंबन्धावच्छिन्नत्व-यद्धर्मावच्छिन्नत्वोभयाभावः तद्धर्मवत्त्वं व्याप्तिः इत्युक्तौ ''सत्तावान् जातेः'' इत्यादौ उक्तदोषाः न संभवन्ति । सत्तावदन्यसामान्यनिरूपितस्वरूपसंबन्धावच्छिन्नवृत्तित्वे हेतुतावच्छेदकसमवायसंबन्धावच्छिन्नत्व-जातित्वावच्छिन्नत्व-उभयाभावसत्त्वेन तद्धर्मवत्वस्य जातित्ववत्त्वस्य जातौ सत्त्वात् न अव्याप्तिः ।

''सत्ताभाववान् जात्यभावात्'' इत्यादौ सत्ताभाववदन्यद्रव्यादिनिरूपितवृत्तितायां हेतुतावच्छेदकस्वरूपसंबन्धावच्छिन्नत्व – जात्यभावत्वावच्छिन्नत्व – उभयाभावसत्त्वात् तद्धर्मवत्त्वस्य – जात्यभावत्ववत्त्वस्य जात्यभावे सत्त्वात् न अव्याप्तिः ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

''संयोगसंबन्धावच्छिन्नघटाभाववान् विषयितासंबन्धेन घटात्'' इत्यत्र साध्यवदन्यभूतलनिरूपितवृत्तितायां विषयितासंबन्धावच्छिन्नत्वाभावप्रयुक्तस्य उभयाभावस्य सत्त्वात् न अव्याप्तिः ।

तथापि स्वमते केवलान्वयित्वज्ञानकालेऽपि संशयरूपपक्षतायाः असंभवेऽपि सिद्ध्यभावरूपपक्षतायाः संभवात् अनुमितेः उत्पत्या ''इदं वाच्यं ज्ञेयत्वात्'' इत्यादौ साध्यवदन्याप्रसिद्ध्या अव्याप्तिरेव सारभूतं दूषणम् इति अवधेयम् ।

अतिरिक्तोभयाभाव इति । प्रत्येकाभावातिरिक्तोभयाभावसत्त्वे प्रमाणं नास्ति इत्याशङ्क्य एकसत्त्वेऽपि द्वयं नास्ति इति प्रतीतिरेव प्रत्येकाभावातिरिक्तोभयाभावे प्रमाणम् इति मूले उक्तम् । तस्य अयम् आशयः – ''वन्हिघटोभयं नास्ति'' इति प्रतीतौ यदि वन्ह्यभावघटाभावद्वयं विषयः तदा वन्हिसत्त्वेऽपि वन्हिघटोभयं नास्ति इति प्रतीतेः अनुपपत्तिः । वन्हिमति घटाभावसत्त्वेऽपि वन्ह्यभावस्य असत्त्वात् । अतः प्रत्येकाभावादतिरिक्तः उभयाभावः स्वीकरणीयः । स च एकसत्त्वेऽपि प्रतीतिबलात् अङ्गीकरणीयः । एवं च हेत्वधिकरणे पर्वतादौ वन्हिघटोभयाभावस्य सत्त्वात् तत्प्रतियोगित्वमेव वन्हौ अस्तीति अव्याप्तिः । इदम् उपलक्षणम् इति । उभयाभावमादाय ''वन्हिमान् धूमात्'' इत्यादौ अव्याप्तिकथनं विशिष्टाभावमादाय अव्याप्तेः अपि प्रदर्शकम् । तथा हि – हेतुमति पर्वते वर्तते यः अभावः महानसीयत्वविशिष्टवन्ह्यभावः । तत्प्रतियोगित्वमेव वन्हौ अस्तीति ।

ननु वैशिष्ट्य इति । हेत्वधिकरणवृत्त्यभावे वैशिष्ट्यानवच्छिन्ना व्यासज्यवृत्तिधर्मानवच्छिन्ना च या प्रतियोगिता तन्निरूपकत्वं विशेषणं दीयते । महानसीयत्वविशिष्टवन्ह्यभावस्य वैशिष्ट्यावच्छिन्नप्रतियोगिताकत्वात् वन्हिघटोभयाभावस्य व्यासज्यवृत्त्युभयत्वावच्छिन्नप्रतियोगिताकत्वाच्च तौ न लक्षणघटकौ । अपि तु घटाद्यभाव एव लक्षणघटकः । तदप्रतियोगित्वं वन्हौ अस्तीति न अव्याप्तिः इति आशङ्क्य ''गुणवान् द्रव्यत्वात्'' इत्यादौ अव्याप्तिरुक्ता । यत्र यत्र द्रव्यत्वमस्ति

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

तत्र गुणवत्त्वम् अस्तीति अयं सद्धेतुः । अत्र साध्यं गुणः रूपरसादिः । तस्य चालिनीन्यायेन हेत्वधिकरणवृत्त्यभावप्रतियोगितया अव्याप्तिः । तथा हि – द्रव्यत्वाधिकरणं जलम् । तद्वृत्त्यभावः गन्धाभावः । तत्प्रतियोगित्वं गन्धस्य । एवं द्रव्यत्वाधिकरणं वाय्वादिकम् । तदृत्यभावः रूपाभावः । तत्प्रतियोगित्वं रूपस्य इति रीत्या द्रव्यत्वाधिकरणं एकैकं वस्तु गृहीत्वा तद्वृत्त्यभावप्रतियोगित्वमेव रूपरसादेः गुणस्य अस्तीति अव्याप्तिः भवति ।

ननु हेत्वधिकरणवृत्यभावे वैशिष्ट्यव्यासज्यवृत्तिधर्मानवच्छिन्नप्रतियोगिता-कत्वनिवेशेऽपि ''वह्निमान् धूमात्'' इत्यत्र तत्तद्वन्हिव्यक्त्यभावम् आदाय अव्या-प्तिसंभवे ''गुणवान् द्रव्यत्वात्'' इति स्थलान्तरानुधावनम् किमर्थम् इत्याशङ्कायाम् आह – **अत्र हेतोः** इति । समानाधिकरणयोः व्यक्त्योरेव व्याप्तिः इत्युक्तौ सकलव-न्हिधूमयोः व्याप्त्यभावात् तत्तद्वन्हिधूमयोरेव व्याप्तिसत्त्वात् ''वन्हिमान् धूमात्'' इत्यादौ न दोषः इत्यालोच्य ''गुणवान् द्रव्यत्वात्'' इति स्थले अव्याप्तिकथनम् इति भावः ।

एतद्रूपवान् इति । ''एतद्रूपवान् एतद्रसात्'' इत्यत्र एतद्रसाधिकरणे एतत्फले एतद्रूपाभावः न भवति । किन्तु घटाद्यभावः, तदप्रतियोगित्वं एतद्रूपात्मके साध्येऽस्तीति व्याप्तिलक्षणस्य सत्त्वात् असंभवाख्यः दोषः न संभवति इति अव्याप्तिः उक्ता इति भावः ।

गुणत्वस्य इति । हेत्वधिकरणवृत्त्यत्यन्ताभावप्रतियोगितानवच्छेदक-साध्य-तावच्छेदकावच्छिन्न-साध्यसामानाधिकरण्यं – साध्याधिकरणवृत्तित्वं – व्याप्तिः । अस्य व्याप्तिलक्षणस्य ''वन्हिमान् धूमात्'' इत्यादौ न अव्याप्तिः । हेत्वधिकरणे पर्वते महानसीयवन्ह्यभावस्य वन्हिघटोभयाभावस्य सत्त्वेऽपि तत्प्रतियोगितावच्छेदकं महानसीयवन्हित्वं वन्हिघटोभयत्वं च । तत्प्रतियोगितानवच्छेदकं वन्हित्वरूपं साध्यतावच्छेदकम् । तदवच्छिन्नवन्ह्यधिकरणपर्वतादिवृत्तित्वं धूमेऽस्तीति ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

''गुणवान् द्रव्यत्वात्'' इत्यत्र हेतोः द्रव्यत्वस्य अधिकरणं द्रव्यम् । तद्वृत्तिः अभावः ''गुणो नास्ति'' इति प्रतीतिसिद्धः गुणत्वावच्छिन्नप्रतियोगिताकाभावः न भवति । अपि तु रूपरसाद्यभावः । तत्प्रतियोगितावच्छेदकं रूपत्वरसत्वादिकम् । अनवच्छेदकं साध्यतावच्छेदकं गुणत्वम् तदवच्छिन्नसामानाधिकरण्यं द्रव्यत्वेऽस्तीति लक्षणसमन्वयात् न अव्याप्तिः ।

मूले न तु **रूपत्वव्याप्यजातिमद्वान्** इत्यादि । रूपत्वव्याप्याः जातयः शुक्लत्वनीलत्वादयः । तद्वन्तः शुक्लनीलादयः । तद्वत्त्वं पृथिव्यामस्ति । पृथिवीत्वं च पृथिव्यामस्तीति अयं सद्धेतुः । अत्र रूपत्वव्याप्यजातिमन्ति शुक्लनीलादिरूपाणि साध्यानि । रूपत्वव्याप्य-शुक्लत्वनीलत्वादिजातयः साध्यतावच्छेदिकाः । अत्र साध्यतावच्छेदकानां शुक्लत्वनीलत्वादीनां हेत्वधिकरणवृत्त्यभावप्रतियोगितावच्छेद-कत्वमेव अस्तीति अव्याप्तिः । तथा हि – हेतोः पृथिवीत्वस्य अधिकरणं शुक्लघटः । तद्वृत्त्यभावः नीलरूपाभावः तत्प्रतियोगितावच्छेदकं नीलत्वम् । एवं हेतोः पृथिवीत्वस्य अधिकरणे नीलघटे वर्तमानः अभावः शुक्लरूपाभावः, तत्प्रतियोगितावच्छेदकं शुक्लत्वम् इति रीत्या हेत्वधिकरणवृत्यभावप्रतियोगितावच्छेदकत्वमेव रूपत्वव्याप्यानां शुक्लत्वनीलत्वजातीनां अस्तीति अव्याप्तिः इति शङ्का । तत्र द्वेधा समाधानम् उक्तम् मूले – तादृशस्थले स्वाश्रयसमवायरूपपरंपरासंबन्धेन रूपत्वव्याप्यजातित्वमेव साध्यतावच्छेदकम् । अतः न अव्याप्तिः इति एकं समाधानम् । साध्ये वर्तमानः धर्मः एव साध्यतावच्छेदकः । साध्ये शुक्लनीलादिरूपे रूपत्वव्याप्यजातित्वस्य अविद्यमानत्वेन कथं तस्य साध्यतावच्छेदकत्वम् इति आशङ्कायां परंपरासंबन्धेन इति उक्तम् । परंपराच अत्र स्वाश्रयसमवायः । स्वं – रूपत्वव्याप्यजातित्वम् । तदाश्रयः शुक्लत्वनीलत्वादिजातिः । तत्समवायः शुक्लनीलादिरूपे । अत्र हेत्वधि-करणवृत्तिः अभावः स्वाश्रयसमवायसंबन्धेन रूपत्वव्याप्यजातित्ववान् नास्ति इति प्रतीतिसिद्धः अभावः न संभवति । हेतुमति शुक्लनीलादिवस्तुनि स्वाश्रयसमवायसंबन्धेन रूपत्वव्याप्यजातित्ववतः यस्य कस्यापि रूपस्य सत्त्वात्, अपि तु

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

शुक्लनीलादितत्तद्रूपाभावः एव भवति । तत्प्रतियोगितावच्छेदकं शुक्लत्वनीलत्वादिकम् । तदनवच्छेदकं यत् साध्यतावच्छेदकं रूपत्वव्याप्यजातित्वम् । स्वाश्रयसमवायसंबन्धेन तदवच्छिन्नशुक्लनीलादिसामानाधिकरण्यं पृथिवीत्वे अस्तीति न अव्याप्तिः इति ।

द्वितीयं समाधानं तु – साध्यहेत्वादिभेदेन व्याप्तेः भेदात् यत्र साध्यतावच्छेदकं नाना भवति तादृशस्थले ''रूपत्वव्याप्यजातिमद्वान् पृथिवीत्वात्'' इत्यादौ अन्यादृश्येव व्याप्तिः स्वीक्रियते । सा च हेत्वधिकरणवृत्यन्ताभावप्रतियोगितावच्छेदकतानवच्छेदकं यत् साध्यतावच्छेदकतावच्छेदकं तदवच्छिन्नावच्छिन्नसाध्यसामानाधिकरण्यम् व्याप्तिः ।

उक्तस्थले हेत्वधिकरणवृत्तिः अभावः शुक्लनीलाद्यभावः । तत्प्रतियोगितावच्छेदकं शुक्लत्वनीलत्वादिकम् । तत्प्रतियोगितावच्छेदकतावच्छेदकं शुक्लत्वत्व–नीलत्वत्वादिकम् । तत्प्रतियोगितावच्छेदकतानवच्छेदकं रूपत्वव्याप्यजातित्वम् । अनवच्छिन्ना रूपत्वव्याप्यजातिः शुक्लत्वादिः । तदवच्छिन्नं शुक्लादिकं रूपम् । तत्सामानाधिकरण्यं पृथिवीत्वे अस्तीति लक्षणसमन्वय इति ।

ननु साध्यसाधनभेदेन व्याप्तेः भेदोपगमः न उचितः । उक्तरीत्या व्याप्तेः एकशब्दाभिलप्यमानत्वसंभवात् इति, अत आह – व्याप्तिज्ञानस्य इति । अयं भावः – कदाचित् ''रूपत्वन्यूनवृत्तिजातिमान्'' इत्याकारिका, कदाचिच्च ''तादृशजातिमद्वान्'' इत्याकारिका अनुमितिः इति सर्वानुभवसिद्धम् । तच्च कारणवैलक्षण्यं विना न संभवति इति यदा तादृशजातित्वस्य विधेयतावच्छेदकतया भानम्, तदा तादृशानुमितौ परंपरया अनवच्छेदकत्वस्य साध्यतावच्छेदकधर्मिकं ज्ञानं कारणम् । यदा तु तादृशजातित्वस्य विधेयतावच्छेदकतावच्छेदकत्वेन भानम्, तदा तादृशानुमितौ साध्यतावच्छेदकतावच्छेदकधर्मिकं प्रतियोगितावच्छेदकतानवच्छेदकत्वज्ञानं कारणम् इति व्याप्तिज्ञानकारणताभेदे एव पर्यवसानम् । एवञ्च मूले ''साध्यसाधनभेदेन'' इत्यस्य साध्यतावच्छेदकसाधनतावच्छेदकभेदेन इत्येव अर्थः इति ध्येयम् ।।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

जातिमान् इत्येव इति। "वन्हिमान्" इत्याद्यनुमितौ यद्धर्मिकम् अनवच्छेदकत्वज्ञानम्, तस्यैव विधेयतावच्छेदकतया भाननियमात् इति भावः । इष्टापत्त्या समाधत्ते – **पृथिवीत्वादि** इति । ननु एवं "रूपत्वन्यूनवृत्तिजातिमद्वान्" इत्याकारकानुमितेः तन्मते अपलापापत्तिः इति, अत आह – **जातिमद्वान्** इति । **तद्व्यक्तित्व** इति । नीलघटादिनिष्ठतद्व्यक्तित्वादेः हेतुत्वे तद्व्यक्तिनिष्ठाभावप्रतियोगितावच्छेदकत्वस्य नीलत्वादिजातौ बाधितत्वात् इति भावः ।।

मुक्तावली

हेत्वधिकरणं च हेतुतावच्छेदकविशिष्टाधिकरणं वाच्यम् । तेन "द्रव्यं गुणकर्मान्यत्वविशिष्टसत्त्वात्" इत्यादौ शुद्धसत्ताधिकरणगुणादिनिष्ठाभावप्रतियोगित्वेऽपि द्रव्यत्वस्य न अव्याप्तिः ।

हेतुतावच्छेदकसंबन्धेन हेत्वधिकरणं बोध्यम् । तेन समवायेन धूमाधिकरणतदवयवनिष्ठाभावप्रतियोगित्वेऽपि वह्नेः न अव्याप्तिः ।

दिनकरी

शुद्धसत्ताधिकरण इति । न च – **विशिष्टनिरूपिताधिकरणतायाः** हेतुतावच्छेदक संबन्धत्वे कथं तेन संबन्धेन सत्ताधिकरणं गुणः; समवायस्य तथात्वे तु द्रव्यत्वे साध्ये विशिष्टसत्ताया व्यभिचारित्वात् तत्र अव्याप्त्यभिधानम् असङ्गतम् इति – वाच्यम् । **साध्याभाववद्वृत्तितावच्छेकहेतुतावच्छेदकस्यैव** व्यभिचारपदार्थतया शुद्धसमवायसंबन्धस्य हेतुतावच्छेदकसंबन्धत्वेऽपि विशिष्टसत्त्वस्य हेतोः व्यभिचारित्वाभावात् न अव्याप्तिः इति ।

न च – हेतुतावच्छेदकविशिष्टसत्तात्वविशिष्टसत्त्वस्य गुणे सत्त्वात् एवं विवक्षणेऽपि कथम् अव्याप्तिपरिहार इति – वाच्यम् । हेतुतावच्छेदकावच्छिन्ननिरूपिताधिकरणत्वस्य विवक्षितत्वात् विशिष्टसत्तात्वस्य गुणनिष्ठाधिकरणतानिरूपिताधेयतानवच्छेदकतया तदवच्छिन्ननिरूपिताधिकरणत्वस्य गुणे अभावात् इति ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

राजीवोल्लासः

मूले हेत्वधिकरणं च हेतुतावच्छेदकविशिष्टाधिकरणं वाच्यम् इति । "इदं द्रव्यं गुणकर्मान्यत्वविशिष्टसत्त्वात्" इत्यादौ विशिष्टशुद्धयोरनतिरेकात् शुद्धसत्ताधिकरणगुणादिनिष्ठो यः अभावः द्रव्यत्वाभावः तत्प्रतियोगितावच्छेदकत्वमेव द्रव्यत्वत्वरूपसाध्यतावच्छेदकेऽस्तीति अव्याप्तिः । तद्वारणाय हेत्वधिकरणपदेन हेतुतावच्छेदकविशिष्टाधिकरणं विवक्षणीयम् । हेतुतावच्छदेकावच्छिन्नहेतुनिष्ठाधेयता-निरूपिताधिकरणतावत् इति तदर्थः । उक्तस्थले हेतुतावच्छेदकं गुणकर्मान्यत्ववि-शिष्टसत्तात्वम् । तदवच्छिन्नाधेयतानिरूपिताधिकरणत्वं गुणादौ नास्ति । किन्तु सत्तात्वावच्छिन्नहेतुनिष्ठाधेयतानिरूपिताधिकरणत्वमेव अस्ति । अतः द्रव्यमेव विशिष्टसत्ताधिकरणम् । तन्निष्ठाभावः द्रव्यत्वाभावो न भवति । अपि तु गुणत्वाद्यभावः । तत्प्रतियोगितानवच्छेदकत्वं द्रव्यत्वत्वेऽस्तीति न अव्याप्तिः ।

तत्र शङ्कते **दिनकर्याम् – न च विशिष्टनिरूपिताधिकरणताया** इति । "द्रव्यं विशिष्टसत्त्वात्" इत्यत्र गुणकर्मान्यत्वविशिष्टसत्तानिरूपितधिकरणत्वं हेतुतावच्छेदकसंबन्धः । न तु समवायः संबन्धः । समवायस्य हेतुतावच्छेदकसंबन्धत्वे तेन संबन्धेन सत्ताऽभिन्नविशिष्टसत्तायाः साध्यद्रव्यत्वाभाववति गुणे सत्त्वेन व्यभिचारितया अलक्ष्यत्वात् । विशिष्टनिरूपिताधिकरणतायाः हेतुतावच्छेदकसंबन्धत्वे तु तेन संबन्धेन सत्तायाः गुणेऽभावेन अव्यभिचारितया लक्ष्यत्वम् ।

न च – तेन संबन्धेन सत्ताया एव सद्धेतुत्वसंभवात् तेन संबन्धेन विशिष्टसत्तायाः हेतुत्वं कुतः इति – वाच्यम् । शुद्धसत्ताप्रतियोगिकत्वस्य विशिष्टसत्तानिरूपिताधि-करणतायां अनङ्गीकारात् । एवं च हेतुतावच्छेदकसंबन्धेन विशिष्टसत्तानि-रूपिताधिकरणत्वेन हेत्वधिकरणं द्रव्यमेव भवति । तद्वृत्त्यभावाप्रतियोगित्वं द्रव्यत्वेऽस्तीति अव्याप्त्यप्रसक्तेः हेतुतावच्छेदकविशिष्टाधिकरणत्वस्य निवेशो विफलः इति आशयेन शङ्का ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

तत्र समाधानम् आह – **साध्याभाववद्वृत्तितावच्छेदक** इति । उक्तस्थले समवाय एव हेतुतावच्छेदकसंबन्धः । तेन संबन्धेन साध्याभाववद्वृत्तित्वम् अस्ति इति हेतोः व्यभिचारित्वम् न आशङ्कनीयम् । साध्याभाववन्निरूपितहेतुतावच्छेदक-संबन्धावच्छिन्नवृत्तितावच्छेदकहेतुतावच्छेदकवत्त्वस्यैव व्यभिचारपदर्थत्वात् द्रव्यत्वाभाववद्गुणादिनिरूपितसमवायसंबन्धावच्छिन्नवृत्तितावच्छेदकम् सत्तात्वमेव, न तु विशिष्टसत्तात्वरूपं हेतुतावच्छेदकम् इति व्यभिचारित्वाभावेन तस्य लक्ष्यत्वात् । तथा च समवायेन शुद्धसत्ताधिकरणगुणादिनिष्ठाभावप्रतियोगितावच्छेदकत्वमेव द्रव्यत्वत्वस्य अस्ति इति अव्याप्तिः । तद्वारणाय हेतुतावच्छेदकविशिष्टाधिकरणं निवेशनीयम् एव ।

न च हेतुतावच्छेदकविशिष्ट इत्यादि । हेतुतावच्छेदकविशिष्टहेत्वधिकरण-त्वनिवेशेऽपि हेतुतावच्छेदकीभूतविशिष्टसत्तात्वविशिष्टा सत्तैव । तदधिकरणं गुणोऽपि इति, तद्वृत्त्यभावप्रतियोगित्वात् द्रव्यत्वस्य कथं अव्याप्तिपरिहारः इति – न च वाच्यम् । हेतुनिष्ठाधेयतायां हेतुतावच्छेदकावच्छिन्नत्वनिवेशे प्रकृतग्रन्थतात्पर्यात् । विशिष्टसत्तात्वावच्छिन्नाधेयतानिरूपिताधिकरणत्वं गुणे नास्ति, "गुणः विशिष्टसत्तावान्" इत्यप्रतीतेः । अतः द्रव्यमेव विशिष्टसत्तात्वावच्छिन्नाधेयता-निरूपिताधिकरणत्ववत् । तन्निष्ठाभावप्रतियोगित्वं द्रव्यत्वे नास्ति इति न अव्याप्तिः ।

एवं हेतुनिष्ठाधेयतायां हेतुतावच्छेदकसंबन्धावच्छिन्नत्वमपि निवेशनीयम् । अन्यथा "वन्हिमान् धूमात्" इत्यादौ हेतोः धूमस्य समवायसंबन्धेन अधिकरणं धूमावयवः तन्निष्ठो योऽभावः वन्ह्यभावः । तत्प्रतियोगित्वमेव वन्हेः अस्ति इति अव्याप्तिः स्यात् । हेतुतावच्छेदकसंबन्धावच्छिन्नत्वनिवेशे तु संयोगसंबन्धावच्छिन्न-धूमनिष्ठाधेयतानिरूपिताधिकरणतावान् धूमावयवो न भवति । किन्तु पर्वतादिः । तद्वृत्त्यभावाप्रतियोगित्वं वन्हौ अस्ति इति न अव्याप्तिः ।।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

मुक्तावली

अभावश्च प्रतियोगिव्यधिकरणः बोध्यः । तेन ''कपिसंयोगी एतद्वृक्षत्वात्'' इत्यत्र मूलावच्छेदेन एतद्वृक्षवृत्तिकपिसंयोगाभावप्रतियोगित्वेऽपि कपिसंयोगस्य न अव्याप्तिः ।

न च – प्रतियोगिव्यधिकरणत्वं यदि प्रतियोग्यनधिकरणवृत्तित्वं तदा **तथैव** अव्याप्तिः, प्रतियोगिनः कपिसंयोगस्य अनधिकरणे गुणादौ वर्तमानः योऽभावः **तस्यैव वृक्षे** मूलावच्छेदेन सत्त्वात् । यदि तु **प्रतियोग्यधिकरणावृत्तित्वम्**, तदा ''संयोगी सत्त्वात्'' इत्यादौ अतिव्याप्तिः, सत्ताधिकरणे गुणादौ यः संयोगाभावः तस्य प्रतियोग्यधिकरणद्रव्यवृत्तित्वात् इति – वाच्यम् ।

हेत्वधिकरणे प्रतियोग्यनधिकरणवृत्तित्वविशिष्टस्य **विवक्षितत्वात्** । **स्वप्रतियोग्यनधिकरणी**भूतहेत्वधिकरणवृत्त्यभाव इति **निष्कर्षः** ।।

दिनकरी

तथैव – **तद्वस्थैव** । **तस्यैव वृक्षे** इति । अधिकरणभेदेन अभावभेदानभ्युपगमात् इति भावः । प्रतियोग्यधिकरणावृत्तित्वं **प्रतियोग्यधिकरणवृत्तिभिन्नत्वम्** । **विवक्षितत्वात्** इति । प्रतियोगिव्यधिकरणपदेन विवक्षितत्वात् इत्यर्थः । ननु एवं ''हेतुसमानाधिकरण'' इत्यस्य वैयर्थ्यम् । ''सत्तावान् जातेः'' इत्यादौ सत्ताद्यभावस्य निरुक्तप्रतियोगिवैयधिकरण्याभावात् अव्याप्तिविरहात्, अत आह – **स्वप्रतियोग्यनधिकरण** इति । **निष्कर्ष** इति । ''प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभाव'' इत्यन्तस्य निष्कर्षः इत्यर्थः । तथा च हेतुसमानाधिकरणत्वविशेषणबलादेव तादृशप्रतियोगिवैयधिकरण्यलाभात् न तद्वैयर्थ्यम् इति भावः ।।

राजीवोल्लासः

मूले अभावश्च प्रतियोगिव्यधिकरण इत्यादि । हेत्वधिकरणवृत्त्यभावे प्रतियोगिव्यधिकरणत्वं निवेशनीयम् । अन्यथा ''कपिसंयोगी एतद्वृक्षत्वात्''

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

इत्यत्र हेत्वधिकरणे एतद्वृक्षे मूलावच्छेदेन वर्तमानः अभावः कपिसंयोगाभावः । तत्प्रतियोगितावच्छेदकत्वमेव साध्यतावच्छेदके कपिसंयोगत्वेऽस्तीति अव्याप्तिः । अभावे प्रतियोगिव्यधिकरणत्वनिवेशे तु एतद्वृक्षे वर्तमानः कपिसंयोगाभावः प्रतियोगिसमानाधिकरणः । प्रतियोगिव्यधिकरणः अभावः घटाद्यभाव एव । तत्प्रतियोगितानवच्छेदकत्वं कपिसंयोगत्वेऽस्तीति न अव्याप्तिः ।

ननु प्रतियोगिव्यधिकरणत्वं यदि प्रतियोग्यनधिकरणवृत्तित्वम्, तदा "कपिसंयोगी एतद्वृक्षत्वात्" इत्यत्र अव्याप्तिः तदवस्थैव । हेत्वधिकरणे एतद्वृक्षे वर्तमानस्य कपिसंयोगाभावस्य कपिसंयोगरूपप्रतियोग्यनधिकरणगुणादिवृत्तित्वात् । न च – एक एव कपिसंयोगाभावः गुणवृत्तिः वृक्षवृत्तिश्च कथं स्यात् इति – वाच्यम् । अधिकरणभेदेन अभावभेदानङ्गीकारात् । गुणादौ वर्तमानस्य कपिसंयोगाभावस्य वृक्षेऽपि सत्तायां विरोधाभावात् । यदि तु प्रतियोग्यधिकरणावृत्तित्वं प्रतियोगिव्यधिकरणत्वम् तदा "कपिसंयोगी एतद्वृक्षत्वात्" इत्यत्र अव्याप्तिः वारयितुं शक्यते । कपिसंयोगाभावस्य प्रतियोगिकपिसंयोगाधिकरणवृक्षवृत्तितया प्रतियोग्यधिकरणावृत्तित्वाभावेन लक्षणाघटकत्वात् । तथापि "संयोगी सत्त्वात्" इत्यत्र व्यभिचारिणि अतिव्याप्तिः । तत्र हि साध्याभावमादाय अतिव्याप्तिः वारणीया । साध्याभावः संयोगाभावस्तु अव्याप्यवृत्तितया प्रतियोग्यधिकरणवृत्तिः । अतः प्रतियोग्यधिकरणावृत्तिः अभावः घटाद्यभाव एव । तत्प्रतियोगितानवच्छेदकत्वं संयोगत्वेऽस्तीति अतिव्याप्तिः इति चेत्, न । हेत्वधिकरणे प्रतियोग्यनधिकरणवृत्तित्वविशिष्टः योऽभावः इति विवक्षितत्वात् । "संयोगी सत्त्वात्" इत्यत्र हेत्वधिकरणं गुणः तत्र प्रतियोग्यनधिकरणवृत्तित्वविशिष्टः अभावः संयोगाभावः । गुणस्य संयोगानधिकरणत्वात् । तादृशाभावप्रतियोगितावच्छेदकत्वमेव संयोगत्वे अस्ति इति न अतिव्याप्तिः ।

"कपिसंयोगी एतद्वृक्षत्वात्" इत्यत्र हेत्वधिकरणं वृक्षः । तत्र प्रतियोग्यनधिकरणवृत्तित्वविशिष्टः अभावः इत्युक्ते कपिसंयोगाभावः न भवति । वृक्षस्य

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

कपिसंयोगरूपप्रतियोग्यधिकरणतया तत्र विद्यमानस्य कपिसंयोगाभावस्य प्रतियोग्यधिकरणवृत्तित्वविशिष्टत्वात् । तस्मात् हेत्वधिकरणे वृक्षे प्रतियोग्यनधिकरणवृत्तित्वविशिष्टः सन् वर्तते योऽभावः घटाद्यभाव एव । तत्प्रतियोगितानवच्छेदकत्वस्य कपिसंयोगत्वे सत्त्वात् न अव्याप्तिः ।

ननु ''प्रतियोगिव्यधिकरण'' इत्यस्य हेत्वधिकरणे प्रतियोग्यनधिकरणवृत्तित्वविशिष्टः इत्यर्थाङ्गीकारे अभावे हेतुसमानाधिकरणत्वविशेषणं व्यर्थम् । ''सत्तावान् जातेः'' इत्यादौ प्रतियोगिव्यधिकरणसत्ताभावप्रतियोगितावच्छेदकतया सत्तात्वस्य अनवच्छेदकत्वविरहात् अव्याप्तिवारणार्थं हि हेतुसमानाधिकरणत्वविशेषणम् । प्रतियोगिवैयधिकरण्यशरीरे एव हेत्वधिकरणं प्रवेश्य हेत्वधिकरणे प्रतियोग्यनधिकरणवृत्तित्वविशिष्टः सन् वर्तते योऽभावः इति विवक्षायां ''सत्तावान् जातेः'' इत्यत्र सत्ताभावस्य प्रतियोग्यनधिकरणवृत्तित्वेऽपि हेत्वधिकरणद्रव्यादिवृत्तित्वविरहात् हेत्वधिकरणे प्रतियोग्यनधिकरणवृत्तिः अभावः इत्यनेन सत्ताभावस्य ग्रहीतुम् अशक्यत्वात् अभावान्तरस्य ग्रहणे तत्प्रतियोगितानवच्छेदकत्वस्य सत्तात्वे सद्भावेन अव्याप्त्यप्रसक्तेः इत्याशङ्क्य मुक्तावल्यां **स्वप्रतियोग्यनधिकरणीभूतहेत्वधिकरणवृत्त्यभाव** इति ''प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभाव'' इत्यस्य निष्कृष्टोऽर्थः उक्तः । तथा च हेतुसमानाधिकरणत्वविशेषणबलादेव हेत्वधिकरणे प्रतियोग्यनधिकरणवृत्तित्वलाभात् पृथक् हेतुसामानाधिकरण्यनिवेशो न तात्पर्यम् । अतः हेतुसामानाधिकरण्यस्य न वैयर्थ्यशङ्का ।

ननु इदानीं प्रदर्श्यमानायाः अव्याप्तेः पूर्वोक्ताव्याप्त्यपेक्षया भेदाभावेन भेदघटितसादृश्यार्थकता तथैव इत्यस्य न घटते इति, अत आह – **दिनकर्यां – तदवस्थैव** इति ।

ननु प्रतियोग्यधिकरणावृत्तित्वं प्रतियोग्यधिकरणवृत्तित्वाभाववत्त्वम् । तच्च कपिसंयोगाभावस्यापि अक्षतम् । प्रतियोग्यधिकरणवृत्तित्वस्य अव्याप्यवृत्तितया

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

वृक्षावच्छेदेनप्रतियोग्यधिकरणवृत्तित्ववतः कपिसंयोगाभावस्य गुणावच्छेदेन प्रतियोग्यधिकरणवृत्तित्वाभावोऽपि अस्ति । कपिसंयोगाभावे गुणे न प्रतियोग्यधिकरण-वृत्तित्वम् इति प्रतीतेः । एवं च प्रतियोग्यधिकरणावृत्तित्वनिवेशेऽपि कपिसंयो-गाभावमादाय अव्याप्तिः दुर्वारा इति आशङ्क्य आह – **प्रतियोग्यधिकरण-वृत्तिभिन्नत्वम्** इति । भेदस्य व्याप्यवृत्तितया प्रतियोग्यधिकरणवृत्तेः कपिसंयोगाभावस्य प्रतियोग्यधिकरणवृत्तिभिन्नत्वं न संभवति इति कपिसंयोगाभावः न लक्षणघटक इति भावः ।

विशेषणबलादेव इति । ''घटः जातिमान्'', ''वन्ह्यभाववद्ह्रदः दोषः'' इत्यादौ उद्देश्यतावच्छेदकस्य विधेयतावच्छेदके अभेदसंबन्धेन अन्वयात् ''घटत्वाभिन्नजातिमान्'', ''वन्ह्यभाववद्ह्रदत्वाभिन्नदोषत्ववान्'' इति बोधवत् प्रकृते विधेयतावच्छेदके हेत्वधिकरणवृत्तित्वे उद्देश्यतावच्छेदकप्रतियोग्यनधिकरण-वृत्तित्वस्य अभेदसंबन्धेन अन्वयात् वृत्तित्वयोः ऐक्यलाभे तन्निरूपकयोः अधि-करणयोरपि ऐक्यलाभात् ''प्रतियोग्यनधिकरण- हेत्वधिकरणवृत्ति'' इति निष्कृष्टार्थस्य ''प्रतियोगिव्यधिकरणहेतुसमानाधिकरण'' इति ग्रन्थात् लाभः इत्याशयः । एतावता स्वप्रतियोग्यनधिकरणीभूत – हेत्वधिकरणवृत्त्यभाव-प्रतियोगितानवच्छेदक-साध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यं व्याप्तिः इति निष्कर्षः ।।

मुक्तावली

प्रतियोग्यनधिकरणत्वं प्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं वाच्यम् । तेन ''विशिष्टसत्तावान् जातेः'' इत्यादौ जात्यधिकरणगुणादौ विशिष्टसत्ताभावप्रतियोगि-सत्ताधिकरणत्वेऽपि न क्षतिः ।

अत्र साध्यतावच्छेदकसंबन्धेन प्रतियोग्यनधिकरणत्वं वाच्यम् । तेन ''ज्ञानवान् सत्त्वात्'' इत्यादौ सत्ताधिकरणघटादेः विषयतया ज्ञानाधिकरणत्वेऽपि न क्षतिः ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

इत्थं च ''वह्निमान् धूमात्'' इत्यादौ धूमाधिकरणे समवायेन वह्निविरहसत्त्वेऽपि न क्षतिः ।

दिनकरी

सत्ताधिकरणत्वेऽपि इति । **तथा च विशिष्टसत्ताभावः** न प्रतियोगिव्यधिकरणः, अभावान्तरप्रतियोगितायाश्च अनवच्छेदकमेव विशिष्टसत्ता त्वम् इति अतिव्याप्तिः इति भावः । **न क्षतिः** न अतिव्याप्तिः । एवमग्रेऽपि ।

ननु प्रतियोगितावच्छेदकसंबन्धेनैव प्रतियोग्यनधिकरणत्वमुच्यताम्, तावतापि ''ज्ञानवान् सत्त्वात्'' इत्यादौ **अनतिप्रसङ्गात्** इति, अतः आह – **इत्थं च** इति । साध्यतावच्छेदकसंबन्धेन प्रतियोग्यनधिकरणत्वविवक्षणे च इत्यर्थः । **वह्निविरहसत्त्वेऽपि** इति । तथा च प्रतियोगितावच्छेदकसमवायेन प्रतियोगिव्यधिकरणतादृशाभावप्रतियोगितावच्छेदकत्वात् वह्नित्वस्य अव्याप्तिः । **साध्यतावच्छेदकसंबन्धावच्छिन्नत्वेन** अग्रिमप्रतियोगिताविशेषणे तु संबन्धद्वयप्रवेशेन गौरवम् इति भावः । **न क्षतिः** – न अव्याप्तिः । समवायेन वह्न्यभावस्य साध्यतावच्छेदकसंयोगेन प्रतियोग्यनधिकरणहेत्वधिकरणवृत्तित्वाभावात् इति भावः ।।

राजीवोल्लासः

तत्र ''प्रतियोग्यनधिकरणत्वम्'' इत्यनेन प्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं वाच्यम् । अन्यथा ''विशिष्टसत्तावान् जातेः'' इत्यत्र अतिव्याप्तिः इति उक्तम् **मूले** । अतिव्याप्तिम् उपपादयति – **तथा च विशिष्टसत्ताभाव** इति । ''गुणकर्मान्यत्वविशिष्टसत्तावान् जातेः'' इत्यत्र हेत्वधिकरणं गुणः, तद्वृत्तिः यः अत्यन्ताभावः गुणकर्मान्यत्वविशिष्टसत्ताभावः, तत्प्रतियोगितावच्छेदकमेव विशिष्टसत्तात्वम् इति अतिव्याप्तिः वारणीया । परन्तु हेत्वधिकरणे प्रतियोग्यनधिकरणत्वनिवेशे विशिष्टसत्ताभावस्य लक्षणघटकत्वं न संभवति । विशिष्टसत्ताभावप्रतियोगिविशिष्टसत्ताधिकरणत्वस्यैव हेत्वधिकरणे गुणे सत्त्वात् । विशिष्टशुद्धयोरभेदात्

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

सत्ताधिकरणगुणे तदभिन्नविशिष्टसत्ताधिकरणत्वस्यापि आवश्यकत्वात् । तथा च प्रतियोग्यनधिकरणहेत्वधिकरणवृत्तिः अभावः न विशिष्टसत्ताभावः । अपि तु घटाद्यभावः । तत्प्रतियोगितानवच्छेदकत्वं विशिष्टसत्तात्वेऽस्तीति अतिव्याप्तिः । प्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वनिवेशे तु विशिष्टसत्ताभावप्रतियोगितावच्छेदकं विशिष्टसत्तात्वम् । तदवच्छिन्नानधिकरणत्वं गुणस्य अस्तीति प्रतियोगितावच्छेदकावच्छिन्नानधिकरणहेत्वधिकरणवृत्तिः अभावः विशिष्टसत्ताभावोऽपि । तत्प्रतियोगितावच्छेदकमेव साध्यतावच्छेदकम् विशिष्टसत्तात्वम् इति न अतिव्याप्तिः इति भावः ।

मूले अत्र साध्यतावच्छेदकसंबन्धेन इति । प्रतियोगिवैयधिकरण्यशरीरे साध्यतावच्छेदकसंबन्धेन प्रतियोग्यनधिकरणत्वं निवेशनीयम् । अन्यथा "ज्ञानवान् सत्त्वात्" इत्यत्र अतिव्याप्तिः । अत्र साध्यतावच्छेदकसंबन्धः समवायसंबन्धः । तेन संबन्धेन ज्ञानाभाववति घटादौ सत्तायाः विद्यमानतया अयं हेतुः व्यभिचारी । अत्र हेत्वधिकरणं – सत्ताधिकरणं घटादिः तद्वृत्तिः अभावः ज्ञानाभावः । तत्प्रतियोगितावच्छेदकमेव ज्ञानत्वरूपं साध्यतावच्छेदकम् इति अतिव्याप्तिः वारणीया । परन्तु हेत्वधिकरणे प्रतियोग्यनधिकरणत्वनिवेशात् ज्ञानाभावः लक्षणघटकः न भवति । हेत्वधिकरणे घटादौ ज्ञानाभावप्रतियोगिनः ज्ञानस्य विषयतासंबन्धेन सत्त्वात् हेत्वधिकरणस्य प्रतियोग्यधिकरणत्वात् । अतः अभावान्तरमादाय तत्प्रतियोगितानवच्छेदकत्वस्य ज्ञानत्वे सत्त्वात् अतिव्याप्तिः । तद्वारणाय साध्यतावच्छेदकसंबन्धेन प्रतियोग्यनधिकरणत्वनिवेशः । घटादेः समवायसंबन्धेन ज्ञानानधिकरणत्वात् साध्यतावच्छेदकसंबन्धेन प्रतियोग्यनधिकरणहेत्वधिकरणवृत्तिः ज्ञानाभावोऽपि इति न अतिव्याप्तिः ।

ननु प्रतियोग्यनधिकरणत्वशरीरे उपस्थितिलाघवात् प्रतियोगितावच्छेदकसंबन्ध एव निवेशयितुम् उचितः । तथा निवेशेऽपि "ज्ञानवान् सत्त्वात्" इत्यादौ

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अतिव्याप्तिः वारयितुं शक्यते । तत्र समवायसंबन्धावच्छिन्नज्ञानाभावस्यैव हेत्वधिकरण-घटादिवृत्तितया तस्य प्रतियोगितावच्छेदकसमवायसंबन्धेन प्रतियोगिनः ज्ञानस्य अनधिकरणं यद्घटादि तद्वृत्तितया लक्षणघटकत्वात् तादृशाभावप्रतियोगितावच्छेद-कत्वमेव ज्ञानत्वेऽस्तीति अतिव्याप्तेः वारयितुं शक्यत्वात् इति आशङ्क्य आह मूले – इत्थं च इति । प्रतियोगितावच्छेदकसंबन्धेन प्रतियोग्यनधिकरणत्वनिवेशे "वन्हिमान् धूमात्" इत्यादौ हेत्वधिकरणपर्वतादिवृत्तिः अभावः समवायसंबन्धाव-च्छिन्नवन्ह्यभावोऽपि । तस्य प्रतियोगितावच्छेदकसमवायसंबन्धेन वन्ह्यनधिकरण-पर्वतादिवृत्तितया लक्षणघटकत्वात् तत्प्रतियोगितावच्छेकत्वमेव वन्हित्वे अस्ति इति अव्याप्तिः स्यात् । अतः "प्रतियोगितावच्छेदकसंबन्धेन" इत्येतदुपेक्ष्य "साध्यतावच्छेदकसंबन्धेन" इति उक्तम् । तथा च समवायसंबन्धावच्छिन्न-वन्ह्यभावस्य साध्यतावच्छेदकसंयोगसंबन्धेन वन्ह्यधिकरणपर्वतवृत्तितया साध्यतावच्छेदकसंबन्धेन प्रतियोग्यनधिकरणहेत्वधिकरणवृत्तित्वं नास्ति इति लक्षणाघटकतया न अव्याप्तिः ।

दिनकर्याम् – अनतिप्रसङ्गात् इति । अतिव्याप्त्यभावात् इत्यर्थः ।

ननु प्रतियोगितावच्छेदकसंबन्धेन प्रतियोग्यनधिकरणत्वनिवेशेऽपि "वन्हिमान् धूमात्" इत्यादौ समवायसंबन्धावच्छिन्नवन्ह्यभावमादाय न अव्याप्तिः । अग्रिमायां हेत्वधिकरणवृत्त्यभावीयप्रतियोगितायां साध्यतावच्छेदकसंबन्धावच्छिन्नत्वनिवेशेन अव्याप्तेः वारयितुं शक्यत्वात् । समवायसंबन्धावच्छिन्नवन्ह्यभावस्य ग्रहणे तन्निरूपितप्रतियोगितायां साध्यतावच्छेदकसंयोगसंबन्धावच्छिन्नत्वविरहात् न अयमभावः लक्षणघटकः । अपि तु यस्य अभावस्य ग्रहणे तदीयप्रतियोगिता साध्यतावच्छेदसंबन्धावच्छिन्ना भवेत् स एव अभावो लक्षणघटकः । स च संयोगसंबन्धावच्छिन्नघटाद्यभावः । तदीयप्रतियोगिता साध्यतावच्छेदकसंबन्धाव-च्छिन्ना । तदवच्छेदकं घटत्वादिकम् । अनवच्छेदकं वन्हित्वम् इति आशङ्क्य

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्रतियोगिवैयधिकरण्यशरीरे प्रतियोगितावच्छेदकसंबन्धस्य अग्रिमप्रतियोगितायां साध्यतावच्छेदकसंबन्धावच्छिन्नत्वस्य निवेशे संबन्धद्वयनिवेशप्रयुक्तगौरवम् । प्रतियोगिवैयधिकरण्यशरीरे साध्यतावच्छेदकसंबन्धनिवेशे तु अव्याप्त्यतिव्याप्त्योः वारणसंभवात् एकत्रैव संबन्धनिवेशात् लाघवम् इति, अत आह – **साध्यतावच्छेदकसंबन्धावच्छिन्नत्वेन** इति । एवं च प्रतियोग्यनधिकरणत्वं प्रतियोगिनिष्ठाधेयतानिरूपिताधिकरणतावद्भिन्नत्वम् । प्रतियोगिनिष्ठाधेयतायां प्रतियोगितावच्छेदकधर्मावच्छिन्नत्वं साध्यतावच्छेदकसंबन्धावच्छिन्नत्वं च निवेशनीयम् । स्वप्रतियोगितावच्छेदकावच्छिन्न – साध्यतावच्छेदकसंबन्धावच्छिन्न–स्वप्रतियोगिनिष्ठाधेयतानिरूपिताधिकरणतावद्भिन्नहेत्वधिकरणवृत्त्यभाव इति अभावान्तार्थनिष्कर्षः ।।

मुक्तावली

ननु प्रतियोगितावच्छेदकावच्छिन्नस्य यस्यकस्यचित्प्रतियोगिनः अनधिकरणत्वम्, तत्सामान्यस्य वा, यत्किंचित्प्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं वा विवक्षितम् ।

आद्ये ''कपिसंयोगी एतद्वृक्षत्वात्'' इत्यत्र तथैव अव्याप्तिः । कपिसंयोगाभावप्रतियोगितावच्छेदकावच्छिन्नः वृक्षावृत्तिकपिसंयोगोऽपि भवति, तदनधिकरणं वृक्ष इति ।

द्वितीये तु प्रतियोगिव्यधिकरणाभावाप्रसिद्धिः । सर्वस्यैव अभावस्य पूर्वक्षणवृत्तित्वविशिष्टस्वाभावात्मकप्रतियोगिसमानाधिकरणत्वात् । न च – ''वह्निमान् धूमात्'' इत्यादौ घटाभावादेः पूर्वक्षणवृत्तित्वविशिष्टस्वाभावात्मकप्रतियोग्यधिकरणत्वं यद्यपि पर्वतादेः, तथापि साध्यतावच्छेदकसंबन्धेन तत्प्रतियोग्यनधिकरणत्वमस्त्येव इति कथं प्रतियोगिव्यधिकरणाभावाप्रसिद्धिः इति – वाच्यम् । घटाभावे यो वह्न्यभावः तस्य घटाभावात्मकतया घटाभावस्य वह्निरपि प्रतियोगी, तदधिकरणं च पर्वतादिः इत्येवं क्रमेण प्रतियोगिव्यधिकरणस्य

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अप्रसिद्धत्वात् । यदि घटाभावादौ वह्न्यभावादिः भिन्न इत्युच्यते, तथापि "धूमाभाववान् वह्न्यभावात्" इत्यादौ अव्याप्तिः । तत्र साध्यतावच्छेदकसंबन्धः **स्वरूपसंबन्धः**, तेन सर्वस्यैव अभावस्य **पूर्वक्षणवृत्तित्वविशिष्टस्वाभावात्मक-** प्रतियोग्यधिकरणत्वं हेत्वधिकरणस्य इति ।

तृतीये तु "**कपिसंयोगाभाववान् आत्मत्वात्**" इत्यादौ अव्याप्तिः । तत्रात्मवृत्तिः कपिसंयोगाभावाभावः कपिसंयोगः, तस्य गुणत्वात् तत्प्रतियोगितावच्छेदकं गुणसामान्याभावत्वमपि, तदवच्छिन्नानधिकरणत्वं हेत्वधिकरणस्य आत्मन इति ।

मैवम् । **यादृश**प्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं हेतुमतः तादृशप्रतियोगितानवच्छेदकत्वस्य **विवक्षितत्वात्** ।।

दिनकरी

तत्सामान्यस्य – प्रतियोगितावच्छेदकावच्छिन्नसामान्यस्य । **यत्किंचित्** इति । यत्किंचिद्यत्प्रतियोगितावच्छेदकं तदवच्छिन्नसामान्यस्य वा इत्यर्थः । **पूर्वक्षणवृत्तित्वविशिष्ट** इति । पूर्वक्षणवृत्तित्वविशिष्टस्य स्वस्य घटाभावादेः योऽभावः तदात्मकेत्यर्थः । घटाभावाद्यधिकरणेऽपि पूर्वक्षणवृत्तित्वविशिष्टघटाभावादेः अभावस्य उत्तरक्षणावच्छेदेन सत्त्वात् इति भावः ।

न च – **पूर्वक्षणवृत्तित्वविशिष्टस्य** घटाभावादेः अभावः स्वाभावस्य प्रतियोगी, न घटाभावादेः इति – वाच्यम् । पूर्वक्षणवृत्तित्वविशिष्टस्य घटाभावादेः योऽभावः तदभावस्य पूर्वक्षणवृत्तित्वविशिष्टघटाभावरूपस्य घटाभावानतिरेकितया विशिष्टघटाभावप्रतियोगिनः तस्य शुद्धघटाभावप्रतियोगित्वात् । तथा च प्रतियोगिव्यधिकरणाभावाप्रसिद्ध्या असम्भव इति भावः ।

घटाभावात्मकतया इति । अभावाधिकरणकाभावस्य अधिकरणानतिरिक्तत्वात् इति भावः । **इत्यादौ** इति "आदि"ना अभावसाध्यकसद्धेतुमात्रपरिग्रहः । **स्वरूपसंबन्ध** इति । अभावीयविशेषणता इत्यर्थः । **पूर्वक्षणवृत्तित्वविशिष्टस्वाभाव**

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

इति । पूर्वक्षणवृत्तित्वविशिष्टं यत्स्वं – घटाभावादि तदभावात्मकेत्यर्थः । **प्राचां मते द्रव्ये संयोगसामान्याभावानङ्गीकारात्** आह – **कपि इति** । घटाभावीययत्किंचित्प्रतियोगितावच्छेदक-घटत्वावच्छिन्नानधिकरणत्वस्य हेत्वधिकरणे संभवात् न प्रतियोगिव्यधिकरणाभावाप्रसिद्धिनिबन्धना अव्याप्तिः संभवति इति भावः । **घटत्वहेतुके** यत्किंचित्प्रतियोगितावच्छेदक- गुणसामान्याभावत्वावच्छिन्नानधिकरणत्वं हेत्वधिकरणस्य घटादेः न संभवति, उत्पत्तिकाले घटे गुणसामान्याभावसत्त्वात् । अतः आत्मपर्यन्तानुधावनम् ।

तृतीयविवक्षानुसारेण समाधत्ते – **यादृश इति । यादृश्याः प्रतियोगिताया** अवच्छेदकावच्छिन्नानधिकरणत्वं हेतुमतः, तादृशप्रतियोगितावच्छेदकतानाश्रयत्वम् इत्यर्थः । **विवक्षितत्वात्** – अप्रतियोगिपदेन विवक्षितत्वात् । "कपिसंयोगाभाववान्, आत्मत्वात्" इत्यादौ गुणसामान्याभावत्वावच्छिन्नप्रतियोगिताया एव यादृश-प्रतियोगितापदेन उपादातुं शक्यतया तदनवच्छेदकत्वस्य कपिसंयोगाभावत्वे सत्त्वात् न अव्याप्तिः इति भावः । **अत्र च** यद्धर्मविशिष्टानधिकरणत्वं हेत्वधिकरणस्य तद्धर्मभिन्नसाध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यस्य लघोः निर्दुष्टस्य संभवेऽपि यथा संनिवेशे न वैयर्थ्यम् इति बोध्यम् ॥

राजीवोल्लासः

मूले ननु प्रतियोगितावच्छेदकावच्छिन्नस्य इत्यादि । प्रतियोगितावच्छेद-कावच्छिन्न-प्रतियोग्यनधिकरणत्वं हेत्वधिकरणे निवेशितम् । तत्र त्रेधा विकल्प्य दूष्यते – प्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्यनधिकरणत्वं इत्यनेन प्रतियोगिताव-च्छेदकावच्छिन्नयत्किंचित्प्रतियोग्यनधिकरणत्वं वा, प्रतियोगितावच्छेदकावच्छिन्न-प्रतियोगिसामान्यानधिकरणत्वं वा, प्रतियोगितावच्छेदकयत्किञ्चिद्धर्मावच्छिन्ना-नधिकरणत्वं वा विवक्षितम् ।

आद्ये "कपिसंयोगी एतद्वृक्षत्वात्" इत्यत्र अव्याप्तिः तदवस्था । कपिसंयोगाभावस्य प्रतियोगितावच्छेदकं कपिसंयोगत्वम् । तदवच्छिन्नः वृक्षवृत्तिकपि-

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

संयोगः, वृक्षावृत्तिगोपुरादिवृत्तिकपिसंयोगश्च । तत्र यत्किञ्चित्प्रतियोगिपदेन वृक्षावृत्तिगोपुरवृत्तिकपिसंयोगं गृहीत्वा तदनधिकरणं वृक्षः, तद्वृत्तिः कपिसंयोगाभावः इत्येवं कपिसंयोगाभावस्य लक्षणघटकतया तत्प्रतियोगितावच्छेदकत्वमेव कपिसंयोगत्वे इति ।

द्वितीये उक्ताव्याप्तिः यद्यपि वारयितुं शक्यते । प्रतियोगितावच्छेदककपिसंयोगत्वावच्छिन्नसामान्यान्तर्गत वृक्षवृत्तिकपिसंयोगानधिकरणत्वस्य वृक्षेऽसत्त्वेन प्रतियोगितावच्छेदकावच्छिन्न-प्रतियोगिसमानधिकरणहेत्वधिकरणवृत्तिः अभावः न कपिसंयोगाभावः, अपि तु अभावान्तरमेव इति, तत्प्रतियोगितानवच्छेदकत्वस्य कपिसंयोगत्वे सत्त्वात् । तथापि सर्वत्रैव प्रतियोगिव्यधिकरणाभावाप्रसिद्धिः । तथा हि – सर्वस्यैव अभावस्य पूर्वक्षणवृत्तित्वविशिष्टस्वाभावोऽपि प्रतियोगी । घटाभावस्य घटः यथा प्रतियोगी, तथा पूर्वक्षणवृत्तित्वविशिष्टस्य स्वस्य-घटाभावस्य अभावोऽपि प्रतियोगी । पर्वते घटाभावोऽपि वर्तते । पूर्वक्षणवृत्तित्वविशिष्टघटाभावाभावोऽपि वर्तते । घटाभावाधिकरणे पर्वते पूर्वक्षणवृत्तित्वविशिष्टघटाभावस्य उत्तरक्षणावच्छेदेन अभावसत्त्वात् । एवं च ''वन्हिमान् धूमात्'' इत्यादौ ''प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभाव'' पदेन घटाद्यभावं गृहीत्वा लक्षणसमन्वयः करणीयः । घटाद्यभावस्तु स्वप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिसामान्यानधिकरणहेत्वधिकरणवृत्तिः न भवति । घटाभावप्रतियोगितावच्छेदकघटत्वावच्छिन्नानधिकरणत्वस्य हेत्वधिकरणे पर्वतादौ सत्त्वेऽपि घटाभावप्रतियोगितावच्छेदकं यत् पूर्वक्षणवृत्तित्वविशिष्टघटाभावाभावत्वं तदवच्छिन्नस्यापि सामान्यान्तर्गततया तदनधिकरणत्वस्य पर्वतादौ अभावेन स्वप्रतियोगितावच्छेदकावच्छिन्नसामान्यानधिकरणहेत्वधिकरणवृत्त्यभावाप्रसिद्ध्या सर्वत्र सद्धेतौ असंभवः ।

न च – साध्यतावच्छेदकसंबन्धेन प्रतियोग्यनधिकरणत्वस्य पूर्वं विवक्षितत्वात् ''वन्हिमान् धूमात्'' इत्यादौ पूर्वक्षणवृत्तित्वविशिष्टघटाभावाभावरूप-

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्रतियोग्यधिकरणत्वं स्वरूपसंबन्धेनैव पर्वतादेः इति साध्यतावच्छेदकसंयोगसंबन्धेन तादृशप्रतियोग्यनधिकरणत्वं पर्वतादेः अस्त्येव इति, कथं प्रतियोगिव्यधिकरणाभाव-प्रसिद्धिः इति – वाच्यम् । घटाभावे यो वन्ह्यभावः सः घटाभावस्वरूपः । अभावाधि-करणकाभावस्य अधिकरणीभूताभावस्वरूपत्वात् । तथा च घटाभावस्य वन्हिरपि प्रतियोगीति प्रतियोगितावच्छेदकं वन्हित्वमपि । तदवच्छिन्नसामान्यान्तर्गतवन्हेः साध्यतावच्छेदकसंयोगसंबन्धेन अधिकरणमेव पर्वतादिः इत्येवं क्रमेण प्रतियोगि-सामान्यानधिकरणहेत्वधिकरणाप्रसिद्ध्या असंभवस्य दुर्वारत्वात् । यदि च अभावाधिकरणकाभावप्रतियोगिकाभाव एव अधिकरणीभूताभावस्वरूपः न तु भाव-प्रतियोगिकः, तथा च घटाभावाधिकरणकः वन्ह्यभावः न घटाभावस्वरूपः इत्युच्यते, तदापि अभावसाध्यकसद्धेतौ "धूमाभाववान् वन्ह्यभावात्" इत्यादौ अव्याप्तिः दुर्वारैव । तत्र हि साध्यतावच्छेदकसंबन्धः स्वरूपसंबन्धः । तत्र "हेत्वधिकरणवृत्तिः अभावः" इत्यनेन यो यः अभावः गृह्यते, तस्य सर्वस्यापि पूर्वक्षणवृत्तित्वविशिष्टस्वा-भावोऽपि प्रतियोगीति स्वरूपसंबन्धेन तदधिकरणमेव हेत्वधिकरणम् इति प्रतियोगि-सामान्यानधिकरणहेत्वधिकरणाप्रसिद्ध्या अव्याप्तिः इति ।

तृतीये तु प्रतियोगितावच्छेदकयत्किञ्चिद्धर्मावच्छिन्नानधिकरणत्वस्य हेत्वधिकरणे निवेशात् "वन्हिमान् धूमात्" इत्यादौ हेत्वधिकरणवृत्तेः घटाभावस्य घटत्वं पूर्वक्षणवृत्तित्वविशिष्टस्वाभावत्वं च प्रतियोगितावच्छेदकम् । तयोः "यत्किञ्चित्प्रतियोगितावच्छेदकम्" इत्यनेन घटत्वं गृहीत्वा तदवच्छिन्नघटानधि-करणहेत्वधिकरणपर्वतादिवृत्तिः घटाद्यभावः भवति इति प्रतियोगिव्यधिकरणा-भावाप्रसिद्धिः यद्यपि न भवति, तथापि "आत्मा कपिसंयोगाभाववान्, आत्मत्वात्" इत्यत्र अव्याप्तिः । आत्मत्ववति आत्मनि कपिसंयोगाभावस्य सत्त्वात् अयं सद्धेतुः । यद्यपि आत्मनः विभुत्वात् विभुत्वस्य च सर्वमूर्तद्रव्यसंयोगित्वरूपत्वात् आत्मन्यपि कपिसंयोगः अस्ति, तथापि आत्मनि कपिसंयोगः वृक्षाद्यवच्छेदेन वर्तते, भूतलाद्यवच्छेदेन कपिसंयोगाभावोऽपि वर्तते । अत्र हेतुः आत्मत्वम् ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

तदधिकरणम् आत्मा । तद्धृत्तिः अभावः प्रकृतसाध्याभावः कपिसंयोगाभावाभावः कपिसंयोगात्मकः । तस्य वृक्षावच्छेदेन आत्मनि सत्त्वात् । कपिसंयोगस्य यथा कपिसंयोगाभावत्वं प्रतियोगितावच्छेदकम्, तथा गुणसामान्याभावत्वमपि प्रतियोगितावच्छेदकम् । न च – गुणसामान्याभावत्वं गुणात्मकस्य गुणसामान्याभावा-भावस्यैव प्रतियोगितावच्छेदकम्, कथं कपिसंयोगस्य प्रतियोगितावच्छेदकम् इति – वाच्यम् । कपिसंयोगस्यापि गुणत्वात् गुणस्य प्रतियोगितावच्छेदकं गुणसामान्याभावत्वं गुणान्तर्गतस्य कपिसंयोगस्यापि प्रतियोगितावच्छेदकम् । एवं च कपिसंयोगात्मकाभावप्रतियोगितावच्छेदकं कपिसंयोगाभावत्वं गुणसामान्याभावत्वं च । तयोर्मध्ये ''यत्किञ्चित्प्रतियोगितावच्छेदक''पदेन गुणसामान्याभावत्वं गृहीत्वा तदवच्छिन्नानधिकरणत्वं हेत्वधिकरणस्य आत्मनः वर्तते । ज्ञानादिगुणाधिकरणे आत्मनि गुणसामान्याभावानधिकरणत्वसत्त्वात् । एवं च यत्किञ्चित्प्रतियो-गितावच्छेदकावच्छिन्नानधिकरणहेत्वधिकरणवृत्तिः अभावः कपिसंयोगाभावा-भावोऽपि । तत्प्रतियोगितावच्छेदकमेव साध्यतावच्छेदकं कपिसंयोगाभावत्वम् इति अव्याप्तिः इति **मूलग्रन्थस्य प्रघट्टकार्थः** ।

घटाभावस्य पूर्वक्षणवृत्तित्वविशिष्टस्वाभावोऽपि प्रतियोगी इति मूले उक्तम् । तत् शङ्कासमाधानाभ्यां उपपादयति **दिनकर्याम् न च पूर्वक्षणवृत्तित्वविशिष्टस्य** इति । पूर्वक्षणवृत्तित्वविशिष्टस्य घटाभावस्य अभावः पूर्वक्षणवृत्तित्वविशिष्ट-घटाभावाभावाभावस्य प्रतियोगी । न तु घटाभावस्य इति शङ्का । समाधानं तु – पूर्वक्षणवृत्तित्वविशिष्टस्य घटाभावस्य योऽभावः तस्य यः अभावः सः पूर्वक्षणवृत्तित्ववि-शिष्टघटाभाव स्वरूपः । तृतीयाभावस्य प्रथमाभावस्वरूपत्वात् । एवं च तृतीयाभावस्य प्रतियोगी द्वितीयाभावः – पूर्वक्षणवृत्तित्वविशिष्टघटाभावाभावः तृतीयाभावाभिन्निस्य प्रथमाभावस्य – पूर्वक्षणवृत्तित्वविशिष्टघटाभावस्य प्रतियोगी । पूर्वक्षण-वृत्तित्वविशिष्टघटाभावस्य घटाभावस्य च विशिष्टं शुद्धान्नातिरिच्यते इति न्यायेन अभिन्नतया विशिष्टस्य घटाभावस्य प्रतियोगी अभावः शुद्धस्य घटाभावस्यापि

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्रतियोगी । एवं च हेतुसमानाधिकरणस्य शुद्धघटाभावस्य प्रतियोगी – पूर्वक्षणवृत्तित्वविशिष्टघटाभावाभावः । तदधिकरणमेव पर्वत इति प्रतियोग्यनधिकरणहेत्वधिकरणाप्रसिद्ध्या प्रतियोग्यनधिकरणहेत्वधिकरणवृत्त्यभावाप्रसिद्धिः । तदप्रसिद्ध्या तद्घटितलक्षणस्य असंभव इति भावः ।

ननु तृतीयविकल्पे ''संयोगाभाववान् आत्मत्वात्'' इत्यत्रैव अव्याप्तेः वक्तुं शक्यतया कपिसंयोगाभावस्य साध्यत्वानुसरणं किमर्थम् इत्यत्र आह – **प्राचां मते** इति । प्राचीनमते द्रव्ये संयोगसामान्याभावः न अङ्गीक्रियते । अतः आत्मन्यपि संयोगसामान्याभावस्य असंभवात् संयोगसामान्याभावे साध्ये आत्मत्वं न सद्धेतुः इत्यालोच्य कपिसंयोगाभाववान् इत्युक्तम् । संयोगविशेषाभावस्तु द्रव्ये अङ्गीक्रियते प्राचीनैरपि इति आशयः ।

ननु ''कपिसंयोगाभाववान् घटत्वात्'' इत्यत्रैव अव्याप्तेः वक्तुं शक्यतया आत्मत्वहेत्वनुधावनम् किमर्थम् इत्यत्र आह – **घटत्वहेतुके** इति । ''कपिसंयोगाभाववान् घटत्वात्'' इत्यत्र प्रतियोगितावच्छेदकयत्किञ्चिद्धर्मावच्छिन्नानधिकरणत्वनिवेशकल्पे अव्याप्तिः वक्तुं न शक्यते । हेतोः घटत्वस्य अधिकरणे घटे कपिसंयोगात्मकाभावप्रतियोगितावच्छेदक-गुणसामान्याभावत्वावच्छिन्नाधिकरणत्वस्यैव सत्त्वात् उत्पत्तिकालावच्छिन्ने घटे ''उत्पन्नं द्रव्यं क्षणमगुणमक्रियं च तिष्ठति'' इति न्यायेन गुणसामान्याभावस्य सत्त्वात् । अतः प्रतियोगितावच्छेदकावच्छिन्नानधिकरणहेत्वधिकरणवृत्तिः अभावः न कपिसंयोगाभावाभावः । अपि तु अभावान्तरमेव । तत्प्रतियोगितानवच्छेदकत्वम् साध्यतावच्छेदके कपिसंयोगाभावत्वे अस्तीति अतः अव्याप्तिसंपादनाय आत्मत्वस्य हेतुत्वानुसरणम् । आत्मनस्तु नित्यतया तत्र संयोगसामान्याभावः न संभवति इति पूर्वोक्तरीत्या अव्याप्तिः संगच्छते । **तृतीयविवक्षानुसारेण** इति । प्रतियोगितावच्छेदकयत्किञ्चिद्धर्मावच्छिन्नानधिकरणत्वम् इति तृतीयविवक्षामेव अङ्गीकृत्य प्रतियोगिवैयधिकरण्यशरीरप्रविष्टायाः

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्रतियोगितायाः अग्रिमप्रतियोगितायाश्च ऐक्यविवक्षया परिष्कृत्य दोषवारणप्रकारं प्रदर्शयति **मूले** इति भावः ।

यादृश्याः प्रतियोगितायाः इत्यादि । यादृश्याः प्रतियोगितायाः अवच्छेदको यो धर्मः तदवच्छिन्नानधिकरणं हेत्वधिकरणं भवति, तादृश्याः प्रतियोगितायाः अनवच्छेदकं यत् साध्यतावच्छेदकं तदवच्छिन्नसामानाधिकरण्यं व्याप्तिः । ''कपिसंयोगाभाववान् आत्मत्वात्'' इत्यत्र लक्षणघटकः अभावः कपिसंयोगात्मकः कपिसंयोगाभावाभावः, तस्य कपिसंयोगाभावः गुणसामान्याभावश्च प्रतियोगी । प्रतियोगिता कपिसंयोगाभावनिष्ठा गुणसामान्याभावनिष्ठा च । कपिसंयोगाभावनिष्ठा प्रतियोगिता कपिसंयोगाभावत्वावच्छिन्ना । गुणसामान्याभावनिष्ठा प्रतियोगिता गुणसामान्याभावत्वावच्छिन्ना इति अवच्छेदकभेदात् एकाभावनिरूपितयोरपि प्रतियोगितयोः भेदः आवश्यकः । एवं च यादृशप्रतियोगितापदेन कपिसंयोगात्मकाभावनिरूपिता गुणसामान्याभावत्वावच्छिन्ना प्रतियोगिता गृह्यते तदवच्छेदकगुणसामान्याभावत्वावच्छिन्नानधिकरणत्वं हेत्वधिकरणस्य वर्तते । अग्रिमप्रतियोगितापदेन तादृशगुणसामान्याभावत्वावच्छिन्नप्रतियोगितैव ग्राह्या । तदवच्छेदकं गुणसामान्याभावत्वम् । तदनवच्छेदकं कपिसंयोगाभावत्वम् इति न अव्याप्तिः ।

एवं ''वन्हिमान् धूमात्'' इत्यादौ हेत्वधिकरणवृत्तिः अभावः घटाभावः । तस्य घटः पूर्वक्षणवृत्तित्वविशिष्टस्वाभावश्च प्रतियोगी । यादृशप्रतियोगितापदेन पूर्वक्षणवृत्तित्वविशिष्टस्वाभावनिष्ठा प्रतियोगिता ग्रहीतुं न शक्यते । तदवच्छेदकपूर्वक्षणवृत्तित्वविशिष्टस्वाभावत्वावच्छिन्नाधिकरणत्वस्यैव हेतुमति सत्त्वेन तदनधिकरणत्वविरहात् । किन्तु घटनिष्ठप्रतियोगितैव यादृशप्रतियोगितापदेन ग्राह्या । तदवच्छेदकघटत्वावच्छिन्नानधिकरणं हेत्वधिकरणं पर्वतादि । तादृशघटनिष्ठप्रतियोगितानवच्छेदकत्वं साध्यतावच्छेदके वन्हित्वे अस्ति इति न अव्याप्तिः ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

यादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वस्थाने यद्धर्मविशिष्टानधिकरणत्वं तादृशप्रतियोगितावच्छेदकत्वस्थाने तद्धर्मभिन्नत्वं च निवेश्य लघु व्याप्तिलक्षणं प्रदर्शयति – **अत्र च इति** । यद्धर्मः घटत्वादिः तद्विशिष्टघटाद्यनधि-करणत्वं हेत्वधिकरणस्य पर्वतादेः वर्तते । तद्धर्मघटत्वादिभिन्नं साध्यतावच्छेदकं वन्हित्वम्, तदवच्छिन्नसामानाधिकरण्यं धूमे अस्तीति लक्षणसमन्वयः । ईदृशस्य लघुलक्षणस्य संभवेऽपि मूलोक्तस्य गुरुभूतस्यापि लक्षणस्य न कोऽपि दोषः । लक्षणस्य लक्षणान्तरादूषकत्वात् । लघुलक्षणस्य गुरुलक्षणघटकत्वे गुरुलक्षणस्य वैयर्थ्यम् । प्रदर्शितं लघुलक्षणं तु न मूलोक्तलक्षणघटकम् । अतः तत् न दूषकम् इति आशयः ।।

मुक्तावली

ननु "कालः घटवान् कालपरिमाणात्" इत्यत्र प्रतियोगिव्यधिकरणाभावाप्रसिद्धिः । हेत्वधिकरणस्य महाकालस्य जगदाधारतया सर्वेषामेव अभावानां साध्यतावच्छेदकसंबन्धेन कालिकविशेषणतया प्रतियोग्यधिकरणत्वात् ।

अत्र केचित् – महाकालभेदविशिष्टघटाभावः तत्र प्रतियोगिव्यधिकरणः । महाकालस्य घटाधारत्वेऽपि महाकालभेदविशिष्टघटानाधारत्वात् महाकाले महाकालभेदाभावात् ।

वस्तुतस्तु प्रतियोगितावच्छेदकसंबन्धेन प्रतियोग्यनधिकरणीभूतहेत्वधिकरणवृत्त्यभावप्रतियोगितासामान्ये यत्संबन्धावच्छिन्नत्वयद्धर्मावच्छिन्नत्वोभयाभावः तेन संबन्धेन तद्धर्मावच्छिन्नस्य तद्धेतुव्यापकत्वं बोध्यम् । इत्थं च "कालः घटवान् कालपरिमाणात्" इत्यादौ संयोगसंबन्धेन घटाभावप्रतियोगिनोऽपि घटस्य अनधिकरणे हेत्वधिकरणे महाकाले वर्तमानः स एव संयोगेन घटाभावः तस्य प्रतियोगितायां कालिकसंबन्धावच्छिन्नत्वघटत्वावच्छिन्नत्वोभयाभावसत्त्वात् न अव्याप्तिः ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

ननु ''प्रमेयवह्निमान् धूमात्'' इत्यादौ प्रमेयवह्नित्वावच्छिन्नत्वम् अप्रसिद्धं गुरुधर्मस्यानवच्छेदकत्वात् – इति चेत्, न । ''कम्बुग्रीवादिमान् नास्ति'' इति प्रतीत्या कम्बुग्रीवादिमत्त्वावच्छिन्नप्रतियोगिताविषयीकरणेन गुरुधर्मस्यापि अवच्छेदकत्वस्वीकारात् इति संक्षेपः ।।

दिनकरी

साध्यतावच्छेदकसंबन्धेन प्रतियोग्यनधिकरणत्वविवक्षणे अव्याप्तिम् आशङ्कते – **ननु** इति । **महाकालभेदविशिष्टघटाभाव** इति । **अभावीयविशेषणताघटित-सामानाधिकरण्यसंबन्धेन** महाकालभेदविशिष्टस्य घटस्य अभाव इत्यर्थः । **महाकाले महाकालभेदाभावात्** इति । **अभावीयविशेषणताविशेषेण** महाकालभेदाभावात् इत्यर्थः । सामानाधिकरण्यघटकीभूतविशेषणविशेष्यसंबन्धाभ्यां यत्र विशेषणविशेष्योभयसत्त्वं तत्रैव विशिष्टाधिकरणत्वोपगमात् इति भावः ।

ननु महाकालमात्रवृत्तिविशेषणतासंबन्धेन साध्यतायां महाकालान्यत्व-विशिष्टघटाभावोऽपि न प्रतियोगिव्यधिकरणः । तत्र तेन संबन्धेन महाकालान्यत्व-विशिष्टघटाधिकरणाप्रसिद्धेः, अत आह – **वस्तुत** इति । अत्र प्रतियोगितावच्छेदक-संबन्धेन प्रतियोग्यनधिकरणहेत्वधिकरणवृत्त्यभावीयसाध्यतावच्छेदकसंबन्धावच्छिन्नप्रतियोगितानवच्छेदकत्वघटितलक्षणकरणेऽपि ''कालः घटवान् कालपरिमाणात्'' इत्यादौ अव्याप्तिः तदवस्थैव, साध्यतावच्छेदकसंबन्धावच्छिन्नतादृशप्रतियोगितायाः अप्रसिद्धेः, अतः प्रतियोगिताधर्मिकोभयाभावपर्यन्तानुधावनम् ।

समवायेन वह्न्यभावप्रतियोगितायां वह्नित्वावच्छिन्नत्वसत्त्वात् संयोगेन घटाभावप्रतियोगितायां साध्यतावच्छेदकसंयोगावच्छिन्नत्वस्य सत्त्वात् ''वह्निमान् धूमात्'' इत्यादौ अव्याप्तिवारणाय यत्संबन्धावच्छिन्नत्वयद्धर्मावच्छिन्नत्वयोः निवेशः । **संयोगेन घटाभावप्रतियोगितायां** धूमत्वावच्छिन्नत्वघटितोभयाभावसत्त्वात् अतिव्याप्तिवारणाय **सामान्ये** इति ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अप्रसिद्धम् इति । तथा च अव्याप्तिः इति भावः । **यदिच** ''कम्बुग्रीवादिमान् नास्ति'' इत्यादौ कम्बुग्रीवादिमत्प्रतियोगिताकाभाव एव विषयः, नतु कम्बुग्रीवादिमत्त्वे तत्प्रतियोगितावच्छेदकत्वमपि इत्युच्यते, तदा यत्किंचिद्घटवत्यपि ''कम्बुग्रीवादिमान् नास्ति'' इति वाक्यस्य प्रामाण्यापत्तिः इति हृदि निधाय **संक्षेप** इति ।।

राजीवोल्लासः

''प्रतियोगिव्यधिकरण हेतुसमानाधिकरण'' इत्यादि सिद्धान्तव्याप्तिलक्षणे ''कालो घटवान् कालपरिमाणात्'' इत्यत्र प्रतियोगिव्यधिकरणाभावाप्रसिद्धिः । कालपरिमाणरूपहेत्वधिकरणे महाकाले विद्यमानानां सर्वेषामप्यभावानां घटाद्यभावानां प्रतियोग्यनधिकरण- हेत्वधिकरणवृत्तित्वं नास्ति । तत्तदभावप्रतियोगिनां घटादीनां साध्यतावच्छेदककालिकसंबन्धेन अधिकरणत्वात् **हेत्वधिकरणस्य महाकालस्य** इत्युक्तं **मुक्तावल्याम्** ।

इयं च प्रतियोगिव्यधिकरणाभावाप्रसिद्धिः प्रतियोगितावच्छेदकसंबन्धेन प्रतियोग्यनधिकरणत्वविवक्षायां न संभवति । हेत्वधिकरणवृत्तिः अभावः इत्यनेन संयोगसमवायादिसंबन्धावच्छिन्नघटाद्यभावग्रहणे प्रतियोगितावच्छेदकसंयोगसमवायादि-संबन्धेन प्रतियोगिनः घटादेः अनधिकरणं महाकालः, तद्वृत्तित्वात् एषामभावानाम् इत्याशयेन साध्यतावच्छेदकसंबन्धेन प्रतियोग्यनधिकरणत्वविवक्षणे अप्रसिद्धिनिबन्धना-व्याप्तिः मूले आशङ्क्यते इत्याह – **साध्यतावच्छेदकसंबन्धेन** इति । **अभावीयविशे-षणता** इत्यादि । ''कालो घटवान् कालपरिमाणात्'' इत्यत्र महाकालभेदविशिष्टघटा-भावः प्रतियोग्यनधिकरणहेत्वधिकरणवृत्तिः अभावः । महाकाले घटस्य सत्त्वेऽपि महाकालभेदरूपविशेषणाभावात् महाकालभेदविशिष्टः घटः नास्ति । अतः विशिष्टघटरूपप्रतियोग्यनधिकरणकालवृत्तितया अयं लक्षणघटकः । तत्प्रतियोगिताव-च्छेदकं महाकालभेदविशिष्टघटत्वम् । अनवच्छेदकं घटत्वरूपं साध्यतावच्छेदकम् इति न अव्याप्तिः इति **मूलकारस्य** आशयः । स्वरूपसंबन्धेन महाकालभेदविशिष्टस्य –

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

महाकालभिन्नस्य – घटस्य महाकाले सत्त्वात्, विशिष्टघटः कुतो नास्ति इति शङ्कायां **अभावीयविशेषणताघटितसामानाधिकरण्यसंबन्धेन** इत्युक्तम् । स्वरूपसंबन्धेन यत् स्वाधिकरणं तद्वृत्तित्वसंबन्धेन महाकालभेदविशिष्टत्वं घटे विवक्षितम् । एतादृशसंबन्धेन महाकालभेदविशिष्टो घटः भूतले एव वर्तते । स्वरूपसंबन्धेन महाकालभेदवत् भूतलम् । तद्वृत्तित्वात् घटस्य । महाकाले तु स्वरूपसंबन्धेन महाकालभेदाभावात् स्वरूपसंबन्धेन महाकालभेदवद्वृत्तित्वसंबन्धेन महाकालभेदविशिष्टो घटो नास्ति ।

सामानाधिकरण्यं तदधिकरणवृत्तित्वम् । तदधिकरणम् इत्यनेन विशेषणाधिकरणं गृह्यते । तद्वृत्तित्त्वं तु विशेष्यस्य । सामानाधिकरण्यघटकीभूताभ्यां विशेषणविशेष्य-प्रतियोगिकसंसर्गाभ्यां यस्मिन्नधिकरणे विशेषणं विशेष्यं च वर्तते, तत्रैव विशिष्टं वर्तते इति नियमः । यथा भूतले स्वरूपसंबन्धेन महाकालभेदरूपं विशेषणं, संयोगसंबन्धेन घटरूपं विशेष्यं च वर्तते, अतः भूतले स्वरूपसंयोगोभयघटितसामानाधि-करण्यसंबन्धेन महाकालभेदविशिष्टो घटो वर्तते । महाकाले तु घटरूपस्य विशेष्यस्य सत्त्वेऽपि महाकालभेदरूपं विशेषणं स्वरूपसंबन्धेन नास्तीति स्वरूपसंबन्धघटित-सामानाधिकरण्यसंबन्धेन महाकालभेदविशिष्टघटः महाकाले नास्ति । तथा च महाकालभेदविशिष्टघटाभावः प्रतियोगितावच्छेदकावच्छिन्न- प्रतियोग्यनधिकरणहेत्वधि-करणवृत्तिः इति तमादाय लक्षणसमंन्वयात् न अव्याप्तिः इति भावः ।

न च महाकालभेदविशिष्टघटरूपप्रतियोग्यधिकरणं किञ्चित् प्रसिद्धं चेत् प्रतियोग्यनधिकरणं महाकालः भवेत् । तादृशविशिष्टप्रतियोग्यधिकरणं किम् इति वाच्यम् । खण्डकालस्यैव विशिष्टप्रतियोग्यधिकरणत्वात् । खण्डकाले महाकालभेदोऽपि स्वरूपसंबन्धेन वर्तते । घटश्च कालिकसंबन्धेन वर्तते । अतः साध्यताव-च्छेदककालिकसंबन्धेन महाकालभेदविशिष्टघटाधिकरणं खण्डकालः तदनधिकरणं महाकालः ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

वस्तुतः इति ग्रन्थमवतारयति – ननु महाकालमात्रवृत्तिविशेषणतासंबन्धेन इति । महाकालानुयोगिककालिकाविशेषणतासंबन्धेन इत्यर्थः । तथा च ''कालो घटवान् कालपरिमाणात्'' इत्यत्र महाकालानुयोगिककालिकसंबन्धेन घटः साध्यः । साध्यतावच्छेदकसंबन्धः महाकालानुयोगिककालिकसंबन्धः । तेन संबन्धेन महाकाल-भेदविशिष्टघटाधिकरणं खण्डकालः न भवति । खण्डकालानुयोगिककालिकसंबन्धेनैव तत्र विशिष्टघटस्य सत्त्वात् । एवं च पुनरपि साध्यतावच्छेदकसंबन्धेन विशिष्टघटरूप-प्रतियोग्यधिकरणाप्रसिद्ध्या प्रतियोग्यनधिकरणहेत्वधिकरणवृत्तिः अभावः महाकालभेदविशिष्टघटाभावोऽपि न संभवति इति अव्याप्तिर्दुर्वारा इत्याशङ्क्य वस्तुतः इत्यादिना प्रकारान्तरेण प्रतियोगिवैयधिकरण्यघटितव्याप्तिलक्षणम् परिष्करोति इत्यर्थः ।

तद्धर्मावच्छिन्नस्य – साध्यतावच्छेदकावच्छिन्नस्य तद्धेतुव्यापकत्वं नाम प्रतियोगितावच्छेदकसंबन्धेन प्रतियोग्यनधिकरणीभूतहेत्वधिकरणवृत्यभावीय-प्रतियोगितासामान्ये यत्संबन्धावच्छिन्नत्वयद्धर्मावच्छिन्नत्वोभयाभावः । समग्रं लक्षणं तु – प्रतियोगितावच्छेदकसंबन्धेन प्रतियोग्यनधिकरणीभूतहेत्वधिकरणवृत्यभावीय-प्रतियोगितासामान्ये यत्संबन्धावच्छिन्नत्व-यद्धर्मावच्छिन्नत्वोभयाभावः तद्धर्मावच्छिन्न-साध्यसामानाधिकरण्यं व्याप्तिः ।

यत्संबन्धपदेन साध्यतावच्छेदकसंबन्धः यद्धर्मपदेन साध्यतावच्छेदकधर्मश्च ग्राह्यः । ''पर्वतो वन्हिमान् धूमात्'' इत्यादौ प्रतियोगितावच्छेदकसंबन्धेन संयोगसंबन्धेन प्रतियोगिनः घटस्य अनधिकरणं धूमाधिकरणं पर्वतः । तद्वृत्तिः अभावः संयोगसंबन्धाव-च्छिन्नघटाभावः । तन्निरूपितप्रतियोगितायां साध्यतावच्छेदकसंयोगसंबन्धावच्छिन्नत्वं यद्यप्यस्ति, तथापि साध्यतावच्छेदकवन्हित्वावच्छिन्नत्वम् नास्ति इति संयोग-संबन्धावच्छिन्नत्ववन्हित्वावच्छिन्नत्वोभयाभावः वर्तते । वन्हित्वावच्छिन्न-वन्हिसामानाधिकरण्यं च धूमेऽस्तीति लक्षणसमन्वयः ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

"धूमवान् वन्हेः" इत्यादौ व्यभिचारिणि प्रतियोगितावच्छेदकसंयोगसंबन्धेन प्रतियोगिनः धूमस्य अनधिकरणं हेतोः वन्हेः अधिकरणं च अयोगोलकम् । तद्वृत्तिः अभावः संयोगसंबन्धा-वच्छिन्नधूमाभावः । तन्निरूपितप्रतियोगितायां साध्यतावच्छे-दकसंयोगसंबन्धावच्छिन्नत्वमप्यस्ति, साध्यतावच्छेदकधूमत्वावच्छिन्नत्वमप्यस्ति इति उभयाभावः नास्तीति न अतिव्याप्तिः ।

"कालो घटवान् कालपरिमाणात्" इत्यादौ संयोगसंबन्धेन घटाभावप्रतियोगिनः घटस्य अनधिकरणे हेत्वधिकरणे महाकाले वर्तमानः यः अभावः संयोगसंबन्धावच्छिन्न-घटाभावः तत्प्रतियोगितायां साध्यतावच्छेदकघटत्वावच्छिन्नत्वस्य सत्त्वेऽपि साध्यतावच्छेदककालिकसंबन्धावच्छिन्नत्वं नास्ति इति उभयाभावस्य सत्त्वात् तद्धर्मावच्छिन्न–घटत्वावच्छिन्न–सामानाधिकरण्यं कालपरिमाणेऽस्तीति लक्षणसमन्वयः ।

प्रत्येकाभावम् अनिवेश्य उभयाभावनिवेशस्य प्रयोजनमाह – **समवायेन वन्ह्यभावप्रतियोगितायाम्** इत्यादिना ।

तादृशप्रतियोगितासामान्ये यद्धर्मावच्छिन्नत्वाभावमात्रनिवेशे "वन्हिमान् धूमात्" इत्यादौ समवायसंबन्धेन वन्ह्यनधिकरणधूमाधिकरणवृत्ति समवायसं-बन्धावच्छिन्नवन्ह्यभावीय-वन्हिनिष्ठप्रतियोगितायां साध्यतावच्छेदकवन्हित्वावच्छिन्न-त्वस्यैव सत्त्वेन तदभावविरहात् अव्याप्तिः । तादृशप्रतियोगितायां यत्संबन्धाव-च्छिन्नत्वाभावमात्रनिवेशे "वन्हिमान् धूमात्" इत्यत्रैव संयोगसंबन्धेन घटरूपप्रतियोग्यनधिकरणधूमाधिकरणपर्वतवृत्तिसंयोगसंबन्धावच्छिन्नघटाभावीय-घटनिष्ठप्रतियोगितायां साध्यतावच्छेदकसंयोगसंबन्धावच्छिन्नत्वस्यैव सत्त्वेन तदभावविरहात् अव्याप्तिः । तद्वारणाय यत्संबन्धावच्छिन्नत्व–यद्धर्मावच्छिन्नत्वो-भयाभावनिवेशः । तन्निवेशे च समवायसंबन्धावच्छिन्नवन्ह्यभावीयप्रतियोगितायां साध्यतावच्छेदकसंयोगसंबन्धावच्छिन्नत्वाभावप्रयुक्तस्य उभयाभावस्य सत्त्वात्

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

संयोगसंबन्धावच्छिन्नघटाभावीयप्रतियोगितायां साध्यतावच्छेदकवन्हित्वावच्छिन्नत्वाभावप्रयुक्तस्य उभयाभावस्य सत्त्वात् न अव्याप्तिः ।

प्रतियोगितासामान्ये इत्यत्र सामान्यपदस्य प्रयोजनम् आह – **संयोगेन घटाभावप्रतियोगितायाम्** इति । सामान्यपदमनुपादाय यत्किञ्चित्प्रतियोगितानिवेशे "धूमवान् वन्हेः" इत्यत्र व्यभिचारिणि संयोगसंबन्धेन घटानधिकरणवन्ह्यधिकरणायोगोलकवृत्ति संयोगसंबन्धावच्छिन्नघटाभावीयप्रतियोगितायाः यत्किञ्चित्प्रतियोगितापदेन ग्रहणे तस्यां संयोगसंबन्धावच्छिन्नत्वसत्त्वेऽपि साध्यतावच्छेदकधूमत्वावच्छिन्नत्वविरहात् उभयाभावोऽस्तीतिअव्याप्तिः । सामान्यपदोपादाने तु तादृशयावत्प्रतियोगितायां उभयाभावो विवक्षितः । तथा च हेत्वधिकरणायोगोलकवृत्तिसंयोगसंबन्धावच्छिन्नधूमाभावीयधूमनिष्ठप्रतियोगिताया अपि तादृशयावत्प्रतियोगितान्तर्गततया तस्यां संयोगसंबन्धावच्छिन्नत्वधूमत्वावच्छिन्नत्वोभयसत्त्वेन तदुभयाभावविरहात् न अतिव्याप्तिः इति भावः ।

मुक्तावल्याम् – ननु प्रमेयवन्हिमान् इत्यादि । पूर्वोक्तरीत्या व्याप्तिलक्षणपरिष्कारेऽपि "प्रमेयवन्हिमान् धूमात्" इत्यादौ गुरुधर्मावच्छिन्नसाध्यकसद्धेतौ अव्याप्तिः । वन्हित्वापेक्षया प्रमेयवन्हित्वं गुरुधर्मः । तत्र साध्यतावच्छेदकं प्रमेयवन्हित्वम् । तदवच्छिन्नत्वं तु अप्रसिद्धम् । "प्रमेयवन्हिः नास्ति" इति प्रतीतिसिद्धाभावीयप्रतियोगितायामपि लघुधर्मस्य गुरुधर्मसमनियतस्य वन्हित्वस्यैव अवच्छेदकत्वात् वन्हित्वावच्छिन्नत्वमेवास्ति, न तु प्रमेयवन्हित्वावच्छिन्नत्वम् इति साध्यतावच्छेदकावच्छिन्नत्वस्य अप्रसिद्ध्या अव्याप्तिः इति शङ्का । समाधानं तु गुरुधर्मस्यापि प्रतीतिबलात् प्रतियोगितावच्छेदकत्वं स्वीक्रियते । अतः न अव्याप्तिः । तथा हि – "कम्बुग्रीवादिमान्नास्ति" इति प्रतीतिः कम्बुग्रीवादिमत्त्वावच्छिन्नप्रतियोगिताकत्वसंबन्धेन कम्बुग्रीवादिमद्विशिष्टमभावम् अवगाहमाना कम्बुग्रीवादिमत्त्वस्य प्रतियोगितावच्छेदकत्वमपि अवगाहते ।

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

ननु ''कम्बुग्रीवादिमान्नास्ति'' इति प्रतीतौ कम्बुग्रीवादिमत्प्रतियोगिकाभाव एव विषयः । स्वनिष्ठप्रतियोगिताकत्वसंबन्धेन कम्बुग्रीवादिमद्विशिष्टाभाव एव विषयः, न तु कम्बुग्रीवादिमत्त्वावच्छिन्नप्रतियोगिताकाभावः – कम्बुग्रीवादिमत्त्वावच्छिन्नप्रतियोगिताकत्वसंबन्धेन कम्बुग्रीवादिमद्विशिष्टोऽभावः । अतः उक्तप्रतीतिः कम्बुग्रीवादिमत्त्वे प्रतियोगितावच्छेदकत्वं न विषयीकरोति इत्याशयेन शङ्कते – **यदि च** इति । समाधत्ते – **तदा** इति । यत्किञ्चिद्घटाभावस्यापि कम्बुग्रीवादिमत्प्रतियोगिकतया यत्किञ्चिद्घटत्ववत्यपि भूतले यत्किञ्चिद्घटान्तराभावसत्त्वेन ''कम्बुग्रीवादिमान् नास्ति'' इति प्रतीतेः प्रमात्वं, तादृशवाक्यस्य प्रमाजनकत्वं च स्यात् । अतः कम्बुग्रीवादिमत्त्वावच्छिन्नप्रतियोगिताकाभाव एव तादृशप्रतीतेर्विषयः । यत्किञ्चिद्घटवति भूतले घटसामान्याभावस्य असत्त्वात् न ''कम्बुग्रीवादिमान् नास्ति'' इति वाक्यस्य प्रामाण्यम् । एवं च उक्तप्रतीत्या गुरुधर्मस्यापि अवच्छेदकत्वं सिद्ध्यतीति भावः ।

ननु प्रतियोगिताधर्मिकोभयाभावघटितलक्षणे गुरुधर्मावच्छिन्नसाध्यकाव्याप्त्याशङ्कैव न संभवति । गुरुधर्मस्य साध्यतावच्छेदकतायाः असंभवात् इति कथम् एतत् इति चेत्, न । स्वरूपसंबन्धरूपावच्छेदकताया एव गुरुधर्मे प्राचीनैः अनङ्गीकारात्, साध्यतावच्छेदकतायाः विषयताविशेषरूपत्वेन गुरुधर्मस्यापि तत्संभवात् इति हृदयम् इति **तरङ्गिणीकाराः** ।।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ पक्षतानिरूपणम् ॥

कारिकावली

सिषाधयिषया शून्या सिद्धिर्यत्र न तिष्ठति ।
स पक्षस्तत्र वृत्तित्वज्ञानादनुमितिर्भवेत् ॥ ७० ॥

मुक्तावली

पक्षवृत्तित्वम् इत्यत्र पक्षत्वं किम्? तदाह – **सिषाधयिषया** इति । **सिषाधयिषाविरह विशिष्टसिद्ध्यभावः पक्षता,** तद्वान् पक्ष इत्यर्थः । **सिषाधयिषामात्रं न पक्षता,** विनापि सिषाधयिषां घनगर्जितेन **मेघानुमानात्** । **अत एव** साध्यसंदेहोऽपि न पक्षता, विनापि साध्यसंदेहं तदनुमानात् । **सिद्धौ सत्यामपि** सिषाधयिषासत्त्वे अनुमितिः भवत्येव । **अतः** सिषाधयिषाविरहविशिष्टत्वं सिद्धौ विशेषणम् । **तथा च** यत्र सिद्धिः नास्ति तत्र सिषाधयिषायां सत्याम् असत्यामपि पक्षता । यत्र सिषाधयिषा अस्ति तत्र **सिद्धौ सत्याम्** असत्यामपि पक्षता । यत्र सिद्धिः अस्ति सिषाधयिषा च नास्ति तत्र न पक्षता, सिषाधयिषाविरहविशिष्टसिद्धेः सत्त्वात् ।

दिनकरी

मूले पक्षतानिरूपणे सङ्गतेः अप्रदर्शनात् तां प्रदर्शयति – **पक्षवृत्तित्वम् इत्यत्र** इति । **तथा च** प्रकृतस्य परामर्शस्य घटकतया पक्षधर्मत्वमपि प्रकृतं तदुपपादकत्वरूपोपोद्घातसङ्गत्या पक्षतानिरूपणम् । **व्याप्तिनिरूपितैककार्यकारित्वमेव** सङ्गतिः इति बोध्यम् । मूले पक्षतालक्षणस्य स्पष्टतया अनुक्तेः पक्षतालक्षणं स्वातन्त्र्येण प्रदर्शयन् मूलार्थम् आह – **सिषाधयिषाविरह** इति । घनगर्जितेन मेघानुमितिस्थले अव्याप्त्यापत्त्या सिषाधयिषामात्रस्य पक्षतात्वं निषेधति – **सिषाधयिषामात्रं न पक्षता** इति । **मेघानुमानात्** – मेघानुमितेः । **अत एव** – वक्ष्यमाणदूषणादेव । सिषाधयिषाविरहरूपविशेषणस्य प्रयोजनम् आह – **सिद्धौ**

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

सत्याम् इति । **अत इति** । तत्र अनुमितिनिर्वाहकपक्षतासिद्ध्यर्थम् इति भावः । **तत्र सिषाधयिषायां सत्याम् असत्यामपि इति** । सत्याम् उभयाभावप्रयुक्तस्य, असत्यां विशेष्याभावमात्रप्रयुक्तस्य उक्तविशिष्टाभावस्य सत्त्वात् इति भावः । **सिद्धौ सत्याम् असत्यामपि इति** । सत्यां विशेषणाभावमात्रप्रयुक्तस्य, असत्यां तु उभयाभावप्रयुक्तस्य विशिष्टाभावस्य सत्त्वात् इति भावः । **सिद्धेः सत्त्वात् इति** । सिद्धेः सत्त्वेन तदभावरूपपक्षताया अभावात् इति भावः । **सिषाधयिषाविरहवैशिष्ट्यं च सिद्धौ एककालावच्छेदेन एकात्मवृत्तित्वम्** । तेन सिषाधयिषाकालीनसिद्धेः कालिकसंबन्धेन सिषाधयिषाविरहविशिष्टत्वसत्त्वेऽपि न क्षतिः ॥

राजीवोल्लासः

पक्षवृत्तित्वम् इत्यत्र पक्षत्वं किम् इत्यनन्तरं इति इति पूरणीयम् । त्रलः घटकत्वमर्थः । पक्षवृत्तित्वघटकं पक्षत्वं जिज्ञासाविषयः इति हेतोः पक्षत्वम् आह इत्यर्थः । परामर्शनिरूपणानन्तरं पक्षतानिरूपणे सङ्गतिम् आह – **तथा च इति** । प्रकृतार्थोपपादकत्वरूपोपोद्घातसङ्गत्या पक्षतानिरूपणम् । प्रकृतस्य परामर्शस्य घटकतया पक्षधर्मत्वमपि प्रकृतम् । पक्षधर्मत्वोपपादकं पक्षतानिरूपणम् । पक्षधर्मत्वोपपादकत्वं नाम पक्षधर्मत्वविषयकज्ञानोपयोगित्वम् । पक्षतानिरूपणेन पक्षतायां ज्ञातायां पक्षताश्रयवृत्तित्वरूपं पक्षधर्मत्वं ज्ञायत इति पक्षतानिरूपणस्य पक्षधर्मत्वोपपादकत्वम् ।

ननु परामर्शनिरूपणानन्तरं पक्षतानिरूपणे उपोद्घातसङ्गतिः भवतु । परन्तु परामर्शघटकव्याप्तिनिरूपणाव्यवहितोत्तरं पक्षतानिरूपणे का सङ्गतिः? इति, अत्र आह – **व्याप्तिनिरूपित इति** । पक्षतानिष्ठा व्याप्तिनिरूपिता सङ्गतिश्च एककार्यप्रयोजकत्वम् । प्रयोजकत्वं च कारणकारणतावच्छेदकसाधारणम् । तत्र पक्षतायाः अनुमितिं प्रति साक्षात् कारणत्वम् । व्याप्तेस्तु अनुमितिकारणज्ञानविषयतया

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

कारणतावच्छेदकत्वम् । विषयितासंबन्धेन व्याप्तिविशिष्टज्ञानस्य अनुमितिकारणत्वात् व्याप्तेः अनुमितिकारणतावच्छेदकत्वम् । एवं च अनुमितिरूपैककार्यप्रयोजकत्वम् व्याप्तेः पक्षतायाश्च अस्तीति एककार्यप्रयोजकत्वसङ्गत्या व्याप्तिनिरूपणानन्तरं पक्षतानिरूपणम् इति भावः ।

सिषाधयिषाविरहविशिष्टसिद्ध्यभावः पक्षता इति । सिषाधयिषा नाम तत्साध्यविशिष्टतत्पक्षविषयकत्वप्रकारिका अनुमितिविषयकेच्छा ''वन्हिविशिष्टपर्वतविषयकानुमितिः जायताम्'' इत्याकारिका । सिद्धिर्नाम साध्यनिश्चयः ''पर्वतो वन्हिमान्'' इत्याकारकः । सिषाधयिषाविरहविशिष्टा या सिद्धिः तदभावः पक्षता इत्यर्थः । घनगर्जनश्रवणेन मेघानुमितिस्थले सिषाधयिषां विनापि अनुमितेरुत्पत्या व्यतिरेकव्यभिचारात् सिषाधयिषामात्रं न पक्षता । एवं साध्यसन्देहं विनापि घनगर्जितेन मेघानुमितेः साध्यसन्देहोऽपि न पक्षता । घनगर्जितं नाम मेघस्य विलक्षणः शब्दः । तथा च ''गगनं मेघवत् विजातीयशब्दवत्वात्'' इत्यनुमितिः ।

सिद्धौ सिषाधयिषाविरहविशिष्टत्वविशेषणस्य प्रयोजनम् उक्तम् – **सिद्धौ सत्यामपि** इत्यादिना मूले । यत्र ''पर्वतो वन्हिमान्'' इति साध्यनिश्चयः अस्ति, ''वन्हिविशिष्टपर्वतविषयकानुमितिर्जायताम्'' इति इच्छा च वर्तते, तत्र ''पर्वतो वन्हिमान्'' इत्यनुमितिः इष्यते । सिद्ध्यभावमात्रस्य पक्षतात्वे तदनुपपत्तिः । तत्र सिद्धेरेव सत्त्वात् । अतः सिद्धौ सिषाधयिषाविरहरूपं विशेषणम् । उक्तस्थले सिद्धिरूपविशेष्यसत्त्वेऽपि सिषाधयिषाविरहरूपविशेषणाभावात् विशिष्टसिद्ध्यभावरूपा पक्षता निर्वहति ।

सिषाधयिषाविरहविशिष्टसिद्ध्यभावरूपा पक्षता क्वचित् विशेषणाभावप्रयुक्ता, क्वचित् विशेष्याभावप्रयुक्ता, क्वचित् उभयाभावप्रयुक्ता इति निरूपयति – **तथा च यत्र सिद्धिः नास्ति** इत्यादिना ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

१. यत्र सिद्धिः सिषाधयिषा च तत्र सिषाधयिषाविरहरूपविशेषणाभावप्रयुक्तविशिष्टाभावरूपा पक्षता ।

२. यत्र सिद्धिर्नास्ति सिषाधयिषा च नास्ति तत्र सिषाधयिषाविरहरूपविशेषणसत्त्वेऽपि सिद्धिरूपविशेष्याभावात् विशेष्याभावप्रयुक्तविशिष्टाभावरूपा पक्षता ।

३. यत्र सिद्धिर्नास्ति सिषाधयिषा च अस्ति तत्र सिद्धिरूपविशेष्याभावात् सिषाधयिषाविरहरूपविशेषणाभावात् च उभयाभावप्रयुक्तविशिष्टाभावरूपा पक्षता ।

४. यत्र सिद्धिरस्ति सिषाधयिषा च नास्ति तत्र विशेषणविशेष्ययोः उभयोः सत्त्वात् सिषाधयिषाविरहविशिष्टसिद्धिरेवास्तीति विशिष्टाभावरूपपक्षता नास्ति । अतः तादृशस्थले विशिष्टसिद्धेः अनुमितिप्रतिबन्धकतया न अनुमितिः ।

व्याख्यायां **सिषाधयिषाविरहवैशिष्ट्यं च** इति । सिद्धौ सिषाधयिषाविरहवैशिष्ट्यम् एककालावच्छेदेन एकात्मवृत्तित्वम् । एकस्मिन् काले एकस्मिन् आत्मनि सिषाधयिषाविरहः सिद्धिश्च यत्र अस्ति तत्र सिद्धौ एककालावच्छेदेन एकात्मवृत्तित्वसंबन्धेन सिषाधयिषाविरहविशिष्टत्वम् । एतादृशसंबन्धाविवक्षायां सिषाधयिषाकालीनसिद्धेः कालिकसंबन्धेन सिषाधयिषाविरहविशिष्टत्वात् अनुमितिप्रतिबन्धकत्वापत्तिः । **न क्षतिः** इति । न अनुमित्यनुपपत्तिः इत्यर्थः ।

मुक्तावली

ननु यत्र परामर्शानन्तरं सिद्धिः, ततः सिषाधयिषा, तत्र सिषाधयिषाकाले परामर्शनाशात् न अनुमितिः, यत्र सिद्धि-परामर्श-सिषाधयिषाः क्रमेण भवन्ति, तत्र सिषाधयिषाकाले सिद्धेः नाशात् प्रतिबन्धकाभावादेव अनुमितिः, यत्र सिषाधयिषा-सिद्धि-परामर्शाः तत्र परामर्शकाले सिषाधयिषैव नास्ति; एवम् अन्यत्रापि सिद्धिकाले

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

परामर्शकाले च न सिषाधयिषा, योग्यविभुगुणानां यौगपद्यनिषेधात् । तत्कथं सिषाधयिषाविरहविशिष्टत्वं सिद्धेः विशेषणम् इति चेत्, न –

यत्र "वह्निव्याप्यधूमवान् पर्वतः वह्निमान्" इति प्रत्यक्षं स्मरणं वा, ततः सिषाधयिषा तत्र पक्षतासंपत्तये तद्विशेषणस्य आवश्यकत्वात् ।

इदं तु बोध्यम् – यादृशयादृशसिषाधयिषासत्त्वे सिद्धिसत्त्वे यल्लिङ्गकानुमितिः तादृशतादृशसिषाधयिषाविरहविशिष्टसिद्ध्यभावः तल्लिङ्गकानुमितौ पक्षता । तेन सिद्धिपरामर्शसत्त्वे "यत्किंचित् ज्ञानं जायताम्" इति इच्छायामपि न अनुमितिः । "वह्निव्याप्यधूमवान् पर्वतः वह्निमान्" इति प्रत्यक्षसत्त्वे "प्रत्यक्षातिरिक्तं ज्ञानं जायताम्" इति इच्छायां तु भवत्येव । एवं धूमपरामर्शसत्त्वे "आलोकेन वह्निम् अनुमिनुयाम्" इति इच्छायामपि न अनुमितिः ।

सिषाधयिषाविरहकाले यादृशसिद्धिसत्त्वे न अनुमितिः तादृशी सिद्धिः विशिष्यैव तत्तदनुमितिप्रतिबन्धिका वक्तव्या । तेन "पर्वतः तेजस्वी, पाषाणमयः वह्निमान्" इति ज्ञानसत्त्वेऽपि अनुमितेः न विरोधः । परंतु पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धावपि तदवच्छेदेन अनुमितेः दर्शनात् पक्षतावच्छेदकावच्छेदेन अनुमितिं प्रति पक्षतावच्छेदकावच्छेदेन साध्यसिद्धिरेव प्रतिबन्धिका । पक्षतावच्छेदकसामानाधिकरण्येन अनुमितिं प्रति तु सिद्धिमात्रं विरोधि ।।

दिनकरी

परामर्शरूपकारणसत्त्वे सिद्धिरूपविरोधिसत्त्वे यदि अनुमित्सा स्यात् तदा तस्याः उत्तेजकत्वं वाच्यम् । न च एतत् संभवति इति आशङ्कते – ननु यत्र इति । परामर्शानन्तरं – परामर्शद्वितीयक्षणे । ततः – सिद्ध्युत्पत्तिद्वितीयक्षणे । क्रमेण अव्यवधानेन । एवमन्यत्रापि इति । यत्र परामर्श-सिषाधयिषा-सिद्धयः क्रमेण भवन्ति, एवं सिद्धि-सिषाधयिषा-परामर्शाः, एवं सिषाधयिषा-परामर्श-सिद्धयश्च तत्र इत्यर्थः । सिद्धिकाले परामर्शकाले च इति । सिद्धिपरामर्शोभयक्षण

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

इत्यर्थः । **कथम्** इति । किमर्थम् इत्यर्थः । **इति प्रत्यक्षम्** इति । **अनुमितीष्टसाधनताविषयकम्** इति शेषः । प्रत्यक्षोत्पत्तेः पूर्वम् अनुमितीष्टसाधनताधीस्वीकारे इच्छासामग्र्या प्रतिबन्धात् प्रत्यक्षमेव न स्यात् ।

यादृशयादृश इति । "घटानुमितिः जायताम्" इति इच्छासत्त्वेऽपि "पर्वतो वह्निमान्" इति सिद्ध्यसत्त्वे "वह्निमान्" इत्यनुमित्युत्पत्तेः, "पर्वतो वह्निमान्" इति सिद्धिसत्त्वेऽपि तदिच्छाबलात् तादृशानुमित्यापत्तिः, अत उक्तं – **सिद्धिसत्त्व** इति । इदं च उत्तेजकेच्छाव्यक्तेः **परिचायकं रूपम्** । उत्तेजकत्वं तु तत्तद्व्यक्तित्वेनैव इति बोध्यम् । **तेन** – तत्तदिच्छाया उत्तेजकत्वेन । **"यत्किञ्चित् ज्ञानम्"** इत्यस्य **एतदुत्तरकालीनम्** **इत्यादिः** । यत्किंचित् ज्ञानस्य सर्वदा सिद्धत्वेन तद्रूपेण इच्छाविरहात् । **न अनुमितिः** इति । न अनुमित्यापत्तिः इत्यर्थः । **तदिच्छायाः** तद्व्यक्तित्वेन उत्तेजकत्वानभ्युपगमात् इति भावः । न च – "यत्किंचित् ज्ञानं जायताम्" इत्येतादृशेच्छाकाले सिद्धिसत्त्वेऽपि अनुमितिः भवत्येव इति – वाच्यम् । **अनुमितिसामग्रीसत्त्वे** आत्मादिविषयकयत्किंचिन्मानसादिसामग्रीसत्त्वनियमेन यत्किंचिन्मानसाद्युत्पत्त्यैव तादृशेच्छाविषयसिद्धेः तत्रानुमित्युत्पत्तौ इष्टापत्त्यसंभवात् । **ननु अनुमितित्वप्रकारकेच्छात्वेन** अनुगतरूपेणैव उत्तेजकत्वं वाच्यम्, तावतैव "यत्किंचित् ज्ञानं जायताम्" इति इच्छावारणसंभवात्, न तु तत्तद्व्यक्तित्वेन उत्तेजकत्वं कल्प्यम्, गौरवात् इति, अत आह – **वह्निव्याप्य** इति । **"प्रत्यक्षातिरिक्तं ज्ञानम्"** इत्यस्य **"शाब्दसामग्र्यसत्त्वे"** इत्यादिः । शाब्दसामग्रीसत्त्वे शाब्दबोधेनैव इच्छाविषयसिद्धिसंभवात् । **"भवत्येव"** इत्यनुमितिः इत्यनेन संबध्यते । तथा च अनुमितित्वप्रकारकेच्छात्वेन उत्तेजकत्वे तत्र अनुमितिः न स्यात् इति भावः । **तल्लिङ्गकत्वप्रवेशस्य फलमाह – एवम्** इत्यादिना । **न अनुमितिः** इति । **इच्छायाः तत्तद्व्यक्तित्वेन** उत्तेजकतया तदिच्छाव्यक्तेः अनुत्तेजकत्वात् इति भावः ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

इदं तु बोध्यम् – ''पर्वते वह्न्यनुमितिः जायताम्'' इत्याद्यनुगतेच्छानां पर्वतत्वावच्छिन्नोद्देश्यकत्वप्रकारतानिरूपितवह्निविधेयकत्वप्रकारताशाल्यनुमितिगोचरेच्छात्वेन अनुगतरूपेणैव उत्तेजकत्वं, ''प्रत्यक्षातिरिक्तं ज्ञानं जायताम्'' इत्याद्यननुगतेच्छानां तु तत्तद्व्यक्तित्वेन, नतु सकलेच्छानां तत्तद्व्यक्तित्वेन, गौरवात् इति । **सिषाधयिषाकाले** ''पर्वतो वह्निमान्'' इति सिद्धिसत्त्वेऽपि ''पर्वतो वह्निमान्'' इत्यनुमित्युत्पत्तेः तादृशसिद्धेः न तादृशानुमितिप्रतिबन्धकत्वं स्यात्, अत उक्तं **सिषाधयिषाविरहकाले** इति । **विशिष्य** इति । ''पर्वतो वह्निमान्'' इत्याद्यनुमितौ पर्वतत्वाद्यवच्छिन्नविशेष्यतानिरूपित-वह्नित्वाद्यवच्छिन्नप्रकारताशालिनिश्चयत्वेन प्रतिबन्धकता वक्तव्या इत्यर्थः । तत्प्रयोजनम् आह – **तेन** इति । ''**सिद्धिरेव**'' इति ''एव''कारेण सामानाधिकरण्येन सिद्धिव्यवच्छेदः । **सामानाधिकरण्येनानुमितिं प्रति तु** इति । **सामानाधिकरण्यमात्रेण** अनुमितिं प्रति इत्यर्थः । **अन्यथा** अवच्छेदकावच्छेदेनानुमितेरपि सामानाधिकरण्यावगाहितया तद्व्यवच्छेदाप्रतीतेः । **सिद्धिमात्रम्** इति । पक्षविशेष्यकसाध्यप्रकारकनिश्चयत्वेन विरोधित्वमित्यर्थः ।।

राजीवोल्लासः

परामर्शरूपकारणसत्त्वे इति । अनुमितेः परामर्शः कारणम् । सिद्धिः प्रतिबन्धिका । सिषाधयिषा च उत्त्तेजिका । एतेषां त्रयाणां एककाले सत्त्वे एव सिषाधयिषायाः उत्तेजकत्वं स्यात् । तेषां त्रयाणां एककाले सत्त्वम् न संभवति, ज्ञानेच्छयोः द्विक्षणमात्रस्थायित्वात् इत्याशयेन शङ्कते **मूले** इति भावः ।

एतदुक्तम् भवति –

१. यत्र सिद्धि-सिषाधयिषा-परामर्शाः क्रमेण भवन्ति, ततो अनुमितिः, तत्र परामर्शक्षणे सिद्धेर्नाशात् सिद्ध्यभावरूपा पक्षता अस्ति इति सिषाधयिषा विरहविशिष्टत्वरूपं विशेषणं व्यर्थम् ।

२. यत्र सिषाधयिषा-सिद्धि-परामर्शानुमितयः क्रमेण भवन्ति, तत्र परामर्शक्षणे सिषाधयिषायाः नाशात् सिषाधयिषाविरहविशिष्टसिद्धेरेव

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

सत्त्वेन विशिष्टाभावरूपपक्षतायाः अनिर्वाहात् विशेषणे दत्तेऽपि न इष्टसिद्धिः ।

३. यत्र परामर्श-सिषाधयिषा-सिद्ध्यनुमितयः, यत्र वा परामर्श-सिद्धि-सिषाधयिषा-अनुमितयः तत्र अनुमितिपूर्वक्षणे पक्षतारूपकारणसत्त्वेऽपि परामर्शविरहात् कथम् अनुमितिः भविष्यति?

न च एतेषु कश्चिद्गुणः त्रिक्षणस्थायी । आत्मविशेषगुणानां स्वोत्तरवर्तिगुणनाश्यत्वेन द्विक्षणमात्रस्थायित्वेन अभ्युपगमात् । तथा च सिषाधयिषाविरहविशिष्टत्वरूपविशेषणं व्यर्थम् इति ।

उक्ताशङ्कां समाधत्ते मूले – यत्र वन्हिव्याप्यधूमवान् पर्वतः इत्यादिना । यत्र आदौ "वन्हिव्याप्यधूमवान् पर्वतो वन्हिमान्" इति सिद्ध्यात्मपरामर्शरूपं प्रत्यक्षम्, स्मरणं वा, तदनन्तरक्षणे सिषाधयिषा तत्र सिषाधयिषाकाले सिद्धि-परामर्श-सिषाधयिषाणां समावेशात् सिषाधयिषानन्तरक्षणे अनुमित्युत्पत्त्यर्थं सिषाधयिषोत्पत्तिक्षणे पक्षता संपादनीया भवति । सिद्ध्यभावमात्रस्य पक्षतात्वे सिषाधयिषोत्पत्तिक्षणे तत्पूर्वोत्पन्नसिद्धेः सत्त्वात् सिद्ध्यभावरूपा पक्षता न निर्वहति । सिषाधयिषाविरहविशिष्टत्वविशेषणे दत्ते तु तत्काले सिषाधयिषाविरहरूप-विशेषणाभावात् विशिष्टसिद्ध्यभावरूपा पक्षता निर्वहतीति भावः ।

ननु "वन्हिव्याप्यधूमवान् पर्वतो वन्हिमान्" इति प्रत्यक्षपरामर्शानन्तरं सिषाधयिषैव न संभवति । अनुमितीच्छारूपसिषाधयिषां प्रति "अनुमितिः मदिष्टसाधनम्" इत्याकारकस्य इष्टसाधनताज्ञानस्य हेतुत्वात् पूर्वं तदभावात् । उपायेच्छां प्रति इष्टसाधनताज्ञानं कारणम् । अनुमितिः वन्ह्यर्थिप्रवृत्तिं प्रति उपायः इति । यदि तु इष्टसाधनताज्ञानं प्रत्यक्षपरामर्शात् पूर्वक्षणे उत्पद्यते इत्युच्यते, तदा प्रत्यक्षमेव न संभवति । प्रत्यक्षसामग्र्यपेक्षया इच्छासामग्र्याः बलवत्त्वात् । यदि तु प्रत्यक्षात्मकपरामर्शानन्तरं इष्टसाधनताज्ञानं तदनन्तरं सिषाधयिषा इत्युच्यते तदा

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

सिषाधयिषोत्पत्तिक्षणे प्रत्यक्षरूपपरामर्श एव नष्ट इति कथम् अनुमितिः भविष्यति? इत्याशयेन शेषं पूरयति **दिनकर्यां – अनुमितीष्टसाधनताविषयकम् इति शेषः** इति । तथा च आदौ "अनुमितिः मदिष्टसाधनम्, पर्वतो वन्हिमान् वन्हिव्याप्यधूमवांश्च" इत्याकारकसमूहालम्बनप्रत्यक्षम्", ततः सिषाधयिषा, ततोऽनुमितिः । तत्र सिषाधयिषाक्षणे पक्षतासंपत्तये सिषाधयिषाविरहविशिष्टत्वविशेषणम् इति भावः ।

अत्र परामर्शस्य चाक्षुषादिप्रत्यक्षरूपत्वे तस्य अनुमितीष्टसाधनताविषयकत्वं न संभवति । स्वायोग्यमुख्यविशेष्यकज्ञाने चक्षुरादेः असामर्थ्यात् इत्यालोच्य **स्मरणम् वा** इत्युक्तम् ।

परिचायकं रूपम् इति । **"यद्यदिच्छासत्त्वे सिद्धिसत्त्वे अनुमितिः"** इत्यन्तं तत्तद्व्यक्तित्वेन विशिष्य इच्छाव्यक्तीनां ज्ञानसंपादकम् इत्यर्थः ।

ननु "यत्किञ्चिज्ज्ञानं जायताम्" इति इच्छैव न संभवति । सिद्धे वस्तुनि इच्छानुत्पत्तेः, यत्किञ्चिज्ज्ञानस्य सिद्धत्वात् । न च – सिद्धेऽपि सिद्धत्वेन अज्ञानदशायाम् इच्छादर्शनात्न अनुपपत्तिः इति – वाच्यम् । सिद्धत्वज्ञानाभावेऽपि उत्पन्नज्ञानादिव्यक्तौ इच्छानुत्पत्त्या ज्ञानादिव्यतिरिक्तस्थले एव सिद्धत्वज्ञानं प्रतिबन्धकम्, ज्ञानादौ तु सिद्धमात्रं विरोधि इति सिद्धान्तात् । अत एव उक्तम् "सिद्धे इच्छाविरहात्" इति तत्र तत्र ग्रन्थकृद्भिः इति, अतः व्याचष्टे – **एतदुत्तरकालीनम्** इत्यादि ।

तदिच्छायाः इति । एतदुत्तरकालीनं यत्किञ्चिज्ज्ञानं जायताम् इति इच्छायाः इत्यर्थः ।

अनुमितिसामग्रीसत्त्वे इति । अनुमितिसामग्र्यभावे तादृशेच्छाबलात् अनुमितौ इष्टापत्तिरेव न संभवति । तत्सत्त्वे परामर्शादिसत्त्वेन आत्मनः मानससामग्रीसत्त्वेन तादृशमानसोत्पत्त्यापि इच्छायाः विषयसिद्ध्या अनुमित्युत्पादासंभवात् यादृशेच्छायाः

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अनुमितिं विना न विषयसिद्धिः, तादृशेच्छायाः एव उत्तेजकत्वोपगमात् इति भावः ।

ननु अनुमितित्वप्रकारक इति । ननु उत्तेजकभूतानां बह्वीनां इच्छानां ''पर्वते वन्ह्यनुमितिर्जायताम्'', ''पर्वते वन्हिमनुमिनुयाम्'', ''वन्हिविशिष्ट-पर्वतविषयकानुमितिर्जायताम्'' इत्यादीनाम् तत्तद्व्यक्तित्वेन उत्तेजकत्वकल्पनापेक्षया अनुमितित्वप्रकारकेच्छात्वेन अनुगतरूपेणैव उत्तेजकत्वं वक्तव्यम् । तावतैव ''यत्किञ्चिज्ज्ञानं जायताम्'' इति इच्छायाः ज्ञानत्वप्रकारिकायाः अनुमितित्वप्रकारक-त्वाभावादेव तदिच्छाकाले सिद्धिपरामर्शसत्त्वे अनुमितिवारणसंभवात् इत्याशङ्क्य ''वन्हिव्याप्यधूमवान् पर्वतः वन्हिमान्'' इत्याकारकप्रत्यक्षात्मकसिद्धिरूपपरामर्शसत्त्वे ''प्रत्यक्षातिरिक्तं ज्ञानं जायताम्'' इति इच्छायां सत्यां ''पर्वतो वन्हिमान्'' इत्यनुमितिः इष्यते । तस्याः इच्छायाः प्रत्यक्षातिरिक्तत्वविशिष्टज्ञानत्वप्रकारकत्वेन अनुमितित्वप्रकारकत्वविरहात् उत्तेजकत्वं न स्यात् । अतः उत्तेजकत्वेन संमतानां इच्छानां तत्तद्व्यक्तित्वेनैव उत्तेजकत्वं वाच्यम् इति भावः । प्रतिबन्धककालीन-कार्योत्पादकत्वम् उत्तेजकत्वम् ।

ननु ''वन्हिव्याप्यधूमवान् पर्वतो वन्हिमान्'' इति प्रत्यक्षानन्तरं ''वन्हेः प्रत्यक्षातिरिक्तं ज्ञानं जायताम्'' इति इच्छाबलेन वन्ह्यनुमितिर्न संभवति । वन्हिविषयकशाब्दबोधस्यापि प्रत्यक्षातिरिक्तज्ञानतया वन्हिशाब्दबोधोत्पत्त्यापि तादृशेच्छाविषयसिद्धिसंभवात् । तथा च तस्याः उत्तेजकत्वं नेष्यते । यस्याः इच्छायाः अनुमितिं विना न विषयसिद्धिः तस्या एव उत्तेजकत्वात्, इत्याशङ्कानिरासाय पूरयति – **शाब्दसामग्र्यसत्त्वे** इति । तथा च शाब्दसामग्र्यसत्त्वे वन्हेः शाब्दबोधासंभवेन अनुमित्युत्पत्त्यैव इच्छायाः विषयसिद्धिः भवति इति अभिप्रायः ।

इच्छायास्तत्तद्व्यक्तित्वेन इत्यादि । तल्लिङ्गकत्वानिवेशे ''वन्हिव्याप्य-धूमवान् पर्वतः वन्हिमान्'' इति सिद्ध्यात्मकधूमलिङ्गकपरामर्शसत्त्वे ''आलोकेन

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

वन्हिमनुमिनुयाम्'' इत्याकारकेच्छासत्त्वेऽपि अनुमितिः न भवति । पर्वतत्वावच्छिन्नोद्देश्यक – वन्हित्वावच्छिन्नविधेयक – धूमत्वावच्छिन्नलिङ्गकानुमितिं प्रति ''आलोकेन वन्हिमनुमिनुयाम्'' इति आलोकलिङ्गकत्वप्रकारकेच्छायाः प्रतिबन्धकतया अनुत्तेजकत्वात् । तल्लिङ्गकत्वनिवेशे तु यल्लिङ्गकत्वप्रकारकेच्छासत्त्वे सिद्धिसत्त्वे यल्लिङ्गकानुमितिः जायते, तल्लिङ्गकत्वप्रकारकेच्छाविरहविशिष्टसिद्ध्यभावः तल्लिङ्गकानुमितौ पक्षता इत्यर्थः । अनेन धूमलिङ्गकानुमितिं प्रति धूमलिङ्गकत्वप्रकारकानुमितिविशेष्यकेच्छाविरहविशिष्टसिद्ध्यभावः पक्षता इत्युक्तं भवति । तेन धूमपरामर्शजन्यानुमितौ ''आलोकेन वन्हिमनुमिनुयाम्'' इति इच्छायाः न उत्तेजकत्वम् इति फलति । अनुमितौ तल्लिङ्गकत्वं च तल्लिङ्गविषयकपरामर्शजन्यत्वम् ।

उत्तेजकभूतेच्छाः द्विविधाः – अनुगताः अननुगताश्च । ''पर्वते वन्हिमनुमिनुयाम्'', ''पर्वते वन्ह्यनुमितिर्जायताम्'', ''वन्हिविशिष्टपर्वतविषयकानुमितिर्जायताम्'' इत्यादयः इच्छाः अनुगतेच्छाः । पर्वतोद्देश्यकवन्हिविधेयकानुमितित्वप्रकारकेच्छात्वेन तासाम् अनुगमसंभवात् । ''प्रत्यक्षातिरिक्तं ज्ञानं जायताम्'', ''एतत्क्षणानन्तरक्षणे अनुमितिर्जायताम्'', ''अनुमितिर्जायताम्'', इत्यादयः इच्छाः अननुगतेच्छाः । तासां यद्व्यक्तिसत्त्वे सिद्धिदशायाम् अनुमितिः तद्व्यक्तित्वेनैव उत्तेजकत्वम् इत्याशयेन आह – **इदं तु बोध्यम्** इत्यादिना ।

मूले **सिषाधयिषाविरहकाले** इत्यादि । सिषाधयिषाविरहकाले यादृशसिद्धिसत्त्वे – ''पर्वतो वन्हिमान्'' इति सिद्धिसत्त्वे, अनुमितिः न जायते तादृशी सिद्धिः – ''पर्वतो वन्हिमान्'' इति सिद्धिः, तत्तदनुमितौ विशिष्यैव प्रतिबन्धिका – पर्वतत्वावच्छिन्नविशेष्यतानिरूपितवन्हित्वावच्छिन्नप्रकारताशालिनिश्चयत्वेन प्रतिबन्धिका । अनेन मूलग्रन्थेन इदमभिप्रेतम् यत् पर्वतत्वावच्छिन्नोद्देश्यतानिरूपित-वन्हित्वावच्छिन्नविधेयताशाल्यनुमितित्वावच्छिन्नं प्रति पर्वतत्वावच्छिन्नविशेष्यतानिरूपित–वन्हित्वावच्छिन्नप्रकारताशालिनिश्चयः

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

सिषाधयिषाविरहकालीनः प्रतिबन्धकः इति । प्रतिबध्यतावच्छेदककोटौ प्रतिबन्धकतावच्छेदककोटौ च धर्मितावच्छेदकप्रकारतावच्छेदकौ निवेशनीयौ इति फलितम् । अन्यथा पर्वतनिष्ठोद्देश्यतानिरूपित-वन्हिनिष्ठविधेयताशाल्यनुमितिं प्रति पर्वतनिष्ठविशेष्यतानिरूपित-वन्हिनिष्ठप्रकारताशालिनिश्चयः प्रतिबन्धकः इत्युक्ते ''पर्वतः तेजस्वी'' इत्याकारकतेजस्त्वावच्छिन्नवन्हिनिष्ठप्रकारताशालिनिश्चयस्य ''पाषाणमयो वन्हिमान्'' इत्याकारकस्य पाषाणमयत्वावच्छिन्नपर्वतनिष्ठविशेष्यता-निरूपितवन्हिप्रकारकनिश्चयस्य च ''पर्वतो वन्हिमान्'' इत्याकारकानुमितिप्रति-बन्धकत्वं स्यात् । एवं ''पर्वतो वन्हिमान्'' इत्याकारकनिश्चयस्य, ''पाषाणमयो वन्हिमान्'' इत्याकारकानुमितिं प्रति ''पर्वतः तेजस्वी'' इत्यनुमितिं प्रति च प्रतिबन्धकत्वं स्यात् । तद्वारणाय प्रतिबन्धकदिशि प्रतिबध्यदिशि च पर्वतत्ववन्हित्वयोः निवेशः कार्यः इति ।

ननु यादृशसिद्धिसत्त्वे ''पर्वतो वन्हिमान्'' इति न अनुमितिः तादृशसिद्धिः तादृशानुमितौ प्रतिबन्धिकेत्युक्तौ तादृशानुमितौ ''पर्वतो वन्हिमान्'' इत्याकारकसिद्धेरपि प्रतिबन्धकत्वं न स्यात्, तादृशसिद्धिसत्त्वेऽपि सिषाधयिषया अनुमित्युत्पादात् इत्यत उक्तम् – **सिषाधयिषाकाले इत्यादि दिनकर्याम्** ।

मूले परन्तु पक्षतावच्छेदकसामानाधिकरण्येन इत्यादि । अनुमितिः द्विविधा – पक्षतावच्छेदकावच्छेदेन साध्यविधेयकानुमितिः, पक्षतावच्छेदकसामाना-धिकरण्येन साध्यविधेयकानुमितिश्च इति । पक्षतावच्छेदकाश्रययावत्पर्वतोद्देश्यकवन्हि-विधेयकानुमितिः अवच्छेदकावच्छेदेन अनुमितिः इत्युच्यते । पक्षतावच्छेदकपर्वतत्वा-श्रययत्किञ्चित्पर्वतोद्देश्यकवन्हिविधेयकानुमितिः सामानाधिकरण्येन अनुमितिः इत्युच्यते । तत्र पर्वतत्वाश्रययावत्पर्वतोद्देश्यक-वन्हिविधेयकानुमितिं प्रति पर्वतत्वाश्रययावत्पर्वतविशेष्यकवन्हिप्रकारकनिश्चय एव प्रतिबन्धकः । न तु पर्वतत्वा-श्रययत्किञ्चित्पर्वतविशेष्यकनिश्चयः । पर्वतत्वसामानाधिकरण्येन अनुमितिं प्रति –

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

पर्वतत्वाश्रययत्किञ्चित्पर्वतोद्देश्यकवन्हिविधेयकानुमितिं प्रति तु, पर्वतत्वाश्रययावत्पर्वतविशेष्यक वन्हिप्रकारकनिश्चयः, पर्वतत्वाश्रययत्किञ्चित्पर्वतविशेष्यकवन्हिप्रकारकनिश्चयश्च प्रतिबन्धकः इति **प्राचीनाः** ।

नवीनास्तु – अनुमितिः द्विविधा – पक्षतावच्छेदकसाध्ययोः एकाधिकरणवृत्तित्वरूपसामानाधिकरण्यमात्रविषयिणी, तयोः अवच्छेद्यावच्छेदकभावविषयिणी च । अवच्छेद्यावच्छेदकभावोऽपि द्विविधः – स्वरूपसंबन्धरूपः, व्याप्यव्यापकभावरूपश्च इति । ''मूलावच्छिन्नः वृक्षः कपिसंयोगी'' इत्याकारकानुमितिः पक्षतावच्छेदकस्य मूलस्य साध्यस्य कपिसंयोगस्य च स्वरूपसंबन्धरूपम् अवच्छेद्यावच्छेदकभावं विषयीकरोति, न तु व्याप्यव्यापकभावम् । अग्रावच्छिन्नवृक्षस्यापि आधेयतासंबन्धेन मूलवत्त्वात् तत्र कपिसंयोगाभावसत्त्वेन तस्य मूलव्यापकत्वाभावात्, प्रागभावकालावच्छिन्नमूलवति वृक्षे कपिसंयोगाभावाच्च ।

वस्तुतः स्वरूपसंबन्धरूपावच्छेदकत्वभानम्, अनुभवानुरोधात् । तच्च तत्कालावच्छिन्नमूलस्य अक्षतम् । **मणिकाराणामपि बाधग्रन्थे** ''गन्धप्रागभावकालावच्छिन्नः घटः गन्धवान्'' इत्याकारायां स्वरूपसंबन्धरूपावच्छिन्नत्वावगाहिन्याम् अनुमितौ ''गन्धप्रागभावकालावच्छिन्नः घटः गन्धाभाववान्'' इति बाधग्रहस्य, ''मूलरूपदेशावच्छिन्नः वृक्षः कपिसंयोगी'' इत्यनुमितौ, ''मूलावच्छिन्नः वृक्षः कपिसंयोगाभाववान्'' इति बाधग्रहस्य च प्रतिबन्धकतया ''बाधः असिद्ध्याद्यसङ्कीर्णः हेत्वाभासः'' इति उपपादयताम् अनुमितौ स्वरूपसंबन्धरूपावच्छेद्यावच्छेदकभानम् अनुमतम् ।

एवं क्वचित् पक्षतावच्छेदकसाध्ययोः व्याप्यव्यापकभावोऽपि अनुमितौ भासते ''यथा पृथिवी रूपवती'' इत्यनुमितौ रूपे पृथिवीत्वव्यापकत्वं भासते । **मणिकृतामपि** व्याप्यव्यापकभावभानं संमतम् । **केवलव्यतिरेकिग्रन्थे** ''पृथिवी इतरभिन्ना'' इत्यनुमितौ पृथिव्येकदेशे घटादौ इतरभेदस्य सिद्धत्वात् अंशतः सिद्धसाधनं

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

दोषः इत्याशङ्क्य ''सर्वा पृथिवी इतरभिन्ना'' इति पृथिवीत्वव्यापकत्वेन इतरभेदावगाह्यनुमितेः उद्देश्यतया पृथिव्येकदेशे इतरभेदसिद्धेः तादृशानुमितिप्रतिबन्धकत्वं नास्ति इति न दोषः इति उपपादयद्भिः **मणिकारैः** व्याप्यव्यापकभावभानं स्वीकृतमेव ।

तत्र व्याप्यव्यापकभावरूपावच्छेदकभावभानं त्रेधा वक्तुं शक्यते । ''पृथिवी रूपवती'' इत्यत्र साध्ये रूपे पक्षतावच्छेदकं पृथिवीत्वं व्यापकत्वरूपावच्छिन्नत्वस्य धर्मिपारतन्त्र्येण प्रकारतया भासते । अतः अनुमितिः न ''पृथिवीत्वावच्छिन्नरूपवती'' इत्याकारा, अपि तु ''पृथिवी रूपवती'' इत्याकारैव । एवं ''पर्वतः वन्हिमान्'' इत्यत्रापि वन्हौ पर्वतत्वं व्यापकत्वसंबन्धेन प्रकारतया भासते ।

अथ वा पर्वते पर्वतत्वव्यापकत्वविशिष्टसंयोगसंबन्धेन वन्हेः भानम् । पर्वतवन्ह्योः संसर्गतया भासमाने संयोगसंबन्धे पर्वतत्वव्यापकत्वरूपस्य पर्वतत्वावच्छिन्नत्वस्य संबन्धतावच्छेदकतया भानम् इति यावत् । अथ वा पर्वतत्वव्यापकत्वविशिष्टं यत् साध्यं तत्प्रतियोगिकत्वेन पर्वते वन्हेः संयोगः भासते इति ।

तत्र व्याप्यव्यापकभावरूपावच्छेद्यावच्छेदकभावावगाह्यनुमितिं प्रति पक्षतावच्छेदकसामानाधिकरण्येन साध्यावगाहिसिद्धिः न प्रतिबन्धिका । ''पर्वतो वन्हिमान्'' इति सिद्धिदशायां ''पर्वतः सुन्दरवन्हिमान्'' इत्यनुमितेः जायमानतया न्यूनविषयकसिद्धेः अधिकविषयकानुमित्यप्रतिबन्धकत्वात् । एतदभिप्रायेणैव अवच्छेदकावच्छेदेन अनुमितौ अंशतः सिद्धसाधनं न दोषः इति **मणिकारैः** उक्तम् ।

अंशतः सिद्धसाधनं नाम सामानाधिकरण्येन सिद्धिः । तथा च अवच्छेदकावच्छेदेन अनुमितौ अवच्छेदकावच्छेदेन सिद्धिरेव प्रतिबन्धिका । सामानाधिकरण्येन अनुमितिं प्रति तु अवच्छेदकावच्छेदेन सिद्धिः सामानाधिकरण्येन सिद्धिश्च प्रतिबन्धिका । न्यूनविषयकानुमितौ अधिकविषयकसिद्धेः प्रतिबन्धकत्वात् । यथा ''पर्वतः वन्हिमान्'' इत्यनुमितौ ''पर्वतः सुन्दरवन्हिमान्'' इति सिद्धेः इति फलितम् ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अवच्छेदकावच्छेदेनानुमितेरपि साध्ये पक्षतावच्छेदकसामानाधिकरण्याव-गाहितया तद्व्यवच्छेदार्थं व्याचष्टे दिनकर्यां – **सामानाधिकरण्यमात्रेण** इति । **अन्यथा** इति । मात्रपदानुपादाने इत्यर्थः ।।

मुक्तावली

इदं तु बोध्यम् – यत्र "अयं पुरुषः न वा" इति संशयानन्तरं "पुरुषत्व-व्याप्यकरादिमान् अयम्" इति ज्ञानं, तत्र असत्याम् अनुमित्सायां पुरुषस्य प्रत्यक्षं **भवति**, न तु अनुमितिः । अतः अनुमित्साविरहविशिष्टप्रत्यक्षसामग्री कामिनीजिज्ञासादिवत् **स्वातन्त्र्येण** प्रतिबन्धिका । एवं परामर्शानन्तरं विना प्रत्यक्षेच्छां पक्षादेः प्रत्यक्षानुत्पत्तेः प्रत्यक्षेच्छाविरहविशिष्टानुमितिसामग्री भिन्नविषयकप्रत्यक्षे **प्रतिबन्धिका**, इति संक्षेपः ।।

दिनकरी

उपाध्यायास्तु सिषाधयिषाविरहविशिष्टसिद्धिप्रत्यक्षसामग्र्योः अन्यतरस्य अभावः पक्षता । तेन सिद्धिकाले समानविषयकप्रत्यक्षसामग्रीकालेऽपि च न अनुमित्यापत्तिः इति – आहुः । तद्दूषयितुं प्रत्यक्षसामग्र्यभावस्य पक्षताकुक्ष्यप्रवेशे प्रत्यक्षसामग्रीकाले कथं न अनुमितिः इति उत्कटशिष्यजिज्ञासानुत्पादार्थं प्रथमतः स्वसिद्धान्तम् आह – **इदं तु बोध्यम्** इत्यादिना । **भवति** इति । **संशयोत्तरप्रत्यक्षं प्रति** हेतुभूतस्य विशेषदर्शनस्य सत्त्वात् इति भावः । **एतादृशप्रत्यक्षसामग्रीविशेष-**पर्यन्तानुधावनं च **तद्विषये** अनुमितिसामग्रीसंपत्तिदर्शनार्थम् । अन्यथा स्वातन्त्र्येण अनुमितिसामग्रीप्रदर्शनेन **प्रयासापत्तेः** । **स्वातन्त्र्येण** इति । पक्षताकुक्ष्यप्रविष्टत्वेन इत्यर्थः । **शाब्दसिद्धौ** सत्याम् "अशाब्दज्ञानं जायताम्" इति इच्छायाम् अनुमितेः उत्पादात् सिद्धौ अनुमितिगोचरेच्छात्वेन **तादृशेच्छाकाले** प्रत्यक्षसामग्रीकाले अनुमित्यनुत्पादेन **सामग्र्याम्** अनुमितित्वप्रकारकेच्छात्वेन उत्तेजकत्वस्य आवश्यकतया **एकरूपेण** उत्तेजकत्वासंभवात् । **एवम् उभयत्र** सिषाधयिषाविरहस्य

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

न एकसंबन्धेन विशेषणत्वम् । सिद्धौ समवायघटितसामानाधिकरण्येन, चक्षुःसंयोगादिरूपसामग्र्यां तु स्वाश्रयचक्षुःसंयुक्तमनःप्रतियोगिकविजातीयसंयोगघटित-सामानाधिकरण्येन इति एकरूपेण तयोः प्रतिबन्धकत्वासंभवात् इत्याशयः इति दिक् ।।

राजीवोल्लासः

इदं तु बोध्यम् इति मूलमवतारयति – **उपाध्यायास्तु** इति । सिषाधयिषाविरहविशिष्टसिद्धिप्रत्यक्षसामग्र्योः अन्यतरस्य अभावः पक्षता इति **उपाध्यायाः** । अत्र प्रत्यक्षपदं शाब्दबोधस्यापि उपलक्षणम् । तेषाम् अयमाशयः – यथा सिद्धिसत्त्वे न अनुमितिः, तथा समानविषयकलौकिकप्रत्यक्षसामग्रीसत्त्वे अनुमितिसामग्रीसत्त्वे च लौकिकप्रत्यक्षमेव उत्पद्यते, न तु अनुमितिः । तदनन्तरं ''साक्षात्करोमि'' इति अनुव्यवसायस्यैव उदयात् । एवं समाने विषये एकदा शाब्दबोधसामग्रीसत्त्वे अनुमितिसामग्रीसत्त्वे च शाब्दबोध एव जायते । तदनन्तरं ''शाब्दयामि'' इति अनुव्यवसायस्यैव उदयात् । एवं च यथा सिद्धिकाले न अनुमितिः पक्षताविरहात्, तथा अनुमितिसमानविषयकप्रत्यक्षशाब्दबोधसामग्रीकालेऽपि न अनुमितिः पक्षताविरहादेव । अतः प्रत्यक्षादिसामग्र्यभावोऽपि पक्षताकुक्षौ प्रवेशनीयः । एवं सिद्धिकाले अनुमित्सायां सत्याम् अनुमितेरुत्पत्त्या अनुमित्सायाः उत्तेजकत्ववत् समानविषयक प्रत्यक्षसामग्रीदशायामपि अनुमित्सायां सत्याम् अनुमितेः उत्पत्त्या प्रत्यक्षादिसामग्र्यामपि अनुमित्सायाः उत्तेजकत्वम् । तथा च सिषाधयिषाविरहविशिष्टस्य सिद्ध्यनुमित्यतिरिक्तसिद्धिसामग्र्यन्यतरस्य अभावः पक्षता इति । सिषाधयिषाविरहेति सिद्धौ अनुमित्यतिरिक्तसिद्धिसामग्र्यां च विशेषणम् । अनुमित्यतिरिक्तसिद्धिपदेन प्रत्यक्षं शाब्दबोधश्च गृह्यते । तेन सिषाधयिषां विना सिद्धिकाले समानविषयक-प्रत्यक्षादिसामग्रीकाले च न अनुमितिः इति । तन्मतं दूषयितुं प्रत्यक्षसामग्र्यभावः यदि पक्षताकुक्षौ न प्रवेश्यते तदा प्रत्यक्षसामग्रीकाले कुतो न अनुमितिः इति आशङ्कायाः अनुत्पादार्थं स्वसिद्धान्तम् आह – **इदं तु बोध्यम्** इत्यादिना इति

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

भावः । यत्र दूरात् ऊर्ध्वव्यक्तेः दर्शने सति ''अयं पुरुषो न वा'' इति संशयः, तदनन्तरं च ''पुरुषत्वव्याप्यकरादिमान् अयम्'' इति विशेषदर्शनम्, तत्र इन्द्रियसन्निकर्षरूपप्रत्यक्षसामग्रीसत्वात् अनुमित्सायां असत्यां पुरुषस्य प्रत्यक्षं भवति । सत्यां तु अनुमित्सायां पुरुषविषयकानुमितिः भवति । तदनुसारेण समानविषयकानुमितिं प्रति अनुमित्साविरहविशिष्टप्रत्यक्षसामग्री स्वातन्त्र्येण प्रतिबन्धिका, तदभावः स्वातन्त्र्येण कारणम्, न तु पक्षताकुक्षिप्रविष्टतया प्रत्यक्षसामग्र्याः प्रतिबन्धकत्वम्, तदभावस्य कारणत्वं च ।

ननु वन्ह्यादौ चक्षुःसन्निकर्षदशायां ''वन्हिव्याप्यधूमवान् पर्वतः'' इति ज्ञानवतः वन्हेः प्रत्यक्षम्, न अनुमितिः इत्येव मूले कुतः न उक्तम्? किं संशयोत्तरप्रत्यक्षस्थलानुरोधेन इत्याशङ्कां निरसितुम् आह – **एतादृश** इति । **तद्विषये** – प्रत्यक्षविषये । विषयित्वं सप्तम्यर्थः । तस्य च अनुमितौ अन्वयः । तथा च प्रत्यक्षविषयसाध्यविषयकानुमितिसामग्रीप्रदर्शनार्थम् इत्यर्थः । **स्वातन्त्र्येण** इति । प्रत्यक्षसामग्र्यनन्तर्गतत्वेन इत्यर्थः । **प्रयासापत्तेः** इति । एकसामग्रीप्रदर्शनेनैव उभयसामग्रीप्रदर्शनोपपत्तौ पृथक् पृथक् सामग्रीप्रदर्शनस्य अनुचितत्वात् इति भावः ।

ननु पक्षताकुक्ष्यप्रविष्टत्वेन प्रत्यक्षसामग्र्याः प्रतिबन्धकत्वे किं लाघवम्? प्रत्युत पक्षताकुक्षिप्रविष्टत्वेन प्रतिबन्धकत्वे एव लाघवम्; एकप्रतिबन्धकतयैव उपपत्तेः इति आशङ्कां निराकर्तुम् एकप्रतिबन्धकतैव न संभवति, भिन्नभिन्नरूपेणैव इच्छायाः सिद्धौ सामग्र्यां च उत्तेजकत्वस्य वाच्यत्वात् इति आह – **शाब्द** इत्यादि ।

संशयोत्तरप्रत्यक्षं प्रति इति । ''पुरुषत्वव्याप्यकरादिमान्'' इति ज्ञानं संशयोत्तरप्रत्यक्षं प्रति विशेषदर्शनविधया कारणम् । अनुमितिं प्रति परामर्शविधया कारणम् इति भावः ।

''सः'' इत्यादिवाक्यजन्यसंयोगेन वन्हिविशिष्टपर्वतविषयकशाब्दबोधात्मकसिद्धौ सत्यां तद्विषयकप्रत्यक्षसामग्र्याम् असत्यां ''अशाब्दं ज्ञानं जायताम्''

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

इति इच्छायां च सत्याम् अनुमितिः जायते । अतः अनुमितिविषयकेच्छाविरह एव सिद्धौ विशेषणम्, न तु अनुमितित्वप्रकारकेच्छाविरहः । उक्तेच्छायाः अशाब्दज्ञानत्व-प्रकारकत्वेन अनुमितित्वप्रकारकत्वाभावात् उत्तेजकत्वानुपपत्तेः । किन्तु यत्र समाने विषये – वन्हिविशिष्टपर्वतविषये – प्रत्यक्षसामग्री अनुमितिसामग्री च अस्ति, शाब्दसिद्धिरप्यस्ति, तत्र ''अशाब्दं ज्ञानं जायताम्'' इति इच्छायां सत्यां प्रत्यक्षमेव जायते न अनुमितिः । प्रत्यक्षोत्पत्यापि तादृशेच्छाविषयसिद्धेः । अतः प्रत्यक्षसामग्रीनिष्ठ प्रतिबन्धकतायां अनुमितित्वप्रकारकेच्छाया एव उत्तेजकतया तद्विरह एव प्रत्यक्षसामग्र्यां विशेषणम्, न तु अनुमितिविषयकेच्छाविरहः । ''अशाब्दज्ञानं जायताम्'' इति इच्छाया अपि अशाब्दत्वेन रूपेण अनुमितिविषय-कतया उत्तेजकत्वापत्तौ अनुमित्यापत्तेः । एवं च अनुमितिविषयकेच्छाविर-हविशिष्टसिद्धिः अनुमितित्वप्रकारकेच्छाविरहविशिष्टप्रत्यक्षसामग्री च अनुमितिप्रतिबन्धिका । तत्र विशेषणभूतयोः सिषाधयिषाविरहयोः सिषाधयिषाभेदेन भिन्नतया सिद्धिप्रत्यक्षसामग्र्योः पृथगेव अनुमितिप्रतिबन्धकत्वम्, न तु अन्यतरत्वेन इति भावः ।

तादृशेच्छाकाले इति । ''अशाब्दं ज्ञानं जायताम्'' इति इच्छाकाले इत्यर्थः । **साम्ग्र्याम्** इति । प्रत्यक्षसामग्र्याम् इत्यर्थः । **एकरूपेणोत्तेजकत्वासंभवात्** इति । उत्तेजकतावच्छेदकयोः अनुमितिविषयकेच्छात्व-अनुमितित्वप्रकारकेच्छात्वयोः भेदेन उत्तेजकतावच्छेदकरूपस्य एकस्य अनुगतस्य अभावात् इति भावः ।

ननु साध्यवत्पक्षविषयकानुमितिगोचरेच्छात्वेन अनुमितित्वप्रकारकेच्छा-साधारणरूपेणैव उत्तेजकत्वम् । अनुमित्यन्यः यः स्वविषयः तत्सामग्रीसमव-हितान्यत्वमपि इच्छायां विशेषणम् । इत्थं च प्रत्यक्षसामग्रीकाले ''अशाब्दज्ञानं जायताम्'' इति इच्छायाः न संग्रहः । स्वं – उत्तेजतकत्वेन अभिमतेच्छा । अनुमित्यन्यतद्विषयः प्रत्यक्षम् । तत्सामग्रीसमवहितत्वमेव प्रत्यक्षसामग्रीकाले इच्छाया

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

इति तदन्यत्वाभावात् न तत्र पक्षता । स्वविषयानुमितिसामग्रीसमवहितसिषाधयिषा-संग्रहाय स्वविषये अनुमित्यन्यत्वनिवेशः । प्रत्यक्षसामग्रीसत्त्वेऽपि ''अनुमितिः जायताम्'' इति इच्छासंग्रहाय **स्वविषय** इति । इत्थं च दर्शितानुगतरूपेण इच्छामन्तर्भाव्य अनुमित्यन्य–स्वविषयसामग्रीसमवहितान्य-साध्यवत्पक्षविषयकानुमितिविषयकेच्छाविरहविशिष्टसिद्धि–प्रत्यक्षसामग्र्यन्यतराभावः पक्षता इत्युक्तौ न कोऽपि दोष इति आशङ्क्य प्रकारान्तरेण दूषणम् आह – **एवम् उभयत्र** इति ।

दिनकरी

ननु अनुमितिं प्रति प्रत्यक्षसामग्र्याः स्वातन्त्र्येण प्रतिबन्धकत्वे भिन्नविषयेऽपि प्रत्यक्षसामग्रीकाले अनुमित्यनुपपत्तिः । मन्मते तु अनुमानातिरिक्तप्रकृतसाध्यसाधक-मानत्वेन पक्षताकुक्षौ तस्याः प्रवेशेन उक्तापत्त्यनवकाशात्, अत आह – **एवम्** इति । **अनुमितिसामग्रीप्रतिबन्धिका** इति । तथा च भिन्नविषयकानुमितिसामग्र्य-भावघटितप्रत्यक्षसामग्र्याः तत्र अभावात् न पूर्वोक्तस्थले अनुमित्यनुपपत्तिः इति भावः ।

यद्वा अनुमितिसामग्रीप्रतिबन्धिका – अनुमितिसामग्र्येव प्रतिबन्धिका, नतु भिन्ने विषये प्रत्यक्षसामग्री अनुमितौ प्रतिबन्धिका इत्यर्थः । **तथा च** प्रत्यक्षसामग्र्याः समानविषयकानुमितिं प्रत्येव प्रतिबन्धकतया न पूर्वोक्तानुमित्यनुपपत्तिः इति भावः ॥

राजीवोल्लासः

ननु अनुमितिं प्रति इत्यादि । अनुमितिं प्रति प्रत्यक्षसामग्र्याः पक्षता-कुक्ष्यप्रविष्टत्वेन प्रत्यक्षसामग्रीत्वमात्रेण प्रतिबन्धकत्वे यत्र भिन्नविषयकानुमिति-प्रत्यक्षसामग्रीसत्त्वम् अर्थात् घटविषयकप्रत्यक्षसामग्र्याः वन्हिविषयकानुमितिसामग्र्याश्च समवधानम्, तत्र अनुमितेः अनुपपत्तिः । प्रतिबन्धिकायाः घटविषयकप्रत्यक्षसामाग्र्याः सत्त्वात् । उपाध्यायमते तु सिषाधयिषाविरहविशिष्टसिद्ध्यनुमित्युपधाय-

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

कातिरिक्तसिद्धिसामग्र्यन्यतरत्वेन प्रतिबन्धकत्वम् तादृशान्यतरत्वावच्छिन्नाभावश्च पक्षता । उक्तस्थले या प्रत्यक्षरूपसिद्धिसामग्री सा अनुमित्युपधायिका, तत्र अनुमितेरेव उत्पत्तेः । तथा च अनुमित्युपधायकातिरिक्तसिद्धिसामग्रीरूपप्रतिबन्धकाभावात् अनुमितिः उपपद्यते इति शङ्का ।

समाधानं तु – भिन्नविषयकप्रत्यक्षं प्रति प्रत्यक्षेच्छाविरहविशिष्टानुमितिसामग्री प्रतिबन्धिका । तादृशानुमितिसामग्र्यभावः प्रत्यक्षसामग्री । उक्तस्थले घटविषयकप्रत्यक्षसामग्री-वन्हिविषयकानुमितिसामग्रीसमवधानस्थले अनुमितिसामग्र्यभावघटितायाः प्रत्यक्षसामग्र्याः अभावात् प्रत्यक्षं न जायते । किन्तु अनुमितिसामग्रीवशात् अनुमितिरेव जायते । अतः न अनुमित्यनुपपत्तिः ।

ननु प्रत्यक्षसामग्री यथा भिन्नविषयकानुमितिसामग्र्यभावघटिता, तथा भिन्नविषयकानुमितिसामग्र्यपि प्रत्यक्षसामग्र्यभावघटिता इति । भिन्नविषयकप्रत्यक्षानुमित्योः सामग्रीसमवधानदशायाम् अनुमित्यनुपपत्तिः अशक्यसमाधिरेव । अनुमितिं प्रति प्रत्यक्षसामग्रीत्वेन प्रतिबन्धकतया तदभावघटितभिन्नविषयकानुमितिसामग्र्यभावात् इति, अत आह – **यद्वा** इति ।

अनुमितिसामग्र्येव इति । भिन्नविषयकप्रत्यक्षे अनुमितिसामग्र्येव प्रतिबन्धिका, न तु भिन्नविषयकानुमितौ प्रत्यक्षसामग्री प्रतिबन्धिका इत्यर्थः । एवं च अनुमितिसामग्र्यां प्रत्यक्षसामग्र्यभावस्य अप्रवेशात् प्रत्यक्षसामग्रीकालेऽपि भिन्नविषयकानुमितेः उपपत्तिः । पर्यवसितमाह – **तथा च** इति । प्रत्यक्षसामग्र्याः भिन्नविषयकानुमितौ प्रतिबन्धकत्वाभावे च अर्थात् समानविषयकानुमितिं प्रत्येव प्रत्यक्षसामग्र्याः प्रतिबन्धकत्वात् न पूर्वोक्तानुमित्यनुपपत्तिः – भिन्नविषयकानुमित्यनुपपत्तिः – इति भावः ।

समानविषयकानुमितिं प्रति इति । अथ किमिदम् अनुमितौ प्रत्यक्षसमानविषयकत्वम्? न तावत् प्रत्यक्षविषयविषयकत्वम् । पर्वतप्रत्यक्षसामग्र्याः "पर्वतो

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

वन्हिमान्'' इति अनुमितिप्रतिबन्धकत्वापत्तेः । नापि प्रत्यक्षविषयताशून्याविषयकत्वम् । ''पर्वतः पाषाणमयः महानसः वन्हिमान्'' इति समूहालम्बनात्मकस्य प्रत्यक्षस्य सामग्रीदशायां पर्वते वन्ह्यनुमित्यनुपपत्तेः इति चेत्, न – प्रत्यक्षीयविशेष्यतावच्छेदकावच्छिन्न–उद्देश्यतानिरूपित–प्रत्यक्षीयप्रकारतावच्छेदकावच्छिन्नविधेयताकत्वम् अनुमितौ प्रत्यक्षसमानविषयकत्वम् इत्यदोषात् ।

।। हेत्वाभाससामान्यनिरूपणम् ।।

कारिकावली

अनैकान्तो विरुद्धश्चाप्यसिद्धः प्रतिपक्षितः ।
कालात्ययापदिष्टश्च हेत्वाभासाश्च पञ्चधा ।। ७१ ।।

मुक्तावली

हेतुप्रसङ्गात् हेत्वभासान् निरूपयति – अनैकान्त इत्यादि । तल्लक्षणं तु – यद्विषयकत्वेन ज्ञानस्य अनुमितिविरोधित्वं तत्त्वम् । तथा हि – व्यभिचारादिविषयकत्वेन ज्ञानस्य अनुमितिविरोधित्वात् ते दोषाः ।

दिनकरी

हेत्वाभासान् इति । विजयलक्षणैककार्यकारित्वम् अत्र सङ्गतिः बोध्या ।

ननु लक्षणात्मकसाधारणधर्मज्ञानं विना विशेषे जिज्ञासानुदयात् विभागः निष्प्रयोजकः इति, अतः लक्षणम् आह – तल्लक्षणं तु इति । हेत्वाभासलक्षणं तु इत्यर्थः । लक्ष्ये लक्षणं ग्राहयति – तथा हि इति । ते – व्यभिचारादयः ।

राजीवोल्लासः

हेतुनिरूपणानन्तरं हेत्वाभासनिरूपणे प्रसङ्गसङ्गतिः मूले उक्ता । हेतुहेत्वाभासयोः परस्परं विरुद्धत्वात् हेतौ निरूपिते सति तद्विरोधिनः हेत्वाभासस्य

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

स्मरणात् स्मृतस्य उपेक्षानर्हत्वरूपप्रसङ्गसङ्गत्या हेत्वाभासनिरूपणम् इति मूलाभिप्रायः। एककार्यकारित्वमपि सङ्गतिः भवितुम् अर्हति इत्याह व्याख्यायाम् – **विजयलक्षण** इति। सद्धेतुनिरूपणानन्तरम् असद्धेतुनिरूपणे वादिनः विजयस्वरूपं यत् एकं कार्यं तत्प्रयोजकत्वं सद्धेतु–हेत्वाभासयोः अस्ति। स्वोक्तहेतोः सद्धेतुत्व-प्रतिपादनेन यथा विजयः भवति, तथा प्रतिवाद्युक्तहेतोः दुष्टत्वप्रतिपादनेनापि कथायां वादिनः विजयात्। विजयेति उपलक्षणम्। अनुमितितत्त्वनिर्णयरूपैककार्य-कारित्वमपि सङ्गतिः।

ननु लक्षणात्मक इति। **मूले "अनेकान्तो विरुद्धश्च"** इत्यादिना हेत्वाभासानां पञ्चधा विभागः कृतः। विभागो नाम सामान्यधर्मव्याप्यपरस्परवि-रुद्धनानाधर्मप्रकारक ज्ञानजनकः शब्दः। एतादृशशब्दप्रयोगरूपः विभागः हेत्वाभासः कतिविधः इति विशेषजिज्ञासायां सत्यामेव कर्तुं शक्यः। विशेषजिज्ञासा च सामान्यधर्मज्ञानं विना न संभवति। तद्धर्मव्याप्यधर्मप्रकारकज्ञानविषयकेच्छां प्रति तद्धर्मज्ञानस्य हेतुत्वात् मूले च सामान्यधर्मस्य अकथनात् सामान्यधर्मज्ञानस्य अनुदयात् विशेषजिज्ञासायाः अनुत्पत्तेः विभागो न युक्त इति शङ्कायां **मुक्तावल्यां** साधारणधर्मरूपं हेत्वाभासानां लक्षणम् उच्यत इति भावः। **निष्प्रयोजक** इति। विशेषजिज्ञासारूपप्रयोजकशून्य इत्यर्थः।

हेत्वाभासलक्षणं तु इति। हेतोराभासः हेत्वाभासः इति षष्ठीतत्पुरुषः। हेतुदोषाः इति तदर्थः। "हेतुदोषलक्षणं तु" इति **"हेत्वाभासलक्षणं तु"** इत्यस्य अर्थः। यद्यपि कारिकायां दुष्टहेतूनामेव विभजनात् दुष्टहेतुलक्षणमेव वक्तव्यम्, न तु दोषलक्षणम्, तथापि दोषलक्षणेन दोषज्ञाने जाते सति दोषवत्त्वं दुष्टस्य लक्षणम् इति अनायासेन ज्ञातुं शक्यते इति आशयेन दोषलक्षणं **मुक्तावल्याम्** उक्तम्। **कारिकायां** हेत्वाभासशब्दः हेतुवदाभासन्ते इति व्युत्पत्त्या दुष्टहेतुपरः। तत्र दुष्टहेतूनामेव विभजनात्। **व्यभिचारादय** इति। आदिपदेन विरोध-असिद्धि-सत्प्रतिपक्ष-बाधाः ग्राह्याः।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

"यद्विषयकत्वेन ज्ञानस्य अनुमितिविरोधित्वम् तत्त्वम्" इति हेतुदोषाणां व्यभिचारादीनां लक्षणम् । "यद्विषयकत्वेन" इत्यत्र तृतीयायाः अवच्छेदकत्वम् अर्थः । तत्र आधेयतासंबन्धेन प्रकृत्यर्थस्य यद्विषयकत्वस्य अन्वयः । अवच्छेदकतायाः निरूपकत्वसंबन्धेन अनुमितिविरोधित्वे अन्वयः । "ज्ञानस्य" इत्यत्र षष्ठ्याः आधेयत्वमर्थः । तस्य यद्विषयकत्वेऽन्वयः । अनुमितिविरोधित्वम् इत्यस्य अनुमितिनिष्ठ-प्रतिबध्यतानिरूपितप्रतिबन्धकत्वम् इत्यर्थः । तथा च ज्ञाननिष्ठयद्विषयकत्वनिष्ठा-वच्छेदकतानिरूपकम् अनुमितिनिष्ठप्रतिबध्यतानिरूपितप्रतिबन्धकत्वं तत्त्वम् इति वाक्यार्थः । ज्ञाननिष्ठयद्विषयकत्वम् अनुमितिनिष्ठप्रतिबध्यतानिरूपित प्रतिबन्धकता-वच्छेदकम् तत्त्वम् हेतुदोषलक्षणम् । "ह्रदो वन्हिमान् धूमात्" इत्यत्र वन्ह्यभाववद्ह्रदः बाधाख्यो दोषः । यत्पदेन दोषो ग्राह्यः । ज्ञानपदेन अनुमिति-प्रतिबन्धकं ज्ञानं ग्राह्यम् । "ह्रदो वन्ह्यभाववान्" इत्याकारकं वन्ह्यभाववद्ह्रदविषयकं ज्ञानं "ह्रदो वन्हिमान्" इत्यनुमितिप्रतिबन्धकम् । तद्वत्ताबुद्धिं प्रति तदभाववत्ताज्ञानस्य प्रतिबन्धकत्वात् । "ह्रदो वन्ह्यभाववान्" इति ज्ञाननिष्ठं वन्ह्यभाववद्ह्रदविषयकत्वं "ह्रदो वन्हिमान्" इति अनुमितिप्रतिबन्धकतावच्छेदकत्वं इति वन्ह्यभाववद्ह्रदे दोषलक्षणस्य समन्वयः ।

अत्र लक्षणे अनुमितिपदेन अनुमितितत्करणान्यतरत् विवक्षितम् । अथ वा "पक्षः साध्यवान्, साध्यव्याप्यहेतुमान् च" इत्याकारकसमूहालम्बनानुमितिः विवक्षिता ।

"पर्वतो धूमवान् वन्हेः" इत्यत्र साध्याभाववद्वृत्तिः हेतुः – धूमाभाववद्वृत्तिः वन्हिः – व्यभिचारः । तद्विषयकज्ञानं "धूमाभाववद्वृत्तिः वन्हिः" इत्याकारकं "धूमाभाववदवृत्तिः वन्हिः" इत्याकारकानुमितिकरणव्याप्तिज्ञानं प्रति प्रतिबन्धकम् । धूमाभाववद्वृत्तिवन्हिविषयकत्वं अनुमितिकरणव्याप्तिज्ञानप्रतिबन्धकतावच्छेदकम् इति धूमाभाववद्वृत्तिवन्हिरूपे व्यभिचारे लक्षणसमन्वयः ।।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

मुक्तावली

यद्विषयकत्वं च यादृशविशिष्टविषयकत्वम् । तेन बाधभ्रमस्य अनुमिति -विरोधित्वेऽपि न क्षतिः । तत्र विशिष्टस्य अप्रसिद्धत्वात् न हेतुदोषः ।।

दिनकरी

ननु **''यद्विषयकत्वेन''** इत्यत्र तृतीयार्थः अच्छेदकत्वम् । तथा च ''वह्निमान् धूमात्'' इत्यत्र वह्न्यभावे अतिव्याप्तिः । पर्वतविशेष्यकवह्न्यभाव-प्रकारकनिर्णयत्वेन वह्न्यनुमितिं प्रति प्रतिबन्धकत्वेन वह्न्यभावविषयकत्वस्य प्रतिबन्धकतावच्छेदककोटिप्रविष्टत्वात् ।

न च – **स्वरूपसंबन्धरूपावच्छेदकतापर्याप्त्यधिकरणत्वम्** अनतिरिक्तवृत्तित्वं वा अवच्छेदकत्वं तृतीयार्थः । वह्न्यभावविषयकत्वस्य अवच्छेदककोटिप्रविष्टत्वेऽपि अवच्छेदकतापर्याप्त्यनधिकरणत्वात् अतिरिक्तवृत्तित्वाच्च न अतिव्याप्तिः इति – वाच्यम् । **पर्याप्तिनिवेशे** असंभवापत्तेः । **अप्रामाण्यज्ञानानास्कन्दितत्वस्य** अधिकस्य प्रतिबन्धकतावच्छेदककोटिप्रविष्टत्वात् । अनतिरिक्तवृत्तित्व-रूपावच्छेदकत्वनिवेशे ''ह्रदः वह्निमान् धूमात्'' इत्यादौ वह्न्यभावविशिष्टह्रदादौ अव्याप्त्यापत्तेः । प्रतिबन्धकत्वाभाववति ''ह्रदः'' इत्येतादृशज्ञाने वह्न्यभाववि-शिष्टह्रदविषयकत्वस्य सत्त्वात् विशिष्टह्रदस्य ह्रदानतिरेकात्, अत आह – **यद्विषयकत्वं च** इति । एतद्विवक्षणप्रयोजनम् आह – तेन इति । **बाधभ्रमस्य** – बाधभ्रमसाधारणस्य पर्वतविशेष्यकवह्न्यभावप्रकारकनिश्चयत्वादेः इत्यर्थः । **अनुमितिविरोधित्वेऽपि** – अनुमितिविरोधितावच्छेदकत्वेऽपि । **न क्षतिः** – न वह्न्यभावादौ अतिव्याप्तिः । **इतरथा** वह्न्यभावविषयकत्वस्य पर्वतविशेष्यक-वह्न्यभावप्रकारकत्वरूपानुमितिप्रतिबन्धकतावच्छेदककोटिप्रविष्टत्वात् तत्र अतिव्याप्तिः स्यात् इति भावः । ''**यादृशविशिष्ट**'' इति विवक्षिते तु तत्र न अतिव्याप्तिः इत्याह – **तत्र** इत्यादिना ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

न च – वह्न्यभावविशिष्टपर्वतस्य अप्रसिद्धत्वेऽपि **''यादृशविशिष्ट''** पदेन वह्न्यभावत्वविशिष्टं वह्न्यभावम् उपादाय तत्र अतिव्याप्तिः इति – वाच्यम् । **''यादृशविशिष्ट'' इति विवक्षणे** अनतिरिक्तवृत्तित्वस्यैव अवच्छेदकत्वस्य लक्षणे निवेशनीयतया वह्न्यभावविषयकत्वस्य प्रतिबन्धकत्वाभाववति ''वह्न्यभाव'' इति ज्ञाने वृत्तेः तत्र अतिव्याप्तेः अभावात् ।

न च एवं – पूर्वोक्तरीत्या वह्न्यभावविशिष्टह्रदादौ अव्याप्तिः इति – वाच्यम् । ''यादृशविशिष्टविषयकत्वेन'' इत्यस्य ''यद्रूपावच्छिन्नविषयकत्वेन'' इत्यर्थकत्वात् ''तत्त्वम्'' इत्यस्य च ''तद्वत्त्वम्'' इत्यर्थकत्वात् ''ह्रद'' इति ज्ञाने च **वह्न्यभावावच्छिन्न**विषयकत्वाभावात् ।।

राजीवोल्लासः

यद्विषयकत्वेन इति ग्रन्थम् अवतारयति – **ननु यद्विषयकत्वेन इत्यत्र** इत्यादिना । ''ज्ञाननिष्ठयद्विषयकत्वं प्रकृतानुमितिप्रतिबन्धकतावच्छेदकम् तत्त्वं दोषलक्षणम्'' इत्युक्तौ ''पर्वतो वन्हिमान् धूमात्'' इत्यत्र सद्धेतौ वन्ह्यभावः दोषः स्यात् । वन्ह्यभावे दोषलक्षणस्य अतिव्याप्तिः इति यावत् । यत्पदेन वन्ह्यभावोऽपि ग्रहीतुं शक्यते । वन्ह्यभावविषयकत्वं ''पर्वतो वन्हिमान्'' इति अनुमितिप्रतिबन्धकतावच्छेदकं भवति । पर्वतोद्देश्यकवह्निविधेयकानुमितित्वावच्छिन्नं प्रति पर्वतविशेष्यकवन्ह्यभावप्रकारकनिश्चयत्वावच्छिन्नस्य प्रतिबन्धकतया पर्वतविशेष्यक-वन्ह्यभावप्रकारक-निश्चयत्वं प्रकृतानुमितिप्रतिबन्धकतावच्छेदकम् । तादृशनिश्चयत्वघटकस्य वन्ह्यभावप्रकारकत्वरूपस्य वन्ह्यभावविषयकत्वस्यापि प्रतिबन्धकतावच्छेदकत्वम् । प्रतिबन्धकतावच्छेदकघटकधर्माणामपि प्रतिबन्ध-कतावच्छेदकत्वस्वीकारात् । तथा च ''पर्वतो वन्ह्यभाववान्'' इति भ्रमात्मक-ज्ञाननिष्ठस्य वन्ह्यभावविषयकत्वस्य अनुमितिप्रतिबन्धकतावच्छेदकत्वात् तत्त्वं – वन्ह्यभावेऽस्तीति तस्य दोषत्वं स्यात् । तादृशदोषवत्त्वात् धूमस्य दुष्टत्वं स्यात् इति भावः ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

उक्तातिव्याप्तिवारणाय शङ्कते – **न च स्वरूपसंबन्धरूप** इति । ज्ञाननिष्ठयद्विषयकत्वं प्रकृतानुमितिप्रतिबन्धकतावच्छेदकतापर्याप्त्यधिकरणं तत्त्वं दोषत्वम् । अथ वा अनतिरिक्तवृत्तित्वरूपस्य अवच्छेदकत्वस्य तृतीया-विभक्त्यर्थत्वात् ज्ञाननिष्ठयद्विषयकत्वं प्रकृतानुमितिप्रतिबन्धकतानतिरिक्तवृत्ति तत्त्वं दोषत्वम् इति विवक्षितम् । अनुमितिप्रतिबन्धकतानतिरिक्तवृत्तित्वं च अनुमिति-प्रतिबन्धकताशून्यावृत्तित्वम् । प्रथमकल्पे स्वरूपसंबन्धरूपावच्छेदकता विवक्षिता । ''पर्वतो वन्हिमान्'' इत्यनुमितिप्रतिबन्धकतानिरूपित स्वरूपसंबन्धरूपावच्छेद-कतापर्याप्त्यधिकरणं वन्ह्यभावविषयकत्वं न संभवति । किन्तु पर्वतविशेष्यक-वन्ह्यभावविषयकनिश्चयत्वमेव । अतः यत्पदेन वन्ह्यभावस्य ग्रहीतुमशक्यतया न तत्र दोषलक्षणस्य अतिव्याप्तिः ।

अनतिरिक्तवृत्तित्वरूपावच्छेदकत्वकल्पेऽपि यत्पदेन वन्ह्यभावः ग्रहीतुं न शक्यते । यद्विषयकत्वं वन्ह्यभावविषयकत्वं ''पर्वतो वन्हिमान्'' इत्यनुमितिप्रति-बन्धकतानतिरिक्तवृत्ति न भवति । ''पर्वतो वन्हिमान्'' इत्यनुमितिप्रतिबन्धकताशून्ये ''वन्ह्यभावः'' इति ज्ञानेऽपि वन्ह्यभावविषयकत्वस्य सत्त्वेन तस्य प्रतिबन्धकता-तिरिक्तवृत्तित्वात् । अतः वन्ह्यभावे न अतिव्याप्तिः ।

समाधत्ते – **पर्याप्तिनिवेशे** इति । स्वरूपसंबन्धरूपावच्छेदकत्वस्य लक्षणघट-कत्वपक्षे अवच्छेदकतापर्याप्तिः निवेशयितुं न शक्यते । ''ह्रदो वन्हिमान् धूमात्'' इत्यादौ वन्ह्यभाववद्ह्रदरूपबाधे व्यभिचारादौ च दोषलक्षणस्य असंभवापत्तेः । ''ह्रदो वन्हिमान्'' इत्यनुमितिं प्रति अप्रामाण्यज्ञानानास्कन्दितस्य ''वन्ह्यभाववान् ह्रदः'' इति निश्चयस्यैव प्रतिबन्धकतया अप्रमाण्यंज्ञानानास्कन्दितत्वविशिष्टे ह्रदविशेष्यक–वन्ह्यभावप्रकारक–निश्चयत्वे एव प्रकृतानुमितिप्रतिबन्धकताव-च्छेदकतायाः पर्याप्तत्वात् तद्घटके वन्ह्यभाववद्ह्रदविषयकत्वे प्रतिबन्धकता-वच्छेदकतायाः अपर्याप्ततया यत्पदेन वन्ह्यभाववद्ह्रदस्य ग्रहीतुम् अशक्यत्वात् । अप्रमाण्यज्ञानानास्कन्दितत्वं नाम अप्रामाण्यज्ञानाभावविशिष्टत्वम् ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अनतिरिक्तवृत्तित्वनिवेशपक्षेऽपि वन्ह्यभावविशिष्टः ह्रदः यत्पदेन ग्रहीतुं न शक्यते। वन्ह्यभावविशिष्टह्रदविषयकत्वस्य ''ह्रदो वन्हिमान्'' इति अनुमिति-प्रतिबन्धकताशून्ये ''ह्रदः'' इति ज्ञानेऽपि सत्वात्। वन्ह्यभावविशिष्टह्रदशुद्धह्रदयोः एकत्वात् ह्रदविषयके ''ह्रदः'' इति ज्ञाने वन्ह्यभावविशिष्टह्रदस्यापि विषयत्वात्। तथा च वन्ह्यभावविशिष्टह्रदविषयकत्वस्य अनुमितिप्रतिबन्धकतातिरिक्तवृत्तितया तदनतिरिक्तवृत्तित्वं नास्ति इति यत्पदेन वन्ह्यभावविशिष्टह्रदस्य ग्रहीतुम् अशक्यतया तत्र दोषलक्षणस्य अव्याप्तिः इति भावः। **अप्रमाण्यज्ञानानास्कन्दिततत्त्वस्य** इति। इदम् उपलक्षणम्। अनाहार्यत्वस्य संशयान्यत्वस्य इत्यपि बोध्यम्।

मूले यादृशविशिष्टविषयकत्वम् इति। यादृशविशिष्टविषयकत्वं अनुमितिप्रतिबन्धकतावच्छेदकं तत्त्वं दोषत्वम्। ''पर्वतो वन्हिमान्'' इत्यत्र, ''पर्वतो वन्ह्यभाववान्'' इति भ्रमस्य अनुमितिप्रतिबन्धकत्वेऽपि वन्ह्यभाव-विशिष्टपर्वतस्य अप्रसिद्ध्या न अतिव्याप्तिः।

तृतीयार्थस्य अवच्छेदकत्वस्य **विरोधित्वे** अन्वयेन परिष्कृतं लक्षणमनुसृत्य व्याचष्टे – **बाधभ्रमस्य** इति। **इतरथा** – **यद्विषयकत्वम्** इत्यस्य यादृश-विशिष्टविषयकत्वम् इत्यर्थानङ्गीकारे।

''यादृशविशिष्ट'' इति विवक्षायामपि वन्ह्यभावेऽतिव्याप्तिम् आशङ्कते – **न च वन्ह्यभावविशिष्ट** इति। ''पर्वतो वन्हिमान् धूमात्'' इत्यत्र यादृशविशिष्टपदेन यद्यपि वन्ह्यभावविशिष्टपर्वतः ग्रहीतुं न शक्यते, वन्ह्यभावविशिष्टस्य पर्वतस्य अप्रसिद्धत्वात्, तथाऽपि वन्ह्यभावत्वविशिष्टवन्ह्यभावं यादृशविशिष्टपदेन गृहीत्वा तद्विषयकत्वस्य पूर्वोक्तरीत्या ''पर्वतो वन्हिमान्'' इत्यनुमितिप्रतिबन्धकताव-च्छेदककोटिप्रविष्टत्वात् वन्ह्यभावेऽतिव्याप्तिः इति शङ्का। समाधत्ते – **यादृशविशिष्ट इति विवक्षणे** इति। यादृशविशिष्टविषयकत्वविवक्षणे कृते लक्षणे अनतिरिक्तवृत्तित्वरूपम् अवच्छेदकत्वमेव निवेश्यते। तथा च यादृशविशिष्टविषयकत्वं

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्रकृतानुमितिप्रतिबन्धकतानतिरिक्तवृत्ति तादृशत्वं दोषत्वम् । यादृशविशिष्टपदेन वन्ह्यभावत्वविशिष्टवन्ह्यभावस्य ग्रहणे तद्विषयकत्वं प्रकृतानुमिति-प्रतिबन्धकतानतिरिक्तवृत्ति न भवति । प्रकृतानुमितिप्रतिबन्धकत्वाभाववति वन्ह्यभावः इति ज्ञानेऽपि वन्ह्यभाववत्वविशिष्टविषयकत्वसत्त्वात् । अतः वन्ह्यभावे न अतिव्याप्तिः ।

न च एवं पूर्वोक्तरीत्या इति । ''ह्रदो वन्हिमान् धूमात्'' इत्यत्र वन्ह्यभाव-विशिष्टह्रदेऽव्याप्तिः । विशिष्टशुद्धयोरनतिरेकात् ''ह्रदः'' इत्याकारके अनुमित्य-प्रतिबन्धके ज्ञानेऽपि वन्ह्यभावविशिष्टह्रदविषयकत्वसत्त्वेन तस्य प्रतिबन्धकता-तिरिक्तवृत्तित्वात् इति न च वाच्यम् । ''यादृशविशिष्टविषयकत्वेन'' इत्यस्य यद्रूपावच्छिन्नविषयकत्वेन इत्यर्थात्, ''तत्त्वम्'' इत्यस्य तद्वत्वम् इत्यर्थात् यद्रूपावच्छिन्नविषयकत्वं प्रकृतानुमितिप्रतिबन्धकतानतिरिक्तवृत्ति तद्रूपवत्त्वम् दोषस्य लक्षणम् । यद्रूपपदेन वन्ह्यभावः गृह्यते । यद्रूपावच्छिन्नविषयकत्वं वन्ह्यभावावच्छिन्नविषयकत्वं ''वन्ह्यभाववान् ह्रदः'' इति ज्ञाने वर्तते । तस्य ज्ञानस्य अनुमितिप्रतिबन्धकत्वात् वन्ह्यभावावच्छिन्नविषयकत्वं अनुमितिप्रतिबन्ध-कतानतिरिक्तवृत्ति । तद्रूपवत्त्वं वन्ह्यभाववत्त्वं वन्ह्यभाववद्ह्रदरूपदोषेऽस्तीति तत्र लक्षणसमन्वयः । ''वन्ह्यभावः'' इति ज्ञाने तु वन्ह्यभावत्वावच्छिन्नविषयकत्वम् अस्ति । तस्मिन् ज्ञाने अनुमितिप्रतिबन्धकत्वं नास्ति इति वन्ह्यभावत्वाव-च्छिन्नविषयकत्वस्य अनुमितिप्रतिबन्धकतातिरिक्तवृत्तितया यद्रूपपदेन वन्ह्यभावत्वं ग्रहीतुं न शक्यते इति वन्ह्यभावत्ववति वन्ह्यभावे न अतिव्याप्तिः । विशिष्टशुद्धयोः ऐक्येऽपि ''ह्रदः'' इति ज्ञाने वन्ह्यभावावच्छिन्नविषयकत्वविरहात् वन्ह्यभावाव-च्छिन्नविषयकत्वं न अप्रतिबन्धकज्ञानवृत्ति ।

ननु यद्रूपपदेन वह्न्यभाववद्ह्रदत्वमेव ग्राह्यं, तच्च सामानाधिकरण्यसंबन्धेन वह्न्यभावविशिष्टह्रदत्वमेव, ''कर्मधारयोत्तरभावप्रत्ययस्य पदार्थतावच्छेदकद्वय-

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

सामानाधिकरण्यवाचकत्वात्'' इति दीधित्युक्तेः, तदवच्छिन्ना च विषयिता न प्रतिबन्धकीभूतज्ञाने, ''ह्रदो वह्न्यभाववान्'' इति ज्ञाने सामानाधिकरण्यसंबन्धेन ह्रदत्वे वह्न्यभावस्याप्रकारत्वात् इति, अत आह – **वह्न्यभाववावच्छिन्न** इति । तथाच वह्न्यभावह्रदत्वोभयमेव तत्र यद्रूपपदेन ग्राह्यं,न तु उक्तं विशिष्टम्, येन उक्तदोषः स्यात् । ''निर्धर्मितावच्छेदककवह्न्यभावविशिष्टह्रदत्ववान्'' इति अप्रतिबन्धकज्ञानेऽपि उक्तयद्रूपावच्छिन्नविषयतासत्त्वेन असंभवश्च स्यात् इति भावः । ''ह्रद'' इति ज्ञानेऽपि ह्रदत्वावच्छिन्नविषयितासत्त्वात् वह्न्यभावावच्छिन्न-विषयत्वाभावादेव उभयावच्छिन्नविषयिताविरह इति सूचनायैव ग्रन्थकृता वह्न्यभावावच्छिन्नविषयिताविरहमात्रं प्रदर्शितम्, नतु वह्न्यभावमात्रं यद्रूपपदग्राह्यमिति तदभिप्रायः इति **तरङ्गिणीकाराः** ।।

दिनकरी

अथ अत्र अनतिरिक्तवृत्तित्वरूपस्य अवच्छेदकत्वस्य विवक्षणे अनुमिति-प्रतिबन्धकत्वाभाववति ''ह्रदो वह्निमान् न वा'' इति संशये ''वह्न्यभाववान् ह्रदो वह्निमान्'' इति आहार्यनिश्चये अप्रामाण्यज्ञानास्कन्दिततादृशनिश्चये च वह्न्यभाव-विशिष्टह्रदविषयकत्वस्य सत्त्वात् असंभव इति चेत्, न ।

''ज्ञानस्य'' इत्यत्र ज्ञानपदस्य अनाहार्याप्रामाण्यज्ञानानास्कन्दितनिश्चय-परतया तादृशनिश्चयनिष्ठं यादृशविशिष्टविषयकत्वम् अनुमितिप्रतिबन्धकतानतिरिक्त-वृत्ति तत्त्वम् इत्यर्थलाभात् इति दिक् ।।

राजीवोल्लासः

ज्ञानपदं अनाहार्याप्रामाण्यज्ञानानास्कन्दितनिश्चयपरम् इति प्रश्नोत्तराभ्यां स्पष्टीकरोति – **अथ अत्र** इत्यादिना । अस्मिन् हेत्वाभासलक्षणे अनतिरिक्तवृत्तित्व-रूपस्य अवच्छेदकत्वस्य विवक्षणे यद्रूपावच्छिन्नविषयकत्वम् अनुमितिप्रतिबन्धकतान-तिरिक्तवृत्ति तद्रूपावच्छिन्नत्वम् इति निष्कृष्टलक्षणस्य बाधादौ असंभवः ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

वन्ह्यभाववद्ह्रदत्वावच्छिन्नविषयकत्वस्य अनुमित्यप्रतिबन्धके ''ह्रदः वन्हिमान् न वा'' इति संशये, ''वन्ह्यभाववान् ह्रदः वन्हिमान्'' इत्याकारके आहार्यनिश्चये ''इदं ज्ञानम् अप्रमा'' इत्याकारकाप्रामाण्यज्ञानविशिष्टे ''वह्न्यभाववान् ह्रदः'' इति निश्चये च सत्त्वात् यद्रूपपदोपादेयवन्ह्यभावविशिष्ट ह्रदत्वावच्छिन्नविषयकत्वस्य अनुमितिप्रतिबन्धकतातिरिक्तवृत्तित्वात् इत्याशङ्का ।

समाधानं तु – ज्ञानपदेन अनाहार्यम् अप्रमाण्यज्ञानाभावविशिष्टं निश्चयात्मकं च ज्ञानं विवक्षितम् । संशयस्य निश्चयत्वविरहात् तद्व्युदासः । अनाहार्यपदेन आहार्यज्ञानस्य व्युदासः । ''अप्रामाण्यज्ञानानास्कन्दित'' इत्यनेन अप्रमाण्यज्ञान-विशिष्टज्ञानस्य व्युदासः । तेन अनाहार्य-अप्रामाण्यज्ञानानास्कन्दित–निश्चयवृत्तित्व-विशिष्ट–यद्रूपावच्छिन्नविषयकत्वम् प्रकृतानुमितिप्रतिबन्धकतानतिरिक्तवृत्ति तद्रूपावच्छिन्नत्वं दोषस्य लक्षणम् इति फलितम् । अतः न दोषः ।

तदभावधर्मितावच्छेदककतत्प्रकारकज्ञानं आहार्यज्ञानम् । संशयान्यज्ञानं निश्चयः । अप्रामाण्यज्ञानाभावविशिष्टं ज्ञानं अप्रामाण्यज्ञानानास्कन्दितम् इत्युच्यते ।

मुक्तावली

न च ''वह्न्यभावव्याप्यपाषाणमयत्ववान्'' इति परामर्शकाले वह्निव्याप्य-धूमस्य आभासत्वं न स्यात् । तत्र विशिष्टस्य अप्रसिद्धत्वात् इति – वाच्यम् । इष्टापत्तेः । अन्यथा बाधस्य अनित्यदोषत्वापत्तेः । तस्मात् तत्र भ्रमात् अनुमितिप्रतिबन्धकमात्रम्, हेतुस्तु न दुष्टः । इत्थं च साध्याभाववद्वृत्तिहेत्वादिकं दोषः । तद्वत्त्वं च हेतौ येन केनापि संबन्धेन इति नव्याः ।।

दिनकरी

सत्प्रतिपक्षस्य अनित्यदोषत्ववादी शङ्कते – न च इति । विशिष्टस्य अप्रसिद्धत्वात् इति । पाषाणमयत्वे वह्न्यभावव्याप्यत्वाभावात् इति भावः । इष्टापत्तेः इति । तथा च सद्धेतूनां प्रतिपरामर्शेऽपि न दुष्टत्वम् इति भावः ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अन्यथा – प्रतिबन्धकीभूतभ्रमविषयस्यापि दोषत्वे । **अनित्यदोषत्वापत्तेः** इति । पक्षे साध्याभावभ्रमदशायां सद्धेतौ अपि दोषवत्त्वापत्तेः इत्यर्थः । इत्थं च – यादृशविशिष्टविषयकत्वेन ज्ञानस्य प्रतिबन्धकत्वं तादृशविशिष्टस्य दोषत्वे च । **''हेत्वादिकम्''** इति **''आदि''ना** साध्याभावविशिष्टपक्षपरिग्रहः ।

यादृशविशिष्टपदेन व्यभिचारत्वादिविशिष्टं व्यभिचारादिकम् आदाय लक्षणं न संभवति । व्यभिचारविषयकत्वस्य प्रतिबन्धकताशून्ये ''व्यभिचार'' इति ज्ञाने वृत्तित्वेन अतिरिक्तवृत्तित्वात् । किंतु व्यभिचारादिविशिष्टं हेत्वादिकम् आदायैव इति व्यभिचारादिविशिष्टं हेत्वादिकमेव दोष इति भावः ।

ननु व्यभिचारादिविशिष्टस्य हेतोः दोषत्वे तद्वत्त्वस्य हेतौ अभावात् हेतौ दुष्टत्वव्यवहारः न स्यात् । न च – तादात्म्येन तद्वत्त्वं विवक्षणीयम् इति – वाच्यम् । तथा सति वह्न्यभावविशिष्टह्रदादेः तादात्म्येन धूमेऽभावेन ह्रदपक्षके धूमस्य दुष्टत्वं न स्यात्, अत आह – **तद्वत्त्वं च** इति । **न च वह्निव्यभिचारविशिष्टद्रव्यत्वस्य** धूमेऽपि सत्त्वात् अतिव्याप्तिः इति – वाच्यम् । **यादृशविशिष्टविषयकज्ञानत्वेन** यद्धेतुकानुमितिप्रतिबन्धकत्वं तादृशविशिष्टाश्रयतद्धेतोः एव दुष्टत्वात् इति ।।

राजीवोल्लासः

सत्प्रतिपक्षस्य अनित्यत्वदोषवादी इति । यत्र वस्तुतः सत्प्रतिपक्षाख्यो दोषोऽस्ति, तत्र सत्प्रतिपक्षः नित्यदोषः । यत्र तु तादृशदोषो नास्ति, तत्र सद्धेतावपि सत्प्रतिपक्षभ्रमदशायां दोषः, भ्रमाभावकाले च न दोष इति सत्प्रतिपक्षस्य अनित्यदोषत्वम् केचिद्वदन्ति । तन्मतानुसीरी शङ्कते – **मूले न च** इति । ''पर्वतो वन्हिमान् धूमात्'' इत्यत्र सद्धेतौ वन्ह्यभावव्याप्यपाषाणमयत्ववान् इति व्याप्त्यंशे भ्रमात्मकपरामर्शकाले सद्धेतोः धूमस्य दुष्टत्वम् इष्यते । तच्च वन्ह्यभावव्याप्यवत्पक्षस्य दोषत्वे सत्येव संगच्छते । वन्ह्यभावव्याप्यवत्पर्वतरूपस्य विशिष्टस्य अप्रसिद्ध्या

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

तादृशविशिष्टपदेन वन्ह्यभावव्याप्यवत्पर्वतस्य ग्रहीतुम् अशक्यतया तत्र दोषलक्षणस्य अभावात् इत्याशङ्क्य सद्धेतौ साध्याभावव्याप्यवान् पक्ष इति विरोधिपरामर्श-कालेऽपि दुष्टत्वं न इष्यते । अतः तत्र विशिष्टस्य अप्रसिद्धावपि दोषलक्षणाभावेऽपि च न क्षतिः इति समाधत्ते । यदि तु दोषाभावेऽपि दोषभ्रममादाय दोषत्वम् इष्यते, तर्हि "पर्वतो वन्हिमान् धूमात्" इत्यत्रैव "पर्वतो वन्ह्यभाववान्" इति भ्रमकाले बाधो दोषः । भ्रमाभावकाले तु बाधो न दोष इति बाधस्यापि अनित्यदोषत्वापत्तिः । तस्मात् "वन्ह्यभावव्याप्यपाषाणमयत्ववान्" इति भ्रमकाले हेतोः न दुष्टत्वम्, किन्तु तद्वत्ताबुद्धिं प्रति तदभावव्याप्यवत्ताज्ञानस्य प्रतिबन्धकत्वात् अनुमितिः न जायते । हेतुस्तु न दुष्ट इति भावः । **प्रतिपरामर्शेऽपीति** । "साध्याभावव्याप्यवान्" इति परामर्शे सत्यपि इत्यर्थः ।

हेत्वादिकमित्यादिना इति । साध्याभाववद्वृत्तिहेतुः व्यभिचारः । साध्याभावविशिष्टपक्षः बाधः ।

ननु साध्याभाववद्वृत्तित्वमेव व्यभिचारः भवतु । एवं साध्याभाव एव बाधः भवतु । कुतः साध्याभाववद्वृत्तित्वविशिष्टहेतुः व्यभिचाराख्यो दोषः । साध्याभावविशिष्टपक्षः बाधाख्यो दोषः इत्युच्यते इत्याशङ्क्य आह – **यादृशविशिष्टपदेन** इत्यादिना । यदि साध्याभाववद्वृत्तित्वमेव – धूमाभाववद्वृत्तित्वमेव – व्यभिचाराख्यो दोषः स्यात्, तदा यद्रूपपदेन व्यभिचारत्वं – धूमाभाववद्वृत्तित्वम् – गृहीत्वा लक्षणसमन्वयो वक्तव्यः । स तु अशक्यः । धूमाभाववद्वृत्तित्वत्वावच्छिन्नविषयकत्वस्य अनुमितिप्रतिबन्धकताशून्ये धूमाभाववद्वृत्तित्वम् इति ज्ञानेऽपि सत्त्वात् अतिरिक्तवृत्तितया प्रतिबन्धकतानतिरिक्तवृत्तित्वं नास्तीति, एवं वन्ह्यभावस्यैव बाधत्वे "यद्रूप" पदेन वन्ह्यभावत्वस्यैव ग्राह्यतया तदवच्छिन्नविषयकत्वस्य अनुमितिप्रतिबन्धकताशून्ये "वन्ह्यभावः" इति ज्ञानेऽपि सत्त्वात् अतिरिक्तवृत्तितया लक्षणसमन्वयः न स्यात् । अतः साध्याभाववद्वृत्तित्व विशिष्टहेतुः व्यभिचारपदार्थः,

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

साध्याभावविशिष्टपक्षः बाधपदार्थः । ''यद्रूप'' पदेन धूमाभाववद्वृत्तित्वविशिष्टवन्हित्वं ग्राह्यम् । तदवच्छिन्नविषयकत्वस्य ''धूमाभाववद्वृत्तिः वन्हिः'' इति ज्ञाने एव सत्त्वात्, तस्य च अनुमितिप्रतिबन्धकत्वात् दोषलक्षणं धूमाभाववद्वृत्तिवन्हौ समन्वेति । एवं वन्ह्यभावविशिष्टह्रदत्वं ''यद्रूप'' पदेन गृहीत्वा तदवच्छिन्नविषयकत्वस्य अनुमितिप्रतिबन्धके ''वन्ह्यभाववान् ह्रदः'' इति ज्ञाने एव सत्त्वेन प्रतिबन्धकतानतिरिक्तवृत्तितया लक्षणसमन्वय इति भावः ।

व्यभिचारत्वादिविशिष्टम् इति । धूमाभाववद्वृत्तित्वत्वविशिष्टं धूमाभाववद्वृत्तित्वं वन्ह्यभावत्वविशिष्टं वन्ह्यभावं च आदाय लक्षणसमन्वयो न संभवति इत्यर्थः ।

ननु व्यभिचारादिविशिष्टस्य इति । धूमाभाववद्वृत्तित्वविशिष्टवन्हिः यदि दोषः स्यात्, तदा ''धूमवान् वन्हेः'' इत्यत्र वन्हेः दुष्टत्वं कथम् । वन्हौ वन्हिमत्वाभावात् । एवं ''ह्रदो वन्हिमान् धूमात्'' इत्यत्र वन्ह्यभावविशिष्टह्रदस्य दोषत्वे धूमस्य कथं दुष्टत्वम् । धूमे वन्ह्यभाववद्ह्रदाख्यदोषाभावात् । न च – तादात्म्यसंबन्धेन दोषत्वं विवक्षणीयम् । धूमाभाववद्वृत्तिवन्हेः दोषस्य तादात्म्यसंबन्धेन वह्नौ सत्त्वात् दोषवत्त्वं भवति इति – वाच्यम् । व्यभिचारिणः तादात्म्येन दोषवत्त्वमादाय दुष्टत्वसंभवेऽपि ''ह्रदो वन्हिमान् धूमात्'' इत्यत्र बाधितहेतौ धूमे तादात्म्यसंबन्धेन वन्ह्यभाववद्ह्रदाख्यदोषवत्त्वविरहेण दुष्टत्वानुपपत्तेः इत्याशङ्क्य **मूले तद्वत्त्वं च हेतौ येन केनापि संबन्धेन** इत्युक्तम् इति भावः । ''येन केनापि संबन्धेन'' इत्यस्य स्वविषयकज्ञानविषय प्रकृतहेतुतावच्छेदकवत्त्वसंबन्धेन इत्यर्थः । स्वं – दोषः धूमाभाववद्वृत्तिवन्हिः, तद्विषयकज्ञानम् – ''धूमाभाववद्वृत्तिः वन्हिः'' इत्याकारकम् । तद्विषयीभूतं हेतुतावच्छेदकं वन्हित्वं तद्वत्त्वं वह्नौ अस्तीति उक्तसंबन्धेन दोषवत्त्वात् वह्नेः दुष्टत्वम् । स्वपदेन वन्ह्यभाववद्ह्रदस्य बाधस्य ग्रहणे स्वविषयकं ज्ञानं ''वन्ह्यभाववान् ह्रदः धूमश्च'' इत्याकारकं समूहालम्बनं ज्ञानम्, तद्विषयीभूतं हेतुतावच्छेदकं धूमत्वं तद्वत्त्वं धूमेऽस्तीति तेन संबन्धेन बाधवत्त्वस्य हेतौ सत्त्वात् दुष्टत्वम् ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

न च वन्हिव्यभिचारविशिष्ट द्रव्यत्वस्य इति । वन्ह्यभाववद्वृत्तिद्रव्यत्वस्य इत्यर्थः । ''पर्वतो वन्हिमान् धूमात्'' इत्यत्र ''वन्ह्यभाववद्वृत्तिद्रव्यत्वम्'' इत्याकारकज्ञानस्यापि ''पर्वतः वन्हिमान् वन्हिव्याप्यद्रव्यत्ववान् च'' इत्याकारकानुमितिप्रतिबन्धकत्वात्, वन्ह्यभाववद्वृत्ति द्रव्यत्वमपि दोषः । तद्वत्वं धूमेऽस्तीति दुष्टलक्षणस्य सद्धेतौ अतिव्याप्तिः इति भावः ।

समाधत्ते – **यादृशविशिष्टविषयकज्ञानत्वेन** इति । यद्रूपावच्छिन्नविषयकज्ञानत्वं यद्धेतुकानुमितिप्रतिबन्धकतानतिरिक्तवृत्ति तद्रूपावच्छिन्नविशिष्टदोषाश्रयतद्धेतुत्वमेव दुष्टत्वम् । ''वन्ह्यभाववद्वृत्तिद्रव्यत्वम्'' इति ज्ञानस्य द्रव्यत्वहेतुकानुमितौ ''पर्वतः वह्निमान् वह्निव्याप्यद्रव्यत्ववान् च'' इत्यनुमितौ प्रतिबन्धकत्वेन द्रव्यत्वस्य दुष्टत्वेऽपि, धूमहेतुकानुमितौ ''पर्वतः वह्निमान् वह्निव्याप्यधूमवांश्च'' इत्यनुमितौ ''वह्न्यभाववद्वृत्तिद्रव्यत्वम्'' इति ज्ञानस्य अप्रतिबन्धकत्वात् द्रव्यत्वविशिष्टत्वेऽपि धूमस्य न दुष्टत्वम् इति भावः ।।

मुक्तावली

परे तु यद्विषयकत्वेन ज्ञानस्य अनुमितिविरोधित्वं तद्वत्त्वं हेत्वाभासत्वम् । सत्प्रतिपक्षे विरोधिव्याप्त्यादिकमेव तथा । तद्वत्त्वं च हेतोः ज्ञानरूपसंबन्धेन ।

न च एवं – ''वह्निमान् धूमात्'' इत्यादौ पक्षे बाधभ्रमस्य साध्याभावविषयकत्वेन अनुमितिविरोधित्वात् ज्ञानरूपसंबन्धेन तद्वत्त्वस्यापि सत्त्वात् तद्धेतोरपि बाधितत्वापत्तिः इति – वाच्यम् । तत्र ज्ञानस्य संबन्धत्वाकल्पनात् । अत्र ''सत्प्रतिबक्षित'' इति व्यवहारेण तत्कल्पनात्, तत्र ''बाधित'' इति व्यवहाराभावात् इत्याहुः ।।

दिनकरी

सत्प्रतिपक्षादेः अनित्यदोषत्ववादिनां मतम् आह – **परे तु** इति । ननु वह्न्यभावादिव्याप्तेः यत्पदेन उपादातुं शक्यत्वेऽपि तस्या धूमावृत्तितया न धूमस्य दुष्टत्वं स्यात्, अत आह – **तद्वत्त्वं च** इति । **ज्ञान** इति । एकज्ञानविषयत्वेन

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

तद्वत्त्वम् इत्यर्थः । **तद्वत्त्वस्य** – साध्याभाववत्त्वस्य । **तत्र** – बाधभ्रमकालीनधूमादिसद्धेतौ इत्यर्थः । **अत्र** – प्रतिपरामर्शकालीने धूमादिसद्धेतौ । **तत्कल्पनात्** – ज्ञानस्य संबन्धत्वकल्पनात् ।

ननु सद्धेतावपि "बाधित" इति व्यवहारेण संबन्धत्वकल्पनं ज्ञानस्य भविष्यति इति, अत आह – **तत्र** इति । बाधभ्रमकालीने धूमादिसद्धेतौ इत्यर्थः । प्रत्युत "अयं न बाधितः, पुरुषस्तु भ्रान्तः" इत्येव व्यवहारात् इति भावः । तादृशव्यवहाराव्यवहारयोः स्वानुभवमात्रसाक्षिकत्वम् "आहुः" इति अस्वरसबीजम् ।।

राजीवोल्लासः

सत्प्रतिपक्षादेः इति । सद्धेतावपि दोषभ्रमकाले दुष्टत्वव्यवहारः अस्तीति वदतां **प्राचीनानां** मतम् अनुसृत्य दुष्टहेतूनामेव लक्षणं वदति – **परे तु** इत्यादिना । ज्ञाननिष्ठयद्विषयकत्वं प्रकृतानुमितिप्रतिबन्धकतानतिरिक्तवृत्ति तद्वत्त्वम् दुष्टहेतोः लक्षणम् । दुष्टानामेव हेतूनां विभजनात् तेषामेव लक्षणं वक्तव्यम्, तदुपयोगितयैव दोषस्वरूपनिर्वचनम् इति तेषाम् आशयः । सत्प्रतिपक्षस्थले साध्याभावव्याप्तिरेव यत्पदेन ग्राह्या । तद्वत्त्वमादाय दुष्टहेतौ लक्षणसमन्वयः कार्यः । "**व्याप्त्यादिकमेव**" इति **मूलस्थेन** "एव"कारेण साध्याभावव्याप्तिविशिष्टहेतुविशिष्टपक्षस्य अप्रसिद्धत्वेऽपि न क्षतिः । एकदेशस्य साध्याभावव्याप्त्यादेः दोषत्वे बाधकाभावात् इत्यर्थः लभ्यते । एवं च "पर्वतो वन्हिमान् धूमात्" इत्यत्र "पर्वतः वन्ह्यभावव्याप्यपाषाणमयत्ववान्" इति भ्रमकाले दुष्टलक्षणसत्त्वात् दुष्टत्वम् उपपद्यते । तथा हि – यत्पदेन वन्ह्यभावनिरूपितव्याप्तिः ग्राह्या । यद्विषयकत्वपदेन वन्ह्यभावनिरूपितव्याप्तिनिष्ठप्रकारतानिरूपितपाषाणमयत्वनिष्ठप्रकारतानिरूपितपर्वतनिष्ठविशेष्यताकत्वं गृह्यते । तच्च "वन्ह्यभावव्याप्यपाषाणमयत्ववान् पर्वतः" इति ज्ञाने वर्तते । तस्य ज्ञानस्य अनुमितिप्रतिबन्धकत्वं च वर्तते । अग्रे तत्पदेन वन्ह्यभावनिरूपितव्याप्तिरेव ग्राह्या । तद्वत्त्वं च धूमरूपहेतौ ज्ञानरूपसंबन्धेन वर्तते । ज्ञानरूपसंबन्धो नाम स्वविषयकज्ञानविषयत्वम् । स्वं – वन्ह्यभावव्याप्तिः ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

स्वविषयकज्ञानं – ''वन्ह्यभावव्याप्यं पाषाणमयत्वम् धूमश्च'' इत्याकारक-समूहालम्बनज्ञानम् । तद्विषयत्वस्य धूमे सत्त्वात् अनेन संबन्धेन वन्ह्यभावव्याप्तिमत्त्वात् धूमस्य दुष्टत्वम् – सत्प्रतिपक्षत्वम् ।

न च एवम् इति । ''पर्वतो वन्हिमान् धूमात्'' इत्यत्र ''पर्वतो वन्ह्यभाववान्'' इति बाधभ्रमकाले धूमस्य दुष्टत्वापत्तिः । तत्र यत्पदेन वन्ह्यभावः गृह्यते । यद्विषयकत्वपदेन वह्यभावनिष्ठप्रकारतानिरूपितपर्वतनिष्ठविशेष्यकताकत्वं गृह्यते । ''पर्वतो वन्ह्यभाववान्'' इति भ्रमनिष्ठस्य तादृशविशेष्यताकत्वस्य अनुमितिप्रतिबन्ध-कताननतिरिक्तवृत्तित्वात् अग्रे तत्पदेन वन्ह्यभावं गृहीत्वा तद्वत्त्वस्य धूमे स्वविषयकज्ञानविषयत्वसंबन्धेन सत्त्वात् धूमस्य दुष्टत्वापत्तिः । स्वं – वन्ह्यभावः । स्वविषयकज्ञानं – वन्ह्यभावो धूमश्च इति ज्ञानम् । तद्विषयत्वं धूमस्य ।

समाधत्ते – **तत्र ज्ञानस्य संबन्धत्वाकल्पनात् इति** । तत्र बाधभ्रमकालीन-सद्धेतौ स्वविषयकज्ञानविषयत्वस्य संबन्धत्वं न कल्प्यते । तदानीं ''धूमः बाधितः'' इति व्यवहाराभावात् । अतः धूमस्य न दुष्टत्वम् । सत्प्रतिपक्षभ्रमकाले तु धूमः सत्प्रतिपक्षितः इति व्यवहारेण ज्ञानस्य संबन्धत्वं कल्प्यते । अतः दुष्टत्वम् इति भावः ।।

मुक्तावली

अनिमितिविरोधित्वं च अनुमितितत्करणान्यतरविरोधित्वम् । तेन एकहेतौ व्यभिचारज्ञाने हेत्वन्तरेण अनुमित्युत्पत्तेः तदभावाद्यनवगाहित्वाच्च व्यभिचारज्ञानस्य अनुमितिविरोधित्वाभावेऽपि न क्षतिः इति संक्षेपः ।।

दिनकरी

यथाश्रुतविरोधित्वत्यागे बीजम् आह – **तेन** इत्यादिना । ननु तद्धेतुकतत्साध्यकानुमितिं प्रति तद्धेतौ तत्साध्यव्यभिचारग्रहाभावः हेतुः वाच्यः, तत्र आह – **तदभाव इति** । **न क्षतिः** – न अव्याप्तिः ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

ननु अत्र लक्षणे अवच्छेदकत्वं न स्वरूपसंबन्धविशेषः, पूर्वोक्तदोषात् इति अनतिरिक्तवृत्तित्वमेव निवेशनीयम् । तथा च "धूमवान् वह्नेः" इत्यादौ **प्रमेयत्वविशिष्टव्यभिचारे अतिव्याप्तिः ।** तद्विषयकत्वस्य प्रतिबन्धकतानतिरिक्तवृत्तित्वात्, अत आह – **संक्षेप इति ।** प्रकृतानुमितिप्रतिबन्धकतावच्छेदकान्तराघटितत्वेन अनुमितिविरोधितावच्छेदकं विशेषणीयम् । प्रमेयत्वविशिष्टव्यभिचाराश्च प्रकृतानुमितिप्रतिबन्ध-कतावच्छेदकीभूतः यः व्यभिचारः तद्घटित एव इति न तत्र अतिप्रसङ्गः इति दिक् ।।

राजीवोल्लासः

मूले **तत्करणेति** पदेन अनुमितिकारणभूतः परामर्शः विवक्षितः । **तेन इति ।** अनुमितिविरोधित्वरूपं यथाश्रुतमर्थं परित्यज्य अनुमितितत्करणान्यतरविरोधित्वविवक्षणेन इत्यर्थः । **तेन एकहेतौ व्यभिचारज्ञाने इत्यादि ।** अनुमितिविरोधित्वं इति यथाश्रुतलक्षणे व्यभिचारेऽव्याप्तिः । "धूमाभाववद्वृत्तिः वन्हिः" इत्याकारकव्यभिचारज्ञानस्य "पर्वतो धूमवान्" इति अनुमितिप्रतिबन्धकत्वम् नास्ति । उक्तव्यभिचारज्ञानकाले वन्हौ धूमाभाववद्वृत्तित्वज्ञानकाले हेत्वन्तरेण – वन्ह्यतिरिक्तेन आर्द्रेन्धनसंयोगरूपहेतुना "पर्वतो धूमवान्" इत्यनुमित्युत्पत्तेः । तथा च अनुमितिप्रतिबन्धकज्ञानविषयत्वरूपदोषलक्षणाभावात् अव्याप्तिः । किञ्च व्यभिचारज्ञानस्य अनुमितिप्रतिबन्धकत्वमेव नास्ति । ग्राह्याभावानवगाहित्वात् । ग्राह्यं – प्रतिबध्यज्ञाने यः विषयः तदभावाविषयकत्वात् इति यावत् । एवं च "पर्वतो धूमवान्" इत्यनुमितौ "पर्वतो धूमाभाववान्" इति ज्ञानं वा "धूमाभावव्याप्यवान्" इति ज्ञानं वा प्रतिबन्धकम्, न तु "धूमाभाववद्वृत्तिः वन्हिः" इति व्यभिचारज्ञानं प्रतिबन्धकम् । तथा च अनुमितिप्रतिबन्धकज्ञानविषयत्वाभावात् व्यभिचारे दोषलक्षणस्य अव्याप्तिः । अनुमितितत्करणान्यतरत्वविवक्षायां तु व्यभिचारज्ञानस्य अनुमितिकरणपरामर्शप्रतिबन्धकतया न अव्याप्तिः इति भावः । **एकहेतौ व्यभिचारज्ञाने हेत्वन्तरेण अनुमित्युत्पत्तेः** इति ग्रन्थेन प्रदर्शितं दोषं

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

परिहरन् **तदभावाद्यनवगाहित्वाच्च** इति ग्रन्थम् अवतारयति – **ननु तद्धेतुकतत्साध्यकानुमितिं प्रति इति** । **अनुमितिविरोधित्वं** इति यथाश्रुतलक्षणेऽपि तद्धेतुकतत्साध्यकानुमितिप्रतिबन्धकत्वं तद्धेतौ तत्साध्यव्यभिचारादिज्ञानस्य विवक्षितम् । अतः ''वन्हिः धूमाभाववद्वृत्तिः'' इति ज्ञानकाले हेत्वन्तरेण ''धूमवान्'' इति अनुमितेः उत्पत्तावपि तस्याः अनुमितेः वन्हिहेतुकत्वाभावात् वन्हिहेतुक-धूमसाध्यकानुमितिं प्रति वन्हौ धूमव्यभिचारज्ञानस्य प्रतिबन्धकत्वम् अस्त्येव इति न अव्याप्तिः इति आशङ्क्य ग्राह्याभावानवगाहितया व्यभिचारज्ञानस्य न प्रतिबन्धकत्वम् इति व्यभिचारे अव्याप्तिम् आह इत्यर्थः । **तत्साध्यव्यभिचार-ग्रहाभावः हेतुः** इति । तद्धेतौ तत्साध्यव्यभिचारग्रहः प्रतिबन्धक इति वक्तव्ये तत्साध्यव्यभिचारग्रहाभावो हेतुः इत्युक्त्या प्रतिबन्धकत्वं कारणीभूताभावप्रतियोगित्वम् इति सूच्यते ।

ननु अत्र लक्षणे इति । हेत्वाभासलक्षणे प्रविष्टम् अवच्छेदकत्वं न स्वरूपसंबन्धविशेषः । वन्ह्यभावादौ अतिव्याप्तेः इति पूर्वमुक्तत्वात् । किन्तु अनतिरिक्तवृत्तित्वमेव । ज्ञाननिष्ठयद्विषयकत्वम् अनुमितिप्रतिबन्धकतानतिरिक्तवृत्ति तत्त्वं दोषलक्षणम् इति पूर्वम् उक्तम् । तदुपरि शङ्का – ''पर्वतो धूमवान् वन्हेः'' इत्यादौ **प्रमेयत्वविशिष्टव्यभिचारे अतिव्याप्तिः** इति । प्रमेयत्वविशिष्ट-व्यभिचारविषयकत्वं''धूमाभाववद्वृत्तिः वन्हिः प्रमेयः'' इति ज्ञाने वर्तते । तस्य च अनुमितिकरणपरामर्शप्रतिबन्धकत्वं प्रमेयत्वस्य अधिकस्य भानेऽपि व्यभिचार-विषयकत्वेन अस्त्येव । एवं च प्रमेयत्वविशिष्टव्यभिचारविषयकत्वस्य अनुमितिकरण-प्रतिबन्धकतानतिरिक्तवृत्तित्वात् प्रमेयत्वविशिष्टव्यभिचारे दोषलक्षणस्य अतिव्याप्तिः । स्वरूपसंबन्धरूपावच्छेदकत्वविवक्षणे अवच्छेदकतापर्याप्तिनिवेशेन इयम् अतिव्याप्तिः वारयितुं शक्यते । व्यभिचारविषयकत्वे एव प्रतिबन्धकतावच्छेदकतापर्याप्तिसत्त्वेन प्रमेयत्वविशिष्टव्यभिचारविषयकत्वे प्रतिबन्धकतावच्छेदकतापर्याप्तिविरहात्, तथापि

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

स्वरूपसंबन्धरूपावच्छेदकत्वं न निवेशयितुं शक्यम्, असंभवात् इति पूर्वम् उक्तत्वात् अनतिरिक्तवृत्तित्वनिवेशपक्षे इयं अतिव्याप्तिः इत्यतः संक्षेप इत्युक्तम् । विशिष्टान्तरा-घटितत्वं निवेश्य अयं दोषः वारणीय इति तदाशयः । यत्पदार्थे दोषे विशिष्टान्तरा-घटितत्वं निवेशनीयम् । अन्यच्च तत् विशिष्टं च विशिष्टान्तरम् । विशिष्टशब्दस्य अनुमितिप्रतिबन्धकतावच्छेदकम् इत्यर्थः । प्रतिबन्धकतावच्छेदकं च विषयितासं-बन्धेन । अनुमितिपदं अनुमिति-तत्करणान्यतरपदम् पूर्ववत् । प्रमेयत्वविशिष्टव्य-भिचारे व्यभिचारः घटकः । सः विशिष्टान्तरपदेन ग्राह्यः । व्यभिचारविषयकज्ञानस्य अनुमितिप्रतिबन्धकत्वात् विषयितासंबन्धेन व्यभिचारः अनुमितिप्रतिबन्धकताव-च्छेदकः । तद्घटितत्वमेव प्रमेयत्वविशिष्टव्यभिचारे अस्ति इति यत्पदेन तस्य ग्रहीतुम् अशक्यतया न तत्र अतिव्याप्तिः । अघटितत्वं च तदविषयप्रतीतिविषयत्वम् । तथा च प्रकृतानुमितितत्करणनिष्ठप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकान्तरा-विषयकप्रतीतिविषययद्विषयकत्वं प्रकृतानुमितिप्रतिबन्धकतानतिरिक्तवृत्ति तत्त्वम् दोषलक्षणम् ।।

मुक्तावली

यादृशसाध्यपक्षहेतौ यावन्तः दोषाः तावदन्यान्यत्वं तत्र हेत्वाभासत्वम् । **पञ्चत्वकथनं** तत्संभवस्थलाभिप्रायेण ।

दिनकरी

ननु अत्र अनुमितितत्करणज्ञानान्यतरप्रतिबन्धकत्वम् अन्यतरनिष्ठप्रतिबध्यता-निरूपकत्वघटितं यदि, तदा ''पर्वतो वह्निमान् धूमात्'' इत्यादौ वह्न्यभावविशिष्ट-ह्रदस्यापि दोषताप्रसङ्गः । तस्य ''पर्वतो वह्निमान्, ह्रदो वह्निमान्'' इति समूहालम्बनात्मकप्रकृतानुमितिनिष्ठप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेद-कत्वात् । यदि च तादृशान्यतरत्वावच्छिन्नप्रतिबध्यतानिरूपकत्वघटितं, तदा तादृशान्यतरत्वस्य कस्यचित्प्रतिबध्यतानवच्छेदकतया असंभवः । तादृशान्यतरत्वव्यापकप्रतिबध्यतानिवेशे च व्यभिचारादौ बाधादौ च अव्याप्तिः ।

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

व्यभिचारादेः अनुमित्यविरोधितया बाधादेश्च व्याप्तिज्ञानाविरोधितया तत्प्रतिबध्यतायाः तथाविधान्यतरत्वाव्यापकत्वात् ।

किंच तद्धर्मावच्छिन्नपक्षकतद्धर्मावच्छिन्नसाध्यकतद्धर्मावच्छिन्नहेतुकानुमिति-तत्करणज्ञानान्यतरविरोधित्वं लक्षणे निवेशनीयम् । अन्यथा ''पर्वतो वह्निमान् धूमात्'' इत्यादौ पर्वतादेः काञ्चनमयत्वाभावः हेत्वाभासः स्यात् । एवं च ''निर्वह्निः पर्वतो वह्निमान् धूमात्'' इत्यादौ न कोपि हेत्वाभासः स्यात्, तादृशानुमितेः अप्रसिद्धेः, अत आह – **यादृशसाध्य** इति । **तत्संभव** इति । ''वायुः गन्धवान् स्नेहात्'' इत्यादौ सर्वहेत्वा-भाससंभव इति भावः ।।

राजीवोल्लासः

यादृशसाध्येत्यादिमूलम् अवतारयति **ननु अत्र** इति । **यद्विषयकत्वेन ज्ञानस्य** इत्यादिना उक्तं हेत्वाभासलक्षणं परित्यज्य **यादृशसाध्यपक्षहेतौ** इत्यादिना लक्षणान्तरम् उक्तं मूले । लक्षणान्तरानुधावने बीजं कथयन् लक्षणान्तरम् अवतारयति । तथा हि – ज्ञाननिष्ठयद्विषयकत्वम् अनुमितितत्करणज्ञानान्यतरनिष्ठप्रतिबध्यता-निरूपितप्रतिबन्धकतानतिरिक्तवृत्ति तत्त्वं यदि हेत्वाभासत्वम्, तदा ''पर्वतो वन्हिमान् धूमात्'' इत्यादौ सद्धेतौ वन्ह्यभावविशिष्टह्रदस्यापि दोषत्वप्रसङ्गः । अनुमितिपदेन ''पर्वतो वन्हिमान्, ह्रदश्च वन्हिमान्'' इति समूहालम्बनात्मकप्रकृतानुमितिं गृहीत्वा तन्निष्ठप्रतिबध्यतानिरूपित प्रतिबन्धकतानतिरिक्तवृत्तित्वं वन्ह्यभाववद्ह्रदविषय-कत्वेऽस्ति । उक्तसमूहालम्बनानुमितौ ''ह्रदो वन्हिमान्'' इत्यंशे ''ह्रदो वन्ह्य-भाववान्'' इति वन्ह्यभावविशिष्टह्रदविषयकज्ञानस्य प्रतिबन्धकत्वात् वन्ह्यभाव-विशिष्टह्रदविषयकत्वे प्रतिबन्धकतानतिरिक्तवृत्तित्वरूपावच्छेदकत्वसत्त्वात् । यदि च अनुमितितत्करणान्यतरत्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतानतिरिक्तवृत्ति यादृशविशिष्टविषयकत्वं तादृशत्वं हेत्वाभासत्वम् इति उच्यते, तदा उक्तसमूहालम्बना-नुमितिनिष्ठवन्हिमद्ह्रदविषयकज्ञानत्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्ध-

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

कतानतिरिक्तवृत्तित्वस्य वन्ह्यभावविशिष्टह्रदविषयकत्वे सत्त्वेऽपि अनुमितितत्करणान्यतरत्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतानतिरिक्तवृत्तित्वविरहात् वन्ह्यभावविशिष्टह्रदे न अतिव्याप्तिः । तथापि लक्षणस्य असंभवः । बाधज्ञानस्य सत्प्रतिपक्षज्ञानस्य च साध्यविशिष्टपक्षविषयकज्ञानत्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकत्वेऽपि अनुमितितत्करणान्यतरत्ववावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकत्वविरहेण बाधसत्प्रतिपक्षविषयकत्वयोः तादृशप्रतिबन्धकतानतिरिक्तवृत्तित्वविरहात् असंभवः । एवं दोषान्तरेपि ऊह्यम् ।

एतद्दोषवारणाय अन्यतरत्वावच्छिन्नत्वं न स्वरूपसंबन्धरूपम्, अपि तु व्यापकत्वरूपम् इति स्वीकृत्य प्रकृतानुमितितत्करणान्यतरत्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतानतिरिक्तवृत्ति यादृशविशिष्टविषयकत्वं तादृशत्वं दोषलक्षणम् । अनुमितितत्करणान्यतरत्वं यत्र यत्र वर्तते असमूहालम्बने ''पर्वतो वन्हिमान्'' इत्यनुमितावपि वर्तते, तत्र तु ''वन्ह्यभाववान् ह्रदः'' इति ज्ञाननिरूपितप्रतिबध्यत्वविरहात् सद्धेतौ वन्ह्यभावविशिष्टह्रदे न अतिव्याप्तिः इत्युच्यते, तदा व्यभिचारादौ बाधादौ च अव्याप्तिः । व्यभिचारज्ञानस्य अनुमितिकरणप्रतिबन्धकत्वेऽपि अनुमितिप्रतिबन्धकत्वविरहात् बाधादिज्ञानस्य अनुमितिप्रतिबन्धकत्वेऽपि अनुमितिकरणप्रतिबन्धकत्वविरहात् व्यभिचारज्ञाननिरूपितप्रतिबध्यतायाः बाधादिज्ञाननिरूपितप्रतिबध्यतायाश्च अनुमितितत्करणान्यतरत्वव्यापकत्वविरहात् इति भावः ।

प्रतिबन्धकतावच्छेदकत्वात् इति । प्रतिबन्धकतानतिरिक्तवृत्तिविषयितानिरूपकत्वात् इत्यर्थः ।

कस्यचित्प्रतिबध्यतानवच्छेदकतया इति । किञ्चिन्निष्ठप्रतिबन्धकतानिरूपितप्रतिबध्यतानवच्छेदकतया इत्यर्थः । **तत्प्रतिबध्यताया** इति । बाधादिज्ञाननिष्ठप्रतिबन्धकतानिरूपितप्रतिबध्यताया इत्यर्थः । **तथाविधान्यतरत्वा-**

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

व्यापकत्वात् इति । प्रकृतानुमितितत्करणान्यतरत्वाव्यापकत्वात् इत्यर्थः ।

ननु तादृशान्यतरत्वव्याप्ययत्किंचिद्धर्मावच्छिन्नप्रतिबध्यतानिरूपित-प्रतिबन्धकता यद्रूपावच्छिन्नविषयिताव्यापिका तद्रूपावच्छिन्नो दोष इत्युक्तौ न दोषः । वस्तुतः अत्र अनुमितिपदं पक्षे साध्यतद्व्याप्यहेतूभयविधेयकसमूहालम्बनानु-मितिपरम्, अतः न कोऽपि दोषः । तादृशानुमितित्वव्यापकप्रतिबध्यतानिवेशेन समूहालम्बनानुमितिम् आदाय दोषवारणसंभवात्, व्याप्तिश्च अन्वयतो व्यतिरेकतश्च निवेश्या । तेन साधारण्यानुपसंहारित्वयोः न एकतरासंग्रह इति, अत आह – **किंच इति** इति **तरङ्गिणीकाराः** ।

पक्षतावच्छेदक-साध्यतावच्छेदक-हेतुतावच्छेदकधर्मान् विशिष्य निवेश्य तद्धर्मावच्छिन्नपक्षक–तद्धर्मावच्छिन्नसाध्यक–तद्धर्मावच्छिन्नहेतुक–अनुमितितत्करणान्यतरप्रतिबन्धकत्वं लक्षणे निवेशनीयम् । अन्यथा सामान्यतः अनुमितितत्करणयोः निवेशे ''पर्वतो वन्हिमान् धूमात्'' इत्यत्र काञ्चनमयत्वा-भाववत्पर्वतस्यापि दोषत्वं स्यात् । ''काञ्चनमयत्वाभाववान् पर्वतः'' इति ज्ञानस्य ''पर्वतो वन्हिमान्'' इति पर्वतत्वावच्छिन्नपक्षकानुमित्यप्रतिबध्यत्वेऽपि ''काञ्चनमयः पर्वतः वन्हिमान्'' इति अनुमितिप्रतिबन्धकत्वात् । ''तद्धर्मावच्छिन्नपक्षक'' इत्यादिनिवेशे तु पर्वतत्वावच्छिन्नपक्षकानुमितिविरोधित्वाभावात् काञ्चनमयत्वाभाव-विशिष्टपर्वते न अतिव्याप्तिः । एवं सति ''निर्वन्हिः पर्वतो वन्हिमान् धूमात्'' इत्यादौ यः कोऽपि हेत्वाभासो न स्यात् । निर्वन्हित्वविशिष्ट-पर्वतत्वाच्छिन्न-पक्षक-वन्हित्वावच्छिन्नसाध्यकानुमितेः अप्रसिद्धेः । न च – आहार्यानुमितिः प्रसिद्धा इति– वाच्यम् । आहार्यपरोक्षज्ञानानङ्गीकारात् इत्यालोच्य अनुमित्यघटितं लक्षणान्तरम् उक्तम् इति भावः ।

यादृशसाध्य इति । तद्धर्मावच्छिन्नसाध्यपक्षहेतुकानुमितित्वेन किमप्युद्दिश्य न्यायप्रयोगे यद्यद्धर्मावच्छिन्ने दोषव्यवहारः संप्रदायसिद्धः तावदन्यान्यत्वं

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

तत्रत्यदोषसामान्यलक्षणम् इत्यर्थः । तेन ''निर्वन्हिः पर्वतो वन्हिमान्'' इत्यनुमितेः अप्रसिद्धावपि न दोषः इति तरङ्गिणीकाराः ।

वायुः गन्धवान् इति ।

१. वायौ गन्धरूपसाध्याभावात् बाधः ।

२. गन्धाभाववज्जलवृत्तित्वात् स्नेहस्य व्यभिचारः ।

३. वायुरूपपक्षे हेतोः स्नेहस्य अभावात् असिद्धिः ।

४. गन्धाभावव्याप्यत्वात् स्नेहस्य विरोधः ।

५. वायुः गन्धाभाववान् पृथिवीत्वाभावात् इति सत्प्रतिपक्षश्च ।

कारिकावली

आद्यः साधारणस्तु स्यादसाधारणकोऽपरः ।
तथैवानुपसंहारी त्रिधाऽनैकान्तिको भवेत् ।। ७२ ।।

मुक्तावली

एवं च साधारणाद्यन्यतमत्वम् अनैकान्तिकत्वम् ।

साधारणः साध्यवदन्यवृत्तिः; तेन च व्याप्तिज्ञानप्रतिबन्धः क्रियते ।

असाधारणः साध्यासमानाधिकरणो हेतुः, तेन साध्यसामानाधिकरण्यग्रहः प्रतिबध्यते ।

अन्ये तु सपक्षावृत्तिः असाधारणः, सपक्षश्च निश्चितसाध्यवान् । इत्थं च ''शब्दः नित्यः शब्दत्वात्''इत्यादौ यदा पक्षे साध्यनिश्चयः तदा न असाधारण्यम्, तत्र हेतोः निश्चयात् इति वदन्ति ।

अनुपसंहारी च अत्यन्ताभावाप्रतियोगिसाध्यादिः । अनेन व्यतिरेकव्याप्तिग्रहप्रतिबन्धः क्रियते ।।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

दिनकरी

हेत्वाभासलक्षणम् उक्त्वा **मूले** वक्ष्यमाणेषु अनैकान्तिकादिलक्षणेषु क्वचित्क्वचिद्दोषं हृदि निधाय स्वयम् अनैकान्तिकादीनां लक्षणानि आह – **एवम्** इति । ''**साधारणादि**'' इति ''आदि''ना असाधारणानुपसंहारिणोः परिग्रहः ।

ननु एतस्य अनुमितितत्करणज्ञानान्यतरविरोधिज्ञानविषयत्वाभावात् कथं हेत्वाभासत्वम् इति, अतः दूषकताबीजम् आह – **तेन च** इति । एवम् अग्रेऽपि । **क्रियत** इति । **व्याप्तिघटकाव्यभिचारांशे** व्यभिचारज्ञानस्य प्रतिबन्धकत्वात् इति भावः । **प्रतिबध्यत** इति । **व्याप्तिघटकीभूतसामानाधिकरण्यग्रहः** प्रतिबध्यते इत्यर्थः । एवं च साधारणासाधारणानुपसंहारिणां व्याप्तिज्ञानप्रतिबन्धकता-रूपदूषकताबीजैक्येन एकहेत्वाभासत्वम् उपपद्यते । साधारणेन अव्यभिचार-ग्रहस्य, असाधारणेन सामानाधिकरण्यग्रहस्य, **अनुपंहारिणा** च व्यतिरेकव्याप्तिग्रहस्य प्रतिबन्धात् इति भावः ।

प्राचीनमतम् आह – **अन्ये तु** इति । **पक्षे साध्यसन्देहदशायाम्** एव असाधारणस्य हेत्वाभासता,न तु निश्चयदशायाम् । तदा पक्षस्यैव सपक्षत्वेन निश्चितसाध्यवद्व्यावृत्तत्वाभावात् इति अनित्यदोषत्वं तस्य इति आह – **इत्थं च** इति । असाधारण्यघटकसपक्षत्वस्य निश्चयघटितत्वे इत्यर्थः । **तत्र** – निश्चितसाध्यवति पक्षे । **साधारणादित्रयाणाम् एकहेत्वाभासत्वानुपपत्तिः** । ''**वदन्ति**'' इत्यनेन अस्वरसः सूचितः । **व्यतिरेकव्याप्तिग्रहप्रतिबन्ध** इति । केवलान्वयिसाध्यके च अन्वयव्याप्तिज्ञानादेव अनुमितिः इति भावः ।।

राजीवोल्लासः

अव्यभिचारांश इति । साध्यवदन्यावृत्तित्वे सति साध्यसामानाधिकरण्यं व्याप्तिः इति पक्षे व्याप्तिघटकः अव्यभिचारांशः – साध्यवदन्यावृत्तित्वम् । तज्ज्ञानं प्रति साध्यवदन्यवृत्तित्वरूपव्यभिचारज्ञानस्य प्रतिबन्धकत्वम् ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

व्याप्तिघटक इति । हेत्वधिकरणवृत्यत्यन्ताभावप्रतियोगितानवच्छेदक-साध्यतावच्छेदकावच्छिन्नसाध्यसामानाधिकरण्यं व्याप्तिः इति पक्षे हेतुसमानाधि-करणाभावप्रतियोगितावच्छेदकः धर्मः साधारणः, तज्ज्ञानं सिद्धान्तव्याप्तिघटक-प्रतियोगितानवच्छेदकत्वांशे प्रतिबन्धकम् ।

व्याप्तिघटकीभूत इति । सिद्धान्तव्याप्तिघटकीभूतं यत् साध्यसामानाधिकरण्यं तद्ग्रहः "साध्यसमानाधिकरणो हेतुः" इत्याकारकं ज्ञानं "साध्यासमानाधिकरणो हेतुः" इत्याकारकासाधारण्यज्ञानेन प्रतिबध्यते इत्यर्थः ।

अनुपंहारिणा च इति । अनुपसंहारी च अत्यन्ताभावाप्रतियोगिसाध्यं वा, अत्यन्ताभावाप्रतियोगि हेतुर्वा । तद्विषयकज्ञानं व्यतिरेकव्याप्तिग्रहस्य प्रतिबन्धकम् । "साध्याभावव्यापकीभूताभावप्रतियोगी हेतुः" इत्याकारकव्यतिरेकव्याप्तिज्ञाने साध्याभावः - साध्यप्रतियोगिकः अभावः इत्यंशे "अत्यन्ताभावाप्रतियोगि साध्यम्" इति ज्ञानं प्रतिबन्धकम् । "अभावप्रतियोगी हेतुः" इत्यंशे "अत्यन्ताभावाप्रतियोगी हेतुः" इति ज्ञानं प्रतिबन्धकम् । तथा च अनुमितिकरणव्यतिरेकव्याप्तिग्रहप्रति-बन्धकज्ञानविषयतया अनुपसंहारिणः दोषत्वं इति भावः ।

पक्षे साध्यसन्देहदशायाम् इति । **प्राचीनानां मते** असाधारणः अनित्यदोषः । तथा हि – सपक्षावृत्तिः असाधारणः । सपक्षश्च निश्चितसाध्यवान् । साध्यप्रकारक निश्चयवान् –साध्यप्रकारकनिश्चयविशेष्यः । साध्यप्रकारक-निश्चयविशेष्यावृत्तिहेतुः असाधारणः इत्युक्तं भवति । "शब्दोऽनित्यः शब्दत्वात्" इत्यादौ पक्षे शब्दे अनित्यत्वरूपसाध्यनिश्चयदशायां पक्षः शब्दोऽपि सपक्षो भवति – साध्यप्रकारकनिश्चयविशेष्यो भवति । तदवृत्तित्वं शब्दत्वे नास्तीति शब्दत्वे न असाधारण्यं दोषः । यदा तु शब्देऽनित्यत्वसन्देहः वर्तते तदा निश्चितसाध्यवान् शब्दातिरिक्तघटादिरेव । तदवृत्तित्वं शब्दत्वस्य अस्तीति तस्य असाधारण्यम् ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

एकहेत्वाभासत्वानुपपत्तिः इति । ''घटवान्'' इति बुद्धिं प्रति ''नीलघटाभाववान्'' इति बुद्धिः यथा न प्रतिबन्धिका, तद्वत् ''साध्यवद्वृत्तिः हेतुः'' इति बुद्धिं प्रति ''निश्चितसाध्यवदवृत्तिः हेतुः इति ज्ञानं न प्रतिबन्धकम् । तथा च दूषकताबीजाभावेन असाधारण्यस्य हेत्वाभासत्वानुपपत्त्या साधरणादीनां त्रयाणां एकहेत्वाभासत्वानुपपत्तिः प्राचीनमते अस्वारस्यम् ।

ननु अत्यन्ताभावाप्रतियोगिसाध्यस्य अनुपसंहारित्वे केवलान्वयिसाध्यकहेतोः दुष्टत्वापत्या केवलान्वयिसाध्यकानुमित्युपपत्तये साध्याभाववदवृत्तित्वादिरूपव्याप्तिपरित्यागेन हेतुव्यापकसाध्यसामानाधिकरण्यमेव व्याप्तिः इति नैयायिकसिद्धान्तो विरुद्ध्यते इति आशङ्क्य आह – केवलान्वयिसाध्यके च इत्यादि । ''इदं वाच्यं ज्ञेयत्वात्'' इत्यादि केवलान्वयिसाध्यकानुमाने ''अत्यन्ताभावाप्रतियोगि साध्यम्'' इति अनुपसंहारित्वज्ञानेन व्यतिरेकव्याप्तिज्ञानस्य प्रतिबन्धेऽपि अन्वयव्याप्तिज्ञानस्य अप्रतिबन्धात् अन्वयव्याप्तिज्ञानमूलकानुमित्युत्पत्या न हेतोर्दुष्टत्वम् । तर्हि अनुपसंहारी कुत्र दोषः इति चेत्, – ''सर्वम् अभिधेयं प्रमेयत्वात्'' इत्यादौ स दोषः । तत्र हि सर्वस्य पक्षत्वात् अन्वयव्याप्तिग्रहदृष्टान्तविरहात् अन्वयव्याप्तिज्ञानात् अनुमितिः वक्तुं न शक्यते । व्यतिरेकव्याप्तिज्ञानमपि अनुपसंहारित्वज्ञानेन प्रतिबद्धमिति व्यतिरेकव्याप्तिज्ञानमूलकानुमितिरपि न उत्पद्यते । अतः तत्र अनुपसंहारित्वं दोषः इति भावः ।।

मुक्तावली

विरुद्धस्तु साध्यव्यापकीभूताभावप्रतियोगी । अयं साध्याभावग्रहसामग्रीत्वेन प्रतिबन्धकः । सत्प्रतिपक्षे तु प्रतिहेतुः साध्याभावसाधकः, अत्र तु हेतुः एक एव इति विशेषः । साध्याभावसाधक एव हेतुः साध्यसाधकत्वेन उपन्यस्त इति अशक्तिविशेषोपस्थापकत्वाच्च विशेषः ।।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

दिनकरी

ननु एवं साध्याभावसाधकात् सत्प्रतिपक्षात् विरुद्धस्य **भेदः न स्यात्**, अत आह – **सत्प्रतिपक्षे तु** इति । **प्रतिहेतुः** – प्रतिकूलः द्वितीयो हेतुः । **इति विशेषः** – इति अनयोः भेदः । ननु यदि दूषकताबीजैक्येऽपि हेतुभेदे सत्प्रतिपक्षः, हेत्वैक्ये विरुद्धरूपं हेत्वाभासान्तरम् इत्युच्यते, तदा यत्र **अन्वयिना** हेत्वन्तरेण प्रतिरोधः तत्र सत्प्रतिपक्षः, यत्र तु **व्यतिरेकिणा** तत्र हेत्वाभासान्तरं स्यात् । अतः भेदकान्तरमपि आह – **साध्याभाव** इति । वस्तुगत्या साध्याभावसाधके हेतावेव तव साध्यसाधकत्वभ्रम इति स्थापनावादिनं प्रति भ्रमरूपाशक्तिसूचकत्वं विरुद्धस्य, न तु एवं सत्प्रतिपक्षस्य इति भावः ।।

राजीवोल्लासः

मूले विरुद्धस्तु इत्यादि । साध्याभावव्याप्यो हेतुः विरुद्धः । साध्याभावव्याप्यत्वं च साध्याभावनिरूपितव्यतिरेकव्याप्तिमत्त्वम् । तदपि साध्याभावाभावव्यापकीभूताभावप्रतियोगित्वम् साध्यव्यापकीभूताभावप्रतियोगित्वपर्यवसितम् इत्याशयेन साध्यव्यापकीभूताभावप्रतियोगी इति उक्तम् । ''शब्दो नित्यः कृतकत्वात्'' इत्युदाहरणम् । **साध्याभावग्रहसामग्रीत्वेन** इति । साध्याभावव्याप्यवत्ताज्ञानत्वेन इत्यर्थः । तथा च तद्वत्ताबुद्धिं प्रति तदभावव्याप्यवत्ताज्ञानस्य प्रतिबन्धकत्वात् ''शब्दः नित्यः'' इत्यनुमितिं प्रति नित्यत्वाभावनिरूपितव्यतिरेकव्याप्तिमद्-हेतुमत्ताज्ञानस्य – ''नित्यत्वव्यापकीभूताभावप्रतियोगिकृतकत्ववान् शब्दः'' इत्याकारकस्य विरोधज्ञानस्य तदभावव्याप्यवत्ताज्ञानरूपतया प्रतिबन्धकत्वम् इति भावः ।

वस्तुतस्तु – ''साध्याभावव्याप्यो हेतुः'' इत्याकारकमेव विरोधज्ञानम् । तत्तु न साध्यवत्ताज्ञानं प्रति प्रतिबन्धकम् । ''साध्याभावव्याप्यहेतुमान् पक्षः'' इति ज्ञानस्यैव तदभावव्याप्यवत्ताज्ञानविधया साध्यवत्ताज्ञानंप्रतिबन्धकत्वात् ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अतः एवं वक्तव्यम् – ''साध्याभावव्याप्यो हेतुः'' इति विरोधज्ञानं साध्याभावनिरूपितव्याप्तिज्ञानविधया ''साध्याभावव्याप्यवान् पक्ष'' इति परामर्शं प्रति कारणम् । स च परामर्शः ''पक्षः साध्याभाववान्'' इति ग्रहं प्रति कारणम् । एवं च विरोधज्ञानं परामर्शद्वारा साध्याभावग्रहं जनयति । स च साध्याभावग्रहः साध्यग्रहं प्रतिबध्नाति इति परंपरया विरोधज्ञानस्य साध्यग्रहप्रतिबन्धकत्वम् इत्याशयेन **साध्याभावग्रहसामग्रीत्वेन प्रतिबन्धकः** इत्युक्तम् ।

सुबोधिनीकारास्तु – साध्याभावग्रहः साध्याभावानुमितिः तत्सामग्रीत्वेन तत्कारणव्यतिरेकिपरामर्शविषयत्वेन प्रतिबन्धकः – प्रतिबन्धकज्ञानविषयः । प्रतिबन्धकतावच्छेदकरूपं तु पक्षधर्मताज्ञानविशिष्टविरोधविषयकनिश्चयत्वम् इति हेत्वाभाससामान्यलक्षणतरङ्गिण्यां स्पष्टम् इत्याहुः ।

यदि विरुद्धः साध्याभावस्य साधकः, सत्प्रतिपक्षोऽपि साध्याभावस्यैव साधक इति सत्प्रतिपक्षात् विरुद्धस्य भेदो न स्यात् इति आशङ्क्य सत्प्रतिपक्षे प्रतिहेतुः साध्यसाधकत्वेन उपन्यस्तस्य हेतोः प्रतिकूलो – द्वितीयो हेतुः साध्याभावसाधकः । विरोधे तु साध्यसाधकत्वेन उपन्यस्तः हेतुरेव साध्याभावसाधकः इति विशेषः मूले उक्तः ।

दिनकर्यां भेदः न स्यात् इति । यद्यपि साध्याभावव्याप्यवान् पक्षः सत्प्रतिपक्षः, विरोधस्तु साध्यव्यापकाभावप्रतियोगी प्रकृतो हेतुः इति स्वरूपभेदो वर्तते एव, तथापि यथा साधारणादीनां परस्परवैलक्षण्येऽपि दूषकताबीजस्य ऐक्येन एकहेत्वाभासत्वं तथा सत्प्रतिपक्षविरोधयोरपि विरोध्यनुमितिसामग्रीत्वेन प्रतिबन्धकतारूपदूषकताबीजैक्यात् एकहेत्वाभासत्वं स्यात् इति भावः – इति तरङ्गिणीकाराः ।

दूषकताबीजैक्येऽपि इति । विरोध्यनुमितिसामग्रीत्वरूपस्य दूषकताबीजस्य एकत्वेऽपि । **हेतुभेदे** – हेत्वोः भिन्नत्वे सत्प्रतिपक्षः । **अन्वयिना** – अन्वयव्याप्तिमता । **व्यतिरेकिणा**-व्यतिरेकव्याप्तिमता ।।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

मुक्तावली

सत्प्रतिपक्षः साध्याभावव्याप्यवान् पक्षः ।

अगृहीताप्रामाण्यकसाध्यव्याप्यवत्त्वोपस्थितिकालीनागृहीताप्रामाण्यकतदभावव्याप्यवत्त्वोपस्थितिविषयः तथा इति अन्ये ।

अत्र च परस्पराभावव्याप्यवत्ताज्ञानात् परस्परानुमितिप्रतिबन्धः फलम् ।

अत्र केचित् – यथा घटाभावव्याप्यवत्ताज्ञानेऽपि घटचक्षुःसंयोगे सति घटवत्ताज्ञानं जायते, **यथा च** शङ्खे सत्यपि पीतत्वाभावव्याप्यशङ्खत्ववत्ताज्ञाने सति पित्तादिदोषे पीतः शङ्ख इति धीः, **एवं कोटिद्वयव्याप्यदर्शनेऽपि** कोटिद्वयस्य प्रत्यक्षरूपः संशयः भवति, तथा सत्प्रतिपक्षस्थले संशयरूपा **अनुमितिः भवत्येव** । यत्र च एककोटिव्याप्यदर्शनम्, तत्र अधिकबलतया द्वितीयकोटिभानप्रतिबन्धात् न संशयः । **फलबलेन** च अधिकबलसमबलभावः कल्प्यत इति – आहुः ।

तन्न । तदभावव्याप्यवत्ताज्ञाने सति तदुपनीतभानविशेषशाब्दबोधादेः अनुदयात् लौकिकसन्निकर्षाजन्य-दोषविशेषाजन्य-**ज्ञानमात्रे** तस्य प्रतिबन्धकता, लाघवात्; न तु उपनीतभानविशेषे शाब्दबोधे च पृथक्प्रतिबन्धकता, **गौरवात्** । तथा च प्रतिबन्धकसत्त्वात् **कथम् अनुमितिः?** नहि लौकिकसन्निकर्षस्थले प्रत्यक्षमिव सत्प्रतिपक्षस्थले संशयाकारा अनुमितिः प्रामाणिकी, येन अनुमितिभिन्नत्वेनापि विशेषणीयम् । **यत्र च** कोटिद्वयव्याप्यवत्ताज्ञानं तत्र उभयत्र अप्रामाण्यज्ञानात् संशयः, न अन्यथा, अगृहीताप्रामाण्यकस्यैव विरोधिज्ञानस्य प्रतिबन्धकत्वात् इति ।।

दिनकरी

साध्याभावव्याप्य इति । एवं **साध्यवदन्यत्वव्याप्यवान् पक्षः** । **पक्षनिष्ठौ** साध्याभावसाध्यवदन्यत्वव्याप्यावपि बोध्यौ । **अन्यतमत्वादिना** अनुगमान्न विभागव्याघातः ।

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

सत्प्रतिपक्षव्यवहारौपयिकम् अन्येषां सत्प्रतिपक्षलक्षणम् आह – **अगृहीत** इति । **नित्यत्वव्याप्यशब्दत्ववत्ताज्ञानशून्यकालीनानित्यत्वव्याप्यकृतकत्वपरामर्श-सत्त्वेऽपि सत्प्रतिपक्षव्यवहाराभावात् कालीनान्तम् उपस्थितिविशेषणम् । गृहीताप्रामाण्यकनित्यत्वव्याप्यवत्ताज्ञानकालीनानित्यत्ववव्याप्यकृतकत्वपरामर्शसत्त्वेऽपि तद्व्यवहाराभावात् ''अगृहीताप्रामाण्यक'' इति प्रथमोपस्थितिविशेषणम् । तादृशकालीनानित्यत्वव्याप्यवत्तापरामर्शसत्त्वेऽपि तत्र अप्रामाण्यग्रहकाले तथा व्यवहाराभावात् अगृहीताप्रामाण्यकत्वं द्वितीयोपस्थितिविशेषणम् । व्यवहारमात्रोपयोगिनः निरुक्तरूपस्य प्रकृतानुपयोगः, उपस्थितिघटितस्य उक्तरूपस्य स्वरूपसत एव उपयुक्तस्य आभासतायाम् अप्रयोजकत्वात् इति अस्वरसं सूचयति अन्ये इति ।**

सत्प्रतिपक्षस्य दूषकताबीजं दर्शयति – अत्र इत्यादिना ।

सत्प्रतिपक्षस्य संशयजनकत्वं दूषकताबीजम्, न तु अनुमितिप्रतिबन्धकत्वम् । तदभावव्याप्यवत्ताज्ञानस्य अनुमितिप्रतिबन्धकत्वे मानाभावात् इति **रत्नकोशकारमतं** दूषयितुम् उपन्यस्यति – **अत्र केचित्** इत्यादिना । **अनुमितिः भवत्येव** इति । अनुमितिं प्रति तदभावव्याप्यवत्ताज्ञानस्य प्रतिबन्धकत्वे मानाभावात् क्लृप्ततत्तदभावानुमितिसामंग्रीभ्यामेव तत्तदभावकोटिकसंशयानुमित्युत्पत्तौ संशयानुमितिं प्रति उभयव्याप्यवत्तानिश्चयत्वेन अतिरिक्तहेतुताकल्पनप्रयुक्तगौरवाभावाच्च इति भावः । ननु यद्युभयभासकसत्त्वे उभयभानं, तदा पित्तादिदोषसत्त्वेऽपि पीतत्वशुक्लत्वो-भयस्मृतौ उभयोः भानापत्तिः इति, अत आह – **फलबलेन** इति । तथाच तत्र पीतत्वसाक्षात्कारस्यैव आनुभविकतया शुक्लत्वग्रहे पित्तरूपदोषस्य प्रतिबन्धकत्वं कल्पयित्वा पीतत्वसाक्षात्कारसामग्र्या अधिकबलवत्त्वम्, एवं दूरत्वदोषे सत्यपि स्थाणुत्वपुरुषत्वयोः स्मृतौ संशयस्यैव उदयात् तत्सामग्र्याः समबलवत्त्वमेव कल्प्यते इति भावः । **ज्ञानमात्रे** – तादृशज्ञानत्वावच्छिन्ने । **विशेषे** – दोषविशेषाजन्ये ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

गौरवात् – कार्यकारणभावद्वयकल्पने गौरवात् इति भावः । **कथम् अनुमितिः** इति । अनुमितेरपि तत्प्रतिबध्यतावच्छेदकाक्रान्तत्वात् इति भावः । कथं तर्हि उभयव्याप्यवत्तानिश्चयात् प्रात्यक्षिकः संशय इति आशङ्क्य न भवत्येव तावत् यावत् तन्निश्चये अप्रामाण्यं न गृह्यते इत्याह – **यत्र च** इति ।।

राजीवोल्लासः

साध्याभावव्याप्यवान् पक्षः – साध्यात्यन्ताभावव्याप्यवान् पक्ष इत्यर्थः । **साध्यवदन्यत्वव्याप्यवान् पक्ष** इति । साध्यवद्भेदव्याप्यवान् पक्ष इत्यर्थः । **पक्षनिष्ठौ** इति । पक्षनिष्ठः साध्याभावव्याप्यः, पक्षनिष्ठः साध्यवद्भेदव्याप्यश्च इति चत्वारः सत्प्रतिपक्षाः । ननु एवं चतुष्टयस्य अनुगतरूपाभावात् कथम् एकरूपेण एतेषां विभागः । यदि च साध्याभावोत्थापकत्वेन विभागः तदा विरुद्धोऽपि एतन्मध्य एव अन्तर्भूत इति, अत आह – **अन्यतमत्वादिना** इति । ''आदि''ना एतच्चतुष्टयविषयकधीविषयतावच्छेदकधर्मवत्त्वपरिग्रहः ।

सत्त्प्रतिपक्षव्यवहारौपयिकम् इति । अनेन एतादृशस्थले **प्राचां** सत्प्रतिपक्षव्यवहामात्रम्, न तु अयं हेतुदोषात्मकः सत्प्रतिपक्षः इति सूचितम् । **अगृहीताप्रामाण्यक** इत्यादि । अप्रामाण्यज्ञानाभावविशिष्टा या साध्यव्याप्यवत्त्वोपस्थितिः तत्कालीना या अप्रामाण्यज्ञानाभावविशिष्ट-साध्याभावव्याप्यवत्वोपस्थितिः तद्विषयः सत्प्रतिपक्षः । ''नित्यत्वव्याप्यशब्दत्ववान् शब्दः'' इति ज्ञानकाले यदि ''नित्यत्वाभावव्याप्यकृतकत्ववान्'' इति ज्ञानमस्ति तदनीमेव तादृशज्ञानविषयः हेतुः सत्प्रतिपक्षः इति व्यवहारविषयो भवति । अतः इदं सत्प्रतिपक्षव्यवहारौपयिकं लक्षणम् ।

एतद्घटकदलानां प्रयोजनमाह – **नित्यत्वव्याप्य** इत्यादिना । ''नित्यत्व-व्याप्यशब्दत्ववान् शब्दः'' इति ज्ञानशून्यकाले ''अनित्यत्वव्याप्यकृतकत्ववान् शब्दः'' इति परामर्शसत्त्वेऽपि ''अयं सत्प्रतिपक्षः'' इति व्यवहाराभावात्

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अन्वयव्यभिचार इति उपस्थितौ कालीनान्तं विशेषणम् । ''इदं ज्ञानम् अप्रमा'' इत्याकारकाप्रामाण्यज्ञानविशिष्टं यत् ''नित्यत्वव्याप्यशब्दत्ववान्'' इति ज्ञानं तत्कालीनस्य ''अनित्यत्वव्याप्यकृतकत्ववान् शब्दः'' इति परामर्शस्य सत्त्वेऽपि सत्प्रतिपक्षः इति व्यवहाराभावात् ''अगृहीताप्रामाण्यक'' इति प्रथमोपस्थितौ विशेषणम् । ''अप्रामाण्यज्ञानाभावविशिष्ट'' इति तदर्थः । अप्रामाण्यज्ञानाभावविशिष्ट-नित्यत्वव्याप्यशब्दत्ववत्ताज्ञानकालीनानित्यत्वव्याप्यकृतकत्ववत्तापरामर्शसत्त्वेऽपि तस्मिन् परामर्शे यदि अप्रामाण्यग्रहः तदा सत्प्रतिपक्षव्यवहाराभावात् द्वितीयोपस्थितौ ''अगृहीताप्रामाण्यक'' इति – विशेषणम् । **प्रकृतानुपयोग** इति । प्रकृतानुपयोगः – हेत्वभासनिरूपणप्रस्तावे उपयोगाभावः । ननु अयमेव सत्प्रतिपक्षाभिधो हेत्वाभास इति कुतो न व्यवहारोपयोग इति, अत आह – **उपस्थिति** इति । विरोधिपरामर्शद्वयस्य स्वरूपसत एव परामर्शकार्यप्रतिबन्धकत्वम्, न तु ज्ञातस्य । यादृशरूपावच्छिन्न-ज्ञानम् अनुमितिप्रतिबन्धकं तद्रूपावच्छिन्नस्यैव हेत्वाभासतया न एतस्य स्वरूपसतः हेत्वाभासतासंभव इति भावः । तथा च व्यावहारिकसत्प्रतिपक्षलक्षणस्य हेत्वाभास-सामान्यलक्षणानाक्रान्ततया अजिज्ञासितत्वेन तस्य अभिधाने अर्थान्तरं – अजि-ज्ञासितार्थकथनम् दोषः इति अस्वारस्थं ''अन्ये'' इत्यनेन सूचितम् इति भावः ।

सत्प्रतिपक्षस्य दूषकताबीजम् इति । सत्प्रतिपक्षस्थले साध्यसाधक हेतोः साध्याभावसाधकहेतोश्च उपन्यासात् द्वाभ्यां हेतुभ्यां श्रुताभ्यां ''साध्यव्याप्यहेतुमान् पक्षः'', ''साध्याभावव्याप्य-प्रतिहेतुमान् च पक्ष'' इति परामर्शद्वयं जायते । तत्र ''साध्यव्याप्यहेतुमान्'' इति परामर्शात् साध्याभावानुमितिः प्रतिबध्यते । ''साध्या-भावव्याप्यवान्'' इति परामर्शात् साध्यानुमितिः प्रतिबध्यते । अतः अनुमितिप्रति-बन्धकज्ञानविषयतया सत्प्रतिपक्षस्य दोषत्वम् इति भावः ।

सत्प्रतिपक्षस्य इति । सत्प्रतिपक्षस्थले ''साध्यव्याप्यहेतुमान् पक्षः'', ''साध्याभावव्याप्यहेतुमान् पक्षः'' इति परामर्शद्वयस्य सत्त्वात् द्वाभ्यां परामर्शाभ्यां

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

''पक्षः साध्यवान् साध्याभाववान्'' वा इति संशयाकारा अनुमितिः जायते । अतः संशयजनकत्वमेव सत्प्रतिपक्षस्य दूषकताबीजम्, न तु अनुमितिप्रतिबन्धकत्वम् ।

न च – तद्वत्ताबुद्धिं प्रति तदभावव्याप्यवत्ताज्ञानस्य प्रतिबन्धकत्वात् परस्परानुमितिप्रतिबन्धकत्वम् इति – वाच्यम् । तदभावव्याप्यवत्ताज्ञानस्य प्रतिबन्धकत्वे प्रमाणाभावात् इति वदतां **रत्नकोशकाराणां** मतं दूषणार्थम् अनुवदति –**अत्र केचित्** इत्यादिना । तथा हि – ''घटाभावव्याप्यवद्भूतलम्'' इति ज्ञाने सत्यपि घटस्य चक्षुस्संयोगे सति ''भूतलं घटवत्'' इति ज्ञानं जायते । यदि तदभावव्याप्यवत्ताज्ञानं प्रतिबन्धकं स्यात् कथं घटवत्ताज्ञानं जायेत । एवं ''शङ्खः पीतत्वाभावव्याप्यशङ्खत्ववान्'' इति ज्ञाने सत्यपि पित्तादिदोषवशात् ''पीतः शङ्खः'' इति बुद्धिः जायते । तदभावव्याप्यवत्ताज्ञानस्य प्रतिबन्धकत्वे कथं ''पीतः शङ्खः'' इति बुद्धिः स्यात् । एवं ''स्थाणुत्वव्याप्यवक्रकोटरादिमान्'', ''पुरुषत्वव्याप्यकरादिमान्'' इति स्थाणुत्वपुरुषत्वरूपकोटिद्वयव्याप्यदर्शने सति ''अयं स्थाणुर्वा पुरुषो वा'' इति कोटिद्वयविषयकः प्रत्यक्षात्मकः संशयो भवति । तथा सत्प्रतिपक्षस्थले साध्यतदभावरूपकोटिद्वयव्याप्यवत्ताज्ञानाभ्यां ''साध्यवान् तदभाववान् वा'' इति संशयरूपानुमितिः भवत्येव ।

ननु निश्चयजनकत्वेन क्लृप्तस्य व्याप्यवत्ताज्ञानस्य कथं संशयजनकत्वम् इति चेत् न – तत्तत्प्रत्येककोटिव्याप्यवत्ताज्ञानस्य एकैकस्य एककोटिनिश्चयजनकत्वेऽपि मिलितयोः कोटिद्वयव्याप्यवत्ताज्ञानयोः संशयजनकत्वे बाधकाभावात् । प्रत्यक्षसंशयस्थले तथा दर्शनात् । यत्र च एककोटिव्याप्यदर्शनं तत्र उपस्थितस्यापि द्वितीयकोटेः भानं न संभवति । व्याप्यदर्शनरूपाधिकबलवत्त्वात् इति **रत्नकोशकाराः** आहुः ।

ननु **रत्नकोशकारमते** तद्वत्ताज्ञाने तदभावव्याप्यवत्ताज्ञानस्य अप्रतिबन्धकत्वेन परस्परानुमितिप्रतिबन्धकस्य सत्प्रतिपक्षस्थलेऽसंभवेऽपि निश्चयोत्पादने क्लृप्तशक्तिकयोः

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

तत्तदभावव्याप्यवत्ताज्ञानयोः मिलितयोः साध्यसंशयहेतुत्वं कल्पनीयम् इति गौरवम् इत्याशङ्कां निराकर्तुम् आह – **क्लृप्त** इति । अयं भावः – तत्तत्परामर्शस्य तत्तद्विधेयकानुमितित्वमेव कार्यतावच्छेदकम्, नतु निश्चयत्वमपि तद्घटकम् । परंतु एकैकपरामर्शसत्त्वे कोट्यन्तरभासकसामग्र्यभावात् निश्चयात्मिका अनुमितिः भवति । उभयपरामर्शसत्त्वेन च कारणबलात् उभयकोट्योः विरोधितया भाने अर्थात् संशयो भवति इति न अधिककार्यकारणभावकल्पनं तन्मते इति ।

मूले तदभावव्याप्यवत्ताज्ञानस्य तद्वत्ताज्ञाने प्रतिबन्धकत्वासंभवं दर्शयति – **यथा** इति । ननु प्रतिबध्यकोटौ लौकिकसन्निकर्षाजन्यत्वनिवेशात् तदभावव्याप्यवत्ताज्ञाने सति लौकिकसन्निकर्षजन्यतद्वत्ताज्ञानस्य उत्पत्तावपि लौकिकसन्निकर्षाजन्यानुमितिरूपं तद्वत्ताज्ञानं भवितुं नार्हति इति आशङ्क्य आह – **यथा च** इति । ननु प्रतिबध्यकोटौ दोषविशेषाजन्यत्वस्यापि निवेशात् नायं दोषः इति, अत आह – **एवं कोटिद्वय** इति ।

रत्नकोशकारमतं खण्डयति – तन्न इत्यादिना । ''तदभावव्याप्यवान्'' इति ज्ञाने सति तद्विषयकालौकिकसाक्षात्कारस्य तद्विषयकशाब्दबोधस्य च अनुत्पत्या तद्विषयकालौकिकसाक्षात्कारं प्रति तद्विषयकशाब्दबोधं प्रति च तदभावव्याप्यवत्ताज्ञानं प्रतिबन्धकमिति पृथक् पृथक् प्रतिबन्धकत्वकल्पनापेक्षया प्रतिबध्यद्वयसाधारण-लौकिकसन्निकर्षाजन्य–दोषविशेषाजन्य–ज्ञानत्वावच्छिन्नं प्रति तदभावव्याप्य-वत्ताज्ञानं प्रतिबन्धकम् इति एक एव प्रतिबध्यप्रतिबन्धकभावः कल्प्यते लाघवात् । एवं च प्रतिबध्यतावच्छेदकस्य लौकिकसन्निकर्षाजन्यदोषविशेषाजन्यज्ञानत्वस्य अनुमितावपि सत्त्वेन अनुमितिं प्रत्यपि तदभावव्याप्यवत्ताज्ञानं प्रतिबन्धकम् । तथा च साध्यानुमितेः साध्याभावानुमितेश्च प्रतिबन्धकस्य तत्तदभावव्याप्यवत्ताज्ञानस्य सत्प्रतिपक्षस्थले सत्त्वात् कथम् अनुमितिः भवितुमर्हति ।

न च लौकिकसन्निकर्षस्थले प्रत्यक्षवत् सत्प्रतिपक्षस्थले संशयाकारानुमितिः उभयवादिसिद्धा, येन प्रतिबध्यतावच्छेदकशरीरे लौकिकसन्निकर्षाजन्यत्वनिवेशवत्

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अनुमित्यन्यत्वमपि निवेश्य लौकिकसन्निकर्षाजन्यअनुमित्यन्यज्ञानत्वावच्छिन्नं प्रति तदभावव्याप्यवत्ताज्ञानस्य प्रतिबन्धकत्वं कल्प्येत ।

न च कोटिद्वयव्याप्यदर्शने कोटिद्वयस्य प्रत्यक्षरूपः संशयः कथम् इति वाच्यम् । तत्र उभयोरपि कोटिद्वयव्याप्यवत्ताज्ञानयोः अप्रमाण्यज्ञानादेव संशयः । अप्रामाण्यज्ञानाभावे तु तत्रापि परस्परं प्रतिबन्धात् संशयाकारं प्रत्यक्षं न जायते ।

मुक्तावली

असिद्धिस्तु आश्रयासिद्ध्याद्यन्यतमत्वम् ।

आश्रयासिद्धिः पक्षे पक्षतावच्छेदकस्य अभावः । यत्र "काञ्चनमयः पर्वतो वह्निमान्" इति साध्यते, तत्र "पर्वतो न काञ्चनमयः" इति ज्ञाने विद्यमाने काञ्चनमये पर्वते परामर्शप्रतिबन्धः फलम् ।

स्वरूपासिद्धिस्तु पक्षे व्याप्यत्वाभिमतस्य अभावः । तत्र च "ह्रदो द्रव्यं धूमात्" इत्यादौ पक्षे व्याप्यत्वाभिमतस्य हेताः अभावे ज्ञाते, पक्षे साध्यव्याप्यहेतुमत्ताज्ञानरूपस्य परामर्शस्य प्रतिबन्धः फलम् ।

साध्याप्रसिद्ध्यादयस्तु व्याप्यत्वासिद्धिमध्येऽन्तर्भूताः ।

साध्ये साध्यतावच्छेदकस्य अभावः साध्याप्रसिद्धिः । एतज्ज्ञाने जाते "काञ्चनमयवह्निमान्" इत्यादौ साध्यतावच्छेदकविशिष्टसाध्यपरामर्शप्रतिबन्धः फलम् ।

एवं हेतौ हेतुतावच्छेदकाभावः साधनाप्रसिद्धिः । यथा "काञ्चनमयधूमात्" इत्यादौ । अत्र हेतुतावच्छेदकविशिष्टहेतुज्ञानाभावात् तद्धेतुकव्याप्तिज्ञानादेः अभावः फलम् ।

एवं "वह्निमान्नीलधूमात्" इत्यादौ गुरुतया नीलधूमत्वस्य हेतुतानवच्छेदकत्वमपि व्याप्यत्वासिद्धिः इत्यपि वदन्ति ।।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

दिनकरी

आश्रयासिद्ध्यादि इत्यादिना स्वरूपासिद्धिव्याप्यत्वासिद्ध्योः परिग्रहः । साध्याप्रसिद्ध्यादीनाम् आधिक्यं निराकरोति – **साध्याप्रसिद्ध्यादयस्तु** इति । ''आदि''ना साधनाप्रसिद्धिपरिग्रहः । केषांचिन्मतम् आह – **एवं वह्निमान्** इत्यादिना । **वदन्ति इत्यनेन** अस्वरसः, तद्बीजं तु – नीलधूमे व्याप्तिसत्त्वात् कथं व्याप्यत्वासिद्धिः । न च तत्र व्याप्तिसत्त्वेऽपि नीलधूमत्वस्य अनवच्छेदकतया तदवच्छेदेन व्याप्यत्वासिद्धिरेव इति – वाच्यम् । अनतिरिक्तवृत्तित्वरूपावच्छेदकत्वस्य नीलधूमत्वेऽपि सत्त्वात् । स्वरूपसंबन्धरूपावच्छेदकत्वाभावात् व्याप्यत्वाप्रसिद्धिः इत्यपि न । तथा सति ''पशुमान् सास्नादिमतः'' इत्यादावपि व्याप्यत्वासिद्ध्यापत्तेः । सास्नाद्यपेक्षया गोत्वादिजातेः लघुत्वेन सास्नादेः स्वरूपसंबन्धरूपावच्छेदकत्वाभावात् । अस्तु वा नीलधूमत्वादेः स्वरूपसंबन्धरूपावच्छेदकत्वाभावात् तदवच्छेदेन व्याप्त्यभावरूपव्याप्यत्वासिद्धिः, न तु हेत्वाभासत्वम्, अनुमितितत्करणीभूतव्याप्तिज्ञानाविरोधित्वात् ।

न च – ''वह्निमदन्यावृत्तिप्रमेयवान्'' इति प्रमेयत्वसामानाधिकरण्येन व्याप्त्यवगाहिज्ञानात् अनुमित्यापत्तिवारणाय हेतुतावच्छेदकावच्छेदेन व्याप्तिज्ञानस्यैव कारणतया तद्विरोधितया निरुक्तव्याप्यत्वासिद्धिः हेत्वाभास इति – वाच्यम् । तावतापि अनतिरिक्तवृत्तित्वरूपावच्छेदकत्वज्ञानस्य कारणत्वेऽपि तत्र स्वरूपसंबन्धरूपावच्छेदकत्वाभावग्रहस्य ग्राह्याभावानवगाहितया अविरोधित्वात् । तस्मात् व्यर्थविशेषणस्थले न व्याप्यत्वासिद्धिः हेत्वाभासः, पुरुषस्त्वधिकेन निगृह्यत इति ।।

राजीवोल्लासः

मूले आश्रयासिद्धिः इत्यादि । पक्षतावच्छेदकाभाववत्पक्षः आश्रयासिद्धिः । यथा ''काञ्चनमयः पर्वतो वन्हिमान्'' इत्यत्र काञ्चनमयत्वाभाववत्पर्वतः आश्रयासिद्धिः । तज्ज्ञानं परामर्शप्रतिबन्धकम् । ''पर्वतः काञ्चनमयत्वाभाववान्'' इति ज्ञाने सति ''वन्हिव्याप्यधूमवान् काञ्चनमयः पर्वतः'' इति परामर्शस्य अनुदयात् ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

परामर्शे पक्षतावच्छेदकविशिष्टः पक्षः इत्यंशभानं प्रति आश्रयासिद्धिज्ञानं प्रतिबन्धकम् इत्युक्तं भवति । स्वरूपसिद्धिस्तु पक्षे साध्यव्याप्यत्वेन अभिमतस्य हेतोरभावः । हेत्वभाववत्पक्षः स्वरूपासिद्धिरिति यावत् । तज्ज्ञानमपि परामर्शप्रतिबन्धकम् । ''ह्रदो द्रव्यम् धूमात्'' इत्यादौ ''धूमाभाववान् ह्रदः'' इति स्वरूपासिद्धिज्ञाने सति ''द्रव्यत्वव्याप्यधूमवान् ह्रदः'' इति धूमवद्ह्रदविषयकपरामर्शस्य अनुदयात् ।

यथा पक्षे पक्षतावच्छेदकाभावः आश्रयसिद्धिः, तथा साध्ये साध्यतावच्छेदकाभावः साध्याप्रसिद्धिः । हेतौ हेतुतावच्छेदकाभावः साधनाप्रसिद्धिः । उदाहरणं ''पर्वतः काञ्चनमयवन्हिमान् काञ्चनमयधूमात्'' इति । तत्र साध्याप्रसिद्धि–साधनाप्रसिद्ध्योः गणनेन असिद्धिः पञ्चविधा भवति, त्रिविधा इत्युक्तिः कथम् इत्याशङ्क्य **साध्याप्रसिद्ध्यादयस्तु** इत्युक्तम् । तथा च साध्याप्रसिद्धिसाधनाप्रसिद्ध्योः व्याप्यत्वासिद्धौ अन्तर्भावात् न पृथक् गणनं कृतम् इति भावः ।

''साध्यतावच्छेदकविशिष्टसाध्यव्याप्यहेतुमान् पक्षः'' इति परामर्शं प्रति साध्यतावच्छेदकविशिष्टसाध्यांशभाने ''साध्यतावच्छेदकाभाववत् साध्यम्'' इति साध्याप्रसिद्धिज्ञानं प्रतिबन्धकम् ।

''साध्यव्याप्यहेतुतावच्छेदकविशिष्टहेतुमान्'' इति परामर्शे हेतुतावच्छेदकविशिष्टहेतुभाने ''हेतुतावच्छेदकाभाववान् हेतुः'' इति साधनाप्रसिद्धिज्ञानं प्रतिबन्धकम् । एवं च हेतुतावच्छेदकविशिष्टहेतुव्यापक-साध्यतावच्छेदकविशिष्ट-साध्यसामानाधिकरण्यस्य व्याप्तित्वात् साध्याप्रसिद्धिस्थले व्याप्तिघटकस्य साध्यतावच्छेदकविशिष्टसाध्यस्य अप्रसिद्ध्या तद्धटितव्याप्त्यप्रसिद्धिः, साधनाप्रतिसिद्धिस्थले हेतुतावच्छेदकविशिष्टहेत्वप्रसिद्ध्या तद्धटितव्याप्त्यसिद्धिः इत्याशयेन **व्याप्यत्वासिद्धिमध्ये अन्तर्भूताः** इति उक्तम् । एवं च साध्याप्रसिद्ध्यादीनां अनुमितिकारण-व्याप्तिज्ञानप्रतिबन्धकज्ञानविषयतया हेत्वाभासत्वम् व्याप्यत्वासिद्धिमध्ये अन्तर्भावश्च इति भावः ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

''वन्हिमान् नीलधूमात्'' इत्यादौ धूमत्वापेक्षया नीलधूमत्वस्य गुरुतया हेतुतावच्छेदकत्वाभावः अपि व्याप्यत्वासिद्धिः इति **केषांचिन्मतं मूले प्रदर्शितम्** । तन्मते अस्वारस्यं प्रदर्शयति **दिनकर्याम् – वदन्तीत्यनेन अस्वरसः** इत्यनेन । ''पर्वतो वन्हिमान् नीलधूमात्'' इत्यत्र नीलधूमस्य धूमस्य च एकतया धूमे व्याप्तिसत्त्वे नीलधूमे व्याप्तिर्नास्ति इति कथं सङ्गच्छते । **न च तत्र व्याप्तिसत्त्वेऽपि** इति । नीलधूमे यद्यपि वन्हिव्याप्तिः वर्तते, तथापि नीलधूमत्वं न व्याप्यतावच्छेदकम् गुरुत्वात्; अपि तु लघुत्वात् धूमत्वमेव व्याप्यतावच्छेदकम् । एवं च धूमत्वावच्छिन्ने वन्हिव्याप्तिसत्त्वेऽपि नीलधूमत्वावच्छिन्ने वन्हिव्याप्त्यभावात् व्याप्यत्वासिद्धिः । यो धर्मः यस्य अनवच्छेदकः तदवच्छिन्ने तदभावः, मूलावच्छिन्नवृक्षे कपिसंयोगाभावदर्शनात् । तथा व्याप्त्यनवच्छेदकनीलधूमत्वावच्छिन्ने व्याप्त्यभावात् व्याप्यत्वासिद्धिः इति भावः ।

अनतिरिक्तवृत्तित्वरूप इति । स्वरूपसंबन्धरूपावच्छेदकत्वस्य गुरुधर्मेऽनङ्गीकारेऽपि अनतिरिक्तवृत्तित्वरूपं अवच्छेदकत्वं गुरुधर्मे स्वीक्रियते । तथा नीलधूमत्वस्य वन्हिव्याप्यत्वानतिरिक्तवृत्तित्वात् व्याप्यतावच्छेदकत्वं संभवति इति भावः ।

स्वरूपसंबन्धरूप इति । नीलधूमत्वे अनतिरिक्तवृत्तित्वरूपस्य व्याप्यतावच्छेदकत्वस्य सत्त्वेऽपि स्वरूपसंबन्धरूपस्य व्याप्यतावच्छेदकत्वस्य अभावात् व्याप्यत्वासिद्धिः, यथा मूलस्य वृक्षवृत्तिकपिसंयोगानतिरिक्तवृत्तित्वेऽपि स्वरूपसंबन्धरूपावच्छेदकत्वाभावादेव मूलावच्छेदेन वृक्षे कपिसंयोगाभावः स्वीक्रियते, तथा नीलधूमत्वे स्वरूपसंबन्धरूपावच्छेदकत्वाभावात् नीलधूमत्वावच्छेदेन व्याप्त्यभावरूपा व्याप्यत्वासिद्धिः इत्यपि न आशङ्कनीयम् । तथा सति ''अयं प्रदेशः पशुमान् सास्नादिमतः'' इत्यादिसद्धेतौ व्याप्यत्वासिद्ध्यापत्तेः । तत्र हि हेतुतावच्छेदकं सास्नादिमत्त्वं गोत्वजात्यपेक्षया गुरु । अतः सास्नादिमत्त्वे

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

स्वरूपसंबन्धरूपस्य व्याप्यतावच्छेदकत्वस्य अभावेन तदवच्छिन्ने व्याप्त्यभावेन व्याप्यत्वासिद्धिः स्यात् ।

ननु गुरुधर्मेण हेतुतायां व्याप्यत्वासिद्धिः इष्टैव इति, अत आह – **अस्तु वा** इति । ''पर्वतो वन्हिमान् नीलधूमात्'' इत्यादौ नीलधूमत्वावच्छेदेन व्याप्त्यभावरूपा व्याप्यत्वासिद्धिः अस्तु । परन्तु न तस्याः हेत्वाभासत्वम्, हेत्वाभासलक्षणाभावात् । अनुमितितत्करणान्यतरप्रतिबन्धकज्ञानविषयत्वं हि हेत्वाभासस्य लक्षणम् । गुरुधर्मावच्छिन्नहेतुकस्थले हेतुतावच्छेदकांशे व्याप्यतावच्छेदकत्वानवगाहिनः ''वन्हिव्याप्यवान् पर्वतः'' इति परामर्शस्यैव अनुमितिहेतुत्वात् । तादृशपरामर्शं प्रति ''नीलधूमत्वावच्छिन्नं वन्हिव्याप्त्यभाववत्'' इत्याकारकव्याप्त्यत्वासिद्धि-ज्ञानम् अप्रतिबन्धकम् । समानधर्मितावच्छेदककयोः ज्ञानयोरेव प्रतिबध्यप्रतिबन्धकभावात् । व्याप्यत्वासिद्धिज्ञाने धर्मितावच्छेदकतया भासमानस्य नीलधूमत्वस्य परामर्शे व्याप्तिधर्मितावच्छेदकतया अभानात् । तथा च अनुमितितत्करणज्ञानाविरोधित्वात् व्याप्यत्वासिद्धेः न हेत्वाभासत्वम् इति भावः ।

न च वन्हिमदन्यावृत्ति इति । व्याप्तिधर्मितावच्छेदकतया हेतुतावच्छेद-कावगाहिपरामर्शस्यैव अनुमितिकारणत्वं वक्तव्यम् । अन्यथा प्रमेयत्वसामानाधि-करण्येन व्याप्त्यवगाहिनः ''वन्हिमदन्यावृत्तिप्रमेयवान्'' इति ज्ञानात् ''पर्वतो वन्हिमान् प्रमेयात्'' इत्यादौ ''पर्वतो वन्हिमान्'' इत्यनुमित्यापत्तेः । अतः हेतुतावच्छेदकावच्छिन्ने व्याप्तिप्रकारकं ज्ञानमेव अनुमितिहेतुः । प्रमेयत्वावच्छिन्ने वन्हिमदन्यावृत्तित्वस्य बाधात् प्रमेयत्वावच्छेदेन वन्हिमदन्यावृत्तित्वरूपव्याप्तिप्रमायाः असंभवात् न प्रमेयहेतुकवन्ह्यनुमित्यापत्तिः । इत्थं च ''पर्वतो वन्हिमान् नीलधूमात्'' इत्यादौ नीलधूमत्वावच्छिन्ने व्याप्त्यवगाहि ''पर्वतः वन्हिव्याप्यनीलधूमवान्'' इति ज्ञानमेव अनुमितिकारणम् । तादृशज्ञानं प्रति नीलधूमत्वावच्छिन्ने वन्हिव्याप्त्यभावरूपव्याप्यत्वासिद्धिज्ञानं प्रतिबन्धकमेव । अतः अनुमितिकारण-

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

परामर्श प्रतिबन्धकज्ञानविषयतया हेत्वाभासत्वम् व्याप्यत्वसिद्धेः संभवति इति शङ्का –

समाधत्ते – **तावतापि** इति । ''पर्वतो वन्हिमान् प्रमेयात्'' इत्यत्र अनुमितिवारणानुरोधेनापि इत्यर्थः । प्रमेयत्वसामानाधिकरण्येन व्याप्त्यवगाहिनः ''वन्हिमदन्यावृत्तिप्रमेयवान्'' इति ज्ञानात् अनुमितिवारणाय हेतुतावच्छेदके अनतिरिक्तवृत्तित्वरूपव्याप्यतावच्छेदकत्वावगाहिज्ञानस्य अनुमितिकारणत्वं अङ्गीक्रियते । उक्तस्थले हेतुतावच्छेदकं प्रमेयत्वम् वन्हिमदन्यावृत्तित्वरूप-व्याप्त्यनतिरिक्तवृत्ति न भवति । तादृशव्याप्तिशून्ये घटादावपि प्रमेयत्वस्य सत्त्वात् । अतः तत्र व्याप्त्यवगाहिपरामर्शस्य प्रमात्वासंभवात् न अनुमित्यापत्तिः । ''पर्वतो वन्हिमान् नीलधूमात्'' इत्यत्र तु हेतुतावच्छेदकस्य नीलधूमत्वस्य वन्हिव्याप्यत्वान-तिरिक्तवृत्तित्वरूपावच्छेदकत्वसत्त्वात् तादृशावच्छेदकत्वावगाहिपरामर्शः अनुमितिकारणम् । परन्तु तादृशपरामर्शं प्रति नीलधूमत्वे स्वरूपसंबन्धरूपव्याप्यताव-च्छेदकत्वाभावरूपव्याप्यत्वासिद्धिज्ञानं न प्रतिबन्धकम् । ग्राह्याभावानवगाहित्वात् । प्रतिबध्यत्वाभिमतज्ञाने विषयभूतं यत् अनतिरिक्तवृत्तित्वरूपम् अवच्छेदकत्वं तदभावविषयकत्वात् व्याप्यत्वासिद्धिज्ञानस्य । तथा च हेत्वाभासलक्षणाभावात् न व्याप्यत्वासिद्धेः दोषत्वम् । तर्हि व्यर्थविशेषणघटितहेतुप्रयोगस्थले न कोऽपि दोषः स्यात् इति आशङ्क्य उपसंहरति – **तस्मात्** इति । ''नीलधूमात्'' इत्यादिव्यर्थविशेषणस्थले हेतोः न कोऽपि दोषः । परन्तु व्यर्थविशेषणघटितहेतु-प्रयोक्तुः पुरुषस्य अधिकाख्यं निग्रहस्थानं दोषः ।।

मुक्तावली

बाधस्तु पक्षे साध्याभावादिः । एतस्य तु अनुमितिप्रतिबन्धः फलम् । **तद्धर्मिकतदभावनिश्चयः लौकिकसन्निकर्षाजन्य-दोषविशेषाजन्य-तद्धर्मिकतज्ज्ञानमात्रे विरोधी इति ।।**

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

दिनकरी

"साध्याभावादिः" इति "आदि"ना साध्यवदन्यत्वस्य पक्षावृत्तिसाध्यादेश्च परिग्रहः । **तद्धर्मिकतदभावनिश्चयः** अनाहार्याप्रामाण्यज्ञानानास्कन्दिततद्धर्मिक-तदभावनिश्चयः । **बाधबुद्ध्युत्तरक्षणे लौकिकसन्निकर्षजन्यविशिष्टबुद्धेः** आनुभाविकत्वात् आह – **लौकिकसन्निकर्षाजन्य** इति ।

ननु एवं तदिन्द्रियजन्यलौकिकबाधनिश्चयोत्तरं तदिन्द्रियजन्यलौकिकतद्विशिष्ट-बुद्ध्यापत्तिः इति चेत्, न । **अलौकिकत्वं** प्रतिबध्यतावच्छेदककोटौ अनिवेश्य तदिन्द्रियजन्यतद्विशिष्टबुद्धौ तदिन्द्रियजन्यलौकिकतदभावनिश्चयत्वेन **प्रतिबन्ध-कत्वोपगमात्** ।

तदिन्द्रियजन्योपनीतभानात्मकबाधनिश्चयोत्तरं तदिन्द्रियजन्यलौ-किकतद्विशिष्ट-बुद्ध्युदयात् प्रतिबन्धकतावच्छेदककोटौ लौकिकत्वनिवेशः ।

न च – लौकिकतदिन्द्रियजन्याभावप्रमास्थले तदधिकरणे प्रतियोगिनः असत्त्वादेव न तद्विशिष्टलौकिकप्रत्यक्षापत्तिः इति अलं तथाविधप्रतिबध्य-प्रतिबन्धकभावेन इति – वाच्यम् । **यत्र प्रतियोग्यधिकरण** एव संनिकृष्टाधिकरणा-न्तरवृत्तेः अभावस्य लौकिकप्रत्यक्षात्मकारोपः दोषेण जनितः तदुत्तरं तदधिकरणे प्रतियोगिनः लौकिकप्रत्यक्षापादनात् ।

तत्र अभावलौकिकप्रत्यक्षजनकदोषस्य प्रतिबन्धकत्वादेव न इयम् आपत्तिः । अन्यथा अभावारोपोत्पत्तिक्षणे प्रतियोगिप्रत्यक्षापत्तिः इति तु न । **यत्र विनश्यदवस्थ-**दोषेण अभावलौकिकप्रत्यक्षात्मकारोपः तदुत्तरं **प्रतियोगिप्रत्यक्षापादनात्** ।

यत्र अभावलौकिकप्रमासमकालं तद्द्वितीयक्षणे वा तदधिकरणे प्रतियोगि-प्रकारकानुभूयमानारोपजनकदोषसमवधानम्, तत्र अभावप्रमोत्तरं प्रतियोगिनः लौकिकप्रत्यक्षात्मकारोपापादनवारणाय वा इन्द्रियभेदेन तथाविधप्रतिबध्य-प्रतिबन्धकभावोपगमात् ।।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

राजीवोल्लासः

परिग्रह इति । तथा च "साध्याभाववत्पक्षः", "साध्यवदन्यपक्षः", "पक्षवृत्तिः साध्याभावः", "पक्षावृत्तिसाध्यं" च बाधः इत्युक्तं भवति । **तद्धर्मिकतदभावनिश्चय** इति । लौकिकसन्निकर्षाजन्य–दोषविशेषाजन्य–तद्विशेष्यक–तत्प्रकारक–ज्ञानसामान्यं प्रति अनाहार्य–अप्रामाण्यज्ञानानास्कन्दित–तद्विशेष्यक–तदभाव–प्रकारकनिश्चयः प्रतिबन्धक इत्यर्थः । प्रतिबध्यतावच्छेदककोटौ तु लौकिकसन्निकर्षाजन्यत्वनिवेशस्य प्रयोजनम् आह – **बाधबुद्ध्युत्तरक्षणे** इति । "भूतलं घटाभाववत्" इति बाधबुद्धिद्वितीयक्षणे लौकिकसन्निकर्षवशात् "भूतलं घटवत्" इति विशिष्टबुद्धिः जायते । तदनुरोधेन लौकिकसन्निकर्षाजन्य-तद्धर्मिक–तत्प्रकारकज्ञाने एव तद्धर्मिक-तदभावप्रकारकनिश्चयः प्रतिबन्धकः ।

ननु एवम् इति । एवं – प्रतिबध्यतावच्छेदककोटौ लौकिकसन्निकर्षाजन्यत्वनिवेशे यत्र चक्षुरिन्द्रियेण "भूतलं घटाभाववत्" इति बाधनिश्चयः प्रथमं जायते, तत्र तदनन्तरक्षणे चक्षुरिन्द्रियजन्यं "भूतलं घटवत्" इति प्रत्यक्षं भवतु । अत्र आपाद्यमानस्य प्रत्यक्षस्य लौकिकसन्निकर्षजन्यतया एतत् प्रति पूर्वोत्पन्नबाधनिश्चयस्य प्रतिबन्धकत्वं नास्ति । लौकिकसन्निकर्षाजन्य-तत्प्रकारकबुद्धावेव तदभावप्रकारक-निश्चयस्य प्रतिबन्धकत्वात् ।

न च – तत्र "भूतलं घटवत्" इति लौकिकप्रत्यक्षोत्पत्तौ इष्टापत्तिः इति – वाच्यम् । समानेन्द्रियजन्यबाधनिश्चयोत्तरं लौकिकसन्निकर्षेण तत्प्रकारकबुद्धेः अनुपगमात् इति भावः ।

समाधत्ते – **अलौकिकत्वम्** इति । उक्तापत्तिवारणाय प्रतिबध्यप्रतिबन्धकभावान्तरं कल्प्यते । तथा हि – लौकिकसन्निकर्षाजन्यत्वं प्रतिबध्यतावच्छेदककोटौ अनिवेश्य तदिन्द्रियजन्यतद्विशिष्टबुद्धौ तदिन्द्रियजन्यलौकिकतदभावनिश्चयः प्रतिबन्धकः इति पृथक्प्रतिबध्य प्रतिबन्धकाभावः स्वीक्रियते ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

चक्षुरिन्द्रियजन्यघटवत्ताबुद्धिं प्रति चक्षुरिन्द्रियजन्यलौकिक-घटाभावनिश्चयः प्रतिबन्धकः। अतः न उक्तस्थले चक्षुरिन्द्रियजन्यघटविशिष्टबुद्ध्यापत्तिः। **प्रतिबन्धकत्वोपगमात्** इति। प्रतिबन्धकत्वान्तरोपगमात् इत्यर्थः। **मूलोक्तप्रतिबन्धकत्वं** तु अनुमित्यादिसाधारणप्रतिबध्यतानिरूपितम् इति तदपेक्षया इदं प्रतिबन्धकत्वम् अन्यत्। प्रतिबन्धकतावच्छेदकताकौटौ लौकिकत्वनिवेशस्य प्रयोजनम् आह – **तदिन्द्रियजन्य** इति। भूतलांशे चक्षुरिन्द्रियजन्यम्, घटाभावांशे उपनीतभानात्मकम् अलौकिकसन्निकर्षजन्यम् यत् ''भूतलं घटाभाववत्'' इति निश्चयात्मकं ज्ञानं तदुत्तरम् चक्षुरिन्द्रियजन्यस्य घटांशे लौकिकस्य ''भूतलं घटवत्'' इति ज्ञानस्य उत्पत्या प्रतिबन्धकतावच्छेदककोटौ लौकिकत्वनिवेशः। तेन तदभावांशे लौकिकसन्निकर्षजन्यनिश्चयस्यैव तदिन्द्रियजन्यतद्वत्ताबुद्धौ प्रतिबन्धकत्वमिति न उक्तदोषः।

ननु लौकिकाभावप्रमायां सत्यां प्रतियोगिनि लौकिकसन्निकर्षासंभवादेव न लौकिकतद्वत्ताबुद्ध्यापत्तिः इति किं समानेन्द्रियस्थले प्रतिबध्यप्रतिबन्धकभावान्तरेण इति शङ्कते – **न च लौकिक** इति। समाधत्ते – **यत्र प्रतियोग्यधिकरण एव** इति। प्रतियोगिनः घटस्य अधिकरणे प्रदेशे एव सन्निकृष्टे अधिकरणान्तरे वर्तमानस्य घटाभावस्य चक्षुस्संयुक्तविशेषणताख्यलौकिकसन्निकर्षेण आरोपरूपः भ्रमः अधिकरणयोः भेदाग्रहादिदोषवशात् जनितः तत्र तदनन्तरक्षणे तस्मिन्नेव अधिकरणे विद्यमानस्य घटस्य लौकिकप्रत्यक्षम् आपद्यते। तादृशापत्तिवारणाय तदिन्द्रियजन्यतद्विशिष्टबुद्धौ तदिन्द्रियजन्यलौकिक – तदभावनिश्चयस्य पृथक् प्रतिबन्धकत्वम् आवश्यकम् इति भावः।

शङ्कते – **तत्र अभावः** इति। तत्र – तस्मिन् घटवति प्रदेशे घटाभावविषयभ्रमात्मकलौकिकप्रत्यक्षजनको यो दोषः स एव घटस्य लौकिकप्रत्यक्षं प्रति प्रतिबन्धक इति घटप्रत्यक्षापत्यसंभवात् प्रतिबन्धकत्वान्तरकल्पनं मास्तु। अन्यथा

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

दोषस्य अप्रतिबन्धकत्वे अभावारोपोत्पत्तिक्षणे घटप्रत्यक्षापत्तिः प्रतिबन्धकत्वान्तरकल्पनेऽपि दुर्वारा । ततः पूर्वं तदभावनिश्चयविरहात् इति शङ्कायाः अभिप्रायः ।

समाधत्ते – **यत्र विनश्यदवस्थ** इति । यत्र दोषः विनश्यदवस्थः स्वाव्यवहितोत्तरघटाभावारोपोत्पत्तिक्षणोत्पत्तिकनाशप्रतियोगी, तत्र घटाभावारोपक्षणे दोषस्य अभावात् आरोपानन्तरक्षणे घटप्रत्यक्षप्रतिबन्धः दोषवशात् भवति इति वक्तुं न शक्यते । अतः घटाभावारोपोत्पत्तिद्वितीयक्षणे घटप्रत्यक्षापत्तिवारणाय घटाभावनिश्चयस्य पृथगेव प्रतिबन्धकत्वं कल्पनीयम् इति भावः ।

प्रतियोगिप्रत्यक्षापादनात् इति – प्रतियोगिप्रत्यक्षापादनसंभवात् इत्यर्थः ।

लौकिकाभावभ्रमस्थले प्रयोजनम् उपपाद्य प्रमास्थले तदाह – **यत्र अभाव** इति । यद्वा यदि अविनश्यदवस्थदोषस्यैव भ्रमजनकत्वम्, अतः न उक्तापादनसंभवः इत्युच्यते, तदाप्याह – **यत्र अभाव** इति । यत्र घटाभावप्रकारकलौकिकसन्निकर्षजन्यप्रमात्मकज्ञानसमकाले तद्द्वितीयक्षणे वा घटाभावाधिकरणे सन्निहितप्रदेशवृत्तिघटप्रकारकारोपजनकदोषसमवधानम् तत्र अभावप्रमोत्तरं प्रतियोगिनः घटस्य लौकिकप्रत्यक्षात्मकारोपापत्तिः । न च तत्र दोषस्य प्रतिबन्धकत्वम्, आरोपजनकस्य तस्य आपोपप्रतिबन्धकत्वानुपपत्तेः । अतः तत्र तदिन्द्रियजन्यघटप्रत्यक्षं प्रति तदिन्द्रियजन्यघटाभावनिश्चयस्य पृथक् प्रतिबन्धकत्वं स्वीकृत्यैव आपत्तिः वारणीया इति भावः ।

प्रमासमकालम् इति । इदञ्च प्रमातः पूर्वमेव तादृशदोषसमवधाने बाधप्रमैव न संभवति, प्रतियोगिभ्रमजनकदोषेण प्रतिबन्धात् इत्यभिप्रायेण उक्तम् । ननु अभावप्रमासमकालं प्रतियोगिज्ञानजनकदोषोत्पत्तिः न संभवति, दोषरूपप्रतिबन्धकवशात् अभावप्रमायाः अनुत्पादात् । प्रतिबन्धकाभावस्यापि कार्यकालवृत्तित्वावश्यकत्वात् इति, अत आह – **तद्द्वितीयक्षणे वा** इति ।।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

दिनकरी

''शङ्खः न पीतः'', ''वंशः न उरगः'' इति निश्चयेऽपि पित्तमण्डूकवसाञ्जनादिदोषवशात् ''शङ्खः पीतः'', ''वंशः उरगः'' इत्यारोपोदयात् तत्र व्यभिचारवारणाय आह – दोषविशेष इति ।

दोषसामान्याजन्यत्वनिवेशे भ्रममात्रस्यैव बाधाप्रतिबध्यत्वापत्तिः, अतः विशेष इति । तथा च पित्तमण्डूकवसाञ्जनादिदोषान् विशिष्य उपादाय तदजन्यत्वं प्रतिबध्यतावच्छेदककोटौ निवेशनीयम् इति भावः ।

न च – पित्तद्रव्यात्मकदोषाजन्यत्वनिवेशः व्यर्थः । ''शङ्खः पीतः'' इति भ्रमे शङ्खांशे अनुभूयमानस्यैव पित्तद्रव्यपीतिम्नः आरोपोपगमेन तदंशेऽपि लौकिकत्वात् अलौकिकत्वस्य प्रतिबध्यतावच्छेदके निवेशादेव तत्र व्यभिचारवारणात् इति – वाच्यम् । पित्तद्रव्यस्य अन्तरा अनवस्थानदशायामपि तत्पीतिम्नः शङ्खादौ प्रत्यक्षोदयेन स्मर्यमाणारोपस्यैव तत्र नवीनैः स्वीकारात् तदंशे तस्य अलौकिकत्वात् ।

तथा सति ''शङ्खः पीतः'' इति प्रत्यक्षोत्तरं ''पीतं साक्षात्करोमि'' इति साक्षात्कारित्वग्रहानुपपत्तिः, तद्व्यञ्जकलौकिकविषयितायाः तत्र अभावात् इति तु न । लौकिकविषयिताया इव दोषविशेषजन्यत्वस्यापि साक्षात्कारित्वव्यञ्जकत्वात् । अन्यथा ''अयम् उरगः'' इति स्मर्यमाणारोपे साक्षात्कारित्वग्रहानुपपत्तेः । ''शङ्खो न पीतः'' इत्यादितदिन्द्रियजन्यबाधबुद्ध्युत्तरं पित्तादिदोषवशात् तदिन्द्रियजन्यः ''शङ्खः पीतः'' इति आरोपः यदि अनुभवसिद्धः, तदा पूर्वोक्तेन्द्रियभेदभिन्नप्रतिबध्यप्रतिबन्धकभावेऽपि दोषविशेषाजन्यत्वं प्रतिबध्यतावच्छेदके निवेशनीयम् इति ध्येयम् ।

ननु बाधप्रतिबध्यतावच्छेदककोटौ लौकिकान्यत्वस्य निवेशे बाधनिश्चयोत्तरं लौकिकसन्निकर्षजन्यसंशयापत्तिः इति चेत्, न ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

"भूतलं घटवत्" इत्याकारकलौकिकप्रत्यक्षोत्पत्तिकाले स्वातन्त्र्येण कथंचित् उपस्थितस्य घटाभावादेः भूतले प्रकारतया भानवारणाय समानधर्मितावच्छेदकक-तत्कोटिक-लौकिकप्रत्यक्षसामग्र्या विपरीतकोटिभानप्रतिबन्धकत्वम् अवश्यम् अङ्गीकरणीयम् । तथा च बाधनिश्चयोत्तरमपि न आपत्तिः, लौकिकसन्निकर्षजन्य-संशयस्य तत्कोटिकलौकिकप्रत्यक्षसामग्र्याः प्रतिबन्धिकायाः सत्त्वेन विपरीतकोटि-भानासंभवात् ।

तर्हि क्वापि लौकिकसन्निकर्षजन्यसंशयः न स्यात् इति चेत्, ओम् । ज्ञानलक्षणाप्रत्यासत्त्यैव पूर्वोपस्थितकोट्योः भानसंभवात् इति ।

यत्तु संशयपूर्वं तत्कोट्यंशे लौकिकसन्निकर्षसत्त्वे कथं संशयस्य न लौकिकत्वम्? कथं वा तत्र संशये विपरीतकोटिभानम्? तत्कोटिकलौकिक-प्रत्यक्षसामग्र्याः प्रतिबन्धिकायाः सत्त्वात् इति ।

तन्न । तत्र लौकिकसन्निकर्षसत्त्वेऽपि संशयजनकदूरत्वादिदोषस्य लौकिकप्रत्यक्षप्रतिबन्धकस्य सत्त्वेन लौकिकप्रत्यक्षसामग्र्यभावात् उभयोपपत्तेः इति अन्यत्र विस्तरः ।।

राजीवोल्लासः

मूलस्थ प्रतिबन्धककौटौ दोषविशेषाजन्यत्व निवेशस्य प्रयोजनम् आह – **शङ्खो न पीतः इत्यादिना** । "शङ्खः पीतत्वाभाववान्" इति बाधनिश्चये सत्यपि पित्ताख्यदोषवशात् "शङ्खः पीतः" इति बुद्धिः जायते । एवं "वंशः उरगत्वाभाववान्" इति बाधनिश्चये सत्यपि मण्डूकवसाञ्जनरूपदोषवशात् "वंशः उरगः" इति बुद्धिः जायते । तद्धर्मिकतत्प्रकारकबुद्धौ तद्धर्मिकतदभावप्रकारकनिश्चयस्य प्रतिबन्धकत्वे तु तादृशबुद्ध्युत्पत्तिः न संभवति । अतः दोषविशेषाजन्यतत्प्रकारकज्ञाने तदभावप्रकारकनिश्चयः प्रतिबन्धक इति वक्तव्यम् । **व्यभिचारवारणाय इति** । प्रतिबन्धके सत्यपि कार्योत्पत्तिरूपस्य व्यभिचारस्य वारणाय इत्यर्थः ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

विशेषपदस्य प्रयोजनम् आह – **दोषसामान्य इति** । विशेषपदम् अनुपादाय दोषसामान्याजन्यतद्वत्ताबुद्धौ तदभाववत्तानिश्चयः प्रतिबन्धकः इति स्वीकारे भ्रमसामान्यस्य दोषं विना अनुत्पत्तेः दोषाजन्यस्य भ्रमस्य अप्रसिद्ध्या भ्रमस्य तदभावनिश्चयाप्रतिबध्यत्वापत्तिः । अतः विशेषपदम् ।

न च पित्तद्रव्यात्मक इति । पित्तद्रव्यात्मकदोषाजन्यत्वनिवेशः व्यर्थः । न च –तदनिवेशे ''शङ्खो न पीतः'' इति निश्चयेऽपि ''शङ्खः पीतः'' इति आरोपस्य उत्पत्तिः न स्यात् । ''शङ्खो न पीत'' इति निश्चयस्य ''शङ्खः पीतः'' इति भ्रमप्रतिबन्धकत्वात् इति – वाच्यम् । ''शङ्खः पीतः'' इति भ्रमे अनुभूयमानस्य सन्निहितपित्तद्रव्ये वर्तमानस्य पीतरूपस्यैव शङ्खे चक्षुरिन्द्रियेण आरोपात्मकं ज्ञानं भवति इति स्वीकारात्, पीतरूपांशेऽपि ''शङ्खः, पीतः'' इति भ्रमस्य लौकिकसन्निकर्षाजन्यतया लौकिकसन्निकर्षजन्यत्वविरहादेव ''शङ्खः पीतः'' इति भ्रमस्य प्रतिबध्यत्वाभावात् इत्याशयेन शङ्का, तत्र समाधत्ते – **पित्तद्रव्यस्य इति** । शङ्खस्य समीपे पित्तद्रव्यस्य अभावकालेऽपि ''शङ्खः पीतः'' इति पीतरूपविषयकस्य भ्रमात्मकप्रत्यक्षस्य उत्पत्या तत्र स्मर्यमाणस्य पीतरूपस्य आरोपः इति **नवीनैः** स्वीकारात् ''पीतः शङ्खः'' इति बुद्धेः पीतरूपांशे स्मरणात्मकलौकिकसन्निकर्षजन्यतया लौकिकसन्निकर्षाजन्यत्वस्य प्रतिबध्यतावच्छेदकाक्रान्ततया ''शङ्खः पीतः'' इति बुद्धिं प्रति ''शङ्खो न पीतः'' इति निश्चयस्य प्रतिबन्धकतापत्तिः । तद्वारणाय प्रतिबध्यतावच्छेदककोटौ पित्तद्रव्यात्मकदोषविशेषाजन्यत्वमपि प्रवेशनीयम् इति भावः ।

ननु ''शङ्खः पीतः'' इति प्रत्यक्षस्य पीतरूपांशे लौकिकसन्निकर्षजन्यत्वाभावे तादृशप्रत्यक्षोत्तरं''पीतं साक्षात्करोमि'' इति साक्षात्कारित्वप्रकारकानुव्यवसायानुपपत्तिः । पीतांशे लौकिकविषयिताविरहात् । लौकिकविषयिताया एव साक्षात्कारित्वव्यञ्जकत्वात् इति आशङ्क्य समाधत्ते – **तथा सति इत्यादिना** ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

लौकिकविषयिताया इव दोषविशेषजन्यत्वस्यापि साक्षात्कारित्वव्यञ्जकत्वात् ''पीतं साक्षात्करोमि'' इति अनुव्यवसाये न अनुपपत्तिः इति भावः । **तद्व्यञ्जकलौकिकविषयिताया इति** । ''घटो वायुमान्'' इति वाय्वंशे अलौकिक चाक्षुषानन्तरं ''घटं साक्षाकरोमि'' इति प्रत्ययात्, ''वायुं साक्षात्करोमि'' इति अप्रत्ययाच्च तत्साक्षात्कारत्वानुव्यवसाये तल्लौकिकविषयितायाः प्रयोजकत्वं आवश्यकम् इति आशयेन एवम् उक्तम् ।

अन्यथा इति । दोषविशेषजन्यत्वस्य साक्षात्कारत्वव्यञ्जकत्वानङ्गीकारे इत्यर्थः । वंशे सर्पभ्रमस्थले कदाचित् स्मर्यमाणस्यैव सर्पस्य आरोपात् तादृशस्थले ''अयं सर्पः'' इति भ्रमानन्तरं ''सर्पं साक्षात्करोमि'' इति साक्षात्कारित्वग्रहस्य दोषविशेषजन्यत्वमपि साक्षात्कारित्वव्यञ्जकम् इति स्वीकारादेव उपपत्तिः । अत्र सर्पे लौकिकविषयितायाः अभावात् ।

ननु बाधप्रतिबध्यतावच्छेदककोटौ इति । तदभाववत्ताज्ञानप्रतिबध्यतावच्छेदककोटौ यदि लौकिकसन्निकर्षाजन्यत्वं निवेश्यते, तदा ''अयं पुरुषत्वाभाववान्'' इति बाधनिश्चयानन्तरं चक्षुस्संयोगरूपलौकिकसन्निकर्षजन्यस्य ''अयं पुरुषो वा न वा'' इति संशयस्य प्रसङ्गः । लौकिकसन्निकर्षाजन्यतत्प्रकारकबुद्धावेव तदभावप्रकारकनिश्चयस्य प्रतिबन्धकत्वात् इति प्रश्नः ।

लौकिकसन्निकर्षजन्यः संशयः एव न संभवति । संशयविषयीभूत–एककोटिकलौकिकप्रत्यक्षसामग्र्याः विरोधिकोटिभानप्रतिबन्धकत्वात् । अन्यथा ''भूतलं घटवत्'' इति प्रत्यक्षसामग्रीकालेऽपि ''भूतलं घटवत् न वा'' इति संशयापत्तेः । तथा च कथं बाधनिश्चयोत्तरं लौकिकसन्निकर्षजन्यसंशयापत्तिः इति आशयेन समाधत्ते – **भूतलं घटवत् इत्यादिना** । ''भूतलं घटवत्'' इत्याकारकलौकिकसन्निकर्षजन्यप्रत्यक्षोत्पत्तिकाले स्वातन्त्र्येण – इतराविशेषणतया अदृष्टादिना केनापि हेतुना उपस्थितस्य घटाभावस्य भूतलांशे प्रकारतया भानस्य वारणाय तद्धर्मावच्छिन्न-

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

विशेष्यक-तत्कोटिप्रकारकलौकिकप्रत्यक्षसामग्र्याः तद्धर्मावच्छिन्नविशेष्यकतत्कोटिविपरीतकोटिप्रकारकज्ञानप्रतिबन्धकत्वम् अवश्यम् अङ्गीकरणीयम् । अतः भूतलविशेष्यक-घटप्रकारक-लौकिकप्रत्यक्षसामग्र्याः घटविरुद्ध-घटाभावप्रकारकज्ञानप्रतिबन्धकत्वात् ''भूतलं घटवत्'' इति प्रत्यक्षे घटाभावस्य प्रकारतया भानं न संभवति । एवं च ''अयं पुरुषत्वाभाववान्'' इति बाधनिश्चयोत्तरं लौकिकसन्निकर्षजन्यस्य ''अयं पुरुषो वा न वा'' इति संशयस्य नापत्तिः । तस्मिन् संशये लौकिकसन्निकर्षात् या कोटिः भासते तद्भासकसामग्र्याः तद्विपरीतकोटिभानप्रतिबन्धकत्वात् इति भावः ।

तर्हि इति । एककोटिविषयकलौकिकप्रत्यक्षसामग्र्याः विपरीतकोटिभानप्रतिबन्धकत्वे इत्यर्थः । **क्वापि** इति । बाधनिश्चयाभावकालेऽपि इत्यर्थः । **संशयो न स्यात्** इति । दूरस्थस्थाण्वादिधर्मिकस्थाणुत्वादिसंशयो न स्यात् । तादृशस्थले एककोटिभासकसन्निकर्षस्य आवश्यकत्वात् । तेन कोट्यन्तरभानप्रतिबन्धात् इति भावः । उक्ताशङ्कायाम् इष्टापत्तिम् आह – **ओम्** इति । तर्हि संशये द्वयोः कोट्योः भासकं किम् इत्याशङ्कायाम् आह – **ज्ञानलक्षणाप्रत्यासत्त्यैव** इति । ''एव''कारेण चक्षुस्संयोगादिरूपलौकिकसन्निकर्षस्य व्यवच्छेदः । एवं च चक्षुस्संयोगेन ऊर्ध्वव्यक्तिदर्शनं भवति । तदनन्तरं स्थाणुत्वपुरुषत्वरूपकोटिद्वयस्मरणं भवति । तदनन्तरं ''अयं स्थाणुर्वा पुरुषो वा'' इति संशयः । संशये कोटिद्वयभानं प्रति स्मरणरूपज्ञानलक्षणाप्रत्यासत्तिरेव कारणम् इति उक्तं भवति ।

पुनः शङ्कते – **यत्तु** इति । संशयात्पूर्वं स्थाणुत्वरूप-एकतरकोट्यंशे चक्षुस्सन्निकर्षस्य सत्त्वे तत्कोटिविषयकः संशयः कुतः लौकिकसन्निकर्षजन्यो न भवति । कथं वा तस्मिन् संशये विपरीतकोटेः भानम् । तत्कोटिप्रकारकलौकिकप्रत्यक्षसामग्र्याः प्रतिबन्धिकायाः सत्त्वात् । तत्र समाधत्ते – **तन्न** इत्यादिना । तत्कोटिविषयकलौकिकप्रत्यक्षं प्रति तत्कोटौ चक्षुस्सन्निकर्षमात्रं न कारणम् ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

किन्तु दूरत्वादिदोषाभावोऽपि कारणम् । दूरत्वादिदोषाभावसहितचक्षुस्सन्निकर्ष एव तत्कोटिप्रकारकप्रत्यक्षे कारणम् इति यावत् । प्रकृते दूरत्वरूपदोषस्य सत्त्वेन दोषाभावविशिष्टलौकिकसन्निकर्षरूपसामग्र्यभावात् तत्कोट्यंशे लौकिकं प्रत्यक्षं न भवति । अत एव विपरीतकोटिभानप्रतिबन्धोऽपि न भवति । **उभयोपपत्तेः** इति । संशये लौकिकसन्निकर्षाजन्यत्वस्य विपरीतकोटिभानस्य च उपपत्तेः इत्यर्थः । **लौकिकसन्निकर्षसत्त्वेऽपि** तस्य दूरत्वदोषेण दोषाभावघटितसामग्र्यभावात् सन्निकर्षस्य न कोटिभानहेतुत्वम् । **अन्यत्र विस्तर** इत्यनेन संशयजनकदोष-सामान्याभावे तु सन्निकृष्टकोटेः निश्चय एव इति सूचितम् ॥

मुक्तावली

न तु संशयसाधारणं पक्षे साध्यसंसृष्टत्वज्ञानम् अनुमितिकारणम् तद्विरोधितया च बाधसत्प्रतिपक्षयोः हेत्वाभासत्वम् इति युक्तम् ।

अप्रसिद्धसाध्यकानुमित्यनापत्तेः, साध्यसंशयादिकं विनापि अनुमित्युत्पत्तेश्च ।

दिनकरी

कस्यचिन्मतं दूषयति – **नतु** इति । "**इति युक्तम्**" इत्यनेन अन्वयः । **ननु एवं बाधनिश्चयकाले संसृष्टत्वज्ञानाभावादेव अनुमित्यभावोपपत्तौ बाधनिश्चयस्य** न अनुमितिविरोधित्वम् इति हेत्वाभासत्वं न स्यात्, अत आह – **तद्विरोधितया** इति । अनुमितिकारणीभूतस्य साध्यसंसृष्टत्वज्ञानस्य **विरोधितया** इत्यर्थः ।

ननु अप्रसिद्धसाध्यकानुमितिः कुत्रापि न भवत्येव इति, अत आह – **साध्यसंशय** इति । ननु संशयशून्यकालेऽपि सिषाधयिषाकालीनसाध्यनिश्चयात्मकं साध्यसंसृष्टत्वज्ञानम् अस्त्येव इति, अत आह – **आदि** इति । "आदि"ना सिषाधयिषाकालीनसिद्धिपरिग्रहः । **न च – संशयोत्पत्त्यैव अनुमितिसिद्धिः इति – वाच्यम् । सति विशेषदर्शने संशयायोगात् ॥**

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

राजीवोल्लासः

कस्यचिन्मतम् इति । संशयपक्षतावादिनः मतम् इत्यर्थः । बाधसत्प्रतिपक्षयोः हेत्वाभासत्वं – हेतुदोषत्वम्, संशयपक्षतावादिनः एवं उपपादयन्ति – पक्षे साध्यसंसर्गावगाहिज्ञानं संशयनिश्चयसाधारणम् अनुमितिकारणम् । तत्प्रतिबन्धकज्ञानविषयतया बाधसत्प्रतिपक्षयोः हेत्वाभासत्वम् । ''पक्षः साध्यवान् न वा'' इति संशयो वा ''पक्षः साध्यवान्'' इति निश्चयो वा अनुमितिकारणम् । ''पक्षः साध्याभाववान्'' इति बाधनिश्चयः, ''पक्षः साध्याभावव्याप्यवान्'' इति सत्प्रतिपक्षनिश्चयश्च, साध्यसंसृष्टत्वज्ञानस्य प्रतिबन्धकः । तद्विषयत्वात् साध्याभाववत्पक्षरूपे बाधे, साध्याभावव्याप्यवत्पक्षे सत्प्रतिपक्षे च दोषलक्षणस्य समन्वयः । न च – साध्यसंसृष्टत्वनिश्चयस्य कथं अनुमितिकारणत्वम् । प्रत्युत प्रतिबन्धकत्वम् इति – वाच्यम् । साध्यनिश्चये सत्यपि सिषाधयिषया अनुमितेरुत्पत्या निश्चयसाधारणसाध्यसंसर्गज्ञानस्यैव अनुमितिकारणत्वात् ।

ननु एवं बाधनिश्चयकाले इति । साध्यसंसृष्टत्वज्ञानस्य अनुमितिहेतुत्वे ''पक्षः साध्याभाववान्'' इति बाधनिश्चयकाले ''पक्षः साध्यवान्'' इति साध्यसंसर्गज्ञानरूपहेत्वभावादेव अनुमित्यभावस्य उपपत्तेः बाधनिश्चयः न अनुमितिप्रतिबन्धक इति बाधस्य कथम् हेत्वाभासत्वम् । **तद्विरोधितया** इति । बाधनिश्चयस्य अनुमितिप्रतिबन्धकत्वाभावेऽपि अनुमितिकरणं यत् साध्यसंसृष्टत्वज्ञानं तत्प्रतिबन्धकतया तद्विषयस्य बाधस्य हेत्वाभासत्वम् उपपद्यते । अनुमितिकारणप्रतिबन्धकज्ञानविषयस्यैव हेत्वाभासत्वात् इति भावः । एतन्मते अनुमितितत्करणान्यतरप्रतिबन्धकत्वं हेत्वाभासलक्षणे न निवेश्यते, किन्तु अनुमितिकारणप्रतिबन्धकत्वमेव इति अवधेयम् । **विरोधितया** इति । प्रतिबन्धकज्ञानविषयतया इत्यर्थः ।

मूले ''अप्रसिद्धसाध्यक'' इत्यादिना पक्षे साध्यसंसृष्टत्वज्ञानस्य अनुमितिकारणत्वम् निरस्य अनुमितिकारणविरोधितया बाधसत्प्रतिपक्षयोः हेत्वाभासत्वं

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

निरस्तम् । तस्य अयम् आशयः – ''पृथिवी इतरेभ्यो भिद्यते'' इत्यादि अप्रसिद्ध-साध्यकस्थले अनुमितेः पूर्वं ''पक्षः साध्यवान्'' इत्याकारकं साध्यसंसृष्टत्वज्ञानं भवितुं न अर्हति । संसृष्टत्वज्ञानस्य विशिष्टबुद्धिरूपतया विशिष्टबुद्धौ विशेषणज्ञानस्य कारणत्वात् विशेषणस्य साध्यस्य अप्रसिद्धतया अज्ञातत्वात् । न च – अप्रसिद्धसाध्यकस्थले केवलव्यतिरेकत्वाङ्गीकारात् ''साध्याभावव्यापकी-भूताभावप्रतियोगिहेतुमान्'' इति परामर्शः कथं भवितुम् अर्हति । साध्यस्य पूर्वम् अज्ञाततया तद्घटितव्याप्तिज्ञानासंभवात् – इति वाच्यम् । साध्यम् अविषयीकृत्य ''पृथिवीतरत्वव्यापकीभूताभावप्रतियोगिगन्धवती पृथिवी'' इति परामर्शात् ''पृथिव्याम् इतरभेदः'' इत्याकारकसाध्यविशेष्यकानुमितेः तत्र स्वीकारात् ।

दूषणान्तरमवतारयति **दिनकर्याम् – ननु अप्रसिद्धसाध्यकानुमितिः** इति । अनुमितेः पूर्वं अज्ञातस्य साध्यस्य, अनुमितिः नैव अङ्गीक्रियते । **आचार्यमते** सर्वत्र अन्वयव्याप्तिज्ञानस्यैव अनुमितिहेतुतया व्यतिरेकसहचारेणापि अन्वयव्याप्तिरेव गृह्यते इति तैः अङ्गीकारात् उभयपरामर्शात् अनुमितेः असिद्धत्वात् अन्वयव्याप्तेः साध्यघटितस्वरूपत्वेन व्याप्तिज्ञानसमय एव साध्यज्ञानस्य आवश्यकत्वात् इति भावः ।

साध्यसंशयादिकं विनापि अनुमित्युत्पत्या व्यतिरेकव्यभिचारात्, साध्यसं-सृष्टत्वज्ञानं न अनुमितिकारणम् । ''आदि''पदेन सिषाधयिषकालीनसाध्यनिश्चयः गृह्यते । **सिद्धिपरिग्रह** इति । सिद्धिः साध्यनिश्चयः । सिद्धिसत्त्वे सिषाधयिषां विना न अनुमितिः । अतः कालीनान्तम् । एवं च साध्यसंसृष्टत्वज्ञानं साध्यसंशयरूपं सिषाधयिषाकालीनसाध्यनिश्चयरूपं वा । एतदुभयं विनापि घनगर्जितेन मेघानुमानात् व्यतिरेकव्यभिचार इति साध्यसंसृष्टत्वज्ञानं न अनुमितिहेतुः इत्युक्तं भवति ।

ननु घनगर्जितेन मेघानुमानस्थलेऽपि साध्यसंशयं कल्पयित्वा क्षणविलम्बेन अनुमितिः उपेयते । अतः न अनुपपत्तिः इति आशङ्कते – **न च संशयोत्पत्त्यैव**

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

इति । समाधत्ते – **सति विशेषदर्शने** इति । घनगर्जितश्रवणानन्तरं ''मेघव्याप्य-गर्जितवान्'' इति परामर्शपूर्वकमेव ''अयं प्रदेशः मेघवान्'' इति अनुमितेः उत्पत्त्या परामर्शस्य विशेषदर्शनविधया मेघाभावकोटिकसंशयप्रतिबन्धकत्वात् तत्र संशयोत्पत्तेः असंभवात् ।।

मुक्तावली

एवं साध्याभावज्ञाने प्रमात्वज्ञानमपि न प्रतिबन्धकम्, मानाभावात् गौरवाच्च । अन्यथा सत्प्रतिपक्षादावपि तदभावव्याप्यवत्ताज्ञाने प्रमात्वविषयकत्वेन प्रतिबन्धकतापत्तेः ।

किन्तु भ्रमत्वज्ञानानास्कन्दितबाधबुद्धेः प्रतिबन्धकता । तत्र भ्रमत्वशङ्काविघटनेन प्रामाण्यज्ञानं क्वचित् उपयुज्यते ।।

दिनकरी

पक्षविशेष्यकसाध्याभावज्ञाने प्रमात्वनिश्चयः अनुमितिप्रतिबन्धकः तदभावः कारणम्, अतः तादृशप्रमात्वमेव बाध इति प्राचीनमतं दूषयति – **एवम्** इति । **प्रमात्वज्ञानमपि** – प्रमात्वनिश्चयोऽपि । **मानाभावात्** इति । ग्राह्याभावानव-गाहिनः तादृशज्ञानस्य विरोधित्वे मानाभावात् इत्यर्थः ।

ननु पक्षे साध्याभावज्ञानेऽपि तत्र अप्रामाण्यज्ञानकाले अनुमितेः उदयात् न साध्याभावज्ञानं प्रतिबन्धकम् । अस्मन्मते तु तदा साध्याभावज्ञानप्रमात्व-निश्चयाभावादेव अत्र अनुमित्युत्पत्तिः, अत आह – **गौरवात्** इति । तथा च तत्र अनुमितिनिर्वाहाय संशयनिश्चयसाधारणाप्रामाण्यज्ञानाभाव एव प्रतिबन्धकतावच्छेदक-कोटौ निवेश्यते, न तु पक्षविशेष्यकसाध्याभावज्ञानप्रमात्वनिश्चयत्वेन प्रतिबन्धकत्वम् गौरवात् इत्यर्थः । यत्र पक्षे साध्याभावज्ञानमस्ति, न तु तत्र प्रामाण्यज्ञानं न वा अप्रामाण्यज्ञानं, तत्रापि अनुमितिः न भवत्येव इति भावः ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

साध्याभाववत्पक्षघटितप्रमात्वविषयकत्वे अनुमितिप्रतिबन्धकताननतिरिक्तवृत्तित्वसत्त्वात् तस्य आभासत्वं दुर्वारम् इति तु न । **प्रमेयत्वविशिष्टव्यभिचारादेरिव** तादृशविशिष्टान्तरघटितत्वेन आभासत्वायोगात् इति ।

ननु अगृहीताप्रामाण्यकसाध्याभावनिश्चयस्य प्रतिबन्धकत्वे **प्रथमोपस्थित**-प्रमात्वनिश्चय एव तथा स्यात्, अत आह – **अन्यथा** इति । **''सत्प्रतिपक्षादौ''** इति ''आदि''ना असिद्ध्यादिपरिग्रहः । **प्रतिबन्धकतापत्तेः** इत्यस्य ''अनुमित्यादौ'' इत्यादि ।

ननु **साध्याभावज्ञानप्रमात्वज्ञाने** अनुमितिप्रतिबन्धः, तदभावे तु न इति अन्वयव्यतिरेकाभ्यां प्रमात्वज्ञानस्य अनुमितिप्रतिबन्धकत्वम्, अत आह – **किन्तु** इति । **क्वचित्** उपयुज्यत इति । **तथा च** अनुमितितत्कारणज्ञानान्यतरं प्रति साक्षात्प्रतिबन्धकीभूतज्ञानविषयत्वाभावात् न साध्याभावज्ञानप्रमात्वं हेत्वाभास इति भावः ।।

राजीवोल्लासः

पक्षविशेष्यक इत्यादि । **प्राचीनाः** साध्याभाववत्पक्षः न बाधः, किन्तु साध्याभावज्ञाननिष्ठं प्रमात्मेव बाधः । ''पक्षः साध्यवान्'' इति अनुमितिं प्रति साध्याभावज्ञानधर्मिकप्रमात्वनिश्चय एव प्रतिबन्धकः । ''ह्रदो वन्हिमान्'' इत्यनुमितिं प्रति ''ह्रदो वन्ह्यभाववान्, इदं ज्ञानं प्रमा'' इत्याकारकं वन्ह्यभाववद्ह्रदज्ञानविशेष्यक-प्रमात्वप्रकारकनिश्चयात्मकं ज्ञानं प्रतिबन्धकम् । अतः अनुमितिप्रतिबन्धकज्ञान-विषयीभूतं साध्याभावज्ञाननिष्ठं प्रमात्वम् एव बाध इति वदन्ति । तन्मतं दूषयति **मूले एवम्** इत्यादिना । संशयात्मकस्य प्रमात्वप्रकारकज्ञानस्य अनुमित्य-प्रतिबन्धकत्वात् **मूलस्थं** प्रमात्वज्ञानपदं निश्चयपरतया व्याचष्टे – **प्रमात्व-ज्ञानमपि – प्रमात्वनिश्चयोऽपि** इति । अस्मिन् प्राचीनमते दोषद्वयम् उक्तं **मानाभावात् गौरवात्** च इति । प्रतिबध्यज्ञाने यद्ग्राह्यम् तदभावविषयकज्ञानस्यैव

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्रतिबन्धकत्वम् । ''ह्रदो वन्हिमान्'' इति ज्ञानं प्रतिबध्यम् । तत्र ग्राह्यः – विषयः वन्हिः । तदभावप्रकारकं ''ह्रदो वन्ह्यभाववान्'' इति ज्ञानमेव प्रतिबन्धकं भवितुम् अर्हति । न तु ''इदं ज्ञानं प्रमा'' इत्याकारकं ज्ञानम् । तस्य ग्राह्याभावानवगाहित्वात् तस्य प्रतिबन्धकत्वे प्रमाणाभावात् ।

न च – ''इदं ज्ञानं प्रमा'' इत्याकारकज्ञाने प्रमात्वं प्रकारः । तच्च प्रमात्वं वन्ह्यभाववद्विशेष्यक-वन्ह्यभावप्रकारकत्वरूपम् । तद्धटकतया वन्ह्यभावस्य मतुबर्थे प्रकारतायां च प्रकारतया भानात् वन्ह्यभावप्रकारकत्वं अस्ति इति प्रमात्वज्ञानस्य कुतः न प्रतिबन्धकत्वम् इति – वाच्यम् । अनुमितौ यद्धर्मावच्छिन्ने साध्यं प्रकारतया भासते तद्धर्मावच्छिन्ने साध्याभावप्रकारकज्ञानस्यैव प्रतिबन्धकत्वम् । ह्रदत्वावच्छिन्ने वन्हिप्रकारकानुमितौ ह्रदत्वावच्छिन्ने वन्ह्यभावप्रकारकज्ञानमेव प्रतिबन्धकम् । उक्तप्रमात्वज्ञानं तु मतुबर्थसंबन्धित्वावच्छिन्ने वन्ह्यभावप्रकारकम् । तथा प्रकारतात्वावच्छिन्ने च वन्ह्यभावप्रकारकम् इति तस्य न अनुमितिप्रतिबन्धकत्वम् इति आशयात् ।

गौरवात् इत्यस्य पक्षविशेष्यक–साध्याभावप्रकारकनिश्चयत्वापेक्षया पक्षविशेष्यक-साध्याभावप्रकारक–ज्ञानविशेष्यकप्रमात्वप्रकारकनिश्चयत्वस्य गुरुत्वेन प्रतिबन्धकतावच्छेदकत्वासंभवात् इत्यर्थः । **गौरवात्** इति दोषान्तरोक्तेः बीजम् आह – **ननु पक्षे साध्याभावज्ञाने अपि** इति । ''पक्षः साध्याभाववान्'' इति ज्ञानसत्त्वे तत्र अप्रमाण्यज्ञानकाले अनुमितिः उत्पद्यते इति पक्षे साध्याभावज्ञानं न प्रतिबन्धकम् । साध्याभावज्ञाने प्रमात्वनिश्चयस्य प्रतिबन्धकतामते तु साध्याभावज्ञाने अप्रमाण्यज्ञानकाले साध्याभावज्ञाने प्रमात्वनिश्चयरूपप्रतिबन्धकाभावादेव अनुमित्युत्पत्तिः निर्वहति । तथा च अप्रमाण्यज्ञानकाले अनुमित्युत्पत्ति-निर्वाहकत्वरूपयुक्तिरेव प्रमात्वज्ञानस्य प्रतिबन्धकत्वे प्रमाणम् इति **मानाभावात्** इति न युज्यते, इति आशयेन गौरवरूपं दोषान्तरम् उक्तम् इति भावः ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

ननु गौरवात् प्रमात्वनिश्चयस्य प्रतिबन्धकत्वम् उपेक्ष्य पक्षे साध्याभावज्ञानस्य प्रतिबन्धकत्वं स्वीक्रियते चेत् साध्याभावज्ञाने अप्रामाण्यज्ञानकाले कथम् अनुमितिनिर्वाहः इति, अत्र आह – **तथा च** इति । अप्रामाण्यज्ञानाभावविशिष्टतदभावप्रकारकनिश्चयः तद्वत्ताबुद्धौ प्रतिबन्धकः । अतः अप्रमाण्यज्ञानकाले अप्रमाण्यज्ञानाभावविशिष्टतदभावनिश्चयरूपप्रतिबन्धकस्य अभावात् अनुमितेः उपपत्तिः इति भावः ।

ननु साध्यवद्विशेष्यकसाध्याभावप्रकारकत्वरूप-अप्रामाण्यज्ञानाभावविशिष्ट-पक्षविशेष्यक-साध्याभावप्रकारकनिश्चयत्वापेक्षया पक्षविशेष्यकसाध्याभावप्रकारकज्ञानविशेष्यकसाध्याभाववद्विशेष्यकसाध्याभावप्रकारनिश्चयत्वं कथं गुरु इति चेत्, उच्यते – निश्चयत्वं हि संशयान्यज्ञानत्वम्, तच्च तदभावाप्रकारकत्वे सति तत्प्रकारकज्ञानत्वरूपम् इति एतादृशनिश्चयत्वघटिततया गुरुत्वम् इति ।

ननु अप्रामाण्यज्ञानानास्कन्दितयद्रूपावच्छिन्नविषयकनिश्चयत्वम् अनुमितिप्रतिबन्धकतानतिरिक्तवृत्ति तद्रूपावच्छिन्नत्वमेव हि हेत्वाभासलक्षणम् । तच्च साध्याभाववति प्रकृतपक्षे साध्याभावप्रकारकत्वरूपप्रामाण्यज्ञानसाधारणमेव । साध्याभावप्रकारकत्वांशस्य अधिकस्य प्रवेशोऽपि ''अधिकं तु प्रविष्टं चेत्, न तद्धान्यै'' इति न्यायेन यद्रूपपदेन प्रामाण्यत्वं गृहीत्वा प्रामाण्ये दोषलक्षणसमन्वयात् । ''इदं ज्ञानं साध्याभाववत्पक्षे साध्याभावप्रकारकम्'' इत्याकारकस्य प्रामाण्यत्वावच्छिन्नप्रकारकनिश्चयस्य साध्याभाववत्पक्षविषयकतया ''पक्षः साध्यवान्'' इत्याकारकानुमितिप्रतिबन्धकत्वम् अस्तीति तद्रूपावच्छिन्ने प्रामाण्यत्वावच्छिन्ने प्रामाण्ये लक्षणसत्त्वात् इत्याशङ्कां निराकरोति – **साध्याभाववत्पक्षघटित** इति । साध्याभाववत्पक्षघटितं प्रमात्वं च साध्याभाववत्पक्षविशेष्यक–साध्याभावप्रकारकत्वम् । **प्रमेयत्वविशिष्टव्यभिचारादेरिव** इति । दोषलक्षणघटकयद्रूपे विशिष्टान्तराघटितत्वस्य निवेशात् प्रमेयत्वविशिष्टव्यभिचारस्य व्यभिचाररूपविशिष्टान्तरघटिततया यथा न हेत्वाभासत्वम्, तद्वत् उक्तप्रमात्वस्य साध्याभाववत्पक्षरूपबाधघटिततया न हेत्वाभासत्वम् इति भावः ।

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

प्रथमोपस्थित इति । अप्रामाण्यज्ञानाभावविशिष्टसाध्याभावनिश्चयत्वस्य प्रतिबन्धकतावच्छेदकस्य प्रमात्वाभावरूपाप्रामाण्यघटितत्वेन प्रमात्वाभावघटितधर्मज्ञानं प्रति प्रतियोगिज्ञानविधया प्रमात्वज्ञानस्य अपेक्षितत्वात् उक्तप्रतिबन्धकतावच्छेदकधर्मज्ञानात्पूर्वं प्रमात्वस्य उपस्थितत्वात् प्रथमोपस्थितस्य प्रमात्वस्य निश्चय एव प्रतिबन्धकः स्यात् इति आशङ्क्य सत्प्रतिपक्षस्थलेऽपि साध्याभावव्याप्यवत्ताज्ञाननिष्ठं प्रमात्वमेव दोषः स्यात्, बाधवत् ''पक्षः साध्याभावव्याप्यवान्, इदं ज्ञानम् प्रमा'' इत्याकारकस्य साध्याभावव्याप्यवत्ताज्ञानविशेष्यकप्रमात्वज्ञानस्यैव अनुमितिप्रतिबन्धकत्वसंभवात् इति आशयेन समाधत्ते – **अन्यथा** इत्यादिना इति भावः ।

किन्तु इति ग्रन्थम् अवतार्य व्याचष्टे – **ननु साध्याभाव** इत्यादिना । साध्याभावज्ञानविशेष्यकप्रमात्वज्ञानस्य ग्राह्याभावानवगाहितया अनुमितिप्रतिबन्धकत्वाभावेऽपि, साध्याभावज्ञानविशेष्यकप्रमात्वप्रकारकज्ञाने सति अनुमित्यनुत्पत्तिः, तदभावे अनुमित्युत्पत्तिः इति अन्वयव्यतिरेकाभ्यां प्रमात्वज्ञानस्य अनुमितिप्रतिबन्धकत्वम् इति आशङ्क्य समाधत्ते – **किन्तु** इत्यादिना मूले इति भावः ।

वस्तुतः अनुमितिं प्रति अप्रामाण्यज्ञानाभावविशिष्टतदभावप्रकारकनिश्चय एव प्रतिबन्धकः । साध्याभावज्ञाने प्रमात्वज्ञानं, साध्याभावज्ञाने अप्रामाण्यशङ्कां विनिवर्त्य अप्रामाण्यज्ञानाभावं संपादयति । तथा च साध्याभावज्ञाने प्रमात्वज्ञानस्य प्रतिबन्धकतावच्छेदकाप्रामाण्यज्ञानाभावसंपादकतया उपयोगः । हेत्वाभासलक्षणं तु अनुमितितत्करणान्यतरज्ञानं प्रति साक्षात्प्रतिबन्धकं यत् ज्ञानं तद्विषयत्वम् । अतः साध्याभावप्रमात्वज्ञानप्रमात्वं न हेत्वाभासः, प्रतिबन्धकतावच्छेदकसंपादकतया परंपरयैव प्रतिबन्धकत्वात् इति । तदाह – **तथा च** इति ।।

मुक्तावली

न च बाधस्थले पक्षे हेतुसत्त्वे व्यभिचारः, पक्षे हेत्वभावे स्वरूपासिद्धिरेव दोष इति – वाच्यम् । बाधज्ञानस्य व्यभिचारज्ञानादेः भेदात् ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

किंच यत्र परामर्शानन्तरं बाधबुद्धिः तत्र व्यभिचारज्ञानादेः अकिंचित्करत्वात् बाधस्य अनुमितिप्रतिबन्धकत्वं वाच्यम् । एवं यत्र उत्पत्तिक्षणावच्छिन्ने घटादौ गन्धव्याप्यपृथिवीत्ववत्ताज्ञानम्, तत्र बाधस्यैव प्रतिबन्धकत्वं वाच्यम् । न च – पक्षे घटे गन्धसत्त्वात् कथं बाधः? इति वाच्यम् । पक्षतावच्छेदकदेशकालावच्छेदेन अभावस्य अनुभवसिद्धत्वात् इति ।

बाधतद्व्याप्यभिन्ना ये हेत्वाभासाः तद्व्याप्या अपि तन्मध्य एव अन्तर्भवन्ति । अन्यथा हेत्वाभासाधिक्यप्रसङ्गात् । बाधव्याप्यसत्प्रतिपक्षः भिन्न एव । स्वतन्त्रेच्छेन मुनिना पृथगुपदेशात् । सत्प्रतिपक्षव्याप्यस्तु न प्रतिबन्धकः इति ।।

दिनकरी

व्यभिचारज्ञानादेः इति "आदि"ना असिद्धिज्ञानपरिग्रहः । **भेदात्** इति । **तथा च बाधस्थले** असिद्धिव्यभिचारान्यतरनियमेऽपि बाधज्ञानस्य व्यभिचारादिविषयकत्वाभावेन तस्य हेत्वाभासान्तरत्वम् इति भावः ।

न च – "हेतुमान् पक्षः साध्याभाववान्" इत्याकारक एव बाधग्रहः कुतो न भवति? सामग्रीसत्त्वात् । तथा च व्यभिचारात्मिकैव बाधबुद्धिः इति – वाच्यम् ।

परामर्शात्मकाव्यभिचारज्ञानरूपप्रतिबन्धकसत्त्वेन बाधबुद्धेः व्यभिचारविषयकत्वासंभवात्, **एकत्र हेतौ** व्यभिचाराव्यभिचारविषयैकनिश्चयासंभवाच्च ।

ननु अयोगोलकपक्षकधूमसाध्यकवह्निहेतुके बाधलौकिकप्रत्यक्षवत् व्यभिचारलौकिकप्रत्यक्षमपि व्याप्तिनिश्चये सत्यपि भविष्यति इति, अत आह – **किंच** इति । **अकिंचित्करत्वात्** इति । व्यभिचारज्ञानं हि अनुमितौ न साक्षात्प्रतिबन्धकम्, किंतु परामर्शप्रतिबन्धद्वारा । तथा च परामर्शोत्तरकालीनं व्यभिचारज्ञानम् अकिंचित्करम् इति तत्र बाधबुद्धिरेव प्रतिबन्धिका इति भावः ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

व्यभिचाराद्यसङ्कीर्णम् अपि बाधं प्रदर्शयति – **एवम्** इत्यादिना । **बाधस्यैव** इति । तत्र पक्षे हेतुसत्त्वेन स्वरूपासिद्धेः, प्रतियोगिव्यधिकरणसाध्याभाववद्वृत्तित्व-रूपस्य व्यभिचारस्य च अभावात् इति भावः । **बाधतद्व्याप्यभिन्ना ये हेत्वाभासाः तद्व्याप्या अपि तन्मध्ये एव अन्तर्भवन्ति** इति पाठः । बाधः – साध्याभाव-विशिष्टपक्षादिः, तद्व्याप्यः सत्प्रतिपक्षः, तद्भिन्नाः व्यभिचारविरुद्धासिद्धाः, तद्व्याप्यानां तत्रैव अन्तर्भाव इत्यर्थः । व्यभिचारादेरिव व्यभिचारादिव्याप्यस्यापि व्याप्तिग्रहप्रति-बन्धकज्ञानविषयत्वेन पञ्चहेत्वाभासानन्तर्गतत्वे तस्य अतिरिक्तहेत्वाभासत्वं स्यात् इत्यर्थः । **न प्रतिबन्धक** इति । साध्याभावव्याप्यव्याप्यवत्ताज्ञानस्य साध्यवत्ताज्ञान-विरोधित्वे मानाभावात् इति भावः ।।

राजीवोल्लासः

तथा च बाधस्थले इति । ''ह्रदो वन्हिमान्'' इति बाधस्थले पक्षवृत्तेः जलादेः हेतुत्वे साध्याभाववत्पक्षवृत्तित्वरूपः व्यभिचारो दोषः । पक्षावृत्तेः धूमादेः हेतुत्वे हेत्वभाववत्पक्षरूपासिद्धिः दोषः । तथा च कथं बाधः अतिरिक्तदोष इत्याशङ्कायां बाधस्थले असिद्धिव्यभिचारयोः अधिकदोषयोः सत्त्वेऽपि बाधस्य दोषत्वं न अपैति । साध्याभाववत्पक्षरूपबाधज्ञानस्य व्यभिचारविषयकत्वाभावेन असिद्धिविषयकत्वाभावेन च व्यभिचारादिविषयकत्वेन प्रतिबन्धकत्वासंभवात् बाधविषयकत्वेनैव प्रतिबन्धकत्वात् बाधस्य हेत्वाभासान्तरत्वम् इति भावः ।

न च हेतुमान् पक्ष इति । ''हेतुमान् पक्षः साध्याभाववान्'' इत्याकारक एव बाधग्रहः । पक्षे हेतुसत्त्वे उपस्थितस्य हेतोरपि बाधज्ञाने भानसंभवात् । तथा च बाधबुद्धिः हेतुमत्पक्षे साध्याभावविषयिणी, तुल्यवित्तिवेद्यतया साध्याभाववत्पक्षवृत्तिहेतुमपि अवगाहते इति नियमेन व्यभिचारविषयिणी इति बाधबुद्धेः व्यभिचारविषयकत्वेनैव प्रतिबन्धकत्वात् न बाधः अतिरिक्तहेत्वाभासः इति आशङ्का ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

समाधत्ते – **परामर्शात्मक** इति । बाधबुद्धिस्थले ''साध्यव्याप्यहेतुमान् पक्षः'' इति परामर्शस्य सत्त्वेन परामर्शे व्याप्तेः भानात् व्याप्तिविषयकपरामर्शस्य व्यभिचारबुद्धिप्रतिबन्धकत्वेन बाधबुद्धेः व्यभिचारविषयकत्वासंभवात् । ननु परामर्शोत्तरं बाधबुद्धेः व्यभिचारविषयकत्वासंभवेऽपि परामर्शः एव बाधबुद्ध्यात्मकोऽस्तु । तथा च ''साध्यव्याप्यहेतुमान् पक्षः साध्याभाववान्'' इत्याकारकव्यभिचारविषयक-बाधबुद्धिसंभवः इति आशङ्कायाम् आह – **एकत्र हेतौ** इति । एकस्मिन् हेतौ साध्याभाववदवृत्तित्वरूपस्य साध्यव्याप्यत्वस्य साध्याभाववत्पक्षवृत्तित्वरूपस्य साध्यव्यभिचारस्य च एकस्मिन् ज्ञाने भानासंभवात् । व्यभिचाराव्यभिचारयोः परस्परविरुद्धत्वात् परस्परविरुद्धधर्मद्वयप्रकारक–एकविशेष्यक-निश्चयासंभवात् इति भावः । अपि च ''साध्यव्याप्यहेतुमान् पक्षः साध्याभाववान्'' इत्याकारक-व्यभिचारविषयकबुद्धेः एकत्र पक्षे साध्यव्याप्यसाध्याभावविषयकतया तादृशज्ञानासंभवाच्च । साध्यव्याप्यसाध्याभावयोः विरुद्धत्वात् इत्यपि बोध्यम् ।

बाधबुद्धेः व्यभिचारविषयकत्वं संभवति इत्याशङ्क्य **किंच** इति ग्रन्थमवतारयति – **ननु अयोगोलकपक्षक** इति । ''अयोगोलकं धूमवत् वन्हेः'' इत्यत्र ''धूमव्याप्य-वन्हिमदयोगोलकम् धूमाभाववत्'' इत्याकारकं व्यभिचारविषयकलौकिकप्रत्यक्षं भवितुम् अर्हत्येव । लौकिकसन्निकर्षाजन्यव्यभिचारप्रत्यक्षे एव व्यभिचाराभावरूप-व्याप्तिनिश्चयस्य प्रतिबन्धकत्वात् । यथा ''अयोगोलकम् धूमव्याप्यवन्हिमत्'' इति परामर्शोत्तरं ''अयोगोलकम् धूमाभाववत्'' इति लौकिकबाधबुद्धिः उत्पद्यते, लौकिकसन्निकर्षाजन्यबाधबुद्धावेव परामर्शस्य तदभावव्याप्यवत्ताज्ञानविधया प्रतिबन्ध-कत्वात् तद्वत् इति आशङ्क्य प्रकारान्तरेण बाधस्य अतिरिक्तहेत्वाभासत्वं उपपादयति – **किञ्च** इत्यादिना इति भावः । यत्र ''साध्यव्याप्यहेतुमान्'' इति परामर्शानन्तरं ''साध्याभाववान्'' इति बाधबुद्धिः तत्र व्यभिचारज्ञानं अकिञ्चित्करम् । व्यभिचारज्ञानं हि न साक्षात् अनुमितौ प्रतिबन्धकम्, किन्तु परामर्शप्रतिबन्धद्वारा । परामर्शोत्तरव्यभिचारज्ञानस्य उत्पन्नपरामर्शप्रतिबन्धकत्वासंभवात् तत्र

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्रतिबन्धरूपकार्यकारित्वं व्यभिचारज्ञानस्य नास्ति । किन्तु बाधज्ञानस्यैव तत्र अनुमितिप्रतिबन्धकतया बाधस्य हेत्वाभासत्वम् इति भावः ।

व्यभिचाराद्यसङ्कीर्णम् इति । व्यभिचारासिद्ध्यादिदोषसमवधानरहितं बाधम् इति अर्थः । **तत्र पक्षे हेतुसत्त्वेन** इति । ''उत्पत्तिक्षणावच्छिन्नो घटः गन्धवान्, पृथिवीत्वात्'' इत्यत्र पक्षे घटे पृथिवीत्वरूपहेतुसत्त्वेन न स्वरूपासिद्धिः । ननु स्वरूपासिद्ध्यभावेऽपि व्यभिचारः अस्त्येव । गन्धरूपसाध्याभाववति उत्पत्तिक्षणावच्छिन्नघटे पृथिवीत्वरूपहेतुसत्त्वात् इति, अत आह – **प्रतियोगिव्यधिकरण** इति । साध्याभाववद्वृत्तित्वमात्रं न व्यभिचारः । ''कपिसंयोगी, एतद्वृक्षत्वात्'' इत्यत्र सद्धेतौ कपिसंयोगाभाववद्वृक्षवृत्तित्वसत्त्वेन व्यभिचारापत्तेः । किन्तु प्रतियोगिव्यधिकरणसाध्याभाववद्वृत्तित्वमेव व्यभिचारः । प्रतियोगिव्यधिकरणकपिसंयोगाभाववान् गुणादिरेव । तद्वृत्तित्वं एतद्वृक्षत्वे नास्ति इति न व्यभिचारः । ''उत्पत्तिक्षणावच्छिन्नघटः गन्धत्वान्, पृथिवीत्वात्'' इत्यत्र पक्षः घटः न प्रतियोगिव्यधिकरणगन्धाभाववान् । उत्पत्तिक्षणावच्छेदेन गन्धाभाववति घटे क्षणान्तरे गन्धरूपप्रतियोगिनोऽपिसत्त्वात् । किन्तु प्रतियोगिव्यधिकरणसाध्याभाववान् जलादिरेव, तद्वृत्तित्वं पृथिवीत्वे नास्ति इति न तत्र व्यभिचारो दोषः, किन्तु बाध एव दोषः ।

न च पक्षे घटे गन्धसत्त्वात् कथं बाध इति वाच्यम् । पक्षतावच्छेदकोत्पत्तिक्षणावच्छिन्ने घटे गन्धाभावसत्त्वेन बाधस्य सत्त्वात् । यदवच्छेदेन साध्यानुमितिः उद्देश्या तदवच्छेदेन पक्षे साध्याभावस्यैव बाधत्वात् ।।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ हेत्वाभासविशेषनिरूपणम् ॥

साधारणनिरूपणम् ॥

कारिकावली

यः सपक्षे विपक्षे च भवेत्साधारणस्तु सः ।

मुक्तावली

यः सपक्ष इति । सपक्षविपक्षवृत्तिः साधारणः इत्यर्थः । सपक्षो साध्यवान् । विपक्षः साध्यवद्भिन्नः । विरुद्धवारणाय सपक्षवृत्तित्वम् उक्तम् । वस्तुतः विपक्षवृत्तित्वमेव वाच्यम् । विरुद्धस्तु साधारणत्वेऽपि दूषकताबीजस्य भिन्नतया तस्य पार्थक्यात् ।

दिनकरी

दूषकताबीजस्य भिन्नतया इति । साधारणस्य अव्यभिचारज्ञाने, विरुद्धस्य सामानाधिकरण्यग्रहे प्रतिबन्धकत्वात् इति भावः ।

॥ असाधारणनिरूपणम् ॥

कारिकावली

यस्तु उभयस्माद्व्यावृत्तः स त्वसाधारणो मतः ॥ ७३ ॥

मुक्तावली

यस्तु उभयस्मात् इति । सपक्षविपक्षव्यावृत्त इत्यर्थः । सपक्षः – साध्यवत्तया निश्चितः । विपक्षः – साध्यशून्यतया निश्चितः । "शब्दोऽनित्यः शब्दत्वात्" इत्यादौ यदा शब्देऽनित्यत्वस्य संदेहः तदा सपक्षत्वं घटादीनामेव, तद्व्यावृत्तं च शब्दत्वम् इति तदा तत् असाधारणम् । यदा तु शब्देऽनित्यत्वनिश्चयः तदा न असाधारणम् । इदं च प्राचां मतम् । नवीनमतं तु पूर्वम् उक्तम् ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

दिनकरी

असाधारण्यघटकं सपक्षत्वं निश्चयगर्भम्, न तु साध्यवत्त्वमात्रम् इत्याह – **सपक्ष इति** । एवमग्रेऽपि । सपक्षत्वविपक्षत्वयोः निश्चयत्वनिवेशस्य फलम् आह – **शब्द इत्यादिना** । **पूर्वम् उक्तम् इति** । असाधारणः साध्यासमानाधिकरणः हेतुः इत्यादिना उक्तम् इत्यर्थः ।

राजीवोल्लासः

इदं च प्राचां मतम् इति । अत्र सुबोधिनीकाराः – प्राचीनानाम् अयमभिसन्धिः – साध्यतदभावादिकोटिद्वयसहचरितधर्मज्ञानं तद्व्यावृत्तधर्मज्ञानं च साध्यादिसंशय-जनकम् । वक्ष्यते च कारिकावल्याम् "साधारणादिधर्मस्य ज्ञानं संशयकारणम्" इति । इत्थं च साध्यनिश्चयविरोधिसंशयसामग्रीत्वेन साधारणादिज्ञानम् अनुमितिविरोधि इति साधारणादेः हेत्वाभासत्वम् । साध्याभाववद्वृत्तित्वादिकं तु व्याप्यत्वासिद्धिरेव । संशयस्य न निश्चयविरोधित्वम्, संशयात्मकपक्षतायाः तन्मते अनुमितिजनकत्वात् इति अनुमितिविरोधिसामग्रीत्वं साधारणादिज्ञानस्य न संभवति इति **नवीनानाम्** आशयः ।।

।। अनुपसंहारिनिरूपणम् ।।

कारिकावली

तथैवानुपसंहारी केवलान्वयिपक्षकः ।

मुक्तावली

केवलान्वयि इति । "सर्वम् अभिधेयं प्रमेयत्वात्" इत्यादौ सर्वस्यैव पक्षत्वात् सामानाधिकरण्यग्रहस्थलान्तराभावात् न अनुमितिः । इदं तु न सम्यक्, पक्षैकदेशे सहचारग्रहेऽपि क्षतेः अभावात् ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अस्तु वा सहचाराग्रहः । तावतापि अज्ञानरूपासिद्धिरेव, न हेत्वाभासत्वं तस्य । तथापि केवलान्वयिसाध्यकत्वं तत्त्वम् इत्युक्तम् ।

दिनकरी

केवलान्वयिपक्षक इति । अत्र पक्षता साध्यसंशयरूपा गृह्यते । तेन ''सर्वम् अभिधेयं प्रमेयत्वात्'' इत्यादौ यदा सिद्धिः सिषाधयिषा च, तदा साध्यनिश्चयसंभवेन सामानाधिकरण्यघटितव्याप्तिग्रहसंभवात् तस्य सद्धेतोः अलक्ष्यतया सिषाधयिषाविरहविशिष्टसिद्ध्यभावरूपस्य पक्षत्वस्य तदा केवलान्वयित्वेऽपि तत्र न अतिव्याप्तिः । अनुपसंहारिणः हेत्वाभासत्वम् उपपादयति – ''सर्वम् अभिधेयम्'' इत्यादिना । **सामानाधिकरण्यग्रहस्थलान्तराभावात् इति** । **संशयोत्पत्तिक्षणे** निश्चयवारणाय निश्चयं प्रति संशयसामग्र्याः प्रतिबन्धकत्वस्य अवश्यं वाच्यतया, प्रकृते सर्वत्र साध्यसन्देहसत्त्वे तत्पूर्वं तत्सामग्र्याः सत्त्वेन साध्यनिश्चयस्य कुत्रापि असंभवेन व्यापकसाध्यसामानाधिकरण्यविशिष्टप्रमेयत्वादि-रूपव्याप्तिग्रहानुत्पादात् न तत्र अनुमितिः इति अनुपसंहारिणः हेत्वाभासत्वम् इति भावः । **क्षतेः अभावात् इति** । तदानीमपि केवलान्वयिपक्षताकत्वस्य अनुपसंहारित्वस्य क्षतेः अभावात् इत्यर्थः । तथा च तत्र अनुपसंहारित्वस्य सत्त्वात् तस्य व्याप्तिज्ञानानुत्पादप्रयोजकत्वाभावात् हेत्वाभासत्वानुपपत्तिः इति भावः । न च – संशयसामग्र्याः सत्त्वात् कथं पक्षैकदेशे साध्यनिश्चय इति – वाच्यम् । सर्वत्वधर्मितावच्छेदककसंशयसामग्रीसत्त्वेऽपि घटत्वादिधर्मिताव-च्छेदककसाध्यनिश्चयोत्पादे बाधकाभावात्, समानप्रकारकत्वेनैव विरोधात् ।

समानविषयकत्वेन प्रतिबन्धकत्वेऽपि आह – **अस्तु वा इति** । **तस्य** – सहचाराग्रहस्य । **तस्य स्वरूपसत एव विरोधित्वेन** तज्ज्ञानस्य अनुमित्यनुत्पाद-प्रयोजकत्वाभावात् इति भावः ।

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

न च – तत्र सहचाराग्रहप्रयोजकः संशय एव हेत्वाभासः, तस्यापि स्वरूपसत एव विरोधित्वात् । न च संशयविषयस्य साध्याभावविशिष्टपक्षादेरेव तत्र आभासत्वम् इति – वाच्यम् । ''सर्वम् अभिधेयम्'' इत्यादौ अभिधेयत्वाभावविशिष्टपक्षाप्रसिद्धेः इति अन्यत्र विस्तरः ।

राजीवोल्लासः

कारिकावल्यां अनुपसंहारिणः केवलान्वयिपक्षकत्वम् लक्षणम् उक्तम् । तस्य यथा श्रुतार्थाङ्गीकारे ''आकाशात्यन्ताभावः नित्यः ध्वंसप्रागभावभिन्नाभावत्वात्'' इत्यादौ अनुपसंहारित्वापत्तिः । तत्र पक्षस्य आकाशात्यन्ताभावस्य केवलान्वयित्वात् । किञ्च पक्षपदेन सिषाधयिषाविरहविशिष्टसिद्ध्यभाववतः विवक्षायां ''सर्वमभिधेयम् प्रमेयत्वात्'' इत्यादौ यदा सिद्धिःसिषाधयिषा च वर्तते, तदा साध्यनिश्चयस्य सत्त्वात् हेतुसाध्ययोः पक्षे एव सामानाधिकरण्यघटितव्याप्तिग्रहसंभवात् ततः अनुमितेः संभवेन तस्य सद्धेतुतया अनुपसंहारिलक्षणलक्ष्यत्वं नास्ति । परन्तु तदानीं सिषाधयिषाविरहविशिष्टसिद्ध्यभावरूपपक्षताविशिष्टस्य पक्षस्य – सर्वस्य वस्तुतः केवलान्वयित्वम् अस्तीति केवलान्वयिपक्षकत्वात् हेतोः अनुपसंहारित्वापत्तिः । अतः व्याचष्टे – **अत्र पक्षता साध्यसंशयरूपा** इति । मूले पक्षपदं भावप्रधाननिर्देशात् पक्षतापरम् । यत्र पक्षता केवलान्वयिनी भवति स अनुपसंहारी इत्यर्थः । ''आकाशात्यन्ताभावः नित्यः'' इत्यत्र ''आकाशात्यन्ताभावो नित्यो न वा'' इत्याकारकस्य साध्यसंशयस्य विशेष्यतासंबन्धेन आकाशात्यन्ताभावमात्रवृत्तितया सर्ववृत्तित्वरूपं केवलान्वयित्वं नास्ति इति केवलान्वयिपक्षताकत्वविरहात् न तत्र हेतौ अतिव्याप्तिः । ''सर्वमभिधेयं प्रमेयत्वात्'' इत्यत्र सिद्धिसिषाधयिषयोः सत्त्वे पूर्वोक्तरीत्या प्रसक्तम् अनुपसंहारित्वं निराकरोति – **संशयोत्पत्तिक्षणे** इत्यादिना । संशयपक्षतावादिनां मते साध्यसंशयोत्पत्तिक्षणे साध्यनिश्चयस्य वारणाय तद्विषयकनिश्चयं प्रति तद्विषयकसंशयसामग्री प्रतिबन्धिका इति अवश्यं वक्तव्यम् । प्रकृते पक्षे – सर्वत्र साध्यसन्देहसत्त्वे ततः पूर्वं संशयसामग्र्याः सत्त्वेन साध्यनिश्चय

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

एव कुत्रापि न संभवति इति हेतुव्यापकसाध्यसामानाधिकरण्यविशिष्टप्रमेयत्वादिरूपव्याप्तिग्रहस्य अनुत्पत्या तत्र अनुमितिरेव न जायत इति सद्धेतुत्वाभावात् लक्ष्ये तत्र केवलान्वयिपक्षताकत्वरूपानुपसंहारिलक्षणसत्त्वात् हेत्वाभासत्वं इति भावः । तथा च अनुपसंहारित्वं अनुमितिकारणीभूतव्याप्तिज्ञानानुत्पादप्रयोजकतया हेत्वाभास इत्युक्तं भवति ।

मुक्तावल्याम् इदं तु न सम्यक् इति । केवलान्वयि(साध्यसंशयरूप)पक्षताकत्वम् अनुपसंहारित्वम् इति यदुक्तम् एतावता इदं न सम्यक् । पक्षतावच्छेदकसर्वत्वावच्छिन्ने साध्यसंशयरूपपक्षतादशायां सर्वत्वावच्छिन्ने साध्यनिश्चयाभावेन हेतुसाध्ययोः सामानाधिकरण्यग्रहासंभवेऽपि, पक्षैकदेशे घटत्वाद्यवच्छिन्ने अभिधेयत्वरूपसाध्यनिश्चयसंभवेन घटत्वावच्छिन्ने हेतुसाध्ययोः सामानाधिकरण्यग्रहसंभवात् तत्र अनुपसंहारित्वस्य व्याप्तिज्ञानप्रतिबन्धकत्वाभावात् हेत्वाभासत्वं न उपपद्यते ।

समानप्रकारकत्वेन इति । सर्वस्मिन् साध्यसंशयस्य सामग्र्याः सत्त्वे सर्वस्मिन् साध्यनिश्चयः यथा न भवति, संशयसामग्र्याः निश्चयप्रतिबन्धकत्वात्, तथा सर्वान्तर्गतघटादौ साध्यनिश्चयः कथं भवितुम् अर्हति इति आशङ्कायाः इदं समाधानम् – तद्धर्मावच्छिन्नविशेष्यकसंशयसामग्री तद्धर्मावच्छिन्नविशेष्यकनिश्चयस्य प्रतिबन्धिका । प्रकृते सर्वत्वावच्छिन्नविशेष्यकसाध्यसंशयसामग्री सर्वत्वावच्छिन्नविशेष्यकनिश्चयमेव प्रतिबध्नाति, न तु सर्वत्वावच्छिन्नाविशेष्यकसाध्यनिश्चयम् । समानधर्मितावच्छेदककसंशयसामग्रीनिश्चययोरेव प्रतिबध्यप्रतिबन्धकभावस्वीकारात् इति । तथा च **समानप्रकारकत्वेनैव** इत्यस्य समानधर्मितावच्छेदककत्वेनैव इत्यर्थः ।

अस्तु वा इति ग्रन्थमवतारयति – **समानविषयकत्वेन** इति । धर्मितावच्छेदकम् अनिवेश्य संशयसामग्र्याः तद्विशेष्यकनिश्चयप्रतिबन्धकत्वम् इति

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

स्वीकारे उक्तस्थले ''सर्वम् अभिधेयं न वा'' इति संशयसामग्रीसत्त्वे ''घटः अभिधेयः'' इति निश्चयः न संभवति । घटविशेष्यकसंशयसामग्र्याः सत्त्वात् । तथा च घटादावपि व्याप्तिग्रहासंभवात् व्याप्तिग्रहानुत्पादप्रयोजकत्वम् अनुपसंहारित्वस्य संभवति इत्याशङ्क्य दूषणान्तरम् आह – अस्तु वा इत्यादिना इति भावः ।

तथा च उक्तस्थले सर्वत्र साध्यसंशयस्य सत्त्वेन व्याप्त्यज्ञानरूपा असिद्धिः पुरुषस्य । हेत्वाभासत्वं तु व्याप्त्यज्ञानस्य – व्याप्तिघटकसामानाधिकरण्यज्ञानाभावस्य – न संभवति । हेत्वाभासलक्षणाभावात् । ज्ञायमानं सत् यत् अनुमित्यनुत्पादप्रयोजकं स एव हेत्वाभासः । उक्तसामानाधिकरण्यग्रहाभावस्तु अज्ञायमानः स्वरूपतः सन्नेव अनुमित्यनुत्पादं प्रयोजयति । अतः न तस्य हेत्वाभासत्वम् इति आह – तस्य स्वरूपसत एव इत्यादिना ।

ननु ''सर्वम् अभिधेयम्'' इत्यादौ साध्याभावविशिष्टपक्षाप्रसिद्धावपि संशयविषयसाध्यादेरेव आभासत्वम् अस्तु इति, अत आह – अन्यत्र इति । ''पर्वतो वह्निमान्'' इत्यादौ साध्यादेः हेत्वाभासत्ववारणाय यद्रूपावच्छिन्नविषयकत्वम् अनुमतिप्रतिबन्धकतानतिरिक्तवृत्ति तद्रूपावच्छिन्नस्यैव हेत्वाभासत्वेन अङ्गीकरणीयतया साध्यादेः अतथात्वात् इति भावः ।।

।। विरुद्धनिरूपणम् ।।

कारिकावली

यः साध्यवति नैवास्ति स विरुद्ध उदाहृतः ।। ७४ ।।

मुक्तावली

यः साध्यवतिइति । ''एव''कारेण साध्यवत्त्ववावच्छेदेन हेत्वाभावः बोधितः । तथाच साध्यव्यापकीभूताभावप्रतियोगित्वं तदर्थः ।।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

दिनकरी

तदर्थ इति । तेन असाधारणे न अतिव्याप्तिः इति भावः ।

।। असिद्धिनिरूपणम् ।।

कारिकावली

आश्रयासिद्धिराद्या स्यात्स्वरूपासिद्धिरप्यथ ।
व्याप्यत्वासिद्धिरपरा स्यादसिद्धिरतस्त्रिधा ।। ७५ ।।

पक्षासिद्धिर्यत्र पक्षो भवेन्मणिमयो गिरिः ।
ह्रदो द्रव्यं धूमवत्त्वादत्रासिद्धिरथापरा ।। ७६ ।।

व्याप्यत्वासिद्धिरपरा नीलधूमादिके भवेत् ।

मुक्तावली

असिद्धिं विभजते – आश्रयासिद्धिः इत्यादि ।

पक्षासिद्धिः इति । आश्रयासिद्धिः इत्यर्थः ।

अपर इति । स्वरूपासिद्धिः इत्यर्थः ।

नीलधूमादिक इति । नीलधूमत्वादिकं गुरुतया न हेतुतावच्छेदकम्, स्वसमानाधिकरणव्याप्यतावच्छेदकधर्मान्तराघटितस्यैव व्याप्यतावच्छेदकत्वात् । धूमप्रागभावत्वसंग्रहाय स्वसमानाधिकरण इति ।।

दिनकरी

धूमप्रागभावत्व इति । तस्य व्याप्यतावच्छेदकीभूतधूमत्वघटितत्वेन तत्सङ्ग्रहः न स्यात् इति भावः । स्वस्य स्वाविषयकप्रतीतिविषयत्वरूपस्वाघटितत्वाभावात् ''धर्मान्तर'' इति ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

न च – नीलधूमत्वस्यापि तादृशधर्मान्तराघटितत्वम् अस्त्येव । धूमत्वस्य नीलधूमत्वभिन्नत्वाभावात् इति – वाच्यम् । **स्वाविषयकप्रतीतिविषयत्वस्य** स्वपर्याप्तावच्छेदकतानिरूपकप्रकारतानिरूपितावच्छेदकतापर्याप्त्यनधिकरणत्वपर्यवसितस्य तदर्थत्वात् । शुद्धधूमत्वपर्याप्तावच्छेदकताकप्रकारत्वनीलत्वादिविशिष्टधूमत्वपर्याप्तावच्छेदकताकप्रकारत्वयोः भेदात् ।

ननु एवं वह्निमदन्यावृत्तित्वस्य वह्निव्याप्यतावच्छेदकतानुपपत्तिः तस्य वह्नित्वरूपतादृशधर्मान्तरघटितत्वात् । **धूमान्यान्यत्वादेः** व्याप्यतावच्छेदकत्वापत्तिभिया धर्मान्तरस्य विशेष्यविधया अघटकत्वविवक्षणस्य अशक्यत्वात् इति चेत्, न । **स्वसमानाधिकरणपदेन** स्वव्यापकत्वस्य विवक्षितत्वात्, वह्नित्वस्य वह्निमदन्यावृत्तित्वाव्यापकत्वात्, धूमत्वस्य धूमान्यान्यत्वव्यापकत्वाच्च उक्तदोषासंभवात् ।

स्वव्यापकत्वं च धर्मान्तरस्य स्वघटकसाध्यसम्बन्धितावच्छेदकत्वेन । अन्यथा धूमालोकान्यतरत्वस्य वह्निव्याप्यतावच्छेदकत्वापत्तेः, धूमत्वालोकत्वयोः प्रत्येकम् अन्यतरत्वाव्यापकत्वात् इति ।।

राजीवोल्लासः

स्वसमानाधिकरण इत्यादि । स्वं नीलधूमत्वम् । स्वसमानाधिकरणम् – स्वाधिकरणवृत्तिव्याप्यतावच्छेदकं च यत् धर्मान्तरं धूमत्वम् तद्घटितत्वात् नीलधूमत्वं न हेतुतावच्छेदकम् । ''पर्वतो वन्हिमान् धूमात्'' इत्यादौ हेतुतावच्छेदकं धूमत्वम् । तत् स्वसमानाधिकरणव्याप्यतावच्छेदकधर्मान्तरघटितं भवति । व्याप्यतावच्छेदकधर्मे ''स्वसमानाधिकरण'' इति विशेषणानुपादाने ''पर्वतो वन्हिमान् धूमप्रागभावात्'' इत्यत्र सद्धेतौ धूमप्रागभावस्य व्याप्यत्वासिद्धत्वापत्तिः । हेतुतावच्छेदकस्य धूमप्रागभावत्वस्य व्याप्यतावच्छेदकधूमत्वघटितत्वात् । व्याप्यतावच्छेदके ''स्वसमानाधिकरण'' इति विशेषणे दत्ते तु धूमप्रागभावत्वघटकस्य धूमत्वस्य

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

धूमप्रागभावत्वसमानाधिकरणत्वं नास्ति । तथा च स्वसमानाधिकरणव्याप्यतावच्छेदकधर्मान्तरघटितं यद्यत् तद्भिन्नस्यैव हेतुतावच्छेदकत्वम् इति नियमः । स्वपदेन नीलधूमत्वादिकं ग्राह्यम् ।

अन्तरपदस्य प्रयोजनम् आह – **स्वस्य स्वाविषयक** इति । स्वसमानाधिकरणव्याप्यतावच्छेदकधर्मान्तराघटितस्य हेतुतावच्छेदकत्वम् इत्युक्ते अघटितपदस्य स्वाविषयकप्रतीतिविषयत्वार्थकत्वात् स्वसमानाधिकरणः व्याप्यतावच्छेदकश्च यः धर्मः तदघटितस्य – तदविषयकप्रतीतिविषयस्य हेतुतावच्छेदकत्वम् इति नियमस्वरूपम् । एवं सति धूमत्वस्य हेतुतावच्छेदकत्वं न स्यात् । स्वं – धूमत्वम् । स्वसमानाधिकरणं व्याप्यतावच्छेदकम् स्वमेव । स्वाविषयकप्रतीतिविषयत्वं धूमत्वे नास्तीति । अतः अन्तरपदोपादानम् । तदुपादाने च स्वसमानाधिकरणं व्याप्यतावच्छेदकं च यत् धर्मान्तरं स्वभिन्नो धर्मः तदविषयकप्रतीतिविषयस्य इत्यर्थात् धूमत्वं स्वभिन्नधर्मः न भवति इति स्वसमानाधिकरणव्याप्यतावच्छेदकधर्मान्तराप्रसिद्ध्या स्वपदेन धूमत्वं ग्रहीतुं न शक्यते । किन्तु नीलधूमत्वमेव स्वपदेन ग्राह्यम् । तदविषयकप्रतीतिविषयत्वं धूमत्वेऽस्तीति तस्य हेतुतावच्छेदकत्वोपपत्तिः ।

ननु नीलधूमत्वस्य व्याप्यतावच्छेदकधर्मान्तरघटितत्वं न संभवति । धर्मान्तरपदेन धूमत्वं गृहीत्वा हि तद्घटितत्वं नीलधूमत्वस्य वक्तव्यम् । धूमत्वं तु नीलधूमत्वापेक्षया न भिन्नम् । नीलत्वविशिष्टधूमत्वशुद्धधूमत्वयोः अभिन्नत्वात् – इत्याशयेन शङ्कते – **न च नीलधूमत्वस्यापि** इति । समाधत्ते – **स्वाविषयकप्रतीतिविषयत्वस्य** इति । अयमाशयः – अन्यो धर्मः धर्मान्तरम् इति व्युत्पत्या स्वभिन्नो धर्मः धर्मान्तरपदस्य अर्थः । स्वभिन्नत्वमपि न अन्योन्याभावरूपम् । किन्तु स्वाविषयकप्रतीतिविषयत्वरूपम् । तदपि स्वपर्याप्तावच्छेदकतानिरूपकप्रकारतानिरूपित – अवच्छेदकतापर्याप्त्यनधिकरणत्वरूपम् । स्वं – नीलत्वविशिष्ट-

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

धूमत्वम् । स्वपर्याप्ता अवच्छेदकता – ''नीलधूमवान् पर्वतः'' इति ज्ञाननिरूपितनीलधूमनिष्ठप्रकारतानिरूपित–अवच्छेदकतातन्निरूपकप्रकारता – नीलधूमनिष्ठप्रकारता । तन्निरूपित – अवच्छेदकता । पर्याप्त्यधिकरणं नीलत्वविशिष्ट-धूमत्वम् । तत्पर्याप्त्यनधिकरणं केवलधूमत्वम् । तद्घटितत्वं नीलत्वविशिष्टधूमत्वेऽस्तीति तदघटितत्वविरहात् नीलधूमत्वस्य न व्याप्यतावच्छेदकत्वम् । धूमत्वं कुतः नीलधूमत्वपर्याप्तावच्छेदकतानिरूपितप्रकारतानिरूपितावच्छेदकतापर्याप्त्यधिकरणं न भवति इति आशङ्कायाम् आह – **शुद्धधूमत्वपर्याप्त** इति । ''धूमवान् पर्वतः'' इति ज्ञानीयधूमनिष्ठप्रकारतानिरूपित-अवच्छेदकता धूमत्वपर्याप्ता । अतः शुद्धधूमत्वपर्याप्त-अवच्छेदकताकप्रकारता अन्या । ''नीलधूमवान् पर्वतः'' इति ज्ञानीया नीलत्वविशिष्टधूमत्वपर्याप्त–अवच्छेदकताकप्रकारता च अन्या । अवच्छेदकभेदेन प्रकारतयोः भेदात् । तस्मात् नीलत्वविशिष्टधूमत्वपर्याप्तावच्छेदकताकप्रकारता ''नीलधूमवान् पर्वतः'' इति ज्ञानीयप्रकारतैव । तन्निरूपितावच्छेदकतापर्याप्त्यधिकरणं नीलत्वविशिष्टधूमत्वम् । अनधिकरणं धूमत्वम् इति भावः ।

ननु एवम् इति । स्वसमानाधिकरणव्याप्यतावच्छेदकधर्मान्तराघटितस्यैव व्याप्यतावच्छेदकत्वस्वीकारे वन्हिमदन्यावृत्तित्वस्य वन्हिव्याप्यतावच्छेदकत्वानुपपत्तिः । तथा हि – ''पर्वतः वन्हिमान् धूमात्'' इतिवत् ''पर्वतः वन्हिमान् वन्हिमदन्यावृत्तेः'' इत्यपि अनुमानप्रयोगः इष्यते । धूम एव वन्हिमदन्यावृत्तित्वेन रूपेण हेतुः । अत्र वन्हिमदन्यावृत्तित्वं वन्हिव्याप्यतावच्छेदकम् । तत्र वन्हित्वं घटकम् । वन्हित्वमपि वन्हिव्याप्यतावच्छेदकम् । तथा च स्वसमानाधिकरणं = वन्हिमदन्यावृत्तित्वसमानाधिकरणं वन्हिव्याप्यतावच्छेदकं च यत् धर्मान्तरं वन्हित्वं तद्घटितत्वात् वन्हिमदन्यावृत्तित्वस्य वन्हिव्याप्यतावच्छेदकत्वं न स्यात् इति आक्षेपः । वन्हिमदन्यावृत्तित्वं वन्हावपि वर्तते । तत्र वन्हित्वमस्तीति वन्हित्वं वन्हिमदन्यावृत्तित्वसमानाधिकरणम् । वह्नेः वन्हिव्याप्यतया वन्हित्वं वन्हिव्याप्यतावच्छेदकम् । एवं वन्हित्वं वन्हिमदन्यावृत्तित्वापेक्षया भिन्नत्वाच्च

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

धर्मान्तरम् । तदघटितत्वविरहात् वन्हिमदन्यावृत्तित्वस्य व्याप्यतावच्छेदकत्वानुपपत्तिः ।

ननु धर्मान्तराघटितत्वं विशेष्यविधया धर्मान्तरघटितं यत् तदन्यत्वम् । धूमत्वस्य विशेष्यविधया नीलधूमत्वघटकत्वात् नीलधूमत्वं विशेष्यविधया धूमत्वघटितं भवति । वन्हिमदन्यावृत्तित्वे तु वन्हित्वं न विशेष्यविधया घटकम् । किन्तु विशेषणविधया घटकम् ।अतः विशेष्यविधया वन्हित्वाघटितत्वात् वन्हिमदन्यावृत्तित्वस्य वन्हिव्यापकतावच्छेदकत्वम् उपपद्यते इत्याशङ्क्य आह – **धूमान्यान्यत्वादेः** इति । नीलधूमत्वं यथा न व्याप्यतावच्छेदकम्, तथा धूमान्यान्यत्वमपि न व्याप्यतावच्छेदकम् । धूमत्वापेक्षया गुरुत्वात्, धूमत्वघटितत्वाच्च । विशेष्यविधया व्याप्यतावच्छेदकधर्मान्तराघटितत्वविवक्षायां धूमान्यान्यत्वे धूमत्वस्य विशेषणतया घटकत्वात् विशेष्यतया धूमत्वाघटितत्वम् अस्ति इति व्याप्यतावच्छेदकत्वं प्रसज्यते । अतः विशेष्यविधया धर्मान्तरस्य अघटकत्वं न विवक्षितुं शक्यते । विशेषणविधया वा विशेष्यविधया वा धर्मान्तरघटितं यत् तदन्यत्वमेव धर्मान्तराघटितत्वम् इति वक्तव्यम् इति विशेषणविधया वन्हित्वघटितस्य वन्हिमदन्यावृत्तित्वस्य वन्हिव्याप्यतावच्छेदकत्वानुपपत्तिः तदवस्था ।

समाधत्ते – **स्वसमानाधिकरणपदेन** इति । स्वसमानाधिकरणपदेन स्वव्यापकत्वं विवक्षितम् । तथा च स्वव्यापकं यत् व्याप्यतावच्छेदकं धर्मान्तरं तदघटितस्यैव व्याप्यतावच्छेदकत्वम् इति नियमस्य स्वरूपम् । यत्र यत्र नीलधूमत्वं तत्र धूमत्वम् इति नीलधूमत्वव्यापकं धूमत्वम् । तद्घटितं नीलधूमत्वम् । परन्तु वन्हिमदन्यावृत्तित्वघटकं वन्हित्वं यद्यपि वन्हिमदन्यावृत्तित्वसमानाधिकरणम् – वन्हिमदन्यावृत्तित्वाधिकरणवन्हिवृत्तित्वात् –, तथापि न वन्हिमदन्यावृत्तित्वव्यापकम् । वन्हिमदन्यावृत्तित्वाधिकरणे धूमे अवृत्तेः । अतः स्वपदेन वन्हिमदन्यावृत्तित्वं ग्रहीतुं न शक्यते । किन्तु नीलधूमत्वादिकमेव । तथा च

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

स्वव्यापकधर्मान्तरघटितं यत् नीलधूमत्वादिकं तदन्यत्वं वन्हिमदन्यावृत्तित्वे अस्तीति तस्य व्याप्यतावच्छेदकत्वोपपत्तिः ।

ननु धर्मान्तरे स्वव्यापकत्वनिवेशेऽपि धूमालोकान्यतरत्वस्य वन्हिव्याप्यतावच्छेदकत्वापत्तिः । तथा हि – स्वपदेन धूमालोकान्यतरत्वं गृहीत्वा तद्धटकं यत् व्याप्यतावच्छेदकं धर्मान्तरं धूमत्वम् आलोकत्वं च तद्धटितत्वात् धूमालोकान्यतरत्वस्य वन्हिव्याप्यतावच्छेदकत्वं नास्तीति वक्तव्यम् । परन्तु धूमत्वालोकत्वयोः धूमालोकान्यतरत्वव्यापकत्वविरहात् स्वपदेन धूमालोकान्यतरत्वं ग्रहीतुं न शक्यते । किन्तु नीलधूमत्वादिकमेव । तदन्यस्य धूमालोकान्यतरत्वस्य व्याप्यतावच्छेदकत्वापत्तिः इति आशङ्क्य आह – **स्वव्यापकत्वं च** इति । धर्मान्तरस्य स्वव्यापकत्वं साध्यसंबन्धितावच्छेदकत्वेन – साध्यव्याप्यतावच्छेदकत्वरूपेण वक्तव्यम् । धूमत्वस्य आलोकत्वस्य च धूमत्वत्वेन आलोकत्वत्वेन च धूमालोकान्यतरत्वव्यापकत्वविरहेऽपि वन्हिव्याप्यतावच्छेदकत्वेन रूपेण व्यापकत्वम् अस्त्येव । तथा च स्वव्यापकतावच्छेदकसाध्यव्याप्यतावच्छेदकवत्त्वं स्वव्यापकत्वम् इति उक्तं भवति । स्वाधिकरणवृत्त्यन्ताभावप्रतियोगितानवच्छेदकसाध्यव्याप्यतावच्छेदकत्ववत्त्वम् स्वव्यापकत्वम् इति यावत् । इदानीं स्वपदेन धूमालोकान्यतरत्वमपि ग्रहीतुं शक्यते । स्वाधिकरणं – धूमः आलोको वा । तद्वृत्तिः यः अत्यन्ताभावः न "वन्हिव्याप्यतावच्छेदकम् नास्ति" इति प्रतीतिसिद्धोऽभावः । धूमे वा आलोके वा वन्हिव्याप्यतावच्छेदकस्य धूमत्वस्य वा आलोकत्वस्य वा सत्त्वात् । किन्तु "धूमत्वं नास्ति", "आलोकत्वं नास्ति" इति प्रतीतिसिद्धोऽभावः । तत्प्रतियोगितावच्छेदकं धूमत्वत्वम्, आलोकत्वत्वं च । प्रतियोगितानवच्छेदकं वन्हिव्याप्यतावच्छेदकत्वम् तद्वत्त्वं धूमत्वे आलोकत्वे च अस्तीति, स्वव्यापकं धर्मान्तरं धूमत्वं आलोकत्वं च । तद्धटितत्वात् धूमालोकान्यतरत्वस्य तदघटितत्वं नास्ति इति न व्याप्यतावच्छेदकत्वम् इति भावः ।।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

।। सत्प्रतिपक्षनिरूपणम् ।।

कारिकावली

विरुद्धयोः परामर्शे हेत्वोः सत्प्रतिपक्षता ।। ७७ ।।

मुक्तावली

विरुद्धयोः इति । **कपिसंयोगतदभावव्याप्यवत्तापरामर्शेऽपि न सत्प्रतिपक्षत्वम्,** अत उक्तं **विरुद्धयोः** इति । तथा च **स्वसाध्यविरुद्धसाध्याभावव्याप्यवत्तापरामर्श-** कालीन-साध्यव्याप्यवत्तापरामर्शविषयः इत्यर्थः ।।

दिनकरी

विरुद्धयोः परामर्शे हेत्वोः इत्यत्र विरुद्धयोः हेत्वोः परामर्श इति भ्रमवारणाय आह – **स्वसाध्य** इति । स्वं सत्प्रतिपक्षत्वेन अभिमतः हेतुः तत्साध्यविरुद्धः यः साध्याभाव इत्यर्थः ।।

राजीवोल्लासः

विरुद्धयोः परामर्शे इति मूलस्य विरुद्धौ यौ साध्यतदभावौ तत्साधकयोः हेत्वोः परामर्शकाले सत्प्रतिपक्षता इत्यभिप्रायेण साध्यतदभावयोः विरुद्धत्वविशेषण-प्रयोजनम् आह **मुक्तावल्याम्** – **कपिसंयोगतदभाव** इति । कपिसंयोगतदभावयोः विरुद्धत्वविरहात् तद्व्याप्यवत्तापरामर्शकाले न सत्प्रतिपक्षत्वम् इत्यर्थः । **विरुद्धयोः** इत्यस्यापि विरुद्धत्वेन गृह्यमाणयोः इत्यर्थः । तेन अविरुद्धयोरपि कपिसंयोग-तदभावयोः विरुद्धत्वज्ञानकाले उभयव्याप्यवत्तापरामर्शसत्त्वे सत्प्रतिपक्षत्वम् इष्यते । विरुद्धयोः हेत्वोः परामर्शे इत्यर्थे तु ''पर्वतो वन्हिमान् धूमात्'' इत्यादिसद्धेतौ ''वन्ह्यभावव्याप्यपाषाणमयत्ववान् पर्वतः'' इति परामर्शदशायां सत्प्रतिपक्षानुपपत्तिः । हेत्वोः धूमपाषाणमयत्वयोः विरुद्धत्वाभावात् – एकपर्वतवृत्तित्वात् । **प्राचीनैस्तु** तत्रापि सत्प्रतिपक्षाङ्गीकारात् इष्टापत्तिः वक्तुं न शक्यते । अतः विरुद्धयोः

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

साध्यतदभावयोः इत्येव अर्थः वक्तव्यः इत्याशयेन आह – दिनकर्याम् – विरुद्धयोः परामर्शे इत्यादिना ।

।। बाधनिरूपणम् ।।

कारिकावली

साध्यशून्यो यत्र पक्षस्त्वसौ बाध उदाहृतः ।
उत्पत्तिकालीनघटे गन्धादिर्यत्र साध्यते ।। ७८ ।।

मुक्तावली

साध्यशून्य इति । पक्षः पक्षतावच्छेदकविशिष्ट इत्यर्थः । तेन घटे गन्धसत्त्वेऽपि न क्षतिः । एवं ''मूलावच्छिन्नः वृक्षः कपिसंयोगी'' इत्यत्रापि बोध्यम् ।।

इति श्रीविश्वनाथपञ्चाननभट्टाचार्यविरचितायां
सिद्धान्तमुक्तावल्याम् अनुमानखण्डः ।।

दिनकरी

ननु ''उत्पत्तिकालीनघट'' इत्यादिमूलोक्तम् अयुक्तम् । तत्र पक्षे घटे गन्धशून्यत्वाभावात्, अत आह – पक्षतावच्छेदक इति । कालस्येव देशस्यापि पक्षतावच्छेदकत्वे बाधसम्भवात् तदप्रदर्शनेन मूलस्य न्यूनतां परिहर्तुम् आह – एवम् इति । बोध्यम् इति । तत्र पक्षे वृक्षे संयोगसत्त्वेऽपि पक्षतावच्छेदकमूलावच्छेदेन संयोगाभावात् इति भावः ।।

इति श्रीभारद्वाजकुलाम्बुधिपूर्णचन्द्रबालकृष्णभट्टात्मज-
महादेवभट्टविरचिते मुक्तावलीप्रकाशे अनुमानखण्डः ।।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

राजीवोल्लासः

ननु उत्पत्तिकालीनघटे इति । यत्र पक्षः साध्यशून्यः असौ बाधः इत्युक्त्वा तस्य उदाहरणतया ''उत्पत्तिकालीनघटो गन्धवान्'' इति स्थलं प्रदर्शितं मूले । परन्तु पक्षे घटे गन्धस्य सत्त्वात् गन्धशून्यत्वविरहात् कथं बाध इत्याशङ्क्य **साध्यशून्यो यत्र पक्षः** इत्यत्र पक्षशब्दस्य पक्षतावच्छेदकविशिष्ट इत्यर्थः । तेन पक्षतावच्छेदकविशिष्टपक्षे साध्यशून्यत्वं बाधः इति लभ्यते । ''उत्पत्तिकालीनो घटः गन्धवान्'' इत्यत्र उत्पत्तिकालः पक्षतावच्छेदकः तद्विशिष्टे घटे गन्धाभावात् बाधः संभवति इत्याशयेन **पक्षः पक्षतावच्छेदकविशिष्टः** इत्युक्तं मूक्तावल्याम् इति भावः । **कारिकावल्यां** कालरूपपक्षतावच्छेदकविशिष्टे साध्यशून्यत्वस्य उदाहरणं प्रदर्शितम् । परन्तु देशरूपपक्षतावच्छेदकविशिष्टे साध्यशून्यत्वमपि बाधः । तस्य उदाहरणं **कारिकावल्यां** न प्रदर्शितं इति न्यूनतां परिहर्तुं मुक्तावल्याम् ''एवम्'' इत्यादिना उदाहरणं प्रदर्शितम् इति आह – **कालस्येव इति । बाधसंभवात् इति ।** बाधरूपस्य हेत्वाभासस्य संभवात् इत्यर्थः ।।

।। शुभं भूयात् ।।

दिनकर्यनुमानस्य राजीवोल्लासनामिका ।
रामानुजकृता व्याख्या सरला समपूर्यत ।।

इति श्रीरामानुजताताचार्यविरचिते दिनकरीव्याख्याने राजीवोल्लासे
अनुमानखण्डः ।।

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri



CC0. Vasishtha Tripathi Collection. Digitized by eGangotri